6.1 61 4/71

आचार्यविष्णुगुप्तविरचितं

कौटलीयार्थशास्त्रम्

पञ्चटीकोपेतम्

(द्वितीयभागस्य प्रथमं सम्पुटम्)

सम्पादकः

आचार्यश्रीविश्वनाथशास्त्रिदातारः

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः
वाराणसी

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 130]

KAUṬALĪYAMARTHAŚĀSTRAM

OF

ĀCĀRYA VIṢṆUGUPTA

[VOLUME TWO, PART ONE]

With Four Commentaries

'ŚRĪMŪLĀ'

BY

T. GAṆAPATI ŚĀSTRĪ

'CĀṆAKYAṬĪKĀ'

BY

ŚRĪ BHIKṢUPRABHAMATI

'PRATIPADAPAÑCIKĀ'

BY

ŚRĪ MADBHAṬṬASVĀMĪ

&

'NĪTINIRṆĪTI'

BY

ŚRĪ YOGGHAMĀCĀRYA

EDITED BY

ŚRĪ VIŚVANĀTHA ŚĀSTRĪ DĀTĀRA

Ex. Head of Department,

Prācīnarājaśāstrārthaśāstra-Department

Sampurnanand Sanskrit University

Varanasi

VARANASI

1991

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

[Published under the Rare Texts Publication Scheme of Sarasvati Bhavana Library with financial assistance provided by University Grants Commission.]

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi–221 002.

First Edition, 1000 Copies
Price: Rs. 160·00

Printed by—
VIJAYA PRESS,
Sarasauli, Varanasi.

सरस्वतीभवन-ग्रन्थमाला

[१३०]

आचार्यविष्णुगुप्तविरचितं

कौटलीयमर्थशास्त्रम्

[द्वितीयभागस्य प्रथमं सम्पुटम्]

म० म० टी० गणपतिशास्त्रिकृतया 'श्रीमूला'व्याख्यया

श्रीभिक्षुप्रभमतिकृतया 'चाणक्यटीका'व्याख्यया

श्रीमद्भट्टस्वामिकृतया 'प्रतिपदपञ्चिका'व्याख्यया

श्रीयोग्घमाचार्यकृतया 'नीतिनिर्णीति'व्याख्यया च

विभूषितम्

सम्पादकः

'शास्त्ररत्नाकर'श्रीविश्वनाथशास्त्रिदातारः

पूर्वविभागाध्यक्षः,

प्राचीनराजशास्त्रार्थशास्त्रविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणसी

वाराणस्याम्

२०४८ तमे वैक्रमाब्दे   १९१३ तमे शकाब्दे   १९९१ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

[सरस्वतीभवनपुस्तकालयस्य प्रकाशनसम्बन्धिविशेषयोजनान्तर्गतं
विश्वविद्यालयानुदानायोगतः प्राप्तवित्तीयसाहाय्येन प्रकाशितम्]

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी—२२१ ००२.

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी—२२१ ००२.

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्— १६०=०० रूप्यकाणि

मुद्रकः—
विजय-प्रेस,
सरसौली, वाराणसी।

प्ररोचना

बहोःकालात् प्रतीक्ष्यमाणा दियङ्गतैः पण्डितराजराजेश्वरशास्त्रिद्राविडैः सम्पादिता कौटलीयार्थशास्त्रकृतिरधुना प्रकाश्यतामानीयत इति महान्तं परितोषमनुभवामि। आजीवनं पण्डितवर्यैरस्य महतो ग्रन्थस्य वैदिकसिद्धान्तानुसारं निर्वचने प्रायाति। श्रीयोग्घमाचार्यप्रणीता 'नीतिनिर्णीतिनाम्नी' प्राचीना टीका, श्रीगणपतिशास्त्रिभिर्विरचिता 'श्रीमूला' टीका, श्रीभिक्षुप्रभमतिकृता 'चाणक्यटीका', श्रीमद्भट्टस्वामिप्रणीता 'प्रतिपदपञ्चिका' टीकाश्चाप्यत्र सङ्गृहीताः। आसां टीकानां समुच्चयेनार्थशास्त्रग्रन्थस्य गूढा अर्थाः सुखं ग्राह्याः।

खेदस्यायं विषयः पण्डितराजानां परिश्रमं तेषां जीवनकाले मुद्रणावसरं नालभत। तेषां प्रमुखैः शिष्यैः श्रीविश्वनाथशास्त्रिदातारैः पाण्डुलिपेष्टीकाभिः संयोजनं सादरं सपरिश्रमं च सम्पन्नम्।

अनया भूमिकया सर्वांशतः सह ऐक्यमत्यमादधानोऽपि अस्याः प्रौढिं सोपपत्तित्वञ्च प्रशंसितुमर्हामि। प्रस्तुतस्यार्थशास्त्रसंस्करणस्येदमेव वैशिष्ट्यं यत्तस्य निर्वचनस्य सर्वे पक्षाः समुद्घाटिताः। तेन विदुषां स्वकीयमतनिर्धारणे सौकर्यं भविष्यति। श्रीदातारशास्त्रिणो द्वौ सहयोगिनौ श्रीजगन्नाथशास्त्रितैलङ्ग-श्रीलक्ष्मीकान्तखनङ्गौ आस्ताम्। तयोः श्रमोऽधुना सफलः।

कौटलीयमिति अभिधानमधुना विदुषां बहुतरेणादरास्पदम्। कौटलीयमित्येवाभिधानमाद्रियन्ते बहुशो बुधाः। कुटलगोत्रे विष्णुगुप्तस्य जातत्वात् कौटल्यस्य कौटलीयस्योपपन्नत्वात्। भवतु, कौटिलीयमर्थशास्त्रं कतिभिश्चित् पाश्चात्यैः छलयुक्तिप्रधानं राजशास्त्रमिति मन्यते; किन्तु शास्त्ररीत्या समग्रपरीक्षणेन चायं भ्रम एव प्रतीयते। यतो हि भ्रम एवास्य शास्त्रस्य मूलम्। राज्ञा विद्याविनीतेनैव वर्तितव्यमिति प्रोक्तवता कौटल्येनैवमुक्तम्—"श्रुताद्धि प्रज्ञोपजायते, प्रज्ञया योगः, योगादात्मवत्ता, इति विद्यासामर्थ्यम्"।

अनेन वचनेन स्वतःसिद्धं कौटलीयार्थशास्त्रस्य आत्मविद्यामूलत्वम्। वस्तुतो दृष्टस्यादृष्टस्य च, लौकिकस्य लोकोत्तरस्य च, दैहिकस्य आत्मिकस्य च जगतः पार्थक्यं शास्त्रकारैर्न विचोयते स्म। एतादृशोरुभयोर्युग्मयोः परस्परमुपकारित्वमेवाभिमतमस्ति। पण्डितराजकृतः श्रम इममेवार्थं समुपपादयतीति नो हर्षः।

मन्ये, कौटलीयार्थशास्त्रस्य प्रस्तुतं संस्करणं प्राचीनराजशास्त्राध्ययने काञ्चन नूतनां सरणिं विवरिष्यति। साम्प्रतं चतुर्षु खण्डेषु विभक्तोऽयं ग्रन्थः प्रकाश्यतां गच्छतीति महते परितोषाय। अत्र संलग्नाः सर्वे पण्डिता अभिनन्दनार्हाः।

वाराणस्याम्,
मौनी-अमावास्यायाम्,
२०४७ वैक्रमाब्दे
(१५-१-१९९१ खैस्ताब्दे)

विद्यानिवासमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

प्राक्कथनम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन सरस्वतीभवनस्थानां महत्त्वपूर्णानामप्रकाशितानां पाण्डुलिपीनां मुद्रणाय तथा दुर्लभानां मुद्रितग्रन्थानां पुनः प्रकाशनाय चैका योजना पञ्चमपञ्चवर्षीययोजनायां विश्वविद्यालयानुदानायोगसमक्षं प्रेषिताऽऽसीत्। आयोगेन च नियोजितस्य निरीक्षकमण्डलस्य संस्तुतिमनुसृत्य प्रकाश्यमानग्रन्थानां महत्तां चोररीकृत्य स्वीकृतिः प्रदत्ता। अस्यां प्रक्रियायां वर्षद्वयं व्यतीतम्। अवशिष्टयोजनावधेरल्पत्वात्, अत्रत्यप्रकाशनविभागे कार्यबाहुल्यात्, योजनायाश्च सरस्वतीभवनद्वारा प्रस्तुतत्वात् कार्यस्य शीघ्रमेव सम्पादनार्थं निम्नाङ्कितानां विश्वविद्यालयीयविदुषामेका समितिर्निर्मिता—

अध्यक्षः

प्रो० बदरीनाथशुक्लः (कुलपतिः)

सदस्याः

१. प्रो० जगन्नाथोपाध्यायः (पालिविभागाध्यक्षः, श्रमणविद्यासङ्कायाध्यक्षश्च)
२. श्रीव्रजवल्लभद्विवेदः (साङ्ख्ययोगतन्त्रागमविभागाध्यक्षः)
३. डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री' (निदेशकः, अनुसन्धानसंस्थानस्य)
४. श्रीबलिरामशास्त्री भारद्वाजः (उपपुस्तकाध्यक्षः, हस्तलिखितानुभागे)
५. श्रीजनार्दनपाण्डेयः (सरस्वतीभवनस्थः)
६. श्रीलक्ष्मीनारायणतिवारी (पुस्तकाध्यक्षः, समितेः संयोजकः)

संयोजकस्य श्रीलक्ष्मीनारायणतिवारिणः सततप्रयत्नेन अनया समित्या प्रकाशनार्हग्रन्थानां चयनम्, तेषां सम्पादनव्यवस्था, मुद्रणव्यवस्था च तत्परतया सम्यक् प्रारब्धा।

सम्पाद्यमानग्रन्थेषु संस्कृतपालिवाङ्मयस्य प्रायः समस्तप्रमुखविषयाणां महत्त्वपूर्णाः समुपयोगिनश्च ग्रन्थास्समावेशिताः, तत्तत्सम्पादनकार्यभारो विश्वविद्यालयस्य विद्वद्भ्यः, सम्बद्धविषयाणां कतिपयेभ्यो बहिष्ठविद्वद्भ्यश्च समार्प्यत।

अस्यामेव योजनायां प्रकाश्य प्रस्तूयत इदं कौटलीयमर्थशास्त्रं बहुभिरतिप्रसिद्धटीकाटिप्पणीसंवलितम्, शास्त्ररत्नाकरविश्वनाथशास्त्रिदातारेण सम्पादितम्।

अर्थशास्त्रं हि पूर्वाचार्यैर्भारतदेशस्य सुखशान्तिसमृद्धये त्रिवर्गोन्नतये च निर्माय राष्ट्रस्य पुरतः समुपस्थापितम्। तद् अतिविस्तृततया दुरूहं जातम्, तत्रत्याः कतिपयेंऽशा उत्सन्नकल्पा अभूवन्निति कामसूत्रादिनिर्दिष्टहेतुभिर्ज्ञायते। आचार्यः कौटल्यः सम्पूर्णम् अर्थशास्त्रं वेदञ्च अधीत्य वैदिकमर्यादाया लोकयात्रासाधनत्वञ्चानुभूय तत्सङ्ग्रहभूतमेकम् अर्थशास्त्रं निर्मितवान्। यदर्थमुपजीव्य रामराज्यं धर्मराजराज्यं चन्द्रगुप्तमौर्यराज्यं च स्वर्णयुगायते। तदिदमर्थशास्त्रं पञ्चदशाधिकरणं सार्धशताध्यायं साशीतिप्रकरणशतं षट्सहस्रश्लोकात्मकमुपलभ्यते। तस्येयं प्रतिज्ञा "पृथिव्या लाभे

पालने च'''इदमर्थशास्त्रं कृतम्" (को० अ० १।१) इति। तच्च सर्वेष्वपि देशेष्वद्यावधि उत्कृष्टतमं चकास्तीति सर्वैराधुनिकैर्विपश्चिदपश्चिमैरपि सत्क्रियते।

अस्यार्थशास्त्रस्य परम्परायामध्ययनाध्यापनद्वारा कतिपयाष्टीका अपि बभूवुः, याः समवलोक्य जयमङ्गलाभिधेयां टीकां **श्रीशङ्करार्यो** निर्मितवानिति तट्टीकातो ज्ञायते। इयं टीका केवलं प्रथमाधिकरणे उपलब्धा १९५८ ई० वर्षे प्रकाशिता। **श्रीगणपतिशास्त्रिभिः** १९२४ ई० वर्षे अनन्तशयने राजकीयमुद्रणालये सम्पादनपूर्वकं 'श्रीमूला'ख्या स्वरचिता टीका प्रकाशिता।

'नीतिनिर्णीति'नाम्नी टीका **श्रीयोग्घमाचार्यविरचिता** २०१६ वै० संवत्सरे मुम्बापुरीस्थभारतीयविद्याभवनतः सिन्धीजैनग्रन्थमालाद्वारा प्राकाशि। एतट्टीका-त्रितयसत्त्वेऽपि न्यायव्याकरणादिशास्त्राध्ययनपरम्परावद् अर्थशास्त्राध्ययनपरम्परा भारतदेशे समभूदिति न दृश्यते। अत उत्कृष्टतममिदमर्थशास्त्रमधिकृत्य 'प्राचीन-भारतीयशासनपद्धतिप्रभृतिष्वनेकेषु ग्रन्थेषु विद्वद्भिर्नैके आक्षेपा उद्भाविताः। यतोऽस्य अप्रामाण्यं जनेषु जागर्ति। तन्निरासाय **"विश्वविद्यालय-अनुदान-आयोगेन"** इदमनुभूतं यत् स्वसाहाय्येन पदवाक्यप्रमाणपारावारीणा विद्वांसोऽर्थशास्त्रव्याख्यानाय प्रेरणीयाः। प्रातस्स्मरणीया गुरुचरणाः पद्मभूषणादिविविधविरुदावलीसमलङ्कृताः श्रीमतः **स्व० पण्डितराजराजेश्वरशास्त्रिद्रविडमहाभागाः** संस्कृतविश्वविद्यालया-धिकारिभिः एतदर्थं सानुरोधं प्रार्थिताः। एतैर्द्वादशवर्षाधिकवर्षमर्थशास्त्रमधीत्य राजनीतिवर्गं संस्थाप्य विद्यार्थिनोऽध्यापिताः। ततः 'वैदिकसिद्धान्तसंरक्षिणी'ति नाम निधाय अर्थशास्त्रं व्याख्यातम्। प्रायः अष्टमशताब्द्यां शङ्करार्यैः(शङ्कराचार्यैः) निर्मितां 'जयमङ्गलाम्' अधिकृत्य आधुनिकविद्वदुद्भाविताः शङ्का आन्वीक्षिकीद्वारेण निरस्य क्रोडपत्रमपि व्याख्यातम्।

अधीतेषु विद्यार्थिवृन्देषु शास्त्ररत्नाकरादिभूषाभूषणैः **पण्डितश्रीविश्वनाथ-शास्त्रिदातारैरधीत्य** गुरुचरणकृतं व्याख्यानम् अन्याश्च टीका हृदयङ्गमय्य तन्निर्देशा-नुसारेण 'वैदिकसिद्धान्तसंरक्षिणी-जयमङ्गलाक्रोडपत्रयोः' सङ्कलनं सम्पादनञ्च विहितम्। एतट्टीकाद्वयोपेतं 'श्रीमूला'दिटीकात्रितयसहितमर्थशास्त्रं प्रथमाधिकरण आदितः पञ्चमाध्यायान्तं विदुषां पुरत उपायनीक्रियते। आशास्यते यद् विद्वद्वरेण्या ग्रन्थ-रत्नमिदमादितोऽन्तपर्यन्तं समवलोड्य अधीति-बोधाचरणप्रचारणैः सर्वसाधारणजनेषु रुचिमुत्पाद्य एतद्देशस्य सुखशान्तिसमृद्धये सहयोगं प्रदास्यन्ति।

विस्तृतं टीकाग्रन्थं दातारशास्त्रिभिः सङ्क्षिप्य भूमिकायां सर्वोऽपि विषयः समालोचितः, यत्र नीतिलक्षणादिकं सर्वं स्फुटीभवति, भवति च शङ्कानां समाधानमपि। विश्वस्यतेऽग्रिमं सम्पुटमप्यचिरेण प्रकाशमेष्यति।

वाराणस्याम्,
कार्तिकपूर्णिमायाम्,
वि० सं० २०३७
(२२-११-१९८० खैस्ताब्दे)

वदरीनाथशुक्लः
तदातीन्तनः कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

सम्पादकीयं वक्तव्यम्

भारतवर्षस्य अभ्युन्नतिः वेदेन 'न मे स्तेनो जनपदे' इत्यादिना प्रदर्शिता। तत्परम्परा एतद्देशे पूर्वतनराज्येषु वंशपरम्परायां समुदीयते स्म। साम्प्रतं तु अस्यां शताब्द्यां विशेषतो भारतदेशे वर्तमानामशान्तिमनुरुद्धय तन्निवारणोपायं चिन्तयद्भिः श्रीगुरुदेवैः श्रीमद्भिः पण्डितराजराजेश्वरशास्त्रिद्रविडचरणैः राजशास्त्रचिन्तन-प्रचारणं विना देशे शान्तिर्न भविष्यतीति ज्ञात्वा प्रथमतो जयमङ्गलासहितः कामन्दकीय-नीतिसारः अमलनेरनगरस्थपुस्तकागारात् सम्प्राप्तः। तत्र 'विद्याप्रतिबद्धत्वाल्लोक-स्थितेः' इत्युपलभ्य श्रीचरणैः राजनीतिं पर्यालोचयितुं राजनीतिवर्गो वाराणसेये रामघट्टस्थिते व० शा० साङ्गवेदविद्यालये महाराजश्रीकाशीनरेशसान्निध्ये तत्कालीन-बिहारराज्यपालश्रीअणेकरकमलद्वारा पञ्चविंशतिवर्षेभ्यः पूर्वं संस्थापितः। तत्र स्व० गुरुवर्यं हरिरामशास्त्रिशुक्ल-गणपतिशास्त्रिहेब्बार-रामचन्द्रशास्त्रिहोसमने-जयरामशास्त्रिशुक्ल-स्व० नटराजऐय्यरप्रभृतिभिः सह अहमपि प्रविष्टः। तत्र गुरुचरणैः महता श्रमेण नीतिसारः कण्ठस्थीकृत्य समुपस्थितनैकविधप्रश्नजालसमाधानपुरस्सरम् अध्यापितः। तत्र तत्र देशान्तरेषु गत्वा तैरस्माभिश्च राजशास्त्रं व्याख्यानमालाभिः संश्रावितं प्रसारितं च। सर्वेषां श्रोतॄणां रुचिं ज्ञात्वा 'राजनीतिशास्त्र का दिग्दर्शन', 'शान्ति का अग्रदूत' इति पुस्तकद्वयं प्रकाशितम्।

ततो गुरुभिः जयमङ्गलादिटीकोपेतं कौटलीयमर्थशास्त्रमध्यापितम्, तत्रोपवर्णितेन विषयेण अस्माभिः सर्वैरपि निरणायि यद् भारतदेशे वर्णाश्रमप्रधाने समेषामेकरूपता-सम्पादकं सत्त्वं धृतिभावापरपर्यायम् आसीत्, अस्ति च। एतदाश्रयं विना क्वचिदपि सुखं शान्तिः समृद्धिश्चात्भावेन सर्वेषां सम्प्रदायानां मानवानां वाऽस्तित्वं च न भवितु-मर्हति। एतच्छास्त्रनिर्देशानुसारेण देशे विद्याप्रचारकार्यमेव नैतिकं प्राथमिकं कार्यं विदुषाम्, इति विज्ञाय अर्थशास्त्रस्य चर्चा पुनरपि चर्चिता। तत्र अनेकविधाः शङ्का आधुनिकैः समुपस्थापिताः, आन्वीक्षिकीमीमांसामर्यादया कार्यकारणभावविवेचनपुरस्सरं समाहिताः। एतदेवानुरुद्ध्य रामायण-महाभारत-पुराणादिग्रन्था अपि यदि समा-लोच्येरन्, तर्हि समाजस्य आन्ध्यं व्यपगतं भवेदिति ज्ञात्वा राजनीतिवर्गे प्रविष्टैः स्वकार्यारम्भः समालोचितः। तदानीमेव तत्कालीनकुलपतिश्रीसुरतिनारायणमणि-त्रिपाठिभिः साहाय्यं सम्प्रदाय विशेषतया प्रोत्साहिता गुरुचरणाः। ततः श्रीगौरीनाथ-शास्त्रिभिरुपकुलपतिभिः राजनीतिवर्गं स्वयमुपस्थाय अर्थशास्त्रमधिकृत्य निबन्धः प्रकाशितो भवत्विति अभिप्रायः प्रकटितः। नवीनग्रन्थनिर्माणेऽस्माकं सामर्थ्यमननुभूय गुरुशिष्यसंवाद एव ग्रन्थरूपेण प्रकाशनीय इत्यपि अभ्यधायि। ततः पुनरपि आदितः अर्थशास्त्रं गुरुचरणैरध्यापितं व्याख्यानमालारूपेण। तत्र प्रथमाधिकरणे चतुर्दशा-ध्यायान्तमेव अध्ययनाध्यापनयोर्महान् समयः समतिक्रान्तः। तस्य सम्पादनं सङ्कलनञ्च

अनेन शरीरेण कर्तव्यमस्तीति गुरुचरणानामादेशः समभूत्। तमनुरुद्ध्य परिश्रम-पुरःसरम् उक्तसंवादस्य सङ्कलनम् अनेकैः वर्षैः कृतमद्य विदुषां सेवायां कथञ्चन समुपस्थापयितुं प्राभवम्।

अर्थशास्त्रकर्ता चाणक्यस्तस्मिन् समये प्रादुर्भूतः, यत्र नीतिशास्त्रस्य विलोप-प्रसक्त्या सह देशे सत्त्वगुणस्योन्मूलनमेव प्रसक्तमासीत्। अनेनैवाचार्येण सर्वाणि शास्त्राणि चतुरो वेदानधीत्य सत्त्वोन्मूलनकारणमनुशील्य आन्वीक्षिक्या सह त्रय्यादिविद्यानां संस्थापनं कृतम्। राज्यञ्च धर्मप्रधानं व्यवस्थापितम्, यद्धि ऐतिहासिकानां मतानु-सारेणापि स्वर्णयुगायते स्म। अनेनैव सिद्ध्यति यद् अनेन आचार्येण पाटलिपुत्रमवस्थाय चन्द्रगुप्तं मौर्यं राज्यपदे समभिषिच्य स्वयं शमप्रधानः सन् सत्त्वमेव संस्थापितवान्। सोऽयमाचार्य इतः पूर्वं चतुर्विंशतिवर्षशतकपूर्वमवनीतलं भूषयामासेति न्यायवार्तिक-भूमिकाकर्तृभिः उद्धृतात् चतुर्विंशतितमतीर्थङ्करजैनाचार्यवाक्याद् उन्नीतम्। अर्थशास्त्रस्य पदानि गुरुपरम्पराध्ययनाभावाद् दुरवगाहानीति ज्ञात्वा गुरुचरणैः अर्थशास्त्रस्य टीकाः सङ्कलिताः। तासु समग्रस्य अर्थशास्त्रस्य टीका स्व० म० म० पं० त० गणपतिशास्त्रिभिः प्रणीता दृष्टा।

एते काञ्चिमण्डलपतेः श्रीमूलरामवर्ममहाराजस्य कृपापात्राणि स्वं व्याख्यानं श्रीमूलेतिनाम्ना सम्पादितवन्तः।

जयमङ्गलानाम्नी टीका मद्रप्रान्ते प्रकाशिता। इयं कामन्दकीयटीका-वाक्यसादृश्यात् प्रामाणिकत्वाच्च, शङ्करार्यैरेव विरचितेति मन्यते। सापि केवलं प्रथमाधिकरण एव प्रकाशनभावं प्राप्ता। नीतिनिर्णीतिरपि केषुचित्स्थलविशेषेषु तदीयाभिप्रायं द्योतयति। सा सिन्धीजैनग्रन्थमालायामाचार्यजिनवरमुनिवरसङ्गृहीता उपलब्धा। एषैव स्वकीयपाठाख्याने सामग्री अभूत्।

एतदर्थशास्त्रस्य समस्तटीकासहितस्य प्रकाशनं अशक्यप्रायमस्तीति मन्वान एवासम्; परं श्रीजगन्नाथोपाध्याय-(पालिविभागाध्यक्षः) प्रभृतिविदुषां प्रोत्साहनमुपलभ्य वर्तमानश्रीकुलपतिभिरेतत् प्रकाशनं प्रतिज्ञायाहमादिष्टस्तदर्थम्।

अस्य समग्रस्य प्रकाशनं भागत्रयेण कर्तव्यम्। एकस्मिन् भागे सम्पुटद्वयं भविष्य-तीत्यपि निर्णीतं गुरुचरणैः, कृतस्य व्याख्यानस्य अतिदीर्घत्वात्।

एतत्कार्यसम्पादने श्री पू० महाराजैः श्रीविभूतिनारायणसिंहमहाभागैः कृतेन प्रोत्साहनेन एतावद्दूरम् अहमागत इति तेषामुपकृतिं स्मरामि।

श्रीगुरुचरणव्याख्यानस्य सङ्कलितस्य शुद्धिः स्व० गुरुचरणैर्हरिरामशास्त्रिभिः शुक्लमहाभागैः सम्पादिता। तथैवाग्रे तैर्विधास्यत इत्याशायां स्थितस्तेषां वियोगेन खिन्नमनास्तेषां चरणौ स्मरन् तदुक्तिं शरणं मन्यमान आसम्।

एतत्सामग्रीसम्पादने साहाय्यं साङ्गवेदविद्यालयाध्यक्षैः श्रीरामचन्द्रशास्त्रि-होसमनेमहाभागैः पुस्तकं प्रदाय कृतम्, तथा गुरुपुत्राभ्यां श्रीविश्वेश्वरशास्त्रि-गणेश्वरशास्त्रिभ्यां पितृचरणानां कृतिः प्रकाश्यतां प्राप्नोतीति श्रुत्वा महता हर्षेण सर्वविधमपि साहाय्यं प्रादायीति तेषां समेषां उपकृतिं सर्वान् सभाजयामि ।

मूलपाठं विभज्य तत्र तत्र शीर्षकं तदेव स्थापितं यद् एन्० एस्० वेङ्कटाचार्यैर्विद्वद्भिः संयोजितमिति तानपि स्मरामि एतत्प्रसङ्गे । श्रीटोणपेगोपालाचार्यैस्तु प्रकाशनाय पुस्तकमेवार्थशास्त्रस्य समर्पितम् । इयं तेषामुपकृतिरपि स्मरणीया वर्तते ।

सम्पादन-प्रकाशनकार्यं च श्रीलक्ष्मीकान्तशास्त्रिखनङ्ग–श्रीजगन्नाथशास्त्रि-तैलङ्गाभ्यां महान् परिश्रमः कृतो वर्तते । तदधमर्णतां भजमानस्तयोरुपकृतिं स्मरामि ।

अस्य प्रकाशने प्रमादाद् अज्ञानाद् मुद्रकदोषाद् असौष्ठवाद् असामर्थ्याच्च अशुद्धयो जाताः प्रकाशनानन्तरमुपलब्धा वर्तन्ते । तदर्थं क्षमस्वेत्युक्तिं विनाऽन्य उपायो नास्ति । इयं प्रथमावृत्तिः, तत्र दोषा भविष्यन्त्येवेति ज्ञात्वा विद्वांसः पाठं शोधयित्वा अधीतिबोधाचरणप्रचारणैः समन्वेष्यन्तीमां कृतिमित्याशास्य विश्वेश-गुरुचरणौ नमन् विरमामीति ।

विदुषां वशंवदः

विश्वनाथशास्त्रिदातारः

विषयानुक्रमणिका

अथाध्यक्षप्रचारो नाम द्वितीयमधिकरणम्

एकोनविंशं प्रकरणम्

प्रथमोऽध्यायः (जनपदनिवेशः) ३-२२

विंशं प्रकरणम्

द्वितीयोऽध्यायः (भूमिच्छिद्रविधानम्) २३-३१

एकविंशं प्रकरणम्

तृतीयोऽध्यायः (दुर्गविधानम्) ३२-५६

द्वाविंशं प्रकरणम्

चतुर्थोऽध्यायः (दुर्गनिवेशः) ५७-६६

त्रयोविंशं प्रकरणम्

पञ्चमोऽध्यायः (सन्निधातृनिचयकर्म) ६७-७४

चतुर्विंशं प्रकरणम्

षष्ठोऽध्यायः (समाहर्तृसमुदयप्रस्थापनम्) ७५-८६

पञ्चविंशं प्रकरणम्

सप्तमोऽध्यायः (अक्षपटले गाणनिक्याधिकारः) ८७-१०१

षड्विंशं प्रकरणम्

अष्टमोऽध्यायः (समुदयस्य युक्तापहृतस्य प्रत्यानयनम्) १०२-११८

सप्तविंशं प्रकरणम्

नवमोऽध्यायः (उपयुक्तपरीक्षा) ११९-१३३

अष्टाविंशं प्रकरणम्

दशमोऽध्यायः (शासनाधिकारः) १३४-१६१

एकोनत्रिंशं प्रकरणम्

एकादशोऽध्यायः (कोषप्रवेश्यरत्नपरीक्षा) १६२-२०२

त्रिंशं प्रकरणम्

द्वादशोऽध्यायः (आकरकर्मान्तप्रवर्तनम्) २०३-२२८

एकत्रिंशं प्रकरणम्

त्रयोदशोऽध्यायः (अक्षशालायां सुवर्णाध्यक्ष) २२९-२५१

द्वात्रिंशं प्रकरणम्

चतुर्दशोऽध्यायः (विशिखायां सौवर्णिकप्रचारः) २५२-२७३

त्रयस्त्रिंशं प्रकरणम्

पञ्चदशोऽध्यायः (कोष्ठागाराध्यक्षः) २७४-२९५

चतुस्त्रिंशं प्रकरणम्

षोडशोऽध्यायः (पण्याध्यक्षः) २९६-३०५

पञ्चत्रिंशं प्रकरणम्

सप्तदशोऽध्यायः (कुप्याध्यक्षः) ३०६-३१४

षट्त्रिंशं प्रकरणम्

अष्टादशोऽध्यायः (आयुधागाराध्यक्षः) ३१५–३२८

सप्तत्रिंशं प्रकरणम्

एकोनविंशोऽध्यायः (तुलामानपौतवम्) ३२९–३४२

अष्टात्रिंशं प्रकरणम्

विंशोऽध्यायः (देशकालमानम्) ३४३-३५५

एकोनचत्वारिंशं प्रकरणम्

एकविंशोऽध्यायः (शुल्काध्यक्षः) ३५६–३६७

द्वाविंशोऽध्यायः (शुल्कव्यवहारः) ३६८-३७४

चत्वारिंशं प्रकरणम्

त्रयोविंशोऽध्यायः (सूत्राध्यक्षः) ३७५-३८२

एकचत्वारिंशं प्रकरणम्

चतुर्विंशोऽध्यायः (सीताध्यक्षः) ३८३-३९६

द्विचत्वारिंशं प्रकरणम्

पञ्चविंशोऽध्यायः (सुराध्यक्षः) ३९७-४०७

त्रिचत्वारिंशं प्रकरणम्

षड्विंशोऽध्यायः (सूनाध्यक्षः) ४०८-४१२

चतुश्चत्वारिंशं प्रकरणम्

सप्तविंशोऽध्यायः (गणिकाध्यक्षः) ४१३-४२१

पञ्चचत्वारिंशं प्रकरणम्

अष्टाविंशोऽध्यायः (नावध्यक्षः) ४२२-४२९

षट्चत्वारिंशं प्रकरणम्

एकोनत्रिंशोऽध्यायः (गोऽध्यक्षः) ४३०-४४२

सप्तचत्वारिंशं प्रकरणम्

त्रिंशोऽध्यायः (अश्वाध्यक्षः) ४४३-४५६

अष्टचत्वारिंशं प्रकरणम्

एकत्रिंशोऽध्यायः (हस्त्यध्यक्षः) ४५७-४६३

द्वात्रिंशोऽध्यायः (हस्तिप्रचारः) ४६४-४७३

॥ इत्यध्यक्षप्रचारो नाम द्वितीयमधिकरणम् ॥

अथ धर्मस्थीयं नाम तृतीयमधिकरणम्

सप्तपञ्चाशाष्टपञ्चाशप्रकरणे

प्रथमोऽध्यायः (व्यवहारस्थापना, विवादपदनिबन्धश्च) ५१७-५३४

एकोनषष्टितमं प्रकरणम्

द्वितीयोऽध्यायः (विवाहसंयुक्तम्) ५३५-५४१

तृतीयोऽध्यायः (सुश्रूषादयः) ५४२-५४६

चतुर्थोऽध्यायः (निष्पतनादयः) ५४७-५५२

षष्टितमं प्रकरणम्

पञ्चमोऽध्यायः (दायविभागः, दायक्रमः) ५५३-५५७

षष्ठोऽध्यायः (अंशविभागः) ५५८-५६१

सप्तमोऽध्यायः (पुत्रविभागः) ५६२-५६६

एकषष्टितमं प्रकरणम्

अष्टमोऽध्यायः (वास्तुकम्) ५६७-५७०

नवमोऽध्यायः (वास्तुविक्रयः) ५७१-५७६

एकषष्टितमद्विषष्टितमे प्रकरणे

दशमोऽध्यायः (विवीतक्षेत्रपथहिंसा समयस्यानपाकर्म च) ५७७-५८३

त्रिषष्टितमं प्रकरणम्

एकादशोऽध्यायः (ऋणादानम्) ५८४-५९१

चतुःषष्टितमं प्रकरणम्

द्वादशोऽध्यायः (औपनिधिकम्) ५९२-५९९

पञ्चषष्टितमं प्रकरणम्

त्रयोदशोऽध्यायः (दासकर्मकरकल्पः) ६००-६०५

षट्षष्टितमं प्रकरणम्

चतुर्दशोऽध्यायः (कर्मकरकल्पः, सम्भूयसमुत्थानञ्च) ६०६-६१०

सप्तषष्टितमं प्रकरणम्

पञ्चदशोऽध्यायः (विक्रीतक्रीतानुशयः) ६११-६१३

अष्टषष्टितमैकोनसप्ततितमसप्ततितमप्रकरणानि

षोडशोऽध्यायः (दत्तस्यानपाकर्म, अस्वामिविक्रयः, स्वस्वामिसम्बन्धश्च) ६१४-६१९

एकसप्ततितमं प्रकरणम्

सप्तदशोऽध्यायः (साहसम्) ६२०-६२२

द्विसप्ततितमं प्रकरणम्

अष्टादशोऽध्यायः (वाक्पारुष्यम्) ६२३-६२५

त्रिसप्ततितमं प्रकरणम्

एकोनविंशोऽध्यायः (दण्डपारुष्यम्) ६२६-६३०

चतुःसप्ततिपञ्चसप्ततितमे प्रकरणे

विंशोऽध्यायः (द्यूतसमाह्वयं प्रकीर्णकानि च) ६३१-६३५

॥ इति धर्मस्थीयं नाम तृतीयमधिकरणम् ॥

❀ ❀ ❀

श्रीमूला-चाणक्यटीका-

प्रतिपद्पञ्चिका-नीतिनिर्णीति-

नाम्नीभिष्टीका -टिप्पणीभिः

संवलितं

कौटिलीयमर्थशास्त्रम्

द्वितीयो भागः

* श्रीविश्वेश्वरः शरणम् *

॥ श्रीगुरुः शरणम् ॥

'श्रीमूला'–'चाणक्यटीका'–'प्रतिपदपञ्चिका'-

'नीतिनिर्णीति'-नाम्नीभिष्टीका-टिप्पणीभिः संवलितं

कौटिलीयमर्थशास्त्रम्

द्वितीयो भागः

अथ अध्यक्षप्रचारो नाम द्वितीयमधिकरणम्

एकोनविंशं प्रकरणम्

प्रथमोऽध्यायः

[स्थानीयादिपरिकर्मित-सारक्षिदुर्गपरिवृतसमीप ग्रामवृन्दविशिष्ट-राष्ट्ररचनाविधिः]

[1]जनपदनिवेशः ।

म० म० त० गणपतिशास्त्रिविरचिता

श्रीमूला

अथाध्यक्षप्रचाराख्यम् द्वितीयमधिकरणमारभ्यते । यथोक्तगुणसम्पन्नो राजा सर्वाणि कार्याणि तत्तदध्यक्षद्वारेणैवाध्यक्षयितुं प्रभवतीत्यतोऽध्यक्षांस्तद्व्यापारांश्च-प्राधान्येनाभिधातुमिदमधिकरणम् ।

तत्रेदं प्रथमं सूत्रम्—जनपदनिवेश इति । जनश्चतुर्वर्णाश्रमजातिलक्षणः, पदं तस्य स्थानं स्थानीय-द्रोणमुख-कार्वटिक-सङ्ग्रह-ग्रामादिकं, तस्य निवेशः रचनाऽत्राभि-

---

(नी०) १. जनाश्चातुर्वर्ण्यं ते पद्यन्तेऽवस्थानं कुर्व्वंति यस्मिन् असौ पृथ्वीभागो जनपदस्तस्मिन् चातुर्वर्ण्यादिंथायोगमव [स्थापनमिति] ।

श्रीमूला

धीयत इति सूत्रार्थः। 'स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि' प्रकृतिरित्युक्तं तत्र स्वाम्यमात्यप्रकृती प्रतिपादिते, जनपदप्रकृतिरिदानीमभिधीयते।

भिक्षुप्रभमतिकृता अर्थशास्त्रव्याख्या

चाणक्यटीका

एवं विनयोपदेशात् राज्ञः कार्यानुष्ठानयोग्यता प्रतिपादिता। इदानीम् अमात्यादिभिः सह तेन कार्याण्यनुष्ठेयानि। तानि च स्वपरमण्डलाश्रयभेदाद् द्विविधानि। तत्र अन्तरङ्गत्वाद् अन्येषाञ्च कारणत्वात् स्वमण्डलाश्रितान्युच्यन्ते। तान्यपि योगक्षेमभेदाद् द्विविधानि। तत्र योगपूर्वकत्वात् क्षेमस्येति तदभिप्रायकोऽध्यक्षप्रचारउच्यते। स्वगतकार्यानुष्ठानेऽध्यक्षाः प्रचरन्त्यनेनोंपदेशेनेति अध्यक्षप्रचारः इत्यधिकरणक्रमः।

प्रकरणक्रमस्तु राजपुत्ररक्षणादीनि आत्मरक्षान्तर्भूतान्येव प्रकरणानि। तत्र चोक्तम् "रक्षितो राजा राज्यं रक्षति" इति। राज्यञ्च जनपदप्रधानमेव। तस्य च पुरुषवत्तया सामग्रयम्। यथा च वक्ष्यति—"पुरुषवद्धि राज्यम्" (अधि० ७, अध्या० ११.) इति। सर्वकर्मणाञ्च उत्तरप्रकरणभाविनां योनित्वात्। तस्मात् तन्निवेश आत्मरक्षानन्तरम् उच्यते। सूत्रसम्वन्धस्तु पृथिव्याख्येय (?) इत्युक्तं पुरस्तात्। पूर्वप्रकरणापेक्षं हि······ना सूत्रम्, उत्तरप्रकरणानुरूपञ्च तदादिसूत्रम्। तयोः स्वप्रकरणे गुणीभूतयोः नापेक्षा। यथा वाक्यावयवानां पदानां वाक्यान्तरावयवानां प्रत्यनपेक्षा, वाक्यद्वयोर्वा अपेक्षा, कथम् अधिकरणावयवानां प्रकरणानां सम्वन्ध इति चेत् प्रकरणान्येव एकार्थानि, अधिकरणं तु अधिकरणमेव, न समुदायान्तरमित्यदोषः॥

श्रीयोग्घमाचार्यप्रणीता

नीति-निर्णीतिटीका

इदानीमध्यक्षप्रचारो द्वितीयमधिकरणमभिधीयते।······पृथ्वीभागो जनपदस्तस्मिंश्चातुर्वर्ण्यादेर्यथायोगमवस्थापनमिति सूत्रार्थः।···रे···जनपददुर्गकोशदण्डादीनामभिधीयत इति महासम्वन्धः। अनन्तरसम्वन्धस्तु तन्त्रावापयोः साधारणत्वादा······सुप्रतिविहिततन्त्रस्यावापेऽधिकारः। तन्त्रं चाऽध्यक्षप्रचारधर्म्मस्थीयकण्टकशोधनयोगवृत्तपर्यन्तम् तेषामादावधिकरणमध्यक्षप्रचारः। अध्यक्षा इति स्वव्यापारे···नि सावधानतयाऽक्षीणीन्द्रियाणि येषां ते प्रचरन्त्यनेनेत्यध्यक्षप्रचारः। तस्याऽप्यादौ जनपदः सर्वकर्मणां योनिरिति जनपदनिवेश इत्यनन्तरसम्वन्धः। अथवा···राजा राज्यं रक्षतीत्युक्तं च। राज्यं च जनपद एव यस्माज्जनपदादेव सर्वप्रकृतीनामुत्पत्तिः। उक्तं च—

'मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं प्रचक्रिरे।'

पश्चाद्राजा मन्त्रिणमुत्पादयति। जनपदादेव दुर्गं कोशो दण्डश्च। तस्मादेव मित्रव्यवस्था। भूमेरेकान्तरं मित्रमित्येवं, जनपदः शेषप्रकृतीनां योनिस्तस्यादौ लाभः पालनं चाभिधीयते।

[1]भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन[2] वा निवेशयेत् ।

श्रीमूला

भूतेत्यादि । भूतपूर्वं पूर्वं स्थितम् अभूतपूर्वं अभिनवं वा, जनपदं, परदेशापवाहनेन परदेशाज्जनानयनेन, स्वदेशाभिष्यन्दवमनेन वा अभिष्यन्दोऽतिवृद्धिः वमनमाहरणं स्वदेशे जनानामतिवर्धनादाधारापर्याप्तिदोषादन्यत्राहरणेन वा, निवेशयेद् रचयेत् ।

चाणक्यटीका

तत्र प्रकरणावताराय सूत्रमाह-भूतपूर्वमिति । भूतः पूर्वो भूतपूर्व इति । अयं शब्दो भवतेः सामान्यशब्दत्वात् शब्दान्तरापेक्षया विशेषं परिगृह्णाति । आढ्यो भूतपूर्व इति यथा, तदिह विशेषशब्दानुपादानात् केन विशेषेण भूतपूर्व इति । तत्र निवेशस्य विधीयमानतया सान्निध्यात् तदपेक्षया निविष्टपूर्वमिति योज्यम् । जनपदशब्दोपात्तो विशेषः, जनाः पद्यन्ते······अनेन विशेषेण अयं शब्दो देशविशेषे प्रवृत्तः न कान्तारपर्वतादिषु । तेन जनपदत्वेनैव भूतपूर्वमपूर्वं भवति । (पर) देशापवाहनेनेति । देशस्था देशाः, तेषामपवाहनं वक्ष्यति—"सुखं वा सानुग्रहपरिहारसौकर्यं फललाभभूयस्त्वेन स्वकर्मणाम्" (अधि० ७, अध्या० १) इत्यादिना । स्वदेशेनाभिस्यन्दसपत्य (?) धान्यपशुमनुष्याद्याधिक्यम् । शरीरस्येव श्लेष्मोद्रेको मा भूत् । अल्पाश्रयत्वादकर्मण्यत्वमिति । तस्य वमनेन अपकर्षणेन । तं प्रस्तारेण अव्यवस्थया वा न निवेशयेत् । किन्तर्हि ? स्थानीयादिकल्पनया ॥

नीति-निर्णीतिटीका

पूर्वं भूतो भूतपूर्वः । निविष्टपूर्व इत्यर्थः । अभूतपूर्वस्तद्विपरीतः । अनिविष्टपूर्वे जनपदशब्दो न प्रवर्तते । पर्वतसमुद्रादौ कथं तस्य निवेश इति चेत्, स्मर्यमाणनिवेशो भूतपूर्वः स्वल्पवीरुल्लतादिसुखसाध्यः, अस्मर्यमाणनिवेशो महावृक्षावलुप्तनिःशेषनिवेशचिह्नो दुःखसाध्य इति भावः । तमुभयस्वरूपम् । परदेशापवाहनेन परदेश इति ।

(नी०) १. निविष्टपूर्वं अनिर्विष्ट पूर्वं च । अनिविष्टपूर्वे जनपदशब्दो न प्रवर्तते । पर्वतसमुद्रादौ कथं तस्य निवेश इति चेत् स्मर्यमाणनिवेशो भूतपूर्वः [स्वल्पवीरुल्लतादि सुखसाध्यः ।] अस्मर्यमाणनिवेशो महावृक्षावलुप्त [निःशेषनिवेशचिह्नो दुःख] साध्य इति भावः ।

२. स्वदेशाभिष्यंदवमनेन वेति । यथा निर्झरासन्ननिम्ने कालांतरेण निःष्यंदो जलसंग्रहो भवति । तद्वत्ततः प्रजाभिष्यंदः सन्ततिबाहुल्यम् । एकस्मिन्नेव कुटुम्बे पुत्रनप्तृभ्रातृभागिनेयादिबाहुल्यात् । न धान्यादिप्राचुर्यात् । मूलकुटुम्बमवस्थाप्य शेषाणामपकर्षणं वमनं तेन वा निवेशयेत् ।

शूद्रकर्षकप्रायं[1] कुलशतावरं[2] पञ्चशतकुलपरं[3] ग्रामं[4] क्रोशद्विक्रोशसीमानमन्योन्यारक्षं[5] निवेशयेत् ।

[1]नदीशैलवनभृष्टिदरीसेतुबन्धशाल्मलीशमीक्षीरवृक्षान् अन्तेषु सीम्नां स्थापयेत् ॥

नीति-निर्णीतिटीका

तत्रस्थाः प्रजास्तासामपवाहने नाकर्षणेन । तच्च द्विधा दण्डेन दाहलोपविध्वंसभयदर्शनेन कदाचिदनुग्रहपरिहारप्रदानादिभिः । स्वदेशाभिष्यन्दवमनेन चेति । यथा निर्झरासन्ननिम्ने कालान्तरेण निष्यन्दो जलसङ्ग्रहो भवति । तद्वत्ततः प्रजाभिष्यन्दः सन्ततिवाहुल्यं एकस्मिन्नेव कुटुंबे पुत्रनप्तृभ्रातृभागिनेयादिवाहुल्यात् । न धान्यादिप्राचुर्यात् । मूलकुटुंबमवस्थाप्य शेषाणामपकर्षणं वमनं तेन वा निवेशयेत् । लाभपालनार्थं च निवेशक्रममाह ।

श्रीमूला

शूद्रेत्यादि । ग्रामं, शूद्रकर्षकप्रायं शूद्रकृषीवलवहुलं, कुलशतावरं गृहशतान्यूनं, पञ्चशतकुलपरं पञ्चशतानधिकगृहयुक्तं, क्रोशद्विक्रोशसीमानं क्रोशसीमानं द्विक्रोशसीमानं वा एकस्माद् ग्रामाद् ग्रामान्तरस्य क्रोशदूरव्यवधानं क्रोशद्वयव्यवधानं वा यथा भवेत् तथा क्लृप्तमित्यर्थः, अन्योन्यमारक्षतीत्यन्योन्यारक्षं परस्परसाहाय्यकरणक्षमं, निवेशयेत् ।

नदीत्यादि । सीम्नाम् अन्तेषु, नदी, शैलः शिलाकूटः, वनं, गृष्टिर्वदरा नामौषधिर्वृक्षविशेषो वा, दरी श्वभ्रं, सेतुवन्धः, शाल्मली स्थिरायुराख्यो वृक्षः, शमी सक्तुफला, क्षीरवृक्षः वटादिरित्येतान् स्थापयेत् सीमरक्षार्थम् ।

(नी०) १. विष्ट्यादिभिरुपभोग्यत्वात् ।

२. कुलशतभेदे मतभेदस्तथाहि—

चुल्याधाने कुलं विद्यादित्यांभीयाः प्रचक्षते ।

दम्पत्ययोः कुलमित्येके हलं त्वन्ये प्रचक्षते ।। इति ।

चुल्याधानं—दम्पत्योः क्षेत्र-विभागेऽनंगत्वादेकद्वित्रिहलत्वेन कुलं तदुत्तममध्यमावरतयेष्यते ।

३. अर्धतृतीयकुलशतकृष्यो मध्यमः, सार्द्धक्रोशसीमा भवतीत्यर्थादापद्यते ।

४. शूद्रादिजातिसमूहो ग्रामः ।

५. गोरुतं निशावसाने यावन्तं प्रदेशं गवां रुतं व्याप्नोति । पूर्वस्मात्क्रोशे पश्चिमचिह्नं उत्तरस्मातृक्रोशे [दक्षिणचिह्नमिति] ।

१. भृष्टिरिति पा. ।

चाणक्यटीका

शूद्रकषकप्रायमिति। विष्ट्या सञ्जातेन चोपकारित्वात्। कुलशतेनावरं क्रोशसीमानम्। पञ्चभिः कुलशतैः परं प्रकृष्टं द्विक्रोशसीमानम्। अर्थात् अध्यर्ध-क्रोशसीमानं मध्य (म) कुलशतस्य। दाम्पत्यमेकचुल्याधानत्वं एकगृहाधानत्वं वा क्षेत्रविभागं प्रत्यनङ्गभूतम्। तस्माद् एकद्वित्रिहलत्वेन कुलानां कुलत्वम्। चतुः-षड्गवत्वेन च हलत्वमेवेष्यते। षड्गवतया च हलस्य मध्यमा प्रतिपत्तिः। तावता विभागेन कुलक्षेत्रयोः अन्योऽन्यप्राकाम्यं भवति। तथा चोक्तम्—

"हलमष्टगवं धर्म्यं षड्गवं व्यावहारिकम्।
चतुर्गवं नृशंसानां द्विगवन्तु गवाशिनाम्॥" इति।

तत्र क्रोशस्थितानि इतरेतरापेक्षया सीमानि यस्य स क्रोशसीमा। यथा पूर्वस्मात् क्रोशे पश्चिमम्, उत्तरस्मात् क्रोशे दक्षिणमिति। चतुर्धा च ग्रामोपभोगः क्षेत्रेण वास्तुना गोप्रचारतया देवतास्थानारामतटाकरथ्योदपानादिभिश्च। धनुस्सहस्र-द्वयं च क्रोशः, चतुर्हस्तंच धनुः। तत्र क्षेत्रप्रतिबद्धत्वात् कुलानां ग्रामार्धं तावद् धनुस्सहस्रं तिर्यग्धनुःसहस्रद्वयेन गुणितं कुलशतेन भिद्यमानं विंशतिर्धनुःसहस्राणि प्रत्येकं कुलस्य क्षेत्रम्। एवं समुदायेन विंशतिर्धनुर्लक्षाणि कुलशतस्य क्षेत्रम्। ततोऽर्धं दशधनुःसहस्राणि अविभागेन साधारणोपयोगित्वाद् देवस्थानादिषु प्रतिकुलं पर्याप्तानि समुदायेन दशधनुर्लक्षाणि। ततोऽप्यर्धं पञ्चधनुःसहस्राणि प्रतिकुलं पशु-प्रचारभूमिः पर्याप्ता समुदायेन पञ्चधनुर्लक्षाणि ततोऽप्यर्धं पञ्चधनुःसहस्राणि प्रत्येकं वास्तुभूमिः इक्षुशाकापरसस्यगृहगोशालादिषु प्रभवति। समुदायेन पञ्चधनुर्लक्षाणि। एवं चत्वारिंशद् धनुर्लक्षणानि। क्रोशसीम्नो ग्रामस्य। द्विक्रोशसीम्नोऽपि चतुर्धनुः-सहस्रेषु तिर्यग्धनुःसहस्रचतुष्कगुणितेषु दशधनुर्लक्षपरिमाणाः षोडशभागाः भवन्ति। तत्र दश भागाः पञ्चानां कुलशतानां क्षेत्राणि। एको भागो देवस्थानादिषु। कुल-प्रवृद्धावपि तावता चरितार्थत्वान्न वर्धते।

तस्मात् साधारणोपभोग्यत्वाद् वृद्धिः प्रत्यन्तभूम्यधिके तु न निवार्यते। क्षेत्रादयस्त्वसाधारणोपभोग्यत्वान्नियम्यन्ते। शेषाः पञ्च भागाः प्रत्येकमर्धविभक्ता वास्तुगोभूमिषु पर्याप्ताः। एवमध्यर्धक्रोशसीम्न्यपि धनुःसहस्रत्रितयेन गुणिते दश-धनुर्लक्षपरिमाणा नव भागा भवन्ति। तत्र पञ्च भागाः अर्धत्रिकुलशतानां (?) क्षेत्राणि परिधि······षु भागेषु अर्धत्रिकभागाः पुनः प्रत्येकमर्धविभक्ताः गोवास्तुभूमिप्रवि-भागार्थाः। शेषोऽप्यर्धभागः देवस्थानादिषु साधारणोपभोग्यो भवति। अत्र भूम्याधि-क्यान्न निवार्यते वृद्धिः। यथोक्तम्

"ग्रामादर्धं कुलक्षेत्रमर्धार्धं गोनिवासभूः।
धनुः सहस्रमात्रं तु पुण्यस्थानाय शेषयेत्॥
दशभागास्तथा क्षेत्रं पञ्चगोवास्तुभूमिषु।
शेषभागेऽप्यथैकस्तु पुण्यस्थाने विधीयते॥

अष्टशतग्राम्याः मध्ये स्थानीयं, चतुश्शतग्राम्याः द्रोणमुखं द्विशतग्राम्याः [1]कार्वटिकं, दशग्रामीसङ्ग्रहेण सङ्ग्रहणं स्थापयेत् । अन्तेष्वन्तपालदुर्गाणि जनपदद्वाराण्यन्तपालाधिष्ठितानि स्थापयेत् ।

तेषामन्तराणि वागुरिकशबरपुलिन्दचण्डालारण्यचरा रक्षेयुः ।

चाणक्यटीका

पञ्चभागास्तृतीयेऽपि क्षेत्राण्यर्धत्रिका अपि ।
वास्तुगोभूमिषु क्षेत्रं शेषं शेषे प्रकल्पयेत् ॥" इति ।

अनया च कल्पनया भूम्या विहितां (?) स्थापयेत्, मा भूत् सीमाविवाद इति ॥

नीतिनिर्णीतिटीका

शूद्रकर्षकप्रायमिति । शूद्रकर्षकबाहुल्यं । विष्ट्यादिभिरुपभोग्यत्वात् । वैश्यकर्षकाः स्वल्पाः, क्षत्रियब्राह्मणौ कर्षकत्वेन नेष्येते धर्म्मार्थक्षतेः । कुलशतावरमिति । कुलशतभेदे मतभेदस्तथाहि ।

'चुल्याधाने कुलं विद्यादित्याम्भीयाः प्रचक्षते ।
दम्पत्यं कुलमित्येके हलं त्वन्ये प्रचक्षत' इति ॥

चुल्याधानदम्पत्ययोः क्षेत्रविभागेऽनंगत्वादेकद्वित्रिहलत्वेन कुलं तदुत्तममध्यमावरतयेष्यते । कुलशतकृष्योऽवरो निकृष्टः क्रोशसीमा । पञ्चकुलशतकृष्यः पर उत्तमः क्रोशद्वयसीमा । सार्द्धद्वयकुलशतकृष्यो मध्यमः, सार्द्धक्रोशसीमा भवतीत्यर्थादापद्यते । तं ग्रामम् । शूद्रादिजातिसमूहो ग्रामः । चतुर्हस्तधनुःसहस्रद्वयं क्रोशः । गोरुमिति पर्याय···(नि) शावसाने यावत्तं प्रदेशं गवां रुतं कृष्टं व्याप्नोति । तद्गोरुतं क्रोश इति च । पूर्वस्मात् क्रोशे पश्चिमचिन्हमुत्तरस्मात् क्रोशे दक्षिणचिह्नमिति । शेषयोरप्ये·····धनुःसहस्रप्रमाण आयामो द्विधनुःसहस्रप्रमाणेन विस्तरेण गुणितश्चत्वारिंशद्धनुर्लक्षप्रमाणं क्षेत्रं···षष्टिलक्षाधिका धनुषां कोटिरिति । न चायं नियमो द्रष्टव्यः, भूमेः सारासारत्वात्···हारिकां ॥

"चतुर्गवं च म्लेच्छानां द्विगवं तु गवाशिनामिति ॥ इति ।" दिग्दर्शनमेतत् । ···च ग्रामनिवेशः । गृहक्षेत्रगोप्रचारपुण्यस्थानदिग्विभागेन केचिदित्यत्रापि नियमो निरर्थकः ।

अन्योन्य···।

विवादपरिहारार्थं चिह्नान्याह—नदीशैलवनमिति । भ्रष्टिरिति । पाषाणोपरसिकतादेर्व्या···पर्वतविकार एव । सेतुबन्धः कृत्रिमो जनविदितः । शमीशाल्मलीक्षीरवृक्षग्रहणं चिरस्थायित्वार्थम् । शेषं प्रतीतम् ।

श्रीमूला

अष्टशतेत्यादि । अष्टशतग्राम्याः अष्टशतानां ग्रामाणां समूहस्य, मध्ये स्थानीयं

---

१. खार्वटिकं पा. ।

श्रीमूला

तदाख्यं तावद्ग्रामजनतायाः क्रयविक्रयादिकर्मणोपजीव्यं रमणीयं महाग्रामं, स्थापयेत् निवेशयेत् । चतुश्शतग्राम्याः मध्ये, द्रोणमुखं तदाख्यं स्थानीयप्रत्यवरं ग्रामभेदं स्थापयेत् । द्विशतग्राम्या मध्ये, कार्वटिकं तदाख्यं कर्वटापरपर्यायं द्रोणमुखप्रत्यवरं स्थापयेत् । दशग्रामीसंग्रहेण ग्रामदशकसंग्रहणेन, संग्रहणं तदाख्यं कर्वटादधमं महा(ह)-द्रङ्गापरपर्यायं स्थापयेत् ।

अन्तेष्विति । अन्तेषु जनपदावसानेषु, अन्तपालदुर्गाणि, अन्तपालाधिष्ठितानि अन्तपालैरनुष्ठिताध्यक्ष्याणि, जनपदद्वाराणि जनपदप्रवेशमार्गभूतानि च स्थापयेत् ।

तेषाम् अन्तराणि अन्तपालदुर्गाणामन्तरालदेशान्, वागुरिकशबरपुलिन्दचण्डालारण्यचराः वागुरिकाः मृगबन्धनजीविनः, शबराः शूद्राद् भिल्लयां जाताः, पुलिन्दाः निष्ट्यात् किरात्यां जाताः, चण्डालाः श्मशानपालाः अरण्यचराः वनचारिणश्च, रक्षेयुः ।

चाणक्यटीका

अष्टशतग्राम्या मध्य इति । चतुर्षु पार्श्वेषु द्वयोर्द्वयोः ग्रामशतयोरेव स्थानं मध्यं भवति । अनतिविप्रकृष्टत्वात् समुदयो व्यवहारो वाऽत्र संग्रहीतुं शक्यते । समुदयस्य व्यवहाराणाञ्च स्थानाय हितत्वात् स्थानीयम् । द्रोणमुखमिव द्रोणमुखम् । चतुर्षु ग्रामशतेष्विव यः प्रत्यायः स तेन विच्छिन्नः स्थानीये प्रक्षिप्यत इति (?) कार्पटिकमिति रूढम् । विषयव्यवहाराणां स्थानत्रयम् (?) । दशग्रामीसंग्रहेणेति । दश दश ग्रामान् संहृत्य महत्तरायत्तान् योगक्षेमदानकरप्रविचयार्थं कृत्वा अनेन प्रकारेण प्रस्थापयेत् ॥

अन्तेष्विति जनपदस्य । अन्तपालदुर्गाणि तेन रक्ष्यमाणत्वात् । जनपदद्वाराणीति । अपरिज्ञातानीति मन्यतो (?) निष्कासप्रवेशयोः प्रतिषेधार्थम् । अन्तपालाधिष्ठितानीति । तेन नित्यमविरहितत्वात् स्थिरीकरणार्थं पुनर्वचनम् । तेषामिति चतुर्णां स्थानीयादीनाम् अन्तरालानि । पुलिन्दाः शबरविशेषा एव । अत्यन्तं जनपदभाषाचारानभिज्ञाः अरण्यचराः मृगय्वादयः । रक्षेयुः यथा उन्मार्गेण कश्चिन्न सञ्चरति ॥

नीति-निर्णीतिटीका

ग्रामविशेषानाह अष्टशतग्राम्याइति । अष्टशतग्रामसमाहारस्य मध्ये चतुर्दिशं द्वे द्वे ग्रामशते निवेश्य तन्मध्ये स्थानीय···समुदायव्यवहारस्थानाय हितमिति । तथैव चतुःशतग्राम्यामध्ये द्रोणमुखम् । यथा द्रोणमुखं चतुराढकोपलक्ष्यमेवं ग्रामशतचतुष्टयोपलक्षितम् । तद्वद् द्विशतग्राम्याः कार्वटिकमिति रुढिसंज्ञा । दशग्रामीसंग्रहेणेति । दश दश ग्रामाः सङ्गृह्यन्ते येन मुख्यग्रामेणासौ सङ्ग्रह एवं स्थानीयस्य द्वे द्रोणमुखे चत्वारि कार्वटिकानि । अशीतिः सङ्ग्रहाः । अनेन विभागेन जनपदनिवेशः कार्यः ।

पालनार्थमाह-अन्तेष्वन्तपाल इति । अन्तेषु जनपदस्य चतुर्दिशम् । अन्तपालदुर्गाणि जनपदरक्षाक्षमाणि । जनपदद्वाराण्यन्यतःप्रवेशनिर्गमयोर्निषेधात् । अन्तपालैः प्रबलबलयुक्तैःऽधिष्ठितानि स्थापयेत् । तेषां चतुर्णां द्वाराणामन्तराणि वागुरा मृगबन्धार्थं जालं तेन व्यवहरन्तीति वागुरिका व्याधाः । शबराः किंचिज्जनपदभाषाभिज्ञा वनेचराः । पुलिन्दास्तु भाषानभिज्ञाः । चण्डालाः प्रतीताः । अरण्यचराः सर्पग्राहादयः । ते रक्षेयुः प्रवेशनिर्गमप्रतिषेधं कुर्युरित्यर्थः ।

[ब्रह्मदेयादिरूपेण क्षेत्रपरिकल्पनाविधिः]

ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयान्यदण्डकराण्यभिरूपदायकानि प्रयच्छेत्। अध्यक्षसङ्ख्यायकादिभ्यो गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजङ्घाकरिकेभ्यश्च[1] विक्रयाधानवर्जम् ॥

श्रीमूला

ऋत्विगित्यादि। ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यः याजकाध्यापकपुरोधश्छान्दसेभ्यः। अदण्डकराणि दण्डो नाम द्विःकृषिक्लृप्तौ त्रिःकृष्यनुष्ठानादिनिमित्तः कुल्यादिजलात्युपयोगादिनिमित्तो वा दमः, करः कृषिफलषष्ठांशः तदुभयरहितानि। अभिरूपदायकानि अभिरूपेभ्यः अर्हेभ्यः पुत्रादिभ्यो, दायः दानं येषां तानि तथाभूतानि वंशपारम्पर्यभोग्यानीत्यर्थः। यथेच्छविनियोगयोग्यानीति वा। ब्रह्मदेयानि ब्राह्मणेभ्यो देयानि अर्थात् क्षेत्राणि, प्रयच्छेद् दद्यात्। अध्यक्षेत्यादि। विक्रयाधानवर्जं मूल्यमादाम दानं विक्रयः, आधीकरणमाधानम्। तदुभयाधिकारवर्जम् केवलोपभोगायेत्यर्थः। अध्यक्षसंख्यायकादिभ्यः अध्यक्षाः सुवर्णाध्यक्षादयः संख्यायकाः गणकाः तत्प्रभृतिभ्यः। गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजंघाकरिकेभ्यश्च गोपः दशग्रामीपञ्चग्राम्याद्यधिकारी, स्थानिको नगरचतुर्भागाधिकारी, अनीकस्थः हस्तिशिक्षाविचक्षणः, चिकित्सको वैद्यः, अश्वदमकः अश्वशिक्षाभिज्ञः, जंघाकरिकः जांघिको दूरदेशगतागतजीवी, एतेभ्यश्च, क्षेत्रं प्रयच्छेदिति सामर्थ्यलभ्यम्।

चाणक्यटीका

क्षेत्रकल्पनेदानीमुच्यते। त्रिवर्गमूलत्वाद् धर्मस्य, तदर्थं तावता (?) ब्राह्मणेभ्यो दानार्हाणि धर्मार्थं वा दानार्हाणि। ब्रह्मदेयानि, क्षेत्राणीति, वक्ष्यमाणापेक्षया। अदण्डकराणीति, क्षेत्रसम्बद्धेन राज्ञा दण्डकरौ न ग्राह्यौ। अभिरूपदायकानीति। वृत्ताध्ययनतपःसम्पन्नाः तत्पुत्रपौत्रादयोऽपि स्वामिनो येषामिति। तानि तेभ्यो न पुनः राजदेयानीत्यर्थः। अध्यक्षाः समाहर्त्रादयः, संख्यायकाः गाणनिकाः, आदिशब्दात् लेखकरूपदर्शकादयः। दशकुलीचिन्तको गोपः। वक्ष्यति—"दशकुलीं गोपश्चिन्तयेत् (अधि० २ अ० ३९) इति। स्थानिकाः स्थानमुख्याः। अनीकस्थाः हस्तिलक्षणविदः। हस्त्यश्वनराणां चिकित्सकाः। अश्वदमकाः स्वनामप्रतीताः। जङ्घाकारिकाः लेखहारकाः तेभ्योविक्रयाधानवर्जम्। ब्रह्मदेयानां विक्रयाधेयत्वात् ॥

नीति-निर्णीतिटीका

धर्म्मोद्देश्ये(शे)न भूमिदानमाह ऋत्विगाचार्येति। ऋत्विजः शान्तिगृह्याधिकृताः षोडश। आचार्या विद्यानामुपाध्यायाः। पुरोहितः प्रतीतः। श्रोत्रियाश्छन्दोऽध्यायिनः स्नातकास्तेभ्यः, ब्रह्मदेयानि। तदभिधानक्षेत्राण्यदण्डकराणि। अभिरूपदायादकानि। यस्मै दत्तं तदनुरूप एव दायादो भवितुमर्हतीत्यर्थः।

१. कारिकाः पा०।

[क्षेत्रेषु कृषिसौकार्यपरिकल्पनम्]

करदेभ्यः कृतक्षेत्राण्यैकपुरुषिकाणि प्रयच्छेत् । अकृतानि[1] कर्तृभ्यो नादेयात् अकृषतामाच्छिद्यान्येभ्यः प्रयच्छेत्; ग्रामभृतकवैदेहका वा कृषेयुः । अकृषन्तोऽवहीनं[2] दद्युः । धान्यपशुहिरण्यैश्चैनाननुगृह्णीयात्, तान्यनु सुखेन दद्युः । अनुग्रहपरिहारौ चैभ्यः[3] कोशवृद्धिकरौ दद्यात्, कोशोपघातकौ[4] वर्जयेत् । अल्पकोशो हि राजा पौरजानपदानेव ग्रसते । निवेशसमकालं यथागतकं वा परिहारं दद्यात् । निवृत्तपरिहारान् पितेवानुगृह्णीयात् ॥

नीति-निर्णीतिटीका

प्रकर्षेण यच्छेदपुनर्विलोपाय ।

अर्थोद्देशानाह । अध्यक्षेति । अध्यक्षाः समाहर्त्रादयः । संख्यायका गणितज्ञाः आदिग्रहणाद्रूपदर्शकनीवीग्राहकोत्तराध्यक्षाः । गोपो विंशतिकुलीं विंशतिग्रामीं वा गोपायतीति । स्थानिको गोपानामेवाधिष्ठातृस्थाने नियुक्तः । अनीकस्थाः प्राधान्याद्धस्तिन एवानीकं तद्विनयाधानाय तत्र तिष्ठन्तीत्यनीकस्था हस्तिशिक्षाविदः । चिकित्सका नरहस्त्यश्वादिभिषजः । अश्वदमकाः शालिहोत्रविदोऽश्वानां विनयकर्तारः । जंघाकारिका दीर्घाध्वगा लेखहारकादयः । तेभ्यो विक्रयाधानवर्जानि । अनेन ब्रह्मदेयानामभिरूपेषु विक्रयाधानमनिषिद्धं भवति अदण्डकरत्वं ब्रह्मदेयैः समानमेतेषामपि ॥

श्रीमूला

करदेभ्य इति । करदेभ्यः राजभागदायिभ्यः, कृतक्षेत्राणि कृतानि क्षेत्राणि पूर्वसिद्धसौष्ठवान् व्रैहेयशालेयादीन् केदारान्, ऐकपुरुषिकाणि एकेनैव ग्रहीतृपुरुषेण भोग्यानि, प्रयच्छेत् । अकृतानि साध्यसौष्ठवानि अर्थात् क्षेत्राणि, कर्तृभ्यो नादेयात् सौष्ठवसाधकेभ्यः करदेभ्यो न गृह्णीयात्, सर्वविधस्वाम्येन तेष्वेव स्थापयेदित्यर्थः । इह आदेयादित्यात्मनेपदाकरणमार्षम् ।

अकृषतामिति । अकृषतां कृषिमकुर्वतां, क्षेत्राणीति शेषः । आच्छिद्य हृत्वा, अन्येभ्यः प्रयच्छेत् । तदभावे ग्रामभृतकवैदेहकाः ग्रामाधिकारिणो वणिजश्च कृषेयुः । अकृषन्तोऽभ्युपेत्य कृषिमकुर्वन्तः, अवहीनं नष्टं दद्युः । अनुपायाच्छेदकर्षणं तदा कथमि-

---

१. अकृतानि चेति नी० पा० ।

२. अकृषन्तोवाऽवहीनं नी० पा० ।

३. चैतेभ्यः ।

४. (ति) ।

श्रीमूला

त्याह—धान्यपशुहिरण्यैश्च कृष्यनुष्ठानापेक्षितैः, एतान् अभ्युपेतकृषीन् अनुगृह्णीयात्। अनु पश्चात् कृषिफलप्राप्त्यनन्तरं, तानि धान्यादीनि, सुखेन आत्मवृत्त्यपीडया दद्युः, कर्षका राज्ञे। अनुग्रहेत्यादि। एभ्यः कृषिकर्तृभ्यः, अनुग्रहपरिहारौ च स्वस्थ वृद्ध्यर्थं दीयमानं द्रव्यमनुग्रहः, दौस्थ्यपरिहारेण स्वास्थ्यसिद्ध्यर्थं दीयमानं द्रव्यं परिहारः तौ कोशवृद्धिकरौ दद्यात् आत्मकोशवर्धने यथा पर्यवस्येतां तथा दद्यात्। कोशोपघातिकौ कोशक्षयफलौ अनुग्रहपरिहारौ वर्जयेत्, कुतः हि, यतः अल्पकोशः राजा पौरजानपदानेव ग्रसते पीडयति, स्वकोशपूरणार्थम्। निवेशेत्यादि। निवेशसमकालं परिहारं निवेशः इदम्प्रथमकुलस्थापनं तत्तुल्यकालं परिहारं तत्काले क्लृप्तो यः स्वास्थ्यसिद्ध्यर्थं उपकारस्तमित्यर्थः। दद्यात् यथागतकं वा दद्यात् आगतानतिक्रमेण च दद्यात् नवनवागतकुलेभ्योऽपि दद्यादित्यर्थः। निवृत्तेत्यादि। निवृत्तपरिहारान् प्रत्यर्पितपरिहारद्रव्यान्, पितेव, अनुगृह्णीयाद् वृद्ध्यर्थमनुग्रहद्रव्यं दत्त्वोपकुर्यात्।

चाणक्यटीका

कृतानि क्षेत्राणि प्रहतानि हलाद्युपहतानि। हलाद्यकृतानि खिलानि कर्तृभ्यः। "करदेभ्य एव आधेयानी"ति वचनात् पुत्रेभ्योऽपि नेयम्॥

अकृषतां करदानां कृतानि तद्भिन्नखिलानि वा आच्छिद्य अन्येभ्यः प्रयच्छेत्। पुनस्तेषामेवेदं भविष्यतीति उपेक्षया तदसंभवाद्वा नैतेऽपि कृषेयुः, तदा ग्रामभृतकाः नापितादयः, वैदेहका वाणिजकाः कृषेयुः। अवहीनमिति क्षेत्रं स्वीकृत्य अकृषन्तः यत् फला···। धान्यादिभिरनुगृह्णीयात्। अशक्ता न कृषेयुः। सुखेनेति अपीडया उत्पन्नं स्तोकमित्यर्थः॥

अनुग्रह उक्तलक्षणः। परिहारः उचितस्यानादानम्। कालनियमेन त्रिवार्षिकः पाञ्चवार्षिको वा। कोशवृद्धिकराविति। यदा मन्येत आभ्यां जनपदोऽसक्तः प्रभूतकृष्यादिकर्मतया धान्यपण्यहिरण्यैः कोशं मे वर्धयिष्यतीति तदाद्या (?) यदा वनभोजनाद्यासक्तस्तदा वर्जयेदित्यर्थः। प्राप्ते पुनर्वचनं प्रवृत्तपूर्वयोरपि प्रतिषेधार्थमाह अल्पकोशो हीति। यथागतकं वेति। यावद् आयाताः प्रतिवसन्ति तस्य तदा गमनाद्यपेक्षया दद्यात्। तत्र धर्मकालापेक्षया उक्तधर्माधर्मार्थं हरिहारस्य। निवृत्तपरिहरानिति पूर्णपरिहारकालान् न परिहारानुशयात् पीडयेदित्यर्थः॥

नीति-निर्णीतिटीका

करदेभ्य इति। करदकर्षकेभ्यो निवेशकाले कृते क्षेत्राण्यचिरकाला·····नि सुकरत्वादेकपुरुषिकाणि प्रयच्छेत् [।] उपगते तु पुत्रादौ पालने स्वेच्छा॥

अकृतानीति। अकृतान्य···र्यमाणसंस्काराणि। वृत्त···दिकं कृत्वा ये कुर्वन्ति। तेभ्यः कर्तृभ्यो नोदयानि। तत्संततेरपीत्यर्थः। उभयापवादमाह अकृषतामिति। कृतमकृतं वा क्षेत्रमकृ[षताम् आच्छि]द्यान्येभ्यः प्रयच्छेन्मा भूत् क्षेत्रफलाहानिरिति॥

ग्रामभृतकेति। ग्रामभृताः कुंभकारायस्कारादयो ग्रामेण भ्रियंत इति। वैदेहका

[क्रयविक्रयानुकूलस्थानकल्पनं, तदनुकूलसेतुबन्धनविधिश्च]

आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् वारिस्थलपथपण्यपत्तनानि च निवेशयेत्। सहोदकमाहार्योदकं वा सेतुं बन्धयेत्। अ येषां वा बध्नतां भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्, पुण्यस्थानारामाणां च। सम्भूयसेतुबन्धाद१क्रामतः कर्मकरबलीवर्दाः कर्म कुर्युः, व्ययकर्मणि च भागी स्यात्, न चांशं लभेत ॥

नीति-निर्णीतिटीका

वा''॥ अकृषंतो–वे ति स्वयमकर्षणेऽन्येषामपि निषेधेऽवहीनं विनष्टक्षेत्रफलं क्षेत्रिणो दद्युः। कर्षणसामग्रीसंपादनायाह धान्यपश्विति।

धान्यैर्भोजनार्थं पशुभिः कर्षणाय बलीवर्दादिभिर्हिरण्यैराच्छादनार्थमाहृत'' पश्चात्कृष्यादिफलात् सुखेन तर्जानावरोधादिभिर्विना भूयोप्यनुग्रहं करिष्यामीति संतोषिता दद्युरिति ॥

अनुग्रहेति दत्वाऽन्नमनुग्रहः पाश्चादपीडया ग्रहणमनुग्रहः। दंडकरादेर्ग्राह्यस्य परिहरणमग्रहणं परिहारः। तौ कोशवृद्धिकरौ चैतेभ्यो दद्यात्। अनुग्रहः परिहारो वा यत्र दत्तः कृष्यादिभिः कोशवृद्धिं करोति। तादृग्भूतौ दद्यात् कोशोपघातकौ वर्जयेदित्येतस्मिन्नर्थापत्या सिद्धे अत्यंतनिषेधार्थं वचनं। प्रमादिनां व्यसनिनां च नैव दद्यात्। कोशस्यानुत्पत्तेरुत्पन्नस्य च वा भक्षणात्।

अवर्जने दोषं दर्शयन्नाह अल्पकोशो हीति। कोशोपघातकानुग्रहपरिहारदानादल्पकोशो हि राजा पौरजानपदानेव ग्रसते पीडयति॥ "क्षीणा नरा निःकरुणा भवंति" त्यन्यायेनापि प्रजाभ्योऽर्थान् गृह्णाति ततश्च प्रकृतयः क्षीयन्ते। तस्मात्कोशक्षयकरौ वर्जयेदित्ति भावः।

निवेशे परिहारविधिमाह निवेशसमकालमिति। निवेशे पूर्वगतानां यः कालः पश्चादागतानामपि तदेव निवृत्तो भवतीति। तद्यथा पंचवार्षिकादिः परिहारो यत्र तत्र वर्षेण वर्षद्वयेन वा पश्चादागतानामपि निवेशोदित एव कालः समः प्रथमनिवेशो दुःकरः पश्चात्सुकर इति भावः। अयं च भूतपूतपूर्वे (भूतपूर्वे ?) द्रष्टव्यः। यथागतकमिति। यदा आगतो भवति तदा परिहारकालो गम्यत इति द्वितीयः पक्षः। अयं चाभूतपूर्वे द्रष्टव्यः। निवृत्तपरिहारान् जनपदान् पितेवानुगृह्णीयात्। जनपदे तु परिहृतमित्यनुशयो न कार्यः सांत्वपूर्वं करादिकमनुगृह्णीयादित्यर्थः।

श्रीमूला

आकरेत्यादि। आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् आकरकर्मान्तः आकरव्यापारस्थानं, द्रव्यवनं दारुचन्दननिर्यासाद्युपकरणप्रसवक्षमं वनं, हस्तिवनं गजवनं; व्रजप्रचारः गोध्यक्षे वक्ष्यमाणः, वणिक्पथप्रचारः वणिक्पथव्यापारः एतान्;

श्रीमूला

वारिस्थलपथपण्यपत्तनानि च जलपथस्थलपथपण्यक्रयविक्रयस्थानानि च, निवेशयेत् कारयेत्। पत्तनशब्दस्य क्रयविक्रयस्थानवाचित्वमाश्रित्येत्थं व्याख्यातम्। नावेकगम्यपुरवाचित्वाश्रयणे तु पण्यपत्तनं पण्यप्रधानं नौमात्रगम्यं पुरमिति व्याख्येयम्। पट्टनशब्दपाठे पुनः पण्यपट्टनं पण्यप्रधानं पट्टनं शकटैरश्वैर्नौभिश्च गम्यं पुरमित्यर्थः, 'पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च' इति यादवाभिधानात्।

सहोदकमिति। सहोदकं नित्यप्रवृत्तोदकं नद्यादौ, सेतुं वारणं, बन्धयेत् कुल्यादिद्वारेण कृष्याद्यर्थम्। आहार्योदकं नद्यादितो वर्षासु तुंगस्थलेभ्यश्च समानेयजलं सेतुं वा बन्धयेत्। बध्नतां सेतुं रचयताम्, अन्येषां वा जनानां च, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्। भूमिः प्रभूतजलावरोधयोग्यं स्थलं। मार्गः जलप्रवेशनिर्गमसरणिः। वृक्षोपकरणं सारदार्वादिकम्। एतैरनुग्रहम् एतद्दानोपकारं कुर्यात्। पुण्यस्थानारामाणां च निर्मीयमाणानां विषये, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्। सम्भूयेत्यादि। सम्भूयसेतुबन्धाज् जनैः संघीभूय क्रियमाणात् सेतुबन्धाद्, अपक्रामतः अपसरतः अनिच्छया स्वीयं कर्मांशमकुर्वतो जनस्य, कर्मकरबलीवर्दाः भृत्याः उक्षाणश्च, कर्म कुर्युः राजा बलात् तैः कर्म कारयेदित्यभिप्रायः। अपक्रामतोऽन्यमपि दण्डमाह—व्ययकर्मणीति। व्ययकर्मणि च भागी अंशभाक् स्यात् अंशं च न लभेत, अर्थात् सेतुबन्धानन्तरभवे तत्फले।

चाणक्यटीका

विषयसन्निवेशम् अभिधाय इदानीम् आश्रयाणां व्यवस्थापनमाह—एत्य अस्मिन् कुर्वन्तीत्याकरः सुवर्णरूप्यताम्रादिप्रभवः। तत्र कर्मान्तान् वक्ष्यमाणविधानेन निवेशयेत् कोशार्थम्। द्रव्यवनं दार्वाद्युपलक्षणार्थम् संरक्षणेन वानेन (?)। हस्तिवनं ग्रासच्छेदप्रतिषेधेन। व्रजं वक्ष्यमाणलक्षणं दोहनप्रतपालनाभ्याम्। वणिक्पथस्य प्रचरणं गतागताभ्यां क्रयविक्रयरक्षादिभिः। वारिपथपण्यानाम्-उपनदमुपसमुद्रञ्च पत्तनानि विक्रयस्थानानि। स्थलपथपण्यानाञ्च हैमवतदाक्षिणात्यानां वणिक्पथमेव कृतव्यवस्थानं निवेशयेदिति॥

सहोदकं तत्रैवोत्पन्नोदकम्। अन्यस्मादानीतोदकम् अहार्योदकम्। भूमिरुदकाधारस्य। मार्ग आहार्योदकस्य। उपकरणं शकटकुद्दालपट्टिकादि। पुण्यस्थानं सभाप्रपातटाकादि। आरामाः प्रयासफलार्थाः। तेषां भूम्यादिभिरेवानुग्रहः। अपक्रामत इति। सेतुबन्धात् संभूयानुक्त्वा कस्यचिदुत्तिष्ठतः कर्मकराः कर्मान्तरे नियुक्ताः, बलीवर्दाश्च बलादानीय कर्म कारयितव्या इत्यर्थः। व्ययकर्मणि चेति। व्ययेन यत्र खनकादीनां तत्र भागं वहेदित्यर्थः। नचांशमिति। कर्मकाले यदाज्ञापनाद्यनुग्रहः कृतः कर्मातिरिक्तं वा यदुपकरणम्। तस्य असन्निहितत्वान्न लभेत॥

नीति-निर्णीतिटीका

ग्रामादीनां निवेशमभिधाय कोशोत्पत्तिस्थानानां निवेशमाह आकरेति। आ समंतात्क्रियंते सुवर्णादि येष्वित्याकराः। आकराद्युत्पन्नानां रत्नसारफल्गु-

[राज्ञा ग्रामवृद्धैश्च भरणीयानां संक्षेपः]

मत्स्यप्लवहरितपण्यानां सेतुषु राजा स्वाम्यं गच्छेत् । दासाहितकबन्धूनश्रृण्वतो राजा विनयं ग्राहयेत् । बालवृद्धव्याधितव्यसन्यनाथांश्च राजा बिभृयात्, स्त्रियमप्रजातां, प्रजातायाश्च पुत्रान् । बालद्रव्यं ग्रामवृद्धाः वर्धयेयुः[1] आव्यवहारप्रापणात्, देवद्रव्यं च ॥

नीति-निर्णीतिटीका

कुप्यानां संस्कारकर्मणामंतः समाप्तिर्येषु ते कर्मांताः । द्रव्यहस्तिवने इति द्रव्यं शाकतिनिशादिसारदारु तस्य वनानि । हस्तिनां च वनानि । व्रजानि गोमंडलानि पशुपालपरिकल्पनया । वणिक्पथप्रचारान् । वणिजां पंथा वणिक्पथः स्थले जले च तत्र प्रचारा गत्यागमाश्चौराद्यपनयनेन । वारिस्थलपथपण्यपत्तनानि च । उपवनं उपसमुद्रं वा पतदित्यापतत्पण्यं तन्यते क्रयविक्रयाभ्यां विस्तार्यत इति [कार्वटिका] दिविशेष एव पत्तनं ततोन्यत्र क्रयविक्रयनिषेधान्निवेशयेदिति संबंधः ॥

सहोदकमेति । सहोदकं सहजोदकं आहार्यो‥‥[अन्य] स्मादानीयमानजलम् सेतुमुदकनिरोधार्थं । मृत्पाषाणादिभिर्बंधयेदिक्षुशाल्याद्यर्थं ॥

अन्ययेषां वा जनपदादीनां व [घ्नतां भूनिमार्गं] वृक्षकुद्दालाद्युपकरणानुग्रहं कुर्यात् । पुण्यस्थानारामाणां च देवगृहादीनामारा (मा) णां भूम्यादिभिरनुग्रह‥ [कुर्यात्] ।

सम्भूयेति । संभूय सह सेतुबंधं करिष्याम इति समयं कृत्वा । व्ययकर्मणि‥ कर्मंकरबलीवर्दाः‥‥र्मणि च भागी हिरण्यभागदायी स्यान्न च फलस्यांशं लभते ॥

श्रीमूला

मत्स्येत्यादि । सेतुषु, उत्पद्यमानानामिति शेषः । मत्स्यप्लवहरितपण्यानां मत्स्याः प्रसिद्धाः प्लवाः, कारण्डवाः, जलजलजविहारिणः, हरितानि पद्मोत्पलकशेरुकादीनि, एषां पण्यवस्तूनां, स्वाम्यं स्वामित्वं, राजा गच्छेत्, ननु सम्भूयसेतुकारिणोऽपि । दासेत्यादि । अननुश्रृण्वतः स्वरक्षकनिदेशावधीरिणः, दासाहितकबन्धून् दासान् गर्भदास-गृहजात-क्रीत-लब्ध-दायोपगतादीन् आहितकान् स्वामिना धनग्रहणेनाधितां नीतान् बन्धून् पुत्रादींश्च, राजा, विनयं प्रणतिं, ग्राहयेत् । बालवृद्धव्याधितव्यसन्यनाथांश्च अनाथा ये बालादयः तांश्च, बिभृयात् पोषयेत् । अप्रजातां वन्ध्यां स्त्रियं, प्रजातायाः पुत्रांश्च, बिभृयात् सा च ते च यद्यनाथा इत्यार्थम् ।

बालेत्यादि । बालद्रव्यं बालस्य अप्राप्तव्यवहारस्य नाथहीनस्य द्रव्यं, ग्रामवृद्धाः, वर्जयेयुः नोपयुञ्जीरन्, तथैव स्थापयेयुर्वर्धनार्हं चेद् वर्धयेयुश्चेत्यभिप्रायः । कियन्तं कालम्, आ व्यवहारप्रापणात् व्यवहारप्राप्तिकालं यावत् । देवद्रव्यं च देवालयद्रव्यं च, ग्रामवृद्धा वर्जयेयुः, अवधेरयोगान्नित्यम् ।

---

१. वर्जयेयुः पा० ।

[उत्पथगामिनां गृहस्थसन्न्यासिनां दण्डविधिः]

अपत्यदारान् मातापितरौ भ्रातॄनप्राप्तव्यवहारान् भगिनीः कन्याः विधवाश्चाबिभ्रतः शक्तिमतो द्वादशपणो दण्डोऽन्यत्र पतितेभ्यः

चाणक्यटीका

प्लवाः पक्षिणः। हरितपण्यानि शाकादीनि। आहितकः स्वदासः अन्यस्वामिनः अर्थं गृहीत्वा य आहितः। अशृण्वतः स्वामिनां निविशताम्। विनयं ग्राहयेत् यथा— स्वामिनां विधेयीभवति। बालः अप्राप्तव्यवहारः। व्यसनी दुःखाभिभूतः। अनाथः निस्स्वजनः एते यदा शून्यनिवेशिताः विनाशीभवन्ति तदा एनान् बिभृयात्। अप्रजातामिति। गर्भिणीम् अनाथामित्येव। प्रजातायाश्च पुत्रानिति न तावतैव सनाथा भवंति॥

बालद्रव्यमिति। यदा बालोऽनाथः स्यात्। ग्रामवृद्धाः व्यवहारिणः। वर्धयेयुः कृष्यादिप्रयोगैः। आ व्यवहारप्रापणादिति। "द्वादशवर्षा स्त्री प्राप्तव्यवहारा। षोडशवर्षः पुमान्।" (अधि० ३, अध्या० ३०) इति। यच्च ग्रामदेवताद्रव्यं निवेशसमकाले दत्तं भूतपूर्वं वा तत् त एव वर्धयेयुः आ विनियोजनदित्यूह्यम्॥

नीति-निर्णीतिटीका

मत्स्यप्लवेति। मत्स्यानां प्लवानां...हरितानां नालिकादीनां पण्यानां शृंगाटककसेरूकादीनां सेतुषु जनपदवद्धेष्वपि राजा स्वाम्यं गच्छेत्। निविष्टस्य जनपदस्य विनयार्थमाह—

दासाहितकेति। दासा गृहजातादयः। आहितकाः अन्यैराधी (न) कृताः। बांधवाः पुत्रभ्रात्रादयः स्वामिवचनं गुरुवचनं वा विनयादशृण्वन्तो राजा विनयं ग्राहयेत् साम्ना दण्डेन वा॥

बालवृद्धेति राजेति संबंधः। बालादीनामंतपतितोऽप्यनाथशब्दो विशेषणमन्यथातिप्रसंगस्स्यात्। व्यसनिनः पङ्ग्वादयः। स्त्रियमप्रजातां गर्भिणीमनाथामित्यपेक्ष्यं। प्रजातायाश्च पुत्रान् न तेषां मातृसद्भावमात्रेण सनाथतेति भावः॥

बालद्रव्यमिति अनाथबालद्रव्यं ग्रामवृद्धा ग्रामकूटादयो वर्द्धयेयुः। कृष्यादिभिराव्यवहारप्रापणात्। "द्वादशवर्षा स्त्री षोडशवर्षः पुमान् प्राप्तव्यवहार इति। देवद्रव्यं च ग्रामवृद्धा वर्द्धयेयुरिति समुच्चयः। वृद्धाश्चात्र धर्म्मतोऽर्थतश्च द्रष्टव्याः। श्रोत्रियभोग्यत्वापायनाद्धर्म्मतो वृद्धिं यास्यति। उक्तं हि।" अश्रोत्रियभोग्यं देवद्रव्यमपरुद्धकुमारहार्यमितिसनाथ...बलादीनामभरणे दण्डमाह—

श्रीमूला

अपत्येत्यादि। अपत्यदारान् अपत्यं दारांश्च। दारमिति पाठे समाहारद्वन्द्वः। अप्राप्तव्यवहारान् भ्रातॄन् बालान् सोदर्यान्। कन्याः भगिनीः विधवा भगिनीश्च। शक्तिमतः रक्षणोपायवतः। पतितेभ्योऽन्यत्र पतितव्यतिरेकेण, अपत्यादीनामपतितानामेवारक्षणे दण्डो, नतु पतितानाम्।

अन्यत्रमातुः पुत्रदारं अप्रतिविधाय प्रव्रजतः पूर्वः साहसदण्डः, स्त्रियं च प्रव्राजयतः लुप्तव्यवायः[1] प्रव्रजेदापृच्छ्य धर्मस्थान्, अन्यथा नियम्येत ॥

श्रीमूला

पतितेष्वपि प्रतिप्रसवमाह—अन्यत्र मातुरिति। माता तु पतितापि रक्षणीयैवेत्यर्थः।

पुत्रेत्यादि। पुत्रदारमप्रतिविधाय प्रव्रजतः पुत्राणां दाराणां च जीवनोपायमदर्शयित्वा सन्न्यस्यतः, स्त्रियं प्रव्राजयतश्च 'प्रव्रजन्तीं प्रयोजयतश्च, पूर्वः साहसदण्डः प्रथमः साहसदण्डः 'पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः' इति मनूक्तलक्षणः कर्तव्यः। लुप्तेत्यादि। लुप्तव्यवायः निश्शेषनष्टमैथुनशक्तिः पुरुषः। धर्मस्थान् धर्मशास्त्रानुसारेण व्यवहारनिर्णयेऽधिकृतान् प्राड्विवाकादीन्, आपृच्छ्य अनुज्ञाप्य, प्रव्रजेत् परिव्रजेत् सन्न्यस्येत्, अन्यथा नियम्येत अनेवंप्रव्रजन् कारागृहे निवेश्येत।

चाणक्यटीका

शक्तिमत इति कार्योपकरणसम्पन्नस्य। पतितेभ्य इति महापातकयुक्तेभ्यः।
"संवत्सरेण पततिः पतितेन समाचरन्।"
इति दोषात्। माता तु पतिताऽपि गर्भधारणाद्युपकारित्वाद् धर्मार्थैव भर्तव्या॥

अप्रतिविधायेति। पुत्रानुत्पाद्य गुणवति पुत्रे कुटुम्बमाधाय शेषपुत्राणां निवेशनं प्रतिविधानम्। पूर्वः साहसदण्ड इति। वक्ष्यमाणः। स्त्रियमिति आत्मीयाम्। लुप्तव्यायामः वाह्याभ्यन्तरशक्तिविकलः। धर्मस्थाः धर्माधिकरणनियुक्ताः। ते ह्यापृष्टाः किमयम् आलस्यात् प्रव्रजति, उत प्रव्रज्याफलदर्शित्वात्, किं पुत्रादीन् प्रतिविधायेति विमृश्य एनमनुजानीयुः। अन्यथेति अलुप्तव्यायामोऽपि आलस्यात् अनापृच्छ्य वा प्रव्रजंस्तैरेव नियम्येत बध्येत। पूर्वोक्तदण्डेन वा केवल······वृथा प्रव्रजेदन्यतः॥

नीति-निर्णीतिटीका

अपत्यदारमिति [अ] पत्यदारं मातापितरौ भ्रातृनप्राप्तव्यवहाहरान् भगिनीः कन्या विधवाश्चाविभ्रतः शक्तिमतो भरणशक्तिरस्ति चेद्गृहस्थस्य द्वादशपणो दण्डः। पण इति मुख्यमाहतद्रव्यं। अस्यापवादः अन्यत्र पतितेभ्यः माहपातकयुक्तेभ्योऽन्यत्राभरणे दंडः। अस्याप्यपवादः अन्यत्र मातुरिति। पतिताऽभिशस्ता वा भ माता त्यागमर्हतीति। उक्तं च मनुना—

नास्ति मातृसमो देवो नास्ति मातृसमो गुरुः।
पतिता वाऽभिशस्ता वा न माता त्यागमर्हति॥

---

१. व्यायन्मः पा०।

[स्वदेशवासानर्हाणां परिगणनम्]

वानप्रस्थादन्यः प्रव्रजितभावः, सजातादन्यः सङ्घः, सामुत्थायकादन्यः समयानुबन्धो वा नास्य जनपदमुपनिविशेत ॥

नीति-निर्णीतिटीका

प्रजाक्षयनिषेधायाह पुत्रदारमिति। पुत्रदारमप्रतिविधाय ग्रासाच्छदनादिभिः प्रवजतः तपसे गच्छतः पूर्वः साहसदंडः। सार्द्धसाग्रपणशतद्वयप्रमाणो दंडः। अन्यथा अविरक्ता अपि कुटुंबभरणक्लेशभयात् प्रव्रजंति। उक्तञ्च

मर्त्ये गृहाश्रमो घोरः पार्थिवैरपि दुस्तरः।
क्लिश्यन्त्यत्रासमर्था ये क्लीवाः पाषंडमाश्रिता इति ॥

स्त्रियं च चालुप्तव्यायामामनिवृत्तरजस्कामिति द्रष्टव्यं। प्रव्राजयतः प्रजोत्पत्ति-निरोधदोषात्पूर्वः साहसदण्डः ॥

लुप्तव्यायाम इति। लुप्तव्यायामः प्रजननशक्त्यभावात् प्रव्रजेद् वार्द्धके (क्ये) मुनिवृत्तिरिष्यते। तत्राप्यापृच्छय धर्म्मस्थान् वक्ष्यमाणन्यायात् प्रव्रज्योपदेशार्थं धर्मंश' 'दिति। अन्यथा करणे नियम्येत। दी' ' '

श्रीमूला

अथ जनपदवासानर्हानाह—वानेत्यादि। वानप्रस्थादन्यः प्रव्रजितभावः वैखान-सादतिरिक्तः प्रव्रजितावस्थः, अर्थाच्चतुर्थाश्रमी, अस्य राज्ञो जनपदं नोपनिविशेत नाध्यासीत। प्रतिषेधनिमित्तं तु अभिशङ्कनीयशीलत्वमुक्तप्रायम्। सुजातादन्यः सङ्घः सुष्ठु जातात् राजराज्यक्षेमायोत्पन्नात् जनसंघाद् अन्यो दुर्जातः जनसङ्घः, अस्य जन-पदं नोपनिविशेत। सामुत्थायकादन्यः समयानुवन्धो वा समुत्थायकाः सम्भूयसेतु-बन्धादिराजप्रजानुकूलकर्मकारिणः तेषां सम्बन्धी सामुत्थायकः सामुत्थायकात् समयानु-बन्धाद् अन्यः राजजनपदद्रोहफलः समयानुवन्धः सङ्केतरचना च, अस्य जनपदं नोपनिविशेत।

चाणक्यटीका

वानप्रस्थादन्यः प्रव्रजितभावः प्रव्रजितविशेषः परिव्राजकः श्रमणादिः सोऽपि तत्र न वसेत्। ते हि कर्मफलानां भोक्तारो गार्हस्थ्याद् ग्रामनिवासित्वात् कर्मापवादेन निविष्टमप्युत्थापयन्ति। वानप्रस्थास्तु साग्निहोत्राः वनवासित्वाच्च न जनपदाव-स्थानेन धर्मोपघाताय। जनपदनिवेशेन सह यो जातः यो वा भूतपूर्वस्य जनपदस्य सहोषितः तस्मादन्यः सङ्घः वृन्दचरः। सजातीयानां वा संघातानाम् अभोग्यः। धर्मा-र्थाभिवृद्धयनुकूलं समुत्थानम्। समुत्थाननिमित्तं यः समयानुबन्धः संहत्य प्रवृत्तिलक्षणः स सामुत्थानिकः। यथा—आगच्छत आरामं सेतुबन्धं वा (कर्ता) स्म इति। ततोऽन्यः यथा—आगच्छत, संहत्य विहराम इति। नास्य राज्ञो जनपदमुपनिवेशेत सेवेत इति ॥

[ग्रामेषु विनोदस्थानानां उपवनप्रेक्षणशालादीनां निषेधः, तत्फलं च]

न च तत्रारामा विहारार्थाः शालाःस्युः । नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा न कर्मविघ्नं कुर्युः; निराश्रयत्वात् ग्रामाणां, क्षेत्राभिरतत्वाच्च पुरुषाणां, कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवतीति ॥

नीति-निर्णीतिटीका

प्रजाविप्लवनिषेधार्थमाह । वानप्रस्थेति वानप्रस्था दान्यः प्रव्रजितभावः । श्रमणसौगतादिः । सजातादन्यः संघो बहूनामेकोभावः सहोत्पन्नानामेव तस्मादन्यः संघः श्रेणीवंधः सामुत्थायिकादन्यः समयानुवंधः सम्यगुत्थानं धर्म्मार्थमिति समुत्थायस्तेन चरतीति । सेतुवंधतडागाद्यर्थः समयानुवंधस्तस्मादन्यः चौर्यादिसमयानुवंधो नास्य जनपदमुपनिविशेत । अयंनिवेशविषयो नियमः आगतवस्तु ..... [पा] षंडादयोराज्ञानुज्ञाताः प्रविशंत्यन्यथोदास्थितपरिव्राजकाश्रमादिपाषंडानामुपादानं व्यर्थं स्यात् । श्रेण्याः सेनाङ्गत्वं च हीयते ।

श्रीमूला

न चेति । तत्र जनपदे, आरामाः विहारार्थाः सर्वजनविनोदस्थानान्युपवनानि, शालाश्च प्रेक्षणीयप्रयोगशालाश्च, न स्युः । आरामशालाप्रतिषेधस्य फलमाह— नटेत्यादि । नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा कर्मविघ्नं कृष्याद्यनुष्ठानविघ्नं न कुर्युः । नाट्यनृत्तगानवादनकथावर्णननर्मक्रियासु स्ववृत्तिषु न चेष्टेरन्निति भावः । कस्मात्, ग्रामाणां निराश्रयत्वात् नाट्यादिप्रयोगयोग्यशालारहितत्वात् । एवञ्च सिद्धं परमफलमाह—क्षेत्रेत्यादि । पुरुषाणां क्षेत्राभिरतत्वाद् विनोदस्थानाभावेन स्वस्वकर्मस्थानासक्तत्वात्, कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवति कोशस्य, विष्टेः हठकारयितव्यस्य कर्मणः, द्रव्यस्य द्रुभवस्य दार्वादिपदार्थस्य, धान्यस्य, रसस्य तैलक्षुरसादेश्च वृद्धिः भवति । इति एवम्प्रकारं फलम् उन्नेयमित्यर्थः ।

चाणक्यटीका

विहारार्थाः क्रीडनार्थाः । शालाः पानगोष्ठीमण्डपाः कर्मविघ्नकरत्वात् । धर्मार्थास्तु स्युरेव । नर्तकाः छात्रादयः । वाग्जीवनाः कथाकुशलाः । कुशीलवाः प्लवनलङ्घनादिष्वभियोगिनः (ये) तत्रैव वर्तन्ते । निराश्रयत्वादित्यादिना फलमनुवदति । आरामाद्यभावेन निराश्रयत्वम् । नटाद्यभावेन क्षेत्राभिरतत्वम् । विष्टिः वक्ष्यमाणलक्षणा । द्रव्यं सारदार्वादि । कुप्यमितिपाठान्तरम् । रसस्तैलादिः ।

नीति-निर्णीतिटीका

कोशवृद्ध्यर्थमाह नचेति । नच अ (त ?) त्र निवेशे आरामाः विलासैराररमंते कर्षका इति । छायामात्रोपयोगिनस्तु स्युः । विहारार्था वा शाला द्यूतादिक्रीडार्थाः

[राजकर्तव्यसङ्ग्रहः]

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम् ।
देशं परिहरेद्राजा व्ययक्रीडाश्च वारयेत् ॥४९॥
दण्डविष्टिकराबाधैः रक्षेदुपहतां कृषिम् ।
स्तेनव्यालविषग्राहैः व्याधिभिश्च पशुव्रजान् ॥५०॥
वल्लभैः कार्मिकैः स्तेनैः अन्तपालैश्च पीडितम् ।
शोधयेत् पशुसङ्घैश्च क्षीयमाणवणिक्पथम् ॥५१॥
एवं द्रव्यं द्विपवनं सेतुबन्धमथाकरान् ।
रक्षेत् पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेत् ॥५२॥

इति कौटिलीऽर्थशास्त्रेअध्यक्षप्रचारे द्वितीयाधिकरणे जनपदनिवेशः प्रथयोऽध्यायः, आदितो द्वाविंशः ।

नीति-निर्णीतिटीका

शाला न स्युः । कर्षणे विहरणात् कर्म्मविघ्ने कोशावृद्धिरिति भावः । नटादयः प्रतीतास्ते च कृषिकर्मविघ्नं प्रेक्षणादिभिर्न कुर्युरिति अत्र हेतुः—

निराश्रयत्वादिति निराश्रयत्वाद्ग्रामाणां शालारामाभावात् क्षेत्रभिगमत्वाच्च पुरुषाणां नटाद्यभावात् । कोशादिवृद्धिर्भवति । कोशो हि हिरण्यदानात् । विष्टिः सीतादिसाहाय्यदानात् । द्रव्यं वस्त्रादि । धान्यानां रसानां तैलघृतादीनां वृद्धिर्भवति । सद्वृद्धया राज्यवृद्धिः ।

श्रीमूला

परचक्रेति । राजा परचक्राटवीग्रस्तं परचक्रं शत्रुकपटः शत्रुसैन्यं वा । अटवी तात्स्थ्याद् अटवीपालः ताभ्यां ग्रस्तं, व्याधिदुर्भिक्षपीडितं, देशं परिहरेत् परचक्रादिभ्यो दूरीकुर्यादित्यर्थः । व्ययक्रीडाश्च धनव्ययहेतुभूताः क्रीडाश्च वारयेत् ॥

दण्डविष्टीति । दन्डविष्टिकरावाधैः दर्ण्डविष्टिकरणामतिरेचननिमित्ताभिः पीडाभिः, उपहतां कृषिं रक्षेत् युक्तदण्डविष्टिकरो भूत्वेत्यार्थम् । स्तेनव्यालविषग्राहैः व्याधिभिश्च उपहतान् पशुव्रजांश्च रक्षेत् स्तेनादिभिरुपघातो यथा न भवेत् तथा पालयेत् ॥

वल्लभैरित्यादि । वल्लभैः राजदयितैः, कार्मिकैः राजशुल्काधिकृतैः, स्तेनैः, अन्तपालैः, पशुसङ्घैश्च व्याघ्रादिसङ्घैश्च, पीडितम्, अत एव क्षीयमाणं वणिक्प्रचारवैरल्यात्, वणिक्पथं शोधयेत् रक्षेत् वल्लभादिपीडापरिहारद्वारेण ॥

एवमित्यादि । स्पष्टार्थः श्लोकः ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे प्रथमोऽध्यायः जनपदनिवेशः, आदितो द्वाविंशः ॥

चाणक्यटीका

न केवलं निविशमानमेव प्रतिपालयेत् चिरोपितमपि सोपद्रवम्। तदाह-परचक्रेति। ग्रस्तमुपद्रुतमित्यर्थः। व्याधिना दोषजेन दैवजेन वा। परिहरेत् परिहारेण पालयेत्। एवंच राजा इत्युच्यते। व्ययक्रीडाः व्ययप्रधानाःक्रीडाः॥

अनुचितो दण्डः अनुचितः करः एषाम् अतिशयः प्रयोगः आबाधः। कृषिं रक्षेद् यथा नावसीदतीति। तत्र अवबद्धत्वात् प्रजानाम्। ननु च निवेशोऽयं प्रकृतः न निविष्टरक्षणम्। कोऽत्र दोषः। यदि निवेशप्रसङ्गेन रक्षणमुच्यते। अथवा एतदपि निवेशनं यदनुपस्थानम्। विषं स्थावरजङ्गमादि॥

वल्लभाः कार्मिकाः वणिक्पथकर्मणि शुल्कादौ नियुक्ताः। पशुसङ्घैरिति। व्याघ्रैः हस्तियूथैर्वा पीड्यमानम्। अथवा वल्लभादिभिः पीडितं वणिक्पथम्। रक्षेदिति वर्त्तते। क्षीयमाणं तृणलतागुल्मादिभिः खिलीभवन्तम्। पशुसङ्घैः गोष्ठैः। शोधयेत् प्रकाशं कुर्यात्॥

कृषिः पाशुपाल्यं वणिज्या च वार्त्ता प्राधान्याद् रक्षणं स्वशब्देनैवाभिधाय एवमित्यनेन प्रकारेण द्रव्यद्विपवनादिकमपि—यथायथमुपद्रुतं प्रवृत्तं रक्षेदिति अतिदिशति। नवान् प्रवर्त्तयेत्। चिरोपितोऽपि देशे न पूर्वप्रवृत्तैरेव सन्तुष्येदिति॥

जनपदनिवेशः प्रथमंप्रकरणम्।

॥ प्रथमश्चाध्यायः॥

नीति-निर्णीतिटिका

उत्तरत्रापि परिहारमाह।

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम्।
देशं परिहरेद्राजा व्ययक्रीडाश्च वर्जयेदिति॥

परचक्रं शत्रुसैन्यं आटव्याटविकस्ताभ्यां ग्रस्तं कृतदाहविलोपं व्याधिदुर्भिक्षपीडितं देशं परिहरेत् दण्डकरादि न गृह्णीयादित्यर्थः। व्ययक्रीडाश्च कर्षकादीनां परस्परस्पर्द्धया''''''व्ययक्रीडा निषेधयेत्। विघ्नं मा भूदिति।

वार्त्तारक्षार्थमाहदण्डविष्टिकरेति।

दण्डविष्टिकरै''''''चितादभ्यधिकगृहीतैः समाहर्त्रादिभिर्ये आबाधास्तैरुपहतां पीडितां कृषिं रक्षेदिति सम्बन्धः। स्तेनैश्चोरैर्व्यालैर्व्याघ्रादिभिर्विषैः स्थावरजङ्गमैर्ग्राहैः शिशुमारादिभिर्व्याधिभिरीशानज्वरादिभिरुपहतान् पशुव्रजान् रक्षेत्॥

वल्लभैरिति—

वल्लभै राज्ञीकुमारादिभिः। कार्म्मिकैः शुल्काध्यक्षादिभिः। स्तेनैरन्तपालैश्चापीडितं रक्षेदिति वर्त्तते। पशुसङ्घैश्च क्षीयमाणं वणिक्पथं शोधयेदिति। राजा स्वपशुदानैरनुगृह्णीयादिति भावार्थः।

अतिदेशमाह—

एवं द्रव्यमिति ।

एवमनंतरोक्तविधानेन वल्लभादिभिः पीड्यमानं दव्यवनं [द्विपवनं] हस्तिवनं सेतुबन्धमथाकारान्······पूर्वकृतान् राजा नवांश्चाभिप्रवर्त्तयेत् ॥

इति मुग्धविलासाङ्कयोग्धमविराचेतीतिनिर्णीत्यभिधानायाम् कौटिलीय राजसिद्धान्तटीकायामध्यक्षप्रचारे ।

॥ प्रथमोऽध्यायः ॥

विंशं प्रकरणम्

द्वितीयोऽध्यायः

[अकृष्यभूमौ गोप्रचार—तपोवनाराममृगवनादिपरिकल्पनेन साफल्यकरणम्]

भूमिच्छिद्रविधानम् ।

अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेत् प्रदिष्टाभयस्थावरजङ्गमानि च ब्राह्मणेभ्यो ब्रह्मसोमारण्यानि, तपोवनानि च तपस्विभ्यो गोरुतपराणि प्रयच्छेत् । तावन्मात्रमेकद्वारं खातगुप्तं स्वादुफलगुल्मगुच्छमकण्टकिद्रुममुत्तानतोयाशयं दान्तमृगचतुष्पदं भग्ननखदंष्ट्रव्यालं मार्गायुकहस्तिहस्तिनीकलभं मृगवनं विहारार्थं राज्ञः कारयेत् ।

श्रीमूला

भूमिच्छिद्रविधानमिति सूत्रम् । भूमिच्छिद्रं सस्याद्युत्पत्त्यनर्हा भूमिः तस्य विधानं सफलत्वसम्पादनप्रकारः उच्यत इति सूत्रार्थः । वणिक्पथप्रचारान् निवेशयेदित्युक्तमधस्तात्, निवेशयस्थानं त्वधुनाभिधीयते ।

अकृष्यायामिति । अकृष्यायां भूमौ मालगर्तशैलशर्करिलप्रायतया कृषिरहितायां भूमौ, पशुभ्यो गोमहिषमेषेभ्यः विवीतानि प्रयच्छेत् तृणजलवन्ति स्थलानि विसृजेत् । प्रदिष्टेत्यादि । किञ्च, प्रदिष्टाभयस्थावरजंगमानि दत्ताभयानि स्थावरजंगमानि स्थावराणि वृक्षलतादीनि जंगमानि सौम्यमृगादीनि च येषु तानि तथाभूतानि, गोरुतपराणि गव्यूतिपरमपरिमाणानि, ब्रह्मसोमारण्यानि वेदाध्ययनसोमयागाद्यनुष्ठानार्थानि वनानि, ब्राह्मणेभ्यः प्रयच्छेत् ब्राह्मणसमुदायोपयोगाय विसृजेत्, तपोवनानि च यथोक्तविशेषणानि, तपस्विभ्यः प्रयच्छेत् । तावदिति । तावन्मात्रं गोरुतपरम्, एकद्वारं, खातगुप्तं परिखापरिक्षिप्तं, स्वादुफलगुल्मगुच्छं मनोज्ञफललताप्रतानस्तवकम्, अकण्टकिद्रुमं कण्टकशून्यवृक्षयुक्तम्, उत्तानतोयाशयम् अगम्भीरजलाधारं, दान्तमृगचतुष्पदं दान्ताः मनुष्यपरिचयविश्वस्ता मृगाश्चतुष्पदाश्चान्ये यस्मिंस्तत् तथाभूतं, भग्ननखदंष्ट्रव्यालं भग्ननखदंष्ट्राः उद्धृतनखदंष्ट्रा व्याला व्याघ्रादिमृगाः यस्मिंस्तत् तथाभूतं, मार्गायुकहस्तिहस्तिनीकलभं मृगयुकर्मयोग्याः करिकरिणीकरिपोताः यस्मिंस्तत् तथाभूतं, मृगवनं, राज्ञः विहारार्थं कारयेत् । मार्गायुकशब्दः आर्हीयठगन्तः । मार्गायुकेति मातृकापाठेषु द्वितीयस्याचो दीर्घत्वं साध्यम् ।

चाणक्यटीका

शून्यनिवेशनसम्बन्धेन एतच्छेषं भूमिच्छिद्रापिधानमुच्यते। कृषियोग्या भूमिः क्षेत्रम्, तस्य विभागो व्याख्यातः। कृष्यनर्हायाः छिद्रायाः विवीतादिभिः छादनमपिधानमिवेति। यत्तूक्तम्—'एवंद्रव्यं द्विपवनम्', 'व्याधिभिश्च पशुव्रजान्' इति। तानि तत्प्रकाराणि च स्थानानि विवेश्यन्ते॥

पशुव्रजस्थानमेव तावदाह—अकृष्यायामिति। पशवो ग्रामीणा राजकीया अन्ये वा पशुपालसम्बन्धिनः गावश्चखरोष्ट्रादयः। विवीतानि। विविधं वीतं येषु। विगतिकानि अशनखादनानि येष्विति यथासम्भवं गत्यादीनां ग्रहणम्। प्रदिष्टाभयेति। अच्छेद्यतया च दत्ताभयानि ऋक्षमृगादीनि येष्विति। ब्रह्मारण्यानि यत्र आरण्यकादि शास्त्रम् अधीयते। सोमारण्यानि यत्र यज्ञकर्माणि क्रियन्ते। गोरुतपराणि प्रकर्षेण क्रोशमात्राणि, ततः प्रकर्षे चोरव्यालाश्रयः स्यात्। तावन्मात्रम् गोरुतमात्रम्। लता वल्ल्यः। गुल्माः शाखाप्रतानवन्तः करमर्दप्राचीरामलकादयः। गुच्छाः प्रताना विम्बीवर्षकादयः। तैः स्वादुफलैः युक्तम्। विश्रामाशनार्थम्। उत्तानोतोयाशयम्। श्रमतृष्णापनयार्थम्। उत्तानत्वात् सुखेनावतीर्यते, ग्राहाद्युपद्रवाभावश्च। चतुष्पदा महिषगवयादय आखेटकार्थाः दान्तत्वान्न घ्नन्ति। व्यालाः व्याघ्रादयः। तेच बालावस्थायामेव भग्ननखदंष्ट्राः कार्याः। तत्र मृगयाशीला मृगयवः तेषां कर्म मार्गयुकं पञ्चविधं हस्तिशिक्षोक्तम्। तेन युक्ताः तत् कर्म गोशब्दे (?) गौण्या वृत्त्या मार्गयुकमिति व्यपदिश्यते। तेहि स्वयं मृगयाङ्गत्वाद् रूपमादाय विशस्य च स्वामिने समर्पयन्ति। हस्तीति जातिशब्दोऽप्ययं हस्तिनीकलभग्रहणाद् अप्राप्तमदेऽपि विशिष्ट एव वर्त्तते। मत्तस्य व्यालस्य च हस्तिनः क्रीडाङ्गत्वात्, मदोन्मर्दनदोषाच्च परिहारः। कलभः सप्तवर्षो वा अष्टवर्षो वा, तेच मार्गयुका यत्रेति विग्रहः। विहारार्थं क्रीडार्थम। सर्वसाधारणोपभोग्यमित्यर्थः॥

नीतिनिर्णीतिटीका

भूमिच्छिद्रापिधानमिति सूत्रम्। भूमेश्छिद्रमिवच्छिद्रमकृष्यत्वं धान्याद्यभावात्। अपिधानमावरणमपिधानमिवापिधानम्। धर्मार्थकामाख्यफलस्वभावात्। अपिपूर्वो दधातिरावरणे वर्त्तत इति सूत्रार्थः। सम्बन्धस्तु जनपदनिवेशशेषमेवैतत्। कृष्यायां भूमौ निवेश उक्तः। अकृष्यायामुच्यत इति॥

(अकृष्यायामिति।) पाषाणादिभिरकृषियोग्यायां भूमौ पशुभ्यो गोमहिष्यादिभ्यो विवीतानि तृणारण्यानि प्रयच्छेत्। वी प्रगतिप्रजनकान्त्यसनखादनेषु पठितोऽत्र खादने द्रष्टव्यः॥

(प्रदिष्टेति।) प्रदिष्टं दत्तमभयं छेदवधनिषेधात् स्थावराणां वृक्षादीनां, जंगमानां पक्षिमृगादीनां येषुं तानि, तपस्विभ्यो वानप्रस्थस्नातकादिभ्यो ब्रह्मसोमारण्यानि ब्रह्मारण्यं यत्रारण्यकादिवेदोपनिषदधीयते। सोमारण्यं यज्ञभूमिस्तानि। गोरुतपराणि क्रोशपराणि। क्रोशः परं प्रमाणमिति। अधिकं प्रमाणं नेष्यते चौराद्याश्रयदोषात्।

सर्वातिथिमृगं प्रत्यन्ते चान्यन्मृगवनं भूमिवशेन वा निवेशयेत् ।

[ओषधिवन हस्तिवनयोः विधानम्]

कुप्यप्रदिष्टानां च द्रव्याणामेकैकशो वा वनं निवेशयेत्, द्रव्यवनकर्मान्तान् अटवीश्च द्रव्यवनापाश्रयाः । प्रत्यन्ते हस्तिवनमटव्यारक्षन् निवेशयेत् ॥

नीति-निर्णीतिटीका

धर्मापिधानमुक्त्वा कामापिधानमाह—(तावन्मात्रमेकद्वारमिति ।) तावन्मात्रं गोरुतपरमेव च । एकद्वारं रक्षासौकर्यार्थम् । खातगुप्तं द्वारखातयोरुपादानात् प्राकारोपपन्नम् । स्वादुफला गुल्माः करमर्दकादयः । गुच्छा बदरामलकादय स्थाः शाखिनो यस्मिन् । अकंटकिनो द्रुमा यस्मिन् । उत्ताना अगाधेतरास्तोयाशया यस्मिन् । दांता विनयं ग्राहिताः, मृगा एणादयश्चतुष्पदा महिषगवयादयो ····· योगार्थम् । भग्ना नखा दंष्ट्राश्च बालत्व एव येषां व्यालानां व्याघ्रादीनां ते यत्र । मार्गयुकमिति । मृगयुर्व्याधस्तस्य कर्म मार्गयुकं हस्तिशिक्षोक्तं येषां हस्तिहस्तिनीकलभानां यस्मिन् । ते हि शिक्षावशात् मृगं विधृत्य हत्वा वा राज्ञेऽर्पयंतीति मृगयावनं विहारार्थं राज्ञः कारयेत् ॥

श्रीमूला

सर्वेत्यादि । प्रत्यन्ते समीपे, भूमिवशेन वा योग्यभूम्युपलम्भानुसारेणाप्रत्यन्ते वा, सर्वातिथिमृगं सर्वे अतिथिमृगा यस्मिन् देशान्तराल्लुब्धकोपद्रुता आगत्य वसन्ति तत् सर्वातिथिमृगं नाम, अन्यत् मृगवनं निवेशयेत् ।

कुप्येति । कुप्यप्रदिष्टानां कुप्याध्यक्षप्रकरणोक्तानां, द्रव्याणां शाकतिनिशादिसारदारुवर्गस्य उटजचिमियादिवेणुवर्गस्य मालतीमूर्वादिवल्कवर्गस्य चेत्येतेषाम् एकैकशो वा वनं निवेशयेत् एकैकस्य एकैकं वनं कल्पयेत् । द्रव्यवनकर्मान्तान् अटवीश्च द्रव्यवनसम्बद्धानि कर्माणि वनानि च, द्रव्यवनापाश्रयाः द्रव्यवनोपजीविनः पुरुषाः, निवेशयेयुरिति विपरिणामेन सम्बन्धः विदध्युरित्यर्थः ।

प्रत्यन्ते इति । प्रत्यन्ते जनपदावसानदेशे, हस्तिवनं नागवनम्, अटव्यारक्षम् अटव्या आरक्षाः परिरक्षका यस्मिस्तत् तथाभूतं, निवेशयेत् । नागवनाध्यक्षः, पार्वतं नादेयं सारसम् आनूपं च पर्वताश्रयं नद्याश्रयं सरोव्यपाश्रयं साम्बुदेशाश्रयं च, नागवनं, विदितपर्यन्तप्रवेशनिष्कसनं विज्ञातपरिसराभिगमनिर्गमं कृत्वा, नागवनपालैः पालयेत् । हस्तिघातिनं शबरपुलिन्दादिं, हन्युः । स्वयंमृतस्य अर्थाद्धस्तिनः, दन्तयुगम्, आहरतः उपनयतः वनेचरजनस्य, सपादचतुष्पणो लाभः पारितोषिकं, देयः इति शेषः ।

चाणक्यटीका

वनवशेन वेति । जनपदस्येति यदि स्याद् उक्तवनदाच्छेदासंभवन्तौ (?) । रथाद्युपस्कारार्थम् ।

[हस्तिवनरक्षणविधिः]

नागवनाध्यक्षः पार्वतं नादेयं सारसमानूपं च नागवनं विदितपर्यन्तप्रवेशनिष्कसनं नागवनपालैः पालयेत् । हस्तिघातिनं हन्युः । दन्तयुगं स्वयंमृतस्याहरतः सपादचतुष्पणो लाभः ॥

चाणक्यटीका

अपृथग्विधानमाह–कुप्यप्रदिष्टानामिति । कुप्याध्यक्षोक्तानाम् । एकैकश इति सजातीयानां प्रायेणैकत्र संवर्त्तिनियोगसंपदश्च भवन्ति (?) । चशब्दात् संकीर्णमपि । कर्मान्ताः द्रव्यच्छेदनपाटनादीनि । अटवीश्चेति । ताटस्थ्यादाटविकाद् रक्षार्थं विष्ट्यर्थञ्च । (द्रव्यवनापाश्रयाः) द्रव्यवनमपाश्रित्य तज्जातपण्योपजीविनः । अन्त्येवनवशेन वेति वर्तते ॥

प्रत्यन्ते जनपदोपघातप्रतिषेधार्थम् । हस्तिवनं हस्तिनां निवासभूमिर्वनम् । तद्यथा लौहित्यस्य प्रयागस्य गङ्गाया हिमवतश्च मध्ये प्राप्यं वनम् । जनपस्य तदन्तःपातित्वादुपघातः स्यात् । तस्मात्तस्यैव प्रत्यन्ते निवेशयेद् व्यवस्थापयेत् । छेदाभावोऽ(त्र) त्रासनादिनिवारणेन । अटव्यारक्षम् । अन्यथा परोऽपि हस्तिवन्धं कुर्यात् । पूर्वमाश्रयत्वाद् द्रव्यहस्तिवनयोर्निवेशमात्रमुक्तम् । इह त्वकृष्यायामिति विषयप्रदर्शनार्थमुच्यते ॥

नीति-निर्णीतिटीका

सर्वातिथिमृगमिति । सर्वेऽतिथिवत् पूज्यन्ते दत्ताभयाः पोष्यन्ते धर्मार्थं यत्र प्रत्यन्ते तस्मिन् निवेशयेत् । अन्यद् वा वनं रक्षया निवेशयेदिति सम्बन्धः । चशब्दादन्यदपि मृगवनं निवेशयेत् । मृगयारण्ये निक्षेपार्थं, भूमिवशेन वा अप्रत्यन्तेऽपि यत्र मृगाः सन्तीति ।

अर्थापिधानमभिधातुमाह—(कुप्यप्रदिष्टानामिति ।) कुप्याध्यायप्रदिष्टानां द्रव्याणामिति । तरूणां शाकतिनिशादीनां प्रत्येकश एकजातीयानां पृथक्पृथग् वनानि निवेशयेत् । द्रव्यवनकर्मं (र्मा)तांश्च वृक्षच्छेदनतक्षणादिस्थानानि निवेशयेत् । अटवोश्चाटविकांश्च द्रव्यवनापाश्रया रक्षणार्थं निवेशयेदिति सम्बन्धः ।

हस्तिवननिवेशमाह—(प्रत्यन्ते इति ।)

प्रत्यन्ते जनपदमध्ये पीडावहत्वात् हस्तिवनं निवेशयेदिति सम्बन्धः । अटव्यारक्षमाटविकारक्षम् ॥

श्रीमूला

नागवनेत्यादि । नागवनपालाः, हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखाः हस्तिपक आधोरणः, पादपाशिकः पादपाशबन्धनकुशलः, सैमिकः सीमाधिकृतः, वनचरकः वनवासी, पारिकर्मिकः हस्तिपरिचरणचतुरः एतैः सहिताः, हस्तिमूत्रपुरी-

[हस्तिसञ्चारसीमादिपरिज्ञानं प्रशस्तानां ग्रहणं च]

नागवनपालाः हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखाः हस्तिमूत्रपुरीषच्छन्नगन्धाः भल्लातकीशाखाप्रतिच्छन्नाः पञ्चभिस्सप्तभिर्वा हस्तिबन्धकीभिः सहचरन्तः शय्यास्थानपद्यालण्डकूलपातोद्देशेन हस्तिकुलपर्यग्रं विद्युः ॥

———————

श्रीमूला

पच्छन्नगन्धाः हस्तिमूत्रपुरीषगन्धन्यक्कृतगन्धान्तराः, भल्लातकीशाखाप्रतिच्छन्नाः अरुष्कराख्यवृक्षविटपावच्छादिताः, पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह गजबन्धनशिक्षिताभिर्वशाभिः सह, चरन्तः सन्तः, शय्यास्थानपद्यालण्डकूलपातोद्देशेन शयनावस्थानपदपङ्क्तिविष्ठावप्राघातप्रदेशदर्शनेन, हस्तिकुलपर्यग्रं गजयूथसञ्चारपरमावधिं विद्युः ।

चाणक्यटीका

इदानीं प्रचाररक्षणग्रहणानि अनन्तरवनसंबन्धेनाह—नागवनाध्यक्ष इति । अस्मादेवऽनुमतनियोगः । पर्वतादिचरत्वात् पार्वतादिव्यपदेशं चतुर्विधम् । ननु च नदो पर्वत उभयञ्चेति त्रिविधः प्रचार उक्तः तत्रा (? न्त्रा) न्तरे । सत्यम् । निवासभूमावेतानि स्थानानि सम्भवन्ति इति पालनापेक्षया भेद उक्तः । अनूपं बहुपङ्कोदकप्रायम् । विदितो ज्ञातः पर्यन्तः प्रमाणं प्रवेशनिष्कासौ च तत्रत्यानां हस्त्युपघातिनां वा यत्र । नागवनपालास्तदायत्ता एवाटविकाः । हन्युरिति नागवनपालाः । आहरत इति अर्पयतः, नागवनपालस्य श्रमवधार्थम् । पानभोजनाय यातः (?) कुटुम्बार्थं पणचतुष्टयमिति उभयथाऽस्य प्रीतिरुत्पादिता । लाभोऽध्यक्षेण कार्य इति शेषः ॥

हस्तिपको हस्त्यारोहः । पादपाशिकः पादपाशनियुक्तः । सीमको वनमर्यादाभिज्ञः । वनचरो लुब्धकः । पारिकर्मिको रज्जुवेण्वाद्युपकरणसंपादकः । तत्रत्यहस्तिमूत्रादिव्यवहितात्मगन्धाः । हस्तिनो भल्लातकि (? क) वृक्षं परिहरन्ति । अतस्तत्पत्रवतीभिः शाखाभिर्व्यवहितात्मरूपाः । शाखाग्रहणं वृक्षानुकारार्थम् । पञ्चभिः सप्तभिर्वेति । यथोक्तम्—

संयोगकामो नैराश्यं युग्मासु प्रतिपद्यते ।
अयुग्मासु रयेत्त (? मेता) स्मात् पूरणाशंसयावशः ॥ इति ।

हस्तिबन्धक्यो हस्तिगणिकाः । शय्यास्थानं पांसुवालुकापङ्कादि । पद्यं पदनिक्षेपचिह्नम् । लण्डं पुरीषम् । कूलघातो नदीकूले दन्ताभ्याघातः । एत एवोद्देशाः । पर्यग्रं समग्रम्, अभिन्नसञ्चारं वा ॥

नीति-निर्णीतिटीका

(नागवनेति ।) चतुर्विधं वनं पालयेदिति सम्बन्धः । पर्वते भवं पार्वतं तस्य लक्षणं कटुतिक्तकषायाम्लवृक्षौषधिरसद्रवः । पार्वतस्तृणपाषाणविषमो देश उच्यते । नद्यां भवं नादेयम् । तथा च उक्तम्—

नलवंजुलविष्यन्दिवालुकास्थलसंयुतः ।

सर्वसाधारणद्रव्यो नादेयो देश उच्यते ॥

सरसि भवं सारसम् । उक्तं च—

उत्तृणः स्थलसंरोधी स्निग्धमूलवनौषधिः ।

विदाही जलविष्यन्दी सारसः संप्रकीर्तितः ॥

तथा—

सुस्वादुमधुरस्निग्धकषायौषधिवीरुधः ।

बहुपंकोदकक्षारः सोऽनूपो देश उच्यते ॥

तत्र भवमानूपम् । एवं चतुर्विधमपि वनं नागवनपालैः कृत्वा नागवनाध्यक्षः पालयेत् । हस्तिनां वनं सर्वोप·····वनिषेधात् । विदितपर्यन्तप्रवेशनिष्कासमिति सम्बन्धः ॥

(हस्तिघातिनमिति ।) हस्तिघातिनं हन्युर्नागवनपालाः । दंतयुगं स्वयंमृतस्य हस्तिनो नागवनपालस्यान्यस्य वाऽऽहरतः सपादचतुष्पणो लाभः । पादस्याधिकत्वं तात्कालिकभोजनार्थमन्यथा पंचादिष्वपि संपूर्णेषु पणेषुदत्ते·····ःभोजनाय पणभंग-मस्थिभंगमिव मन्यमाना नातिप्रहृष्यंतीति भावः ।
ग्रहणार्थं हस्तिकुलाग्रज्ञानायाह—(नागवनपाला इति ।)

नागवनपालाः, हस्तिपक आरोहकः, पादपाशनियुक्तः, सैमिको वनमर्यादा-भिज्ञः । वनचरकः शबरादिः, पारकर्मिकः शिक्षोक्तपरिकर्मकुशलस्तेषां सहाया भूत्वा, हस्तिमूत्रपुरीषच्छन्नगंधास्तद्रसभावितकंचुकिभिः । भल्लातकी आरुष्करवृक्षः तस्य पत्रोपलक्षितशाखाच्छन्नरूपाः । हस्तिनो हि भल्लातकी·······हरंतीति । पंचभिः सप्तभिरिति विषमसंख्याग्रहणं हस्तिप्रलोभनार्थम् ।

उक्तं च—

संयोगकामो नैराश्यं युग्मासु प्रतिपद्यते ।

अयुग्माश्चारयेत्तस्मात्पूरणासं·······[॥]

हस्तिबंधक्यो गणिकाबंधक्य इव हस्तिप्रलोभनात् । ताभिरिति तदारुढः सहचरंतः कुल·····निक्षेपचिन्हाकारतः, लिं (लें ?) डं पुरीषाकारतःकूलाघातो दंतोत्खाताकारतः, तदुद्देशे···रिग्रहार्थं पर्यग्रं समस्तप्रमाणं विद्युर्ग्रहणार्थम् ॥

यूथचरं एकचरम् निर्यूथं यूथपतिं हस्तिनं व्यालं मत्तं पोतं बद्धमुक्तं च निबन्धेन विद्युः । अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिनो गृह्णीयुः ।

[हस्तिरक्षणफलं, हस्तिभेदाश्च]

हस्तिप्रधानो हि विजयो राज्ञाम् । परानीकव्यूहदुर्गस्कन्धावारप्रमर्दना ह्यतिप्रमा णशरीराः प्राणहरकर्माणो हस्तिन इति ॥

कलिङ्गाङ्गगजाः श्रेष्ठाः प्राच्याश्चेदिकरूशजाः ।
दाशार्णाश्चापरान्ताश्च द्विपानां मध्यमा मताः । ५३॥
सौराष्ट्रिकाः पाञ्चनदाः तेषां प्रत्यवराः स्मृताः ।
सर्वेषां कर्मणा वीर्यं जवस्तेजश्च वर्धते । ५४॥

इत्यध्यक्षप्रचारे भूमिच्छिद्रपिधानं द्वितीयोध्यायः आदितस्त्रयोविंशः ।

———

श्रीमूला

यूथेत्यादि । यूथचरंयूथेनैव सह चरति नत्वेकाकी यस्तम्, एकचरम् एक एव चरति नतु यूथेन सह यस्तं, निर्यूथं यूथनिर्गतं, यूथपतिं, व्यालं क्रूरस्वभावं, मत्तं प्रभिन्नं, पोतं दशवर्षकं, बद्धमुक्तं च, हस्तिनं, निबन्धेन विद्युः यूथचरादिहस्तीयत्तादिकं गणनपुस्तके समारोप्य तेन जानीयुरित्यर्थः । अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिशिक्षाविचक्षणैः प्रमाणभूतैः श्लाघितलक्षणचर्यान् हस्तिनः, गृह्णीयुः, राजार्थे ।

हि यस्मात् कारणाद्, राज्ञां विजयः हस्तिप्रधानः शत्रुजयः हस्तिमुख्यसाधनकः । हस्तिनां मुख्यसाधनत्वं विशदयितुमाह—परेत्यादि । अतिप्रमाणशरीराः महाप्रमाणदेहाः अत एव प्राणहरकर्माणः, हस्तिनः, परानीकव्यूहदुर्गस्कन्धावारप्रमर्दनाः परेषां शत्रूणां सैन्यविन्यासस्य प्राकारादिदुर्गस्य राजधान्याश्च विध्वंसकाः खलु । इतिर्हेतुवचनः गृह्णीयुरित्यनेन सम्बन्धनीयः ।

गजेषूत्तममध्यमाधमान् श्लोकाभ्यामाह—कलिगेत्यादिना सौराष्ट्रिका इत्यादिना च । कलिगांगगजाः कलिंगांगदेशोद्भवा गजाः । दाशार्णाः दशार्णदेशभवाः, आपरान्ताः पश्चिमदेशजाः । प्रत्यवराः अधमाः । श्रेष्ठादीनां त्रयाणां वीर्यवेगप्रतापाः क्रियया वर्धन्त इत्याह—सर्वेषामित्यादि ।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे द्वितीयोऽध्यायः भूमिच्छिद्रविधानम् आदितस्त्रयोविंशः ॥

चाणक्यटीका

यूथचरं निर्यन्तिंचारिणम् । निर्यूथं यूथान्निर्गत्य चारिणम् । हस्तिनम् अप्राप्तव्यपदेशम् । व्यालं दुष्टम् । निवन्धनेनेति एतावन्तो यूथचरा इत्यादिना गणनेन । अनीकस्थप्रमाणैरिति तदुपदेशैः । व्यञ्जनं लक्षणम् । आचारश्चरितं देवसत्त्वादिभेदेन । गृह्णीयुरिति ग्रहणोपायस्तन्त्रान्तरापेक्षयः । एतावांश्च हस्तिवनव्यापारः, अन्यद्धस्त्यध्यक्षकर्म वक्ष्यमाणम् ॥

हस्तिप्रधान इति प्रयासफलमाह । कथं प्राधान्यमिति चेदाह–परानीक इति । परशब्दः प्रत्येकमभिसम्वध्यते । अनीकं सैन्यसंघातः । व्यूहदुर्गे वक्ष्यमाणलक्षणे । स्कन्धावारः कटकसन्निवेशः । एतान् प्रमर्दयन्तीति प्रमर्दनाः । कथम् । यस्मादन्येभ्योऽश्वरथादिभ्योऽतिमात्रशरीराः सेनानां प्राणान् हरन्ति ॥

वनानामुत्तमत्वादिभेदेन हस्तिनामप्युत्तमत्वादिभेदं दर्शयति–कलिङ्गाङ्गगजा इति ॥

तेषां प्रत्यवरा इति । प्रत्यवराः किमिति वध्यन्त इत्याह—सर्वेषामिति अधमानामपि । कर्मणा दम्यादिना । वीर्यम् उत्साहः कर्मण्यता । तेजः शौर्यं निर्भयत्वं चेति ॥

इति भूमिच्छिद्रापिधान द्वितीयं प्रकरणम् । द्वितीयश्चाध्यायः ॥

नीति-निर्णीतीटीका

(यूथचरमेकचरमिति) यूथे चरतीति यूथचर· ·एकचरमिति, स्वयमेव यूथान्निःसृतं । निर्यूथं यूथान्निर्धारि (टि ?) तं । यूथपतिं हस्तिनं तेष्वपि व्यालं दुष्टं मत्तं हस्तिनमिति सर्वत्र योज्यम् । पोतं वालं वंधमुक्तं केनाप्य· · · · ·यं वा निवंधेन लेख्यपुस्तकारोपणेन विद्युः ॥

(अनीकस्थेति ।) अनीकस्था हस्तिशिक्षाविदस्तेषां येऽतिकुशलत्वात्· · · · ·माणभूतास्तैः प्रकर्षेण शस्तानि व्यज्यंते शुभत्वादिर्यैस्तानि व्यंजनानि लक्षणानि, आचाराश्चरितानि प्रशस्तानिं येषां तान् हस्तिनो गृह्णीयुः । ग्रहणोपायाश्च पञ्चतन्त्रान्तरोक्ताः तद्यथा—

वशाकल्पावपातौ च वारिकर्म्मानुगम्य यत् ।
आपाने च पतत्येतदनुसृत्य च वंधनम् ॥ इति ॥

कथमेतेषां महाप्रयत्नेन ग्रहणमित्याह—(हस्तीति ।) विजये हस्तिन एव प्रधानं तदायत्तत्वात् विजयस्य । यस्मात्तदेव दर्शयतीति ।

(परानीकेति ।) अनीकं सैन्यं व्यूहं दंडभोगादि, दुर्गंवप्रप्राकाराद्युपलक्षितम् । स्कंधावारः शिबिरसन्निवेशः । परेषामनीकव्यूहस्कंधावारप्रमंदनाः । यतस्तेऽन्यचतुष्पदेभ्योऽतिप्रमाणशरीरास्तथा प्राणहरकर्म्माणः स्पृशन्नपि गजो हंतोति । तस्मात् संग्राह्या हस्तिन इति ।

वनाश्रयां श्रेष्ठतामाह—(कालिङ्गेति ।)

नीति-निर्णीतिटीका

उत्कलानां च देशस्य दक्षिणस्यार्णवस्य च ।
सह्यस्य च कलिङ्गस्य मध्ये कालिङ्गकं वनम् ॥

तथा—

वैदेशं नर्मदा चैव ब्रह्मवर्द्धनमित्यपि ।
मध्ये च पारियात्राणां वनं स्यादांगरेयकम् ॥

इति वनद्वयजाः श्रेष्ठाः ।

लोहित्यस्य प्रयागस्य गंगाहिमवत्तोरपि ।
मध्ये प्राच्यं वनं तत्र संभवंति दिशां गजाः ॥

तथा—

मेकला त्रिपुरी चैव दशार्णो देश इत्यपि ।
उन्मत्तगंगामित्येषां मध्ये चेदिकरुषकम् ॥

तथा—

देशस्य च दशार्णानां ख्यातस्य च महागिरेः ।
विन्ध्याद्रेर्वेत्रवत्याश्च मध्ये दाशार्णकं वनम् ॥

तथा—

अवन्तीनाञ्च देशस्य नर्मदायास्तथैव च ।
द्वारकार्बुदयोश्चैव मध्ये सौराष्ट्रकं वनम् ॥
कुरुक्षेत्रस्य देशस्य कालिकाकाननस्य च ।
सिन्धोर्हिमवतश्चैव मध्ये पाञ्चनदं वनम् ॥ इति

कालिङ्गकांगरेयकवनभवाः श्रेष्ठाः । प्राच्यचेदिकरूपवनदाशार्णापरांतकभवा मध्यमाः । सौराष्ट्राः पाञ्चनदभवा अवराः ।

अस्यापवादः—(सर्वेषामिति ।) अवराणामपि कर्मणा स्थितभौमोत्तरा...... यादिना......। वलं उत्साहलिंगं जवो वेगस्तेजः शौर्यं च वर्द्धते ॥

इति मुग्धविलासाङ्कयोग्घमविरचितनीतिनिर्णीत्यभिधानायां कौटलीय-राजसिद्धान्तटीकायामध्यक्षप्रचारे द्वितीयोऽध्यायः ॥

एकविंशं प्रकरणम्

तृतीयोऽध्यायः

दुर्गविधानम् ।

[राष्ट्रान्तेषु चतुर्विधदुर्गनिर्वाणविधिः, तत्प्रयोजनं च]

चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेत्, अन्तर्द्वीपं स्थलं वा निम्नावरुद्धमौदकं, प्रास्तरं गुहां वा पार्वतं, निरुदकस्तम्बं इरिणं वा धान्वनं, खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम् । तेषां नदीपर्वतदुर्गं जनपदारक्षस्थानं, धान्वनवनदुर्गं अटवीस्थानं, आपद्यपसारो वा ॥

———————

श्रीमूला

दुर्गविधानमिति सूत्रम् । दुर्गरचनोच्यत इति सूत्रार्थः । जनपदप्रकृतिरुक्ता, दुर्गप्रकृतिरधुनाभिधीयते ।

चतुर्दिशमिति । जनपदान्ते, चतुर्दिशं चतसृषु दिशासु व्यापकं, साम्परायिकं युद्धोचितं, दैवकृतं दुर्गं कारयेत् स्वभावविपमस्थलं दुर्गत्वेनाश्रयेत् । किं रूपं तत् कारयेदित्यत्राह—अन्तरित्यादि । अन्तर्द्वीपं मध्यगतद्वीपम् अर्थात् समन्तान्नदीपरिवेष्टनमित्येकं, निम्नावरुद्धं स्थलं वा निम्नैः सरोभिः समन्ताद् वेष्टितं स्थलं वेत्यपरम्, औदकं जलपरिवेष्टनदुर्गमत्वादौदकपदव्यपदेश्यं दुर्गम् । प्रास्तरं गुहां वा पर्वतप्रस्तरमयमित्येकं देवखातविलात्मकं वेत्यपरम्, पार्वतं पर्वतकृतं दुर्गम् । निरुदकस्तम्बम् इरिणं वा जलतृणसङ्घातशून्यमित्येकम् ऊषरं वेत्यपरम्, धान्वनं धन्वकृतं दुर्गम् । खञ्जनोदकं खञ्जनं पंकिलत्वात् गतिवैकल्यकरमुदकं यस्मिंस्तत् तथाभूतमित्येकं स्तम्बगहनं वा अप्रकाण्डद्रुमदुष्प्रवेशं वेत्यपरं, वनदुर्गं तदाख्यम् । तदेवमौदकाद्येकैकद्वैविध्यादष्टौ दुर्गाणि सिद्धानि । तेषामिति । तेषां दुर्गाणां मध्ये, नदीपर्वतदुर्गं नदीदुर्गं पर्वतदुर्गं च, आपदि जनपदारक्षस्थानं जनपदस्य रक्षाहेतुः, भवति, धान्वनवनदुर्गं अटवीस्थानं धान्वनदुर्गं वनदुर्गं च आटविकरक्षास्थानमापदि, अपसारो वा, आपदि अपसरणस्थानं वा अर्थाद् राज्ञः ॥

चाणक्यटीका

भूमिच्छिद्रापिधानजनपदनिवेशानन्तरं तदनन्तराया दुर्गप्रकृतेः निवेशार्थं दुर्गविधानमेव तावदुच्यते । "अन्तेष्वन्तपालदुर्गाणि" (अधि० २, अध्या० १) इत्युक्तानि । तानि किंजातीयानि किंविधानि इत्यतस्तद्विधानमुच्यते—

चाणक्यटीका

चतुर्दिशमिति चतसृषु दिक्ष्वित्यर्थः। जनपदान्ते स्वजनपदरक्षार्थं परजनपदपीडार्थञ्च नाभ्यन्तरगतं तन्त्रस्थानीयं वक्ष्यमाणम्। साम्परायिकं सम्यक् प्रकृष्टम् अयोगमनम्, निरायासेन प्रकृष्टा गतिः साम्परायः। "तस्मै प्रभवति—" (५-१-१०१) इति। दैवकृतम् अयत्नेनैव जातम्॥

तच्च संभवश्चतुर्विधः द्विर्गता आपो यस्मिन् देशे स द्वीपः, तस्यान्तः अन्तर्द्वीपम्, राजदन्तादेराकृतिगणत्वात् पूर्वं (? पर) निपातः यथाऽन्तरङ्गमिति। स्थलं वा निम्नेन चोदकेन समपङ्केन वा अवरुद्धं ग्रस्तम्। एतद्द्विविधम् औदकम्॥

प्रस्तरस्योपरिभवं प्रास्तरं शिखरमेव समन्ततः टङ्कच्छिन्नपार्श्वत्वाद् दुर्गमम्, तदात्ममार्गादिकरणेन संस्कार्यम्। समन्ततःप्राकारद्वयवत् विषमपर्वतेन परिक्षिप्तो महानवकाश एकद्वारो गुहावत्। गुहावतां (अ) विषमकरणेन संस्कुर्यात्। एतद् द्विविधं पर्वतस्योपरिभवं पार्श्वे वा पार्वतम्॥

निरुदकस्तम्बम् आत्मोपभोगव्यतिरिक्तमुदकं स्तम्बाश्च अश्वगजयवसार्थाः परस्य यत्र न सन्ति। इरिणं वा ऊषरप्रायवान् (यं ?) अन्यत्रोत्पादितात्मभोगमात्रपर्याप्ततृणोदकम्। एतद् द्विविधं धन्वनि भवं धान्वनम्। वप्रादिभिरश्मनिचयैश्च संस्कुर्यात्। धन्वा निर्ज(नो ? लो)देशः॥

खण्डनोदकं विच्छिन्नप्रवाहोदकं, क्वचित् क्वचित् उदकमिति यावत्। स्तम्बगहनं वा स्तम्बैर्बदरीवैकङ्कतादिभिः गहनं, वृक्षसंकुलं वा वनग्रहणात्। तदुभयं वनदुर्गम्। परिखादिभिः निचयैश्च संस्कुर्यात्॥

एषामुपभोगमाह—तेषामिति। जनपदारक्षा अन्तपालाः, तेषां स्थानम्। तत्रस्थाः परैरधृष्या जनपदं रक्षन्ति। धान्वनवनदुर्गाश्रयाश्चाटविका यापयन्ति। परेषां बाधकाश्चाधृष्याश्च भवेयुः। आपदि पराभियोगलक्षणायाम् अपसारो वा कलत्रस्थानं[1] जनपदस्य। एतच्चे दैवकृतमुत्तमम्॥

नीति-निर्णीतिटीका

दुर्गविधानमिति सूत्रम्॥ दुःखेन गम्यते परैरिति दुर्गस्तस्य विधानं वप्रादिरचनयेति सूत्रार्थः। सम्बंधस्तु स्वाम्यमात्यजनपदानां लाभः पालनं चाभिहितम्, दुर्गप्रकृतेरभिधीयत इति महासंबंधः। अनंतरसंबंधश्च जनपदनिवे··· न्तपालदुर्गाण्युद्दिष्टानि। स्थानीयं च यत्र निशांतमभिहितं तेषां विधानमिति।

जनपदरक्षार्थं तावत् स्थानीयादिदुर्गविधानमाह—चतुर्दिशमिति। चतुर्दिक्षु जनपदांते सांपरायिकमिति। परेषां शत्रूणां आय आगमनं परायः सम्यक् सर्वसामग्र्या परायस्तस्मै प्रतिस्खलनाय प्रभवतीति सांपरायिकम्। अथवा सम्यक् परेषामायः कोशसंपत् तद्विनाशाय प्रभवतीति सांपरायिकम्। स्वजनपदरक्षायै परजनपदविलोपाय

---

१. "कलत्रन्तु नृपादीनां दुर्गस्थाने" इति केशवस्वामी।

[राष्ट्र मध्ये स्थानीयरूपदुर्गरचनाविधिः]

जनपदमध्ये समुदयस्थानं स्थानीयं निवेशयेत्, वास्तुकप्रशस्ते देशे, नदीसङ्गमे, ह्रदस्य वा अविशोषस्याङ्के सरसः तटाकस्य वा. वृत्तं दीर्घं चतुरश्रं वा वास्तुकवशेन, प्रदक्षिणोदकं, पण्यपुटभेदनं अंसपथवारिपथाभ्यामुपेतम् ॥

नीति-निर्णीतिटीका

प्रभवतीत्यर्थः। दैवकृतं स्वर······नेव दुर्गं देवखाततडागवत्कारयेत् परिखादिभिः संस्कारयेदित्यर्थः। चतुर्दिशमित्युक्ते चत्वार्यंतपालदुर्गाणीत्यर्थापन्नम्। दुर्गस्य मूलप्रकृतयश्चतस्र औदकं पार्वतं धान्वनं वनदुर्गमिति।

प्रत्येकं द्वैविध्यादष्टौ दुर्गाणि तानि दर्शयन्नाह—अन्तर्द्वीपमिति। द्विधा गता आपो यस्मिस्तद्वीपम्। द्वीपस्यांतर्नदीस्रोतसामंतरे भवमन्तर्द्वीपमित्येकम्। स्थलं वा निम्नेन जलेनावरुद्धं दैववशात्। निम्नशब्देनात्र तात्स्थ्याज्जलमभिधीयते। 'निम्नयोधिन' इति वचनात्। एवं द्विविधमुदकस्येदमौदकम्। प्रास्तरं गुहा वा पार्वतमिति। प्रस्तरे एकखण्डे भवं प्रास्तरम्। गुहा वा गूहनात् गुहा। यत्र पर्वतश्चतुर्दिशं वेष्टयित्वा द्वारमेकं मुक्त्वा गूहनात् सा गुहा। एवं द्विविधं पार्वतम्। निरुदकं निस्तंवं निस्तृणंनिर्विटपं च एकम्। इरिणमूषरं यत्नोत्पादिततृणोदकमेवं द्विविधं धान्वनम्। 'निरुदकोद्देशो धन्वे'त्याम्नायात्। खंजनोदकं 'खजिगतिवैकल्प' इति पाठात्, सपङ्कजलम्। स्तम्बगहनं केवलवृक्षस्तंवगहनं वा एवं वनदुर्गमपि द्विविधम् ॥

तेषामिति। तेषां दुर्गाणां मध्ये नदीदुर्गं पर्वतदुर्गं च, जनपदारक्षा अंतपालाः, तेषां स्थानं परप्रवेशनिषेधात्। धान्वनं दुर्गं वनदुर्गं च अटवीस्थानमाटविकानां स्थानं जनपदरक्षार्थमेव। आपद्यपसारो वा आपदि पराभियोगलक्षणायां अपसारो वा कलत्रमपसार्य स्थाप्यत इति।

श्रीमूला

दुर्गविधानमुक्त्वा स्थानीयादिकमाह—जनपदेत्यादि। जनपदमध्ये, समुदयस्थानं धनोत्पत्तिस्थानभूतं, स्थानीयं महाग्रामादिकं पूर्वोक्तं निवेशयेत्। कीदृशे प्रदेशे, वास्तुकप्रशस्ते वास्तुविद्याभिज्ञनिर्दिष्टे देशे, नदीसङ्गमे नद्युपश्लेषे, अविशोषस्य सदाजलस्य, ह्रदस्य सरसः, तटाकस्य पद्माकरस्य वा अङ्के समीपे वा। कीदृशं निवेशयेत्, वास्तुकवशेन वास्तुस्थित्यनुसारेण वृत्तं वर्तुलाकारं, दीर्घं, चतुरश्रं वा, प्रदक्षिणवाहिसलिलं, पण्यपुटभेदनं पण्यपुटानां पण्यकरण्डानां तत्तत्पण्योत्पत्तिस्थानेभ्यः प्रहितानां भेदनं बन्धविस्रंसनम् अनन्यत्रकार्यतया सङ्केतितं यस्मिस्तत् तथा भूतम्, अंसवारिपथाभ्यामुपेतं स्थलमार्गजलमार्गाभ्यां गम्यम् ॥

चाणक्यटीका

अन्यथा यत्नेनापि तत्कार्यमिति दर्शयन्नाह—जनपदमध्य इति। समुदयस्य समाहर्तृसमाहृतस्य कोशस्य स्थानं स्थानीयं राज्ञोऽपि स्थानाय हितं निवेशयेत्।

[स्थानीयं परितः सपरिमाणनिर्देशं परिखानिर्माणविधिः]

तस्य परिखास्तिस्रः दण्डान्तराः कारयेत्, चतुर्दश द्वादश दशेति दण्डान् विस्तीर्णाः, विस्ताराद्वगाधाः पादोनमर्धं वा त्रिभागमूलाः

चाणक्यटीका

निवेशनं चास्य वक्ष्यति, रचना तावदुच्यते। वास्तुविद्यामधीयन्ते वास्तुकाः तैः प्रशस्ते। ह्रदो देवखातः। सरोऽदैवतं तटाकं पुरुषकारनिवष्पन्नम्। अङ्के पार्श्वे। वृत्तादिग्रहणं त्रिकोणसर्पकुटिलार्धचन्द्राकृतीनाम् अप्रशस्तत्वाच्च निवृत्त्यर्थम्। वास्तुवशेन वेति। यथा-यथा वास्तु लभ्यते तथा-तथा वृत्तादिकं कुर्यात्, सर्वासु दिक्षु सुलभजलत्वात् वृत्तं चतरश्रं वा, दीर्घह्लदादीनामेकपार्श्वजलत्त्वाद् दीर्घम्। पण्यपुटभेदनमिति। दिगन्तरागताः क्रयविक्रयार्थं यत्र पण्यपुटा भिद्यन्ते व्यवहार्यन्ते। कुत एतत्, अंसपथवारिपथाभ्यामुपेतत्वात्। अंसपथः कायभारखराश्वोष्ट्रशकटादिमार्गः। वारिपथो नौयानपात्रादिः॥

नीति-निर्णीतिटीका

मध्ये दुर्गविधानमाह जनपदमध्ये इति। सर्वतोऽनन्तरारीणां व्यवहितत्वात् समुदयमुदयहेतुत्वात् कोशस्तस्य स्थानम्, स्था [नीयमि] ति राज्ञः स्थानाय हितं निवेशयेदिति। दुर्गं विधायेति भावः। दैवकृतं चेद्भवति संस्कुर्यान्नचेद्वक्ष्यमाणोपदेशेन कुर्यात्॥

वास्तुकेति। वास्तुकप्रशस्ते देशे वास्तुविद्याविद्भिः श्लाघिते देशे नदीसंगमे दुर्गत्वाज्जलसौकर्यार्थं च। तदलाभे ह्रदस्याविशोष्यस्यांके सरसो देवखातस्य तडागस्य वा मनुष्यखातस्यांक इति वर्तते। वृत्तं दीर्घवृत्तं वा। चतुरस्रं दीर्घचतुस्रं वा। दीर्घशब्दो मध्यस्थ उभयत्र योज्यः। त्रिकोणार्द्धचंद्रादीनामप्रशस्तानां निवृत्यर्थं वा। वास्तुवशेन वा भूमिवशेन दीर्घत्वमपि भवतु। प्रदक्षिणोदकं प्रशस्तत्वात्। पण्यपुटभेदनं ततोऽन्यत्र न पण्यपुटा भिद्यंत इति कृतनियमं पण्यानां संग्रहार्थम्। शुल्कस्य चाविनाशार्थम्। अंसपथः स्थलपथः पुरुषबलीवर्दोष्ट्राद्यंसैः स्कंधैरुह्यमानपण्यत्वात् वारिपथश्च ताभ्यामुपेतं पण्यशुल्कसंग्रहार्थमेव॥

श्रीमूला

तस्येति। तस्य स्थानीयस्य, तिस्रः प्रथममध्यमतृतीयाः, परिखाः कारयेत्, कीदृशीः, दण्डान्तराः द्विचत्वारिंशदङ्गुल एको हस्त इति गणनया देशकालमानप्रकरणोक्तया चत्वारो हस्ता एको दण्डः दण्डमितम् अन्तरं परस्परव्यवधानं यासां ताः तथोक्ताः, चतुर्दशदण्डान् द्वादश दण्डान् दशदण्डान् इत्येवंक्रमेण विस्तीर्णाः, विस्ताराद् विस्तारपरिमाणात् पादोनं चतुर्भागहीनम्, अर्धं वा अवगाधा निम्नाः, तदुभयानुपपत्तावाह—त्रिभागमूला वा विस्तारत्रिभागमानं मूलम् अधस्तलं निम्नत्वं यासां तास्तथा-

मूले चतुरश्राः, पाषाणोपहिताः पाषाणेष्टकाबद्धपार्श्वा वा, तोयान्तिकीः आगन्तुतोयपूर्णा वा, सपरिवाहाः, पद्मग्राहवतीश्च ॥

श्रीमूला

भूताः, मूले चतुरश्राः सम्यग्बद्धाः, पाषाणोपहिताः शिलारचिताः, पाषाणेष्टकाबद्धपार्श्वा वा, तोयन्तिकीः आजलोदयदेशखाताः स्वतः सम्पन्नजला इत्यर्थः, आगन्तुतोयपूर्णा वा नद्याद्यागतजलसम्भृता वा, सपरिवाहा जलनिर्गममार्गोपेताः, पद्मग्राहवतीः नलिननक्रयुक्ताः ।

चाणक्यटीका

तस्येति स्थानीयस्य । समन्तात् परिखन्यन्त इति परिखाः । दण्डान्तरा इति अन्योऽन्यतो दण्डेन प्रमाणेनान्तरिताः । ततो न्यूनान्तराः विशरणादेकीभवन्ति, अधिकान्तराः परकीयाणाम् आश्रया भवन्ति । चतुर्दश द्वादशेति । स्थानीयस्य प्रकृतत्वात् ततः प्रभृति क्रियाक्रमः । आभ्यन्तराः विस्तारेण चतुर्दश दण्डाः । मध्या-द्वादश दण्डाः । बाह्या दश दण्डाः विस्तारात् पादोनमवगाढाः[1]—आद्यायाः अवगाढो दश दण्डाः दण्डार्धञ्च । मध्यमायाः नव दण्डाः । वाह्यायाः सप्त दुण्डा दण्डा (र्धञ्च) र्धानि[2] (?) अरत्निद्वयञ्च आद्यायाः । चत्वारो दण्डाः मध्यमायाः । त्रयो दण्डाः (सप्ता) अष्टाङ्गुलोऽरत्निरिति चान्त्यायाः, यथाह्यानुपूर्व्येण खातानां स्थैर्यं भवति । मूल चतुरश्रा वेति मूलेन सह चतुरश्रा वा, भूमेः स्थैर्यमवेक्ष्य यथा ह्यगम्यतरा भवन्ति । पाषाणोपहिता यत्र दण्डमात्रमन्तरं तस्य स्थैर्यार्थं तत्रैव पाषाणैः प्रमादाद-दत्रान्तिकीपाशः (?) तोयान्तिकीर्वा उद्भिज्जान्तोदकासंभवे वा आगन्तुकेन तोयेन पूर्णाः । तस्मान्न निस्तोया इति च । उपलक्ष्यमूलार्धत्वात् सपरिवाहा इति । अतिरि-क्तोदकस्य निष्क्रमत्वाद् अन्योऽन्यसंप्लवः उपप्लवोपघातश्च मा भूतामिति परानुपल-क्षितेन यन्त्रेण उदकं वहिर्निष्कास्यते ॥ खातविधिरुक्ता ॥

नीति-निर्णीतिटीका

तस्येति । तस्य स्थानीयस्य परि समंतात् खन्यन्त इति परिषा (खा) स्तिस्त्र इति न्यूनाधिकत्वे दोषदर्शनात् । दंडांतरा द्विचत्वारिंशदङ्गुलहस्तेन चतुर्हस्तो दंडस्त-त्प्रमाणतः परस्परांतर (रा ?) लाः । अतो न्यूनान्तरा विशीर्यंते । अधिकांतराः परेषामाश्रया भवंति ॥

---

१. अवगाथा इति मुद्रितमूलकोशेषु दृश्यते । अवगादा इति चाणक्यटीका । अवगाधशब्दस्य निम्नार्थत्वम् अनन्तशयनव्याख्यानोक्तम् अदृष्टचरं वेदियव्यम् ।

२. इतः परम् "अर्धमवगाढाः—आद्यायाः सप्तदण्डाः, मध्यमायाः षड्दण्डाः, वाह्यायाः पञ्चदण्डाः, त्रिभागमवगाढाः—चत्वारो दण्डाः अष्टाङ्गुलम्" इत्याकारको ग्रन्थभागो मातृकायां त्रुटितो भाति ।

[स्थानीयपरिखयोर्मध्ये मृच्चयनिर्माणविधिः, मृच्छेषविनयोगश्च]

चतुर्दण्डावकृष्टं परिखायाः, षड्दण्डोच्छ्रितं अवरुद्धं तद्द्विगुण-विष्कम्भं खाताद्वप्रं कारयेत्, ऊर्ध्वचयं मञ्चपृष्ठं कुम्भकुक्षिकं वा, हस्तिभिर्गोभिश्च क्षुण्णं, कण्टकिगुल्मविषवल्लीप्रतानवन्तं। पांसुशेषेण वास्तुच्छिद्रं राजवास्तु वा पूरयेत् ।

नीति-निर्णीतिटीका

चतुर्दशेति । अभ्यन्तरे चतुर्दश दंडान् विस्तीर्णा, मध्यपरिखा द्वादश, वहिः परिपा (खा) दशदंडान् विस्तीर्णा कार्या। न बाह्यतोयपरिगणनाक्रमो गृह्यते चतुर्दशदण्डान् वितीर्णायां वाह्यपरिखायां गृहीतायामितरयोरध्यवसायो ग्रहणे भवतीति भावः । विस्तरादवगाढाः पादोनमर्द्धं चेति । चतुर्दशदंडविस्तीर्णायाः पादोनो विस्ता·····दश दंडाः। अर्द्धं वा सप्त दंडाः द्वादशदंडविस्तारायाः पादोनत्वं नव दंडाः। अर्द्धं वा षट् दंडाः । दशदंडविस्तारायाः सार्द्धसप्तदंडाः, पंचदंडा वा गांभीर्यमित्यर्थः। त्रिभाग इति विस्तारादेव त्रिभागो मूले यासामूर्ध्वविस्तरादेव तृतीयभागो मूले विस्तारो भवतीत्यर्थः। तद्यथा—चतुर्दशदंडायाश्चत्वारो दंडाः हस्त-द्वयमष्टाविंशत्यंगुलां·····याश्चत्व (त्वा) रो दंडाः। दशदंडाया दंड़त्रयमेको हस्त-श्चतुर्दशांगुलानीति । मूल·····पाषाणैरुपहिता वा दंडप्रमाणेष्वंतरालेष्वेव बद्धा दार्ढ्यार्थं तृणाद्यभावार्थं·····मंतिके समीपे सिरागतं यासां आगंतुकतोयपूर्णा वा उद्भिजतोयाभावे सति परैरलक्ष्य मार्गा··लक्ष्यमूलतां कर्तुं सपरिवाहा अधिक जलप··रिवाहनार्थं सह परिवाहेन वर्तत इति। अन्यथान्योऽन्यसंप्लवो वप्रोपघातश्च स्यात्। पद्मग्राहवत्वे च दुःखावतारिणीं कारयेदिति संबंधः।

श्रीमूला

वप्रविधानमाह—चतुर्दण्डावकृष्टमिति। खाताद् वप्रं कारयेत् परिखातादुद्धृ-तया मृदा प्राकाराधारभूतं चयं निर्मापयेत्। कथम्भूतं, परिखायाः चतुर्दण्डावकृष्टं षोडशहस्तविप्रकृष्टं षड्दण्डोच्छ्रितं चतुर्विंशतिहस्तोन्नतम् अवरुद्धं मृद्गलनं यथा न भवेत् तथाऽधस्तात् कृतसंरोधं, तद्द्विगुणविष्कंभम् उच्छ्रयद्विगुणविस्तारम्, ऊर्ध्वचयम् अधःस्थूलोपरिकृशमूर्ध्वचयाख्यं, मञ्चपृष्ठम् उपर्यधस्ताच्च तुल्यवैपुल्यं मञ्चपृष्ठाख्यं, कुम्भकुक्षिकं वा ऊर्ध्वाधःकृशं मध्यस्थूलं कुम्भकुक्षिकाख्यं वा हस्तिभिर्गोभिश्च क्षुण्णं प्रघातदृढीकृतं, कण्टकिगुल्मविषवल्लीप्रतानवन्तं कण्टकवद्भिस्तृणसङ्घातैः विषलता-प्रतानैश्च युक्तम्। पांस्वित्यादि। पांसुशेषेण वप्रविनियुक्तावशिष्टया मृदाः, वास्तुच्छिद्रं नगरवास्तुगतं राजवास्तुगतं च, पूरयेद्वा पूरयेच्च।

चाणक्यटीका

चतुरो दण्डान् अपकृष्टमपसृतं परिखायाः वप्रस्यान्तरत्वाद् आभ्यन्तराया

[प्राकारनिर्माणविधिः, तत्र दारुसंसर्गनिषेधश्च]

वप्रस्योपरि प्राकारं विष्कम्भद्विगुणोत्सेधं ऐष्टकं द्वादशहस्तादूर्ध्वं ओजं युग्मं वा आचतुर्विंशतिहस्तादिति कारयेत् । रथचर्यासञ्चारं

चाणक्यटीका

इति गम्यते । अवरुद्धं पाषाणैर्बद्धपार्श्वम् । द्विगुणविष्कम्भम् उच्छ्रायात्, द्वादशदण्डमित्यर्थः । खातादिति । खातप्र (तलैः ? सृतात्) पांसुप्रकरात् । ऊर्ध्वचयमिति ऊर्ध्वं चयो यस्य तं वल्मीकनिकरसंस्थानम् । पांसुविशेषवशेन वा ततोऽप्यगम्यं मञ्चकपृष्ठं कुम्भकुक्षिकं वा कुम्भाकारसंस्थानम् । दृढीकरणार्थं हस्त्यादिभिः संक्षोद्य संक्षोद्य रचितम् । कण्टकिगुल्मैर्विषवल्याश्च प्रतानेन मारणार्थं वहिःपार्श्वे युक्तम् । वास्तुच्छिद्रं नगरस्य निम्नम् । पांसूनामल्पत्वे राजवास्तु वा ॥

नीति-निर्णीतिटीका

वप्रविधानायाह चतुर्दण्डेति । चतुरो दंडानवकृष्याभ्यंतरपरिखायाश्चतुर्दंडप्रमाणमंतरं मुक्त्वेत्यर्थः । षट्दंडोच्छ्रितं चतुर्विशतिहस्तोत्सैधमवरुद्धं पाषाणादिभिर्वद्धोभयपार्श्वं पांसुविसरणनिषेधार्थम् । द्विगुणविष्कंभमुच्छ्रयाद् द्विगुणविस्तारं द्वादशदंडविस्तारमित्यर्थः । खातादिति । खातोत्थपांसुभिर्वप्रं प्राकाराधिष्ठानं सेत्वाकारत्वाच्च वप्रशब्दप्रयोगः । तं कारयेत् ॥

ऊद्ध्र्वंचयमंतरं मुक्त्वा चयाः शिलादीनां कर्तव्यदाढर्यार्थम् । ततश्च वल्मीकशिखराकारो भवतीति भावः । मंचकपृष्ठं मध्ये किञ्चिन्निम्नं प्राकारदाढर्यार्थम् । कुंभकुक्षिकमिति । आयतशिलास्तंभवत्वात् कुंभसमानकक्षिकुश्चीयते । दुरारोहो भवत्विति । हस्तिभिर्गोभिश्च क्षुण्णं हस्तिभिर्महाकायत्वात् । गोभिस्तीक्ष्णखुरत्वात् घनत्वापादनार्थम् । कंटकिनो वदर्यादयः । गुल्मा भल्लातक्यादीनां (नि ?), विषाणि हलिनीकरवीरादीनि वल्ल्यो हस्तिवारुणीकरमर्दाद्यास्तत्प्रतानवंतं मूल इत्यर्थः ॥

पांसुशेषेण इति । पांसुशेषेण च प्रपूरणावशिष्टपांसुभिर्वास्तुच्छिद्रं नगरवास्तुनिम्नं राजवास्तुनिशांतभूमिनिम्नं वा पूरयेत् सामत्वापादनार्थम् ॥

श्रीमूला

प्राकारविधानमाह—वप्रस्येति । विष्कम्भद्विगुणोत्सेधं स्वविस्तारद्विगुणोच्छ्र्यम् । ऐष्टकं पक्वेष्टकचितम् । उत्सेधमानं विशदयन्नाह—द्वादशहस्तादूर्ध्वम् ओजं युग्मं वा त्रयोदशपञ्चदशादिविषमसंख्यहस्तप्रमाणोत्सेधं चतुर्दशषोडशादि समसंख्यहस्तप्रमाणोत्सेधं वेत्यर्थः । उत्सेधमानस्य परमावधिमाह—आ चतुर्विंशतिहस्तात् चतुर्विंशतिहस्तोत्तमपरिमाणोत्सेधमित्यर्थः । उत्सेधं केचिद् विषमसंख्यमिच्छन्ति समसंख्यमपरे, तत्रान्यतरानिर्वन्धोऽकिञ्चित्कर इत्योजयुग्मोभयाक्त्या सूचयति । इति एवम्प्रकारं,

तालमूलं मुरजकैः कपिशीर्षकैश्चाचिताग्रं, पृथुशिलासहितं वा शैलं कारयेत् । न त्वेव काष्ठमयं; अग्निरवहितो हि तस्मिन् वसति ।

श्रीमूला

प्राकारं, वप्रस्योपरि कारयेत् । अनुक्तविशेषणकथनपूर्वं प्राकारस्य प्रकारान्तरमाह—रथेत्यादि । रथचर्यासञ्चारं रथचर्यया रथगत्या सञ्चारो रथिगतागतं यस्मिस्तं तथाभूतम् उपरि रथगतागतपर्याप्तविस्तारयुक्तत्वमनेनोक्तं, तालमूलमूरजकैः कपिशीर्षकैश्च आचिताग्रं तालवृक्षमूलप्रतिकृतिभिर्मुरजप्रतिकृतिभिः कपिशीर्षप्रतिकृतिभिश्च शिलेष्टकाचूर्णनिर्मिताभिः समन्विताग्रं, पृथुशिलासंहितं शैलं वा विपुलशिलाबद्धम् ऐष्टकविलक्षणं शिलामयं वा कारयेत् । अर्थात् प्राकारम् काष्ठमयं तु प्राकारं, नैव कारयेत् । कुतः, हि यतः, तस्मिन् काष्ठमये, अग्निः अवहितः सन् वसति ।

चाणक्यटीका

द्वादशहस्तादूर्ध्वं यथायोगम् । आजस्त्रयोदशादिहस्तसंख्यं त्रयोदशपञ्चदशेत्यादिकम् । युग्मं वा समहस्तसंख्यं चतुर्दशषोडशेत्यादिकम् । अर्धत्रयोदशादिहस्तनिवृत्त्यर्थमुभयग्रहणम् । आचतुर्विंशतिहस्तादिति । परेण प्रकर्षेण चतुर्विंशतिहस्तोत्सेधम् । तेन ऊर्ध्वं द्वादश प्राकारा भवन्ति । तेनैव षड्हस्तादूर्ध्वम् । आद्वादशहस्तादिति विष्कम्भस्यापि द्वादशविधत्वम् उत्सेधार्थतयैवोक्तं वेदितव्यम् । रथचर्येति । "पञ्चारत्नयो रथपथः" (अधि० २, अ० ४) इति वक्ष्यति । पन्थाश्चर्येतिचानर्थान्तरम् । तत्प्रमाणम् ऊर्ध्वं युध्यमानानां संचारो यस्य प्राकारस्येति । षड्ढस्तमूलः शनैर्हीयमानः हस्तन्यूनोऽयं पञ्चारत्निकः पञ्चारत्निप्रदेशः । प्राकारापेक्षया मध्य-(? मूल) षड्भागोनशिरस्काः द्वादशापि प्राकाराः कार्याः । तालमूलमिति । तालस्येव मूलं यस्येति शिफाभिरिव पाषाणाभिरुपचितमूलं सन्धिम् । इष्टकामुखमात्रविस्तारैर्योधावरणकुडयकैर्मुरजसंस्थानैः समशिरोभिः, कपिशीर्षकैश्च अश्वत्थपत्रसंस्थानैरेकान्तरैः आचिताग्रम् । वहिःपार्श्वं इति । प्रयोजनापेक्षया नेयम् । यद्येवं तद्वृद्धैकदेशत्वात् कथं रथचर्यामात्रसंचार इति । एकदेशहानेरपि व्यपदेशानिवृत्तेः । नचात्र गतागतमेव संचारोऽभिप्रेतः । किं तर्हि सम्यग्रथाचरणम् तदङ्गभूतान्येव वावरणानीति । तैः सह रथचक्र (? र्या) प्रमाणत्वम् । विस्तीर्णादि (? भिः) शिलाभिः संहतं निच्छिद्रं (? चितम्) शैलं वा प्राकारम् । ईदृशमेव न त्वेव काष्ठमयं स्तम्भान्निखन्य कारयेत् । दोषमाह—अग्निरिति । अवहितः सुनिहितः ॥

नीति-निर्णीतिटीका

वप्रस्यापरीति । उक्तलक्षणस्य वप्रस्योपरि प्राकारं प्रकृष्टाकारं विष्कंभद्विगुणोत्सेधमिति विस्तारद्विगुणोच्छ्रायम् । अनुक्तोऽपि विष्कंभस्त्रयोदशविधः प्रकाराणां वक्ष्यमाणादुत्सेधात् प्रत्येकमर्द्धप्रमाणः कार्यं इति व्याप्त्यर्थं वचनम् । ऐष्टकं इष्टक-

[प्राकारोपरि तत्तत्स्थानेषु अट्टालकप्रतोलीन्द्रकोशदेवपथचार्या प्रधावितिकानिष्कुह द्वाराणां परिकल्पनविधिः]

विष्कम्भचतुरश्रं अट्टालकं उत्सेधसमावक्षेपसोपानं कारयेत्, त्रिंशद्दण्डान्तरं च द्वयोरट्टालकयोर्मध्ये सहर्म्यद्वितलां द्व्यर्धायामां प्रतोलीं कारयेत् ।

नीति-निर्णीतिटीका

चितम् । द्विचत्वारिंशदंगुलहस्तेन द्वादशहस्तादाद्यात् प्राकारादूर्ध्वमुपरिष्टादोजं विषमहस्तसंख्यं, युग्मं समहस्तसंख्यम् । तद्यथा—त्रयोदशहस्त ओजश्चतुर्दशहस्तो युग्मः, पंचदशहस्त ओज इत्येवं योज्यमाचतुर्विंशतिहस्तात् द्वादशहस्तादूनः चतुर्विंशतिहस्तादधिको न कार्यं इति नियमः । औजयुग्मग्रहणं च ह...न्यूनेन वितस्त्यंगुलादिभिरुत्सेधवृद्धिर्न कल्पनीयेति ज्ञापनार्थम् । एवं च त्रयोदशशैव प्राकारा भवंति । विष्कंभप्रमाणमपि षट्हस्तादित्यर्थादापद्यते । एवं भ...कारयेता ॥

रथचर्यासञ्चारमिति । रथचर्यासंचारस्य प्रमाणं पंचारत्निप्रमाणा वक्ष्यति । पंचारत्नयो रथपथ इ...मुरजक कपिशीर्षकावरुद्धं प्रदेशं विहाय प्रकारमस्तके पंचारत्निप्रमाणोऽवकाशो योधानां संचारार्थं कार्यः । तालमूलं तालवृक्षाकारमूलं दाढर्यार्थम् । मुरजकैर्मुरजकाकारैर्योधावरणकुट्टाकैः कपिशीर्षकैः कपिशीर्षकाकारैस्तीक्ष्णाग्रैरेकजातीयैर्विमिश्रैर्वा आचितमग्रं वहिर्मस्तकधारा यस्य ॥

पृथुशिलासंहतमिति । संपत्तौ तु पृथ्वीभिः शिलाभिः संहतं शैलं वा प्राकारं कारयेत् । न त्वेव काष्ठमयं कारयेत् । हि यस्मादग्निर [वहितः] सन्निहितस्तस्मिन् वसति अल्पेनापि यत्नेन परैर्निहितः सर्वं दहतीति भावः ।

श्रीमूला

विस्कम्भेत्यादि । अट्टालकं प्राकाराग्रे रणगृहं, कारयेत् । कीदृशं, विष्कम्भचतुरश्रं विस्तारस्यानुरूपम् अर्थादायमे चोत्सेधे च, उत्सेधसमावक्षेपसोपानम् उत्सेधानुरूपावरोहसोपानं, त्रिंशद्दण्डान्तरं च त्रिंशद्दण्डप्रमाणंमिथोव्यवधानं च ।

द्वयोरिति । द्वयोरट्टालकयोर्मध्ये, सहर्म्यद्वितलां हर्म्यं धवलगृहमिति स्यातमैष्टकं गृहं तेन तदीयेन च द्वितलेन सहिताम्, अध्यर्धायामां विस्तारात् सार्धगुणपरिमाणदैर्घ्यां प्रतोलीं गृहविशेषं, कारयेत् ।

चाणक्यटीका

विष्कम्भेन समविस्तारायामः । कः पुनरस्य विष्कम्भः इति चेत्, प्राकारशिरोभागाश्रयस्यास्य पञ्चारत्नयः तेन सहेचछन्तां विस्तृतस्य यावता पर्याप्तमिति उत्सेधस्त्वस्योपरि निस्सङ्गं साधु यत्र व्याप्रियन्ते (?) प्राकारप्रकरणाद् ऊर्ध्वं पञ्चारत्निप्रमाणाधिकः तत्सम एव (आ) प्राकारमूलाद् अवक्षेपो निर्गमो यस्य स एवंविधः

अट्टालकप्रतोलीमध्ये त्रिधानुष्काधिष्ठानं सपिधानच्छिद्रफलकसंहितमिन्द्रकोशं कारयेत्। अन्तरेषु द्विहस्तविष्कम्भं पार्श्वे चतुर्गुणायामं अनुप्राकारं अष्टहस्तायतं देवपथं कारयेत्। दण्डान्तराः द्विदण्डान्तरावा चार्याः कारयेत्। अग्राह्ये देशे प्रधावितिकां [1]निष्कुहद्वारं च ॥

चाणक्यटीका

सोपानो यस्य इष्टकामयः फलकामयो वा। उपर्यारोहणमपि एतत् सोपानेनैव त्रिंशद्दण्डान्तरं वेति अट्टालकानामितरेतरस्त्रिंशद्दण्डान्तरःसमन्तात् कार्यः। अट्टालकाति (रिक्त) देशे चोपरिष्टान्मुरजाः कपिशीर्षकाश्च स्युरिति ॥

द्वयोः द्वयोः अट्टालकयोर्मध्ये समन्तादेव सह हर्म्येण द्वितला विस्तारादध्यर्धेनाधिकायामा प्रतोली ॥

नीति-निर्णीतिटीका

प्राकारमस्तके युद्धार्थमट्टालकादिविधानायाह विष्कम्भचतुरस्रेति। विष्कंभेन पंचारत्निप्रमाणेन समानाश्चतस्रोऽप्यस्रयो यस्य तमट्टालकम्। 'अट्टातिक्रमहिंसयोरिति पाठात् प्राकारातिक्रमं परहिंसां च आ समंताल्लातीत्यट्टालकः। प्राकारोपरि युद्धार्थं कोष्ठसन्निवेशः। तद्यथा—पञ्चावरणस्तंभचतुष्टयोपरि तुलाफलकास्ताराच्छाद्यककपोतपाल्यादिपरिकरोद्ध्वं मुरजकपताकादिरचनोऽट्टालकः। उत्सेधसमावक्षेपसोपान इति। सवप्रस्य प्राकारस्य य उत्सेधस्तस्य समो योऽवक्षेपः तत्र सोपानान्यारोहणार्थं निश्रेणीपदानीव यस्य। तद्यथा—वप्रमूलात् प्राकारोत्सेधं यावदायातं सूत्रमवक्षिप्यान्तर्मुखं तत आरभ्य सोपानानि क्रियन्ते। ततश्चायुधव्यापृत्तोभयकराणामपि योधानामारोहणं सुखेनैव संपद्यत इति भावः। तमेवंभूतं कारयेत्। त्रिंशद्दण्डान्तरं च त्रिंशस्त्रिंशद्दण्डा अंतरं यस्य। जातावेकवचनम्। यावत्प्राकारस्यायतत्वं [त] त्र त्रिंशस्त्रिंशद्दण्डमंतरं कर्तव्यमिति भावः।

द्वयोरिति। द्वयोरिति वीप्सा द्रष्टव्या। द्वयोर्द्वयोरट्टालकयोर्मध्ये त्रिंशद्दण्डान्तरे सहर्म्यद्वितलां ह [र्म्यमुत्तरा] गारं घण्टाद्युपेतं तेन सह द्वे तले यस्यास्तामध्यर्द्धायामाम्। अट्टालकः समचतुरस्रो भवति। तदपेक्षयाऽध्यर्द्धायामामर्द्धेनाधिक आयामो भवतीत्यर्थः। तद्यथा—पञ्च [ा] रत्निविस्तार आयामस्तदर्द्धेनाधिक आयामो भवतीत्यर्थः। आयतचतुरस्रा प्रकर्षेण तोल्यते परानीकमस्यां स्थितैरट्टालाधिकोत्सेधायामिति प्रतोली तां कारयेत् ॥

श्रीमूला

अट्टालकप्रतोलीमध्य इति। अट्टालकप्रतोल्योर्मध्ये, इन्द्रकोशं खट्वाविशेषं कारयेत्। कथम्भूतं, त्रिधानुष्काधिष्ठानं त्रयाणां धानुष्काणां धन्विनां स्थितिपर्याप्तं,

---

१. निष्किर—पा०। निष्कर पा०।

श्रीमूला

सापिधनच्छिद्रफलकसंहितं सापिधानानि अवच्छादसाधनोपेतानि छिद्राणि यस्मिंस्तेन तथाभूतेन फलकेन संहितं कृतसन्धानं च ।

अन्तरेष्विति । अनुप्राकारम् अन्तरेषु अट्टालकप्रतोलीन्द्रकोशानामन्तरालेषु, द्विहस्तविष्कम्भं द्विहस्तविस्तारं, पार्श्वे अर्थात् प्राकारस्य, चतुर्गुणायामम् अष्टहस्तायतमित्यर्थः, देवपथं देवपथ इव देवपथः रहस्यमार्गः तं, कारयेत् । मातृकायाम् 'अष्टहस्तायतमि'त्यपि पठ्यते । तत्तु पुनरुक्तं द्रष्टव्यम् ।

दण्डेत्यादि । दण्डान्तराः दण्डप्रमाणविष्कम्भाः, द्विदण्डान्तरा वा चार्याः आरोहावरोहभूमीः कारयेत् । अग्राह्य इति । अग्राह्ये ग्रहणायोग्ये देशे प्रधावितिकां प्रतिपक्षैर्बाणे प्रयुज्यमाने तद्गोचरपरिहारेण भटस्य सुखतिरोधानार्थं क्षुद्रो वरणः प्रधवितिका तां, कारयेत्, प्राकारोपरि । निष्कुहद्वारं च कोटरविवरं च प्राकारबहिर्वर्तिप्रतिपक्षचेष्टितगूढदर्शनार्थं, कारयेत् प्रधावितिकान्तिके ।

चाणक्यटीका

अट्टालकप्रतोल्योर्मध्ये त्रयो धानुष्का यावत्यस्मिन्नवकाशे सुखेन व्यायच्छन्ति तत्प्रमाणम् । सापिधानं सावरणपट्टं स्वशरनिर्गमार्थं परशरवारणार्थञ्च अधोमुखच्छिद्राः सर्व एव फलका यस्य तत् । सुश्लिष्टपट्टसन्धिकमिति इन्द्रकोशसंज्ञिकं कारयेत् । कोष्ठफलकमित्यर्थोक्तम् ॥

अन्तरेष्विति । अट्टालकप्रतोलीन्द्रकोशान्तरेष्विति । पार्श्वं इति प्राकारमूलरक्षार्थत्वात् । बाह्ये तुला वर्हिर्निष्कास्य, अष्टहस्तायामं संश्लिष्टभूमित्वाद् देवपथमिति ॥

दण्डान्तरा द्विदण्डान्तराश्चेति अट्टालकादिशून्ये देशेऽभ्यन्तरतोऽधिकाराद् द्विहस्तविस्तारा एव । इष्टकामयीः फलकमयीर्वा । किमुत्सेधाः, यत्र चरन्तः प्राकारगुप्तो······द्रणपरा विध्यन्ति । अट्टालकादिस्थास्तु उपदिष्टाः (? विष्टाः) शयिता वा विध्यन्तीत्ययं विशेषः ॥

अग्राह्य इति परैरग्राह्येऽधृष्ये खातगुप्ते । प्रधावितिकामिव प्रधावितिकां गोमूत्रिकया पुरुषप्रमाणं क्षुद्रप्राकारं महाप्राकारात् प्रभृति आमहाखातं प्राप्तानुखातमेव किञ्चिदावृतं योधरक्षार्थम् । निष्करद्वारञ्च प्रधावितिकागुप्तमेव । येन निष्पत्य अनुप्राकारमूलं युद्धाय कीर्यन्ते योधाः । स (? तच्चै) चैकं सत्येकत उभयतो वा महद् द्वारम् अग्राह्ये देशे भवत्येव । एकैकमिति चतुर्दिशमष्टौ चत्वारि वा निष्करद्वाराणीति ॥

नीति-निर्णीतिटीका

अट्टालकेति । अट्टालकप्रतोलीमध्ये सार्द्धदशाङ्गुलोपेतचतुर्दशदण्डप्रमाणेऽत्रापि वीप्सैव । त्रिधानुष्काधिष्ठानं पंचारत्निधनुस्तत्र धन्विनं स्थापयेदिति वचनात् । त्रयाणमधिष्ठानं पंचदशहस्तायतं भवति । सापिधानैच्छिद्रफलकैस्संहतम् । सच्छिद्र-

[परिखाबहिर्भागे सापायरथ्यापरिकल्पनविधिः]

बहिर्जानुभञ्जनीत्रिशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्र-शृङ्गाटकश्वदंष्ट्राऽर्गलोपस्कन्दनपादुकाऽम्बरीषोदपानकैःछन्नपथं कारयेत् ॥

नीति-निर्णीतिटीका

फलकत्वं शरनिर्गमार्थं। सापिधानत्वं परशरप्रतिस्खलनार्थम्। इंद्रकोशं इद्रकारः कोशः। अक्षिसमानसहस्रच्छिद्रोपेतत्वात्तं कारयेत्॥

अंतरेष्विति। अंतरेषु स (सा?) द्वैकत्रिंशदङ्गुलायतपञ्चदण्डेषु द्विहस्त-विष्कंभम्। पार्श्वे प्राकारबहिःपार्श्वे चतुर्गुणायामं अष्टहस्तं सारदारुमयम्। ताम्र-पत्रिकावद्धमधः कृतशरमार्गं सर्वतः छादितं देवपथमाप्रवेशनिर्गमत्वात् प्राकारमूल-रक्षणार्थं कारयेत्॥

दण्डान्तरेति। दंडांतरा चतुर्हस्तांतरा द्विदंडांतरा वा अष्टहस्तांतराश्चर्या उत्सेधसमावक्षेपसोपाना अस्यांतरतः कारयेत् प्राकारारोहणार्थम्। प्राकारं समा-लक्ष्य··· । अट्टालकसोपानानि तु महान्ति एकदैव बहुपुरुषारोहणार्थानि। चर्यारूढाश्च योधाः कपिशीर्षकाच्छादिता युध्यंते।

आग्रह्योइति। महाखातवप्रयोर्मध्ये चतुर्दंडप्रमाणेऽवकाशे गोमूत्रिकाकारा पुरुषप्रमाणमुण्डप्राकारेणाग्राह्यो परेषां निष्किरद्वारैर्निर्गत्य परिखारक्षार्थं प्रधावंति योधा अस्यामिति प्रधावनिकां कारयेत्। निष्किरद्वारं च अग्राह्य एव देशे देवपथ-स्याधस्तात् प्राकारकुक्षिप्रदेशेषु, निष्किरद्वारं निष्कीर्यंते बहिः परिखाररक्षार्थं योधा येन तदारोहणावतरणार्थं कृतं तिर्यक्प्राकारबाह्यभित्तिषु स्वल्पतरसोपानं कालाय-सदृढकपाटं कारयेत्। जातावेकवचनम्। वक्ष्यति च दुर्गलंभोपाये 'निष्किरादुपनिष्कृत्य दुर्गस्थान् घातयेदि'ति।

श्रीमूला

बहिरिति। बहिः परिखाबहिर्भूमिषु, जानुभञ्जनी-त्रिशूल-प्रकर-कूप-कूटाव-पात-कण्टक प्रतिसरा-हिपृष्ठ-तालपत्र-शृङ्गाटक-श्वदंष्ट्रा-र्गलोप-स्कन्दन-पादुका-म्बरीषो-दपानकैः छन्नपथं कारयेत्। जानुभञ्जन्यो जानुभञ्जनीनामधेया दारुमया यन्त्रकीलाः। त्रिशूलप्रकरः सारदारुलोहनिर्मितानां तीक्ष्णत्रिशृङ्गाणामायुधविशेषाणां समूहः। कूपा अन्धवः। कूटा अयश्शलाकाः। अवपातास्तृणादिच्छन्ना गर्ताः। कण्टकप्रतिसराः आयसाः, कण्टकाचिता रज्जुविशेषाः। अहिपृष्ठानि निर्मांससर्पपृष्ठास्थिसदृशाका-राण्ययोमयानि तीक्ष्णाग्राणि। तालपत्राणि तथाविधान्येव तालपत्राकाराणि। शृङ्गा-टकानि त्रिकोटिकानि लोहयन्त्राणि। श्वदंष्ट्रास्तदाकारा यन्त्रभेदाः। अर्गलानि विष्कम्भाकाराणि यन्त्राणि। उपस्कन्दनानि स्खलनार्थानि काष्ठानि। पादुकाः एक-पादमात्रपातपर्याप्ताः पङ्कपूरिता गर्ताः। अम्बरीषाणि अग्निसम्भृततप्तभ्राष्ट्रगर्भा गर्ताः। उदपानकानि दुष्पीतोदकाः कुपुष्करिण्यः। एतैश्छन्नं पन्थानं कारयेत्।

[प्राकारे सपरिकरप्रतोलीमहाद्वारपरिकल्पनम्]

प्राकारमुभयतो मण्डपकम् अध्यर्धदण्डं कृत्वा प्रतोलीषट्तलान्तरं द्वारं निवेशयेत्, पञ्चदण्डादेकोत्तरवृद्ध्या अष्टदण्डादिति चतुरश्रं, द्विदण्डं वा।

चाणक्यटीका

बहिरिति। तृतीयपरिखाया बहिः। जानुभञ्जिनीः शरभा इवाष्टाभिः जानुमात्रोत्सेधैः पादैः क्षिप्तजानुभञ्जनयोग्याः सारदारुदण्डाः। वेणुखदिरादिमयानां शूलानां प्रकरः पङ्क्तिः। कूपः शुष्कावटः। कूटं मुखपातयन्त्रम्। अवपातो हस्तिग्रहणार्थः। कण्टकप्रतिशरः सर्पत्वे (?) मुखकण्टकमाला। अहिपृष्ठं निर्मांसाहिपृष्ठास्थिसंस्थानं लोहमयम्। [1]तलपत्रं क्षुरसंस्थानम् आतपत्रवद्धावृतम् (?)। शृङ्गाटकं त्रिकण्टका मण्डूकी। श्वदंष्ट्रा गोक्षुरकस्थानीया। अर्ध (? अर्गलं)—छिद्रावलम्वी वृक्षः। उपस्कन्दः विच्छिद्रा (? पिच्छिला)[2] भूमिः। पादुका तत्प्रमाण एव कण्टकोपचितः पांसुच्छन्नो गर्त्तः। अम्बरीपको भ्राष्ट्रे नित्यो (? निहितो) ऽग्निः। उदपानम् उदकपूर्णं कूपम्। तैश्छन्नोऽनुमार्गदेशः छन्नपथः सञ्चारः॥

नीति-निर्णीतिटीका

परिखादीनां रक्षार्थमाह। वहिर्जानुभंजनीति। जानुभंजनप्रयोजना सचक्राष्टपादसमन्विता सरभस्येवाधश्चत्वार ऊर्द्ध्वं··ति सा यं··भञ्जनं करोतीति। शूल [प्रक] रकूपसारदारुमयशूलप्रकरोपलक्षितकटपांसुच्छादितकूपः कूटानि मृगपक्षिवधार्थमिव··वंधनार्थमिव कृता गर्त्ताः, कंटकप्रतिसरा अयोमयकंटकमाला, अहिपृष्ठं निर्मांसाहिपृष्ठसमानमयोमयमेव।··ति। शृंगाटकश्वदंष्ट्रा लोहमय्यो हस्तिगतिस्खलनाय। अर्गलाः सारदारुमय्यो यंत्रेण निपातिता मार्गनिरोधं कृत्वा तिष्ठंति····· देशैर्वा पादुका पदप्रमाणा गर्ता वित्तस्त्यवगाढा यत्र पतितः पादोऽस्थान एव भज्यते। अंवरीपो निर्धूमः कारीपाग्निः··शयाः, तैश्छन्नमिति निरन्तरं व्याप्तम्। छन्नपथमिति कटपांसुभिःप्रच्छादितत्वात् परैरलक्ष्यत्वादापदि रात्रौ गूढं पिहितत्वाच्च तं छन्नपथं·· दिति।

श्रीमूला

इत्थं परिखावप्रप्राकाराणां विधानमुक्त्वा द्वारविधानमाह—प्राकारमुभयत इत्यादि। अस्यार्थः—यत्र द्वारं निर्मित्सितं, तत्र प्राकारोभयभागयोः अध्यर्धदण्डविस्तारं मण्डपं परिकल्प्य प्रतोलीपट्तलैरवच्छादितं तदाधारभूतैः षड्भिस्तोरणस्तम्भैर्युक्तं द्वारं निवेशयेत् कारयेत्। पञ्चदण्डात् प्रभृति एकोत्तरवृद्ध्या अष्टदण्डपरमावधिकेन

---

१. 'तालपत्रम्' इति मुद्रितकोशपाठः।

२. 'उपस्करः (?) न्दः प्रस्खलिनी भूमिः स्थपुटपिच्छिला,' इति वैजयन्ती॥

श्रीमूला

विस्तारेण प्राकारानुरूपेण युक्तं चतुरश्रं निवेशयेदिति । द्विदण्डं वेति । दण्डद्वयविस्तारयुक्तं वा द्वारं निवेशयेत् । इदमेकीयपक्षे । पक्षान्तरमाह—षड्भागमिति । आयामाद् दैर्घ्येण, षड्भागमष्टभागं वाऽधिकम् आश्रितविस्तारमानापेक्षया तदीयषष्ठांशाधिकं तदीयाष्टमांशाधिकं वा निवेशयेत् । इदमेवं विवृण्वन्ति—पञ्चदण्डचतुरश्रस्य षड्भागः साष्टाङ्गुलं हस्तत्रयं, अष्टभागस्तु सार्धं हस्तद्वयं, चतुर्विंशत्यङ्गुलं एको हस्तः, हस्तचतुष्टयमेको दण्ड इति चाश्रयणादिति । एवं षड्दण्डचतुरश्रादिपूह्नेयम् ।

चाणक्यटीका

(द्वार)विधानमुच्यते—प्राकारमिति । अध्यर्धदण्डनिष्कासप्रवेशमार्गमवशिष्य तमुभयतः "उपसर्वतसोः कार्या" (वा० २-३-२) इत्यादिना द्वितीया । तस्योभयपार्श्वयोः कृत्वेत्यर्थः । किं कृत्वा ? प्राकारम् । किंसंस्थानम् । मेण्डकारमिव बाहुप्राकारम् । संक्षेपतस्तद्यथा—पञ्चदण्डस्य प्रतोलीद्वारस्य तावत् षड्ढस्तान्मार्गाद् अधिकाश्चतुर्दण्डहस्ताः तानुभयतः सप्त हस्ताः प्राकाराग्रान् मेषघोणवन्निष्क्रान्ताद् अपकृष्य अर्धतृतीयदण्डप्राकारमध्येन सहान्तर्बहिश्च बाहू प्रसार्य मेषशृङ्गवन्मार्गाभिमुखौ सप्त सप्त हस्तान्निवर्त्तयेत् । तदेवं षट्सान्नमुखे प्राकारमस्तके तुला धरण्यास्तिष्ठन्ति । प्रतोलीमिव प्रतोलीसंज्ञकं द्वारं षड्वान्तराणि (?) समानां तुलानां तुलावष्टब्धदेशादूनत्रिहस्तप्रमाणानि यस्य·····(निवे) शयेत् । तेन मेडकच्छेदमात्रं तु ला (? द्वा) रमिति कथयन्ति । षट्प्रतोलीषट्तुलान्तरमिति समासमपीत्यन्ये, प्रतोलीसम्बन्धीनि तादर्थ्यात् षड् तुलान्तराणि षड्द्वारम् अर्थात् प्रतोलीसंज्ञकमिति व्याचक्षते । पञ्चदण्डादेकेनोत्तरोऽधिको यस्य निवेश इति । अष्टदण्डादिति प्राकारापेक्षया द्वादशविधस्य हस्तोत्तरोऽप्येतत्प्रमाणं (?) चेदमेवं समविष्कम्भत्वात् । चतुरश्रं चतुरश्रमेखलेनेत्याह (?) षड्भागमिति । पञ्च दण्डा यतस्य विस्तारः षष्ठाङ्गुलः त्रिहस्ताधिकः । षड्भागं वेति अर्धतृतीयहस्ताधिकविस्तारः एतद्द्वादशविधस्याप्युत्तरषड्भाग अष्टभागश्चाप्यूह्यः ।

नीति-निर्णीतिटीका

··दिद्वाराण्याह प्राकारमिति । प्राकारस्य द्वारप्रतोलीक्षेत्रमात्राविशेषितभूप्रदेशस्य, उभययोगे षष्ठ्यपवादे द्वितीया, तम् । उभयत इति । उत्तरद्वारे पूर्वापरयोः, पूर्वद्वारे दक्षिणोत्तरयोः, दक्षिणद्वारे पूर्वपश्चिमायोः । पश्चिमद्वारे दक्षिणोत्तरयोः प्राकारोत्सेधयोरुभयत इति योज्यम् । मेंढकमिति वास्तुशास्त्रे लोके च मेषस्य संज्ञा । तत्र शृंगाकारग्रहणार्थमुपादानं कपिशीर्षकमुरजादिवत् । मेषशृङ्गद्वय- संस्थानं द्वारशुपिराभिमुखाग्रबाहुप्राकारं तयो··रतोऽपि कृत्वा मेंढकाकारप्रतिपादने च निराश्रितत्वात् प्राकारकोणेनादाढर्यार्थं भवति इति भावः । अध्यर्द्धदण्डमिति । षट्हस्तविष्कंभं आयामस्तु द्वारक्षेत्रत एव सिद्धः··मुभयमेंढकशृंगचतुष्टयमध्येऽष्टहस्तं द्वारमार्गावकाशं मुक्त्वा कार्य इत्यर्थः । तमेवंविधं मेंढकं कृत्वा प्रतोलीषट्तुलांतरं द्वारं निवेशयेदिति संबंधः ।

षड्भागमायामादधिकमष्टभागं वा । पञ्चदशहस्तादेकोत्तरमाष्टादशहस्तादिति तुलोत्सेधः । स्तम्भस्य परिक्षेपाष्पडायामाः द्विगुणो निखातः चूलिकायाश्चतु-

---

नीति-निर्णीतिटीका

प्रतोल्याः प``नामन्तराणि यस्मिन् कपाटयुगद्वितयान्तरे तत्प्रतोलीषट्तुलान्तरं द्वारं निवेशयेत् ।

प्रतोलीक्षेत्रस्य प्रमाणमाह—पंचदंडादेकोत्तरमिति । द्वादशहस्तोत्सेधस्य प्राकारस्य पञ्चदण्डं द्वारक्षेत्रम् तस्मादेकोत्तरमिति एकैकेनांशेनोत्तरमा अष्टदण्ड``च दंडस्योपरि दंडत्रयमधिकम्, तच्च द्वादशधा क्रियमाणं हस्तमात्रमेव भवति । ततश्च प्रथमप्राकारे पञ्चदंडं, द्वितीये हस्तोत्तरं, तृतीये द्विहस्तोत्तरं, चतुर्थे त्रिहस्तोत्तरं, पंचमे``डमेवं चतुर्विंशतिहस्तेऽष्टदंडकमिति । षड्भागमायामादधिकमष्टभागं वा स्वकीयस्वकीयप्रमाणात् षड्भागमायामादधिकमष्टभागं वा । पञ्चदण्डे आयामे षड्भागो हस्तत्रयं चतुरङ्गुलानि । अष्टमभागः सार्द्धहस्तद्वयमित्येवं द्वादशस्वपि क्षेत्रेषु योज्यम् ।

श्रीमूला

पञ्चदशेत्यादि । एतद् व्याचक्षते—द्वादशहस्तोत्सेधस्य प्राकारसभागृहस्य पञ्चदशहस्तोत्सेधांस्तुलास्तम्भान् कुर्यात् । एवं तद्धस्तचतुर्भागाश्रयेण एकोत्तरवृद्धया अष्टादशहस्तपर्यन्तमुत्सेधं कुर्यात् । स एष तुलोत्सेध इति । तलोत्सेध इति पाठे उक्तमानैस्तुलास्तम्भैरुपलक्षितस्यादितलस्योच्छ्रय इत्यर्थः ।

स्तम्भस्येति । स्तम्भस्य परिक्षेपाः परिधयः षडायामाः स्तम्भोत्सेधषड्भागदीर्घाः, पञ्चदशहस्तोत्सेधस्य स्तम्भस्य परिधिमानं सार्धद्विहस्तं कल्पनीयमिति भावः । निखातो द्विगुणः स्तम्भस्य निखातायामः परिक्षेपायामद्विगुणः, पञ्चदशहस्तोत्सेधस्य पञ्चहस्त इति भावः । चूलिकायाश्चतुर्भागः, चूलिका नाम स्तम्भशिखा, तस्या आयामः परिक्षेपायामचतुर्भाग इत्यर्थः ।

चाणक्यटीका

पञ्चदशहस्तादिति । द्वादशहस्तस्य प्राकारस्य पञ्चदशहस्तस्तलोत्सेधः, एवमुत्तरत्रापि षडङ्गुलवृद्धिर्योज्या ।

द्वारबन्धनस्तम्भानां तुलासन्धारकाणां च प्रमाणमुच्यते । परिक्षेपः स्थूलता ते षड्ढस्तस्तम्भस्य दैर्घ्यं, नायामस्यानेन लक्षणमुच्यते । पञ्चदशहस्तः तलोत्सेधः तेनैवास्य निर्ज्ञातत्वात् अर्धं तृतीयहस्तत्वं परिक्षेपस्यै वलक्ष्यते । गुणनिर्देशं तूत्तराः । द्विगुणो निखातः परिक्षेप एव द्विगुणः पञ्चहस्तो निखातः । चूलिकायास्तम्भशिखायाः तुलाफलकसन्धारणार्थायाः संबन्धी परिक्षेपादेव चतुर्भागः पञ्चदशाङ्गुलः परिणाहेनेति बोद्धव्यम् । दैर्घ्यं तु तुलापरिणाहादेवार्थोक्तम् । वाशब्दस्य सापेक्षत्वात् । क्रमवशेन किञ्चिन्न्यूनोऽभ्यधिको वेति व्याख्येयम् । अपरे त्वाहुः—चूलिकायाश्चतुर्भागो निखात एवोर्ध्वतुलोपरिच्छेदस्त्वधो न्यासपट्टो ष्विति ।

भागः । आदितलस्य पञ्च भागाः शाला वापी सीमागृहं च । दशभागिकौ (समत्तवारणौ) द्वौ प्रतिमञ्चौ; अन्तरमाणिः । हर्म्यं च समुच्छ्रयादर्धतलं, स्थूणावबन्धश्च, आर्धवास्तुकमुत्तमागारं त्रिभागान्तरं वा, इष्टकावबद्धपार्श्वं,

---

नीति-निर्णीतिटीका

तथैव द्वारतलस्योत्सेधं त्रयोदशविधमेव दर्शयन्नाह—पञ्चदशेति । मेंढकप्राकारास्याय-मुच्छ्रयो द्रष्टव्यः । तन्मस्तक एव यस्मात्तलं तस्य तलोच्छ्रयः ।

साद्धे·····रुत्तर·····ह्यम् ॥

स्तंभस्येति । द्वादशहस्दोत्सेधे प्रकारे द्वादशहस्तोत्सेध··द्वारग्रहतुलापिण्डपल··स्तारभूमिकावन्धादौ द्रष्टव्यम् । तलोच्छ्रयवृद्धयैव स्तंभोच्छ्रयवृद्धिर्व्याख्याता । स्तंभ-स्थौल्यमाह—स्तंभस्य परिक्षेपाः···द्वादशहस्तायामस्य द्विहस्तं स्थौल्यं भवतीत्यर्थः । स्तंभायामस्य षष्ठोंशो विष्कंभ इति भावः । द्विगुणो निखा··। न त्वेव काष्ठमयं कारयेत् । "अग्निरवहितो हि तस्मिन् वसती"ति वचनसामर्थ्यात् । प्रतोल्यां सकलकाष्ठं ताम्रवेष्टितं द्रष्टव्यम्··परिक्षेपचतुर्थभागप्रमाणं भवति । एवं द्वारनिवेशमभिधाय

श्रीमूला

आदीत्यादि । अयमर्थः—प्रतोलिकात्रितलेषु मध्ये प्रथमतलं पञ्चधा विभज्य तेषु पञ्चसु भागेषु शाला वापी सीमागृहं च कार्याणीति । इदं विवृण्वन्ति—मध्यमे भागे वापीं, वापीप्रान्तभागयोः दीर्घचतुरश्रे द्वे शाले, शालाप्रान्तयोः सीमागृहं च कारयेदिति । सीमागृहं नाम शालाद्वयप्रान्तयुगलगते पञ्चभागे क्रियमाणं चतुष्कोणं कोष्ठगृहमित्याहुः । दशभागिकाविति । दशभागिकौ शालादशभागविस्तारौ, समत्त-वारणौ निर्यूहयुक्तौ, द्वौ प्रतिमञ्चौ मञ्चप्रतिकृती ऐष्टकौ सन्निवेशविशेषौ, कार्यौ, अर्थाच्छालायाः प्रान्ततः । अन्तरं शालासीमागृहयोरन्तरालं कार्यम् । आणिः कार्यः । स च क्षुद्रं द्वारमित्याहुः । हर्म्यं चेति । हर्म्यम् उपरितलं चन्द्रशाला तच्च, समुच्छ्रयादर्धतलम् उत्सेधेन प्रथमतलस्यार्धं प्रथमतलोत्सेधापेक्षयाऽर्धोत्सेधं कार्यम् । आणिहर्म्यमिति पाठे आणिः सीमा तत्रत्यं हर्म्यं सीमागृहवदुपरितले सीमनिर्मिता चन्द्रशालेत्यर्थः । स्थूणावबन्धश्च क्षुद्रस्तम्भनिवेशश्च अर्थाद् द्वितीयतले । आर्धवास्तु-

चाणक्यटीका

आदितलस्येति । आदिभूमेरुर्प·ग्राह्यस्तलस्तुलापट्टं (? ट्टः) चतुरश्रः पञ्चदण्डा-दिप्रमाणायतस्य पञ्चभागाः कर्त्तव्याः । ततः प्रथमो दण्डः शालासंस्थानतिर्यगायतः प्रहरणाहरणादिस्थानार्थं·····स्यात् । मध्यपञ्चमभागो वापीसंस्थानः चतुरन्तैस्तटैरिति च परिक्षिप्तोभय·····त्यच्छन्नत्वात् सुषिर एव । तथा हि—तुलामात्रोपस्थितविरल-विरलपट्टगताः पुरुषाः कवाटभङ्गोद्यतानधोभूमिगतान् प्रविशतो निवारणे पाषाण-शूलमुसलादिभिः परान् घ्नन्तः उभयोः कवाटयोः रक्षां कुर्वन्ति । पट्टस्तात् प्रथम-

चाणक्यटीका

द्वारादुभयतः अष्टावष्टाङ्गुलानि तदधिकऋज्वायतं च मध्यदण्डत्रयमिति तृतीयः, पञ्चमभागो वार्थः तैश्व छिद्रैः परान् निघ्नन्ति । तदपि शालाप्रमाणसंस्थानमेव छिद्राधिकं तु तत्स्यात् । दशभागिकाविति । वाप्यास्तूभयतो यौ तत्प्रमाणौ त्रिदण्डायतौ षोडशाङ्गुलाधिकषडन्तविस्तीर्णौ पञ्चभागौ तयोरर्धमर्धमवच्छिद्य अर्धोच्छ्रायौ द्वौ प्रतिमञ्चौ फलकाहृतौ स्याताम् । उभयतश्चेतो दशभागिकावित्युच्येते । तौ प्रमाणतः त्रिदण्डायतावेव अष्टाङ्गुलाधिकत्रिहस्तविस्तीर्णौ तत्रस्थानीयौ याः (? कयौधाः) कवाटारक्षाणामात्मीयनां परेषां च प्रवेशनिष्कासपरिज्ञानं कुर्युः । अन्तरमाणीति (? णी इति) यत्तयोः प्रतिमञ्चयोः पृष्ठतो दशभागद्वयमवशिष्टं निस्तलान्तरं चारार्थमन्तरद्वारमित्यर्थः । तस्याणित्वं सामर्थ्यप्राप्तम् । अस्यै (व) त्वाणीति (? णी इति) द्विवचनान्तमेवाभिधीयते । तस्य प्रयोजनापेक्षं प्रमाणमास्थाप्य शेषो हर्म्यवदिष्टकारचितारक्षिकभूमिकमेव स्यात् शयनाशनयोग्यम् । ननु चाणिरिति छिद्रापिधानमुच्यते, तद्योगाच्चाणिमाण्डव्य इति । नैष दोषः, छिद्रसाहचर्यात् कीलाभिधानं स्यात् । तथा चाणिद्वारं नि (?) च्छिद्रिकाद्वारं वक्ष्यति ।

अपरे त्वाहुः—वाह्यः पञ्चभागः शालामध्ये क्वापि तस्यां सीमागृहमुभयतो द्वारप्रकारसीमत्वाद्यर्थम् । अभ्यन्तरपञ्चभागो द्विधाविभक्तो द्वौ प्रतिमञ्चकाविति । तत्र विभागे प्रयोजनाभावः । यच्चान्तरं वा विच्छिद्राणि कवटावापत्यौ (?) हर्म्यस्य वाह्यतश्चतुर्षु पार्श्वेषु स्थूणाः कृत्वा तासामुपरि फलकास्तृतकुट्टिमस्थानमुच्यते । वर्धमानच्छेदमध्योन्नतस्तलवन्धश्चेति । तथा नाम यद्यायुज्यते को दोषः ॥

द्वितीयं तलमाह—समुच्छ्रयादिति । आदितलस्य पञ्चदशहस्तस्य प्रकृतत्वात्तस्येह योऽर्धादिष्टहस्तसमुच्छ्रायं तलं द्वितीयमिति । अर्थात् पर्यवसानायाम्[1] (?)·······कथं तदुत्थाप्यत इत्याह—स्थूणावन्धश्च अस्य कार्यं इति शेषः । स्थूणासु क्षुद्रस्तम्भिकासु तलोऽस्त्येव । तत्र निखातव्या इत्येतन्निखातयोग्याः स्थूणाः स्युः विस्तारादितलस्यैवस्यात् । अन्येत्वाहुः—अर्धमिष्टकाभिरुत्थाप्य तत्रोपरि स्थूणावबन्ध इति । अर्धवास्तुकमिति । अर्धतृतीयां दण्डानां काशतृतीयार्थमवस्थाप्य (?) अग्रतः पृष्ठन उभयतो वा तत्प्रमाणमवशिष्टे भागे स्याद् अगारमेतन्मध्योन्नतः तलभागमेव कर्त्तव्यमित्यन्ये । तथा च शुकपञ्जरमिति तदाख्यायते द्रमिडैः वालाग्र[2] चोतिचोन्याचार्यैरिति (?) । भागान्तरं वेति । उत्तमागारं शून्यतृतीयो भागः षोडशाङ्गुलाधिकोऽध्यर्धदण्डः स्यात् ।

नीति-निर्णीतिटीका

मेंढकप्राकारमस्तकनिविष्टस्यादितलविधानमाह—आदितलस्येति ।

---

१. इतः परं मातृकायां पत्रार्धपरिमितो ग्रन्थभागः "पराजेरसोढः" (१-४-२६) इत्यादिपाणिनिसूत्रव्याख्यारूपः ग्रन्थान्तरात् प्रक्षिप्तोऽस्ति ।

२. मृच्छकटिके प्रासादवालाग्रप्रतोलिकायां निगडवद्धः स्थावरकश्चेटः जीर्णगवाक्षेणाऽधः पतित्वा चारुदत्तपरित्राणाय त्वरते ॥

वामतः प्रदक्षिणसोपानं, गूढभित्तिसोपानमितरतः, द्विहस्तं तोरणशिरः,

---

नीति-निर्णीतिटीका

तद्यता एवं भागास्तले कार्याः प्रत्यंशं पञ्च कोष्ठकाः ।
यथायोगं विभागोऽत्र शालासीमागृहादिषु ॥
कोष्ठकस्य त्रिभिस्त्र्यंशैः कोष्ठको जायतेऽत्र तु ।
त्रिभिः षडंशैः कोष्ठार्द्धं पादोऽपि द्वादशांशकैः ॥
'''कोष्ठत्रयं त्र्यंशैरुभयोः पार्श्वयोरपि ।
पञ्चकोष्ठा भवेद्वापी मध्यस्थं कोष्ठकत्रयम् ॥

द्वारबन्धप्रदेशस्तलव्यपदेशं न लभते जनावकाशप्रदेशाभावात् । आदितलस्य पञ्च'''प्रमाणस्य पञ्चभाग आयामेन विंशत्यादिहस्तविष्कंभेन दंडादिप्रमाणोऽभ्यन्तरभागावस्थितः । शाला प्रहरणावरणादिस्थानम् । शालाग्रतः स्थितं षडङ्गुलान्तरं शुषिरं वापी'''रत्वात् । यया प्रविशतः शत्रूनुपरि स्थिताः प्रहरंति । अग्रस्थितः शालाप्रमाणो भागस्सीमागृहम् । बाह्याभ्यान्तरभागयोः सीम्नि स्थितत्वात् । सीमागृहं युद्धार्थम् । युद्धार्थौ दशभागिकौ द्वौ प्रतिमञ्चौ अर्द्धदण्डादिप्रमाणौ वापीभागस्योभयतः द्वाररक्षकावस्थानभूतौ प्रतिमञ्चौ प्रविशतां परिज्ञानार्थम् आदितलस्य ।

'''धा कृत्वा वाप्याः पार्श्वद्वयेऽपि च ।
प्रतिमंचौ च तौ कार्यौ गोप्तॄणां स्थितये सदा ॥

प्रविशतां परिज्ञानार्थम् ॥

अन्तरमाणीति । शाला-वापी-सीमागृहप्रतिमञ्चावरुद्धप्रदेशे'''मन्तरमित्युच्यते । तत्र आणी इत्याणिद्वयं सोपानमार्गद्वारद्वयमित्यर्थः । शेषप्रदेशद्वये हर्म्यं रक्षकशयनासनार्थं धवलगृहम् । द्वितीयतलविधिमाह—समुच्छ्रयादिति । समुच्छ्रयात् पञ्चदशहस्तादूर्द्धं सार्द्धसप्तहस्तः समुच्छ्रयः । उच्छ्रयापेक्षयाऽर्द्धतलमुच्यते । क्षेत्रं त्वादितलसमानम् । स्थूणावन्धश्चात्र स्थूणाः क्षुद्रस्तंभा आदितलस्योपरिस्थूणा'''न्यासं कृत्वा, बन्धो द्वितीयतलबन्धः । स्तंभतुलादिभिः कार्य इति वाक्यशेषः ॥

अर्द्धवास्तुकमिति ।'''णवास्तुश्च भूतलं चार्द्धप्रमाण'''तीयतलमित्यर्थः । उत्त-

श्रीमूला

कमिति । उत्तमागारं तृतीयतलम्, आर्धवास्तुकं, त्रिदण्ड एको वास्तुरिति परिभाषया वास्तोरर्धं सार्धदण्डः तत्प्रमाणकं कार्यम्; अर्थात् पञ्चदण्डचतुरश्रस्य द्वारस्य । त्रिभागान्तरं वा पञ्चदण्डत्रिभागोऽन्तरमवकाशो यस्य तत् तथाभूतं वा, उत्तमागारं कार्यम् । इह वाशब्दात् त्रिभागद्वयान्तरपक्षार्धान्तरपक्षयोरपि सङ्ग्रह इत्याहुः । इष्टकावबद्धपार्श्वं, वामतः प्रदक्षिणसोपानम्, इतरतो दक्षिणतः, गूढभित्तिसोपानं च कार्यम् । तृतीयतलविधिरयमधस्तलेऽपि योज्यः ।

द्विहस्तमिति । तोरणशिरः द्वारशीर्षं, द्विहस्तं, कार्यम् । त्रिपञ्चभागिकौ त्रयः

त्रिपञ्चभागिकौ द्वौ कवाटयोगौ, द्वौ द्वौ परिघौ, अरत्निरिंद्रकीलः पञ्चहस्तमणिद्वारं, चत्वारो हस्तिपरिघाः। निवेशार्धं हस्तिनखः मुखसमः। सङ्क्रमोऽसंहार्यो वा भूमिमयो वा निरुदके॥

———————

चाणक्यटीका

अस्य तु स्थूणाबन्धवचनं सिद्धमेव, शोभनार्थं युद्धार्थं दिगवलोकनार्थं त्वेतत्। प्राकार-मूलात् प्रभृति तलारोहणार्थं सोपानविधिमाह—द्वारस्य निर्गते वा इष्टकावबद्धपार्श्वंमात्रं काष्ठमयं तु शैलमित्यन्ये। प्रदक्षिणावस्थितं सोपानं मङ्गलार्थं द्वितीयतलारोहणार्थं स्यात्। गूढं सुगुप्तं महाजनेनालक्षितं भित्तिगतमेव सोपानं महापुरुषार्थ (?) रोहणार्थम्। दक्षिणः स्यात् (? रक्षिणोऽस्माद्) गूढभित्तिसोपानेन ह्यवतीर्यान्यं वेपमात्मनः कृत्वा दृश्यमानसोपानपङ्क्त्या पुनः समारोहन्ति प्रभूतजनसंख्यापनार्थम्। एतच्च स्थ······तमेव स्यात्। आपदि तूद्घाटाद्यते॥

द्विहस्तमिति द्वारबन्धकाष्ठादुपरि द्विहस्तमात्रार (?) शिखाभित्तिः स्यात्। अतश्च पञ्चदशहस्तोच्छ्रितस्य देहलीपट्टं हस्तमात्रं परिकल्प्य द्वादशहस्तोच्छ्रायं पढ्ढ-

नीति-निर्णीतिटीका

मागारं च घण्टाकलशादिरचनया, त्रिभागांतरं वा द्वितीयतलात्तृतीयतलं त्रिभा·· कर्तव्यमित्यर्थः॥

इष्टकेति। इष्टकावबद्धपार्श्वमिति काष्ठ··निषेधार्थं। वामत इति द्वारनिर्गमे भागें। प्रदक्षिणसोपानमिति पश्चिममेंढकभित्तेरारभ्य पश्चि··मेंढककभित्तिलग्नानि द्वारं यावत्सोपानकानि धीयन्त इत्यर्थः॥

गूढभित्तिसोपानमिति। दक्षिणतोऽभ्यंतरभागे गूढमेंढक··कभित्तौ सोपानं कार्यम् गूढप्रवेशनिर्गमार्थम्। द्विहस्तं तोरणशिर इति। उत्तरदेहल्यां द्विहस्तं शुषिरं

श्रीमूला

पञ्चभागाः अनयोरिति तथाभूतौ, द्वौ कवाटयोगौ कार्यौ। द्वौ द्वौ परिघौ अर्गले, कार्यौ। इन्द्रकीलः कवाटधारणार्थः प्रधानः कीलविशेषः, अरत्निः निष्कनिष्ठमुष्टिकहस्तदीर्घः कार्यः। अणिद्वारं क्षुद्रद्वारम् अर्थान्महाकवाटमध्यगं, पञ्चहस्तं कार्यम्। हस्तिपरिघाश्च-त्वारः गजार्गलानि लक्षणया गजगतिद्वाराणि चत्वारि कार्याणि, कृत्स्नो द्वारमण्डपाव-काशश्चतुर्गजप्रवेशपर्याप्तःकार्य इत्यभिप्रायः।

निवेशार्धमिति। हस्तिनखः दुर्गावतरणार्थः क्रमनिम्नो हस्तिनखाभो मृत्कूटः। निवेशार्धं द्वारसन्निवेशस्यार्धमानः पञ्चदण्डचतुरश्रस्य सार्धद्विदण्डोत्सेधमान इत्यर्थः। मुखसमः द्वारसमानविस्तारश्च कार्यः। सङ्क्रम इति। सङ्क्रमः दुर्गसञ्चरः, असंहार्यः स्थिरो दार्वादिमय इत्यर्थः तथाविधो वा, निरुदके भूमिमयो वा कार्यः।

चाणक्यटीका

स्तविस्तीर्णं विस्ताराद्द्विगुणायतं द्वारम् एवं इतराम् (?) अप्यनया कल्पनया प्रमाणाधिक्यं योज्यम्। त्रिपञ्चभागिका ऋतवति (?) कौ द्वाविति महाद्वारस्य कवाटस्थानमाह—तलस्येव दण्डप्रमाणान् पञ्चभागान् कृत्वैकैकं पञ्चभागः बहिरुभयतोऽवाच्यान्तर्गतपञ्चभागाः (?) कर्त्तव्याः ते विद्यन्ते ययोस्तौ प्रथमद्वितीययोश्चतुर्थपञ्चमयोर्मध्ये द्वौ कवाटयोगौ स्यातां कवाटद्वयापेक्षत्वात्। योगग्रहणमुद्घाटसौकर्यार्थम्। न चैको महान् कवाटो दण्डमात्रे शालावस्थिते पञ्चमभागे सम्मातीति वचनात्। कवाटयुगद्वये द्वौ परिघो द्वौ द्वौ परिघार्गलौ कवाटयुगस्यैकैकस्याभ्यभ्तरे तत्साधारणार्थौ स्याताम्। अरत्निरिन्द्रकील इति। निखननोत्खननसुखत्वात् काष्ठाविपरीताश्रयगर्तग (त) इन्द्रध्वजकीलो हस्तमात्रः अतश्चेन्द्रकील इत्युच्यते। स हि द्वारं पिधाय कवाटयुगसन्धिश्लेषणार्थं निखन्यते। अपवारणे चेदमिति नोक्तम्। हस्तिपरिघा इति। पञ्चभागः मनुष्याणां गवाश्वस्य वा निर्गमनार्थं पञ्चहस्तमेवार्धादर्धं तृतीयहस्तविस्तारम् आणिद्वारं छिद्रिकाद्वारमित्यर्थः। अन्यत्कवाटार्गलाद्यर्थप्राप्तागाराद्बहिः हस्तिप्रतिघातक्षमावार्यामिव (?) परिघाः स्युः द्वाररक्षार्थम्॥

निवेशरक्षार्थमिति। द्वारनिवेशस्य स्थानस्यार्धतृतीयस्थानं हस्तिनखाकारं पुरोनिर्गतान्तःप्रकृष्टत्वात् हस्तिनखवद्धस्तिपादाघातप्राकारमूलत्वात् उभयतो मार्गनिर्गतं हस्तिनखसंज्ञं द्वारपालानां जागरूकाणां चाश्रयार्थम्। अन्यस्त्वाह—अतु (?लि)न्दद्वयमित्यर्थः। यत्रोच्यते हस्तिनखेष्वनलं प्रतीकार इति (?)। अन्यस्त्वाह द्वाराद् बहिः पुरस्ताच्च कुर्यात् करिनखं दृढम्। तथा वा गच्छतां वेगाद् भवेद् वृ (?म)न्दनिभा गतिः। इति

मुखसमद्वारं मुखसमोऽध्यर्धदण्डविस्तारः। सङ्क्रमन्त्यनेनेति सक्रमः। खातमुखसमश्चतुर्दशहस्तविस्तार इति केचित्। तदयुक्तम्। द्वाराधिकस्य विस्तारस्यानर्थक्यात्। स च संहर्तुं शक्योवइष्टब्य (?अवष्टम्भ) फलकः। स्वकार्यपरिसमाप्तौ हस्तिनः कथमनुप्रवेश इति चेद् ऊ (?दृ) ढैः फलकैरेवोदकच्छन्नैः तथा खाततीर्थेन तदत्र प्रतिविधानमेवैतत्स्यात्। भूमिमयो वा निरुदके स्थाने एतावतीं भूमिं नैव खन्यादित्यर्थः उक्तं। प्रतोलीद्वारम्॥

नीत्ति-निर्णीतिटीका

मुक्त्वा···करतोरणं विधातव्यम् वातप्रवेशनार्थं शरमोक्षार्थं च। त्रिपञ्चभागिकौ द्वौ कपाटयोगाविति। पञ्चधावि···अन्तर्बहिश्चैकैकं पञ्चभागं परित्यज्य मध्यमास्त्रयः पञ्चभागा अंतरगयोः कपाटयोगयोस्तौ त्रिपञ्च [भागिकौ द्वौ कपाट] योगौ··· पञ्चमयोश्च पञ्चमभागयोः सन्धौ भवत इत्यर्थः। कपाटयोगद्वयग्रहणं द्विबंद्धं सुबद्धं भवतीति। द्वौ परिघौ प्रत्येकमित्यर्थः। समन्ततः कपाटोपघानकं हन्तीति। परिघा··· कपाटयोर्मध्ये त्रिभागपार्श्वे अभ्यन्तरतः स··म्य भवतः द्वितीयस्यापि तथैव॥

[गोपुरादिद्वारेषु विशेषः]

प्राकारसमं मुखमवस्थाप्य त्रिभागगोधामुखं गोपुरं कारयेत् ।

नीति-निर्णीतिटीका

अरत्निरिन्द्रकीलक इति । चतुर्विंशत्यङ्गुलो लौहः कपाटयुगसन्धिमाक्रम्याधोदेहलीविवरं प्रविशति कीलस्तस्मिन् इन्द्रर्जिता किलेन्द्रो बद्ध इन्द्रकील इत्युच्यते । ऊद्ध्र्व-भागेऽपीष्यते, मस्तककीलाख्यः ।।

पञ्चहस्तेति । कपाटयोगयोरेकैकवामकपाटे पञ्चहस्तोत्सेधं आणिद्वारं क्षुद्रकद्वारमित्यर्थः ।''''''तेऽपि द्वारे प्रवेशनिर्गमार्थं । अत्रापि कपाटार्गलादिकं चार्थप्राप्तं कपाटानां च लोहकण्टकचितत्वमर्थापन्नम् दुर्गविधानप्रस्तावात् ।।

चत्वार इति । कपाटरक्षार्थं''हस्तिनामसाध्याश्चत्वारः परिघाः । हस्तिनिवारणार्थं हस्तिपरिघाः ।।

निवेशार्द्धमिति । निवेशः प्रतोल्याः पञ्चदण्डादिस्तदर्द्धं सार्द्धदंडद्वयादि हस्तिनखं देहलीतो''कारेण क्रमान्निम्नं शिलामयम् ।।

मुखसम इति । मुखं द्वारशुषिरं तत्समः परिखासु सङ्क्रमो मार्ग इत्यर्थः । अधिकस्य प्रयोजनाभावात् ।''रुपा मुखे मांति तावतामेव परिखासु सङ्क्रमणं युक्तम् । स च संहार्यः काष्ठयन्तादिना । सोदके खातप्रदेशे भूमिमयो वा निरुदके । तावतीं भूमिपहाय खातव्यमित्र्थः । प्रतोली''शेषमाह ।

श्रीमूला

इत्थं महाद्वारविधानमभिधाय द्वारान्तरविकल्पमाह—प्राकोरत्यादि । प्राकारसमं मुखमवस्थाप्य प्राकारतुल्यमानं निस्सरणं परिकल्प्य, त्रिभागगोधामुखं त्रिभागः विस्तारतृतीयांशस्तत्प्रमाणं गोधामुखं गोधामुखाकारं द्वारं यस्य तत् तथाभूतं, गोपुरं

चाणक्यटीका

गोपुरद्वारस्य पूर्वस्माद्विशेषमाह—प्राकारसममिति । प्रतोलीद्वारे द्वादशहस्ते प्राकारे पञ्चदशहस्तोच्छ्रिता प्रथमा भूमिः । अत्र तु द्वादशहस्तोच्छ्रायमेव मेण्डकविभागं मुखमवस्थाप्य त्रिभागगोधामुखमिति उभयतः षोडशाङ्गुलावध्यर्द्धोदपरिकल्प्य (?) ततस्तत्प्रमाणं सप्तस्तम्भमालं प्राकारं निष्कास्याग्रेऽध्यर्धदण्डं प्रवेशनिष्कासार्थं गोधामुखसंस्थानायामं परिकल्प्य गोपुरसंज्ञकं द्वारम्, अन्यत् प्रतोल्या समानम् । एतत्तु तोरणशिरोऽवशिष्टदशहस्तोच्छ्रितं द्वारं तुलापोटप्रतिवन्धं परिकल्प्य तोरशिरसा सह द्वादशहस्तमेव व्याख्येयम् ।।

नीति-निर्णीतिटीका

प्राकारसममिति । मुखमादितलादधःशुषिरं तच्च द्वादशहस्ते प्राकारे पञ्चदशहस्तं "पञ्चदशहस्तस्तलोत्सेध" इति वचनात् । अत्र गोपुरे प्राकरसममेव मुखं कर्तव्यम् ।

प्राकारमध्ये कृत्वा वापीं पुष्करिणींद्वारं, चतुश्शालं अध्यर्धान्तराणिकं कुमारीपुरं, मुण्डहर्म्यं द्वितलं मुण्डकद्वारं, भूमिद्रव्यवशेन वा ॥

नीति-निर्णीतिटीका

द्वादशहस्ते प्राकारे द्वादशहस्त एव मेंढकः । दशहस्तास्तंभाः हस्तद्वयं च स्तभोद्ध्र्वं-परिकरस्य । एवं सपरिकरः स्तंभोऽपि द्वादशहस्त``एवं प्रतोलीतस्त्रिहस्तान्न्यूनो-च्छ्रयमित्येको विशेषः । त्रिभागगोधामुखमिति । त्रिभागं क्षेत्रस्य पंचदंडा``मग्रतोधि`` मुखाकारो मेंढकप्राकार एव``यो योधानां युद्धसौक (क) र्यिय द्वाररक्षातिशयार्थं च । प्रायोविवीताभिमुखं गवामेतत् द्वारमिति गोपुरं``टकयोः श्रृंगाटकाकारेण वि`` तयोर्गोधामुखाकारं भवति तत् कारयेत् शेषं प्रतोलीसमानम् । पुष्करिणीद्वारमाह—

श्रीमूला

पुरद्वारं, कारयेत् । प्राकारमध्य इति । प्राकारमध्ये वापीं कृत्वा पुष्करिणीद्वारं वापी-योगवशेन पुष्करिण्याख्यं द्वारं कारयेत् । अध्यर्धान्तराणिकम् अन्तरम् अणिश्च पूर्वोक्ता-दध्यर्धाधिकं यस्य तत् तथाभूतं, चतुश्शालं शालाचतुष्टयं, कृत्वा, कुमारीपुरं कुमारी-पुराख्यं द्वारं कारयेद्, अर्थाद् यथोक्तचतुश्शालयुक्तं द्वारमेव कुमारीपुरसंज्ञं बोद्धव्यम् । द्वितलं द्विभूमं, मुण्डहर्म्यं निश्शृङ्गं हर्म्यं, वृत्तमालिकामित्यन्ये, कृत्वा, मुण्डकद्वारं मुण्डहर्म्ययोगान्मुण्डकाख्यं द्वारं, कारयेत् । भूमिद्रव्यवशेन वा भूमिद्रव्यसम्पदनुरोधेन वा कारयेद्, अर्थाद् यथोक्तमेकैकं द्वारम् ।

चाणक्यटीका

प्राग्द्वारमध्य इति मेण्डकाल`````दप्रकाराणां मध्ये वापीं कृत्वा वापीसंस्थानेन पञ्चदण्डान् समन्ततोऽतिरिक्तानवकल्प्य पुष्करिणीसंज्ञकं कारयेत् । अन्यत् प्रतोल्या तुल्यम् । अत्र प्रथमकवाटयुगरक्षार्थं प्रथमतलादङ्गता निष्कासनीया, आणिद्वारञ्च अग्राह्ये देश इत्यध्याहार्यम् । चतुश्शालमिति । चतस्रः शाला दण्डमात्रविस्तीर्णाः समन्ततः परिकल्प्य यत``````ष्टं त्रिदण्डायतं विस्तीर्णमन्तरालं तस्याध्यर्थं भागमुभयत एकतो वा पादास्तृतं कृत्वा ततोऽध्यर्धं द्वाररक्षार्थं वृत्तं कुर्यात् । अध्यर्धमिति वाप्या एव द्रष्टव्यम् । आभ्यन्तरबाह्ययोः शालयोरुभतो दण्डमात्रौ पक्षौ कृत्वा ततोऽध्यर्धभागं त्रिदण्डायाममात्रं विवृतं कुर्यात् । केचित् साम्निकमिति समन्ततः ताण्डमाच्छिकर्याणि-विदित्यन्ये पठन्ति (?) । तेषामेष एवार्थः आणिद्वारवदिति तुल्यं व्याख्येयम् । सर्वत्रास्य भावात् आणिकमित्यपात् एवार्थभावात् (?) आलोकनच्छिद्रसाद्दश्याच्चैतत् । कुमारीसंज्ञकं द्वारमेकतलमिति मुण्डहर्म्यं द्वितलमिति उत्तमागाराभावान्मुण्डकेन शुद्धेन हर्म्येणैव सह द्वितलप्रतोलीद्वारकल्पं तं मुण्डकद्वारं पञ्चद्वारवितानानि यथेष्टं कार्याणि । अथवा भूमेः समत्वविषमत्वविस्तीर्णानि द्रव्याणि चोपकरणादीनि महान्ति ह्रस्वानि यथोक्तं विधिं कल्पयेत् ।

[कुल्यापरिकल्पनं, कुल्यासु निवेशनीयानां भाण्डानां सङ्ग्रहश्च]

त्रिभागाधिकायामाः भाण्डवाहिनीः कुल्याः कारयेत् ।

नीति-निर्णीतिटीका

प्राकारमध्य इति । प्रकारयोर्मेढकयोर्मध्ये यच्छुपिरं तत्सम˙˙ फलकास्तारो भूमिकबंधो˙˙˙युद्धसौक (क) र्यार्थमनेनैव विशेषेण प्रतोल्येव पुष्करणीद्वारमित्युच्यते । चतुरस्रा वापीत्युच्यते˙˙˙चतुरस्रा तु˙˙˙णीत्येकाऽर्थः ।
कुमारीपुरमाह चतुःशालमिति । चतस्रश्चतुर्दिशं शाला एव कार्याः । न सीमागृहव्यपदेशः । प्रतोल्यपेक्षया अन्तरमर्द्धेनाधिकं वापीस्थाने विधेयम्, प्रतिमंचक˙˙˙पनीय तत्क्षेत्रमपि वापीमध्ये प्रक्षिप्यैवमर्द्धेनाधिकमन्तर भवति । तच्च साणिकं आणियुक्तं तुलाफलकांतरे छिद्रयुक्तं युद्धसौकर्यार्थं कुमारीपुरमिव सर्वतः कुट्यमुक्त˙˙˙नं शेषप्रतोलीसमानमिति ।

मुण्डकद्वारमाह मुण्डहर्म्यमिति । मुण्डेनोत्तमागाराभावात् । हर्म्यद्वितलेन युक्तं प्रतोलीद्वारमिव मुण्डकद्वारम् । यथा˙˙˙रहितो मुण्ड इत्युच्यते । तथा द्वारमप्युत्तरागाररहितमिति ।
पञ्चद्वारभेदानभिधाय सर्वापवादमाह भूमिद्रव्येति ।

भूमेः समत्वं विषमत्वं च˙˙˙निम्नता च दुर्गा भूमिस्तदैकयैव परिखया पर्याप्तमथ समा तदा पंच सप्त वा परिखाः कारयेदिति मानवाः । यदि द्रव्यं काष्ठहिरण्याद्यधिकं तदा उक्तादधिका अपि विशेषात् । न्यूने द्रव्ये न्यूना इति । निवेशयेद्दुर्गमिति वाक्यशेषः ॥

श्रीमूला

त्रिभागेत्यादि । त्रिभागाधिकायामाः त्रिभागाधिकः स्वविस्तारमानापेक्षया तृतीयांशाभ्यधिकमानः आयामो दैर्घ्यं यासां तास्तथाभूताः, भाण्डवाहिनीः कर्मोपकरणगतागतव्यवहारार्थाः कुल्याः कारयेत् ।

चाणक्यटीका

त्रिभागावधिकायामाइति । परिकल्पिताद्विस्तारादष्टहस्तविस्तारत्वं द्वादशहस्तायताः । साङ्ग्रामिकभाण्डवाहिनीः कुल्या[1] नुपपरिका (?) अपवरकान् अर्थात् प्राकारस्याऽभ्यन्तरेऽनुप्राकारं कारयेत् ॥

नीति-निर्णीतिटीका

प्राकाराद्यारूढयोधरणोपकरणस्थानार्थं˙˙˙त्रिभागेति । यदि दशहस्तो विष्कंभस्तदा पंचदशहस्त आयाम इत्यादि । भाण्डं रणोपकरणं तद्वहंति चाविच्छिन्नतया निर्व्यूढेऽन्यदाधेयमि [ति]˙˙˙˙˙˙˙कुल्यासु जलमविच्छिन्नं तथात्र भाण्डमिति । कुल्याव्यपदेशो भाण्डशालानाम्, ताश्चानुप्राकारमन्तः कारयेत् ।

---

१. कौटलीयस्य केरल भाषाटीका कुल्यशब्दस्य कोष्ठकार्थंतत्रमाह ।

तासु पाषाणकुद्दालकुठारीकाण्डकल्पनाः ।
मुसृण्ठिमुद्गरा[1] दण्डचक्रयन्त्रशतघ्नयः ॥५५॥
कार्याः कार्मारिकाः शूलवेधनाग्राश्च वेणवः ।
उष्ट्रग्रीव्योऽग्निसंयोगाः कुप्यकल्पे च यो विधिः ॥५६॥

इति कौटिलीयेऽर्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे तृतीयोऽध्यायः ।
दुर्गविधानम्, आदितश्चतुर्विंशः ॥

श्रीमूला

कुल्यासु निवेशनीयानि भाण्डानि श्लोकद्वयेनाह—तास्वित्यादि, कार्या इत्यादि च । काण्डो, वाणः, कल्पना गजोपकरणं, मृसृण्ठिर्गदा, सायः—कीला दारुमयी, मुद्गरः दीर्घगदाकारं स्थूलाग्रमायुधं, दण्डः क्षेपाणीयो लगुडविशेषः, चक्रं सारवृतमायुधं, यन्त्रं जामदग्न्यभैमादि, शतघ्निः लोहकण्टकाचितं चतुस्तालप्रमाणमायुधम् । कार्मारिकाः कर्मारोऽयस्कारः तच्छिल्पसाध्याः तोमरादयः, उष्ट्रग्रीव्यः ऊष्ट्रग्रीवाकाराः शस्त्र्यः, अग्निसंयोगाः अग्निः संयुज्यते विपक्षदाहार्थमेष्वित्यग्निसंयोगाः गुल्गुलुमदनसर्जरसश्रीवेष्टगन्धपाषाणादयः कुप्यकल्पे च यो विधिः कुप्याध्यक्षप्रकरणे यो विधीयते स च, तासु कुल्यासु कार्यः । स तु शाकतिनिशादिदारुवर्गः उटजचिमियादिवेणुवर्गः गोधासेरकद्वीपिप्रभृतिचर्मवसादिश्चेतिवोद्धव्यम् । स्पष्टमन्यत् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
तृतीयोऽध्यायः दुर्गविधानम्, आदितश्चतुर्विंशः ॥

चाणक्यटीका

भाण्डानि कथयति तास्विति । (पाषाण इति) यन्त्रगोष्पणाः पाणिक्षेप्याः । कुद्दाला इति खननदारणार्थानामुपसंग्रहः । कुठारीति वास्यादीनां दारुच्छेदनोपकरणानाम् । काण्डकल्पना इति काण्डसंस्कारोपकरणानाम्[2] । मुसृण्ठीति कीलबहुलो वर्तुलः काष्ठविशेषः । गदाप्रकाराणां मुद्गरा इति सञ्चूर्णानां (?) गदानाम् । दण्डा इति क्षेप्याणां दारुमयानां मुक्तसाधितानाम् । चक्राणि आयुधानि । यन्त्राणि पाषाणादिक्षेपणोपकरणानि । शतघ्नयः कीलसहस्राचिताः स्थूलपरिघाः युगपद् बहूनामपि घातनार्थाः ॥

---

१. भुसुंढी, भुसुण्डी, पा० ।
२. ''भुसुण्ठी स्यात् दारुमयी वृत्तायःकीलसञ्चिता'' इति वैजयन्ति । (५४५ अ.)

चाणक्यटीका

कार्याः तस्विति संबध्यते। कार्मारिकाः कर्मारनिर्मिताः। शूलाः वेधनाग्राः तीक्ष्णत्वाद् दीर्घवेणवः। उष्ट्रग्रीवी उष्ट्रग्रीवाकारा दात्राकृत्या कचग्रहण्येव। अग्नि-संयोगाः दुर्गलाभे वक्ष्यमाणसर (ल) देवदार्वादिः। कुप्याध्यक्षे च सारदारुलोहदिसङ्ग्रहे यो विधिः सोऽत्राप्यापदि कार्यः ॥

इति भिक्षुप्रभमतिकृतायां चाणक्यटीकाकायाम् आध्यक्ष्ये दुर्गविधानं तृतीय प्रकरणम् ॥ तृतीयश्चाध्यायः ॥

नीति-निर्णीतिटीका

यद्वहन्ति तास्तदिदानीं भाण्डमाह तास्विति।

तासु कुल्यासु पाषाणा हस्तयन्त्रादिक्षेप··ला: खननयुद्धार्थाः, कुठार्यश्छेदन-युद्धार्थाः, कांडकल्पनाः शरसंस्कारोपकारणानि। मुषंढ्योः गदादि··। मुद्गरा रजकमुद्गराकाराः प्रहरणविशेषाः। दंडा लोहदारुमयाः। [चक्रा] णि हस्तयंत्र-क्षेप्याणि। यन्त्राणि जामदग्न्यसर्वतोभद्रवहुमुखादीनि। वाणपाषाणादि··चिताशतं हन्तीति·····कर्म्मारिका इत्ययस्कारघटिताः, शूलावेधनानाश्चक्राख्याः, वेणव उष्ट्रग्रीवाकार··दुर्गलंभे··णैर्यन्त्रैस्तैलादिकानि यैः क्षिप्यंते। कुप्यकल्पे च कुप्यानां कल्पना··

इति मुग्धविलासाङ्कयोग्घमविरचितनीतिनिर्णीत्यभिधानायां कौटलीय-राजसिद्धान्तटीकायामध्यक्षप्रचारे तृतीयोऽध्यायः ॥

द्वाविंशं प्रकरणम्

चतुर्थोऽध्यायः

दुर्गनिवेशः ।

[वास्तुविभागक्रमारम्भः]

त्रयः प्राचीना राजमार्गाः, त्रय उदीचीनाः इति वास्तुविभागः । सः द्वादशद्वारः युक्तोदकभूमिच्छन्नपथः ॥

श्रीमूला

दुर्गनिवेश इति सूत्रम् । दुर्गं परिखावप्रप्राकाराट्टालप्रतोलीन्द्रकोशदेवपथादिकं यथोक्तम् । तस्मिन् निवेशः राजमार्गादिविभजनपूर्वं योग्यदेशरचनीयं राजामात्यादि-दुर्गान्तर्निवासिप्रकृतिभवनसंस्थानं तदिहोच्यत इति सूत्रार्थः ।

चाणक्यटीका

एवंविधदुर्गस्य निवेशनमभिधीयते । वास्तुविभागपूर्वकत्वादितरेषामिति तमेव तावदाह त्रयः प्राचीना इति । पश्चिमाद् देशात् पूर्वं गतास्त्रयः, दक्षिणादुत्तरं त्रय इति । मङ्गलार्थं पश्चिमदक्षिणमुखत्वं नोक्तम् । राज······त्रा किमेभिर्विभक्तं यत्तद्वास्तु । किञ्चातः, षोडशवास्तुविभागाः स्युः । एवं तर्हि वास्तुविद्याकल्पनेनैवावगतं वास्तु प्रागवस्थाप्य तन्मध्ये त्रिभी राजमार्गैर्विभजेत् । वास्तुनो विभजनं विभागः, स राजमार्गकृतो वास्तुविभागः । द्वादशद्वार इति । न प्रतिराजमार्गं द्वाराणि, किन्तु महाद्वाराण्येव राजमार्गद्वाराणि । इतराणि च यथोक्तचत्वारि निष्करद्वाराणि चत्वारि महाद्वारैकदेशभूतानि चाणिद्वाराणि चेति । बाह्यमुदकं येन यन्त्रेण स्रोतसा वा प्रवेश्यते स उदकपथः । नगरोदकं येन निष्कास्यते स भ्रमपथः । आपदि निष्कासनप्रवेशनार्थः सुरुङ्गादिः प्रच्छन्नत्वाच्छन्नपथः एते प्रयुक्तप्रमाणा यस्य वास्तुविभागस्य । उदकभ्रम-पथयोर्महत्त्वे चोदि(ञ्नति)प्रवेशादल्पत्वे शोच्छ(पितु)मशक्यत्वात् (?) छन्नपथस्याति-महत्वेऽदृढत्वाद् अत्यल्पत्वेऽवस्थानाभावादिति ।

नीति-निर्णीतिटीका

······विधीयत इति सूत्रार्थः । सम्बन्धस्तु विहितमपि दुर्गमनिविष्टमनुपयोग·· नामा कश्चिद्देवविशेष इति प्रतिकूलत्वात् सर्वैर्देवैर्विजित्योत्तानः पातितस्तस्य···दग्रे ब्रह्मा स्थितः । देवो··दङ्गमवष्टभ्य स्थितः । स तत्रस्थः पूज्यते । तस्यमर्मसिरावंसादि परित्यज्य निवेशः क्रियमाणः प्रशान्तो भवतीति । वास्तुविभागः कर्तव्य इति शेषः ।

[वीथीविभागाः तत्परिमाणविशेषाश्च]

चतुर्दण्डान्तराः रथ्याः, राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः,

---

नीति-निर्णीतिटीका

त्रयः प्राचीना राजमार्गा···वीथिमुखमञ्चतीति। त्रय उदीचीना उदङ्मुखाः प्रागुदग्ग्रहणं मङ्गल्यार्थम्। ते चैकाशीतिपदे नवनवकविभक्ते वास्तुनि द्रष्टव्याः। वास्तुहृदयादुत्तरे नवभागे यथोक्त··पुरविधानमिति वचनसामर्थ्यात्। नह्येकाशीति पदं विहाय नवभागसम्भवः। तथा चोक्तम्—

"दश पूर्वायता वंशा दश चैवोत्तरायताः।
नवभाग कृता ज्ञेयाः पदानां नव··॥"

दश पूर्वामुखान्यनुवंशे सूत्राणि प्रसार्य दशै वोदङ्मुखानीति। चतुरस्रपादानां नवनवका भवन्ति। नवके नवके मध्यमे पदे मर्मत्रिमर्मोर्द्ध्वगामिनः·····[रा] जमार्गास्तथैव त्रय उदीचीनास्ते च महामर्मरूपा वंशाः। तथा चोक्तम्—

वंशमेकहृदयं नवमर्म्म चतुः शिरम्।
उत्तानसंस्थितं विद्धि पुरुषं वास्तुक··॥

इतोऽग्रे पाठो नोपलभ्यते।

श्रीमूला

राजमार्गाः प्राक्प्रत्यगायतास्त्रयो दक्षिणोत्तरायतास्त्रय इत्येवं षोढा वास्तुर्विभक्तव्य इत्याह—त्रयइत्यादि। स इति। स वास्तुविभागः, द्वादशद्वारः दिशि दिशि द्वारत्रिकक्रमेण द्वादशभिर्द्वारैर्युक्तः, युक्तोदकभूमिच्छन्नपथः उदकं वापीकूपादि भूमिर्जलनिर्गममार्गः छन्नपथः गूढसुरुङ्गामार्गः ते युक्ता वास्तुविस्तारानुरूपा यस्मिन् स तथाभूतः, कार्यः इति शेषः।

चतुरित्यादि। रथ्या अल्पमार्गाः उपवीथ्य इत्यर्थः, चतुर्दण्डान्तराः, चतुर्दण्डविस्ताराः। राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः, राजमार्गो द्रोणमुखपथः स्था-

चाणक्यटीका

तस्मिन् बहिश्च राजमार्गविशेषेषु राजमार्गाः विशेषेणोच्यन्ते—चतुर्दण्डोत्तरा इति। चतुर्भिश्चतुर्दण्डैरधिका इत्यर्थः। तत्र रथ्या चतुर्दण्डा। अष्टदण्डा राजदण्डा राजमार्गद्रोणमुखादीन् गन्तुं पन्थाः नट (?) द्रोणमुखादिपथः। संयानीयपथ इति समेत्य यानाय हितत्वात् संयानीयपथः। देवयात्रोत्सवादिसंवरणयोग्यः, रचितसेनादर्शनार्थः व्यूहपथः। येन पथा हस्त्यश्वादयो (यो ? यु) ग्याः कार्यन्त इति केचित्। पशुपथ इति पशूनां गोमहिषोष्ट्रादीनां पन्थाः। क्षुद्रपशवः अजाविकादयः। वास्तुमार्गा उक्ताः॥

संयानीयव्यूहश्मशानग्रामपथाश्चाष्टदण्डाः, चतुर्दण्डस्सेतुवनपथः, द्विदण्डो हस्तिक्षेत्रपथः, पञ्चारत्नयो रथपथः चत्वारः पशुपथः, द्वौ क्षुद्रपशुमनुष्यपथः ॥

[राजभवनपरिकल्पनं, तस्य च नवधा विभागेन उत्तरभागमारभ्य क्रमेण अन्तःपुरादिकल्पनं च]

प्रवीरे वास्तुनि राजनिवेशः चातुर्वर्ण्यसमाजीवे, वास्तुहृदयादुत्तरे नवभागे [1]यथोक्तविधानमन्तःपुरं प्राङ्मुख मुदङ्मुखं वा कारयेत् । तस्य

श्रीमूला

नोयपथः राष्ट्रपथः विवीतपथ इत्येते, संयानीयव्यूहश्मशानग्रामपथाश्च संयानीयं क्रयविक्रयव्यवहारप्रधानं पट्टनं तत्पथः, व्यूहपथः शत्रुपरिवेष्टनावसरे प्राकारेषु समन्तात् सद्यो गन्तुमुपकल्पितः सैन्यस्य मार्गः, श्मशानपथः ग्रामपथ इत्येते च, अष्टदण्डाः कार्याः । सेतुवनपथः सेतुपथो वनपथश्च, चतुर्दण्डः । हस्तिक्षेत्रपथः हस्तिपथः क्षेत्रपथश्च, द्विदण्डः । रथपथः पञ्चारत्नयः निष्कनिष्ठमुष्टिकहस्तपञ्चकविस्तार इत्यर्थः, पशुपथः गोमहिषादिमार्गः, चत्वारोऽरत्नयः अरत्निचतुष्टयप्रमाणः, क्षुद्रपशुमनुष्यपथः मेषादिक्षुद्रपशुमार्गः मनुष्यमार्गश्च, द्वौ अरत्नी ।

प्रवीर इति । प्रवीरे प्रकर्षेण वीर्ययुक्ते, चातुर्वर्ण्यसमाजीवे वर्णचतुष्टयोपजीव्यगुणसम्पन्ने, वास्तुनि, राजनिवेशः राजभवनं कार्यम् । वास्त्वित्यादि एकाशीतिपदात्मकस्य वास्तुनो मध्यमो नवभागो वास्तुहृदयं, वास्तुहृदयाद् उत्तरे नवभागे, यथोक्तविधानं निशान्तप्रणिधिप्रतिपादितप्रकारम् अन्तःपुरं, प्राङ्मुखम् उदङ्मुखं वा कारयेत् ।

चाणक्यटीका

इदानीं निवेशा उच्यन्ते । तत्रापि राजनिवेशपूर्वकत्वादितरेषामिति तमेवाह—प्रवीर इति । वास्तुप्रशस्तत्वेऽपि दुर्गस्य, प्रवीरे वास्तुन्यप्रधृष्ये मध्ये राजनिवेशः । कस्मात् । चातुर्वर्ण्यस्य समाजीवना (दा) श्रयत्वात् । तस्मिन् गुप्ते चातुर्वर्ण्यं गुप्तमिति । अथवा मध्यगतः सुखं चातुर्वर्ण्येन वक्ष्यमाणचतुर्दिशनिवेशेन सेव्यते, एकपार्श्वे तु केषाञ्चित् दूरमिति न तु सुखं सेव्यते । कः पुनः प्रवीरो देश इत्याह—वास्तुहृदयादिति ।

"दश पूर्वायता वंशा दश चैवोत्तरायताः ।
तैर्ज्ञेया मध्यसंस्थानं पदानां नवकं नव ॥" इति ।

तत्र मध्यमस्य नवकस्य हृदयादुत्तरे नवभागे । अन्यथा हृदयपिहितो वास्तुपुरुषो न निवेशं वर्धयति स्वयमभावात् । यथोक्तम्—

"त्रीणि त्रिकाणि यस्माद्धि हृदयं तस्य मध्यमम् ।
तन्मुक्त्वाति (? वि) पदः स्थानमुत्तरेणाभिपूज्यते ।" इति ।

१. यथोक्तं पा० ।

पूर्वोत्तरं भागमाचार्यपुरोहितेज्यातोयस्थानं मन्त्रिणश्चावसेयुः। पूर्वदक्षिणं भागं महानसं हस्तिशाला कोष्ठागारं च। ततः परं गन्धमाल्यधान्यरसपण्याः प्रधानकारवः क्षत्रियाश्च पूर्वां दिशमधिवसेयुः। दक्षिणपूर्वं भागं भाण्डागारमक्षपटलं कर्मनिषद्याश्च। दक्षिणपश्चिमं भागं कुप्यगृहमायुधागारं च। ततः परं नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः पक्वान्नसुरामांस-

---

श्रीमूला

तस्येति। आचार्यपुरोहितेज्यातोयस्थानम् आचार्यपुरोहितयोर्यज्ञस्थानं तोयस्थानं च, मन्त्रिणश्च, तस्य अन्तःपुरस्य पूर्वोत्तरं भागमावसेयुः पूर्वोत्तरे भागे स्थितिं कुर्युरित्यर्थः। महानसं पाकशाला, हस्तिशाला हस्तिपृष्ठाकारं सभागृहम्, कोष्ठागारं च च अन्तर्गृहमपवरकाख्यं च, पूर्वदक्षिणं भागम्, आवसेयुरिति सम्बध्यते आश्रयेयुरिति च तदर्थः। तत इति। ततः परं राजभवनाद् बहिः, गन्धमाल्यधान्यरसपण्याः गन्धपण्याः माल्यपण्याः धान्यपण्याः रसपण्याश्च, प्रधानकारवः मुख्यशिल्पिनः, क्षत्रियाश्च, पूर्वां दिशमधिवसेयुः। भाण्डागारम्, अक्षपटलं रूप्याद्यायव्ययगणनस्थानम्, कर्मनिषद्याश्च स्वर्णरजतशिल्पस्थानानि च, दक्षिणपूर्वं भागम्, अधिवसेयुः आश्रयेयुः। कुप्यगृहं स्वर्णरजतेतरस्थानम्, आयुधागारं च दक्षिणपश्चिमं भागम् आश्रयेत्। ततः परमिति। ततः परम्, नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः नगरव्यावहारिकः,

चाणक्यटीका

यथोक्तमिति। निशान्तप्रणिधौ "सप्राकारपरिखाद्वारम्" (अधिः १. अ० २०) इत्यादिना विहितम्। प्राङ्मुखमुदङ्मुखं वा स्यादिति। इदं मङ्गलार्थम्। तस्येति। किं वास्तुहृदयस्य? यद्येवं, वास्तुहृदयमिति प्राप्नोति। एवं तर्हि तस्य दुर्गस्य वास्तुहृदयापेक्षया पूर्वोत्तरं भागमिति "दिङ्नामान्यन्तराले" (२-२-२६) इति सामान्येन द्विधा विभक्तत्वादन्तरालानामित्यष्टौ विदिशो भवन्ति। पूर्वोत्तरः, पूर्वदक्षिणः, दक्षिणपूर्वः, दक्षिणपश्चिमः, पश्चिमदक्षिणः, पश्चिमोत्तरः, उत्तरपश्चिमः, उत्तरदक्षिणः इति। तत्र पूर्वविशिष्टः उत्तरपूर्वस्यां दिशि उत्तरो भागस्तमाचार्यादयः अधिवसेयुः। इज्यातोययोः स्थानम् अग्निहोत्ररूपा·····यंथायोगं स्यादिति। अर्थाद्विभक्तिविपरिणामः। तद्यथा—"देवदत्तस्य गावोऽश्वा हिरण्यमाढ्यो वैधवेय" इति। पूर्वविशिष्टं दक्षिणमिति पूर्ववद्योजनीयम्। महानसादि अधिवसेयुः। तात्स्थ्यादित्युच्यते अभ्युपचारात्। ततः परमिति। ताभ्यां भागाभ्यामवशिष्टं पूर्वभागमित्यर्थः। गन्धादिपण्याः गन्धादिविक्रेतारः। प्रसाधनकारवः अञ्जनिकशलाकामधूच्छिष्टलाक्षापटलकेशनिका (?) प्रधानाः कर्त्तारः। क्षत्रियाणां पराक्रमोत्कर्षहेतुत्कत्वात् ऐन्द्र्या दिशः। भाण्डागारम् आयस्थानम्। कर्मनिषद्या कर्माणि निषीदन्त्यस्यामिति निषदनं निषद्या, तद्व्यवहारिणामधिवासाः अधिवसेयुरित्युपचारः पूर्ववत्। नगरधान्यव्यावहारिका नगरस्थेन

पण्याः रूपाजीवाः तालावचराः वैश्याश्च दक्षिणां दिशमधिवसेयुः। पश्चिमदक्षिणं भागं खरोष्ट्रगुप्तिस्थानं कर्मगृहं च। पश्चिमोत्तरं भागं यानरथशालाः। ततः परं ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः शूद्राश्च पश्चिमां दिशमधिवसेयुः। उत्तरपश्चिमं भागं पण्यभैषज्यगृहम्। उत्तरपूर्वं भागं कोशः गवाश्वं च ततः परं नगरराजदेवताः लोहमणिकारवः ब्राह्मणाश्चोत्तरां दिशमधिवसेयुः। वास्तुच्छिद्रानुलासेषु[1] श्रेणीप्रवहणिकनिकायाः आवसेयुः॥

———

श्रीमूला

धान्यव्यावहारिकः, कार्मान्तिकः आकरादिकर्मान्ताधिकृतः, बलाध्यक्षः सेनाध्यक्षः इत्येते, पक्वान्नसुरामांसपण्याः पक्वान्नादिविक्रेतारः, रूपाजीवा वेश्याः, तालावचरा नटाः, वैश्याश्च, दक्षिणां दिशम् अधिवसेयुः। खरोष्ट्रगुप्तिस्थानं गर्दभकमेलककारागृहाणि, कर्मगृहं च यत्र गृहादिकं निर्मीयते च ध्वंस्यते च परीक्षाद्यर्थं तत् स्थलं च, अथवा खरोष्ट्रादिव्यापारशाला च, पश्चिमदक्षिणं भागम्, आश्रयेत्। यानरथशालाः शिविकादियानशालाः रथशालाश्च, पश्चिमोत्तरं भागम्, आश्रयेयुः। ततः परमिति। ततः परं ततः परस्तात् पश्चिमां दिशम्, ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः ऊर्णा वानकारवः कार्पासतन्तुवानकारवः वेणुवानकारवः चर्मकारवो वर्मकारवः शस्त्रावरणकारव इत्येते, शुद्राश्च, अधिवसेयुः। पण्यभैषज्यगृहं पण्यगृहम् औषधशाला च, उत्तरपश्चिमं भागम्, अधिवसेत्। कोशः धान्यादिसङ्ग्रहस्थानं, गवाश्वञ्च गावोऽश्वाश्च, उत्तरपूर्वं भागम् अधिवसेत्। तत इति। ततः परं, नगरराजदेवताः नगरदेवता, राजकुलदेवताश्च, लोहमणिकारवः अयस्कारवैकटिकाः, ब्राह्मणाश्च, उत्तरां दिशमधिवसेयुः। वास्त्वित्यादि। श्रेणीप्रवहणिकनिकायाः श्रेणी रजकतन्तुवायतुन्नवायादयः, प्रवहणिकाः विदेशागता वणिजः तेषां समूहाः, वास्तुच्छिद्रानुलासेषु वास्तुच्छिद्रावकाशेषु आवसेयुः। वसेयुरिति श्रेयान् पाठः।

चाणक्यटीका

धान्येन ये क्रयविक्रयादि कुर्वन्ति। कर्मान्तिको राज्ञः। बलाध्यक्षः पत्तिसेनापतिः, कानि (?) पक्वान्नं पिष्टकादि। रूपाजीवाः पण्यस्त्रियः। तालावचराः तालैरातोद्यैरवचरन्ति। ये रङ्गोपजीविनो नटादयः। गान्धर्वा इत्यन्ये। वैश्यानां दाक्ष्यस्य संपादनहेतुत्वादस्या दिशः। गुप्तिस्थानम् बन्धनागारं कारागृहं यातनास्थानमत्राधिवसेयुरिति। तस्मात् (?) पूर्ववदुपचारः। यानशाला शिविकादीनां स्थानम्। रथशाला रथानां स्थापनकारणशाला। ऊर्णाकारवो देवताः (?)। सूत्रकारवस्तन्तुवायाः।

———

१. वास्तुछिद्रानूसालेषु पा०।

[परमध्ये वहिश्च तत्तद्देवालयनिर्माणविधिः]

अपराजिताऽप्रतिहतजयन्तवैजयन्तकोष्ठकान् शिववैश्रवणाश्विश्रीमदिरागृहं च पुरमध्ये कारयेत्। कोष्ठकालयेषु यथोद्देशं वास्तुदेवताः स्थापयेत्। ब्राह्मैन्द्रयाम्यसैनापत्यानि द्वाराणि। बहिः परिखायाः धनुश्शतावकृष्टाः

चाणक्यटीका

वेणुकाररवो वरटाः[1] वर्मकारवः सन्नहनघटकाः। शस्त्रकारवस्तीरपाकाः। आवरणकारवो हस्त (? स्ति) वारकादिकारवः अवक्रत्वाच्छिद्रादिवसनयोग्याः (?, पश्चिमा दिक्। भैषज्यगृहम् आरोग्यशाला, शृङ्गिवेरादिभैषज्यानां गृहमित्यन्ये। नगरदेवता या तत्राधिकृता। राजदेवता, यत्र राज्ञो भक्तिः। लोहकारवः सुवर्णताम्रलोहादिकारवः। मणिकारवो मणिरञ्जकाः। ब्राह्मणानां प्रशस्तत्वदधिवासयोग्या। वास्तुच्छिद्रानुसालेष्विति। वास्तुच्छिद्रेषु यथोक्तैरप्या (प्रा ?) प्तेषु प्राकारसमीपेषु च देशेषु रजकादिश्रेणीनां प्रवणीनां च क्षुद्रवणिजां गान्धारकादीनां निकायाः समूहाः। अन्ये त्वाहुः—श्रेणयो ये समयवद्धा द्रमिडवत्। प्रवहणयो ये वाणिजकाः सङ्घावस्थिताः। निकायाश्च ये क्षुल्लकास्ताम्बूलिकादय इति।

श्रीमूला

अपराजितेत्यादि। अपराजिताऽप्रतिहतजयन्तवैजयन्तकोष्ठकान् अपराजिता दुर्गा, अप्रतिहतो विष्णुः, जयन्तः सुब्रह्मण्यः, वैजयन्त इन्द्रः, एतेषामालयान्, शिववैश्रवणाश्विश्रीमदिरागृहं च शिवादीनां मदिरान्तानां पञ्चानां गृहं च, पुरमध्ये कारयेत्। कोष्ठकेत्यादि। कोष्ठकालयेषु पूर्वोक्तेषु, यथोद्देशं स्वस्वदेशानतिक्रमेण, वास्तुदेवताः स्थापयेत्। ब्राह्मेत्यादि। ब्राह्मैन्द्रयाम्यसैनापत्यानि ब्राह्मं ब्रह्मदेवताकमुत्तरम्, ऐन्द्रं पूर्वं, याम्यं दक्षिणं, सेनापत्यं पश्चिममित्येतानि, द्वाराणि, अर्थात् पुरस्य। वहिरिति। परिखाया बहिः, धनुश्शतावकृष्टाः दण्डशतविप्रकृष्टाः, चैत्यपुण्यस्थानवनसेतुवन्धाः चैत्य

चाणक्यटीका

अपराजितो विष्णुः। अप्रतिहत इन्द्रः। जयन्त इन्द्रपुत्रः। वैजयन्तः स्कन्दः। एषां कोष्ठकान् इष्टकामयान्। पुरमध्ये पुरान्ते वा कारयेत्। वैश्रवणो धनदः। अश्विनीकुमारौ। श्रीदेवी मदिरादेवी च। आसां गृहं कोष्ठकम्। पुरमध्य एवेति नियमार्थो योगविभागः। (यथो) पदोद्देशमिति वास्तुविद्याविहितत्वात् द्वात्रिंशत् प्रतिदिशम् अष्टावष्टौ वास्तुदेवताः विना विग्रहैः पूजार्थमेव सङ्कल्पेन स्थापयेत्। प्राच्यादीनि तद्देवतात्वाद् उत्तरादीनि महाद्वाराणि स्थापयेत् तदधिष्ठितानीत्यर्थात्।

वहिः परिखाया इति वाह्यायाः। धनुश्शतेनेव अपकृष्टमिति क्रिया-

---

१. "वरटः......मर्त्यजात्यन्तरे व्रात्याज्जाते" इति केशवस्वामो।

चैत्यपुण्यस्थानवनसेतुबन्धाः कार्याः, यथादिशं[1] च दिग्देवताः ॥

[व्यवस्थया श्मशानपरिकल्पनम्, पाषण्डादीनां तत्समीपवासित्वं च]

उत्तरः पूर्वो वा श्मशानवाटः, दक्षिणेन वर्णोत्तमानाम्। तस्यातिक्रमे पूर्वस्साहसदण्डः। पाषण्डचण्डालानां श्मशानान्ते वासः ॥

[कर्षकादिशक्त्यानुगुण्येन क्षेत्रादिसारानुगुण्येन च तत्तदुपयोक्तव्यक्षेत्रमर्यादा-स्थापनविधिः, तत्र सङ्ग्राह्याः पदार्थाश्च]

कर्मान्तक्षेत्रवशेन वा कुटुम्बिनां सीमानं स्थापयेत्। तेषु पुष्पफलवाटपण्डकेदारान् धान्यपण्यनिचयांश्च अनुज्ञाताः कुर्युः, दशकुलीवाटं कूपस्थानम्।

श्रीमूला

उद्देशवृक्षः, पुण्यस्थानं तीर्थादिकं, वनं सेतुबन्ध इत्येते, कार्याः। दिग्देवताश्च, यथदिशं स्वस्वदिगनुरोधेन कार्याः।

उत्तर इत्यादि। वर्णोत्तमानां शूद्राणाम्। वर्णोत्तराणामित्यपि पाठः। पूर्वः साहसदण्डः सार्धद्विशतपणलक्षणः।

पाषण्डेत्यादि। पाषण्डचण्डालानां कापालिकादीनां प्लवपुल्कसादीनाञ्च। कर्मान्तेत्यादि। कुटुम्बिनां दुर्गान्तिवासयितव्यानां वर्णावराणां, कर्मान्तक्षेत्रवशेन कर्म-निवृत्तेः क्षेत्रस्य चानुरूप्येण, सीमानं तदुपयोक्तव्यक्षेत्रमर्यादां, स्थापयेत्। वाशब्दश्च-स्थाने वावयभूषणम्। तेष्विति। तेषु क्षेत्रेषु पुष्पफलवाटपण्डकेदारान् पुष्पफलवाटः पुष्पफलदायकं वनं, पण्डः पद्मादिसङ्घातः, केदारो धान्योत्पादभूमिः एतान् धान्यपण्य-निचयांश्च धान्यपण्यसङ्ग्रहांश्च अनुज्ञाताः कुर्युः, अर्थात् तत्कर्मार्हाः। ते च सीताध्यक्षो विवीताध्यक्षो दुर्गसीमवासिनः कुटुम्बिनश्च। दशकुलीत्यादि। दशकुलीवाटं मध्यमहल-द्वयकर्षणीया भूमिः कुलं, दशानां कुलानां समाहारो दशकुली। दशगवकृष्या भूमि-रित्यपरे। तावत्प्रमाणं वाटं, कूपस्थानं कूपमातृकं, कुर्युः एकैकस्य दशकुलीवाटस्यैकैकं

चाणक्यटीका

विशेषणम्। अतो विप्रकर्षे दुरारक्ष्यत्वात् सन्निकर्षेऽतिसंपीडा। चैत्यस्थानं स्तूपस्थान-मित्यपरे। पुण्यस्थानं प्रपारामादि। वनम् उपवनम्। सेतुबन्धस्तटाकादिः। एते उपभोगार्थाः शोभनार्थाश्च। यथा दिशश्चेति। इन्द्रोऽग्निर्यमो निर्ऋतिर्वरुणो वायुः कुबेर ईशान इति पूषाद्यायतनेषु स्थाप्याः।

उत्तर इति चतुर्धा श्मशानं विभज्य शूद्राणाम् प्रथमाद् भागादुत्तरो वैश्यानाम्। ततोऽप्युत्तरः क्षत्रियाणाम्। ततोऽप्युत्तरो ब्राह्मणानाम्। पूर्वो वेति शूद्राणाम्। प्रथमात् पूर्वो वैश्यानाम्। ततोऽपि पूर्वः क्षत्रियाणाम्। ततोऽपि पूर्वो

---

१. यथादिशश्चा पा०।

सर्वस्नेहधान्यक्षारलवणभैषज्यशुष्कशाकयवसवल्लूरतृणकाष्ठलोहचर्माङ्गारस्नायुविषविषाणवेणुवल्कलसारदारुप्रहणावरणाश्मनिचयान् अनेकवर्षोपभोगसहान् कारयेत् । नवेनानवं शोधयेत् ॥

चाणक्यटीका

ब्राह्मणानामिति । कस्यां दिशि श्मशानमिति दक्षिणेन नगरस्येत्यर्थात् । धनुश्शतावकृष्टमिति वर्त्तते । तस्यातिक्रम इति । दिग्विशेषस्य भागनियमस्य चातिक्रम इति । पाषण्डाः कापालिकश्रमणशाक्यादयः तेषामाश्रमवाह्यत्वात् वध्यवन्धनमगाधहरणं तत्परिच्छेद तत्परिच्छेदग्रहणम् (?) चण्डालानाम् ॥

कर्मान्तक्षेत्रवशेनेति । नात्र क्रोशतामपेक्षते । एवं कर्मान्ताः कुटुम्बिनः नागराः तेषामिदं प्रमाणं सीम्नो युक्तमिति । अथवा सामन्तक्षत्रानुरोधेन एतावत्सीमकक्षेत्रं प्रयुक्तमिति तदनुरोधेन सीमानं स्थापयेत् । तेष्विति तेषु विभक्तेषु सीमप्रदेशेषु । वाटानिति कृतपरिक्षेपानित्यर्थः । धान्यानां पण्यानां च जीरकाणाम् । निचयांश्चेति । निचयग्रहणं नियमार्थम् । तत्र यथोत्पन्नभागानित्येवमर्थम् । कुर्युः स्वाम्यनुज्ञाता नागराः । दशकुलीवाटमिति दशकुलानि समाहृतानि दशकुली तत्प्रमाणों वाट एको यत्र यतस्तत् कूपस्यैकैकस्य स्थानं कुर्यादिति ॥

श्रीमूला

कूपं पोषणार्थं कुर्युरिति भावः । निचेतव्यद्रव्याण्याह—सर्वस्नेहेत्यादि । सर्वविधस्नेहादिद्वाविंशतिनिचयान् वहुवर्षोपभोगक्षमान् निवेशयेद् दुर्गेषु । तत्र शाकं वृक्षसम्वन्धि, मूलपत्रकरीराग्रफलकाण्डाधिरूढकत्वक्पुष्पकवकात्मकं दशकम् । यवसं धान्यपलालम् । वल्लूरं शुष्कमांसम् । अङ्गारो निर्वाणाग्निर्कामिन्धनम् । स्नायुर्वस्नसा । प्रहरणं खड्गादि । स्पष्टमन्यत् । नवेनेति । नवेन अनवं शोधयेत् नूतने यथोक्तद्रव्यजाते लब्धे पुराणं तद् व्यययेत् ।

चाणक्यटीका

तत्रैवं निवेशिते दुर्गे द्रव्याणां निचया उच्यन्ते सर्वस्नेहेति । सर्वशब्दः प्रत्येकं योज्यः । सर्वस्नेह स्तैलादयः । धान्यानि पूर्वमध्यमावराणि । क्षाराः फाणितादयः । लवणानि सैन्धवादीनि । गन्धास्तरा (? श्चन्दना) दयः । भैषज्यानि शृङ्गिवेरादीनि । शाकानि पुष्पमूलफलोपभोग्यानि । यवसा दूर्वाश्यामाकादयो हस्त्यश्वादियाग्याः । वल्लूराः कर्तितवराहादिमांसानि । तृणानि दर्भादीनि छादनार्थानि । काष्ठादीनि इन्धनार्थानि एतानि शाकादीनि शुष्काणि । लोहानि ताम्रादयः । चर्माणि पात्रावर-(? शस्त्रवरक) योग्यानि । अङ्गाराः लोहादिकर्मार्थाः । स्नायूनि काण्डगुणोपस्करार्थानि । विषाणि स्थावरजङ्गमानि शस्त्रप्रलेपाद्यर्थानि । विषाणानि शार्ङ्गाद्युपकरणार्थानि ।

[चतुरङ्गसैन्ये निर्वाहकशूरजनप्राचुर्यस्यावश्यकता]

हस्त्यश्वरथपादातं अनेकमुख्यं अवस्थापयेत् । अनेकमुख्यं हि परस्परभयात् परोपजापं नोपैतीति । एतेनान्तपालदुर्गसंस्कारा व्याख्याताः ॥

[जनोपप्लावकानां दुष्टानां आवासस्थानव्यवस्था]

न च बाहिरिकान् कुर्यात् पुरराष्ट्रोपघातकान् ।
क्षिपेज्जनपदस्यान्ते सर्वान् वा दापयेत् करान् ॥५७॥

इत्यध्यक्षप्रचारे दुर्गनिवेशः चतुर्थोऽध्यायः
आदितः पञ्चविंशः

चाणक्यटीका

वेणवस्तोमराद्यर्थाः । वल्कलानि रज्ज्वाद्यर्थानि । सारदारूणि[1] शाकादीनि यन्त्राद्यर्थानि । प्रहरणानि शक्त्यादीनि । आवरणादीनि व (? फ) ल किटिकादीनि । अश्मानि यन्त्रक्षेप्याः पाषाणाः । एतान् निचयान् महतो राशीन् ॥

श्रीमूला

हस्तीत्यादि । हस्त्यश्वरथपादातं चतुरङ्गं सैन्यम्, अनेकमुख्यम् अनेके मुख्या बलप्रधाना यस्मिंस्तत् तथाभूतम्, अवस्थापयेद्, दुर्गेषु । बलप्रधानानां बहुत्वे गुणमाह—अनेकेत्यादि । एकश्चेद् बलप्रधानः स समानपुरुषान्तराभावान्निर्भयो लोभादिना परोपजापमङ्गीकृत्य कृत्स्नं बलं स्वाधिष्ठीयमानं भेदयेत्, बहवश्चेद् बलप्रधानाः ते परस्पराभिशङ्किताः परोपजापं नोपगच्छेयुरिति । बहुप्रधानाधिष्ठितं बलं पराभेद्यं भवतीति भावः ।

एतेनेति । एतेन यथोक्तेन पुरदुर्गसंस्कारविधिना, अन्तपालदुर्गसंस्काराः व्याख्याताः, जनपदसीमापालाधिष्ठितानां दुर्गाणां गुणाधानान्युक्तप्रायाणि, ते पुरदुर्गसंस्कारवद् विधातव्या इत्यर्थः ।

अध्यायान्ते श्लोकमाह—न चेति । बाहिरिकान् कितववञ्चकनटनर्तकादीन्, न च कुर्यात् पुरे नैव वासयेदित्यर्थः, अर्थाद् राजा । तत्र हेतुसमर्पकं विशेषणं पुरराष्ट्रोपघातकानिति, यतस्ते पौरान् जानपदांश्च कापथप्रवर्तनयोपघ्नन्ति तस्मादित्यर्थः ।

चाणक्यटीका

दुर्गस्य रक्षाविधानमाह—अनेकमुख्यमिति । हस्त्यादिचतुरङ्गं बलं प्रत्येकम् अनेकमुख्याधिष्ठितमित्यर्थः । तद्विचित्रवैषम्यात् परस्पराशङ्कया न परोपजापमुपैतीति ॥

एतेनेति । संस्थानीयसंस्कारेण अध्यायद्वयविरहितेनेत्यर्थः ॥

---

१. "शाकः ·······वृक्षभेदे तु ना पृथुच्छदसंज्ञके ।" इति केशवस्वामी । (५ १३ अ०)

श्रीमूला

यदि वासयेत् तदा विधिमाह—जनपदस्य, अन्ते सीमायाम् । 'जनपदे चैतानि'त्यपपाठः । क्षिपेद् वासयेद्, वाहिरिकान् । सर्वान् वा सर्वानिव जनपदान्तवास्तव्यानन्यान् कौटुम्बिकानिवेत्यर्थः, करान् दापयेद् वाहिरिकान् । इहाणिकर्तॄणां बाहिरिकाणां णौ कर्मत्वमपाणिनीयं, जल्पतिप्रभृतित्वकल्पनया वा ददातेरौपसङ्ख्यानिकं तत् साध्यम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे चतुर्थोऽध्यायः दुर्गनिवेशः, आदितः पञ्चविंशः ॥

चाणक्यटीका

न च बाहिकारिकानिति । यद्येवं निवेश्यमानो लोको न संमाति तथापि तत्सम्बन्धे समीपे बहिर्निवेश्ये च असौच (?) बाहिरिकः पुरि (? कपुरी) स्यात् । सा ह्युभयान्तरालस्थत्वात् चौर्ययाञ्चाभिक्षणवञ्चनादिभिः पुरस्य राष्ट्रस्य चोपघातिका । क्षिपेज्जनपदस्यान्त इति । यदि पूर्वोषितापि स्यात् तत्तुल्ययोगक्षेमीकरणार्थं । सर्वानिति तत्रत्यान् भिक्षावृत्तीनपि करान् दापयेत् । करादानप्रसङ्गेन शौचाशौचज्ञानार्थमिति ॥

इति दुर्गनिवेशश्चतुर्थंप्रकरणम् ।

॥ चतुर्थोऽध्यायः ॥

त्रयोविंशं प्रकरणम्

पञ्चमोऽध्यायः ।

सन्निधातृनिचयकर्म ।

[कोशाधिपतिकर्तव्यसङ्ग्रहः]

सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारं कुप्यगृहमायुधागारं बन्धनागारं च कारयेत् ॥

[कोशगृहनिर्माणप्रकारः]

चतुरश्रां वापीं अनुदकोपस्नेहां खानयित्वा पृथुशिलाभिरुभयतः पार्श्वं मूलं च प्रचित्य सारदारुपञ्जरं भूमिसमं त्रितलमनेकविधानं

श्रीमूला

सन्निधातृनिचयकर्मेति सूत्रम् । सन्निधाता द्रव्यं सञ्चित्य निधाता भाण्डागाराधिपतिः तस्य निचयकर्म द्रव्यसङ्ग्रहरक्षणकर्म, तदिहोच्यत इति सूत्रार्थः । निचेयद्रव्यप्रसङ्गान्निचेतृव्यापाराभिधानम् ।

सन्निधातेति । सन्निधाता, कोशगृहं रत्नस्वर्णादिनिधानस्थानम् । पण्यगृहं विक्रेयद्रव्यनिवेशस्थानम् । कोष्ठागारम् उदरोपयोगिधान्यस्नेहादिनिक्षेपस्थानम् । कुप्यगृहं सारदारुवेणुवल्लीवर्गादिरक्षणस्थानम् । आयुधागारं, बन्धनागारं च कारागृहं च, कारयेत् ।

चाणक्यटीका

अध्यक्षाणां प्रचारः वस्तुतः सन्निधातृसमाहर्तृपूर्वकः । तत्पूर्वकाश्च सर्वाध्यक्षाः । समाहर्तृविषयो जनपदनिवेश उक्तः । न च दुर्गमन्तरेण सन्निधातुर्निचयकर्मेति तदर्थं दुर्गविधिर्निवेशश्चोक्तः । तयोरपि समाहर्तुः सम्प्रेष्य भूतत्वात् प्राधान्यात् सन्निधातृकर्तृकनिचयकर्मोच्यते—सन्निधातेति । समाहर्त्रा सर्वतो जनपदात् समाहृतानि द्रव्याणि सम्यङ् निधत्ते स्थापयतीति । भाण्डागारिक इत्यर्थः ॥

श्रीमूला

कोशगृहनिर्माणप्रकारमाह—चतुरश्रामिति । चतुरश्रां वापीं तदाकारं गर्तम्, अनुदकोपस्नेहाम् उदकोपक्लेदरहिताम् खानयित्वा, उभयतः समन्तात्, पार्श्वं मूलं च, पृथुशिलाभिः, प्रचित्य सारदारुपञ्जरं सारदारुमयपञ्जरयुक्तम्, भूमिसमत्रितलं

कुट्टिमदेशस्थानतलं एकद्वारं यन्त्रयुक्तसोपानं देवतापिधानं भूमिगृहं कारयेत्। तस्योपरि उभयतो निषेधं सप्रग्रीवं ऐष्टकं भाण्डवाहिनीपरिक्षिप्तं कोशगृहं कारयेत् प्रासादं वा, जनपदान्ते ध्रुवनिधिं आपदर्थं अभित्यक्तैः पुरुषैः कारयेत्।

चाणक्यटीका

अनुदकोपस्नेहामिति। अनुद्भिज्जोदकाम्, अस्विद्यत्कुड्यान्ताञ्च। उभयत इति उभयमित्यर्थः। किं तत्। पार्श्वचतुष्टयं मूलं चेति। एवमुभयतो ग्रहणमनर्थकम्। अतः उभयस्मात् कारणात् उपस्नेहनिवृत्त्यर्थं पार्श्वम्। उदकनिवृत्त्यर्थं मूलं च। प्रचित्येति। अपरे उभयतः पृथुशिलाभिरायामविष्कम्भाभ्यामिति चिरावस्थानार्थं योजयन्ति। सारदारुमयः पञ्जरो यत्र। भूमिसमं नाधिकं नापि न्यूनं त्रीणि तलानि यस्य पुरुषप्रमाणानि तम्। त्रिभूमिकमित्यर्थः। अनेकविधानमिति। नानाजातीयद्रव्यस्थापनार्थानि बहूनि कोष्ठकविधानानि यत्र।

श्रीमूला

भूमिसमानि भूम्यानुरुप्यनिर्मितानि त्रीणि तलानि उपरितलमध्यमतलाधस्तलानि यस्य तत् तथाभूतम्, अनेकविधानम् अनेकानि विधानानि कोष्ठकादिरचनाः यस्मिंस्तत् तथाभूतम्, कुट्टिमदेशस्थानतलं देश उपरितलं, स्थानं मध्यतलं, तलम् अधोभूमिका इत्येतानि कुट्टिमानि दृढनिबद्धानि यस्य तत् तथाभूतम्, एकद्वारम् यन्त्रयुक्तसोपानं यन्त्रे युक्तानि यथावसरनिवेशनापसरणक्षमतया संश्लिष्टानि सोपानानि यस्य तत् तथाभूतं, देवतापिधानम् उत्कीर्णदेवताप्रतिमाङ्कं पिधानं दार्वादिमयमाच्छादनं यस्य तत् तथाभूतम्, भूमिगृहं कारयेत्। तस्येति। तस्य भूमिगृहस्य, उपरि, उभयतोनिषेधं बहिरन्तश्चार्गलयुक्तम्, सप्रग्रीवं प्रग्रीवेण मुखशालया सहितम्, ऐष्टकं पक्वेष्टकामयं, भाण्डवाहिनीपरिक्षिप्तं द्रव्याधारशालापरिवृतम् कोशगृहं प्रासादं वा उपरिगृहमिव कारयेत्। जनपदेत्यादि। आपदर्थं विपत्कालोपयोगार्थम्, ध्रुवनिधिम् अनपायनिधिकम् अर्थात् प्रासादम्, जनपदान्ते, अभित्यक्तैः, वध्यैः पुरुषैः, कारयेत्। वध्यपुरुषा हि राज्ञा यत्नरक्षिताः निधिगुप्तिस्थानविधानरहस्यं निर्माणकाले नोद्भिन्द्युः, निर्माणनिर्वृत्त्युत्तरकाले च सद्यो मारिता भवन्तीति सोऽयं ध्रुवनिधिरनन्यवेद्यो वेदितव्यः।

चाणक्यटीका

देशः पार्श्वानि स्थानम् अधोभूमिः तलम् उपरिष्टात्, त्रिष्वपि तलेषु कुट्टिमानि यत्र, कुट्टिमकुड्यं कुट्टिमभूमिकं कुट्टिमतलञ्चेत्यर्थः। एकद्वारम् उत्सङ्गकयुक्तम्। यन्त्रयुक्तसोपानं यन्त्रेणोत्क्षेप्यावपात्यं सोपानं निःश्रेण्यादियोगात्।

[पण्यगृहादिनिर्माणप्रकारः]

पक्वेष्टकास्तम्भं चतुश्शालं एकद्वारं अनेकस्थानतलं विवृतस्तम्भापसारं उभयतः पण्यगृहं कोष्ठागारं च, दीर्घबहुलशालं कक्ष्यावृतकुड्यं अन्तः कुप्यगृहं, तदेव भूमिगृहयुक्तं, आयुधागारं, पृथग् धर्मस्थीयं, महा-

चाणक्यटीका

उभयतोनिषेधम् उभयपार्श्वायतकुड्यम् । सप्रग्रीवं स (को ? शा) लामुखम्[1] । ऐष्टकम् अग्न्याद्यापत्प्रतीकारार्थम् । भाण्डवाहिनीभिः शालाभिः संवर(णा)र्थं समन्तात् वेष्टितम् । प्रासादं वा भूमिगृहेण सह । जनपदान्त इति समुच्छिन्नस्याप्यादानयोग्यं भवति । ध्रुवमिति अवश्यकार्यम् । आपदर्थम् अनाद्यध्यायसीम (?) कोशगृहविकल्प एवायम् । अभित्यक्तैरिति । अत्यन्तम् अस्त्रैर्हन्तव्यैरित्यर्थः । संवरणविशेषपरमेतत् । कारयेदिति । पुनर्ग्रहणं सन्निधातरि प्रकृते राज्ञः कर्तृत्वप्रतिपादनार्थम् ॥

श्रीमूला

पण्यगृहादिविधिमाह—पक्वेत्यादि । पक्वेष्टकास्तम्भं पक्वेष्टकामयैः स्तम्भैर्युक्तम् चतुश्शालं चतस्रश्चतुर्दिग्गता अन्योन्यसम्मुखीनाः शालाः यस्मिंस्तत् तथाभूतम्, एकद्वारम्, अनेकस्थानतलम् अनेकैः कोष्ठैर्भूमिकाभिश्च युक्तम्, उभयत उभयपार्श्वयोः, विवृतस्तम्भापसारं विवृतस्तम्भः विस्तृतस्तम्भः अपसारोऽलिन्दो यस्य तत् तथाभूतं, पण्यगृहं, कोष्ठागारं च कारयेत् । दीर्घबहुलशालम्, कक्ष्यावृतकुड्यं कक्ष्याभिः प्रकोष्ठकैः वृतं परीतं कुड्यं यस्मिंस्तत् तथाभूतं, कुप्यगृहम् अन्तः कारयेत् । भूमिगृहयुक्तं, तदेव कुप्यगृहमेव, आयुधागारं कारयेत् । बन्धनागारम् धर्म-

चाणक्यटीका

पक्वेष्टकास्तम्भं न दारुमयस्तम्भम् अग्निभयात् । अनेकस्थानतलम् अनेकं स्थानं भूमिगतम् अनेकञ्च तलम् उपरिष्टान्नानाविधपण्यस्थापनार्थं यस्य । विवृतस्तम्भापसारमुभयत इति । विष्कम्भपार्श्वयोरस्तमिति स्तम्भावसामथोर्ध्वं नापण्यानि नश्यन्ति (?) कोष्ठागाराद् विशेषप्रतिविधानार्थम् आदावुपन्यस्तं पण्यगृहं, पण्यानां महासारत्वात् । कोष्ठमुदरं तदुपयोगिनामवस्थानाय गृहं कोष्ठागारम् । दीर्घशालं दीर्घद्रव्याणां स्थापनार्थम् । बहुलशालं भिन्नजातीयानां पृथगवस्थानार्थम् । अन्यथा हि एकत्र निचये सति अधोगतेन कार्यमिति आयासः तत्परिवर्तनात् स्यात् । कक्ष्यावृत्तकुड्यमिति । अत्र दा (रुका ? रुणां) निर्गमप्रवेशस्य सङ्कटत्वात् नान्तः कुड्यमस्ति स्तम्भशाला एवेष्टकायुक्ताः, बाह्यस्तु विद्यते कुड्यं तत् कथमावरणमन्त इति चेत्, कक्ष्यावरणप्रकारा एव कुड्यं यस्येति तत् कक्ष्यावृत्तमन्तः कुड्यं (?) प्यमिति । तदेवेति कुड्यं (?) प्यगृहं भूमिगृहेण महार्हसन्नहनादिस्थापनेन अधिकं (?) पूर्वस्माद्वि-

१. प्रग्रीवं मुखशालेति चाणक्यटीकाकृदिति अमरटीका सर्वस्वम् ।

मात्रीयं, विभक्तस्त्रीपुरुषस्थानं अपसारतः सुगुप्तकक्ष्यं वन्धनागारं कारयेत् ।

[उक्तानां षण्णामप्यगाराणां तत्तत्प्रकारैः रक्षणविधिः,
वृष्टिमापकयन्त्रपरिकल्पनविधिश्च]

सर्वेषां शालाखातोदपानवर्च्च स्नानगृहाग्निविषत्राणमार्जारनकुला-रक्षाः स्वदैवपूजन (युक्ताः) वृत्ताः कारयेत् ।

श्रीमूला

स्थीयं महामात्रीयं पृथक् कारयेत् धर्मस्थीयमित्येकम् महामात्रीयमित्यपरं च प्रत्येकं निर्मापयेत् । तत्र धर्मस्था व्यवहारनिर्णेतारः तत्सम्वन्धि धर्मस्थीयं व्यवहारार्थमागतानामवस्थित्यर्थं व्यवहारपराजितनिरोधार्थं च स्थानमित्यर्थः । महामात्राः सन्निधातृसमाहर्तृप्रभृतयोऽर्थाधिकारिणः तत्सम्वन्धि महामात्रीयं विश्वासाधित्वेन गृहीतानां युद्धप्रगृहीतादीनां च जनानां निवेशस्थानमित्यर्थः । वन्धनागारं कीदृशम्, विभक्तस्त्रीपुरुषस्थानम्, अपसारतः सुगुप्तकक्ष्यम् अपसरणमार्गमनुसृत्य सुष्ठु रक्षितकक्ष्यम् ।

सर्वेषामिति । सर्वेषां कोशगृहादीनां षण्णां, शालाखातोदपानवत् शालापरिखाकूपैस्तुल्यं स्नानगृहाग्निविषत्राणमाजरिनकुलारक्षाः स्नानगृहम् अग्नित्राणं मानुषाग्निना त्रिरपसव्यपरिगमनरूपं, निशान्तप्रणिध्युक्तं विषत्राणं मार्जारनकुलौ विषत्राणभूतौ मार्जारनकुलौ वा आरक्षां रक्षिपुरुषैर्गुप्तिं च, स्वदैवपूजनयुक्ताः स्वस्वदैवतार्चनयुक्ताः कारयेत् । तत्र कोशगृहस्य धनदो देवता, पण्यकोष्ठागारयोः श्रीदेवी, कुप्यगृहस्य विश्वकर्मा, आयुधवन्धनागारयोर्यमवरुणाविति विवेकः ।

चाणक्यटीका

शिष्टम् । पृथग्धर्मस्थीयमिति धर्मस्थीयव्यवहारपराजितानां निरोधस्थानमपि साहचर्याद् धर्मस्थीयमुच्यते । तथा महामात्रेण दृष्टव्यव्यवहाराणां स्थापनं महामात्रीयम् । अनुज्ञायते च महामात्राणां व्यवहारो महामात्रैरिति तदुभयं पृथग्यत्रेति । एवं साहसव्यवहाराणां कण्टकशोधनाद्य (?) ध्यवसितानां पृथग् इत्यार्थापन्नम् । विभक्तस्त्रीपुरुषस्थानम् अपराधतः कारणात् । अन्यथा हि अविभक्तस्थानाः अन्योऽन्यं व्यभिचारं कुर्युः कुलस्त्रीणामपि सद्भावात् । अन्ये तु अल्पापराधानां तादृग्विधं स्थानम् अल्पापराधानां च तद्योगादिति व्याचक्षते । सुगुप्तकक्ष्यं सुगुप्तप्रकोष्ठम् । पक्षवतां वन्धनस्थानाद् बहिर्निष्कासप्रतिषेधार्थम् । अथवा यथापराधं सुतमां सुतराञ्च गुप्ता कक्ष्या यस्येति ॥

सर्वेषामिति । कोशगृहादीनां यथाप्रदेशम् । शालाः खातादिभिः युक्ताः । उदपानं शरीरस्थित्यर्थम् । वर्चगृहम् उच्छ्वासभूमिः । अग्नित्राणम् उदककुम्भनिःश्रेणीपरशुशूर्पाङ्कुशादि । मार्जारनकुलाः मूषिकसर्पप्रतीकारार्थाः आरक्षाः । यदि कल्पेत यावत् स्वस्य दैवतस्य पूजनम् । कोशे वैश्रवणस्य । कोष्ठागारे सीतायाः ।

कोष्ठागारे वर्षमानं अरत्निमुखं कुण्डं स्थापयेत् ।

[रत्नादीनां सङ्ग्रहविधानं वञ्चकानांदण्डश्च]

तज्जातकरणाधिष्ठितः पुराणं नवं च रत्नं सारं फल्गु कुप्यं वा प्रतिगृह्णीयात् । तत्र रत्नोपधावुत्तमो दण्डः कर्तुः कारयितुश्च, सारोपधौ मध्यमः फल्गुकुप्योपधौ तच्च तावच्च दण्डः ।

श्रीमूला

कोष्ठेत्यादि । कोष्ठागारे वर्षमानं वर्षं वृष्टिर्मीयतेऽनेनेति तथाभूतम्, अरत्निमुखम् अरत्निचतुरश्रमुखं, कुण्डं गर्तं स्थापयेत् खानयेत् ।

तज्जातेत्यादि । पुराणं नवं च, विविच्येति शेषः । रत्नं मणिमुक्तादिकम्, सारं चन्दनादि, फल्गु वस्त्रादि, कुप्यं वा दारुचर्मवेणुवल्ककोष्ठोपकरणादिकं वा, तज्जातकरणाधिष्ठितः रत्नादितत्तद्वस्तुव्यवहारिवंश्यैः कायस्थैश्चोपेतः सन्, प्रतिगृह्णीयात् सङ्गृह्णीयात् । तत्रेति । तत्र, रत्नोपधौ निर्गुणरत्नं प्रतिनिधाय गुणवद्रत्नहरणे, कर्तुः कारयितुश्च, उत्तमो दण्डः पणसाहस्ररूप उत्तमसाहसः । सारोपधौ मध्यमः मध्यमसाहसः । फल्गुकुप्योपधौ, तच्च तावच्च दण्डः यद् द्रव्यं हृतं तच्च तत्समपरिमाणं तज्जातीयमपरं चेत्युभयं दण्डो भवति ।

चाणक्यटीका

पण्यगृहे श्रियः । कुप्यायुधागारयोः ईशानस्य स्कन्दस्य वा । बन्धनागारे यमवरुणयोरिति ।

वर्षमानमिति । कोष्ठागारस्थानां व्रीह्यादीनामन्येषाञ्च वर्षायत्तत्वात् । अतोयवर्षं (?) मीयते येन तद् अरत्निमुखं कुण्डम् । किमवगाढमिति चेद् यावता द्रोणः पूर्यते । कुत एतत् । वर्षमानग्रहणाद् द्रोण एतन्माप्यते "षोडशद्रोणं जाङ्गलानाम्" (अ० २, अध्या० २८) इत्यादिना ।

यदर्थं गृहाणि स निचय उच्यते—तज्जात इति । तत्र जात इव तज्जातस्तदभिज्ञ इत्यर्थः । तेन लेखकादिना करणेन कर्मसाक्षिणा सहितः आत्मविशुद्ध्यर्थम् । रत्नं मुक्तामण्यादि, सारं चन्दनादि, फल्गु चन्दनादि (?) (वस्त्रादि), कुप्यं शाकादि । एतन्नवं पुराणं वा समाहर्तृभ्यः प्रतिगृह्णीयात् । तत्रेति । यथानिर्दिष्टे रत्नादौ । रत्नोपधाविति । उपधाउपधिः परिवर्त्तनं रत्नाभासेन । उत्तम इति । पञ्चपणशतावरः सहस्रपणपरः साहसदण्डः । अर्थ (?) त्र कोशदण्डयिता प्रदेष्टा । कर्तुरिति उपधातुः । कारयितुश्चेति उवधापयितुः । सारोपधौ मध्यमः कर्तुः कारयितुश्च । तच्च तावच्चेति यथापरिवर्तितं द्रव्यं दाप्यः तन्मूल्यप्रमाणश्च दण्डः । रत्नाद्युपधौ तद्दापयित्वा अधिकं दण्डनीय इति ज्ञापनार्थं द्विगुण इति नोक्तम् ॥

रूपदर्शकविशुद्धं हिरण्यं प्रतिगृह्णीयात्। अशुद्धं छेदयेत् आहर्तुः पूर्वः साहसदण्डः। शुद्धं पूर्णमभिनवं च धान्यं प्रतिगृह्णीयात्। विपर्यये मूलद्विगुणो दण्डः। तेन पण्यं कुप्यमायुधं च व्याख्यातम्॥ सर्वाधिकरणेषु युक्तोपयुक्ततत्पुरुषाणां पणद्विपणचतुष्पणाः, परं अपहारेषु पूर्वमध्यमोत्तमवधा दण्डाः॥

श्रीमूला

रूपेत्यादि। हिरण्यं प्रणीतमुद्राङ्कं स्वर्णं रजतं च दीनारादिकम् रूपदर्शकविशुद्धं रूपपरीक्षकमुखेन विज्ञातशुद्धिकं, प्रतिगृह्णीयात्। अशुद्धं कूटप्रणीतं, हिरण्यं, छेदयेद् भञ्जयेद् अपुनरुपयोगाय। आहर्तुः कूटहिरण्यानेतुः, पूर्वः साहसदण्डः।

शुद्धमिति। शुद्धं निर्बुसं, पूर्णम् अनूनमानम्, अभिनवं च धान्यं, प्रतिगृह्णीयाद्, धान्यग्रहणाधिकृतः। विपर्यये अतथाविधधान्यप्रतिग्रहे, मूलद्विगुणो दण्डः।

पण्यकुप्यायुधप्रतिग्रहेऽपि धान्योक्त एव न्याय इत्याह—तेनेत्यादि।

सर्वेत्यादि। सर्वाधिकरणेषु सर्वेष्वधिकारस्थानेषु, युक्तोपयुक्ततत्पुरुषाणां युक्तः प्रधानः, उपयुक्तस्तत्सहकारी तत्पुरुषाः तयोरधश्चराः तेषां पणद्विपणचतुष्पणाः एकः पणः द्वौ पणौ चत्वारः पणाश्च, दण्डाः, अपहारेषु पूर्वोक्तजातीयेषु। परमपहारेषु सकृद्दण्डनात् परतोऽपहारेषु, पूर्वमध्यमोत्तमवधा दण्डाः पूर्वसाहसो मध्यमसाहस उत्तमसाहसो वधश्च दण्डाः। तत्राद्यास्त्रयो दण्डा यथाक्रमं प्रयोक्तव्याः, वधदण्डस्तु ततोऽपि परस्तादपहारेषु प्रयोक्तव्य इति बोद्धव्यम्।

चाणक्यटीका

रूपकदर्शकः सौवर्णिकः। हिरण्यमिति सर्वरूप्योदाहरणार्थम्। अशुद्धम् अव्यावहारिकम् अर्भकच्छेदेन लाञ्छयेदव्यवहारार्थम्। आहर्तुरिति येनौपनायिकेनाशुद्धम् आहृतम्॥

शुद्धं तुषादिरहितम्। पूर्णं प्रस्थादिना मानेन। नवं कालक्षमत्वात्। विपर्यय इति अशुद्धाद्युपनये॥

एतेनेति शुद्धादिपरीक्षणेन मूलद्विगुणदण्डेन चेत्यर्थः। सर्वाधिकरणेष्विति सन्निधात्रादिस्थानेषु अध्यक्षप्रचारोक्तेषु युक्ताः अध्यक्षाः। उपयुक्ताः गणकलेखकादयः। तत्पुरुषाः करणमनुष्याः। तेषां पणापहारे पूर्वः। द्विपणापहारे मध्यमः। चतुष्पणापहारे तु उत्तमः। पञ्चपणापहारे चौर्ये वधः। अन्तरालापहारे अन्तरालदण्डाः विकल्प्याः, वधोऽप्येकाङ्गहानादिना विकल्प्यः॥

[कोशचौर्ये तत्कर्तुः ज्ञाताज्ञाततत्परिचारकाणां च शिक्षाविशेषाः]

कोशाधिष्ठितस्य कोशावच्छेदे घातः । तद्वैयावृत्यकाराणां[1] अर्धदण्डः । परिभाषणं अविज्ञाते । चोराणां अभिप्रधर्षणे चित्रो घातः तस्मादाप्तपुरुषाधिष्ठितः सन्निधाता निचयाननुतिष्ठेत् ।

[अध्यायार्थसारः]

बाह्यमाभ्यन्तरं चायं विद्याद्वर्षशतादपि ।
यथा पृष्टो न सज्जेत व्ययशेषं च दर्शयेत् ॥५८॥

इत्यध्यक्षप्रचारे सन्निधातृनिचयकर्म पञ्चमोऽध्यायः ।
आदितष्षड्विंशः ।

श्रीमूला

कोशेत्यादि । कोशाधिष्ठितस्य कोशाधिष्ठातुः भाण्डागाराध्यक्षस्य, कोशावच्छेदे कोशस्य सुरुङ्गाद्युपायेनापहारे, घातः वधदण्डः । तद्वैयावृत्यकाराणां तस्य वैयावृत्यकाराः विशेषेण आसमन्ताद्वर्तंत इति व्यावृत्तः परिचारक स्तस्य कर्म वैयावृत्यं परिचर्या तत् कुर्वन्तः परिचारकाः तेषाम् अर्धदण्डः । अविज्ञाते सति अर्थात् कोशाधिष्ठातृकृते कोशावच्छेदे, परिभाषणं तद्वैयावृत्यकाराणां सनिन्दोपालम्भः । चोराणामिति । चोराणाम् अभिप्रधर्षणे कुड्यसन्धिच्छेदादिना धनापहरणे, चित्रो घातः ।

तस्मादित्यादि । स्पष्टम् ।

बाह्यमिति । बाह्यं जनपदोत्थम्, आभ्यन्तरं नगरोत्थं च, आयं, विद्यात्,

चाणक्यटीका

कोशाधिष्ठितस्येति । कोशं प्रति अधिकारेण स्थितस्य कोशाध्यक्षस्य कोशविचारणायाम्, कोशच्छेदेऽल्पेऽपि घात एव नान्यो दण्ड इति नियमार्थम् । अन्यथा पूर्वेणैव वधो लब्ध एव । व्यापृतस्य कर्म वैयापृत्यं तत्कारिणां परिचारकाणाम् अर्धदण्डः, यथोक्तेभ्यो दण्डेभ्यः । कोशाधिष्ठितेन हृतद्रव्यार्धमिति यावत् । अविज्ञाने केन हृतं किं मूषिकैरन्येन वेत्यविज्ञाने । परिभाषणं 'न पुनः प्रमादः कार्यः" इति । चोराणामिति । यदा चोराः पुनः पुनः प्रधर्षयन्ते कोशं तदध्यक्षतत्पुरुषाणाम् । चित्रो घातः शूलारोपणादिभिः । अन्यस्त्वाह—तेषामेव कोशध्यक्षतत्पुरुषाणाम् अभिधर्षणे उपाधिरहिते सन्धिच्छेदाच्चौर्ये चित्रो घात इति ।

तस्मात् इति । एवञ्जातीयकदोषपरिहारार्थं निगमयति आप्ताः शुचयः ॥

---

१. वैययापृत्य ।

श्रीमूला

सन्निधाता । कथं विद्यात्, यथा वर्षशतादपि पृष्टः अतीतं वर्षशतिमधिकृत्यापि आयं चोदितः, न सज्जेत न सक्तो भवेत् निष्प्रतिबन्धं वदेदित्यर्थः, व्ययशेषं दर्शयेच्च व्ययितावशिष्टं द्रव्यं दृष्टिगोचरं कारयेच्च, भाण्डागारे ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चमोऽध्यायः सन्निधातृनिचयकर्म, आदितः षड्विंशः ॥

चाणक्यटीका

अ (?) बाह्यं जनपदागतम् । आभ्यन्तरं दुर्गादुत्पन्नम् । पृष्टः राज्ञा । न सज्जेत न विषण्णमनाः स्यात् । कस्मिन्नित्याह—व्ययादिषु कियान् व्ययः, कियानवशिष्टः, कियानायः, प्राग् इति ऐषमस्तनपरुत्तनादिषु । या (?) वर्षशतमि (?) तादिति अतिशयोक्तिः ॥

इति सन्निधातृनिचयकर्म पञ्चमं प्रकरणम् ।

॥ पञ्चमश्चाध्यायः ॥

चतुर्विशं प्रकरणम्

षष्ठोऽध्यायः ।

समाहर्तृसमुदयप्रस्थापनम् ।

[समाहर्त्रा चिन्तनीयाः अंशाः]

समाहर्ता दुर्गं राष्ट्रं खनिं सेतुं वनं व्रजं वणिक्पथं चावेक्षेत ।

[दुर्गपदार्थविवरणम्]

शुल्कं दण्डः पौतवं नागरिको लक्षणाध्यक्षो मुद्राध्यक्षः सुरा सूना सूत्रं

श्रीमूला

समाहर्तृसमुदप्रस्थापनमिति सूत्रम् । समाहर्ता विषयवल्यध्यक्षः तेन करणीयं समुदयप्रस्थापनं धनोत्पत्तिप्रवर्तनमुच्यत इति सूत्रार्थः । अर्थोपधाशुद्धः सन्निधातृकर्मणि समाहर्तृकर्मणि च नियोक्तव्य इत्युक्तं प्राक् । तद्व्यापार इदानीमभिधीयते ।

दुर्गादिसप्तकं समाहर्त्रा चिन्तनीयमित्याह—समाहर्तेत्यादि ।

चाणक्यटीका

अथ सन्निधाता चिनोति तत् केन कथं को (?) क्व वा अर्जित इति समाहर्तृसमुदयप्रस्थानमुच्यते । सम्यङ्न्यायाद् आहरन्तीति समाहर्त्तारः तेनाध्यक्षेण समुदयस्य कोशादेवावेक्ष्यमाणतया शरीराद्यपेक्षणात् प्रकर्षेण स्थापनमुपार्जनमिति शरीरप्रत्यवेक्षणमूलत्वात् समुदयस्य तत्तावदुच्यते—समाहर्त्तेति । दुर्गादिसप्तविधमायशरीरम् ।

श्रीमूला

दुर्गपदार्थं विवृणोति—शुल्कमित्यादि । शुल्कं घट्टदेयं, दण्डः दम उत्तमसाहसादिः, पौतवं तुलामानपरिच्छेदः, नागरिको नगराध्यक्षः, लक्षणाध्यक्षः, क्षेत्रारामादिसीमाचिन्हाध्यक्षः, मुद्राध्यक्षः, सुरा मद्याध्यक्षः, सूना प्राणिवधाध्यक्षः सूत्रं सूत्राध्यक्षः

चाणक्यटीका

अस्य प्रपञ्चमाह—शुल्कः पण्यानां प्रवेशनिष्कासयोः यथोचितविंशतिभागादिग्रहणाद् आयाङ्गम् । दण्डो वधपरिक्लेशावपास्य अन्यायकारिणां विनयार्थं यदर्थहरणम् अपराधानुरूपम् । पौतवमिति रूढिशब्दोऽयम् । शोधनमित्यर्थः । औणादिकस्तुन् पवनं पोतुः, तत्र भवं पौतवम् । तुलामानयो राजकीययोस्तत्संव्यवहारिभ्यो लाभः ।

तैलं घृतं क्षारः सौवर्णिकः पण्यसंस्था वेश्या द्यूतं वास्तुकं कारुशिल्पिगणो देवताध्यक्षो द्वारबाहिरिकादेयं च दुर्गम् ।

[राष्ट्रखनिपदार्थाः]

सीता भागो बलिः करो वणिक् नदीपालः तरो नावः पट्टनं विवीतं

श्रीमूला

तैलं तद्विक्रयी, घृतं तद्विक्रयी, क्षारः गुडविक्रयी, सौवणिकः सुवर्णनियुक्तः, पण्यसंस्था पण्यनिवेशशालाः, द्यूतं, वास्तुकम्, आवसथनिर्मात्तारस्तक्षादयः, कारुशिल्पिगणः कारवः स्थूलशिल्पकाराः शिल्पिनः सूक्ष्मशिल्पकाराः तेषां गणः, देवताध्यक्षः देवालयकार्यधूर्वहः, द्वारबाहिरिकादेयं च द्वारबाहिरिकसम्बन्धि आदेयं पुरादिद्वारपालैर्भृतित्वेन ग्राह्यं बाहिरिकेभ्यो नटनर्तकादिभ्यो राज्ञा ग्राह्यं चेति यावत् । दुर्गं शुल्कादिद्वाविंशत्युपायलभ्यं द्रव्यं दुर्गशब्दितमित्यर्थः ।

चाणक्यटीका

नागरिकः नगरनियुक्तः जङ्घाविष्ट्यादिभिरायस्याश्रयः । लक्षणाध्यक्षः गजपतिरूप्यादिहननाद् आयहेतुः । मुद्राध्यक्षो दुर्गेनिष्कासप्रवेशयोः पण्यानां मुद्रयिता आयाङ्गम् । सुरासूनयोरध्यक्षौ वक्ष्यमाणप्रयञ्चावायाश्रयौ । सूत्रं तदध्यक्षनियोगात् कर्तनवानाभ्यामायाङ्गम् । तैलं तिलादीनाम् । घृतं गवादीनाम् । क्षारः फाणितादि । तन्नियुक्तेभ्य उत्पादादायनिमित्तम् । सौवर्णिकः सुवर्णादिपरीक्षापण्येनायाङ्गम् । पण्यसंस्थापि पणितव्यस्य निमित्तमेव । वेश्या गणिकाध्यक्षे कृतप्रपञ्चा आयस्य हेतुः । द्यूतं द्यूतकराणां व्यवस्थाकरणदायाश्रयः । वास्तुकं वास्तुपण्यं गृहक्षेत्रादि, तदध्यक्षनियोगात् क्रयविक्रयाभ्यामायस्य हेतुः । कारवः तन्तुवायादयः, तेषां गणः श्रेणी द्रव्योत्पादहेतुः । देवताध्यक्षो याच (?) निमित्तद्रव्योपसङ्ग्रहादायाङ्गम् । देवद्रव्यादानमधर्म इति चेत्, न; धर्मकृत्येषु नियोजनात् । द्वारबाहिरिकादेयं द्वारात् प्रवेशनिष्कासयोरादेयम् । द्वारपण इत्यन्ये । बाहिरिकायाश्च यथोक्तायाः कर इति । एतत्तु सर्वं दुर्गाश्रयत्वाद् दुर्गमित्युच्यते । क्वचिच्चात्र कर्मग्रहणं शुल्को दण्ड इति, नागरिको लक्षणाध्यक्ष इतिउभयप्रदर्शनज्ञापनार्थम् । अध्यक्षाः कुशलाः स्वकर्मभिरायस्य हेतुतां यान्तीति ।

श्रीमूला

सीतादित्रयोदशकं राष्ट्रशब्दितमित्याह—सीतेत्यादि । सीता कृषिः, भागः धान्यषड्भागः, बलिः उपहारः शिक्षा वा, करः फलवृक्षादिसम्बद्धं राजदेयं, वणिक् वणिग्द्वारेणादेयं, नदीपालः तीर्थरक्षकद्वारेणादेयं, तरः नदीतरणवेतनं, नावः नावध्यक्षद्वारलभ्यं, पट्टनम् अल्पनगरलभ्यं, विवीतं विवीताध्यक्षद्वारेणादेयं ।

वर्तनी रज्जूः चोररज्जूश्च राष्ट्रम् । सुवर्णरजतवज्रमणिमुक्ताप्रवालशङ्खलोह-लवणभूमिप्रस्तररसधातवः खनिः ॥

[सेतुवनपदार्थौं]

पुष्पफलवाटषण्डकेदारमूलवापाः सेतुः । पशुमृगद्रव्यहस्तिवनपरिग्रहो वनम् ।

चाणक्यटीका

सीता स्वकृषिः सीताध्यक्षे वक्ष्यमाणा । भागः कुटुम्बिभक्तौ भागेन कुटुम्बिभिर्यत् कृष्यादिकर्म क्रियते, तद्भागेनोपलक्षितत्वाद् भाग इत्युच्यते । बलिरुपदा । करो जङ्घादिना हिरण्यप्रत्यायः । वणिगिति निवासवणिग्भ्यः प्रत्यायः, पण्यादिकलनालाभाद् वणिक्पथस्य पृथग्ग्रहणात् । नदीपालो दीर्घस्रोतसः शुल्कस्यादाता । तरः पारावारतरणपण्यहेतुस्तरणिकनियोगात् । नावः नौभृत्यादिहेतवो नावध्यक्षे प्रप (श्वात् ? श्चिताः) । पट्टनं पण्यकलनस्थानं प्रत्यायहेतुः । विवीतं यवसमूल्यायनिर्वृत्तम् । वर्तनी जनपदप्रवेशमार्गो यत्र । वक्ष्यति—"अन्तपालः सपादपणिकां वर्तनीं गृह्णीयात्" (अ० धि० २ अ० २१) इति । रज्जुः ग्रामपरि (ज्ञा ? धि) प्रमाणम् । तत्र हि ग्रामा (त्क ? क्ष) पटलाध्यक्षात् प्रत्यायः । चोररज्जुः प्रदेष्टृव्यापारः चोरपरिज्ञानं प्रत्यायकारणम् । राष्ट्रान्तर्भावात् सर्वं राष्ट्रमित्युच्यते ।

श्रीमूला

वर्तनी मार्गः तल्लभ्यम् अर्थादन्तपालद्वारलभ्यं, रज्जूः विषयपालादेयमित्याहुः, चोररज्जूः चोरग्राहकाय ग्रामदेयमित्याहुः ।

खनिमाह—सुवर्णेत्यादि । वज्रः हीरकः, मणिर्मरतकादिः । भूमिधातुः प्रस्तरधातुः रसधातुश्च । स्पष्टमन्यत् । सुवर्णादिद्वादशकं खननलभ्यत्वात् खनिशब्दवाच्यम् ।

चाणक्यटीका

सुवर्णादीनां यथासम्भवं भूमिः प्रस्तरो रसो वा पारदादिरेते धातवः खननसाध्यत्वात् खनिरित्युच्यते ॥

श्रीमूला

सेतुमाह—पुष्पेत्यादि । पुष्पवाटः कुङ्कुमादिवनं, फलवाटः वार्ताकोर्वारुकादिवाही, अनयोः पुष्पफलशब्दाभ्यां ग्रहणं वाटशब्देन तु इक्षुवाटस्य षण्डं कदलीक्रमुकादि, केदारः धान्यक्षेत्रं, मूलवापः आर्द्रकहरिद्रालामज्जाद्युत्पत्तिस्थलम् । पुष्पवाटादयः षट सेतुशब्दिताः ।

वनमाह—पशुमृगेत्यादि । पशुवनमृगवनद्रव्यवनहस्तिवनानां परिग्रहो वनमिति शब्द्यत इत्यर्थः । तत्र पशुर्गवयादिः, मृगो हरिणादिः, द्रव्यं शाकतिनिशादि, हस्ती कालिंगादिः ।

[व्रजवणिक्पथपदार्थौ]

गोमहिषमजाविकं खरोष्ट्रं अश्वाश्वतराश्च व्रजः ।। स्थलपथो वारिपथश्च वणिक्पथः । इत्यायशरीरम् ।

[आयमुखसङ्ग्रहः]

मूलं भागो व्याजी परिघः क्लृप्तं रूपिकं अत्ययश्च आयमुखम् ।

चाणक्यटीका

पुष्पफलानां वाटाः, कदलीक्ष्वादिपण्डाः, कोद्रवा व्रीह्यादयः, मूलवापा आर्द्रकादयः, कन्दवापाः पिण्डालुकादयः, सेतुप्रभवत्वात् सेतुरित्युच्यते । तत्र सुलभः प्रत्यायः ।

पशुरिति ग्राम्याणां ग्रहणम्, मृग इति आरण्यानाम्, द्रव्यहस्त्यर्थो वनपरिग्रहः नतु ब्र (ह्म) सोमाद्यर्थं इत्येतद्वनम् ।

श्रीमूला

गवाद्यष्टकं व्रजशब्दितमित्याह—गोमहिषमित्यादि । अजाश्छागाः । अविका मेषाः । खरा गर्दभाः । अश्वतराः वेसराः । स्पष्टमन्यत् । वणिक्पथं द्विविधमाह—स्थलेत्यादि ।

इतीति । इति आयशरीरम् । उक्तसप्तषष्टिप्रकारं दुर्गादिसप्तकं धनागमस्थानम् ।

चाणक्यटीका

तथा व्रजः वणिकपथश्चायस्य हेतुः । आयशरीरमिति आयस्योत्पत्त्याश्रयत्वात् प्राणस्येव शरीरम् ।

श्रीमूला

उक्त आयशरीरे मूलादिसप्तकं प्रधानत्वाद् मुखस्थानीयमित्याशयेनाह—मूलमित्यादि । मूलं धान्यफलादिविक्रयलब्धं धनम् । मूल्यमित्येव पाठः क्वचित् । भागः षड्भागः, व्याजी विंशतिभागः पुनर्माने मा भूदूनतेत्यधिकं गृह्यमाणः, परिघः आतरद्रव्यं, क्लृप्तम् अमुकग्रामस्यैतावदिति प्रतिनियतं हिरण्यं धान्यं च, रूपिकं लवणाध्यक्षेण तद्विक्रयिभ्यः प्रस्थशतस्याष्टमांशो गृह्यमाणो लवणभागः, अत्ययश्च अध्यक्षप्रचारधर्मस्थीयकण्टकशोधनोक्तविधया गृह्यमाणमपराधदण्डद्रव्यं च, आयमुखम् । अत्र सङ्ग्रहश्लोकान् पठन्ति—

"शरीरं सप्तधा यस्य तावन्त्येव मुखानि च ।
प्रभेदाः सप्तषष्टिः स्युर्व्यये द्वाविंशतिः स्थिताः ।।
द्वाविंशतिविधं दुर्गं राष्ट्रभेदास्त्रयोदश ।
खनिर्द्वादशधा तत्र सेतवश्चैव षड्विधाः ।।
वनं चतुर्विधं ज्ञेयं व्रजभेदोऽपि चाष्टधा ।
द्विधा वणिक्पथश्चैवं शरीरं सप्तषष्टिधा ।।"

[व्ययशरीरविवरणम्]

देवपितृपूजादानार्थं स्वस्तिवाचनं अन्तःपुरं महानसं दूतप्रावर्तिमं कोष्ठागारं आयुधागारं पण्यगृहं कुप्यगृहं कर्मान्तो विष्टिः पत्त्यश्वरथद्विपपरिग्रहो गोमण्डलं पशुमृगपक्षिव्यालवाटाः काष्ठतृणवाटश्चेति व्ययशरीरम् ॥

चाणक्यटीका

अस्माच्च शरीराद् आयो यैर्द्वारैः प्राण इव स्रोतोभिर्निर्गच्छति तानि मुखान्युच्यन्ते। तत्र मूल्यं धान्यादीनि येन विक्रीयन्ते। ननु च विक्रये सत्युत्पन्नं मूल्यमायः, ततश्च विक्रय एव वक्तव्यो मुखत्वात्, न मूल्यमिति। मूल्यवचनादेव (वि) क्रयो गतार्थ इति नोक्तम्। भागः षड्भागा (धि ? दि) कः यथोक्तम्—"धान्यषड्भागं हिरण्यभागं च" (अधि० १ अ० १३) इति। राष्ट्रे तु आयशरीरस्यान्यार्थत्वात् व्याजी द्विविधा दण्डव्याजी यथा पञ्चकं शतमिति, षोडशभागो मानव्याजीति। परिघः मा (ष्य ? प्य) मानेषु धान्यादिषु यत् सङ्ख्यापरिच्छेदार्थः। शलाकासूर्पकमानावबद्धो लाभ इति केचित्। क्लृप्तं (?) कुलक्षेत्रग्रामादिकं परिच्छिद्य अमुना इदं देयमिति यल्लब्धम्, तत् क्लृप्तं (?) परिच्छिन्नमित्यर्थः, यत् पिण्डकर इत्युच्यते लोके। रूपिकं दण्डकर्मणि ये शतमुपनयन्ति तैः (रूपिकां ? राज) भाव्यमष्टौ पणा देयाः। अत्ययः अपराधजो दण्डो धर्मस्थीयकण्टकशोधनोक्तः।

श्रीमूला

अथ व्ययशरीरमाह—देवेत्यादि। देवपितृपूजादानार्थं देवपितृपूजादानप्रयोजनकं, तत्र देवाराधनं पितृपूजा श्राद्धकर्म दानं पर्वसु ब्राह्मणबालवृद्धातुरानाथदिभ्यो दीयमानं, स्वास्तिवाचनं शान्तिकपौष्टिकार्थे पुरोहिताय दीयमानम्, अन्तःपुरं देवीभोगिनीराजपुत्रेभ्यो देयं, महानसं पाकशालार्थो व्ययः, दूतप्रावर्तिमं दूतस्य परविषयगतागतप्रवर्तनार्थो व्ययः, कोष्ठागारं भोज्यद्रव्यावस्थानगृहं तन्निर्माणादिनिमित्तो व्ययः, आयुधागारम् आयुधनिर्माणशाला तद्रक्षणशाला च पण्यगृहं पण्यगृहार्थो व्ययः, कुप्यगृहं तत्सम्बद्धं धनं शाकतिनिशादिसारदारुवेणुवल्लीवल्कादिच्छेदनानयनरक्षाणादिविषयो व्यय इति यावत्, कर्मान्तः कृष्यादिव्यापारव्ययः, विष्टिः हठकारितकर्मार्थो व्ययः, पत्त्यश्वरथद्विपपरिग्रहः पत्त्यादिचतुष्टयार्थो व्ययः, गोमण्डलं गोमहिषमेषाद्यर्थो व्ययः, पशुमृगपक्षिव्यालवाटाः पशवो वन्यपशवः मृगा हरिणादयः पक्षिणः शुकशारिकादयः व्यालाः सिंहव्याघ्रादयः एषां वाटाः रक्षणस्थानानि तन्निमित्तो व्यय इत्यर्थः, काष्ठतृणवाटः काष्ठतृणवाटार्थो व्ययः, चशब्दादावश्यकव्ययान्तरपरिग्रहः, त एते द्वाविंशतिर्व्ययाः व्ययशरीरम्।

[कालविभागक्रमप्रदर्शनम्]

राजवर्षं मासः पक्षो दिवसश्च व्युष्टम् । वर्षाहेमन्तग्रीष्माणां तृतीय-सप्तमा दिवसोनाः पक्षशेषाः पूर्णाः । पृथगधिमासक इति कालः ।

[समाहर्तृचिन्तनीयाः अवशिष्टाः षडंशाः]

करणीयं सिद्धं शेषं आयव्ययौ नीवी च ॥

चाणक्यटीका

अत्र सप्तानाम् आयशरीराणां न यथाक्रमं सप्त आयमुखानि, किन्तु एकैकस्य सप्तेति । यद्व्ययशरीरमपि समुदयस्थापना (न्मा ? दा) यान्तरोत्पादनमुत्पद्यत इति तदप्यवेक्ष्यते । देवार्थं पुष्प्याद्युपहारः । पित्रर्थं श्राद्धादिः । पूजनार्थं वस्त्रालङ्कारादिः । दानार्थं तपस्विबालवृद्धादिभ्यः । स्वस्तिवाचनं प्रस्थानादौ दानम् । अन्तःपुरं स्त्रीकुमारादिभरणम् । महानसं स्वपाचनशाला । दूतप्रावर्तिमं स्वदूतेभ्यःपरदूतेभ्यो वा यद्दीयते प्राभृतकादि । कोष्ठागारादीनि तत्करणनिचयतद्व्यापृतपोषणव्यपाश्रयाणि । कर्मान्त इति आकारादिः । कर्मान्तो व्ययसाध्या विष्टिः । पत्यादि (पु ?) परिग्रहणं तत् परिचारकवर्गग्रहणार्थम् । गोमण्डलं चिकित्सनादिना व्ययाङ्गम् । मण्डलग्रहणं व्रजोपलक्षणार्थम् । महिषादीनां पत्परिचारकाणां च ग्रहणम् । पशवो युद्धार्थं ये परिगृहीता गवादयः । क्रीडार्थं मृगाः । पक्षिणश्च तथा । व्याला व्याघ्रसिंहादयः, एषां वाटाः परिग्रहा वा । काष्ठतृणानां वाटाः । तेषु कर्मकरेभ्यो दीयते । अपरे काष्ठानि तृणानि वाटाश्च आवरणानि गृहादीनां मूल्यदानादिति वर्णयन्ति । व्ययशरीरान्मुखं व्यतिरिक्तं वा नास्ति, स्वयं निर्गतत्वादिति नोक्तम् ।

श्रीमूला

राजेत्यादि । राजवर्षम् आ राजराज्याभिषेकादारब्धः संवत्सरः, मास, पक्षः, दिवसश्च, व्युष्टं राजवर्षादिचतुष्टयं व्युष्टसंज्ञमित्यर्थः । एतच्च अमुकराजवर्षेऽमुकपक्षे दिवसेऽ मुकपुरुषेणानीतमेतावद् धनम्, अद्यामुकपुरुषायैतावद् दत्तमिति रीत्या निबन्धपुस्तकादिषु लेख्यमिति बोद्धव्यम् । वर्षाहेमन्तेत्यादेरयमर्थः—राजवर्षस्य त्रिधा विभक्तस्य सिंहकन्यातुलावृश्चिकाश्चत्वारो रविमासा वर्षर्तुरित्येको भागः, धनुर्मकरकुम्भमीनाख्याश्चत्वारो हेमन्त इति द्वितीयः, मेषवृषभमिथुनकुलीराख्याश्चत्वारो ग्रीष्म इति तृतीयः । इत्येतेषां त्रयाणां भागानां ये प्रत्येकमष्टौ पक्षास्तेषु तृतीयपक्षे सप्तमपक्षे चैकैको दिवसो हीयते, अवशिष्टास्तु पक्षा अनूनदिवसा इति । पृथगिति । अधिमासकः अधिकः सौरमासादतिरिक्तः शुक्लप्रतिपदादिर्दर्शावसानश्चान्द्रो मासः, पृथग्, इति कालः उक्तप्रकारो व्यवहारार्थः कालो विज्ञेयः ।

करणीयादिषट्कमुद्दिशति—करणीयमित्यादि ।

[करणीयसिद्धशेषाणां प्रत्येकं षोढा विभजनेन तेषां निर्वचनम्]

संस्थानं प्रचारः शरीरावस्थापनं आदानं सर्वसमुदयपिण्डः सञ्जातम्—एतत्करणीयम् । कोशार्पितं राजहारः पुरव्ययश्च प्रविष्टं, परमसंवत्सरानुवृत्तं शासनमुक्तं मुखाज्ञप्तं चापातनीयम्—एतत्सिद्धम् । सिद्धिप्रकर्मयोगः दण्डशेषं आहरणीयं, बलात्कृतप्रतिस्तब्धं अवसृष्टं च प्रशोध्यम्—एतच्छेषम् असारमल्पसारं च ॥

चाणक्यटीका

व्युष्टमन्तरेणायव्ययपरिशुद्धिर्नास्तीति तदवेक्षेत । राजवर्षमिति । यस्य कस्याचिद् राज्ञो राजत्वादारभ्य यद्वर्षं मासः पक्षो दिवसश्चेति । तद्यथा—श्रीमहाराजे मगधाननुशासति द्वात्रिंशे वर्षे श्रावणमासे शुक्लपक्षे त्रयोदश्याम् इदमुत्पन्नमस्मादिदं व्ययितमत्र इति । वर्षाहिमन्तग्रीष्माणामिति लोकप्रतीत्या त्रित्वम् (क्र ? ऋ) तूनाम् । तथा वक्ष्याति—"कालः शीतोष्णवर्षात्मा" (अधि० ९ अध्या० १) इति । तृतीयसप्तमा इति । भाद्रपदकार्तिकपौषफाल्गुनवैशखाषाढपक्षाः (कृष्ण ?) दिवसोनाः । शेषा इति । प्रथमद्वितीयचतुर्थपञ्चमषष्ठाष्टमा इत्यर्थः । एष्वायव्ययौ परिशोध्यौ । येऽन्येऽधिकदिवसाः तैः पृथगेव अधिमासकः पिण्डनीयः, एतच्च कालमाने वक्ष्यति । अयं कालः "यथाकालमनागतानाम्" इत्यादौ प्रतिपत्तव्यः ॥

श्रीमूला

करणीयं षड्विधमाह—संस्थानमित्यदिना । तत्र संस्थानम् अमुकग्रामादियदादेयमिति क्लृप्तिः, प्रचारो देशः, शरीरावस्थापनं जनपदनगरयोरायशरीरमेतावदिति निश्चयः, आदानं धान्यहिरण्यादेर्यथाकालग्रहणं, सर्वसमुदयपिण्डः सर्वेषां समुदयानां पिण्डः प्रतिग्रामं प्रतिनगरं चोत्पन्नानां धनानां सङ्घातः तज्ज्ञानमित्यर्थः, सञ्जातं सर्वोपायलब्धधनेयत्ताज्ञानम्, एतद् उक्तं षट्कं, करणीयम् अवश्यकार्यत्वात् करणीयशब्दितम् ।

चाणक्यटीका

अस्मिंश्च काले करणीयादिकमवेक्ष्यम् । तत्र संस्थानं स्थितिः इदमनेनैव अस्मिन्नेव काले कर्त्तव्यमिति रा (जा) ज्ञा । प्रचारः प्रचरन्त्यस्मिन्निति योगविषयो देशः । शरीरावस्थापनमिति आयशरीरस्यावस्थापनं यथायथं कर्मभिः फलकल्पनम् । तद्यथा—"शुल्कं प्रवेश्यानां मूल्यपञ्चभागः" (अधि० २ अध्या० २२) इत्यादि । अथवा इयन्ति अत्रायशरीराणीति परिगणनम् । आदानं यथाकालं शुल्कदण्डादिग्रहणम् । सर्वसमुदयपिण्डः एतावत्सु ग्रामेषु ऐकध्येन एतवद्धिरण्यं धान्यं च राज्ञो भवतीति । अस्मादेव समुदयपिण्डाद् अस्मिन्नेव काले न्यूनमधिकं वा कालवशादिदमुत्पन्नमिति सञ्जातम् । एतदवश्यकर्त्तव्यतया करणीयमित्युच्यते ॥

११

श्रीमूला

सिद्धमाह—कोशेत्यादि । कोशार्पितं भाण्डागारिकहस्तेऽर्पितं, राजहारः राज्ञा स्वीयकार्यार्थं समाहर्तृसकाशाद् गृहीतं, पुरव्ययश्च पुरे शालानिर्माणाद्यर्थं व्ययितं धनं च, प्रविष्टं प्रविष्टशब्दितम् । परमसंवत्सरानुवृत्तम् अतीतवर्षसम्बद्धमप्रविष्टतया स्थितं, शासनमुक्तं राजाज्ञालेखनिरस्तं मुखाज्ञप्तं राजवाग्विश्राणितं च, आपातनीयम् आपातनीयशब्दितं समुदयाद् व्यवकलनीयमिति कृत्वा । एतत् प्रविष्टत्रिकमापातनीयत्रिकं चेत्युभयरूपं षट्कं, सिद्धं सिद्धशब्दितम् ।

षड्विधं शेषमाह—सिद्धीत्यादि । सिद्धिप्रकर्मयोगः सिद्धौ सिद्धधान्यादौ प्रकर्मयोगः स्वायत्तीकरणप्रवृत्तिरदत्तकरप्रवेशनार्था, दण्डशेषं सैन्यौपयुक्तावशिष्टद्रव्यं च, आहरणीयं सुखेनाहर्तुं शक्यत्वादाहरणीयसंज्ञम् । बलात्कृतप्रतिस्तब्धं राजवल्लभाद्याश्रयबलाददत्तं देयं प्रतिस्तब्धापरपर्यायम्, अवसृष्टं च पुरमुख्यैः कामचारादत्तं च, प्रशोध्यं प्रयत्नसाध्यत्वात् प्रशोध्यसंज्ञम् । एतद् उक्तमाहरणीयद्विकं प्रशोध्यद्विकं चेतीदं चतुष्टयमित्यर्थः, असारं प्रवेशनार्थे कृतेऽपि व्यये निष्फलम्, अल्पसारं च बहुव्ययसाध्याल्पफलं च, शेषं तत्संज्ञम् ।

चाणक्यटीका

कोशार्पितं कोशाध्यक्षहस्तोपनीतत्वान्नाक्षपटलेऽधिगतम् । राजभावः राज्ञो विहारादौ यदुपयुक्तम् । पुरव्ययः दुर्गसंस्कारार्थं यद् व्ययितम् । एतत् त्रयमपि प्रविष्टकाख्यं सिद्धम् ॥

परसंवत्सरानुवृत्तं पूर्वस्मिन् संवत्सरे य (द्वय ?त्रव्य) यितम् । शासनमुक्तं यत् परिहारपत्रेण प्रवेशार्हमेव प्रतिमुक्तम् । मुखाज्ञप्तं अस्यात्त्वया न ग्राह्यमिति साक्षादुक्तम् । एतत् त्रयम् (अपनीयार्थं ? आपादनीयं) विभावनीयमित्यर्थः । क्वचिच्चासिद्धमुत्पन्नत्वात् सिद्धमित्युच्यते ॥

सिद्धिप्रकर्मयोगः गृहकर्मप्रारम्भार्थं तत्कारि (भ्योऽव ? भ्यः उप) कारार्पितं यन्न तावत् तैः प्रत्यर्प्यते । अथवा कर्मकरणार्थं गतेन अधिकृतमनुष्येणोद्धृत्य यावदुपयुक्तं यत्तत् सिद्धिप्रकर्मयोग उच्यते । अध्यक्षस्य वा आजीवादेव शिष्यत इति शेषमुच्यते, दण्डादेः (कं ?) परिकल्पितस्य यदेकदेशाद्दत्तावशिष्टम् । तदुभयमाहरणीयाख्यम् अनवेक्ष्यैवादातव्यत्वात् । बलात्कृतप्रतिस्तब्धमिति बलात्कृतं बलात्कारः तेन वल्लभाटविकाद्याश्रयात् प्रतिस्तब्धम् अविहतसाधनं साध्यमानं निरुद्धमित्यर्थः । अवमृष्टं यन्मुख्यादिभिः बलादुपयुक्तम् । एतद् द्वयं प्रशोध्याख्यम् । विघ्नाद्युपशमनप्रकर्षेण आभिमुख्येन शोधनीयत्वात् । ए (तद्) द्विविधं शेषमसिद्धत्वादुच्यते । यत् करदमपि कुलम् असारं बीजावशेषत्वात् किञ्चिदपि दातुमसमर्थम् । तथा अल्पसारं भक्तबीजावशेषमुचिदादपि दातुमसमर्थम् । तदुभयमविशेषमेव अनादेयाख्यम् । पृथक्करणं प्रशोध्यमित्यनेन असंबन्धार्थम् ॥

[आयस्य प्रकारभेदेन द्विस्त्रेधा ततः पञ्चधा च विभजनेन तत्स्वरूपनिर्वचनम्]

वर्तमानः पर्युषितोऽन्यजातश्चायः। दिवसानुवृत्तो वर्तमानः। परमसांवत्सरिकः परप्रचारसङ्क्रान्तो वा पर्युषितः। नष्टप्रस्मृतमायुक्तदण्डः पार्श्वं पारिहीणिकमौपायनिकं डमरगतकस्वमपुत्रकं निधिश्चान्यजातः। विक्षेपव्याधित न्तरारम्भशेषश्च व्ययप्रत्यायः। विक्रये पण्यानामर्घवृद्धिः उपजा मानोन्मानविशेषो व्याजी क्रयसङ्घर्षे वा वृद्धिरित्यायः।

श्रीमूला

आयं त्रेधा विभज्य व्युत्पादयति—वर्तमान इति। आयः, वर्तमानः पर्युषितः अन्यजातश्च इति त्रिविधः। तत्र दिवसानुवृत्तः नित्यः, वर्तमानः। परमसांवत्सरिकः अतीतवर्षग्राह्यः वर्तमानवर्षे गृहीतः, परप्रचारसङ्क्रान्तः भूतपूर्वाध्यक्षकालप्रविष्टः—यद्वा शत्रुविषयादागतः, वाशब्दः समुच्चये, पर्युषितः तदाख्यः। नष्टप्रस्मृताद्यष्टकमन्यजात इत्याह—नष्टेत्यादि। नष्टप्रस्मृतं विस्मृताभिज्ञातमिति भाषाटीका। प्रशब्द इह प्रकर्षे न तु धात्वर्थविपरीतत्वे इति तत्पक्षे वक्तव्यम्। नष्टमपगतं प्रस्मृतं विस्मृतमिति तु कोष्ठागाराध्यक्षप्रकरणे भट्टस्वामी। आयुक्तदण्डः तत्तत्कार्याध्यक्षेभ्योऽपराधिभ्यो गृहीतो दण्डः, पार्श्वं करातिरेचनलक्षणवक्रोपायलब्धं धनम्। प्रभुत्वाधिगम्यमिति केचित्। पारिहीणिकं चतुष्पदविनाशितसस्यदण्डाधिगम्यं धनम्, औपायनिकम् उपायनत्वेन गृहीतं, डमरगतकस्वं डमरः शत्रुकलहविप्लवः तदवसरे शत्रुसैन्यादपहृत धनम्, अपुत्रकम् अविद्यमानदायादकं धनं, निधिश्च निधिलाभश्च, अन्यजातः अष्टावेतेऽन्यजातशब्दिताः। आयस्य प्रकारान्तरमाह—विक्षेपेत्यादि। विक्षेपव्याधितान्तरारम्भशेषश्च विक्षेपशेषः, किञ्चित्कार्यसाधनाय नियुक्तस्य सैन्यस्यार्थे व्ययितावशिष्टं धनं व्याधितशेषः, भेषजशालाव्ययितशिष्टम् अन्तरारम्भशेषः, दुर्गप्रासादादिनिमित्तव्ययितावशिष्टम् इत्येतत् त्रिकं, व्ययप्रत्यायः तदाख्ययोच्यते। पुनरप्यायस्य पाञ्चविध्यमाह—विक्रय इत्यादिना। विक्रये पण्यानामर्घवृद्धिः क्लृप्ताभ्यधिकेन मूल्येन पण्यविक्रयाल्लब्धमधिकं धनं विक्रेतृसकाशादुपस्थापितम्, उपजा प्रतिषिद्धविक्रयलब्धं, मानोन्मानविशेषः मानोन्मानयोर्विशेषकरणेन मेयाधिक्यसम्पादनाल्लब्धं, व्याजी विशंतिभागः पुनर्मीयमानमेयोनतापरिहारार्थमधिकतया गृह्यमाणः, क्रयसङ्घर्षे वृद्धिः स्पर्धया मूल्यवर्धनाल्लब्धं, वाशब्दश्चकारार्थः। इत्यायः उक्तप्रकारेणायो व्याख्यातः। भाषाटीका तु नष्टप्रस्मृतादिकमन्तरारम्भशेषान्तमेकादशकमन्यजातभेद इति, व्ययप्रत्यायादिषट्कमायस्य प्रकारान्तरमिति च व्याचष्टे। तत्तु 'विक्षेपव्याधितान्तरारम्भशेषञ्च व्ययप्रत्यायः' इति कोष्ठागाराध्यक्षवक्ष्यमाणग्रन्थेन विरुध्यते।

[व्ययविभागः तत्स्वरूपाणि च]

नित्यो नित्योत्पादिको लाभो लाभोत्पादिक इति व्ययः। दिवसानुवृत्तो

चाणक्यटीका

दिवसानुवृत्तो यः प्रतिदिवसमुत्पद्यैव वर्त्तमान आयः। परमसांवत्सरिकः यत् परमसंवत्सराध्यसनम् ऐषमस्याध्यस्यते। परपचारसङ्क्रान्तः''''''यान्यस्याध्यक्षस्य कर्मकाले जात ऐषमः, तत एवाध्यक्षान्तरं सञ्चारितः। अयं पर्युषित इव पर्युषितः। नष्टप्रस्मृतः प्राग्दृष्टः पश्चात्काले न स्मृतः। आयुक्तदण्डः अध्यक्षाणां यथा (वर ? पराध) दण्डः। पार्श्वमुत्कोचद्रव्यम्। अस्य पार्श्वतो हस्ता (द्) दीयमानत्वात्। पारिहीणिकं परिहीणो यो बलान्निर्गतः तस्य यद्धनं प्रवलीधनमित्यर्थः (?)। अन्यस्त्वाह—भृत्यविक्षेपादौ यत् परिहीयते तद्द्विगुणमादीयमानं पारिहीणिकम्। आयुक्तदण्ड एवेदमिति चेत्, परिहीणस्य प्रत्यानयनं पारिहीणिकम्। तावन्मात्रदण्डस्तु त्रिगुणश्चतुर्गुण इत्यादिकः। औपायनिकम् उपायनाद्यद् भवति। (स ? ड) मरगतस्वं यत् परविषयलोपाज्जातं द्रव्यम्। अथवा यच्छत्रुविषयं ह् (? हि) त्वा अधमर्णादागतानां डामरिकाणां स्वमाच्छिद्यानीतम्। अपुत्रकम्, अपुत्रान्मृतादुद्भवति। निधिश्च स्वयं दृष्टोऽन्यदृष्टो वा। अयं यथोचितादानहेतोर्वार्तादिकर्मणोऽन्येन प्रकारेणायातः निरुपादानकारणः अन्यजात इत्युच्यते॥

सोपादानमन्यमाह—व्ययप्रत्यायः हिरण्ये (जा ? दा) तव्ये कुप्यभूम्यादीनां दानाद् यो व्याज (?) लाभः, अथवा प्राग्रहेरभावाद् (?) व्ययस्य प्रत्यागमनमिति व्ययप्रत्यायः। पण्यानामिति विक्रेयराजपण्यानां यदर्घस्याधिक्यम्। उपजा या मूलातिरिक्तात् (?) सञ्ज्ञातग्रहणेन यदधिकमुपजायते। मानोन्मान इति मानं प्रस्थादि उन्मानं तुलादि। तदवशेष इति अधिकेनादाय हीनेन व्ययक्रियायां यदधिकमुत्पद्यते। व्याजी द्विविधा, उचिता अनुचिता च। या उचिता सा प्रागायमुखेऽभिहिता। इह तु राजदोषाज्जनपददोषाद्वा रचिता। पञ्चकं शतमुचिता व्याजी। तस्यैतदधिकग्रहणादनुचिता भवति। यथोक्तम्—

"प्रजानां दोषबाहुल्याद् राज्ञां वा भावदोषतः।
रूपव्याज्याव धर्मिष्ठे धर्म्या तु प्रकृतिः स्मृता॥" इति।

(अधि० २ अध्या० १७)

क्रयसङ्घर्ष इति द्वयोः क्रेत्रोः एकैकस्य द्रव्ये स्पर्धायां वृद्धौ राजाहार्या। अयमायत्यानियत (?) इति वा आयः॥

श्रीमूला

अथ व्ययमाह नित्य इति। नित्यो नित्योत्पादिकः लाभो लाभोत्पादिक इति

नित्यः; पक्षमाससंवत्सरलाभो लाभः तयोरुत्पन्नो नित्योत्पादिको लाभोत्पादिक इति ।

[नीवीपदार्थः तद्विभागश्च]

व्ययसञ्जातादायव्ययविशुद्धा नीवी, प्राप्ता चानुवृत्ता चेति ।

[आयापेक्षया व्ययस्य न्यूनत्वावश्यकता]

एवं कुर्यात् समुदयं वृद्धिं चायस्य दर्शयेत् ।
ह्रासं व्ययस्य च प्राज्ञः साधयेच्च विपर्ययम् ॥५९॥

इत्यध्यक्षप्रचारे समाहर्तृसमुदयप्रस्थापनं षष्ठोऽध्यायः ।
आदितः सप्तविंशः ।

श्रीमूला

चतुर्विधो व्ययः । तत्र दिवसानुवृतः प्रात्यह्निको व्ययः नित्यः । पक्षमाससंवत्सरलाभ इति । तादर्थ्यासावध्यर्थ्यं, पक्षलाभार्थो मासलाभार्थः । संवत्सरलाभार्थश्च व्ययः लाभः लाभशब्दितः । तयोर्नित्यलाभयोः, उत्पन्नः तत्र नित्योत्पन्नो लाभोत्पन्नश्च व्ययः, नित्योत्पादिको लाभोत्पादिक इति व्यपदिश्यत इति शेषः । यथाक्रमं च सम्बन्धः । क्लृप्तवेतनातिरेकेण एतावतो नित्यव्ययस्यैतावदिति विशेषतः कर्मकरेभ्यो यद् दीयते स व्ययो नित्यव्ययोत्पन्नत्वान्नित्योत्पादिकशब्दितः, एतावतो लाभनिमित्तव्ययस्यैतावदिति विशेषतस्तेभ्यो यद् दीयते स लाभाख्यव्ययोत्पन्नत्वाल्लाभोत्पादिकशब्दित इति विवेक्तव्यम् ।

सर्वव्ययावशेषो नीवीत्याह—व्ययेत्यादि । व्ययसञ्जाताद् व्ययसमष्टेः सर्वव्ययद्वारेभ्य इत्यर्थः, उत्थितेति शेषः, आयव्ययविशुद्धा आयव्ययसम्यग्गणनपरिनिश्चिता, नीवी नीवीशब्दितं द्रव्यमित्यर्थः । सा च द्विप्रकारा प्राप्ताचानुवृत्ता चेति । तत्र प्राप्ता भाण्डागारं प्रविष्टा अनुवृत्ता तत्प्रवेशाय प्रस्थितेति ज्ञेयम् ।

चाणक्यटीका

दिवसानुवृत्तः दिवसे दिवसेऽनुवृत्तः महानसादिव्ययः । लाभ इति यः पक्षादिषु इति तादर्थ्यात् ताच्छब्द्यं, पक्षलाभार्थो मासलाभार्थः संवत्सरलाभार्थश्च व्ययः, भृत्यानामनित्योऽपि कर्मापेक्षया लाभः । क्रमोल्लङ्घनं सङ्क्षेपाबाधनार्थम् । तयोरिति नित्यलाभयोः निमित्तवशात् पाकद्वैगुण्यं नित्योपादिकः । कर्मविशेषात् पक्षादिषु भृतिद्वैगुण्यं त्रैगुण्यं वा लाभोत्पादिक इति ॥

(सञ्जात भृति यथोक्तेभ्यः आयस्थाने यस्यायमुत्पन्नं तस्मात् सञ्जातायाः आयः व्ययः (आस्थापयिता) अवशिष्ट उपनयार्हो द्रव्यपिण्डः नीवीत्युच्यते । अध्यक्षस्य व्यवहारप्रच्छादनेन नीवीसाधर्म्यात् । सा द्विविधा प्राप्ता उपसंहृता । अप्राप्ता पुरग्रामायुक्तकादिषु यथायथं स्थितेति ॥

श्रीमूला

अध्यायान्ते श्लोकमाह—एवमिति। एवम् उक्तैः, प्रकारैः समुदयं धनोत्पत्तिं, कुर्यात्, आयस्य वृद्धिं च, व्ययस्य ह्रासं च दर्शयेत् समाहर्ता। स कीदृशः, प्राज्ञः प्रजानुपपीडयाऽऽयवृद्धिप्रदर्शने कर्मकरानुपपीडया व्ययह्रासप्रदर्शने च निपुणः विपर्ययं च साधयेत् आयव्यययोर्वृद्धिह्रासवैपरीत्यं यदि यदृच्छयोपनमेत् तदपि वारयेदित्यर्थः, यद्वा विपर्ययं व्ययवृद्धिमपरिहार्यतया प्रसक्तां कालान्तरभाव्यायवृद्ध्युपायनिश्चयेन-समर्थयेदपीत्यर्थः।

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधि-
करणे षष्ठोऽध्यायः समाहर्तृसमुदयप्रस्थापनम्।
आदितः सप्तविंशः॥

चाणक्यटीका

एवमिति। अन··एतेनैव··वृद्धिम् आयव्ययशरीरापेक्षया दर्शयेद् इदं मया वर्धितम् इति। व्ययस्य (प्रायं ? ह्रासं) वृथादानादिपरिहारेणायं मया व्ययोऽप्यधिक इति (?)। प्राज्ञ इति न जनपदपीडया संवर्धयेत्। न पुरुषकर्म···व्ययं ह्रासयेत्। (एवं यदि ? विपर्ययमि) ति आयह्रासं दैवाद्युपद्रवजं व्ययवृद्धिं स्वपरचक्रोपद्रवजं साधयेदपनयेदित्यर्थः। प्रज्ञापयेद्वा स्वामिने। अस्मात् कारणादेतदुभयं विपर्यस्तं मिथ्यात्मदोषनिवृत्त्यर्थमिति॥

इति समाहर्तृसमुदयप्रस्थापनं षष्ठं प्रकरणम्।
॥ षष्ठश्चाध्यायः॥

पञ्चविंशं प्रकरणम्

सप्तमोऽध्यायः ।

अक्षपटले गाणनिक्याधिकारः ।

[गणने नियुक्तानां सङ्गीभूय लेखनादिकर्मंकरणार्थं
शालानिर्माणविधिः]

अक्षपटलं अध्यक्षः प्राङ्मुखमुदङ्मुखं वा विभक्तोपस्थानं निबन्धपुस्तकस्थानं कारयेत् ।

श्रीमूला

अक्षपटले गाणनिक्याधिकार इति सूत्रम् । अक्षपटले अक्षाणां द्रव्याणां पटले गणनपुस्तकलेखनादिकर्मानुष्ठानदेशे, गाणनिक्याधिकारः गाणनिका गणननियुक्तास्तेषां कर्म गाणनिक्यं तस्याधिकारः प्रस्ताव इह क्रियत इति सूत्रार्थः । अर्थोपधाशुद्धा अर्थसम्बद्धे कर्मणि नियोक्तव्या इत्युक्तमधस्तात् । स पुनरर्थव्यापार इदानीमभिधीयत इति सम्बन्धः ।

अक्षेत्यादि । अध्यक्षः आयुक्तप्रधानः अक्षपटलं तत्तदध्यक्षाणां सम्भूयस्वस्वकर्मानुष्ठानदेशं कारयेत् । कीदृशं, प्राङ्मुखमुदङ्मुखं वा, दिग्द्वयोपादानं तन्मुस्य माङ्गलिकत्वद्योतनायाताद‍ृशस्य वैपरीत्यद्योतनाय च । पुनः कीदृशं, विभक्तोपस्थानं विभक्तानि उत्तममध्यमाधमानामध्यक्षाणां पृथक्स्थित्यनुकूलतया विभज्य विहितानि उपस्थानान्यन्तःकक्ष्याः यस्मिस्तत् तथाभूतम् । पुनः कथम्भूतं, निबन्धपुस्तकस्थानं गणकपुस्तकनिवेशाधिष्ठानभूतम् ।

चाणक्यटीका

समाहर्तृसमाहृतस्य समुदयस्य प्रतिग्रहीता सन्निधाता । तेन च गणनानवेक्षितं न प्रतिगृह्यत इति गाणि (? गणना) व्यापार उच्यते । अथवा (क्रयात् पुनः प्रक्रीयतेषां कर्मनित्य ?) आयव्यय नीवीसङ्कलनम्, तस्य अधिक्रिया अधिकारः, तस्य स्थानमक्षपटले गाणानिक्याधिकारः, तस्य तावद् गृहमेवाह अक्षपटलमिति । अक्षाणि गणकोपकरणानि परिच्छेदसाधनतया इन्द्रियाणीव तुलादीनि, तेषां पटलं गृहम् । अध्यक्ष इति सन्निधाने परिज्ञाय सम्यङ् निधातव्यमिति । अथवा तृतीयोऽ(ध्य?)क्षपटलाध्यक्षोऽयमक्षपटलिक इत्याह । उपतिष्ठन्त्यस्मिन् स्वकर्मपरिशुद्ध्यर्थमध्यक्षा इति उपस्थानं कर्मोद्देशः स्वभाण्डनिक्षेपस्थापना विभक्तं यस्य । निबन्धनं निबन्धो लेख्यं तस्य यत् पुस्तकस्य स्थानम् ॥

[तत्र पुस्तकेषु लेखनीयाः अंशाः]

तत्र अधिकरणानां सङ्ख्यां, प्रचारसञ्जाताग्रं, कर्मान्तानां द्रव्यप्रयोगे वृद्धिक्षयव्ययप्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं। रत्नसारफल्गुकुप्यानां-

---

श्रीमूला

निबन्धपुस्तकेषु लेखनीयं वस्तुजातमाह—तत्रेति। तत्र अक्षपटले, अधिकरणानां सङ्ख्याप्रचारसञ्जाताग्रं द्रव्योत्पत्तिस्थानानां संख्यां नामतः परिगणनं, प्रचारसञ्जातयोरग्रं च प्रचारो जनपदः सञ्जातं सर्वोत्पत्तिसमुदायः तयोरियत्तां च निबन्धपुस्तकस्थं कारयेत् एतावद्भ्य उत्पत्तिस्थानेभ्य इयत्परिमाणे जनपदे प्रत्यब्दमेतावद् धनमुत्पद्यत इति निबन्धपुस्तके लेखयेदित्यर्थः। कर्मान्तानां द्रव्यप्रयोगे कर्मान्ताः खनिधान्योत्पत्तिभूमिपण्यरूप्यादिकर्मस्थानानि तत्सम्बद्धे द्रव्यप्रयोगे तत्तत्कर्मकरेभ्यो द्रव्याणां विनियोग इत्यर्थः, वृद्धिक्षयव्ययप्रया मव्याजीयोगस्थानवेतनविष्टिप्रमाणं वृद्धि क्षयव्ययादीनामष्टानां प्रमाणं च, निबन्धपुस्तकस्थं करयेत्। तत्र वृद्धिः कुसीदं, क्षयः युग्यपुरुषविनियोगः, व्ययः धान्यहिरण्यविनियोगः, प्रयामः सिद्धधान्यराशिः क्रयादरो वा, व्याजी तुलादण्डसम्बद्धा दण्डव्याजी प्रस्थमानसम्बद्धा मानव्याजी चेत्युभयविधा, योगो द्रव्यापद्रव्यमिश्रणं, स्थानं ग्रामदिकं, वेतनं कर्मकरवृतिः, विष्टिः बलकारितं कर्म। रत्नसारफल्गुकुप्यानां-

चाणक्यटीका

तत्रेति। अक्षपटले स्थिते। अधिक्रियते येषु अध्यक्षास्तेषाम् अधिकरणानामायशरीराणाम्। सङ्ख्याम् एतावत्यस्मिन् राष्ट्रे आयशरीराणि इति। प्रचारम् अस्याधिकृतस्यैतावान् देशो यत्रानेन प्रचरितव्यमिति। सञ्जाताग्रं सञ्जातहिरण्यपरिमाणम् एतावदत्रोत्पद्यत इति। निबन्धपुस्तकस्थं कारयेदिति वक्ष्यमाणेन सम्बन्धः। कर्मान्तानां यथायोगं प्रवृत्तानाम्। द्रव्यप्रमाणम् अस्मिन् कर्मान्ते द्रव्याणीयन्ति लोहादीन्युत्पद्यन्ते। इयन्तः कटकरूपादयः प्रयोगाः। प्रकृतस्य द्रव्यसंस्कारे सति, इयती मूल्यवृद्धिः। सुवर्णादीनां कर्मणि इयान् क्षयः। वक्ष्यति हि—"तप्तकलधौतकयोः काकणिकः सुवर्णे क्षयो देयः (अधि० २ अध्या० १४) इति। कर्मकरणां भक्तादीनामियान् व्ययः, (इयाधियाममायाभ्रि ? इयानधिक आयमान्या) ह्रियमाणस्य। वक्ष्यति हि—"पूर्वयोः (पञ्चपलिकः प्र) यामो मांस (लोह) लवणमणिवर्जम्"—(अधि० २ अध्या० १९) इति। व्याजीति अधिकलाभः। तद्यथा—"रूपिकमष्टकं शतं व्याजीति ब्रूयात्।" योगो द्रव्यसंयोग इत्यर्थः। तद्यथा—"तीक्ष्णकाकणी रूप्यद्विगुणो रागप्रक्षेपः" (अधि० २ अध्या० १४) इति। इयन्ति कर्मान्तानां स्थानानि। इयदस्मिन् कर्मणि वेतनं भृतिः। इयद्भिर्विष्टिभिरिदं कर्म क्रियत इति व्यवस्था, न विक्रमार्थमेतत्। (एकदेशंविध ? एवंविधं) निबन्धपुस्तकस्थं कारयोदिति सम्बन्धः।

अर्घप्रतिवर्णकप्रतिमानमानोन्मानावमानभाण्डं, देशग्रामजातिकुलसङ्घानां धर्मव्यवहारचरित्रसंस्थानं, राजोपजीविनां प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं, राज्ञश्च पत्नीपुत्राणां रत्नभूमिलाभं, निर्देशौत्पातिकप्रतीकारलाभं,

---

श्रीमूला

अर्घप्रतिवर्णकप्रतिमानमानोन्मानभाण्डं रत्नादीनां चतुर्णामर्घादिषट्कं, निबन्धपुस्तकस्थं कारयेत्। तत्र अर्घं मूल्यं, प्रतिवर्णको वर्णगुणः, प्रतिमानं मापगुञ्जादि, मानम् आकृतिपरिच्छेदः, उन्मानमूर्ध्वमानं, भाण्डं मूलधनम्। देशग्रामजातिकुलसङ्घानां देशः पूर्वदेशमध्यमदेशादिः, ग्रामः प्रसिद्धः, जातिर्ब्राह्मणादिः, कुलं गोत्रं सङ्घगणः एषां पञ्चानां, धर्मव्यवहारचारित्रसंस्थानं धर्मः यजनादिः स्मृत्युक्तः, व्यवहारो दायभागः, चारित्रं समुदाचारो देशादिप्रतिनियतो मातुलकन्यापरिणयादिलक्षणः तेषां संस्थानमविचालनं यद्वा स्वरूपं, निबन्धपुस्तकस्थं कारयेत् राजोपजीविनां, प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं प्रग्रहः पूजा मन्त्रिपुरोहितादीन् प्रति प्रत्युद्गमनबहुमानः, प्रदेशो वासस्थानं, भोग उपायनं परिहारः, करमुक्तिः, भक्तम् अश्वगजपदात्यभ्यवहारः, वेतनं भृतिः इत्येषां लाभं, निबन्धपुस्तकस्थं कारयेत्। राज्ञः पत्नीपुत्राणां पत्नीनां पुत्राणाञ्च-रत्नभूमिः लाभं तदुपयुज्यमानानां रत्नानां भूमीनां स्थानायादीनांच लाभं निबन्धपुस्तकस्थं कारयेत् निर्देशौत्पादिकप्रतीकारलाभं निर्देशं राजतत्पत्नीपुत्राणां नित्यदेयातिरिक्तं देयं सामन्तव्यपदेशाख्यम् औत्पादिकलाभम् उत्सवादिभवं धनलाभं प्रतीकारलाभं व्याध्यादिप्रशमननिमित्तं धनलाभं च, निबन्धपुस्तकस्थं कारयेत्। औत्पत्तिकेति

चाणक्यटीका

रत्नसारफल्गुकुप्यानां प्रत्येकदिवसवार्तया अर्घविशेषम्। यथासाभ्भवं चैषां प्रतिवर्णकं वर्णमानकम्। मानभाण्डं प्रस्थादि काष्ठमयम्। प्रतिमानभाण्डम् अयोमयादि। उन्मानभाण्डं तुला। अवमानभाण्डमपि तन्त्रादिपरिच्छेदार्थम्। रज्जवः शलाकाः

तथा देशादीनां प्रत्येकं धर्मादिचतुष्टयम्। धर्म आचारः। यथा—पण्यादीनां नागरागममुद्दिश्य आवरणे सर्वातिथ्यम् (?)। व्यवहारः साक्षिभिर्विशिष्टैर्निर्णयो धर्मस्थीयकृतप्रपञ्चः यथा—पण्यापण्यादीनामेवं कर्त्तव्यम्, नागरागपुत्रिकापुत्राः औरसेन समानदायादाः। चरित्रं चरितम्। यथा—वन्धानामेव राजगृहे कुटुम्बिगृहं प्रवेष्टव्यम् (?)। संस्थानं संस्थितिः राजाज्ञा, अत्रेदं कर्त्तव्यम् इदं न कर्त्तव्यमिति। जातिर्ब्राह्मणादिः। कुलं गोत्रम् माठरादिः। सङ्घः लिच्छविप्रभृतीनामिति।

राजोपजीविनां मन्त्र्यादीनाम्। प्रग्रहः प्रत्युत्थानादिपूजा। प्रदेशः पारितोषिकदानम्, यथार्हं वा समाविप्रकृष्टस्थानम्। भोगो ग्रामक्षेत्रादिः। परिहारः तस्यानादानम्। भक्तं दिवसानुवृत्तम्। वेतनं प्रतिवर्षं भृतिः। एषां वा यथोचितानुष्ठानार्थम्।

मित्रामित्राणां च सन्धिविक्रमप्रदानादानं, निबन्धपुस्तकस्थं कारयेत् ।

ततः सर्वाधिकरणानां करणीयं सिद्धं शेषं आयव्ययौ नीवीं उपस्थानं प्रचारचरित्रसंस्थानं च निबन्धेन प्रयच्छेत् ॥

[जानमतिकृतिशक्त्याद्यानुगुण्येन अध्यक्षपदवीनियोजनम्,
कुपथप्रवृत्ताध्यक्षनष्टद्रव्यभागिनां निर्देशश्च]

उत्तममध्यमावरेषु च कर्मसु तज्जातिकमध्यक्षं कुर्यात्; सामुदायिकेष्व-

---

श्रीमूला

पाठे भूकम्पनिर्घाताद्युत्पातदोषशान्त्यर्थं धनलाभमित्यर्थो बोद्धव्यः । मित्रामित्राणां, सन्धिविक्रमप्रदानादानं च मित्रेषु सन्धाय प्रदीयमानं धनम् अमित्रेषु विक्रम्य विगृह्य आदीयमानं धनं च निबन्धपुस्तकस्थं कारयेत् ।

तत इति । सर्वाधिकरणानां सर्वेषां कर्मस्थानानाम् अर्थात् तदध्यक्षाणां, सिद्धं शेषम् आयव्ययौ नीवीं करणीयादिष्टकं पूर्वाध्यायोक्तलक्षणम्, उपस्थानं कायस्थानां स्वस्वकार्यदर्शनार्थंसन्निधानकालं, प्रचारचरित्रसंस्थानं च प्रचारो जनपदः चरित्रमाचारः संस्थानं पूर्वस्थितिरित्येतत्त्रिकं च, निबन्धेन प्रयच्छेत् निबन्धपुस्तके दद्यात् ।

उत्तमेत्यादि । उत्तमध्यमावरेषु कर्मसु तज्जातिकं तदनुरूपम्, अध्यक्षं कुर्यात् ।

चाणक्यटीका

रत्नलाभमिति नियमार्थं प्राधान्यात्, वस्त्रादिलाभनिव (द्धे ? न्धे) तु कामचारः । राज्ञः इत्यसमासकरणं भक्तवेतनलाभनिवन्धार्थम् । इदं क्रियतामिदं (नी ? दी) यतामिति राजादेशो निर्देशः तदनुस्मरणार्थम् । औत्पातिकं तदादिष्टमनादिष्टं वा सुखपरिबोधनार्थम् । यथा—प्रवृत्ते कर्मणि उपनिपतितापत्प्रतीकारार्थम् इदमस्मिन् कालेऽव्य (य ? यि) मिति प्रतीकारलाभम् आत्मविशुद्ध्यर्थम् । तथा मित्रस्य सन्धा (व) पि यद्दत्तम् इयद्वाऽस्मादात्तम् । एवं विग्रहकार्यार्थमिदमुपेक्षया दत्तम् एतदुपेक्षया वा अस्मादियदात्तमिति । तथा शत्रोः स (काशा) दपि इयद्दत्तमिदमात्तम्, विग्रहे युद्धे इयद्रक्षाया अस्मै दत्तम्, अस्माद्विलोपादिना इयदात्तमिति निबन्धक्लृप्तं कारयेत् ।

तत इति निबन्धपुस्तकादुद्धृत्य । सर्वाधिकरणानामायशरीराणाम् । उपस्थानं सङ्कलनकालं प्राग् आषाढ्या युष्माभिरुपस्थातव्यमिति । निबन्धनेनेति-पत्रशासनेन । प्रयच्छेद् अर्थात् सर्वाधिकृतेभ्य इति । प्रचारसंस्थानयोः करणीयान्तर्गतत्वात् पुनस्तद्ग्रहणं प्राधान्यख्यापनार्थम् । विशेषेण प्रचारसंस्थाने प्रयच्छेदित्यर्थः । वक्ष्यति—"प्रचारचारित्रसंस्थानान्यनुपलभमानो हि प्रकृतः समुदयमज्ञानेन परिहापयति" इति ।

वक्लृप्तिकं व्यमुपहत्य न राजाऽनुतप्येत । सहग्राहिणः प्रतिभुवः कर्मोपजीविनः पुत्राः भ्रातरो भार्या दुहितरो भृत्याश्चास्य कर्मच्छेदं वहेयुः

[वेतनदानोपयोगिसंवत्सरादिविभागः]

त्रिशतं चतुःपञ्चाशच्चाहोरात्राणां कर्मसंवत्सरः. तमाषाढीपर्यवसानं ऊनं पूर्णं वा दद्यात् । करणाधिष्ठितमधिमासकं कुर्यात् ॥

श्रीमूला

तत्रोत्तमं कर्म धनसङ्ग्रहणं भाण्डागाराधिकारश्च मध्यमं कोष्ठागारायुधागारादिगतं कर्म, अवरं सुरासूनाद्यध्यक्षकर्म । तज्जातिकानां बहुत्वे व्यवस्थार्थमाह—सामुदायिकेष्विति । सामुदायिकेषु एककर्मसाधकसमुदायान्तर्गतेषु बहुषु कर्मकरेषु मध्ये, अववलृप्तिकम् अववलृप्तिर्नाम असावदः कर्माध्यक्षयितुं क्षम इति नैपुणगुणकीर्त्युपलम्भमूला संभावना साऽस्मिन्नस्तीत्यववलृप्तिकस्तं यथोक्तसम्भावनाविषयमित्यर्थः । अयमभिप्रायः— कर्मकरेषु नैपुणयुक्तं समनैपुणेषु गुणयुक्तं समगुणेषु च कीर्तियुक्तमध्यक्षं कुर्यादिति । अववलृप्तिकमपि किं सर्वमेवाध्यक्षं कुर्यात्, नेत्याह—यमुपहत्य न राजानुतप्येति । राजा, यम् उपहत्य अपराधवशाद् दण्डयित्वा, नानुतप्येत पश्चात्तप्तो न भवेत्, तं तथाविधमवक्लृप्तिकमध्यक्षं कुर्यादिति सम्बन्धः । एतेन ब्राह्मणात्मबन्धुमहासम्बन्धिनां व्युदासः सिद्धः ।

अपचरदध्यक्षविषयं सामान्यन्यायमाह—सहग्राहिण इति । अस्य कर्मच्छेदम् अनेनाध्यक्षेणादत्तं देयशेषं, सहग्राहिणः सहहर्तारः, प्रतिभुवो लग्नकाः, कर्मोपजीविनः कर्मकराः सङ्ख्यायकाः, पुत्राः, भ्रातरः, भार्याः, दुहितरः, भृत्याश्च इत्येतेऽष्टौ, वहेयुः प्रापयेयुः पूर्वपूर्वाभावे यथोत्तरं दद्युरित्यर्थः ।

त्रिशतमिति । अहोरात्राणां त्रिशतं चतुष्पञ्चाशच्च कर्मसंवत्सरः चतुष्पञ्चाउत्त (ममध्य) माधमेति । सन्निधातृसमाहर्त्रादिविषयमुत्तमं कर्म महाफलत्वात् ।

चाणक्यटीका

कुप्यासुधागारादिविषयं मध्यमफलत्वात् । सुरासूनादिविषयमल्पफलत्वात् तज्जातिकमिति जातिरेव जातिकं तदस्यास्तीति (तज्) जातिकं तत्प्रकारमुत्तमादिकम् । समग्रपादहीनार्धामात्यसम्पदुपेतमित्यर्थः । सामुदायकेष्विति । समुदयप्रयोजनेष्वायस्थानेषु । अवक्लृप्तिकमिति (अवक्लृप्तम्) आयच्छेदपूरणं तदस्यास्तीति न निःस्वमित्यर्थः । अपि च तथाविधमप्यपराधे सति यमुपहत्य शारीरेण हैरण्येन वा दण्डेन, स्नेहात् तत्पक्षप्रक्षेपाद्वा दुष्कृतमिदं मयेति (राजा) नानुतप्येत ॥

सहग्राहिणो यैः सम्भूय कर्म कृतम् । प्रतिभुवो लग्नकाद् यत् कर्म कृतम् । कर्मोपजीविनो यैस्तदेव कर्मोपजीव्यते सङ्ख्यायकलेखकैः । अस्येति अध्यक्षस्य विपन्नस्य प्रोषितस्य वा । कर्मच्छेदमिति कर्मजफलस्य अर्धकृतस्य कर्मणः छेदं वहेयुः पूर्वपूर्वाभावे ।

[चारद्वारा देशवृत्तान्तज्ञानस्यावश्यकता, तदभावे
धनहानिः तत्र हेत्वष्टकनिर्देशश्च]

अपसर्पाधिष्ठितं च प्रचारम् । प्रचारचरित्रसंस्थानान्यनुपलभमानो हि प्रकृतः समुदयं अज्ञानेन परिहापयति, उत्थानक्लेशासहत्वादालस्येन, शब्दादिष्विन्द्रियार्थेषु प्रमादेन, सङ्क्रोशाधर्मानर्थभीरुर्भयेन, कार्यार्थिष्वनु-

---

श्रीमूला

शदधिकत्रिशतसङ्ख्याका दिवसाः सर्वकर्मविषय एकः संवत्सरो गण्यते । तत्र दिवसषट्कोनता ऋतावृतावेकदिवसह्रासाद् बोद्धव्या । तं कर्मसंवत्सरम् आषाढीपर्यवसानं दद्यात् आषाढमासपूर्णिमान्तम् अर्थाच्छ्रावण मासोपक्रमं कल्पयेत् । ऊनं पूर्णं वा दद्यात् तं चाध्यक्षस्यान्तरालकालापगमे तावत्पर्यन्तमपूर्णं गणयेत्, पूर्णकालस्थितिपक्षे तु पूर्णं गणयेत् कर्मभृतिशोधनादावित्यर्थः । अधिमासकं करणाधिष्ठितं गणकाधिष्ठितं गणकद्वारेण गणितं कुर्यात् । प्रचारं च जनपदं च अपसर्पाधिष्ठितं चारावेक्षितं, कुर्यात् ।

अपसर्पाप्रणिधाने दोषमाह—प्रचारेत्यादि । प्रचारचरित्रसंस्थानानि देशवृत्तान्तान् तत्पूर्वास्थितीश्च, अनुपलभमानः अपसर्पद्वारेणाविजानन्, प्रकृतः अध्यक्षः, अज्ञानेन हेतुना, समुदयं धनोत्पत्तिं परिहापयति परिहीयमानं प्रयोजयति । पुनः केनकेन हेतुनेत्येतद् उत्थानेत्यादिनाऽभिधीयते । उत्थानक्लेशासहत्वादालस्येन उद्यमखेदासहनत्वनिमित्तयाऽलसतया, शब्दादिषु इन्द्रियार्थेषु प्रमादेन गीतकामिन्यादिषु विषयेष्वनवधानप्रवृत्त्या संङ्क्रोशाधर्मानर्थभीरुर्भयेन निन्दाधर्मलोपानर्थोपनिपातशङ्कित्वमूलेन साध्वसेन, कार्यार्थिषु अनुग्रहवुद्धिः कामेन कार्यार्थिनोऽनुग्रहीष्यामीत्येवंवुद्धिमूलया

चाणक्यटीका

कर्मसंवत्सर इति अधिकृतेन अनेन कालेन कर्म समापनीयं कर्मफलं चोपनेयमिति । ऊनमिति । कतिचिन्मासान् कर्म कृत्वा अवसन्नेऽध्यक्षे सहग्राहिभिः शेषान् मासान् आषाढीं यावत् शोधयितव्यं युष्माभिरिति परिभाष्य दद्यात् । पूर्णं वेति आषाढ्याः परतोऽन्यस्याध्यक्षस्य तस्यैवाषाढीमर्यादामर्पयेत् । नान्तराले दद्यात् आददीत वा । अन्यथालूनविशीर्णं कर्म स्यात् । करणाधिष्ठितम् (अधिमासं) कुर्याद् अधिकायव्ययहेतुत्वादस्य ॥

अपसर्पाः कण्टकशोधनोक्ताः सिद्धप्रव्रजितादयः । तैरधिष्ठितं प्रचारं च कुर्यात् । ते ह्यध्यक्षणां समुदयहापनकारणं ज्ञास्यन्ति तानि चाज्ञानादीनि वक्ष्यमाणानि । (यत्न ?) प्रचारचरित्रेति । प्रकृतोऽध्यक्षः परिहापयति । उत्थानमुद्योगः तत्र क्लेशं शीतादिदुःखं न सहत इति । (इन्द्रियार्येषु) (प्रसक्तमनात्मतौत्सुक्यम्) (?) सङ्क्रोशः प्रजाभ्यो दण्डकराहरणे तत्प्रकोपाच्चानर्थो विनाशोऽधर्मश्च मे मा भूदिति तेभ्यो भीरुः । व्यवहारसन्नेऽप्यपि मैत्र्यादिना अनुग्रहं प्रति बुद्धिर्यस्य न कामेनेति इच्छया ।

ग्रहबुद्धिः कामेन, हिंसाबुद्धिः कोपेन, विद्याद्रव्यवल्लभापाश्रयाद्दर्पेण, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन ।

[एवं धनहानिसम्भवे मतभेदेन दण्डनिर्देशः]

"तेषाम् आनुपूर्व्या यावानर्थोपघातः तावानेकोत्तरो दण्डः" इति मानवाः । सर्वत्राष्टगुणः इति पाराशराः । दशगुणः इति बार्हस्पत्याः । विंशतिगुणः इत्यौशनसाः । यथाऽपराधम् इति कौटल्यः ।

———————

श्रीमूला

स्वेच्छया, हिंसाबुद्धिः कोपेन नृशंसत्वनिमित्तेन क्रोधेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण विद्याद्रव्यराजवल्लभव्यपाश्रयनिमित्तेन मदेन, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन तुलान्तरेण उन्मानदण्डविशेषेण मानान्तरेण प्रस्थादिमानसाधनविशेषेण तर्कान्तरेण संभावनाविशेषेण गणिकान्तरेण गणनविशेषेण च यदुपधानं छलनं तत्प्रयोजकेन लोभेनेत्यर्थः । तदेवमज्ञानालस्यप्रमादभयकामकोपदर्पलोभात्मका अष्टौ दोषाः समुदयपरिह्रापननिमितित्तभूता वेदितव्याः ।

परिह्रापितसमुदयानां दण्डचिन्तायामाह—तेषामिति तेषाम् उक्तदोषयुक्तानामष्टानाम्, आनुपूर्व्या क्रमेण, यावान् अर्थोपघातः तत्तदोषवशादुपहतो यत्परिमाणोऽर्थः, तावान् एकोत्तरः तत्परिमाण एकादिगुणाधिकोऽर्थः, दण्ड इति, मानवाः मनुशिष्याः, वदन्तीति शेषः । सर्वेषु दोषेष्वविशेषादष्टगुण इति पाराशराः, दशगुण इति बार्हस्पत्याः, विंशतिगुण इति शुक्रशिष्याश्च मन्यन्त इत्याह—सर्वत्रेत्यादि । स्वमतमाह—यथेत्यादि । यथापराधम् अपराधानुसारेण अपराधमहत्त्वाल्पत्वादिपर्यालोचनया दण्डः कल्पनीय इत्यभिप्रायः ।

चाणक्यटीका

वैरात् कार्यार्थिषु हिंसां प्रति बुद्धिर्यस्य स तेषां वर्णोपघातेन प्रवृत्तः कोपेन ह्रापयति । विद्यापाश्रयान्मत्तोऽन्यः को विद्वानिति । द्रव्याश्रयान्मत्तोऽन्यः (को धनी) कुपितमपि राजानं प्रसादयिष्यामीति । वल्लभापाश्रयाद् युवराजस्य लाभेन न तस्माद् बिभेमीति दर्पेण राजार्थं प्रति नाद्रियते । तुलामानान्तरोपधानात् महत्या तुलया गृहीत्वा अल्पयोपनीतार्थः । मानेन कर्मान्तरोपधानात् । तर्कपरिच्छेद्यं महार्हं क्रीत्वा अन्यत् तुच्छकर्मपरिच्छेद्यमुपनयति । गणिकान्तरोपधानात् प्रभूतस्याल्पां संख्यां निदधाति, अल्पां चोपनीय प्रभूतं लिखति ॥

तेषामिति अज्ञानादिभिः ह्रापयताम् । आनूपूर्व्येति अज्ञानाद् यावानर्थो ह्रापितस्तेन स तावन्तमेव दद्यात् । आलस्यादिभिः द्वौ त्रीन् चतुरः पञ्च षट् सप्त

[अध्यक्षाणां वार्षिकगणितप्रदर्शनकालः, कपटालापनिषेधः,
न्यूनाधिकभावदर्शने व्यवस्था च]

गाणनिक्यान्याषाढीमागच्छेयुः । आगतानां समुद्रपुस्तभाण्डनीवीकानामेकत्र सम्भाषावरोधं कारयेत् । आयव्ययनीवीनां अग्राणि श्रुत्वा नीवीं

चाणक्यटीका

अष्टावितिक्रमेण दण्ड्या इति मानवानामभिप्रायः । अज्ञानं नाम विनियोक्तुरपि ईदृशमधिकुर्वतः समानो दोषः, अतस्तदप्युच्यते दोषवादः—

प्रमादाज्ञानदैवादिभिस्तं शिरसि मार्जता ।
दोषैः शोधयता दोषं मूर्खो मूर्खेण वध्यते ॥ इति ।

तस्मादपि समर्थः सन्नालस्येन ह्रापयन्नधिकदोषः । तस्मादपि निश्शङ्कतया लाभेषु प्रमाद्य (न्), ततोऽपि भीरुरसौ बहु नाशयति, ततोऽपि कामरोषप्रवणौ क्रमेणाधिकदोषत्वादवसादकौ, दर्पस्त्वेषां निग्रहमिति (?) स एव लुब्धस्तूपात्तराजजनपदार्थं दापनीय इति अष्टगुण इति यस्मादज्ञानविजृम्भितान्येवैतानि किमत्र विशेषेणेति । यद्येवं दशगुण इति बार्हस्पत्याः । पुनरेवं मा कार्षीरिति विंशतिगुण इति औशनसाः । यथापराधमिति यद्यप्येषाम् अज्ञानप्रभवत्वं तथापि न हेत्वनपेक्षो दण्डो न्याय्यः । किंतर्हि, यैरेव हेतुभिरपराधं कृतवन्तः तदनुरूपो युक्तः । तद्यथा—अज्ञानादिभिः रत्नमपहा (?) मुपधापयत उत्तमः साहसदण्डः, मध्यमसारं मध्यमः, कुप्यादिकमल्प इति । एवं नियमे तद्द्रव्यप्रत्यानयनं च कृतं भवतीति ॥

श्रीमूला

अथाध्यक्षाणां वार्षिकगणितप्रदर्शनकाल उच्यते—गाणनिक्यानीति । गाणनिक्यानि गणनाः अर्थात् तत्प्रदर्शकाः अध्यक्षाः आषाढीम् आगच्छेयुः गणनप्रदर्शनार्थमाषाढमासि आगच्छेयुः । समुद्रपुस्तभाण्डनीवीकानां समुद्रं मुद्रायुक्तं पुस्तभाण्डं निबन्धपुस्तकपेटी नीवी व्ययितशिष्टधनं च येषां तथाविधानाम् आगतानाम् अध्यक्षाणाम्, एकत्रासम्भाषावरोधं पुस्तकदर्शनस्थलेऽन्योन्यमन्त्रणशून्यमवरुध्य रक्षणं कारयेत् । आयव्ययनीवीनाम्, अग्राणि इयत्ताः, श्रुत्वा मुखत आकर्ण्य, नीवीम्,

चाणक्यटीका

यदर्थोऽयं प्रपञ्चः सेदानीं गणनोच्यते । गाणनिक्यानीति । तत्प्रधानत्वाद् गणका अपि कर्मशब्देनोक्ताः । आषाढीमिति सहचरितमुभयतः पक्षम् । न चैकस्मिन्नहनि सर्वा गणनास्तिष्ठन्ति सङ्कलनार्थम् । आगच्छेयुरिति । अनया क्रियया नित्यसम्बन्धा द्वितीया । आगतानामिति आयव्ययनिबन्धपुस्तकानां भाण्डं समुद्रं कृत्वा (निषि ? विवि) च्य एकत्र स्थाने स्थितानां असंमन्त्रणविशिष्टम् अवरोधं कारयेत् । अन्यथा हि एवमस्माभिरेकमतिभिर्मन्त्रयितव्यमिति संवनार्थमित्ययं दोषः स्यात् । तत्त आयादीनामग्राणि समुदयपिण्डप्रमाणानि श्रुत्वा । तद्यथा—दशसहस्राण्यायः, तस्मात्

अवहारयेत् । यच्चाग्रात् आयस्य अन्तरवर्णे नीव्याः वर्धेत, व्ययस्य वा यत्प रिहापयेत्, तदष्टगुणमध्यक्षं दापयेत् । विपर्यये तमेव प्रति स्यात् ॥

श्रीमूला

अवहारयेत् अपनाययेत् । यच्चेति । नीव्याः, अन्तरवर्णे व्ययितावशेपस्यावहारितस्य प्रक्षाश्वर्णनपुस्तके, यद् धनम्, आयस्याग्राद् अध्यक्षोक्ताद्, वर्धेत अधिकतया विभाव्येत, व्ययस्य वा अग्राद् अध्यक्षोक्ताद्, यद् धनं, परिहापयेद परिहीणं कुर्यात्, तद् अष्टगुणम्, अध्यक्षं दापयेद् अध्यक्षसकाशाद् गृह्णीयादित्यर्थः । विपर्यय इति । आयस्य यथाप्राप्तादधिकतया लेखनं व्ययस्य यथाकृतादूनतया लेखनं व्ययितावशेपस्य यथास्थितादाधिक्येन लेखनं वा विपर्ययः तस्मिन् पुस्तकदृष्टे सति, तमेव प्रति स्यात् अधिकमध्यक्षस्यैव भागः अध्यक्षायैव देयं नतु तस्य दण्डः कश्चिदित्यर्थः । 'लक्षणेत्थम्भूते' त्यादिना भागे प्रतेः कर्मप्रवचनीयता ।

चाणक्यटीका

त्रीणि व्ययः । उभयपरिशुद्धोऽयं सप्तसहस्रप्रमाणानि इति । ततो नीवीं स्वमनुष्यै-रात्मसात् कुर्यात् तत उत्तरकालं परिगणयेदिति वक्ष्यमाणात् गम्यते । तच्चाह—यच्चेति । यदायस्य दशसहस्राग्रा सङ्ख्या तस्माद् अन्तरवर्णे प्रतिदैवसिकचूर्णायलेख्ये पिण्डयमाने वर्धेत । यदि द्वादशसहस्राणीति पूर्णायः स्यात्, तत्रापि सहस्रत्रये व्ययिते वर्धिताधिकेन सहैव यदि नवसहस्राणीत्युपनीता तेन तदास्य न दोप इत्याह नीव्या इति । यत्प्रमाणा नीवी ततोऽपि वर्धेत । अपरे नीव्यामित्यधिकरणार्थं योजयन्ति । व्ययस्य वा अग्रादन्तरवर्णे यदि (त्) परिहापयेत् परिहीयेतेति वक्तव्ये कर्तृनिर्देशः स्वा-तन्त्र्यख्यापनार्थः । व्ययपरिहाणिं स्वातन्त्र्ययुक्तः अध्यक्षः करोति आयवृद्धिं यस्त्वन्या-नवधानजेति (?) । तद् आयाधिकं व्ययाधिकं वा अष्टगुणमध्यक्षं दापयेत् । अपरः कल्पः यच्चाग्रात्तस्य नीव्या आयान्तरपरिपणे वर्धेत तस्यायान्तरवर्णे वा हापयेदिति शेपं पूर्ववत् । विपर्यय इति । आयान्तरपरिपणे हानान्नवसहस्राण्यायान्तरवर्णे स्युः । आयान्तरपरिपणे वृद्धौ वा त्रिसाहस्रे व्ययाचयारि (?) व्ययान्तरपरिपणे स्युः । तदे-वायाग्रं च तं प्रति स्यात् प्रमाणम् अध्यक्षो न मिथ्यावादीति (न ?) दण्डयितव्यः । लेख्यप्रमादोऽयमस्येत्युपेक्षणीयमिति ॥

अन्यस्त्वाह—प्रमादेऽपि दण्डः स्यादिति । नैतद्युक्तम् । अयन्त्वर्थः विपर्यये तमेव प्रतीति आयान्तरवर्णे हापितम् 'बहुसिद्धमल्पं कृतम्' इति । व्ययान्तरवर्णे वर्द्धित-(त्वादल्पदण्डं ? मल्पसिद्धं बहु) कृतमिति हरणोपायशङ्कया दण्डनीयः स्याद् अष्टगुणमिति ।

[अकाले, प्रदर्शनीयोपकरणशून्यतया चागतानां त्यक्तस्वस्वकर्मणोः गणककार्मिकयोश्च दण्डः]

यथाकालमनागतानां अपुस्तनीविकानां वा देयदशबन्धो दण्डः। कार्मिके चोपस्थिते कारणिकस्य अप्रतिबध्नतः पूर्वस्साहसदण्डः, विपर्यये कार्मिकस्य द्विगुणः ॥

[आयव्यादिपट्टिकायाः सर्वज्ञेयता अपप्रचारकर्तॄणां दण्डश्च]

प्रचारसमं महामात्रास्समग्राः श्रावयेयुः। अविषममन्त्रः पृथग्भूतो मिथ्यावादी चैषामुत्तमदण्डं दद्यात् ॥

श्रीमूला

क्लृप्तकालेऽनागतानां पुस्तकनीवीविरहेणागतानां चाध्यक्षाणां देयदशगुणो दण्ड इत्याह—यथाकालमित्यादि। कार्मिक इति। कार्मिके अध्यक्षे उपस्थिते पुस्तदर्शनार्थं यथाकालं सन्निहिते सति। अप्रतिबध्नतः अप्रतियुज्यमानस्य असम्बध्नतः, कारणिकस्य गणनाधिकृतस्य, पूर्वः साहसदण्डः। विपर्यये अप्रतियोगदोषे कार्मिकगते सतीत्यर्थः, कार्मिकस्य द्विगुणः पूर्वः साहसदण्डः।

प्रचारेत्यादि। महामात्राः राज्ञः प्रधानभूताः कर्मसहायाः, समग्राः, अविषममात्राः अविषमाः परस्परानुकूलाः प्रवृत्तीः सङ्गता आयव्ययनीवीयत्ता वा प्रचारसमं श्रावयेयुः प्रचारो जनपदः तात्स्थ्याज्जानपदाः तत्साधारणं यथा भवति तथा श्रावयेयुः, जानपदान् सदसि मेलयित्वा बोधयेयुरित्यर्थः। एषां महामात्राणां मध्ये, पृथग्भूतः विसंवादी, मिथ्यावादी च, उत्तमदण्डम् उत्तमसाहसदण्डं, दद्यात्।

चाणक्यटीका

यथाकालमिति आषाढीम्। अपुस्तभाण्डनीवीकानां वेति। तदानयने कालं हर्तुं यथाकालमिति। यथाकालम् पिच्छिलविमोक्षाभिप्रायेणागतानां वा। देयदशबन्ध इति आयस्य यद् विशुद्धा नीवी देया तस्य दशभागः सप्तसहस्रेषु सप्तशतानि। कार्मिक इति कर्मनियुक्ते समाहर्त्रादौ यथाकालमागते। कारणिकस्य करणनियुक्तस्या (क्षा ?) क्षपटलिकस्य द्वेषानादरादिभिः कलनापूर्वकमुत्तरवर्णेऽनुपनिबध्नतः। विपर्यय इति कारणिके करणार्थमुपस्थिते सन्निहितस्यापि कार्मिकस्य नीव्यपलेपे मद्यप्रसभादिभिः परिशोधयतः (?)।

प्रचारसममिति प्रचारे समवृत्तिमिच्छाद्वेषरहितं किञ्चिद् विद्वेषादिभ्यो द्विकमादाय (?) सम्प्रियाप्रियत्वोपेक्षयापि राजार्थं पूरयेदेवेति। अथवा प्रचारसमं युक्तं न तदनुरोधाद् राजार्थंहापितम् न रा (जा) र्थोपरोधात् प्रचाराद्रोहिणमीदृशं महामात्राः श्रावयेयुः। अर्थाद् राज्ञ इति गम्यते। ते हि साक्षिभूताः सर्वकार्येष्ववतिष्ठन्ते।

[उपनेतव्यद्रव्यानुपनेतॄणां निरीक्षणीयकालः, ततः परीक्ष्य दण्डश्च]

अकृताहोरूपहरं मासमाकाङ्क्षेत। मासादूर्ध्वं मासद्विशतोत्तरं दण्डं दद्यात् ॥ अल्पशेपलेख्यनीवीकं पञ्चरात्रमाकाङ्क्षेत। ततः परं कोशपूर्वमहोरूपहरं धर्मव्यवहारचरित्रसंस्थानसङ्कलननिर्वर्तनानुमानचारप्रयोगैरवेक्षेत।

श्रीमूला

अकृतेत्यादि। अकृताहोरूपहरं कृते क्लृप्ते अहोरूपे दिवसे हर्तव्यं यो हरत्युपनति स कृताहोरूपहरः उपहर्तव्यद्रव्ययथाकालोपहर्ता स न भवतीत्यकृताहोरूपहरः तं, तथाविधमध्यक्षं, मासम् आकाङ्क्षेत प्रतीक्षेत, हर्तव्यहरणार्थमेकमासावधिं तस्मै दद्यादित्यर्थः। मासावधावहर्तुर्दण्डमाह—मासादिति। मासाद् उर्ध्वम् अनुपहरणे, मासद्विशतोत्तरं मासस्यैकैकस्य द्वे शते उत्तरे यस्य तं तथाभूतं, दण्डं पूर्वोक्तं, दद्यात्। अल्पशेषार्पणीयनीवीके विशेषमाह—अल्पेत्यादि। अल्पशेपनीवीकं, ततः परं मासात् परतः, पञ्चरात्रं रात्रिपञ्चकमधिकम्, आकाङ्क्षेत। तत उर्ध्वमप्यनुपहरणे दण्डं दद्यादित्यर्थंसिद्धम्। कोशेत्यादि। कोशपूर्वम् अहोरूपहरम् अर्पणीयनीवीधनपुरस्सरं क्लृप्तदिवसपुस्तकोपनेतारम् अध्यक्षं, धर्मव्यवहारचरित्रसंस्थानसङ्कलननिर्वर्तनानुमानचारप्रयोगैः अवेक्षेत धर्मप्रयोगादिभिरष्टभिः प्रकारैः परीक्षेत—किमसौ वस्तुत एव सद्वृत्तः उत दाम्भिक इति। तत्र धर्मः स्मृतिविहितः, व्यवहारः पूर्वपक्षोत्तरपक्षलक्षणः, चरित्रं लोकाचारः संस्थानं पूर्वस्थितिः, सङ्कलनं सर्वधनैकीकारगणना, निर्वर्तनं कार्यनिष्पत्तिः, अनुमानं कृतेनाकृताभ्यूहः, चारा गूढपुरुषाः।

चाणक्यटीका

समग्रा यावद्भिर्विचारितम्। अविपममन्त्राः सम्प्रत्ययहेतुत्वात्। एपामिति महामात्राणाम्। पृथग्भूतः अन्योऽन्यथा श्रावयेत्, अन्यथा श्रावयन्नपि यदि प्रतिपादयेन्न दोपः। मिथ्यावादी च यदि स्यात्, उत्तममिति कार्मिककारणिकानां मिथ्यादूपणात् ॥

अकृताहोरूपमिति अहरहरुत्थितानां रूपाणाम् अङ्गानां (? अक्षाणां)[1] यः समाहर्ता स येनाविश्वासेन अन्यो न कृतः (?) तं राजाधीनबहुकार्यतया व्यग्रम्। अथवा अहोरूपाणि प्रतिदिवसोत्थितानि कर्माणि तानि हरति यत् पिण्डपत्रं न तावत् कृतं येन। अहन्यहन्युत्थितस्य ह्यायव्ययरूपस्य विप्रकीर्णस्य सङ्कलनेनान्यो लेख्यः क्रियत इति। मासद्विशतोत्तरमिति मासे मासे द्वे शते उत्तरे यस्य दण्डस्येति ॥

अल्पशेपलेख्यनीवीकमिति अल्पशेपं लेख्यम् अल्पशेपा च नीवी साम्या यस्य तं मासात् पञ्चरात्रमित्यर्थः। ततः परमिति एवमुपेक्ष्य पञ्चरात्रादूर्ध्वम्। कोशपूर्वं कोशेन सहार्थमानीतम्। अहोरूपहरं पिण्डपत्रम्। अवेक्षेत किं धर्मादीनुपहरन्त्यो (?) हत्योत्पादितम्, अनुपहत्य किमायव्ययनोव्यनेन संपूर्णे (?)र्णा सङ्कलिता किं मृदुनोप-

---

१. अक्षाणि आयमुखानि रूपाणि इति अमरकोशे क्षीरस्वामी। ११।८।५

[गणनलेखनपरिपाट्यः]

दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत् । व्युष्टदेश-कालमुखोत्पत्त्यनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकैश्चायं समानयेत् ।

श्रीमूला

गणनलेखनपरिपाटीमाह—दिवसेत्यादि । दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत् दिवसः पञ्चरात्रं पक्षो मासश्चातुर्मास्यं संवत्सर इत्येभिर्विभागैः सङ्ख्याय सम्पादयेत् अर्थाद् आयव्ययनीवीः । अयं भावः—संवत्सरस्यादिमे मासि पूर्वपक्षस्य प्रतिपदमारभ्यापञ्चम्या दैनन्दिनी आयव्ययनीवीः पृथग् गणनपुस्तकेषु विलिख्य पञ्चमीपर्यन्तदिवसपञ्चकाङ्कान् संकल्प्य निवेशयेत् । एवं षष्ठ्यादि-दशम्यन्तदिवसपञ्चकाङ्कान् एकादश्यादिपञ्चदश्यन्तदिवसपञ्चकाङ्कांश्च प्रत्येकं सङ्कलय्य निवेशयेत् । तानिमांस्त्रीन् दिवसपञ्चकाङ्कनेकीकृत्य पक्षाङ्कं, पूर्वापरपक्षद्वयाङ्कैकीकरणेन मासाङ्कं, मासचतुष्टयाङ्कैकीकरणेन चातुर्मास्याङ्कं, चातुर्मास्यत्रिकाङ्कैकीकरणेन संवत्सराङ्कं च सम्यक् सङ्ख्याय सम्पादयेदिति । आयव्ययनीवीनां साधारणविधि-वचनानन्तरं प्रातिस्विकविधिष्वभिधानीयेषु प्रथममायस्य व्ययनीवीनिमित्तत्वेन प्राधान्यात् तं दर्शयति—व्युष्टेत्यादि । व्युष्टदेशकालमुखोत्पत्त्यनुवृत्तिप्रमाणदायक-दापकनिबन्धकप्रतिग्राहकैः आयं समानयेत् व्युष्टादिविवरणयुक्ताम् आयगणनां सम्पादयेदित्यर्थः । तत्र व्युष्टं राजवर्षमासपक्षदिवसाः, देशः, कालो वर्षादिः मुखम् आयमुखमायशरीरं च, उत्पत्तिः तदुत्पन्नं शुल्कादि, अनुवृत्तिः स्थानान्तरसङ्क्रान्तिः, प्रमाणं, दायकः करस्य दाता, दापकः दापयिता राजपुरुषः, निबन्धको लेखकः,

चाणक्यटीका

क्रमेण वा (दा) रुणेन साम्यं निर्वर्तितमित्येषु यथासंभवम् अनुमानेन चारेण प्रयोगेण वा प्रत्यक्षेणेति ।

(अकलंश्चयादी ? सकलांश्चायादीन्) प्रतिदिवसोत्पान्नेनायेन पञ्चरात्रम् । पञ्च-रात्रोत्पनेन त्रिगुणेन पक्षम्, पक्षकृतेन द्विगुणेन मासम्, तेन चतुर्गुणेन चातुर्मास्यम्, तत् त्रिगुणेन वर्षमिति । एवं षड्भिर्गणनाविशेषैः प्रतिसमानयेत् प्रज्ञापयेत् कार्मिकः । उपनयस्कन्धार्थश्च एतदुक्तं न हि सर्वस्य कर्मसंवत्सरः पूर्यत इति सामान्येनाभिधाय पुनरायादीनां प्रत्येकं समानयनं स्फुटकरणार्थमाह—व्युष्टेति । व्युष्टेन यथा—प्रवर्तमाने पञ्चदशराजवर्षे, (कालेन) पौषकृष्णपञ्चदश्यामिति । देशेन वत्सगुल्मान्नागराद्याहृत-मिति (?) । कार्यमिति आयशरीरम् । मुखोत्पत्तिरिति आयमुखोत्पत्तिः शुल्कपण्यं मुखमिति कार्यमुखोत्पत्तिभ्यां प्रतिवर्षमुत्पाद्यमानं कार्षापणसहस्रमिति । अनुवृत्त्या अनुवर्त्तनेन । प्रमाणेन च वणिग्देवदत्तेन पक्षिश्रेष्ठवचनादुपनीतमिति । दायकदाप-काभ्याम् विष्णुदत्तकेन लवकेन निबद्धः स्थावरेण भाण्डा (गा) रिकेणोपसंहृतमिति । निबन्धकप्रतिग्राहकाभ्यामिति'.....॥

व्युष्टदेशकालमुखलाभकारणदेययोगपरिमाणाज्ञापकोद्धारकविधातकप्रतिग्राहकैश्च व्ययं समानयेत् । व्युष्टदेशकालमुखानुवर्तनरूपलक्षणपरिमाणनिक्षेपभाजनगोपायकैश्च नीवीं समानयेत् ॥

[दुष्टवृत्तानां गणकादीनां दण्डः]

राजार्थे कारणिकस्याप्रतिबध्नतः प्रतिषेधयतो वाऽऽज्ञां निबन्धात् आयव्ययमन्यथा वा विकल्पयतः पूर्वस्साहसदण्डः । क्रमावहीनमुत्क्रममवि-

---

श्रीमूला

प्रतिग्राहको ग्रहीता । व्ययसमानयनविधिमाह—व्युष्टदेशकालमुखलाभेत्यादि । तत्र व्युष्टदेशकालमुखानि पूर्वोक्तानि, लाभः 'पक्षमाससंवत्सरलाभो लाभ, इति गताध्यायोक्तः कारणं निमित्तं, देयं दानीयद्रव्यं, योगो द्रव्यापद्रव्यमिश्रणं, परिमाणमियत्ता, आज्ञापकः चोदकः, उद्धारकः ऋणग्राही ऋणं वा, निधातृकः भाण्डागारिकः, प्रतिग्राहकः ब्राह्मणादिः । नीवीविधिमाह—व्युष्टदेशकालमुखानुवर्तनेत्यादि । तत्र रूपं द्रव्यस्य स्वरूपं, लक्षणं तच्चिन्हं परिमाणं, तन्मानं निक्षेपभाजनं द्रव्यनिधानभाण्डं गोपायकस्तद्रक्षः, शेषं प्रतीतम् ।

अथ यथासम्भवं सामान्यदण्डमाह—राजार्थ इति । राज्ञो धनहिरण्यादिलाभरूपे प्रयोजने, अप्रतिबध्नतः असम्बध्नतः राजार्थं पुस्तकेष्वलिखित इत्यर्थः, आज्ञां, प्रतिषेधयतो वा अननुतिष्ठतश्च, आयव्ययं, निबन्धात् क्लृप्तनियमाद्, अन्यथा प्रकारान्तरेण कल्पयतोऽपि वा, कारणिकस्य पूर्वः साहसदण्डः ।

चाणक्यटीका

लाभकारणमिति कार्तिक्यादिना कारणेन दत्तमिति । देयस्य योगो युक्तिः दीनारैश्चूर्णिकया वा योजितः । परिमाणं शतं वा सहस्रं वा । आज्ञापको दूतकः कुमारवचनाद्वा प्रतिहारवचनाद्वा । उद्धारकः अनेन वणिग्धस्तादुद्धृत्य दत्तमिति । वि (यात ? दाय) को यो दापनार्थं विशेषेण यतते दीयतामस्मै, गुणवानयमिति । अपरे माता उन्माता चेति वर्णयन्ति, पठन्ति च विधातक[1] इति । प्रतिग्राहको लब्ध्वा ब्राह्मणाय दत्तमिति । रूपं द्रव्यम् । जातिः लक्षणम् । द्रव्यं जातिविशेषणं विवर्णं चतुष्कं वा । निक्षेपभाजनं ताम्रघटकः करण्डको वा । गोपायकः परिपालयिता ।

राजार्थे रत्नभूम्यादिलाभे रत्नादी(न)नुपनिबध्नतः प्रतिबन्धितारमन्यं वा प्रतिषेधयतः । आज्ञानिबन्धादिति राजाज्ञाया निबन्धो निबन्धप्रस्तावकृतः । तस्मात् स्वप्रत्ययकारितया रागद्वेषाभ्यां वा आयव्ययम् ऊनाधिकत्वेन अन्यथा कुर्वतः ॥

---

१. अयमेव पाठो महीसूर मुद्रितकोशादृतः । विधानक इति विधायक इति वा स्यात् ।

ज्ञातं पुनरुक्तं वा वस्तुकमवलिखतो द्वादशपणो दण्डः। नीवीमवलिखतो द्विगुणः, भक्षयतोऽष्टगुणः, नाशयतः पञ्चबन्धः प्रतिदानं च। मिथ्यावादे स्तेयदण्डः। पश्चात् प्रतिज्ञाते द्विगुणः प्रस्मृतोत्पन्ने च।

[संक्षेपेण राज्ञो हितोपदेशः]

अपराधं सहेताल्पं तुष्येदल्पेऽपि चोदये।
महोपकारं चाध्यक्षं प्रग्रहेणाभिपूजयेत् ॥६०॥

इत्यध्यक्षप्रचारे द्वितीयाधिकरणे अक्षपटले गाणनिक्याधिकारः सप्तमोऽध्यायः आदितोऽष्टाविंशः।

श्रीमूला

क्रमेत्यादि। वस्तुकं, क्रमावहीनमवलिखतः उत्तममध्यमाधमेषु क्रमहीनं लिखतः, उत क्रममवलिखतः पूर्वमधमं पश्चादुत्तममिति व्युत्क्रमं लिखतः, अविज्ञातमवलिखतः वेदितुमनर्हया रीत्या लिखतः, पुनरुक्तमवलिखतो वा लिखितं पुनर्लिखतो वा द्वादशपणो दण्डः।

नीवीमिति। नीवीम् अवलिखतः अवहीनं लिखतः, द्विगुणः पणचतुर्विंशतिः, दण्डः। नीवीं भक्षयतः, अष्टगुणः पणपण्णवतिः, दण्डः। नीवीं नाशयतः नटनर्तकादिभ्यो दत्त्वा लोपयतः, पञ्चबन्धः पञ्चगुणः षष्टिपणो दण्डः प्रतिदानं च नाशितपुनर्दानं च, भवति। मिथ्यावादे स्तेयदण्डः असत्यवचने चौर्यदण्डः। पश्चात् प्रतिज्ञाते पूर्वमलिखित एव गणनपरिशोधनायां विज्ञाते विषये, प्रस्मृतोत्पन्ने च पूर्वं विस्मृत्य पश्चाच्चिन्तिते च विषये, द्विगुणः स्तेयदण्डाद् द्विगुणः, दण्डः।

चाणक्यटीका

क्रमावहीनं पूर्वमप्रधानं पश्चात् प्रधानम्। उत्क्रमं व्युत्पत्तिं लिखित्वा मुखतो दशकायमिति (?)। (अ) विज्ञातामव्यक्ताक्षरम्। पुनरुक्तं लिखितमे (व)। वास्तुकम् (आद्यदिस्थानं श ?) शास (न) पत्रम्। अवलिखत इति समानकरणविशेषैरवगताल्लेख्यधर्मादन्यथा लिखत इति। अर्थाल्लेखकस्य नेयम्।

अवलिहत इति ईषदास्वादयतः। द्विगुण इति अवलीढात्। भक्षयतः लाभात् स्वयम् उपयुञ्जानस्येत्यर्थः। विनाशयतः रक्षाशैथिल्यादनादृतस्य। पञ्चबन्धः नष्टपञ्चमो भागः। प्रतिपादनञ्च नष्टस्य। मिथ्यावाद इति अवहेलनादि कृत (क) त्वान्न मा (?) मया कृतमिति। स्तेयदण्ड इति [1]कोशभाण्डागाराध्यक्षशालाभ्यश्चतुर्भागमूल्येषु द्विगुणो दण्ड इत्यादि। प्रतिज्ञात इति अवलेहनादावङ्गीकृते। यच्च प्राक् समाहर्तुर्विस्मृतमासीत् तत् सङ्कलनोत्तरकालं प्रस्मृतत्वाद् उपपन्नं तत्रापि द्विगुणः॥

---

१. कोशभाण्डागाराक्षशालाभ्यश्चतुर्भागमूलेषु एत एव द्विगुणा दण्डाः इति कौटल्यो- वक्ष्यति। ४.१

श्रीमूला

श्लोकमाह—अपराधमिति। अल्पमपराधं सहेत, अर्थादध्यक्षस्य अल्पेऽपि उदये आयवृद्धौ अर्थादध्यक्षोपपादितायां, तुष्येत्। महोपकारं अध्यक्षं, च शब्दस्त्वर्थे, प्रग्रहेण प्रकृष्टग्रहणेन यावज्जीवपरिग्रहेण, अभिपूजयेत् बहु मानयेत् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे सप्तमोऽध्यायः अक्षपटले गाणनिक्याधिकारः, आदितोऽष्टाविंशः ॥

चाणक्यटीका

सहेत इति सम्पन्नानां दुर्लभत्वात्। तुष्येत् समुत्साहनार्थम्। उदय इति कोशवृद्धौ। समोपकारम् उचितान्महीभृतः कोशोदयस्य संपादकम्। प्रग्रहेण वस्त्रालङ्कारादिभिरिति ॥

अक्षपटले गाणनिक्याधिकारः, सप्तमं प्रकरणम्।
॥ सप्तमश्चाध्यायः ॥

षड्विंशं प्रकरणम्

अष्टमोऽध्यायः ।

समुदयस्य युक्तापहृतस्य प्रत्यानयनम् ।

[धनसङ्ग्रहस्यावश्यकता]

कोशपूर्वाः सर्वारम्भाः । तस्मात् पूर्वं कोशमवेक्षेत ।

[धनाभिवृद्धितन्नाशहेतूनां परिगणनम्]

प्रचारसमृद्धिः चरित्रानुग्रहः चोरग्रहः युक्तप्रतिषेधः सस्यसम्पत् पण्यबाहुल्यम् उपसर्गप्रमोक्षः परिहारक्षयः हिरण्योपायनम्—इति कोशवृद्धिः ।

श्रीमूला

समुदयस्य युक्तापहृतस्य प्रत्यानयनमिति सूत्रम् । समुदयो नाम द्रव्योत्पत्तिस्थानेभ्य उत्थितं धनं, युक्ता अध्यक्षाः, युक्तापहृतस्य समुदयस्य प्रत्यानयनं पुनः प्रापणमिहाभिधीयत इति सूत्रार्थः । किमर्थं धनसङ्ग्रहे महान् यत्न उपदिश्यत इत्यपेक्षायामाह—कोशेत्यादि । सर्वारम्भाः कोशपूर्वाः सर्वाणि कार्याणि तन्त्रसम्बद्धानि जनपदनिवेशादीनि, आवापसम्बद्धानि च सन्धिविग्रहादीनि, धननिमित्तकानि । तस्मात् कारणात्, कोशम्, पूर्वं सर्वकार्याणामग्रे, अवेक्षेत यथा स वृद्धिं प्राप्नुयात् न क्षयं, तथा चिन्तयेदित्यर्थः ।

कोशस्योदयहेतून् नव दर्शयति—प्रचारेत्यादि । प्रचारसमृद्धिः जनपदसम्पत्, चरित्रानुग्रहः देशजातिकुलाचाराणां पूर्वस्थित्यनतिक्रमेण परिपालनम्, चरित्रलक्षणसन्तुष्टा हि जनाः कोशं राज्ञो वर्धयन्तीति, चोरग्रहः तस्करवधस्तस्करेभ्यो धनग्रहणं च, युक्तप्रतिषेधः युक्तानामध्यक्षाणां प्रतिषेधो धनापहाराद् वारणम् उत्कोचग्रहणनिमित्ताद्वा प्रजापीडनाद् वारणम्, सस्यसम्पत् उच्चावचधान्यसमृद्धिः, पण्यबाहुल्यं पण्यानां जलजानां स्थलजानां च विक्रेयद्रव्याणां बहुलमुत्पत्तिरुपलम्भश्च, उपसर्गप्रमोक्षः अग्न्याद्युपद्रवमोचनम्, परिहारक्षयः करमुक्त्यभावः अवधौ धनग्रहणोपेक्षाविरहो वा, हिरण्योपायनं सुवर्णरजतादिरूपोपदा, इति कोशवृद्धिः एवं नव कोशवृद्धिहेतवः ।

चाणक्यटीका

कथं पुनः कोशादयः सम्पद्यन्त इति चेत् प्रचारसमृद्धयादिना । भवत्येवासौ यदि युक्ता न हापयन्ति । तैर्वापहृतस्य प्रत्यानयनं क्रियत इति समुदयस्य युक्तापहृतस्य प्रत्यानयनमुच्यते । कोशादयः कथं महोपकारोऽध्यक्षस्येति चेदाह—कोशपूर्वा

प्रतिबन्धः प्रयोगः व्यवहारः अवस्तारः परिहापणं उपभोगः परिवर्तनं अपहारश्च—इति कोशक्षयः ।

[धनक्षयहेतुभूतानां प्रतिबन्धादीनां अष्टानाम् स्वरूपविवरणम्,
तत्तत्कर्तॄणां दण्डाश्च]

सिद्धीनामसाधनम् अनवतारणम् अप्रवेशनं वा प्रतिबन्धः; तत्र दशबन्धो दण्डः ।

चाणक्यटीका

इति । सर्वारम्भाः तन्त्रावापोत्कटजनपदनिवेशादयः सस्यादयश्च । अवक्षेतेति, कथं वर्धेत कथं न क्षीयेत कथमपहृतं प्रत्यानीयेत तत्त्रितयमप्याह—प्रचारसमृद्धिः जनपदस्फीतता । चरित्रानुग्रहः तदनुज्ञानार्थं हि जानपदा इदमस्माकं चरित्रमस्त्विति राज्ञे किञ्चित् प्रयच्छन्ति । चोरनिग्रहात् चोरगतद्रव्यावाप्तिः चोरनिग्रहश्च । युक्तोऽध्यक्षः तत्प्रतिषेधाद् अहानमर्थस्य दण्डलाभश्च । राजकर्मान्तोत्थितसस्यसम्पदा कोशो वर्धते तथा राजपण्यानां बाहुल्ये मूल्यवृद्धिः । उपसर्गाणाम् अभावो मोक्षः । तथा—सति तत्प्रतिविधानेन कोशो न क्षीयते । परिहारस्य क्षयः पूर्णं (?) ऊनता, ततो दण्डकराद्युपचयः हिरण्यं चोपायनं (ली ? का) कनिका[1] कोशं प्रविशति, वस्त्राद्युपायनन्तु यथासुखं व्ययेन तिरोधीयत एवेति ।

श्रीमूला

कोशक्षयहेतूनष्टावुद्दिशति—प्रतिबन्ध इत्यादि ।

सिद्धीनामिति । सिद्धीनां सिद्धद्रव्याणां राजग्राह्यकरादीनाम्, असाधनम् अनुत्पादनम्, उत्पन्नानां वा अनवतारणमहस्तप्रापणम्, अवतारितानां वा अप्रवेशनं भाण्डागाराप्रापणम्, इति प्रतिबन्धस्त्रिधा । तत्रेति । तत्र प्रतिबन्धे, दशबन्धो दशगुणः, दण्डः ।

चाणक्यटीका

प्रतिबन्धादयः कोशक्षयाः, तेषां स्वरूपम् अत्यादानञ्चाह—सिद्धीनामिति । सिध्यन्त इति सिद्धयः करादयः, तेषां प्राप्तकालानामप्यसाधनम् । अनवतारणम् अस्येति मात्रेति विना (?) आयकल्पनाया पत्रेषु लेख्याकरणम्, अनारोपणमित्यर्थः । तथा सौचिकहस्तस्थानाम् अप्रवेशनाम् अध्यक्षस्यानर्पणम् । देयदशबन्ध इति प्रतिबद्धस्य द्रव्यस्य ।

---

१. काकणी इति मुद्रितकौटलीयपाठः, "काकिण्याश्चोपसंख्यानम्" इति काशिकावृत्तिः ।

कोशद्रव्याणां वृद्धिप्रयोगः प्रयोगः; पण्यव्यवहारो व्यवहारः, तत्र फल-द्विगुणो दण्डः। सिद्धं कालमप्राप्तं करोति, अप्राप्तं प्राप्तं वेत्यवस्तारः; तत्र पञ्चबन्धो दण्डः। क्लृप्तम् आयं परिहापयति व्ययं वा विवर्धयतीति परिहापणम्; तत्र हीनचतुर्गुणो दण्डः। स्वयमन्यैर्वा राजद्रव्याणामुपभोजनमुपभोगः; तत्र रत्नोपभोगे घातः, सारोपभोगे मध्यमः साहसदण्डः; फल्गुकुप्योपभोगे तच्च तावच्च दण्डः। राजद्रव्याणामन्यद्रव्येणादानं परिवर्तनम्; तदुपभोगेन व्याख्यातम्। सिद्धम् आयं न प्रवेशयति, निबद्धं व्ययं न प्रयच्छति, प्राप्तां नीवीं विप्रतिजानीते इत्यपहारः; तत्र द्वादशगुणो दण्डः।

श्रीमद्भट्टस्वामिप्रणीता

प्रतिपदपञ्चिका

कल्याणकृत् भूयात्।

सिद्धीनामित्यादि, सिद्धीनां द्रव्याणामसाधनमनुत्पादनम्। उत्पन्नानां वाऽनवतारणम्। अनुपहस्तीकरणम्, उपहस्तीकरणानां च तेपामप्रवेशनमनुपनयनमित्ययं त्रिविधः प्रतिबन्धः। तत्रेति प्रतिबन्धे, प्रतिबन्धद्रव्यदशबन्धो दशभागो दण्डः।

श्रीमूला

कोशेत्यादि। कोशद्रव्याणां कोशप्रवेश्यद्रव्याणाम्, वृद्धिप्रयोगः वृद्ध्यर्थं प्रयोगः, स्वयं वृद्धिमुपजीव्य पश्चात् मूलं कोशेऽर्पयिष्यामीति, स प्रयोगः। पण्यव्यवहारः कोशद्रव्यैर्वाणिज्यकरणं व्यवहारः। तत्र प्रयोगव्यवहारयोः दण्डः फलद्विगुणः। सिद्धमिति। सिद्धं प्राप्तम्, कालं ग्राह्यद्रव्यग्रहणकालम्, अप्राप्तं, करोति आपादयति उत्कोचलिप्सया, अप्राप्तं वा कालं प्राप्तं करोति प्रद्वेषेण, इत्यवस्तारः इत्यनेन प्रकारेण प्राप्तकालाप्राप्तीकरणमप्राप्तकालप्राप्तीकरणमिति द्विविधोऽवस्तारः। तत्र अवस्तारे, दण्डः पञ्चबन्धः। क्लृप्तमिति। क्लृप्तं प्रतिनियतम् आयं परिहापयति न्यूनयति, व्ययं वा क्लृप्तं विवर्धयति अतिरेचयति, इति परिहापणम्, एवं द्विधा परिहापणम्। तत्र, दण्डः हीनचतुर्गुणः नाशितद्रव्यचतुर्गुणः। रत्नसारफल्गुकुप्यानां राजद्रव्याणां स्वयमुपभोजनं परैर्वोपभोजनमिति द्विविध उपभोग इत्याह—स्वयमित्यादि। तत्र दण्डोपदेशवाक्यम्—तत्रेत्यादि। तच्च उपभुक्तद्रव्यं च। तावच्च तत्परिमाणमपरं च। परिवर्तनं व्याचष्टे—राजद्रव्याणामित्यादि। अन्यद्रव्येणादानम् अन्यद् द्रव्यं सच्छायं प्रतिनिधाय ग्रहणम्। उपभोगेन तद् व्याख्यातमिति उपभोगसमानदण्डं परिवत्तनमित्यर्थः।

त्रिप्रकारमपहारमाह—सिद्धमिति। सिद्धम् उत्पन्नम्, आयम्, न प्रवेशयति लेख्ये नारोपयति इत्येकोऽपहारः। निबद्धं पुस्तकारोपितं व्ययं राजाज्ञप्तं पारितो-

श्रीमूला

पिकादिलक्षणम्, न प्रयच्छति राजनिर्दिष्टाय पात्राय न ददाति, इति द्वितीयोऽपहारः। प्राप्तां हस्तगताम्, नीवीं, विप्रतिजानीते नाद्यापि हस्तप्राप्तेत्यपलपति, इति तृतीयोऽपहारः। तत्र अपहारे, दण्डो द्वादशगुणः।

चाणक्यटीका

कोशनिवेशार्हाणां द्रव्यानां लाभाशया अध्यक्षेण वृद्धयर्थं यो योगः क्रियते स प्रयोगः। तथा पण्यानां व्यवहारो विक्रयादिः। तत्रेति प्रयोगव्यवहारयोः। यत् फलम् उत्पद्यते तद्द्विगुणः।

सिद्धं प्रत्यायकालसाधनकालमानानुरोधान्न तावत् साधनकालः प्राप्नोतीति कालहरणेन कोशं हाययति। अप्राप्तं प्राप्तं वेति राजद्रव्यप्रयोगेण द्विगुणोदया (द) ष्ट्राष्ट्राभिर्मासैः (?)।

अथ वर्णसम्पत्ती जानायां प्राप्तकाल एव चतुर्षु मासेषु प्राप्तोऽयं कालः अर्ध-मस्मिन् भवत्विति कुर्वन् परिहापयति। व्ययं वा शतत्रयं चत्वारि कुर्वन् वर्धयति। हीनचतुर्गुणः यावद्धीयते तस्य चतुर्गुणः।

अन्यैर्वेति पति (?) स्त्रीभृत्यमित्रबान्धवैः। रत्नोपभोग इति। ननु च उपभोग-मात्रं न रत्नस्य विनाशः, सत्यम्। अप्रतिसङ्गनिवृत्त्यर्थं दण्डः। तच्च तावच्चेति तच्चोपभुक्तं दापनीयः, तावच्चापरं दण्डनीयः। यदि चोपभोगाद् विनष्टं स्यात् तदा तज्जातीयं दापनीयम् इत्यर्थः। एवं सारोपभोगेऽपि योज्यम्।

अन्यद्रव्येणेति। आत्मीयेन तत्प्रमाणेन अन्य (त् ?) प्रमाणेन वा तद्वर्णेन अन्य-वर्णेन वा, तज्जातीयेन अन्यजातीयेन वा, कृतेन अकृतेन वा हेतुभूतेनेत्यर्थः। अस्माच्च परिवर्त्तनादुपनीयवर्णमानं प्रमाणवर्णं जात्यभावेनातिसन्धानमसत्यपि परिवर्तने प्रत्यायपूरणार्थं छलनमुपधिरित्ययं विशेषः। तदुपभोगेनेति तद् रत्नसारफल्गुकुप्य-परिवर्तनदण्डसारूप्याद् व्याख्यातम्।

सिद्धमायमिति। असत्ययि प्रतिन्धे सिद्धं स्वहस्तीकृतमप्यायं समाहर्त्ता प्रवेशनकालेऽपि नोपनयति। पृथक्(नि)बद्धमप्युचितं व्ययं लब्ध्वा कालहरणेन प्रयच्छति। प्राप्तां सन्निधापितामपि नीवीं न तावन् प्राप्तेति अल्पशेषा वेति विप्रति-जानाति अपलपति। द्वादशगुण इति, यावतोऽपि जि (गीपि ? हीपि) तस्य।

प्रतिपदपञ्चिका

प्रयोगमाह—कोशद्रव्याणमित्यादि, तत्प्रवेश्यानां वृद्धिप्रयोगः। वृद्धयर्थं प्रयुज्य तां वृद्धिं स्वयमुपजीव्य कालान्तरेण मूलद्रव्यदानम्।

व्यवहारं व्याचष्टे—पण्यव्यवहार इति। कोशद्रव्यैर्वाणिज्यकरणम्। तत्रेति, प्रयोगव्यवहारयोर्द्वयोरपि फलद्विगुणो दण्डः।

[चत्वारिंशत्तां राजद्रव्यापहरणद्वाराणां निर्देशः]

तेषां हरणोपायाश्चत्वारिंशत्—

पूर्वं सिद्धं पश्चादवतारितं, पश्चात्सिद्धं पूर्वमवतारितं, साध्यं न सिद्धं, असाध्यं सिद्धं, सिद्धमसिद्धं कृतं, असिद्धं सिद्धं कृतं, अल्पसिद्धं बहुकृतं, बहुसिद्धं मल्पं कृतं, अन्यत् सिद्धमन्यत्कृतं, अन्यतस्सिद्धमन्यतः कृतं, देयं न दत्तं,

———————

प्रतिपदपञ्चिका

अवस्तारमाह—बहिर्लब्धस्याऽर्थस्य सिद्धं कालं पूर्णमवधिमपूर्णमिति करोति। उत्कोचनयाचनकादिभिर्नाम तथाऽन्यस्य प्रद्वेषादप्राप्तमपि कालं प्राप्तं करोति। तदेवं प्राप्ते कालस्याग्रह्णात् प्रजार्थहानिरप्राप्तकालस्य ग्रहणात् प्रजापीडनं कोशक्षयहेतुरित्ययं उभयप्रकारोऽवस्तारः। तत्र च पञ्चबन्धो दण्ड इति।

परिहापणमपि द्विविधमाह—

क्लृप्तमायं प्रसिद्धामुत्पत्तिं, परिहापयति न्यूनीकरोति। व्ययं च महानसादिपरिव्ययं वर्धयति। प्रसिद्धादधिकं करोतीत्येतत् परिहापणम्। तत्रेत्यायपरिहापणे व्ययविवर्धने च, यावन्मात्रं नाशितं तच्चतुर्गुणो दण्ड इति।

द्विविधमेव उपभोगमाह—

स्वयमन्यैर्वा राजद्रव्याणां रत्नसारादीनामुपभोजनं यथेष्टविनियोग उपभोगः। तत्रेत्यादि, सुबोधम्। तच्चेति सर्वशेषः।

परिवर्तनमाह—राजद्रव्याणामित्यादि, निगदव्याख्यातम्।

अपहारं त्रिविधमाह—(न) सिद्धमायं उत्पन्नमर्थं न प्रवेशयति। निबद्धं लेख्यकारोपितं व्ययं हिरण्यादिकं राज्ञा कस्यचिद् दत्तं न प्रयच्छति न ददाति। प्राप्तामुपहस्तीभूतां नीवीमुक्तलक्षणां विप्रतिजानाति। नाऽद्यापि उपहस्तीभवतीत्यपहृ(ह)तमित्यपहारः। तत्रेति, त्रिविधेऽप्यस्मिन्, द्वादशगुणो दण्डः।

श्रीमूला

तेषामिति। तेषाम् अध्यक्षाणाम्, हरणोपायाः राजद्रव्यापहरणद्वाराणि, चत्वारिंशद् वक्ष्यमाणरीत्या। अपहारपरिहरणार्थमपहृतप्रत्यानयनार्थं च तद्व्युत्पादनम्। तान् दर्शयति—पूर्वं सिद्धमित्यादिना। पूर्वं सिद्धं पश्चादवतारितमिति। पूर्वसस्यत्वात् पूर्वप्रवेश्यः शाल्यादेः करः पश्चिमसस्यगोधूमादिकरेण सह प्रवेशितः स तु मध्यकालेऽध्यक्षेणोपजीव्यो भवति। पश्चात् सिद्धं पूर्वमवतारितमिति। पश्चिमसस्यगोधूमादिकरस्य कियांश्चिद् भागः पूर्वसस्यकरेण सह पूर्वमेव प्रवेशित आत्ययिकराजकार्यार्थत्वच्छलात्। साध्यं न सिद्धमिति। ग्राह्यः करो न गृहीतो लञ्चादिना राज्ञ एवमाज्ञेति। असाध्यं सिद्धमिति, अकरददेवब्राह्मणादेरग्राह्यः करो

श्रीमूला

गूढ़ं गृहीतः। सिद्धमसिद्धं कृतमिति। करदेन प्रवेशित एव करः अप्रवेशित इत्युक्त्वाऽपहृतः, गृहीत एव करस्यैकदेशो न गृहीत इत्यपलपितो वा। असिद्धं सिद्धं कृतमिति। कृत्स्नकरदानार्हे काले तस्य करस्यार्धं दत्त्वा शेषार्धं पश्चात् दास्यामीत्युक्तेन लञ्चवशीकृतेनाध्यक्षेण तच्छेषार्धं दत्तत्वेन पुस्तके लिखितम्। अल्पसिद्धं बहुकृतमिति। पञ्चाशति प्रविष्टायां शतं प्रविष्टमित्यध्यक्षेण लञ्चग्राहिणा लिखितम्। बहुसिद्धमल्पं कृतमिति। शतं गृहीत्वा पञ्चाशदिति पुस्तके लिखितं लञ्चादिना। अन्यत् सिद्धमन्यत् कृतमिति। शालिः सिद्धः कोद्रवो लिखितः शालिकरग्रहणनिमित्तस्य लाभस्यात्मसात्कारार्थम्। अन्यतः सिद्धमन्यतः कृतमिति। देवदत्ताद् गृहीतं यज्ञदत्ताद् गृहीतमिति पुस्तके लिखितम्।

चाणक्यटीका

तेषाम् इति अपहरताम्, अध्यक्षाणाम्। एतद्विशेषा एव हरणोपाया उच्यन्ते। पूर्वं सिद्धं पश्चादवतारितमिति। सिद्धिकालाद् पूर्वं श्रावण एव रा (जा) ज्ञामपदिश्य द्रव्यलाभार्थमुत्कोचलाभार्थं वा साधितं पश्चाद्भाद्रपदावतारकल एवावतारितं लेखीकृतम्। यावत्तत् सिद्धम् वाऽवतार्यते तावत् तेनार्थेन संव्यवहरति, पश्चल्लब्धोपचयः तावन्मात्रमेवावतारकाले अवतारयतीत्यर्थः। पश्चात् सिद्धम् उत्कोचेन कालहरणं कृत्वा कार्तिकादौ पूर्वम् अवतरणकाल एवावतारितम्। एतद् द्वयमपि सिद्धीनां कालव्यत्यासाद् अवस्तारस्य भेदः।

साध्यम् उचितं कर्पकेभ्यः किञ्चिद् गृहीत्वा न सिद्धम्। सिद्धीनामसाधनत्वात् प्रतिबन्धोऽयम्। क्लृप्तस्यायस्य हापनात् परिहापणं वा।

असाध्यम् अनुचितं ब्रह्मदेया (का ?) दिभ्योऽपदेशात् सिद्धम्। राजाज्ञेति भीता लाभं प्रयच्छन्ति। धर्मस्य किल क्लृप्तस्य हापनात् परिहापणमेतत्। आयस्येति तत्रोक्तम्।

सिद्धमपि करादि स्वयमुपयुज्य राजार्थं पूर्वं तावदस्मादसिद्धं इति असिद्धं कृतम्।

असिद्धं वा कुटुम्बिनामुपजीव्य सिद्धं कृतमिति अपहारपरिहापणे। अल्पसिद्धम् ऊनसिद्धं पूर्णं कृतम्। तस्मात् किञ्चिद् गृहीत्वा। विपर्येण पूर्णमपि साधयित्वा अल्पमुपयुज्य अल्पम् अस्मात् सिद्धमिति कृतम्। पूर्वेण तुल्यमेतावानत्र विशेषः। तत्र पूर्वं (? र्णं) सिद्धमसिद्धञ्च, इह त्वेकदेशं सिद्धमसिद्धञ्चेति।

अन्यन्महार्घं शाल्यादिसिद्धम् अर्घोपजीवनार्थम् अन्यद् अल्पमूल्यं निबद्धम्।

अन्यतो देवदत्तात् सिद्धम्, तत् पुनर्भावयितुं अन्यतो यज्ञदत्तात् सिद्धम् उत्कोचं गृहीत्वा निबद्धम्। सिद्धस्याप्रवेशानाद् अपहारोऽयम्। सिद्धीनामसाधनात् प्रतिबन्ध इत्येके।

दीर्घप्रवासिने आदिष्टमपि देयम्, यदायमागत्य प्रज्ञाप (यित्वा ? यति) तदैव दास्यामीति, अदत्तम्। कालविपर्यासादयं कालावस्तारः।

अदेयं दत्तं, काले न दत्तं, अकाले दत्तं, अल्पं दत्तं बहुकृतं, बहुदत्तमल्पं कृतं,

---

प्रतिपदपञ्चिका

इत्येवं कोशवृद्धिक्षयावभिधाय ततः कोशक्षयशेषभूतान् पौरजानपदराजार्थ-त्रिषयानध्यक्षाणां हरणोपायानाह—तेषां हरणोपायाश्चत्वारिंशत् । एतेषामध्यक्षाणां हरणोपाया अर्थापहारनिमित्तानि चत्वारिंशत् वक्ष्यमाणानि । परिज्ञातानां परिहार-सौकर्यार्थमपहृतप्रत्यानयनार्थं च तेषामुपन्यासः ।

तानाह—पूर्वं सिद्धं पश्चादवतारितमित्यादि । पूर्वं प्रवेष्टव्याः शालयः, पश्चिमसस्येन गोधूमादिना, सह प्रवेशिताः । कार्तिकमासपिण्डकोपाः (कराः) । चैत्रमासपिण्डकेन (करेण) सार्थमन्तराले तदुपजीवनम् । पश्चात्सिद्धं पूर्वमवतारितमिति । गोधूमादिधान्य-करः किंचिदतित्वरितं राजप्रयोजनमपदिश्य शाल्यादिग्रहणेन सह गृहीतः । साध्यं न सिद्धमिति । लञ्चेन प्रीत्या वा राजाऽऽदेशोऽयमिति करदान् रुद्ध्वा करदीकृतम् साध्यं सिद्धमिति । देवब्राह्मणाद्यकरदं करदीकृतं तच्च स्वयं गृह्णाति । सिद्धमसिद्धं कृतमिति । करदायिना प्रवेशितमप्रवेशितमित्यपहृतम् । प्रभूतदातव्यत्वात् किमप्यादाय तदपलापो वा । असिद्धं सिद्धं कृतमिति । सहप्रदायिना करदेन अध्यक्षोऽभिहितो (लञ्चार्थमदत्त-मपि) (आत्त) दत्तमिति लिखति । अल्पसिद्धं बहुकृतमिति । पञ्चशतानि प्रविष्टानि (लञ्चादिना) सहस्रमपि लिखितम् । बहुसिद्धमल्पं कृतमिति । सहस्रे प्रविष्टे मत्सरा-ल्लञ्चार्थं वा स्वयं पादमपहृत्य पञ्चशतानि प्रवेशे कृतानि ।

अन्यत्सिद्धमन्यत्कृतमिति । शाल्यादि सिद्धं कोद्रवादिकृतम् । अन्यतः सिद्ध-मन्यतः कृतमिति । देवदत्तात् प्रविष्टं यज्ञदत्तान्निबद्धम् ।

श्रीमूला

देयं न दत्तम् अदेयं दत्तमिति, देयं स्वर्णरजतादिकं कस्मैचिद् दातव्यतया राज्ञाज्ञापितं तस्मै न दत्तं, किन्तु अदेयं फल्गुकुप्यादिकं कालान्तरे कथञ्चिद् दत्तम् । काले न दत्तमकाले दत्तमिति । यज्ञाद्यर्थं कस्मैचिद् दीयतामिति राज्ञाऽऽज्ञप्तं यज्ञादि-काले वर्तमाने न दत्तम्, किन्त्वतिक्रान्ते कथञ्चित् दत्तं लञ्चग्रहणपीडापुरस्सरम् ।

चाणक्यटीका

अदेयमपि नि ? इभमात्रं राजकुलं प्राप्य लोभादन्यदुपग्रहीतुं दत्तम् । व्ययस्य वर्धनादिदं परिहापणम् ।

यस्मिन् काले दातव्यं तस्मिन् स्वयमुपयुञ्जानेन न दत्तम् । तदर्थेन मैत्रीं वा कर्तुमप्राप्त एव काले दत्तम् । अयं कालविपर्ययादवस्तारः ।

आज्ञया कस्मैचिदल्पं दत्तं स्वयं शेषमुजीवितुं बहु निबद्धम् । बहु वा दत्तं प्रति-ग्राहकेण सम्भूय स्वयमेतावदस्तु यथोद्दिष्टम् अस्मै मया दत्तमिति प्रकाश्य अल्पं कृतम् ।

अन्यद्दत्तमन्यत्कृतं, अन्यतो दत्तमन्यतः कृतं, प्रविष्टमप्रविष्टं कृतम् अप्रविष्टं प्रविष्टं कृतम्, कुप्यमदत्तमूल्यं प्रविष्टं, दत्तमूल्यं न प्रविष्टं, सङ्क्षेपो विक्षेपः

प्रतिपदपञ्चिका

देयं न दत्तम्, अदेयं दत्तमितिएवायं राज्ञा कस्यचित्सुवर्णहिरण्यादिकं देयं दत्तम्। तत्सुखेन नैव दत्तम् क्लेशयित्वा कालेन फल्गुकुप्यादिकम्। काले न दत्तमकाले दत्तमित्ययमप्येक एव। यज्ञविवाहादिनिमित्तं राज्ञा कस्यचिद् दातव्यमित्यादिष्टम्। तत्तदानीं न दत्तम्। अतीते काले क्लेशयित्वा लब्धेन हि न्यस्तं दत्तम्। अल्पं दत्तं बहुकृतम् परं दूतस्य सहस्रं दीयतामित्यादिष्टे, तच्छतोत्तरं बहुकृतं परं दूतस्य कृत्वा तच्छतमात्मना गृहीतम्।

श्रीमूला

अल्पं दत्तं बहुकृतमिति। शतं दीयतामिति राजाज्ञायां तत् पञ्चाशतात्मसात्कारार्थया साग्रं पुस्तके विलिखितम्। बहुदत्तमल्पं कृतमिति। शतं देवदत्ताय दीयतामिति राजादेशे विंशतिं स्वयं गृहीत्वाऽशीतिमात्रं तस्मै दत्तम्। अन्यद् दत्तमन्यत् कृतमिति। राज्ञादिष्टाः शालयः कोद्रवास्तु दत्ताः। अन्यतो दत्तमन्यतः कृतमिति। देवदत्तायादिष्टं यज्ञदत्ताय दत्तम्। प्रविष्टमप्रविष्टं कृतमिति। कोशे निवेश्यमुपहस्तितमेव द्रव्यमनुपहस्तिमिति वा किञ्चिदेवोपहस्तितमिति वोक्त्वाऽपहृतम्, अथवा कार्यविशेषार्थे 'प्रजाभ्यो धनमुत्थाप्यानीयतामि'त्यादिष्टे तदुत्थाप्य नाद्याप्युत्थितमित्युक्त्वा कालहरणेनोपजीवितम्। अप्रविष्टं प्रविष्टं कृतमिति। अगृहीत एव करदेभ्यः करो लब्धं गृहीत्वा प्रविष्ट इति लिखितम्। कुप्यमदत्तमूल्यं प्रविष्टमिति। कुप्यं वस्त्रादिकं राजादेशाद् ऋणेन गृहीतं कथञ्चित् कालान्तरे दत्तमित्येकदेशं कृत्वा दत्तसमग्रमूल्यमिति पुस्तके लिखितम्। दत्तमूल्यं न प्रविष्टमिति। महामूल्यदानेन क्रीतं कुप्यं तावन्मूल्यक्रीतत्वेन पुस्तकेऽनिबद्धम्, अर्था दल्पमूल्यक्रीतत्वेन निबद्धमित्ययं विशो-

चाणक्यटीका

तदन्यत् परुत्सङ्क्रान्तं संव्यवहरति, पश्चादुपनयनकाले प्रवेशयति। देयं न दत्तमदेयं दत्तमित्यनेन तुल्यम्।

अन्यद् अल्पमूल्यं राजतभाण्डं दत्तमन्यन्महार्घ्यं सौवर्णभाण्डमुपजीवनार्थमुपनिबद्धम्।

प्रविष्टं कोशाध्यक्षस्योपनीतमपि तेन सम्भूय भक्षयितुम् अप्रविष्टं कृतम्।

अप्रविष्टं वा लोभात् कालहरणार्थं प्रविष्टं कृतम्। प्राप्तमप्राप्तं वेत्ययमवस्तारः।

कुप्यमदत्तमूल्यमपि क्रीत्वा अर्घवृद्धौ राजकुलान्मूल्यं निष्कासयिष्यामीति प्रवेशितम्।

दत्तमहार्घ्यमूल्यं वा समार्घं क्रीत्वा प्रवेशयिष्यामीत्यभिप्रेत्य न प्रवेशितम्। पण्यव्यवहारादयं व्यवहारः।

कृतः, विक्षेपः सङ्क्षेपो वा, महार्घमल्पार्घेण परिवर्तितम्, अल्पार्घं महार्घेण वा. समारोपितोऽर्घः, प्रत्यवरोपितो वा, रात्रयः समारोपिता वा, प्रत्यव-

——————

चाणक्यटीका

सङ्क्षेपो विक्षेप इति। कस्मिंश्चिदायपिण्डे सहस्रेऽधिकलाभार्थं प्रतिकुटुम्बं पृथग् पृथग् विक्षेपेण साधयन्ते। एकादशं शतमार्थमुत्पादयति।

प्रतिपदपञ्चिका

बहु दत्तं अल्पकृतम्। सहस्रं दीयतामित्यादिष्टे, अष्टौ शतानि दत्वा शतद्वयमात्मना गृह्णाति। अन्यत् दत्तमन्यत्कृतम्। यथा दत्ता गोधूमाः कृताः शालयः। अन्यतो दत्तमन्यतो कृतम्। देवदत्तादादाय यज्ञदत्तात्कृतम्। प्रविष्टमप्रविष्टं कृतम्। गोष्ठागारमहानसप्रवेश्यं कुटुम्बिकादिभिः प्रवेशितमपि सर्वमेकदेशं वा न प्रविष्टमित्युक्त्वाऽऽहृतम्। यद्वाऽऽदिष्टोऽध्यक्षो यत्लब्धव्यमायग्रहणमुद्गृह्यानीयतामिति तत्प्रविष्टमपि तस्य नाद्याप्युद्ग्राहयतादिति वदन् कालहरणेनोपजीवति।

अप्रविष्टं प्रविष्टं कृतमिति। हिरण्यादिकरोद्ग्रहणकाले दुर्गतः कुटुम्बी लञ्चं दत्वा कालहरणार्थं प्रविष्टमपि अप्रविष्टं कारयति। कुप्यमदत्तं मूल्यं प्रविष्टमिति। वस्त्रास्तरणादि स्वाम्यादेशादुद्धारकेण गृह्णाति। क्लेशयित्वा च मूल्यैकदेशं ददत् पूर्णं तल्लिखति। दत्तमूल्यं न तत्प्रविष्टमिति, कुप्यमिति वर्तते। कालादनन्तर्येण(न्तरार्घेण) सकलमर्घान्तरं वा गृह्णाति। यद्वा, अल्पमूल्यं प्रवेश्य महन्मूल्यं स्वयं गृह्णाति। सङ्क्षेपो विक्षेपः कृत इति, सहस्रकपिण्डकरदायिनि ग्रामे विप्रकीर्णकरं कृत्वा तद्-

श्रीमूला

ऽपहारोपायः। सङ्क्षेपो विक्षेपः कृत इति। सङ्क्षेपः जनसमूहदेयः पिण्डकरः विक्षेपः कृतः विप्रकीर्णकरः कृतः समूहिभ्यः प्रत्येकं विभज्य ग्राह्यः कृत इत्यर्थः। तथाकरणे हि राजद्रव्यमुपजीवितुं शक्यं ग्राम्यजनाश्चेति। विक्षेपः संक्षेपो वेति, जनादेकस्माद् बहुभिर्मसैरल्पशो ग्राह्यो विप्रकीर्णकरः एकस्मिन्नेव समये संपिड्य ग्राह्यः कृतः, एवं हि कुर्वताऽध्यक्षेण राजद्रव्यमुपजीवितुम्, लभ्यते जनाश्चेति। महार्घमल्पार्घेण परिवर्तितमिति। महार्घं युग्यवाहनादि अल्पार्घेण युग्यादिना विनिमितं विनिमायापहृतम्। अल्पार्घं महार्घेण वेति। अल्पमूल्यम् अत एव महाविक्रयविषयभूतं सामुद्रलावणादि पण्यं महामूल्येन अत एव अल्पविक्रयविषयेण सैन्धवलवणादिना परिवर्तितं विनिमितम्, तद्धि शीघ्रविक्रयेण लाभमुत्पादयत् पण्याध्यक्षस्योपजीव्यं भवतीति। समारोपितोऽर्घ इति, अर्घस्य यथास्थितादर्घादतिरेचनमित्यर्थः। तथा हि—क्रयणे क्रेतारः स्वोपकारकामा भवन्तः पण्याध्यक्षस्यार्घनियामकस्योपजीव्या भवन्तीति। प्रत्यवरोपितो वेति, अर्घ इति सम्बध्यते, अर्घप्रत्यवरोपणे हि कृते विक्रेतारः यथास्थितार्घकामा भवन्तः पण्याध्यक्षस्योपजीव्या भवन्तीति।

श्रीमूला

रात्रयः समारोपिता इति । पञ्चरात्रवेतनं कर्मकरेभ्यो दत्त्वा सप्तरात्रवेतनं दत्तमित्येवञ्जातीयो रात्रिसमारोपः, अनेन ह्युपायेन कर्मकरेभ्यो धनमपह्रियते ।

चाणक्यटीका

विक्षेपः सङ्क्षेपो वेति । पुनः पुनः सिद्धो युष्माकं विमर्दो भविता । तेन सङ्क्षिप्य शतमेकमुत्काल्य चिरेणापि प्रयच्छत अधिकं वा विमर्दो हीयत इति । सिद्धस्याऽधिकस्याऽप्रवेशनादपहारोऽयम् ।

महार्घं राजद्रव्यम् अल्पार्घेणात्मीयेन परिवर्तितम् । अल्पार्घम् अमहाविषय-विक्रयं महार्घेण दुर्लभक्रयेण परिवर्तितमिति दुर्लभा हि महार्घस्य क्रेतार इति । तत् परिवर्त्तनमेतत् ।

समारोपितोऽर्घः । राजधान्ये पादिके द्रोणे तावन्मात्रमुपजीवितुं द्विपादोऽर्घः कृतः ।

प्रत्यवरोपितो वा । राजार्थं द्विपादिकमाख्याय पादिकः कुम्भो गृहीतः । अथवा राज्ञः कृते स्वल्पेनार्घेण सुवर्णादिकं क्रीत्वा उपजीवनार्थं स्वामिना कियता क्रीतमिति पृच्छ्यमानोऽर्थं समारोप्य कथयति । राजविक्रये वा अल्पोऽर्घ इत्युक्त्वा अवशिष्टमुपजीवति । तस्य लाभस्याप्रवेशनादपहार एवायम् ।

रात्रयः समारोपिताः । रात्रिग्रहणेन अहोरात्रस्य ग्रहणम् । कतिचिद् दिवसान्

प्रतिपदपञ्चिका

व्यामोहेन राजार्थं ग्रामं च उपजीवति । विक्षेपस्संक्षेपो वा कृत इति, वर्तते । निक्षिप्त-करदायिनः पिण्डकरादानेनोपजीवति । धान्यपशुहिरण्यकुप्यविष्टिभिः विक्षिप्य संवत्सरावधि सहस्रकरदायिनि ग्रामे तत्सहस्रं एकदैव पिण्डीकृत्य गृह्णन् पूर्ववदुपजीवति । महार्घमल्पार्घेण परिवर्तितमिति । युग्मशतपूर्णायां श(तमु)त्मुखकायां (शन्मरुभ्र) पंचाशत्पणकं युग्मं प्रक्षिप्य द्विशतमूल्यं स्वयं गृह्णाति । अल्पार्घं महार्घेण वा परि-वर्तितमिति । तद् यथा पण्याध्यक्षः पण्यक्रयविक्रयकाले महार्घेण सैन्धवलवणादिनाऽल्प-विक्रयविषयेणाऽल्पं अर्थं सामुद्रादिकं महाविक्रयविषयं पण्यप्रतिपण्यविनिमयेन यथार्घं गृह्णाति, तत्रस्थ(स्थाप्यखा)भाण्डेन शीघ्रविक्रयपण्यलाभं फलम् ।

समारोपितोऽर्घं इति, धान्यादिविक्रये स्थितादर्घादधिकभारोऽप्यक्रेतृनुप-जीवति । प्रत्यवरोवेतेति, अर्घं इति वर्तते । धान्यादिक्रये स्थितादर्घाधीनमनर्घं कृत्वा विक्रेतृनुपजीवति ।

रात्रयस्समारोपिता इति । रात्रिग्रहणेन अहोरात्रग्रहणं भृत्यकर्मकरादीनां

रोपिता वा, संवत्सरो मासविषमः कृतः, मासो दिवसविषमो वा, समागमविषमः, मुखविषमः, धार्मिकविषमः, निर्वर्तनविषमः, पिण्डविषमः, वर्णविषमः, अर्धविषमः, मानविषमः, मापनविषमः, भाजनविषमः इति हरणोपायाः ॥

श्रीमूला

प्रत्यवरोपिता वेति। रात्रय इति वर्तते, स्वामिसकाशाद् दशरात्रव्ययं गृहीत्वाऽष्टरात्रव्ययो गृहीत इत्येवञ्जातीयं रात्रिप्रत्यवरोपणम्, अनेन ह्युपायेन स्वामिद्रव्यमुपजीव्यते। संवत्सरो मासविषमः कृत इति। अधिमासरहित एव संवत्सरः साधिमासः कृत इत्यर्थः। अनेनोपायेनाधिमासलाभोऽपह्नियते। मासो दिवसविषमो वेति। अनूनदिवसो मासो दिवसोनः कृतः। समागमविषम इति। समागमे विषये विषमो व्यापार इत्यर्थः। तद्यथा समागतानां द्वष्टानां कर्मकाराणां भक्तवेतनदाने परोक्षं कमपि द्रष्टव्यमपदिश्य स्वयं तद्भक्तवेतनं गृह्णाति। मुखविषम इति। कुतश्चिदायमुखादुत्पन्नं द्रव्यमन्यस्मादायमुखादुत्पन्नमिति ख्यापितम्, तदधिकृतादुत्कोचं गृहीत्वा। धार्मिकविषम इति। 'ब्राह्मणेभ्यः प्रत्येकं पणशतं दीयतामि'ति राजादेशे पुरोहितेन पुरोहितपुरुषेण वा तदर्धापहरणम्। निर्वर्तनविषम इति। किञ्चित्कर्मनिर्वर्तनप्रवृत्तौ विषमाचरणमित्यर्थः, तद्यथा—करदेभ्यः करोद्ग्राहकर्मनिर्वर्तनप्रसङ्गे करदान् 'युष्माभिरद्यैव करो निर्यातयितव्य' इत्यवरुध्य लब्धग्रहणेन कश्चिन्मुञ्चतीति। पिण्डविषम इति। पिण्डे समूहे विषमाचरणं, यथा—समूहदे ये विषये समूहिनमेकं लब्धग्रहणादिना वर्जयित्वा समूहिभ्य इतरेभ्यो देयग्रहणम्। वर्णविषम इति। ब्राह्मणा एवाद्योत्तीर्णा नान्ये इत्युक्त्वा तद्दिवसवेतनस्यात्मसात्करणं नावध्यक्षेण कृतम्, अथवा स्वर्णेऽष्टवर्णके ग्राह्ये नववर्णकं स्वर्णदायकाद् गृहीत्वाऽष्टवर्णस्यैव राज्ञेऽर्पणं सुवर्णाध्यक्षेण कृतम्। अर्घविषम इति। सेनानिवेशादावर्घस्याव्यवस्थितत्वात् तं किञ्चिदधिकमपदिश्य राजार्थोपजीवनम्। मानविषम इति। परिमाणोन्मानसाधनवैषम्यमित्यर्थः। तच्च हीनैस्तैर्देयं दत्त्वा महद्भिर्दत्तमिति ख्यापनम्, अथवा देयस्य हीनैर्दानं महद्भिः स्वीकरणम्। मापनविषम इति। मापनकृतं वैषम्यं मातृहस्तविशेषोत्पादितं वस्त्रादिमानविषयं वैषम्यम्। भाजनविषम इति। 'आज्यपूर्णं घटशतं दीयतामि'त्युक्ते अल्पानां घटानां शतं दत्त्वा महतां धटानां शतं दत्तमिति लेखनम्, तेन राजद्रव्यमपह्रियत इत्ययं चत्वारिंशत्तमो द्रव्यापहरणोपायः। इतिशब्दः परिसमाप्तिवचनः। हरणोपायाः समाप्ताः, किञ्चिद्भेदेन संभवन्तोऽप्यन्ये यथोक्तेष्वेवान्तर्भवन्तीत्यभिप्रायः।

चाणक्यटीका

कर्म कारुभिः कारयित्वा अपूर्णेष्वेव दिवसेषु वृत्तिदिवसाः पूर्णा इत्यपदिश्य स्वयं भृतिमादातुं समारोपिता रात्रयः।

पूर्णेष्वपि च न तावद् दिवसाः पूर्यन्त इति कर्मकारानतिसन्धातुं प्रत्यवरोपिताः। पूर्वो व्ययस्य वर्धनात् परिहापणम्। उत्तरो निबद्धस्य अप्रदानादपहारः।

चाणक्यटीका

संवत्सरो मासविषमः, राजानमतिसन्धातुं मासेनाधिकः, कर्मकारानतिसन्धातुं मासोनः कृतः।

मासो दिवसविषमः, दिवसेनाऽधिको न्यूनो वेति पूर्ववत्। समागमविषमः यदाध्यक्षोऽस्मिन् मासे (दिवसे) वा गणनार्थं समागन्तव्यमिति जनपदान् प्रतार्य तस्मिन् कालेऽसमागताननेन छलेन तान् दण्डयति।

मुखविषमः, अन्यस्मादायमुखाद् दण्डादेरुत्पन्नम् अनिबद्धमित्यप(हृत्य) ? दिश्य सञ्ज्ञातादौ निबध्नाति। तदीयलाभमुपजीवितुमायस्याऽप्रवेशनादयमपहारः।

धार्मिकविषमः, ब्राह्मणेभ्यः सहस्रं दीयतामित्याज्ञायां ब्रह्मब्रुवेभ्यो दश दश दत्वा शतं शतम् अस्माभिर्लब्धमिति वाचयित्वा नवशतान्युपजीवति। निबद्धस्याऽप्रदानादपहारोऽयम्।

निर्वर्तनविषमो नाम समुचितान्निर्वर्त्तनविशेषादन्यथाकरणम्। तद्यथा—मृदुना उपक्रमेन साध्यम् उत्कोचार्थी दारुणेन साधयतीति। अवस्तारप्रयोगोऽयम्।

पिण्डविषम इति। अल्पं समुदयपिण्डं निबद्धमधिकं कृत्वा बहु निबद्धं वा अल्पं कृत्वा स्वार्थं साधयतीति। सिद्धस्याऽप्रवेशनादपहारोऽयम्।

वर्णविषमः, वर्णपरिच्छेद्यस्य हीनवर्णस्य द्रव्यस्याऽधिकमूल्येन विक्रयः। परिवर्तनभेदोऽयम्।

अर्घविषमः, राजपण्यविक्रयकाले महान्तमल्पमघं निबध्नाति। क्रयकाले विपर्यस्यतीति।

मानविषमः, महता प्रस्थादिना आयमुपसङ्गृह्य अल्पेनोपनयति।
मापनविषमः, हस्तकौशलात्तेनैव मानेन प्रभूतमाकृष्य व्ययकाले न्यूनं मापयति।
भाजनविषमः, घृतघटशतं दीयतामिति दत्तायामाज्ञायाम् अल्पं दत्वा शेषं गृह्णाति। अनुग्राह्येभ्यो वा लोभान्महाप्रमाणैर्ददातीति। उपभोगोऽयम्। एतच्च (सं ?) गतानुगतिकन्यायान् प्रतिबन्धादिष्वन्तर्नीयते।

अयं त्वथ अत्र नैवैते प्रतिबन्धादीनां विशेषाः, प्रतिबन्धादयः अन्यस्य (?) अध्यक्षणामज्ञानालस्यप्रमादभयकामकोपदर्पदोपजाताः स्युः। लोभकृतास्त्वेते प्रेक्षापूर्वकारिणां सोपधयो दोषाः अनन्तरेणैव लोभेन सम्बध्यन्ते। तथा अपहरणोपाया इत्युक्तम्। बहुलख्यापनार्थं चेदं चत्वारिंशदिति। तद्यथा—जातिविषमाः, समानविषमाः, उन्मादविषमाः, सङ्ख्याविषमाः इत्यादिकल्पनावैचित्र्यादपर्यवसानो लोभप्रणीतः।

प्रतिपदपञ्चिका

सप्तदैवसिके भक्तवेतनदानेऽष्टदैवसिकं दत्तमिति वदन् भृत्यादीनां दैवसिकमर्थम् अपहरति। प्रत्यवरोपिता इति। रात्रय इति वर्तते, तेषामेव भृत्यादीनामष्टदैवसिक-

[उक्तैरुपायैः द्रव्यापहरणशङ्कायां प्रश्नपूर्वकं सत्यांशपरिज्ञानेन राष्ट्रे ख्यापनम्, तत्तदपहृतद्रव्यप्रतिनिवर्तनं च]

तत्रोपयुक्तनिधायकनिबन्धकप्रतिग्राहकदायकदापकमन्त्रिमन्त्रिवैया-वृत्यकरान् एकैकशोऽनुयुञ्जीत। मिथ्यावादे चैषां युक्तसमो दण्डः। प्रचारे

प्रतिपदपञ्चिका

भक्तवेतनदाने सप्तदैवसिकं दत्तमित्येकदिवसहापनेन दैवसिकं राजार्थमपहरति। संवत्सरो मासविषमः कृतः मासो दिवसविषम इति। सम्पूर्णमपि पक्षं दिवसोनं कथयन्ति। समागमविषम इति। दृष्टस्य भक्तवेतनदाने कदाचित् परोक्षमपि दृष्टं (द्रष्टव्यं) कृत्वा स्वयं गृह्णाति। मुखविषम इति। आयं मुखान्तरोत्पन्नं द्रव्यमन्यमुखाधिकृतेन लब्धदानपूर्वं प्रार्थितस्तदीयायमुखोत्पन्नं श्रावयति। धार्मिकविषम इति। पुरोहित-स्तत्पुरुषो वा लब्धेन ब्राह्मणान्नित्यकपिलान्तं प्रयच्छति।

निर्वर्तनविषम इति। वर्णान्तरोत्तारणेऽपि नावध्यक्षो ब्राह्मणा एवाद्योत्तीर्णा इति। तद्दैवसिके वेतनं भुङ्क्ते। सौवर्णिकादिपर्णकं वैषम्येण वा तदन्तरमुपजीवति। अर्घविषम इति। कटकादौ प्रत्यहमर्घरपानवस्थितत्वात् क्रयविक्रययो राजार्थं मुष्णाति। मानविषम इति, मानं तुल्याद्युपलक्षणार्थम्। मानतुलावैषम्यं हि तैर्दर्निर्महद्भिः श्रावणम्। मापनविषममिति। हस्तवैषम्येण क्रयविक्रये यदुपजीवति स तस्य लाभम्। भाजनविषय इति, घटसहस्रं सर्पिषो। दीयतामित्यादिष्टे लघुतरघटसहस्रदाना-त्तदन्तरोपजीवनम्। इति शब्दः समाप्तौ हरणोपाया इति। वर्तमाने पुनस्तद्ग्रहणं देशकालादिभेदभिन्ना अप्येते एतावन्त एवेति ज्ञापनार्थम्। तदपहारदण्डास्तु पूर्वप्रक-रणोक्ता वक्ष्यमाणाश्च यथाभिहितं योजनीयाः।

श्रीमूला

तत्रेति। तत्र हरणोपायेषु शङ्क्यमानेष्विति शेषः, उपयुक्तादीन् अष्टौ एकैकशः प्रत्येकम्, अनुयुञ्जीत पृच्छेद्—'इदमनेनाऽध्यक्षेणापहृतं न वे'ति। तत्रोपयुक्तो युक्तानामुपरि नियुक्तः प्रत्ययितपुरुषः, निधायकः भाण्डागारिकः, निबन्धको लेखकः, प्रतिग्राहकः प्रतिग्रहीता, दायकः करदः, दापकः राजपुरुषः, मन्त्री युक्तस्य धीमन्त्रिवः, मन्त्रिवैयावृत्यकरः मन्त्रिणः कर्मकरः। मिथ्येत्यादि। मिथ्यावादे च एषाम् उपयुक्ता-दीनाम्, युक्तसमः अध्यक्षतुल्यो दण्डः। प्रचारे च जनपदे च अवघोषयेत् सपटहताडमव-

चाणक्यटीका

इहादेशस्यादाता एकैकमनुयुञ्जीत, अनुनीय (प्रय ? पृ) च्छेत्—किमनेन युक्तेनाऽपहृतम्, कियद्वा इति। मिथ्यावादे च वाक्यभेदेऽपरिच्छिन्ने दुष्टस्य प्रच्छादना-ददुष्टस्य दूषणात्। युक्तसम इति। युक्तस्य यो (दण्डो) यथापराधम् उक्तः, स तेषा-

चावघोषयेत्—'अमुना प्रकृतेनोपहताः प्रज्ञापयन्तु' इति। प्रज्ञापयतो यथोपघातं दापयेत्। अनेकेषु चाभियोगेषु अपव्ययमानः सकृदेव परोक्तः सर्वं भजेत। वैषम्ये सर्वत्रानुयोगं दद्यात्। महत्यर्थापचारे चाल्पेनापि सिद्धः सर्वं भजेत।

———————

प्रतिपदपञ्चिका

तत्रेति। तेषां हरणोपायानाम् अन्यतमशङ्कायामेतानेव पुरुषानेकैकशः प्रत्येकम् अनुयुञ्जीत। किलैतदमुनाऽध्यक्षेणोपहृतं न वेति पृच्छेत्। तत्रोपयुक्तः औपरिकः, निधायकः स्थापकः, मन्त्रियुक्तस्य बुद्धिसहायः वैयावृत्यकरः, कर्मकाराः शेषाः प्रदेशान्तरे व्याख्याताः। मिथ्यावादे चैषामिति, एषामुपयुक्तादीनां मिथ्यावादेऽन्यथा-कथने युक्तसमोऽर्थापहारिणो युक्तस्य यो दण्डः स एवेति। प्रचारे चेति। प्रचारे जनपदे। अवघोषयेत् पटवाहरणघोषेणैवं ब्रूयात्। अमुनाऽमुकनामधेयेन प्रकृतेन युक्तेन। उपहृता

श्रीमूला

ख्यापयेत्, केन प्रकारेण, अमुना प्रकृतेन अध्यक्षेण, उपहृताः उत्कोचग्रहणादिना पीडिता जनाः, प्रज्ञापयन्तु आवेदयन्तु स्वां स्वां पीडामित्यार्थम्, इति अनेन प्रकारेण। प्रज्ञापपयतः जनस्य, यथोपघातम् उपघातानुरोधेन, दापयेद् द्रव्यम्। अनेकेष्विति। अनेकेष्वभियोगेषु उपघातावेदनेष्वनेककृतेषु युगपत् प्राप्तेषु सत्सु, अपव्ययमानः सर्वमुपघातमात्मकृतमनभ्युपगच्छन् युक्तः, सकृदेव परोक्तः एकत्राभियोगे एकेनाभि-योक्त्रा साक्ष्यादिभिर्विभावितः पराजितः, सर्वं भजेत सर्वाभियोगार्थं यथाभागं दद्यात्। वैषम्य इति। अनेकेष्वभियोगेष्वेकत्र संप्रतिपत्तिरितरत्र विप्रतिपत्तिश्च वैषम्यं तस्मिन्, सर्वत्रानुयोगं दद्याद्, विप्रतिपन्नेषु सर्वेष्वभियोगेषु साक्षिप्रश्नावसरं दद्याद्, राग-द्वेषादिनिमित्तमिथ्याभियोगशङ्कापनुत्तये। एकाभियोक्तृविषयमाह—महतीति। महति अर्थापहरे, प्रभूतस्वर्णरजतादिनानार्थापहारे, केनचित् प्रज्ञापिते, अल्पेनापि सिद्धः एकदेशेनापि साक्ष्यादिभिर्विभावितापचारः, सर्वं भजेत अभियोगविषयं कृत्स्नमर्थं दद्याद, अर्थाद् विप्रतिपद्यमानो युक्तः।

चाणक्यटीका

मित्यर्थः। प्रचारे यत्राऽसौ प्रचरितः प्रकृत अध्यक्षः। उपहृत इति। अन्यायेन दण्डकरो दापित इत्यर्थः। प्रज्ञापयतु दोषमितिशेषः। प्रज्ञापयतः प्रतिपादयतः साक्षिभिः। उपहृत्यवोपहतस्य यथाविधमुपघातं द्रव्यादानाद् दापयेदध्यक्षः। अनेकेष्विति। बहुभिरभियुक्तो यदि सर्वत्रैवाऽपव्ययते नाहमेवं करोमीति। सकृदेव एकत्रैव। परोक्तो भग्नः। सर्वम् अभियोगहिरण्यम्। भजेत दाप्यो दण्डनीयश्चेत्यर्थः।

अस्याऽपवादमाह—वैषम्य इति। वैषम्यं द्विविधम्। तद्यथा—केनचिन्मिथ्या-दण्डितोऽस्मीत्यभियुक्तः, अन्येन भक्षक इति; एकेनोपेक्षक इत्यभियोगवैषम्यम्।

[अध्यक्षादिकृतदुष्कार्यसूचकानां सत्यत्वादिशोधनेन सत्यत्वे सम्माननम्, अन्यथा दण्डश्च]

कृतप्रतिघातावस्थः सूचको निष्पन्नार्थः षष्ठमंशं लभेत। द्वादशमंशं

चाणक्यटीका

किञ्चित् प्रतिपद्यत इति प्रतिपत्तिवैषम्यम्। तत्र सर्वत्रैकैकस्मिन्नेव पदे योगं प्रतिपादनं प्रतिपादको दद्यात्। नैकेन सर्वं साधयेत्। महतीति। एकैकस्मिन्निति सहस्रे शते वा एकदेशं शतं वा पञ्चाशद् (वा) प्रतिपादितः सर्वं सहस्रं शतं वा भजेत प्रतिपादयितुम्। योगवि(घातो ? भागो)महत्यर्थोपघाते साम्येऽप्यनुयोगं दद्यात्, नाल्पेन महान्तं साधयेत्। अल्पेनापि सिद्ध एकैकस्मिन्नेवाभियोगे। महति सर्वं भजेतेति।

कृतप्रतिघातावस्थ इति। यद्यहं न प्रतिपादयामि, तदा प्रसिघातावस्था शरीरनिग्रहावस्था कार्येति कृतकरणः। सूचको ने (?) हेतुकः। निष्पन्नार्थः षष्ठमंशं प्रतिपादितार्थस्य पुनरुत्साहनार्थमुपकारत्वाच्च। भृतकस्तु राज्ञः तस्य वा कृत-

प्रतिपदपञ्चिका

अर्थापहारादिना पीडिताः प्रज्ञापयन्त्वावेदयन्त्विति। प्रज्ञापयतो यथोपघातम् यदन्यायेनापहृतं तद् दापयेत्। अनेकेषु चाभियोगेष्विति। यदानुभावो(विता) वेदयितारो भवन्ति। तदासौ युक्तोपव्य(यं)यमानो मिथ्याकुर्वाणः, सकृदेव परोक्तः एकेनापि अभियोक्त्रा साक्ष्यादिसाधने भावितः सर्वं भजेत। स तेन। (सर्वमिति हि) हिअनेकार्थाभियुक्तेन सर्वार्थव्यपलापिना भावितैकदेशेन देयम्। यदभियुज्यत इति, वैषम्य इति, अनेकेष्वभियुक्तो यदा क्वचित् सम्प्रतिपत्तिं करोति, तदा सम्प्रतिपत्तिविषये यथोचितं दापयेदिति उक्त एव विधिः। प्रतिपत्तिविषये तु सर्वत्रानुयोगं साक्ष्यादिप्रश्नावकाशं दद्यात्। जानपदा अस्याहितपूर्वमत्सरा विपक्षप्रयोजिता वा कदाचिदन्यथा कुर्युरिति। महत्यर्थापहारे चेति। एकेनैवाभियोक्त्रा यदा प्रभूतहिरण्यादिनिमित्तमभियुक्तो भवति, तदल्पेनाऽपि सिद्धेन एकदेशेनाऽपि विभावितेन सर्वं यथाभियुक्तं भजेत दद्यात्।

कृतप्रतिघातावस्थ इति अनेन सूचकविधिमाह—कृतो गृहीतः प्रतिघातनिमित्तं शरीरद्रव्योपघातप्रतिषेधादर्थमवस्थः प्रतिभूः, येन स कृतप्रतिघातावस्थः। यथाऽहं पुनरध्यक्षवचनान्नं त्वया विनाशयितव्या(नि)नु गृहीतप्रतिभूः सूचको निष्पन्नार्थः। षष्ठमंशं

श्रीमूला

कृतप्रतिघातेत्यादि। सूचकः अध्यक्षापचारपिशुनः, कृतप्रतिघातावस्थः कृतः स्वीकृतः प्रतिघातावस्थः प्रतिघातार्थोऽवस्थः अध्यक्षोत्पाद्यानर्थप्रतीकारार्थः प्रतिभूर्येन स तथाभूतः भवेदिति शेषः, यद्यध्यक्षापचारं कश्चित् सूचयेत् स प्रतिघातप्रातिभाव्यं गृहीत्वैव सूचयेदित्यर्थः। स निष्पन्नार्थः सिद्धसूचितार्थः, षष्ठमंशं लभेत, साधिताद्

भृतकः। प्रभूताभियोगादल्पनिष्पत्तौ निष्पन्नस्यांशं लभेत। अनिष्पन्ने शारीरं हैरण्यं वा दण्डं लभेत, न चानुग्राह्यः।

[सूचकेन स्वसूचितांशसत्यत्वसिद्ध्यनुपदमेव स्वमोचनम्, दूष्येण साकं उपजापादिना मेलने वधश्च]

निष्पत्तौ निक्षिपेद्वादमात्मानं वाऽपवाहयेत्।
अभियुक्तोपजापात्तु सूचको वधमाप्नुयात् ॥६१॥

इत्यध्यक्षप्रचारे समुदयस्य युक्तापहृतस्य प्रत्यानयनम् अष्टमोऽध्यायः।
आदित एकोनत्रिंशः।

श्रीमूला

धनात्। द्वादशमिति। भृतकः भृत्यः सूचकः, द्वादशमंशं लभेत। प्रभूतेत्यादि। बहुप्रकारद्रव्यविषयेऽभियोगे प्रभूताभियोगाद् अभियोगविषयबहुप्रकारद्रव्यमध्याद्, अल्पनिष्पत्तौ अल्पस्यैव साक्ष्यादिभिः संसिद्धौ, निष्पन्नस्यांशं लभेत सूचकः। अनिष्पन्न इति। अनिष्पन्ने अभियुक्तेऽर्थे सर्वथैवासंसिद्धे सति, शारीरं हैरण्यं वा दण्डं मिथ्याभियोगनिमित्तं दमं, लभेत, न चानुग्राह्यः न च रक्षणीयः, निर्दोषविसृष्टाध्यक्षप्रभवेभ्योऽनर्थेभ्य इत्यार्थम्।

निष्पत्ताविति। निष्पत्तौ सूचितार्थसत्यत्वसिद्धौ, वादम् अभियोगम्, निक्षिपेद् विरमयेत् सूचकः, आत्मानं वा अपवाहयेत् आत्मानं चाभियोगबन्धान्मोचयेत्,

चाणक्यटीका

संविधान उत्साहनार्थमेव लभते। प्रभूतार्थमभियुज्य यद्यल्पं निष्पादयेत् इति, तदा निष्पन्नस्यांशं षष्ठं द्वादशं वा। न त्वेकदेशनिष्पादनाद् वन्ध्यः। सर्वनाशे वरमल्पोऽपि भाव इति लाभाच्च तत्पराः सन्तो न चोदयन्ति। अनिष्पन्नार्थं एकदेशेनापि। शारीरम् एकाङ्गच्छेदनम्। हैरण्यं वा अपराधानुरूपम्, मिथ्यावादित्वात्। न चाऽनुग्राह्य इति अधिकृतेभ्यो न रक्ष्यः। अन्यस्तु सूचको रक्ष्य इति ज्ञापयति। तथा चोक्तम्—

"ह्रियमाणं यदन्येन भृतो वा यदि वा भृतः।
यो राजद्रव्यमाचष्टे पृच्छतेऽपृच्छतेऽपि वा॥
श्रोतव्यो रहसि (क्षिप्तं) रक्ष्यश्चामात्यतोऽपि वा।
आयुक्ता ह्यपयन्तारं भूयिष्ठं घ्नन्ति भारत!॥" इति॥

निष्पत्ताविति। निष्पत्तौ प्रमाणैः सम्भावितायाम्। अभियुक्ते अभियुक्तोपजा-

प्रतिपदपञ्चिका

लिखेत्। द्वादशमंशं भृतक इति, भृतकोऽनुजीवी प्रभूतार्थाभियोगादिति, यदा सूचकेन प्रभूतार्थनिवेदनं कृतम्। स च तावानर्थो न सञ्जातः स्वल्पो निष्पन्नः, तदा निष्पन्नस्यैवांशं लभेत। अनिष्पन्नार्थस्तु एकांतमृषावादी शारीरमेकं वधादिकं हैरण्यं वा

श्रामूला

अनिष्पत्तौ वादपरिसमापनमात्ममोचनं वा सूचकेन कर्तुमशक्यमित्यभिप्रायः। भट्टस्वामी तु 'निष्पत्तौ सूचितार्थसंसिद्धौ, निक्षिपेद् अन्यत्र दूष्यादौ सञ्चारयेद्, वादं सूचकत्वापवादम्। आत्मानं वापवाहयेद् 'अहमेतस्मिन् काले विषयेऽत्र नासमिति प्रख्यापयेद्' इति व्याचष्टे। यदि तु अभियुक्तेनाध्यक्षेण लञ्चोपप्रलोभनाद्युपायैर्भेदं नीतः सूचकः स्वामियुक्तार्थासाधकं राजान्तिके ब्रूयात्, तदा स वधदण्डर्महतीत्याह—अभियुक्तेत्यादि ॥

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे अष्टमोऽध्यायः।
समुदयस्य युक्तापहृतस्य प्रत्यानयनम्,
आदित एकोनत्रिंशः॥

चाणक्यटीका

पाधिक्षेपान्निक्षिपेत्। परित्यजेद् वा व्यवहारं नाऽहं जानामीति। आत्मानं वाऽध्यक्षादेव लब्धार्थः सन् अपवाहयेद् अपसारयेत् पलायेतेत्यर्थः। तु शब्दस्य वा अवधारणार्थत्वाद् वधमेव (?)।

समुदयस्य युक्तापहृतस्य प्रत्यानयनं नाम अष्टमं प्रकरणम्॥
॥ अष्टमश्चाऽध्यायः॥

प्रतिपदपञ्चिका

अर्थहरणलक्षणं देशकालाद्यपेक्षया दण्डं लभेत। न चाऽनुग्राह्यो मिथ्याभियोगेन अध्यक्षेणोपहन्यमानेन रक्षणीय इति।

अधुना अध्यायप्रान्ते श्लोकमाह—निष्पत्तावित्यादि, निष्पत्तौ सूचितार्थसंसिद्धौ निक्षिपेदन्यत्र दूष्यादौ सञ्चारयेत्। वादं सूचकत्वापवादमात्मानं वाऽपवाहयेत् अहमेतस्मिन् काले विषये नासमिति प्रख्यापयेत्। अभियुक्तोपजापादिति। यदा स एव अभियुक्तोऽध्यक्षः सूचकं वदति, किमर्थं त्वया षड्भारनिमित्तं राजकुले समावेदितं अहमेव तवार्थं प्रयच्छामि पूर्वविदितं तु यथोपसंहरति। राजा तथा क्रियतामित्येवमुक्तां यदा स एवाऽद्य राजानं ब्रूयात्। तदा नावभियुक्तोपजापात् सूचको वधमाप्नुयात्, वधे न योजयितव्यो न क्षन्तव्य इति।

इति श्रीभट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायाम्
अध्यक्षप्रचारे द्वितीयेऽधिकरणे अष्टमोऽध्यायः।

समुदयस्य युक्तापहृतस्य प्रत्यानयनम्। आदित एकोनत्रिंशाऽध्यायः॥

सप्तविंशं प्रकरणम्

नवमोऽध्यायः ।

उपयुक्तपरीक्षा

[नियोज्यानां नियुक्तानां चाध्यक्षाणां शक्तिपरीक्षावश्यकता, परीक्षाक्रमः, कर्मप्रवर्तनक्रमश्च]

अमात्यसम्पदोपेताः सर्वाध्यक्षाः शक्तितः कर्मसु नियोज्याः। कर्मसु चैषां नित्यं परीक्षां कारयेत्, चित्तानित्यत्वान्मनुष्याणाम् ।

श्रीमूला

उपयुक्तपरीक्षेति सूत्रम् । उपयुक्ता युक्तानामुपरि नियुक्ताः प्रत्ययितपुरुषाः, औपरिका इति ये व्यपदिश्यन्ते, तेषां परीक्षा दोषगवेषणेति सूत्रार्थः । युक्तापहृत-प्रत्यानयनोक्त्या गताध्याये युक्तानां परीक्षणीयत्वमवगतम् तत् किमुपयुक्तानामप्यस्ति, उत नेति सन्देहे प्रकरणमिदमारब्धमिति सङ्गतिः ।

अमात्येत्यादि । अमात्यसम्पदोपेताः 'जानपदोऽभिजात' इत्युक्तजानपदत्वादि-गुणसमृद्धियुक्ताः । एतेनार्थोपधाशुद्धियोगमात्रेण नालमिति सूचितम् । सर्वाध्यक्षाः सर्वे अध्यक्षा उपयुक्ता युक्ताश्च, शक्तितः तत्तत्कर्मसामर्थ्यानुसारेण, कर्मसु नियोज्याः । एषां कर्मसु च, परीक्षां दोषगवेषणां नित्यं कारयेत् । अर्थोपधाशुद्धानामेव कर्मसु नियोक्तव्यत्वस्य प्रागभिधानान्नियोगानन्तरं पुनः परीक्षायाः किं कारणम्, तत्राह— मनुष्याणां चित्तानित्यत्वादिति । मनुष्यचित्तं स्वभावादव्यवस्थितं यतः । स्वाभाविक-

चाणक्यटीका

यस्मादेवं केचिद् विविधैरुपायैरपहरन्ति, अपहरन्तोऽप्येवम् अन्यैर्वैरद्वेषाभ्यां सूचकैरपहन्यन्ते, तस्मात् कर्मकालात् प्राङ्नियोगात्, कर्मकालाद् उत्तरकालञ्च उपयुक्तानाम् अध्यक्षाणां परीक्षणमिति प्रकरणमुच्यते । सन्निधातृसमाहर्त्रोः प्रागुक्तत्वात् तदवशिष्टा अध्यक्षा उपयुक्ताः, तेषां परीक्षोच्यते । नियोगात्तावत् पूर्वमुपयुक्ताः परीक्ष्याः किङ्गुणाः स्युः इत्याह—अमात्येति । अमात्यसंपदा जानपदादिकया सर्व-गुणपादार्धगुणहान्या युक्ताः उत्तममध्यमाधमाः सर्वाध्यक्षा इति । ननु प्रकरणात् सामुदायिक इत्येव । किं तर्हि (वि) वीताध्यक्षेऽपि तेषाममात्यसम्पदस्ति चेत् शक्तितो यस्मात् सम्पन्नाः शक्ताः कर्माणि कर्तुमिति । अथवा सम्पदुपेतत्वेऽपि ये यत्कर्तुं शक्तास्ते तत्र । कर्मसु चेति कर्मकाले परीक्षां समर्थैः कारयेत् । उपधाशुद्धत्वाद् अमात्यसंपदोपेतत्वात् पुनः परीक्षणमनुपपन्नमिति चेत् चित्तानित्यत्वात् कार्यवशाद्

अश्वसधर्माणो हि मनुष्याः नियुक्ताः कर्मसु विकुर्वते । तस्मात् कर्तारं करणं देशं कालं कार्यं प्रक्षेपमुदयं चैषु विद्यात् । ते यथासन्देशं असंहता

प्रतिपदपञ्चिका

उपयुक्तपरीक्षेति सूत्रम् । उपयुक्ता औपरिका युक्तानामुपरि नियुक्ताः प्रत्ययितपुरुषाः । यत्र चैते(वि)परीक्ष्यन्ते, तत्र अन्येषामपि युक्तादीनां दण्डापूपिकन्यायात् परिक्षणमागृहीतम्, परीक्षा च तत्तदध्यक्षाणां दोषाण्वेषणमिति सूत्रार्थः । सम्बन्धस्त्वर्थो यथा शुद्धान्तसमाहर्त्रर्हन् सन्निधात्रादिकर्मसु स्थापयेदित्युक्तम् । न चार्थोपधाशुद्धिमतामपि जानपदादिगुणरहितानां कस्मिंश्चित्कर्मणि योगदानं युज्यते इति तत्प्रतिपादनार्थमाह—अमात्यसम्पदोपेता इति । अमात्यसम्पदुक्ता जानपदोऽभिजातः, इत्येवमादिका तयोपेतास्सर्वाध्यक्षाश्शक्तित इति । यस्य यत्र शक्तिः स तत्र नियोक्तव्य इति । तेषु कर्मस्वेषामध्यक्षाणां नित्यं सततं परीक्षां कारयेत् । तस्मात् पुनः पूर्वपरीक्षितानां पुनः पुनः परीक्षावचनं तदाह—चित्तानित्यत्वान्मनुष्याणामिति, एतच्च स्वाभाविकमनित्य-

श्रीमूला

चित्तानित्यत्वमुक्त्वाऽवस्थाविशेषभवमाह—अश्वेत्यादि । यथा हि अश्वा रथवहनकर्मानियोगदशायां साधुशीला एव सन्तस्तन्नियोगदशायां विकारं प्राप्नुवन्ति, एवं कर्मसु अनियोगदशायां सुशीला एव परिदृष्टाः नियोगदशायां शीलवैकृतं प्राप्नुवन्तीत्यर्थः । तस्मादिति । तस्मात् यथोक्तात् कारणात्, कर्तारम् अध्यक्षम्, करणं धर्माद्यधिकरणम् अनुष्ठानं वा, देशं स्थानीयादिकम्, कालम् अहोरात्रादि दुर्भिक्षकालादि वा, कार्यं

चाणक्यटीका

अनियतस्वभावा चित्तवृत्तिरिति । मनुष्यजातिव्यापित्वं धर्मस्याह—अश्व (स) धर्माण इति । यथा सुदान्ताः प्रकृत्यवस्थायां विज्ञातस्वरूपाः कर्मसु युद्धादिषु भयश्रमाभियोगात् चित्रश्रवणाद्वा विकुर्वते अन्यादृशीं गतिं कुर्वते । एवं ह्याह—

"अवाहनकृतो नाशो वाजिनः कामुकस्य वा ।" ॥इति॥

एवमध्यक्षाः कर्मणि अज्ञानालस्यप्रमादभयादिभिः आगन्तुकनिमित्तापेक्षया विकुर्युरिति यस्मात् कर्मसु चित्तानित्यत्वं तस्मात् विनियोक्तुकामः कर्त्रादीनेषां प्राक् परिच्छिन्द्यात् । तद्यथा—एतावत्कर्तृभिः कर्मकरैः, अनेन कर्मकरणेन क्रियोपायेन

प्रतिपदपञ्चिका

त्वम् । वैशेषिकं तु दृष्टान्तेन दर्शयितुमाह—अश्वसधर्माण इति । तत्राश्वे बहवो धर्माः ऊर्ध्वस्वापादयः । तत्प्रतिषेधार्थमाह—नियुक्ताः कर्मसु विकुर्वत इति । अश्वा हि यदैव रथपृष्ठवहनव्यापारे नियुज्यन्ते, तदैवावश्यं कियन्तमपि विकारमुदर्शयन्ति । तद्वन्नियुक्ता अपि यत एवं हि स्यात् तत्तत्कर्त्रादीन् सम्यग्विद्यात् । कर्ता अध्यक्षः, करणं धर्मा-

अविगृहीताः कर्माणि कुर्युः संहताः भक्षयेयुः, विगृहीताः विनाशयेयुः । न चानिवेद्य भर्तुः किञ्चिदारम्भं कुर्युः अन्यत्रापत्प्रतीकारेभ्यः ।

श्रीमूला

करणीयम्, प्रक्षेपं कर्मकरभृतिम्, उदयं लाभं च, एषु अध्यक्षेषु विषये, विद्यात् । ते अध्यक्षाः, यथासन्देशं स्वाम्यादेशानतिक्रमेण, असंहता अकृतान्योन्यसङ्केताः, अविगृहीताः अकृतान्योन्यविरोधाः, कर्माणि कुर्युः । संहतिविग्रहयोर्दोषमाह—संहता इत्यादि । कर्माणीत्यनुवर्तते । कर्माणि भक्षयेयुः कर्मफलान्यपहरेयुः । कर्माणि विनाशयेयुः निष्फलीकुर्युः । स्वामिनमपृष्ट्वा न कमपि कर्मविशेषमग्निजलादिनिमित्तविपत्प्रतीकारातिरेकेण कुर्युरित्याह—न चानिवेद्येत्यादि ।

चाणक्यटीका

विन्यासविशेषेण, अनेन वा द्रव्येण सारदार्वादिकेन, साधनेन, अस्मिन् देशे जनपदे मध्येऽन्ते वा, अस्मिन् काले हेमन्तादौ, इदं कार्यं दुर्गादिकम्, अनेन प्रक्षेपेण सहस्रेण वा धनेन, एवंविधायं शुल्काद्यायनिमित्तम् आपत्प्रतीकारफलं वा निर्वर्त (य) त इत्याकलयेत् । ते तु नियुक्ताः सन्तः कथं कर्माणि कुर्युरित्यत आह—ते यथासन्देशं स्वाम्यादेशमनतिवर्त्तमानाः । असंहता अविगृहीताश्च इतरेतरेण कर्म कुर्युः । किमर्थमिति चेत् अन्योऽन्यदोषप्रच्छादनेन संहता राजार्थं भक्षयेयुः । विगृहीताश्च परस्परद्वेषाद् अन्योन्यावग्रहापेक्षं कार्यं विनाशयेयुः । तद्यथा—सीताध्यस्य कर्म कालाति—पातनेन कुप्यैर न नु गृह्णानोऽपि तदध्यक्षो विनाशयति इत्यादि योजनीयम् ॥

नचानिवेद्य भर्त्तुः अनाख्याय । किञ्चिदल्पमपि आरम्भं तत्समापनानुज्ञानकामचारार्थम् । अस्यापवादः अन्यत्रेति । चोरडामरिकाग्न्युदकाद्यापत्प्रतीकारेभ्यः । निवेदनायां हि मा भूत् कालातिपत्तिरित्यभिप्रायः ।

प्रतिपदपञ्चिका

धिकरणादि, देशःस्स्थानीयादि, कालोऽहोरात्रादिः दुर्भिक्षादिर्वा, कार्यं कर्तव्यम् दुर्गसन्ध्यादि, प्रक्षेपः कर्मकरादिपरिव्ययः । समुदयो लाभः, इत्येतत्सर्वं जानीयात् । ते अध्यक्षा यथा सन्देशं स्वामिना यथादिष्टमसंहताः परस्परमकृतसंविदः अपि गृहीताः परस्परानुपघातिनः कर्माणि समाहर्तृसन्निधातृव्यापारप्रभृतीनि कुर्युः । सङ्घातविग्रहयोश्च तेषां दोषमाह—संहताः परस्परदोषप्रच्छादनेन भक्षयेयुः । कर्माणीति वर्तते । अत्र कर्मशब्दश्च कर्मफले वर्तते । विगृहीताः परस्परावबद्धमत्सराः कर्माणि विनाशयेयुः । अफलान्यर्धफलानि वा कुर्युः । न चानिवेद्य भर्तुः अनाख्याय किञ्चिदारम्भं क्रियाविशेषं कुर्युः । एतत्तु यथादिष्टस्यैव प्रतिप्रश्नार्थंवचनमिति केचित् । अपूर्वारम्भार्थमित्यपरे । अस्यापवादोऽन्यत्र—आपत्प्रतीकोरभ्य इति । आपदोऽन्युदकादिकास्तत्र न पृच्छेत् । प्रमादस्थानेषु च स्त्री-मद्य-गेयादिष्वेषां अत्ययं दण्डं राजा स्थापयेत् । नियोगकाल एव स्थापनम् । श्रावणं कुर्यात् ।

[कर्मकरेषु असतां निग्रहः सताम् अनुग्रहश्च]

प्रमादस्थानेषु चैषामत्ययं स्थापयेद्दिवसवेतनव्ययद्विगुणम्। यश्चैषां यथाऽऽदिष्टमर्थं सविशेषं वा करोति, सः स्थानमानौ लभेत।

[राजजनपदसम्बन्धिनां द्रव्याणां कर्मकरकृतभक्षणादिज्ञाने मतभेदेनोपायद्वयम्]

"अल्पायतिश्चेत् महाव्ययो भक्षयति, विपर्यये, यथाऽऽयतिव्ययश्च न

श्रीमूला

प्रमादेत्यादि। एषाम् अध्यक्षाणाम्, प्रमादस्थानेषु स्त्रीमद्यादिव्यसनेषु दृष्टेषु, अत्ययं दण्डम्, स्थापयेत् सद्य एव प्रयुञ्जीत। कियन्तं स्थापयेत्, दिवसवेतनव्ययद्विगुणं दिवसवेतनस्य प्रमाददिवससम्बन्धिनोऽध्यक्षवेतनस्य दिवसव्ययस्य प्रमादनिमित्त-कतद्दिवसकर्मादर्शनजन्यस्वार्थनाशस्य च द्विगुणम्।

यश्चैषामिति। एषाम् अध्यक्षाणां मध्ये, यः, अर्थं राजकार्यं, यथादिष्टं करोति स्वाम्युपदिष्टप्रकारकं निष्पादयति, सविशेषं वा करोति आदिष्टाभ्यधिकगुण-युक्तं वा निष्पादयति, सः, स्थानमानौ लभेत प्रकृष्टं पदान्तरं पूजां च प्राप्नुयात्।

राजार्थजानपदार्थग्रसनाग्रसनोपलम्भेऽभ्युपायाकाङ्क्षायां व्ययमहत्त्वाल्पत्व-

चाणक्यटीका

प्रमादस्थानेषु स्खलितस्थानेषु विनियस्थो भवेत् परिभाषणं कुर्याद् अस्मिन् स्खलितेऽयं दण्ड इति। (तं ? स) कीदृश इत्याह—भृतानां दिवसवेतनम् अध्यक्षाणां व्ययद्विगुणं दिवसोपभोगो यः पानभोजनादिना तद्द्विगुणमिति। अर्थाच्चिशब्दलोपो द्रष्टव्यः। अन्ये दिवसवतेनव्ययद्विगुणमिति कृतसमासं पठन्ति। भृत्यभरणीयादि— (व ? ह) वेतनमाकलय्य अध्यक्षस्य कर्दमकरणं च (?) द्विगुणो दण्ड इति। अज्ञानादिषु त्वपरिभाषितोऽपि प्रागुक्तोऽयमिति अध्यक्षाणा (मित्येत्य ? मत्ययो) युक्तम्। उपयुक्तग्रहणेन सर्वेषामुक्तत्वात्। तस्माद् अप्रमादार्थमेव परिभाषणं सर्वेषा-मितियुक्तम्। तथा आयप्रमादस्थानेष्वित्युक्तमत्ययं स्थापयेदिति च॥

यश्चैषां यथादिष्टं तथैव कार्यं कुर्यात्। अधिकं (स) विशेषम्। मानश्च पूजां वस्त्रादिकं लभेत॥

प्रतिपदपञ्जिका

प्रमत्तस्याध्यक्षस्य कर्माकरणे यद्दिवसवेतनं दत्तं तत्द्विगुणमादेयम्। व्यय-द्विगुणमिति च यावत्। यावती हानिः करणे जाता सा द्विगुणादपनेया व्ययशब्दश्च व्ययनिमित्ते फले वर्तते। यश्चैषामध्यक्षाणां यथादिष्टं पूर्वप्रसिद्धं सविशेषं समधिकं वा विकल्पेन कुर्यात्। उत्पादयेत्। स स्थानमानौ लभेतेति, स्थानमधिकारान्तरं मानः पूजा।

भक्षयति" इत्याचार्याः । "अपसर्पेणैवोपलभ्यते" इति कौटल्यः ।

[व्ययेषु न्यूनाधिक्यदर्शनेनानुमेयाः अनर्थाः, तद्धेत्वानुगुण्येन दण्डः तत्परिहारश्च]

यः समुदयं परिहापयति स राजार्थं भक्षयति । स चेदज्ञानादिभिः

श्रीमूला

समत्वलिङ्गकमनुमानमाचार्या अभ्युपायं मन्यन्त इत्याह—अल्पेत्यादि । अल्पायतिरल्पधनागमः, महाव्ययश्चेद् अनल्पार्थोपभोगो यदि भवेत्, तदा सः भक्षयति राजप्रजार्थमुपजीवति । पिपर्यये यथायतिव्ययश्च महायतित्वे सत्यल्पव्यय आयत्यनुरुपव्ययश्च न भक्षयति । इत्याचार्याः । स्वमतमाह—अपसर्पेणैवेति । अपसर्पेणैवोपलभ्यते चारद्वारेणैव दुष्टादुष्टत्वमध्यक्षाणां निश्चीयते । 'त्रयाणामेकवाक्ये संप्रत्यय' इति गूढपुरुषप्रणिध्युक्तदिशेत्यर्थः । एवकारेण महाव्ययत्वाल्पव्ययत्वयोरुपलब्ध्युपायत्वं व्यवच्छिद्यते । ते ह्यल्पायतेरपि महाकुटुम्बिन उद्धारग्रहणेन महाव्ययत्वदर्शनात् प्रभूतराजप्रजाद्रव्यापहारिणोऽपि सहजकृपणतयाऽल्पव्ययत्वदर्शनाच्च व्यभिचरिते इत्यभिप्रायः ।

यः समुदयमिति । यः, समुदयं द्रव्योत्पत्तिम्, परिहापयति न्यूनयति, स

चाणक्यटीका

अल्पायतिश्चेदिति अल्पोपादानः सन् यो महाव्ययः स राजार्थं भक्षयतीति अनुमानाज्ज्ञायते । विपरीतो वहूपादानो योऽल्पव्ययः समोपादानव्ययश्च न भक्षयति । सव्यभिचारित्वेतदनुमानम् । कश्चिद् वहूपादानोऽपि राजा (र्थंहाना ? र्थादान) लोभात् तत् प्रच्छाद (नं नवा नृपो ? यन्त्रल्पमन) ल्पं वा भक्षयेत् । समोपादानव्ययश्च राजद्रव्यमादाय प्राज्ञत्वाद्यथायाति व्ययञ्च करोत्येव । तस्माद् अपसर्पेणैवोपलभ्यते सदसद्वा भक्षणमिति ॥

यद्यनुमानादुपलभ्येत परमिदमनुमानं युक्तं तदाह यः समुदयं निबद्धं हापयति

प्रतिपदपञ्चिका

अत्राचार्यमते नानुमानिकं परीक्षणप्रकारमाह—अल्पायतिश्चेदिति अल्पायतिकोल्पागमः चेच्छब्दो यद्यर्थे, महाव्ययः प्रभूतोपभोगः तत्रायरहितस्य व्ययस्यासम्भवात् व्यक्तं राजार्थं जानपदं वा भक्षयतीत्यनुमीयते । विपर्यये तु प्रभूतायतिरल्पव्ययो यथायतिव्ययश्चानुपव्ययो न भक्षयतीत्येवमाचार्या मन्यन्ते तदपवादार्थमाह—अपसर्पेण अपसर्पेणैवेत्यादि, एवकारोऽवधारणे, अपसर्पेण त्रयाणामेकवाक्यतया निश्चितमुपलभ्यत इति । कौटिल्य इति । कस्मादायव्ययलिङ्गस्य नैकृतिकेषु व्यभिचारदर्शनादिति ।

समुदयमुत्पत्तिं परिहापयति न्यूनीकरोति । स राजार्थं भक्षयति, अन्यथा

परिहापयति, तदेनं यथागुणं दापयेत्। यः समुदयं द्विगुणमुद्भावयति स जनपदं भक्षयति। स चेद्राजार्थमुपनयति, अल्पापराधे वारयितव्यः; महति यथापराधं दण्डयितव्यः। यः समुदयं व्ययमुपनयति स पुरुषकर्माणि

श्रीमूला

राजार्थं भक्षयति। सः, अज्ञानादिभिः अज्ञानालस्यभयप्रमादकामकोपदर्पलोभैर्गण-निक्याधिकारोक्तैः, परिहापयति चेद्, एनं, तद् हापितं द्रव्यं, यथागुणं द्विगुणं त्रिगुणम् अधिकगुणं वा अपराधानुसारिगुणम्, दापयेत्।

यः समुदयं द्विगुणमिति। यः समुदयम्, द्विगुणं क्लृप्तादधिकम्, उद्भावयति, सः, जनपदं भक्षयति कथमन्यथा समुदयाधिक्यमिति। सः, राजार्थम् उपनयति चेत् स्वोद्भावितमधिकं साकल्येन राज्ञेऽर्पयति चेत्, तर्हि, अल्पापराधे अल्पेऽपराधे जनपदपीडने, वारयितव्यः 'मा पुनरेवं जानपदेभ्यः क्लृप्ताधिकमुद्भावये' ति प्रतिषेद्धव्यः। महति द्विगुणत्रिगुणाद्युद्भावनरूपे कोशक्षयकलकजनपदकर्शनहेतावपराधे स्वयमपहरणरूपे च, यथापराधं दण्डयितव्यः। यदुक्तम्—

"यथान्नकर्शनात् प्राणाः क्षीयन्ते सर्वदेहिनाम्।
तथा कोशा नरेन्द्राणां क्षीयन्ते राष्ट्रकर्शनात्॥" इति।

यः समुदयं व्ययमिति। यः, व्ययं कर्मार्थिव्ययाय क्लृप्तं धनम्, समुदयम् उपनयति समुदये प्रवेशयति व्ययितमकृत्वेत्यार्थम्, सः, पुरुषकर्माणि भक्षयति पुरुषान्

चाणक्यटीका

स राजार्थं स्वयमन्यैर्वा अवश्यमेव भक्षयति। तदेनमिति अध्यक्षम्। यथागुणं यथा-परिभाषितगुणमेव दापयेदित्यर्थः। 'एषामानुपूर्व्या यावानर्थोपघात' (अधि० २ अ० ७) इति दर्शयति॥

राजार्थस्य भक्षणेऽनुमानमुक्तम्। जनपदार्थस्योच्यते। यः समुदयनिबन्धमकृत्वा कर्मविशेषमनुभूतम् अकस्मादु (द्) भूतं द्विगुणं दर्शयति जनपदं पीडयति। अन्यथा कथमस्योद्भवः स्यादिति। स चेज्जनपदपीडया द्विगुणं समुदयं राजार्थं समाहर्तुः समर्पयति राज्ञो वा, अल्पेऽपराधे वारयितव्यः—न मे हितमेतत्, न त्वया जनपदः

प्रतिपदपञ्चिका

सिद्धोत्पत्तेः कथं न्यूनत्वं स चेदज्ञानादिभिरिति, अज्ञानालस्यप्रमादभयकामकोपदर्पलो-भैरष्टाभिर्निमित्तैः हापयति। तदेवं यथागुणमिति द्विगुणं त्रिगुणाद्यपक [द्विगुण त्रिगुण न्दापयित्तव्य] उत्पादयति। स जनपदं भक्षयति। अन्यथा हि—समुदयद्वैगुण्यं नोप-पद्यत इति। स चेद्द्विगुणादिकं निरवशेषं राजार्थम् उपनयति। राज्ञःप्रवेशयति। ततोऽल्पे प्रजापीडापराधे नैवं पुनरेवं कर्तव्यमिति वाचा वारयितव्यम्। महत्यपराधे

भक्षयति स कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु यथाऽपराधं दण्डयितव्यः । तस्मादस्य यो यस्मिन्नधिकरणे शासनस्थः स तस्य कर्मणो याथातथ्यं आयव्ययौ च व्याससमासाभ्यामाचक्षीत ।

श्रीमूला

कर्मकरान् कर्माणि च नाशयति कर्माननुष्ठापनेन । तस्य दण्डमाह—स इति । सः, कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु कर्मार्थिदिवसस्य यद् द्रव्यं तद्दिवसकर्मसाध्यं फलं तस्य मूल्यं कल्पितः कश्चिदर्घः कर्मदिवसद्रव्यमूल्यं पुरुषवेतनं पुरुषाणां कर्मकराणां वेतनं कर्मदिवसद्रव्यमूल्यस्य पुरुषवेतनस्य च अपहारेषु विनाशनेषु, यथापराधम् अपराधानुसारेण दण्डयितव्यः कर्मदिवसद्रव्यमूल्यं कर्मकरपुरुषवेतनं च यावत् कर्माकरणेन हापितं तावद् दापयितव्य इत्यभिप्रायः ।

तस्मादिति । तस्मात् समुदयविषयेऽपराधे दण्डविधानात्, योऽध्यक्षः, यस्मिन्नधिकरणे, शासनस्थो नियुक्तः, सः, तस्य कर्मणः तदधिकरणसम्बद्धस्य कर्मणः, याथातथ्यं यथास्थितिम्, आयव्ययौ च, व्याससमासाभ्यां सङ्क्षेपविस्ताराभ्याम्, अस्य राज्ञः, आचक्षीत निवेदयेत् ।

चाणक्यटीका

पीडयितव्य इति । महत्यां जनपदपीडायां राजार्थकरणेऽल्पतया यथापराधं दण्डनीयः । तच्चोद्भावितं प्रत्यर्पणीयमेवेति ॥

यः समुदयं वर्धयितुमुपयुज्य वा प्रतिपूरयितुं व्यये प्रभुवेन (?) अतिसन्धायोपनयतीति स पुरुषकर्माणि निष्फलीकुर्वन् वेतनादानेन भक्षयतीति । स हि पञ्च दिवसान् कर्म कारयित्वा चतुरस्त्रीन् प्रतिपाद्यमान एव द्वन्द्वेन वा (?) दिवसान् (परि ? अप) हरति, द्रव्यं वा महार्घं बहुभिरल्पमूल्यं कुर्वन् द्रव्यमूल्यमपहरति, पुरुषवेतनमेव वा महान्तमल्पं करोतीति स कर्मदिवसाद्यपहारेषु यथापराधं दण्डनीय इति ॥

यस्मादेवं तस्मादस्य राज्ञोऽध्यक्षैर्भक्षितस्य परिज्ञानार्थम् । यो यस्मिन् उत्तरेऽतीते वा अन्धकारे शासनस्थः आज्ञाकारी । स तस्य आत्मीयस्य कर्मणो याथातथ्यं स्वरूपम् । आयव्ययौ च शरीरमुखप्रपञ्चनाद् व्यासेन, संपीड्य समासेन वा आचक्षीत राजजनपदार्थंपुरुषकर्मभक्षाशङ्कापरिहारार्थम् ॥

प्रतिपदपञ्चिका

प्रजापीडया निर्विशेषानुपनयने च यथापराधं दण्डयितव्यः । अभिहितञ्च ।

"यथान्नकर्शनात्प्राणाः[1] क्षीयन्ते सर्वदेहिनाम् ।
तथा कोशा नरेन्द्राणां क्षीयन्ते राष्ट्रकर्शनात ॥" इति ।

---

१. कर्षन्ते इति पाठ ।

[अनालोचितभाविपर्यवसानवतां त्रिविधानां कुपुरुषाणां निर्देशः, स्वरूपविवरणम् तेषां निग्रहश्च]

मूलहरतादात्विककदर्यांश्च प्रतिषेधयेत् । यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः । यो यद्यदुत्पद्यते तत्तद्भक्षयति स तादात्विकः यो

प्रतिपदपञ्चिका

द्विगुणशब्दोऽत्राधिक्यमात्रोपलक्षणार्थम् । यस्समुदयं व्ययमुपनयतीति द्विकर्मको निर्देशः । व्ययं व्ययनिमित्तं द्रव्यं कर्मकरादिभ्यो न प्रयच्छति । समुदये प्रवेशयति । स पुरुषकर्माणीति, पुरुषे कर्मशब्दो जातिवचने । पुरुषाः कर्मकरादयः, कर्माणि तत्साध्यानि, पुरुषान् कर्माणि च द्वयमपि भक्षयति विनाशयति । स कर्मदिवसेति । कर्मार्थो दिवसः तेन निष्पादितं द्रव्यं कर्मदिवसद्रव्यम् । तस्य मूल्यं कर्मदिवसद्रव्य-मूल्यं पुरुषाः कर्मकरादयः तेषां वेतनं पुरुषवेतनम् । कर्मदिवसद्रव्यमूल्यं च पुरुषवेत-नानि च कर्मदिवसद्रव्यमूल्यपुरुषवेतनानि । तदपहारेषु यथापराधं दण्डयितव्यः ।

कर्मकरस्य भृते तदानादरकरणेन कर्मणो यावती हानिः संजाता यावन्मत्रं च तस्य न दत्तं देशकालाद्यपेक्षया तदनुगुणं दण्डयितव्य इति । यतश्चैते समुदयपरिहाप-णादिष्वभिहित दण्डाः तस्मादस्य विजिगीषोर्यो यस्मिन्नधिकरणे अधिकारे शासनस्थो-ऽधिकृतः, स तस्य कर्मणो याथातथ्यं यथावस्थितिं आयव्ययौ चशब्दान्नीवीं च व्याससमासाभ्यामाचक्षीत आवेदयेत् ।

श्रीमूला

मूलहरेत्यादि । मूलहरतादात्विककदर्यान् प्रतिषेधयेत् मूलहरणादिकर्मणो वारयेत् । के पुनर्मूलहरादय इत्यत्राह—यः पितृपैतामहमिति । यः, पितृपैतामहं पितृपितामहार्जितम्, अर्थम्, अन्यायेन भक्षयति दुर्विनियोगेन नाशयति, स मूलहरः । यद्यदुत्पद्यते प्रत्यहं लभ्यते, तत्तद् यः, भक्षयति दुर्विनियोगेन नाशयति, स तादात्विकः ।

चाणक्यटीका

भूयस्तरामात्यसम्बन्धयोगेऽपि मूलहरादीनां यथा सन्निधात्रादयो नाधिकुर्युस्तथा प्रतिषेधयेत् । सन्निधात्रादिनेव वा नियुक्तान् उत्तरकालं मूलहरादीन् ज्ञात्वा निवारयेद् एभ्यो दोषेभ्य इति । पितृपैतामहमिति यः स्वपित्रा पितामहेन वा पूर्वार्जितम् (अर्थम्) अन्यायेन वेश्याद्युपभोगेन नाशयति सः मूलम् आत्मार्थस्येव राजार्थस्यापि हरतीति अनुमीयते । यो यद्यदुत्पद्यते स्वद्रव्यं तत्तत् तदात्व एव कालान्तरे कथं वर्तितव्यमित्यनपेक्ष्य भक्षयति । स तदात्वाप्रयोजनमुत्तरकालं परद्रव्यादानमन्तरेण

प्रतिपदपञ्चिका

मूलहरादींश्च प्रतिषेधयेत् । कर्मभ्योऽवरोधयेत् अपसर्पयेत् । तांश्च मूलहरादीन् स्वयमेव व्याचष्टे यः पितृपैतामहमित्यादि । निगदव्याख्यानं गूढम् । स पक्षवांश्चेति ।

भृत्यात्मपीडाभ्यां उपचिनोत्यर्थं स कदर्यः। स पक्षवांश्चेदनादेयः, विपर्यये पर्यादातव्यः। यो महत्यर्थसमुदये स्थितः कदर्यः सन्निधत्ते, उपनिधत्ते, अवस्रावयति वा—सन्निधत्ते स्ववेश्मनि, अवनिधत्ते पौरजानपदेषु, अवस्रावयति परविषये—तस्य सत्री मन्त्रिमित्रभृत्यबन्धुपक्षमागतिं गतिं च

श्रीमूला

यः भृत्यात्मपीडाभ्याम् अर्थम्, उपचिनोति वर्धयति, स कदर्यः। प्रतिषेधानन्तरमपि मूलहरणाद्यनुवृत्तावाह—स इति। सः मूलहराद्यन्यतमः, पक्षवांश्चेत् पक्षो बन्धुसम्पत् तद्वान् यदि, अनादेयः अग्राह्यः। तद्बन्धुकोपपरिहारार्थमगृहीतधन एव स्थानादवरोपणीय इत्यर्थः। विपर्यये पक्षवत्त्वाभावे, पर्यादातव्यः सर्वस्वं हर्तव्य इत्यर्थः।

यो महतीति। यः कदर्यः महति अर्थसमुदये स्थितः सन्, सन्निधत्ते अवनिधत्ते अवस्रावयति वा, तत्र सन्निधानावनिधानावस्रावणानि विवृणोति—स्ववेश्मनि सन्निधत्ते भूगर्तस्तम्भकोटरादिषु स्थापयति, पौरजानपदेषु अवनिधत्ते रक्षणार्थं निक्षिपति, परविषये अवस्रावयति शत्रुजनपदे धनसञ्चारणं करोति, तस्य अध्यक्षस्य,

चाणक्यटीका

कथं जीवेत्। योऽसम्प्रदानेन भृत्यान् पीडयित्वा अनुपभोगेन च आत्मनः सञ्चिनोत्यर्थं सोऽर्थपतित्वस्य कुत्सनात् कदर्य इत्युच्यते। मूलहरणातादात्विकयोस्तु अर्थंत इत्यर्थः। स तादृशो जनपदमन्यं वा कथं न पीडयेत्। स पक्षवांश्चेदिति कदर्य आश्रयवान् यदि, प्रकोपपरिहारार्थम् अनादेयधनत्वाद् अनादेय इत्युच्यते। मूलहरतादात्विकयोस्तु किञ्चिद्दातव्यं नास्तीन्यप्रसङ्ग एव।

ननु कदर्यो यथापराधं दण्डयः। किमित्यस्य द्रव्यमानीयते चेत्, कोऽन्यस्तद् द्रव्योस्यपभोगस्स्यात्। अनधिकृतस्यापि चेदृशस्य द्रव्यमादातुं युक्तमेवोपयोगार्थम्।

"योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः।
तयोरपि कुटुम्बाभ्याम् आहरेदू यज्ञसिद्धये॥" इति। मनु० ११।१४

अत् एव विधानार्थमाह—विपर्यय इति विनाशः पर्यादातव्यः अध्यक्षेणादातव्य इति॥

किं विविधदोषः पुनरसावित्याह—यो महत्यर्थसमुदये अधिकृतः कदर्यत्वाद् राजद्रव्यं वा सम्यङ् निधत्ते निखन्य स्थापयति स्ववेश्मन्येव। स्ववेमश्मनो वा

प्रतिपदपञ्चिका

स इति मूलहरादीनाम् अन्यतमम् पक्षसम्बन्धानुबन्धो यदि भवति तदा नादेयो न ग्राह्यः। तत्पक्षकोपप्रतिषेधार्थं विपर्यये पक्षरहितः पर्यादातव्यो गृहीतसर्वस्वः कार्यः। यो महत्यर्थसमुदये ऐश्वर्ये स्थितस्सन्निधत्त इत्यादि। तत्र सन्निधानादीन्स्वयमेव व्याचष्टे। सन्निधत्ते स्ववेश्मनि, यथा खननादिप्रकारेण स्थापयति। उपनिधत्त इति।

द्रव्याणामुपलभेत । यश्चास्य परविषये सञ्चारं कुर्यात्तमनुप्रविश्य मन्त्रं विद्यात् । सुविदिते शत्रुशासनापदेशेनैनं घातयेत् ।

श्रीमूला

मन्त्रिमित्रभृत्यबन्धुपक्षं मन्त्र्यादिचतुष्टयबलम्, द्रव्याणामागतिं गतिं च, सत्री गूढपुरुषप्रणिध्युक्तलक्षणः, उपलभेत ।

यश्चेति । यश्च परविषये, अस्य कदर्यस्य, सञ्चारं द्रव्यसंञ्चारणं कुर्यात्, तम्, अनुप्रविश्य अनुकूलतया प्रविश्य तन्मित्रं तद्भृत्यो वा भूत्वेत्यर्थः, मन्त्रं विद्यात् अभिसन्धिरहस्यं जानीयात् सत्री। सुविदित इति। सुविदिते सत्रिद्वारेण सम्यग् विज्ञाते मन्त्रे, एनं कदर्यं, शत्रुशासनापदेशेन घातयेत् शत्रुणा कदर्यमभिसम्बुध्य प्रहितं 'प्रेषितोऽर्थः प्रतीष्टः, अवशिष्टः क्षिप्रं प्रेष्यतामि'ति लिखितवृत्तान्तं किमपि लेख्यं शत्रुविषयागतजनहस्तादन्तपालेन गृहीतोपनीतमित्येवं कूटसृष्टस्यैव शत्रुशासनस्य अपदेशेन प्रख्यापनेन हतं कारयेत् ।

चाणक्यटीका

अपनीय पौरजानपदेषु विश्वासस्थानेषु निधत्ते । अगम्य वा अवस्रावयति परविषये राष्ट्रान्तरे । तत्परिज्ञानमावापः । तस्य सत्री तस्य पूर्वप्रणिहितः सत्री मन्त्र्यादीनाहारयेत् । अयमस्य (निःशि) क्षयिता, इमे चास्य इयन्तो भृत्याः, एतानि मित्राणि, एतानि द्रव्याणि, एतावानस्य मातृपितृबन्धुपक्षः, अथवा एतेऽस्य बान्धवाः, अयमस्य स्वजनः, तातः श्व (शुर) श्च, अतश्च इतश्च इयन्ति द्रव्याण्यागच्छन्ति, (अमुष्व अमुष्व ? अदश्च अदश्च) स्थानं गच्छन्ति इत्येवमुपलब्धे सुकरमादानम् ॥

परविषयस्रुते तु, विधिरुच्यते यश्चेति । मन्त्र्यादीनामन्यतमः तं परविषये द्रव्यावस्रावणार्थं गता-गतं कुर्वन्तम् आनुकूल्येन प्रविश्य आत्मसाद्भूतः सत्री मन्त्रिमित्रं मन्त्रफलं परमार्थमागमयेत् । सुविदिते अवस्रावणे कृते चिकीर्षिते वा तेषु रक्षार्थं त्वन्मित्रेणामुना तद्द्रव्यमानीतम्, शेषमप्यवस्राव्य त्वया यथाशक्ति अपहृत्य आगन्तव्यम् इति शत्रुलेखं प्रकाश्य पक्षपातिनमपि दोषवत्त्वात् सर्वस्त्यक्तं घातयेत् । मा अमात्योऽप्येवं कार्षीदिति ॥

प्रतिपदपञ्चिका

पौरजानपदेषु यो निक्षिपति अवप्रायति । यश्शत्रुविषयेऽर्थसञ्चारं करोति तस्य स्त्रीमन्त्रिमृत्यादिपक्षद्रव्याणामागमनं गमनं चोपलभेत जानीयात् । यस्माच्च (यश्च) कदर्यादिः परविषये द्रव्यसञ्चारं कुर्यात् । तं भृत्यादिभावेन अनुप्रविश्य सत्री मन्त्रं विद्यात् कदर्यादिरहस्यं जानीयात् । सुविदिते सम्यग्विज्ञाते । शत्रुशासनापदेशेनेति अभिव्यक्तं गृहीतं शत्रुलेखाद्वाऽर्थान् शत्रुलेखवाही गुल्मपालो वा राज्ञ उपनयेत् । तत्र च लेखे कदर्यादिर्भिलिखितव्यम् । प्राप्तोऽयं यस्त्वयार्थो मा गन्तव्यमित्यादि तदभिख्यार्थेय एनं कदर्यादिकमभिव्यक्तं च घातयेत् । एते द्रव्यापहारिणां दोषा भवन्ति ।

[ससाक्षिकव्यवहारस्यैव युक्तता, उत्तराध्यक्षयोः
तच्छिष्ययोग्यताश्च]

तस्मादध्यक्षाः सङ्ख्यायकलेखक रूपदर्शकनीवीग्राहकोत्तराध्यक्षसखाः कर्माणि कुर्युः । उत्तराध्यक्षाः हस्त्यश्वरथारोहाः । तेषामन्तेवासिनः शिल्पशौचयुक्ताः सङ्ख्यायकादीनामपसर्पाः ।

[कर्मप्रवर्तनोपयोगिशालाकल्पनविधिः]

बहुमुख्यमनित्यं चाधिकरणं स्थापयेत् ।

श्रीमूला

तस्मादिति । तस्माद् राजद्रव्यापहारे यथोक्तदण्डविधानात्, अध्यक्षाः, अस्य राज्ञः, कर्माणि धनसम्बद्धानि कार्याणि, सङ्ख्यायकलेखकरूपदर्शकनीवीग्राहकोत्तराध्यक्षसखाः कुर्युः सङ्ख्यायकादिसाक्षिकाः सन्तः कुर्युः । सङ्ख्यायकाः गणकाः, लेखकाः प्रसिद्धाः, रूपदर्शकाः निष्कदीनारादिरूपपरिशोधकाः, नीवीग्राहकाः व्ययितशिष्ट धनग्रहणाधिकृताः, उत्तराध्यक्षा औपरिकाः ।

के पुनरुत्तराध्यक्षाः कर्तव्या इत्यत्राह—उत्तरेत्यादि । हस्त्यश्वरथारोहाः हस्त्यारोहाः अश्वारोहा रथारोहाश्च वृद्धभावदिना युद्धाक्षमत्वं प्रतिपन्नाः, उत्तराध्यक्षाः कर्तव्याः । तेषामिति । तेषाम् उत्तराध्यक्षाणाम्, शिल्पशौचयुक्ता अन्तेवासिनः शिल्पं नियोगानुष्ठानकौशलं शौचं स्वकृत्याऽविसंवादनं ताभ्यामुपेताः शिष्याः, संख्यायकादीनामपसर्पाः संख्यायकलेखकादिप्रवृत्त्युपलम्भार्था गूढपुरुषाः कर्तव्याः ।

बह्वित्यादि । अधिकरणं युक्तकर्मस्थानम्, बहुमुख्यं स्थापयेत् बहवो मुख्याः

चाणक्यटीका

तस्मादिति निगमयति । यस्माद् घातयितव्या अन्येऽप्येवं मा भूवन्निति । अस्य एवंविधोराज्ञः । तस्माद सर्वे महत्यल्पे (वा) समुदये नियुक्ताः सङ्ख्यायकाद्यविरहिताः कर्माणि कुर्युः । सङ्ख्यायको गणकः लेखको लेखिता । परीक्षको रूपदर्शकः । भाण्डागारिको नीवीग्राहकः । हस्त्यश्वरथविद्याविदो विद्वत्वादेव शिक्षयितारो यत्क्षयिता रश्चोत्तराध्यक्षाः विदुः ।

प्रतिपदपञ्चिका

तस्मात्अस्द राज्ञोऽध्यक्षास्सङ्ख्यायकादिसमेताः कर्माणि कुर्युः । तत्र सङ्ख्यायको गणकः लेखकः प्रतीतः उपदर्शी नीवीग्राहकः सन्निधातृपुरुषः उत्तराध्यक्षा औपरिकाः तानाह उत्तराध्यक्षा इत्यादि । हस्त्यश्वरथारोहाः प्रतीताः । तेषां हि वार्धक्यात् सङ्ग्रामेऽपि कलितानामत्र विनियोगः । ये तु तेषामन्तेवासिनः शिल्पशौचयुक्ताः शिल्पं हस्तिशिक्षादि शौचमभ्युपेतस्याव्यभिचारः अपसर्पाः युक्तादीनां वृत्तान्तोपलब्धये गूढपुरुषाः स्युः ।

[एवं विश्वप्रयत्ने कृतेऽपि कर्मकरैः अर्थभक्षणस्य दुष्परिहार्यता दुर्ज्ञेयता च]

यथा ह्यनास्वादयितुं न शक्यं
जिह्वातलस्थं मधु वा विषं वा ।
अर्थस्तथा ह्यर्थचरेण राज्ञः
स्वल्पोऽप्यनास्वादयितुं न शक्यः ॥६२॥

श्रीमूला

प्रधाना यस्मिंस्तत् तथाभूतं कुर्यात्, बहवश्चेत् प्रधानास्तेऽन्योन्यशङ्किता राजार्थं नापहरन्तीति । अनित्यं च स्थापयेत् अनित्यं न विद्यते नित्यः स्थिरश्चिरस्थाया युक्तो यस्मिंस्तत् तथाभूतं च कुर्यात् । नित्यो हि युक्तश्चिरसंवाससुलभां मित्रसम्पद-मवष्टभ्याऽऽत्मदोषान् निह्नुवीत, जानपदाश्च तस्य दोषान् कालान्तरात्मापकारभिया नाविष्कुर्युरिति ।

अध्यायान्ते श्लोकानाह—यथाहीत्यादि । अनास्वादयितुं न शक्यम् अर्था-दास्वादनपरिहारमिच्छतापि । अशक्यत्वोपपादकमाह—जिह्वातलस्थमिति । विनापि पुरुषयत्नेन तदुदरप्रवेशं यद्देशसन्निकर्षे लभेत तद्देशनित्यसन्निहितमित्यर्थः । अर्थ इति योऽत्यल्पत्वाद् भक्षितविज्ञातोऽप्यनर्थापर्यवसायी मधुस्थानीयो, यश्च महत्वाद् वध-दण्डान्तपरमानर्थपर्यवसायी विषस्थानीयः, स उभयविधोऽपि । अर्थचरः अर्थेषु व्याप्रियमाणोऽध्यक्षः । तदेवमर्थभक्षणस्याध्यक्षदुष्परिहरत्वमनेनोक्तम् ॥

चाणक्यटीका

बहुमुख्यमनेकायत्तं परस्परभयान्नापचरिष्यति । एकमुख्यं हि यथेष्टं भक्षयति । अनित्यञ्च नित्ये हि कृतास्पदाः (अ) संहता अपि संव (स्ये ? दे) रन् । अधिकरणम् अधिक्रियन्ते कार्याण्यस्मिन्निति । तद्रचयेत् ।

कस्मात् पुनरेतावान् प्रपञ्चः क्रियते । ननु उपधाशुद्धान् प्रमादस्थानेषु च परिभावितान् उभयलोकाविरुद्धत्वादविकारिण एवाधिकुर्यात् । यद्येवं लभ्येत कृतस्यादुर्लभत्वे तदिति (?) ।

रक्षातिशयविधानार्थं स्वभावमनुवदति—यथेति । जिह्वातलस्थं गोचरप्राप्तम् । मधु वा विषं वेति न केवलं पथ्यमेव मध्वादि, अपथ्यमपि विषादिनेत्यतिशयोक्तिः । अथवा अब्रह्मचर्यादिना मधुना परलोकविरुद्धम्, विषञ्च इहपरलोकविरुद्धमिति । अर्थचरेण अधिकृतेन राज्ञो हिताहितं धर्मानर्थांश्च अनवेक्षमाणेन स्वल्पोऽप्यनास्वाद-यितुं न शक्यः ।

प्रतिपदपञ्चिका

बहुमुख्यमनित्यञ्चेति, बहुमुख्यं बहुप्रधानं बहवो हि परस्पराशङ्कया न भक्ष-यन्ति । अनित्यञ्चेति, अनित्यस्य नित्यव्यपेक्षा जानपदा यथावस्थितिं पृष्ट्वा कथयन्ति ।

मत्स्या यथाऽन्तस्सलिले चरन्तो
ज्ञातुं न शक्याः सलिलं पिबन्तः ।
युक्तास्तथा कार्यविधौ नियुक्ताः
ज्ञातुं न शक्या धनमाददानाः ॥६३॥
अपि शक्या गतिर्ज्ञातुं पततां खे पतत्रिणाम् ।
न तु प्रच्छन्नभावानां युक्तानां चरतां गतिः ॥६४॥

प्रतिपदपञ्चिका

न च मैत्रीभावं भयं वोपगच्छन्ति । एवं यथोक्तेनापि प्रकारेणार्थानां प्रविष्टानां सम्यग्रक्षणं न शक्यं कर्तुम् । किमु (ग) दूरस्थितानाम्, मेतत्प्रतिपादनाय तद्रक्षाय तदतिशयप्रतिपादनार्थं चाध्यायप्रान्ते श्लोकमाह—यथा ह्यनास्वादयितुमित्यादि । मधु वा विषं वेति । मधुविषदृष्टान्तोपादनं परिणत्यामविरुद्धस्य वा विवेचन प्रतिषेधार्थम् । येन द्रव्येण जिह्वातलस्थग्रहणं विनापि भावदोषेण स्तोकस्यापि अवश्यमास्वादनार्थं अशक्यपरिहारार्थं च । तत्र येन द्रव्येण यावता भक्षितेनापि न दूष्यते, तत्पक्वान्नहरितशाकादिकं, अल्पमूल्यं च मधुरस्थानीयम् विपरीतं, रत्नसारादिमहामूल्यं च वधपरिक्लेशादिदण्डं निमित्तं विषस्थानीयम् । तत्र परिणतिमविगणय्य भक्षयन्त्येवाधिकृताः । अथवा यथा कश्चित् मधुभक्षो व्रतभङ्गभयादनिच्छन्नपि जिह्वातलस्थितं मध्वास्वादयति । तथा च मरणभीरुर्दृष्टादृष्टदोषमविगणय्य राजार्थं भक्षयन्त्येवाधिकृता इति । मत्स्या अन्तःसलिले यथा चरन्त इत्येत्च्छलोकद्वयं क्षणस्य दुर्विज्ञेयतातिशयज्ञापनार्थं रक्षाशैथिल्यार्थं च । निगदव्याख्यानं श्लोकत्रयम् ।

श्रीमूला

कृतमप्यध्यक्षैरर्थभक्षणं जलचरमत्स्यजलपानवद् गगनचरपक्षिगतिवच्च स्वामिना दुरवबोधमिति श्लोकद्वयेनाह—मत्स्या यथान्तरिति, अपि शक्या गतिरिति च ॥

चाणक्यटीका

एवं हृतस्याप्यागमानुमानाभ्यां ज्ञापनमवश्यंभावीति शक्यमेव । दुष्करं त्वेतत् । तथाहि—मत्स्या इति । सलिले चरन्तः स्वविषयत्वात् । कार्यविधाविति—स्वविषयगतेऽर्थविधौ । नियुक्ता अध्यक्षाः । ज्ञातुमपसर्पैः तथा व्यापृतैः न शक्या धनमाददानाः । काममन्यत्र नियुक्ता अन्यत्रापचरन्तोऽपि ज्ञायेरन्निति आगमाशक्यत्वमुक्तम् ।

अनुमानाशक्यतामाह—अपि शक्येति । अस्मिन् वृक्षे निलीयन्ते अस्मादपक्रान्ता इतिगतेः सावलम्बनत्वं शीघ्रतां वा दृष्ट्वा । न तु प्रच्छन्नभावानां गूढचक्राभावानां (?) युक्तानां चरतां व्यवहरतां गतिः, भावेन तु क्रिया अनुमीयते, स चैषां प्रच्छन्न इति तस्माद् यथोक्तं यत्नमातिष्ठेत् ।

[एवं अन्यायेनार्थभक्षकाणां शिक्षाः प्राज्ञानामुत्तेजनं च]

आस्रावयेच्चोपचितान् विपर्यस्येच्च कर्मसु ।
यथा न भक्षयन्त्यर्थं भक्षितं निर्वमन्ति वा ॥६५॥
न भक्षयन्ति ये त्वर्थान् न्यायतो वर्धयन्ति च ।
नित्याधिकाराः कार्यास्ते राज्ञः प्रियहिते रताः ॥६६॥

इत्यध्यक्षप्रचारे उपयुक्तपरीक्षा नवमोऽध्यायः
आदितस्त्रिंशः ॥

श्रीमूला

अत एतेषु राजा किं कुर्यात्, तत्राह—आस्रावयेदिति । उपचितान् अर्थभक्षणसमृद्धान् अध्यक्षान्, आस्रावयेद् भक्षितमर्थमाहारयेद् उपचयरूपेण लिङ्गेनापसर्पाद्युपायेन च तदपचारमवगम्येत्यार्थम् । कर्मसु विपर्यस्यत् व्यत्ययेन निवेशयेद्-उच्चकर्मस्थानेभ्योऽवरोप्य नीचकर्मस्थानेषु नियुञ्जीतेत्यर्थः । आस्रावणविपर्यसनभयाच्चाध्यक्षा अर्थभक्षणे न प्रवर्तन्ते, भक्षितं चार्थं प्रत्याहरन्तीत्यभिप्रायेणाह—यथेत्यादि । तथा आस्रावयेदित्येवं पूर्वार्धेन सम्बन्धः । सोऽयमर्थभक्षकविषयो विधिः प्रपञ्चितः ॥

ये पुनरर्थंचरा अपि सन्तो महान्तं यत्नमास्थाय राजजानपदार्थं न भक्षयन्ति,

चाणक्यटीका

किञ्च आहारयेच्चेति प्रतिपादयेच्च । उपचितान् अर्थान् । आयुक्तदण्डो ह्ययम् एवं विपर्यस्येच्च कर्मसु इतरेतरसाध्येष्विति अन्वयव्यतिरेकज्ञापनार्थम् । यथा न भक्षयन्त्यर्थान् आभ्यां प्रकाराभ्याम् । भक्षितान्निर्वमन्ति वा आहार्यमाणाः कर्मान्तरं (याच ? नीय) माना इति ।

(न) भक्षयन्ति येत्वर्थान् । ननु च ज्ञातुमशक्या इति विरुध्यते । यदि न विरुध्यते

प्रतिपदपञ्चिका

एवं सति का विप्रतिपत्तिरित्याह—आस्रावयेदित्यादि, आस्रावयेद् यथोक्तेन अपहृतप्रत्यानयनप्रकारेण प्रत्यानयेत् । उपचितान् प्रभूतापहृतवित्तान् विपर्यस्येच्च कर्मस्विति, स्थानान्तरविपर्यासं कारयेत् । तथा च गूढपुरुषादिप्रयोगैः कुर्यात् । यथा न भक्षयन्त्यर्थान् भक्षितांश्च निर्वमन्ति प्रत्यर्पयन्ति । इत्ययमशुद्धानामयमभिहितः प्रकारः । शुद्धानां त्वभिधीयते न भक्षयन्तीत्यादि । नत्वभिहित एवायं यथा ह्यनास्वादयितुं

श्रीमूला

प्रत्युत न्यायतः परिवर्धयन्ति, तथाविधा राजप्रियहितानुष्ठानपराः स्थिराधिकाराः कर्तव्या इत्याह—न भक्षयन्तीत्यादि ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे नवमोऽध्यायः उपयुक्तपरीक्षा, आदितस्त्रिंशः ॥

चाणक्यटीका

यदि भक्षयति ज्ञातुं न शक्या ज्ञाने यतितव्यमित्ययमत्र वाक्यार्थः। इदं तर्हि विरुध्यते। स्वल्पोऽप्यनास्वादयितुं न शक्य इत्येतदप्यतिशयाधानम्। अथवा अन्यत् स्वादनमन्यद् भक्षणम्। न्यायतो जनपदापीडया। वर्धयन्ति च धर्मलाभादभक्षितत्वाद्वा। नित्याधिकाराः कार्यास्ते न विपर्यसनीयाः। राज्ञः अर्थभक्षणाभावात् प्रिये न्यायतश्च वर्द्धनात्। हिते धर्मार्थसक्ता इत्यर्थः।

इति उपयुक्तपरीक्षा नवमं प्रकरणम्।

॥ नवमश्चाध्यायः ॥

प्रतिपदपञ्चिका

न शक्यमित्यभक्षणस्यासम्भव एव। तत्कथमुच्यते न भक्षयन्ति ये त्वर्थानिति। भक्षणद्वैविध्यात् द्विविधं हि भक्षणं विरुद्धमविरुद्धं च। तत्राविरुद्धभक्षणम् अभक्षणमेव। तदधिकृत्याह—न भक्षयन्ति येत्वर्थानिति। न्यायतः प्रजानाम् अबाधादिना अस्थानादिपरिहारेण च वर्धयन्ति स्फीतीकुर्वन्ति[1]। नित्याधिकारास्ते कार्या इति, बहुमुख्यमनित्यं च अधिकरणं स्थापयेदित्यस्यापवादार्थमेतद्वचनमिति।

इति श्री भट्टस्वामिनः कृतौ प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायाम् अध्यक्षप्रचारिके द्वितीयेऽधिकरणे नवमोऽध्यायः ॥ उपयुक्तपरीक्षा, आदितः त्रिंशोऽध्यायः।

---

१. स्थितिं कुर्वन्ति—पा०

अष्टाविंशं प्रकरणम्

दशमोऽध्यायः ।

शासनाधिकारः ।

[शासनपदार्थः, तत्प्राधान्यम्, लेखकयोग्यताः—
लेखनक्रमश्च]

शासने शासनमित्याचक्षते । [1]शासनप्रधाना हि राजानः, तन्मूलत्वात् सन्धिविग्रहयोः ।

श्रीमूला

शासनाधिकार इति सूत्रम् । शासनं नाम लिखितकार्यार्थं तालपत्रादि, तस्याधिकारो विधिरुच्यत इति सूत्रार्थः । 'अर्धगुणहीनः शासनहरः' इति शासनं यत् सूत्रितं दूतप्रणिधौ तदिह निरूप्यत इति सङ्गतिः ।

किं तच्छासनमित्याह—शासने शासनमित्याचक्षत इति । पत्रारूढोऽर्थः शासनं तस्मिन् शासनमिति व्यपदेशं कुर्वन्त्याचार्याः, न तु सन्दिष्टेऽर्थे वाचिकाख्ये इत्यर्थः । कुतः पुनः शासनवाचिकयोर्मध्ये शासनस्य निरूपणादरो, न तु वाचिकस्येत्याकाङ्क्षायामाह—शासनेत्यादि । सान्धिविग्रहयोरिति षाड्गुण्योपलक्षणम् । तेनायमर्थः—हि यस्माच्छासनमेव राज्ञां मन्त्रगुप्तिपुरस्सरषाड्गुण्यव्यापाराव्यभिचारनिर्वाहकत्तया प्रधानम्, वाचिकं तु सन्देशहरगतप्रमादादिदोषसम्भावितमन्त्रभेदतया व्यभिचारित्वान्न प्रधानमिति ।

चाणक्यटीका

अमात्यसम्पदुपेताः सर्वेऽध्यक्षाः, शासनाध्यक्षस्त्वधिकतरगुणः स्यात् । कस्मादिति चेत् तद्व्यापारस्य प्राधान्यात् सर्वाध्यक्षव्यापाराश्रयभूतत्वाच्च । तथा च स्वविषयव्यापारं प्रति 'अधिकरणानां सङ्ख्याप्रचारादिनिबन्धपुस्तकस्थं कारयेत्', 'करणीयादिनिबन्धेन प्रयच्छेत्' इति च, परविषयं प्रति 'अर्धगुणहीनः शासनहरः', 'शासनमेवं वाच्यः परः' इत्यादि च प्राधान्यमत्रैव वक्ष्यामः । तस्मादध्यक्षसम्बन्धेनैव शासनाधिकार इति प्रकरणमारभ्यते । शासने इति । शासनम् अनुज्ञानम् इदं कुरु इदं मा कार्षीरिति । तस्मिन् शासने निमित्तभूते तत्कारणत्वादधिकरणत्वाच्च । शासनमिति लेखम् आचक्षते पूर्वाचार्याः । तस्मात् सर्वाज्ञाकारणभूतत्वाच्चास्य प्राधान्यम् । अथवा,

---

१. 'शासनं प्रधानं राज्ञाम्' इति चाणक्यटीकासम्मतः पाठः ।

तस्मादमात्यसम्पदोपेतः सर्वसमयवित् आशुग्रन्थः चार्वक्षरो लेखवाचनसमर्थो लेखकः स्यात्। सोऽव्यग्रमना राज्ञस्सन्देशं श्रुत्वा [1]निश्चितार्थं

चाणक्यटीका

करणलेख्ये स्वविषयगतमधिकारजातं करणीयादि निबन्धेन प्रयच्छेदिति स्वपरविषयगतं च प्रज्ञापनादि परविषयगतं च सन्देशः शासनं स्थितम् इत्याचक्षते। तथा चोक्तम्—'शासनमेवं वाच्यः परः' इत्यादि। तच्च शासनं प्रधानं राज्ञाम्, सन्धिविग्रहयोः तन्मूलत्वादिति। सर्वेषां गुणानाम् उदाहरणतया वा सन्धिविग्रहोपादानम्। नह्यसन्दिशता अलिखिता च सन्धिविग्रहाववधारयितुं शक्यौ इत्येवं ब्रुवता तत्रगतानां कार्याणां शासनमूलत्वमुक्तं वोद्धव्यम्। तस्मात्तत्प्राधान्यम् राज्ञाम्, अतस्तदध्यक्षोऽपि अध्यक्षान्तरेभ्यो विशिष्टगुणः स्यात्॥

प्रतिपदपञ्चिका

शासनाधिकारः इति सूत्रम्। तत्र शासनमारोपिताधिकारो विधिरिति, सूत्रार्थः। कथं पुनरधिकारशब्दो विधिमभिधत्ते। ज्ञापकात्। वक्ष्यति हि 'कौटिल्येन नरेन्द्रार्थे शासनस्य विधिः कृत' इति। एवं शासनविधिरिति, वक्तव्ये अधिकारग्रहणं सर्वाधिकाराणामपि शासनप्रधान्यज्ञापनार्थम्। सम्बन्धस्तु द्विविधः, राजशासनं वाचिकं, पत्रलिखितं च। तत्र वाचिकं दूतप्रणिधावुक्तम्। "शासनमेवं वाच्य" इत्यादिना, लिखितं त्वभिधीयत इति, अथवा अर्धगुणहीनश्शासनहर इत्युक्तम्। तच्छासनमभिधीयत इति, अयं वा सम्बन्धः। कस्मात्पुनश्शासनविधिं प्रति, महान्यत्न इति। तदाह शासने शासनमित्याचक्षत इति।

अत्र वक्ष्यमाणो हि शब्दस्सम्बध्यते। यस्माच्छासन एव, तालतालीभूर्जादिपत्राणामन्यतमस्मिन् यदभिलिखितं तदेव शासनं भवति। अव्यभिचाराद्वाचिकं तु शासनमेव न भवति। इङ्गिताकारमदप्रमादसुप्तप्रलापादिभिर्मन्त्रभेदसम्भवादित्येवमाचक्षते ब्रुवते। शुक्रबृहस्पतिप्रभृतय आचार्या इति वाक्यशेषः। किञ्च शासनप्रधानका राजानः तदायतन्त्रावापगतसमस्तव्यापारा हि यस्मात्कस्मादित्याह तन्मूलत्वादिति। तन्मूलत्वाच्छासननिमित्तत्वात्। सन्धिविग्रहयोरिति। सन्धिविग्रहग्रहणं षाड्गुण्योपलक्षणार्थम्।

श्रीमूला

शासनस्य प्रधानत्वाद् विशिष्टगुण एव तल्लेखको भवितुमर्हतीत्याह—तस्मादित्यादि। तस्माद्, अमात्यसम्पदोपेतः 'जानपदोऽभिजात' इति मन्त्रिपुरोहितोत्पत्तिप्रकरणोक्ताः पञ्चविंशतिर्जानपदत्वादयो गुणा अमात्यसम्पत् तया युक्तः, सर्वसमयवित् सर्वेषां वर्णानाम् आश्रमाणां वर्णातिरिक्तानाम् चाचाराभिज्ञः,

१. निश्चितार्थं लेखं—पा०।

श्रीमूला

आशुग्रन्थः शीघ्रवाक्यसन्दर्भप्रसरः, चार्वक्षरः चारूणि एकैकशः समुदायतश्च दर्शनीयान्यक्षराणि लिपयो यस्य सः, लेखवाचनसमर्थः लेखस्य स्फुटसुस्वरयथास्थानवाक्यविश्रमसुभगपठनप्रवीणः, लेखस्याप्रकाश्यार्थस्य संज्ञालेखस्य वर्जिताक्षरस्य पदवाक्यसङ्केतितलेखाविशेषात्मकस्य वाचने व्यवहारे समर्थऽ इत्यपरे। एवमेकोनत्रिंशता गुणैर्युक्तो लेखकः स्यात्। स च लेखको राज्ञोच्यमानं वाचिकमनाकुलेन मनसा श्रुत्वाऽर्थान् पौर्वापर्यक्रमेण परलेखार्थानुगुण्यानुगुण्याभ्यां च निश्चित्य लेखं लिखेदित्याह—सोऽव्यग्रेत्यादि। तत्र युक्तानामव्यग्रमनस्कता राजसत्काराद् भवति।

चाणक्यटीका

अतश्च अमात्यसम्पदोपेत इति पुनर्वचनं साकल्यपरिग्रहार्थम्। गुणान्तरविधानात्तु इदं नाश्रीयेतेत्याशङ्कानिवृत्त्यर्थम्। एवङ्गुण (व) त्वेऽपि ये वाप्यस्यान्यगुणाः स्युरिति तानाह—सर्वसमयवित् सर्वेषां राज्ञाम्, तथा देशकुलजातिसङ्घाश्रयाणाम् अन्ततः पाषण्डानां विदिताचारोपचारः, तदनुरूपं लेखं प्रतिविदध्यात् शब्दान् आशु गृह्णाति, ग्रथितान् वाचयतीति च आशुग्रथनः। चार्वक्षरः शोभनानि दर्शनसुखवाचकानि अक्षराणि यस्य। अर्थविबोधात् सर्वलिपिज्ञत्वाच्च शीघ्रं लेखवाचनसमर्थः। सोऽव्यग्रमना इति। कान् कियतः कीदृशान् वा अर्थान् समाज्ञापयतीत्यवहितमनाः। राज्ञः सन्देशं श्रुत्वा तांश्च दर्शनार्थं (प्र ?) पत्रे निदध्यात्, अयं प्रथमः अयं द्वितीयः अयं तृतीयः इत्यानुपूर्व्या तानालोच्य लेखं भूर्जादिपत्रेषु विदध्यात् विरचयेत्। एवञ्च निश्चितार्थो भवति।

प्रतिपदपञ्चिका

यतश्चैवंभूतं शासनमतस्तस्य लेखे नास्यापि प्रधानेन भवितव्यमित्याह—तस्मादमात्यसम्पदोपेता इत्यादि, अमात्यसम्पद् जानपदादयः पञ्चविंशतिर्गुणाः। तया समस्तया समन्वितः। तथा सर्वसमयपरिज्ञानादिभिश्चतुर्भिरित्येवं सङ्क्षेपणैकोनत्रिंशद्गुणो लेखको भवति। तत्र सर्वसमयपरिज्ञानादिभिः चतुर्भिरेवं वित्सर्ववर्णाश्रमाचाराभिज्ञः सर्वलिपिज्ञ इति केचित्। सर्वभाषाभिज्ञ इत्यपरे। आशुग्रन्थः सकृदुक्तग्राही। शीघ्रकविरिति केचित्। लघुहस्तत्वाद्द्रुतलेखीत्यपरे। चार्वक्षर इति। असंसक्तलिखितत्वात् सुबोधानि समुदायशोभीनि चाक्षराणि यस्य लेखवाचनसमर्थ इति। विस्पष्टमधुरकरणसुविभक्तार्थपदवर्णाभिधायी न्यूनातिरिक्ताक्षरप्रतिविधानाभिज्ञ इतिकेचित्। प्रकाश्याप्रकाश्यलेखाभिज्ञो जिताक्षरश्चेत्यपरे। स एवंभूतो लेखकः स्यात्। सोऽव्यग्रमना अनाकुलचित्तो यथोद्दिष्टस्य सम्यगवधारणार्थं तच्चानाकुलचित्तत्वं उत्तरोत्तरसत्कारोपगृहीतः[1]। सम्यक्सर्वकार्याण्यनुतिष्ठन्ति। उक्तं हि—यदाहुः—

———

१. सत्कारनिमित्तकम् सर्वेऽपि ह्यध्यक्षाः उत्तरोत्तरसंस्कारोपगृहीताः। पा०

समीक्ष्य कार्यं लेखं विदध्यात् । देशैश्वर्यवंशनामधेयोपचारमीश्वरस्य, देशनामधेयोपचारमनीश्वरस्य ।

श्रीमूला

"नीचापि बुद्धिर्नृपमानयोगाच्छ्रेष्ठत्वमायाति तदाश्रितानाम् ।
अग्र्यापि निर्वाति हि मानहीना स्नेहं विना दीपशिखेव तूर्णम् ।।"

इति । परलेखानुरूप्यानानुरूप्यनिश्चयविषयेऽपि श्लोकमुदाहरन्ति—

"श्रुत्वा नरेन्द्रवाक्यं परभावं चावधार्य परलेखात् ।
लेखः खलु कर्तव्यो गुणदोषविनिश्चयज्ञेन ।।"

इति । कीदृशं विदध्यात्, ईश्वरस्य राज्ञः, देशैश्वर्यवंशनामधेयोपचारं देशादीनां चतुर्णामुपचारो यस्मिंस्तं तथाभूतम् । तत्र देशोपचारोऽध्युष्यमाणदेशनिर्देशेनोपचारः, यथा—मध्यदेशमलंकुर्वाणमिति । ऐश्वर्योपचारः भूकोशदण्डसम्पन्निर्देशोपचारः 'मध्यदेशाधिपतिमसङ्ख्याताप्रतिहतदण्डक्षपितारिपुपक्षम्' इत्येवञ्जातीयः । वंशोपचारः 'सोमान्वयभूषणम्' इत्येवम्प्रकारः । नामधेयोपचारः 'महाराजाधिराजश्रीसिंहवर्मदेवम्' इत्येवञ्जातीयः । अनीश्वरस्य अमात्यादेः, देशनामधेयोपचारं देशोपचारनामोपचारयुक्तम् । तत्र देशोपचारः 'कान्यकुब्जमलंकुर्वाणम्' इत्यादिः । नामोपचारः 'श्रीसोमदत्तमित्यादिः ।'

चाणक्यटीका

देशोपचारं सर्वसम्पदुपेते रमणीयतरेऽमुके स्थाने इति । ऐश्वर्योपचारं परम्परानुगतप्रजापालनाधिकारदीक्षित इति । वंशोपचारं अमुककुले (केऽर्थ ?) पितृपादानुध्यात इति । देवताऽपि आश्रयसामान्या वंशेऽन्तर्भावनीया परमभागवत इति । (सु ?) नामधेयोपचारं श्रीमहावासुदेव इति । राज्ञ इति । ईश्वरस्य लेखं विदध्यादित्येव अनीश्वरस्य ऐश्वर्यासम्भवात् ।।

प्रतिपदपञ्चिका

नीचोऽपि बुद्धिर्नृपमानयोगाच्छ्रेष्ठत्वमायाति तदाश्रितानाम् ।
अग्र्याऽपि निर्वाति हि मानहीना स्नेहं विना दीपशिखेव तूर्णम् ।।

इति । राज्ञः सन्देशं श्रुत्वा निश्चित्यार्थं पौर्वापर्यक्रमेणावधार्यार्हेति, यद्वा विस्तराभिहितस्य सङ्क्षेपार्थं निश्चित्य ज्ञात्वा ततो लेखं विदध्यादिति । आह च—

श्रुत्वा नरेन्द्रवाक्यं परभावं चावधार्य परलेखात् ।
लेखः खलु कर्तव्यो गुणदोषविनिश्चयज्ञेन ।।

देशैश्वर्येत्यादि, लेखं विदध्यादिति, वर्तते देशाद्युपचारैश्चतुर्भिरीश्वरस्य राज्ञो लेखं विदध्यात् । तत्र देशोपचारो यत्र स्थितः । तद्यथा—मध्यदेशमलङ्कुर्वाणमित्यादि । ऐश्वर्यं भूमिकोशदण्डसम्पत् । तद्यथा—मध्यदेशाधिपः परिमाणकोशराशिम-

जातिं कुलं स्थानवयश्श्रुतानि
कर्मर्द्धिशीलान्यथ देशकालौ ।
यौनानुबन्धं च समीक्ष्य कार्ये
लेखं विदध्यात् पुरुषानुरूपम् ॥६७॥

प्रतिपदपञ्चिका

सङ्ख्याताप्रतिहतदण्डक्षपिताशेषरिपुवर्गमित्यादि । वंशोपचारो यथा सोमान्वयमलङ्कुर्वाणमित्यादि । नामधेयोपचारो यथा—महाराजाधिराजं श्रीशूरवर्मदेवमित्यादि । देशनामधेयोपचारद्विविधमनीश्वरस्यामात्यादेस्तद्यथा—कान्यकुजमलङ्कुर्वाणं श्रीसोमदत्तमित्यादि ।

श्रीमूला

जातिकुलाद्येकादशकमपि लेखविधौ समीक्षणीयमित्याह—जातिमित्यादि । तत्र जातिर्ब्राह्मणादिः । तत्समीक्षा च ब्राह्मणो ब्राह्मणस्य ज्यायसोऽभिवादपूर्वं कनीयस आशीर्वचनपूर्वं क्षत्रियस्य स्वस्त्यादिपदपूर्वं क्षत्रियादिर्ब्राह्मणस्य प्रमाणपूर्वमित्येवञ्जातीया । कुलम् अन्ववायो भोजादिः । स्थानमधिकारः सन्धिविग्रहिकादिः । वयो यौवनादि । श्रुतं शास्त्रविज्ञानम् । कर्म वृत्तिः । ऋद्धिर्धनसम्पत् । शीलं सदाचारः । देशो वासस्थानम् । कालः तदात्वमायतिश्च । यौनानुबन्धो, विवाहसम्बन्धः । इदं जात्याद्येकादशकम्, समीक्ष्य पर्यालोच्य, कार्ये कार्यविषये, पुरुषानुरूपं पुरुषाणां हीनमध्यमोत्तमानां यथाक्रममाज्ञापनबोधनविज्ञापनाद्युक्तिप्रकारैरनुरूपं लेखं विदध्यात् । श्लोकं चात्रोदाहरन्ति—

"वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥" इति ।

चाणक्यटीका

जातिमिति । उत्तमजातिम्, ईश्वरो विज्ञापयेत्, समजातिं बोधयेत्, हीनजातिमाज्ञापयेत् । एष न्यायः, समहीनगुरुकुलेषु गुरुमित्रभृत्यस्थानीयेषु, स्थावरयुवबालेषु, बहुश्रुताल्पश्रुताज्ञेषु, यजनदेवनकृष्यादिषु कर्मसु, समृद्धमध्यदरिद्रेषु, तपोलोकयात्रापरोपतापादिशीलेषु इत्येवं ज्ञात्वा विधेयम् । तथा देशापेक्षयाऽपि, दाक्षिणात्याः पुत्राः श्रद्धालवः, वस्तुनो बोधमात्रार्थिनः मध्यदेशीयाः, म्लेच्छास्त्वज्ञा अविधेया इति । काल इत्यवस्थाप्राप्तिः । कस्मिंश्चित् काले प्रागमात्याः सन्तोऽपि अवमानाज्जुगुप्सामेव(नमेव) समीयन्ते (?) (मन्यन्ते) मान्याश्च माननां न बहु मन्यन्ते तेषु यथाभिप्रायं विदध्यात् । यौनानुबन्धमिति । योन्यादिसम्बन्धं पक्षसमहीनाधिकवयस्स्वपि श्वशुरमैथुनकतत्पुत्रादिषु यथायोगम् । कार्य इति त्रयोदशे वक्ष्यमाणे । लेखं विदध्यात् । जात्यादिविशिष्टम् । पुरुषानुरूप—मिति एषां जात्यादीनां परस्परसमवाये यथागौरवं लोकप्रसिद्धा व्यवस्था ।

[लेखनसौन्दर्यहेतुभूताः अंशाः तेषां विवरणं च]

अर्थक्रमः सम्बन्धः परिपूर्णता माधुर्यम् औदार्यं स्पष्टत्वम् इति लेखसम्पत् । तत्र यथावदनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वमभिनिवेशः इत्यर्थस्य क्रमः ।

चाणक्यटीका

यथाहुः—

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥

(मनु० ११. १६०.)

इति । अभिवादयते प्रीणयति पूजयतीत्यादयो विज्ञापनामाष्टयः (?) । परिष्वजते कुशलयति मानयतीति सम्बोधनभेदाः । अभिमानयति अभिवर्धयति इत्यादयः समाज्ञापनावाचोयुक्तयः सम्बोध्यचित्तानुरोधप्रयोजनाः ॥

प्रतिपदपञ्चिका

भूयोऽपि जात्यादि[1], तत्र जातिः ब्राह्मणादिः । तद्यथा—ब्राह्मणो ब्राह्मणस्य । वयः श्रुताद्यपेक्षयाभिवादनपूर्वकमाशोःपूर्वकं वा । तद्यथा क्षत्रियादेः स्वस्त्यादिपूर्वकं क्षत्रियादि, ब्राह्मणस्य प्रणतिपूर्वकमित्येवं सर्वत्र योज्यम् । कुलमभिधानमभोज्यादि-स्थानाधिकारः सन्धिविग्रहप्रतिहारादिः । वयो यौवनादि । श्रुतं शास्त्रसंस्कारः । कर्म निन्दितमनिन्दितं चानुष्ठानं जीविकेत्यपरे । ऋद्धिस्समृद्धिः । शीलमाचारः । देशो निवासः । कालस्तदात्वमायतिर्वा । केचित्तु देशकालमिति एकमेव पठन्तः कार्यनिबन्धनं परमात्मनोरवस्थाभेदमाचक्षते । यौनानुबन्धो वैवाह्यसम्बन्धः । एतानि जात्यादीनि समीक्ष्य सम्यङ्निरूप्य कार्यं लेखनीयकार्यनिमित्तं पुरुषानुरूपं पुरुषाणां हीनमध्यमोत्तमापेक्षयाऽऽज्ञापनसम्बोधनपूजादिभिरनुरूपं लेखं विदध्यात् । तथा च—

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यास्थानानि गरीयो यद्यदुत्तरम् ॥

श्रीमूला

लेखसम्पदमाह—अर्थक्रम इत्यादि ।

अर्थक्रमादीन् षट्लेखगुणान् स्वयमेव व्याचष्टे—तत्रेत्यादि । तत्र अर्थक्रमादीनां मध्ये । यथावदनुपूर्वक्रिया यथार्हं क्रमकरणम् । तदेव स्फुटप्रतिपत्तये विवृणोति—

चाणक्यटीका

लेखसम्पदिति ये लेखगुणाः । यथावदिति यथाविहितानां देशानाम् अनुपूर्वं-क्रिया देशोपचारप्रयुक्तेन ऐश्वर्योपचारो नामधेयोपचार इति जात्यादीनां च पूजाहेतूनां प्रागुपादानमित्याद्या अनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वं निवेशनं पश्चादप्रधानस्येति ॥

---

१. भूयोऽपि धात्वादिना एकादशलेखविधौ समीक्षणीयानर्थानिग्ह जातिकुलमित्यादि । पा०

प्रस्तुतस्यार्थस्यानुपरोधात् उत्तरस्य विधानमासमाप्तेरिति सम्बन्धः। अर्थपदाक्षराणामन्यूनानतिरिक्तता हेतूदाहरणदृष्टान्तैरर्थोपवर्णनाऽश्रान्तपदतेति परिपूर्णता। सुखोपनीतचार्वर्थशब्दाभिधानं माधुर्यम्। अग्राम्यशब्दाभिधानमौदार्यम्। प्रतीतशब्दप्रयोगः स्पष्टत्वमिति।

प्रतिपदपञ्चिका

साम्प्रतमर्थक्रमादिकां षड्विधां लेखसम्पदं अभिधाय स्वयमेव व्याचष्टे तत्रेत्यादि। तत्रेति निर्धारणे। यथावदनुपूर्वक्रियेति, यथाभिहितजात्यादीनभ्यर्हितत्वात् पूर्वमभिलिख्य पश्चादितरेषां लेखनम्। प्रधानस्यार्थस्य पूर्वमभिनिवेश इति। हस्तिनं प्रेषयाऽश्वं चेति प्राधान्यात्। पूर्वं हस्तिनो निवेश इति। अयं च क्रमो

श्रीमूला

प्रधानस्यार्थस्य पूर्वमभिनिवेश इति। अभ्यर्हितस्यार्थस्य पूर्वं लेखनं पश्चादन्यस्येत्ययमर्थक्रमो नाम लेखगुणः।

सम्बन्धमाह—प्रतुतस्येति। प्रस्तुतस्य प्रक्रान्तस्य, अर्थस्य, अनुपरोधाद् अबाधात्, उत्तरस्यार्थस्य, आ समाप्तेर्विधानम् आ लेखपरिसमापनाल्लेखनं पूर्वपूर्वलिखितार्थाविरोधेनोत्तरोत्तरार्थलेखनमिति यावत्, इत्ययं सम्बन्धाख्यो गुणः।

परिपूर्णतामाह—अर्थेत्यादि। अर्थपदाक्षराणामन्यूनानतिरिक्तता अर्थस्य पदानामक्षराणां चान्यूनतानतिरिक्तता च। अर्थन्यूनता यथा—'हस्तिनौ प्रयच्छे' त्युक्ते हस्तिनं प्रयच्छेति लेखनम्। इहार्थमात्रं न्यूनं पदाक्षराणि तु न न्यूनानि न चातिरिक्तानि। 'हस्तिनं प्रयच्छे' त्युक्ते 'हस्तिनौ प्रयच्छे'ति लेखनेऽर्थातिरिक्तता पदाक्षराणि तु तावन्त्येव। पदन्यूनता यथा—'कालिङ्गं हस्तिनं प्रयच्छे' त्युक्ते विशेषणपरित्यागेन 'हस्तिनं प्रयच्छे'ति लेखनं, 'हस्तिनं प्रयच्छे'ति निर्विशेषणोक्तौ सविशेषणलेखनं पदाधिकता। अक्षरन्यूनता यथा—'सलिल'—शब्दोक्तौ वारिशब्दलेखनं, तद्वैपरीत्यलेखनेऽक्षराधिकता। हेतूदाहरणदृष्टान्तैरर्थोपवर्णना हेतुः कारणम्, उदाहरणं शास्त्रसंवादाभिधानं, दृष्टान्तो लोकसिद्धार्थनिदर्शनं हेत्वादिभिस्त्रिभिरर्थस्य प्रस्तुतस्य उपवर्णना सम्प्रतिपत्तिसम्पादनम्। अश्रान्तपदता वाक्यार्थे पदवचनम् यथा 'सन्धि कुरु' इति पदसूमूहप्रतिपाद्यस्यार्थस्य 'सन्धत्स्व' इत्येकेन पदेन प्रतिपादनम्। इति परिपूर्णता अनेन प्रकारेण परिपूर्णता नाम गुणः।

सुगमसुन्दरार्थप्रतिपादकशब्दप्रयोगो नाम माधुर्यम्, अग्राम्यशब्दप्रयोग औदार्यम्, सुप्रसिद्धशब्दप्रयोगश्च स्पष्टत्वमित्याह—सुखोपनीतेत्यादि।

चाणक्यटीका

प्रकृतस्येति। प्रस्तुतस्य प्राग् लिखितस्य अनुरोधेन पश्चाल्लिख्यमानस्य विधानम्। आलेखपरिसमाप्तेः यावत्तावत् पुत्रमत्रमरणमुपलभ्य शोकेनागन्तुना

चाणक्यटीका

परितपन्तो वयं सेतुकर्मानुष्ठानमपि तावद् घोपयात्रादिव्यग्रतया न सम्भावयाम इति पूर्वापरविरुद्धम् ॥

अर्थपदाक्षराणामिति। अर्थस्य न्यूनता यथा अस्मिन्नगरे यो वसति नायकः विष्णुदासः स प्रेपणीय इति न्यूनार्थता, न ज्ञायते किमर्थमिति नर्त्तितुमि ''''नार्थी एतावता च गते यात्रानोद्यमतिरहितेति अतिरिक्तार्थता। अत्रैव य इत्यनेन विना न्यूनपदता। योऽसाविति अतिरिक्तपदता। न्यूनाक्षरता यथा उपालम्भलेखे कथं भवतामस्वधर्मत्वं युक्तम् इति विवक्षिते भवतामप्यस्वसधर्मत्वमिति निन्दां गमयति। विपर्यये अतिरिक्ताक्षरता विपर्ययं गमयतीति। प्रायेण आत्मवन्तोऽनुप्र (म ? ण) त्यैवात्मानं रक्षतीति हेतुः। वेतसवदित्युदाहरणम्। दृष्टवानसि वैतद् यदमुना प्रणिप्रत्येवास्मान् अतिसन्धाय वृद्धिः प्राप्तेति दृष्टान्तः। उदाहरणदृष्टान्तयोरेकत्वेऽपि सर्वप्रसिद्धं साध्यसाधनं यत्र स दृष्टान्तः, सफलस्य हेतोः प्रदर्शनमुदाहरणम्। तैः अर्थस्य उपमेयादेः साध्यस्य उपवर्णनम् अश्रान्तपदता अविलष्टपदता। यत्रैकेन पदेन प्रतिपाद्योऽर्थः अशक्त्या द्वाभ्यां प्रतिपाद्यते तत् क्लिष्टपदम्। यथा तस्मान्न विश्वसिति (इत्याह) अभियोक्ष्यामि इति प्रयोक्तव्ये तस्मान्न विश्वासं याति अभियोगं करिष्यामीति न लेखितव्यम् ॥

सुखोपनीतेति। सुखोपनीतानामपि अनवहितसम्बन्धानाम् अनड्वाहमुदाहारि। या त्वं वहसि शिरसा कुम्भं भगिनि सा नैनमभिधावन्तमद्राक्षीः इत्येवंप्रकाराणामभावादभिधानम्, चार्वर्थाभिधानं मरणे स्वर्याणां यक्ष्मणि अपादपमिति (?) चारुशब्दाभिधानं जलमुचां खण्डैरम्भसां कर्णैरित्यादि। न तु कार्यं जलमुचः खण्डैरम्भसः कर्णैरिति। अग्राम्यशब्दाभिधानम् अस्माद् वलवतो दुर्वलस्त्वं कस्मान्न प्रणमसि इत्यादीनां ग्राम्याणां प्रयोगात्। प्रतीतशब्दप्रयोगः स्थानाभिकाङ्क्षायां (?) वाराणसी शब्दस्य सर्वलोकप्रसिद्धस्य प्रयोगात् ॥

प्रतिपदपञ्चिका

नामलेखगुणः। सम्बन्धमाह—प्रकृतस्येत्यादि, प्रकृतस्य प्रक्रान्तार्थस्य साध्यस्यानुपरोधात्। अविघातादुत्तरस्य अनुविधानं पश्चाल्लेखनं आसमप्तेरिति, बहुष्वपि प्रयोजनेषु लेखनीयेषु यथा परस्परं व्याधातकं[1] न भवति। तथा लिखेदिति, अयं सम्बन्धः।

परिपूर्णतामाह—अर्थपदाक्षराणामित्यादि।

तत्रार्थादीनां त्रयाणामन्यूनानतिरिक्तता प्रत्येकमहीनाधिगतार्थस्य हस्तिनौ प्रयच्छेदिति वक्तव्ये हस्तिनमिति यथा लिखति तदा तदेव पदं तावन्त्येवाक्षराणि अर्थस्य तु हीनता भवति। अस्यैव वैपरीत्यत्यागादर्थाधिको भवति। पदन्यूनतां कालिङ्गं हस्तिनं प्रयच्छेति विशेषेण वक्तव्ये यदा विशेषणरहितं करोति तदा पदन्यूनता भवति।

---

१. परस्परलेखमीयं पूर्वस्य पूर्वस्य।—पा०

[वर्णपदवाक्यानां स्वरूपविभागादिः]

अकारादयो वर्णाः त्रिषष्टिः । वर्णसङ्घातः पदम् । तच्चतुर्विधं नामा-

---

प्रतिपदपञ्चिका

वैपरीत्यात् पदाधिकता भवति । तदाक्षरन्यूनता, यथा वारिशब्दे प्रयोक्तव्ये गोशब्दं प्रयुङ्क्ते तदा वर्णन्यूनता भवति । स एवार्थः । तदाऽधिकतापि । वारिशब्दे एव प्रयोक्तव्ये सलिलप्रयोगे सतीति केचित् ।

अपरे तु चित्तविक्षेपादिदोषात्[1] दशसु लिखितव्येषु यथा नवैकादश वा लिखति । तदऽर्थस्य न्यूनातिरिक्ता भवति । एवं पदानामपि । किंचित्पदमेव न लिखितीति । एवमक्षराणामपि योजनीयमिति । तथा हेतुदाहरणदृष्टान्तैरिति । हेतुः कारणं, उदाहरणं शास्त्रोक्तार्थनिदर्शनम् । दृष्टान्तः लोकप्रसिद्धार्थस्य प्रदर्शनम् । एभिरर्थोपवर्णना(म)मश्रान्तपदता वाक्यवाक्यार्थे पदवचनं सन्धिविग्रहं वा कुर्वितिवाक्ये प्रयोक्तव्ये सन्धत्स्व विगृहाण वेति पदप्रयोगादश्रान्तपदता भवति । एवमेषा परिपूर्णता नाम लेखगुणः ।

माधुर्यमाह—सुखोपनीतानां शोभनार्थानां यदभिधानं तन्माधुर्यं नाम लेखगुणः । औदार्यमाह—अग्राम्येत्यादि । ग्राम्या अपभ्रंशप्राकृतादिशब्दाः तैरनभिधानं साधुशब्द प्रयोगः, तदौदार्यं नाम लेखगुणः । स्पष्टत्वमाह—प्रतीतशब्दप्रयोग इति । स्पष्ट इत्यादि, सुखबोधम् इतिव्शदस्समासौ ।

श्रीमूला

शब्दप्रसङ्गात् तद्गतं पदवाक्यविभागं पदवाक्यगतं च लेखे करणीयं विशेषान्तरं निरूपयिष्यन् पदारम्भकत्वात् प्रथममक्षराणि निरूपयति—अकारादयो वर्णास्त्रिषष्टिरिति । तत्र ह्रस्वदीर्घप्लुतभेदादचो द्वाविंशतिः, कादयो मावसानाः स्पर्शाख्याः पञ्चविंशतिः, यरलवा अन्तःस्थाख्याश्चत्वारः, अयोगवाहा अनुस्वार विसर्गजिह्वामूलीयोपध्मानीयाश्चत्वारः, यमाक्षराणि चत्वारि, शषसहा ऊष्माख्याश्चत्वारः इत्येवं वर्णानां त्रिषष्टित्वम् । यदाहुः—

"दीर्घाः स्वराणां तत्राष्टौ पञ्च ह्रस्वाः प्लुता नव ।
चतुर्धाऽयोगवाहोष्मयमान्तस्थाः पृथक् पृथक् ।
विंशतिः पञ्च च स्पर्शास्त्रिषष्टिरिति कीर्तिताः ॥" इति ।

स्वरानुनासिक्यकृतस्तु भेदो न सङ्ख्यातो लौकिकप्रयोगे तदनादरात् ।

पदस्वरूपमाह—वर्णसङ्घातः पदमिति । नियतानुपूर्वीकाणां वर्णानां समूहोऽर्थ-विशेषसंकेतितः पदमित्युच्यते । तच्चतुर्विधं नामादिभेदादित्याह—तदिति । नामादि-

---

१. व्यपेक्षादि ।—पा०

ख्यातोपसर्गनिपाताश्चेति। तत्र नाम सत्त्वाभिधायि। अविशिष्टलिङ्ग-

---

चाणक्यटीका

त्रिषष्टिः—यदुक्तम् अर्थपदाक्षराणामन्यूनानतिरिक्तता इति, तत्र अक्षराणि वर्णाः। तेषाम् अकारादयश्चत्वारो ह्रस्वदीर्घप्लुतभेदात् द्वादश, ह्रस्वः प्लुतो-लृकारः, सन्ध्यक्षराण्यष्टौ दीर्घप्लुतभेदादिति द्वाविंशतिः स्वराः। पञ्च पञ्चका वर्गाः, चत्वारोऽन्तस्थाः, शषसहाः सोष्माणइति त्रयस्त्रिंशद्वर्णाः अनुस्वारविसर्जनीय-जिह्वामूलीयोपध्मानीयाश्चत्वारः, यमाश्चत्वारः, अष्टावयोगवाहाः एते त्रिषष्टिः मूर्धन्येन लकारेण सहान्येषां चतुष्षष्टिः। असौ तु लेखे नोपयुज्यत इत्येतावन्त एव संहृताश्चारवो लेखितव्याः॥

एषामेव अन्यूनानतिरिक्ततायां पदस्य (अ ?) यथार्थत्वम्, यतो वर्णसङ्घातः पदम्। तत्र प्रायोपधर्माख्यानम्, एकवर्णमपि ह्यव्ययं पदमस्ति, च, वा, ह इत्यादि।

प्रतिपदपञ्चिका

साम्प्रतं वर्णात्मकत्वात् पदानां, पदात्मकत्वाच्च वाक्यानां, वाक्यनिबन्ध-नत्वाच्च वाक्यार्थप्रतीते र्वाक्यार्थरूपत्वाच्च लेखार्थस्य तत्स्वरूपावधारणायाह-अकारादयो वर्णास्त्रिषष्टिरिति, अत्र ह्रस्वादिभेदेन द्वाविंशतिः स्वराः। पञ्चविंशति-स्पर्शाः, चत्वारश्चत्वारोऽन्तस्थायोगवाहयमोष्माण इत्येवमेतत्त्रिषष्टिर्वर्णाः[1] भवन्ति। स्वराऽनुनासिकभेदानां त्वग्रहणं भाषायां तत्प्रयोगनियमाभावात्।

स्वाभिधेयावधिपरिच्छिन्ना वर्णा एव पदव्यपदेशभाजो भवन्ति। तच्च पदं

श्रीमूला

स्वरूपमाह—तत्रेति। तेषु नामादिषु मध्ये, सत्त्वाभिधायि जातिगुणद्रव्यवाचकं, नाम इत्युच्यते। अविशिष्टलिङ्गं स्त्रीपुन्नपुंसकरूपलिंगविशेषशून्यं क्रियावाचकम् आख्यातम्। क्रियाविशेषकाः क्रियागतप्रकर्षादिविशेषद्योतकाः, प्रादयः प्र परा अप

चाणक्यटीका

चतुर्विधम्। सत्त्वाभिधायीति जातिगुणक्रियाद्रव्यशब्दत्वेऽपि वस्त्वभिधायी इदं तत्सदिति निष्पन्नरूपावधिरित्यर्थः, वृक्षः प्लक्षः शुक्लो नीलः कर्त्ता हर्त्ता चैत्रो गुप्त इति। अविशिष्टलिङ्गमिति अविशिष्टस्त्र्यादिलिङ्गं क्रियासाधनाभिधानेऽपि प्रभूत-

प्रतिपदपञ्चिका

चतुर्विधं। नामाख्यातोपसर्गनिपातभेदेन। तेषां च स्वरूपमाह—तत्रेत्यादि। तत्र तेषु। नाम सत्वाभिधायीति। सत्वं जातिगुणद्रव्याणि। तदभिधायि तद्वाचकं नाम प्राप्ति-

---

१. यरलवेत्यन्तस्थाः अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयायोगवाहाः। यमाक्षराणि चत्वारि (ल, क्ष, त्र, क्ष,) ऊष्माणश्च चत्वारः (श० ष० स० ह०)

माख्यातं क्रियावाचि। क्रियाविशेषिताः[1] प्रादय उपसर्गाः। अव्ययाः चादयो निपाताः। पदसमूहो वाक्य[2]मर्थपरिसमाप्तौ।

श्रीमूला

सम् अनु इत्यादयः उपसर्गाः। अव्ययाः लिङ्गवचनविभक्तिभेदरहिताः, चादयः च वा ह इत्यादयः, निपाताः।

वाक्यस्वरूपमाह—पदेत्यादि। पदसमूहः पदानां सङ्घातो वाक्यम् इत्युच्यते, अर्थपरिसमाप्तौ अर्थस्य पर्यवसाने सति तेन पदसमूहेन चेदेको विशिष्टार्थो नैराकाङ्क्ष्येण

चाणक्यटीका

क्रियाविधाय (कं) यत्तदाख्यातम्, तदप्यनुपात्तकालं यायादित्यादि, वर्त्तमानकालं पचतीत्यादि, भविष्यत्कालं पक्ष्यतीत्यादि चतुर्विधमेव। क्रियाविशेषका इति पचतीत्यादिशब्दोपात्तविक्लेदसामान्यायाः क्रियायाः। प्रादय उपसृजन्ति क्रियायामिति उपसर्गाः। तेऽपिचतुर्विधाः—तत्र व्यक्तविशेषाः आभिमुख्येन यायाद् अप (भि ?) यायादिति। अव्यक्तविशेपालम्बने प्रलम्बते इति। अपृथक्भूतविशेपा। अधी (त्ये ? तौ) अध्येतीति। अनुमीयमानविशेषाः निष्क्रान्तो यूथान्निर्यूथः, परिहृत्य त्रिगर्तेभ्यः (परित्रिगर्तम्) इति। अव्ययाः त्रिलिङ्गसङ्ख्याविशेषैः ये न सम्बद्ध्यन्ते तेऽव्ययाः। यथोक्तम्—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्॥ इति।

एवन्धर्माणः चादय इति। इति प्रदर्शनार्थत्वात् स्वरादयोन्तर्माव्याः ते सति वा असति वा गत्यर्थे निपतन्तो निपाताः। तेपां केचित् सत्वार्थोपग्राहिणः स्वर्देवा इत्यादयः। चादीनामपि केचिदनियतदेशप्रयोगाः, प्लक्षाश्च न्यग्रोधाश्च प्लक्षन्यग्रोधाः इति केचित्। अनियतदेशप्रयोगा मा कार्पीर्मे (?)। केचिदनर्थका एव च वा इत्यादयः, ते लेखके·····गं प्रयोज्याः इत्येवमर्थः। अर्थपरिसमाप्ता इति।

अर्थो द्विप्रकारः परप्रत्यायवस्तुबोधः, इति कर्त्तव्यतालक्षणश्च। येनास्य वस्तुः प्रयोक्तुर्वा प्रयोजनस्य समा·····त्य तद्भवति। तच्च यथाभूतं प्रयोजनं 'देवदत्त कांस्यपात्र्यां भुङ्क्ष्व इति। उपलक्षणीभूतप्रयोजनञ्च 'दूरं गन्तव्यं दृश्यतां सूर्यः इति। काल प्रज्ञामात्रो ·····इति एवासौ परिपूर्णता।

प्रतिपदपञ्चिका

पदिकम्। आख्यातमाह—अविशिष्टलिङ्गमाख्यातं क्रियावाचीति। अविशिष्टलिङ्गमाख्याते लिङ्गभेदो नास्ति। तत्प्रतिपेधान्नाम्नः स्त्रीपुंनपुंसकभेदेन त्रैविध्यं दर्शयति। क्रियावाचिधात्वर्थाभिधाय्यु, उपसर्गानाह—क्रियाविशेषिका इति,

---

१. क्रियाविशेपकाः—पा०। २. अर्थपरिसमाप्तेः—प्र० पं०

[लेखने दीर्घसमासपदप्रयोगनिषेधः उपसंहारक्रमश्च]

एकपदावरस्त्रिपदपरः परपदर्थानुरोधेन वर्गः कार्यः। लेखपरिसंहरणार्थः इतिशब्दः वाचिकमस्य इति च।

प्रतिपदपञ्चिका

क्रियाप्रकर्षकादिवाचिका स्तद्योतका वा प्रादयः, प्र परा अप समित्येवमादय इत्युपसर्गसंज्ञाः। अव्यया इत्युभयशेषः। तेनोपसर्गा अव्यया इत्युभयत्र शेषः। तेनोपसर्गा अव्यवा भवन्ति। निपातानाह—अव्ययाश्चादयश्च निपाता इति।

तत्राव्यया अविद्यमानलिङ्गसङ्ख्याविभक्तिका विधागतयश्चादयः (?)। च वा अहह इत्येवमादयो निपाता इति।

पदसमूहो वाक्यमर्थपरिसमाप्तेरिति। एकार्थावधिक एकप्रयोगावधिकश्च पदसमूहो वाक्यं भवतीति।

श्रीमूला

बुद्धौ प्रतिष्ठितो भवतीत्यर्थः। समासकरणविषयमाह—एकेत्यादि। वर्गः समासः, परपदार्थानुरोधेन कार्यः परं यत् पदं समासघटकादेकस्मात् पदाद् अन्यत् समासघटकं पदं तस्य अर्थानुरोधेन अर्थमनुसृत्य कार्यः अर्थस्य समासघटकपदान्तारार्थेन सहैकीभावयोग्यतामभिलक्ष्य कार्यं इत्यर्थः। पदयोः पदानां वा सति सामर्थ्ये समासः कार्यो नान्यथेत्यभिप्रायः। स च कथम्भूतः कार्यः, एकपदावरस्त्रिपदपरः समस्यमानपदातिरेकेणैकं पदम् अपरं निकृष्टंयस्मिन् स तथाभूतः अर्थात् द्विपदावरः त्रीणि पदानि पराणि उत्कृष्टानि यस्मिन् स तथा भूतश्च कार्यः, त्र्यधिकपदसमासस्तु न कार्यो माधुर्याद्युक्तगुणहानात्। यदाहुः—

"माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते॥"

अपरा व्याख्या—एकपदावरस्त्रिपदपरः इत्यनयोर्यथोक्त एवार्थः, विशेष्यस्तु पदसमूहः, स च सामर्थ्यात् समासलक्षणः। तावता च दीर्घसमासप्रतिषेधस्योक्तस्य सिद्धिः। परपदार्थानुरोधेन वर्गः कार्यः, इत्यनेन तु अर्थान्तरं संगृह्यते। तद्यथा—'वर्गो विरामोऽवसानं विच्छेद' इति पर्यायाः। वर्गः अर्थविश्रान्तिचिह्नं सुखप्रतिपत्त्यर्थं क्रियमाणं, परपदार्थानुरोधेन परपदार्थानुसारेण, कार्यः। 'अनुपरोधेने'ति पाठे परपदार्थानुपघातेन कार्यः।

यथा—'पुराणं मानवो धर्मः स्वको वेदश्चिकित्सितम्।
आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः।

इत्यस्मिन् श्लोके चत्वारीत्यत्र विरामचिह्नस्य करणे परपदार्थेन नोपरोधः, 'चत्वारि न' इत्यत्र करणे तु स्फुट एव सः इति। लेखपरिसमाप्तिचिह्नमाह—लेखेत्यादि। अन्ते इतिशब्दलेखनं 'वचिकमस्ये'ति लेखनं वा लेखसमाप्तिसूचन-

श्रीमूला

प्रयोजनकमित्यर्थः । तत्र लेखनीयार्थस्य निरवशेषतायामिति शब्दः सावशेषतायां 'वाचिकमस्य इत्युक्तिः वाचिकमस्येति लेखनं च 'वाचिकमस्य लेखहरमुखाच्छ्रोतव्यम्' इत्यादिरीत्या लेखनमिति वोद्धव्यम् ।

चाणक्यटीका

परपदार्थानुरोधेनेति । प्रधानपदार्थानुरोधेन, यथा—प्रियसुहृद् इति वाच्ये सुहृत्प्रिय इत्युच्यमानं न केवलं न विशेष·····दार्थतामेव गमयतीत्युत्तरपदार्थानुरोधेन कार्यः यतो वर्गः समास इत्यर्थः । स च कश्चित् पूर्वपदार्थप्रधानः पूर्वकाय इति । कश्चिदुत्तरपदार्थप्रधानो राजपुरुष इत्यादिः । कश्चिदन्यपदार्थप्रधानो बहुपुत्र इति । कश्चिदुभयपदाथप्रधानो धर्मार्थाविति । सर्वत्र यत् प्रधानं न तद्विरोधनीयम् । तथैक-पदं कस्य वर्गोऽक्षराणां प्रकृतिप्रत्ययार्थयोः·····पदस्यैव वा यथैकात्मनो देवदत्त इति (?) त्रिपदाधिकः प्रतिषेध (पञ्च ?) परश्चैतदिति नान्यत्रावरणीयमिति । (?) बहुना समासे नातिस्पष्टत्वमिति । परिसंहरणादिद्योतनार्थं इतिशब्दः कार्यः । अयं हि स(न्दे ? द) र्भावसा (या ? न) द्योतने प्रसिद्धः । वाचिकमस्येति च श्रद्धेय मिति । वाचिकलेख एवैतत् सम्भवति ॥

प्रतिपदपञ्जिका

एकपदावर इति । निकृष्ट एकपदः, पर उत्कृष्टस्त्रिपदः । ननु 'सुप्सुपेति' वचनादेकस्य पदस्य समासो नास्ति । तस्मान्निकृष्टः पदद्वयस्य परः पदत्रयस्य वा वर्गः समासः कार्य इत्यर्थः । ततोऽधिकपदसमासे तु पूर्वोक्तमाधुर्यादिगुणहानिः । उक्तं च :—

"माधुर्यमभिवाञ्छन्तः[1] प्रसादं च सुमेधसः ।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते ॥" इति ।

केचित्तु वर्गे विरामोऽवसानम्, यतिर्विच्छेदः इति पर्यायानाभ्युपदपरेषु[2] वर्गो विश्रान्तिचिह्नं कार्यम् । सुखानुवचनार्थम् इति । परपदार्थानुरोधेनेति । यथा परेण पदेन सहार्थविरोधो न भवति तथा विच्छेदः कार्यः तद्यथा—

"पुराणं मानवो धर्मः तथा वेदश्चिकित्सितम् ।"

आज्ञासिद्धानि[3] चत्वारि, इत्यत्र विरम्य, 'न हन्तव्यानि हेतुभिरि'त्यवधीय-माने परपदार्थाऽविरोधो भवत्येव । यथा पुनराज्ञासिद्धानि चत्वारि नेत्यत्र विरम्य-हन्तव्यानि हेतुभिरिति पठति, तदा विरोधो भवत्येव । अतः परपदार्थानां विरोधे लेखस्य परिसमाप्तिचिह्नं द्विविधमाह—लेखपरिसंहरणार्थं इति शब्दो वाचिकमस्येति वेति लेखपरिसंहरणार्थो लेखपरिसमाप्त्यर्थः । इति शब्दो लेखान्ते प्रयोक्तव्य इति । वा । तत्र तत्र निश्शेषिते लेखनीयार्थं इतिशब्दस्यावशेषे तु वाचकमस्येति समापनीयमिति ।

---

१. अभिवाछानी—पा० २. पर्यायादुपपदेपु, पर्यायानद्रूपपदपरेपु—पा०

३. 'आज्ञासिद्धानि चत्वारि न हन्ताव्यानि हेतुभिः'

[लेखनीयतया सम्भावितानाम् अर्थानां निर्देशः विवरणं च]

निन्दा प्रशंसा पृच्छा च तथाऽऽख्यानमथार्थना ।
प्रत्याख्यानमुपालम्भः प्रतिषेधोऽथ चोदना ॥६८॥
सान्त्वमभ्यवपत्तिश्च भर्त्सनानुनयौ तथा ।
एतेष्वर्थाः प्रवर्तन्ते त्रयोदशसु लेखजाः ॥६९॥

तत्राभिजनशरीरकर्मणां दोषवचनं निन्दा । गुणवचनमेतेषामेव प्रशंसा । कथमेतत् इति पृच्छा । एवम् इत्याख्यानम् । देहि इत्यर्थना । न प्रयच्छामि

श्रीमूला

अथ लेखनीयतया संभावितान् अर्थान् श्लोकाभ्यामुद्दिशति—निन्देत्यादि । निन्दाप्रशंसादित्रयोदशकविशेषतया त्रयोदशविधा लेखार्था इत्यर्थः ।

निन्दादिकं क्रमेण व्याचष्टे—तत्रेत्यादि । अभिजनशरीरकर्मणां दोषवचनं प्रकृतिकुटिला वैश्वामित्रा इत्यभिजनदोषवचनं कुण्ठितो व्याधित इति शरीरदोषवचनं गोघ्नो ब्रह्महेति कर्मदोषवचनम्, सेयं निन्दा त्रिप्रकारा । तद्वैपरीत्येन तेषामेवाभिजनादीनां गुणवचनं प्रशंसा । कथमेतत् करणीयमिति कर्तव्यजिज्ञासा पृच्छा । एवमेतत् करणीयमित्युपदेशः पृष्टेन क्रियमाण आख्यानम् सन्ध्यादिनिमित्तं किञ्चित् कोशदण्डा-

चाणक्यटीका

कार्यं लेखं विदध्याद् इत्युक्तम् । तत्र कार्यं त्रयोदशविधमित्याह—निन्देति । एतांस्त्रयोदशाश्रित्य प्रज्ञापनादयोऽष्टौ लेखार्थाः लेखोपनिबद्धवाक्यार्थाः क्रियाविशेषाः प्रवर्त्तन्ते ॥

तत्र आश्रया एव तावन्निरूप्यन्ते तत्रेति । अभिजायते अत्रेत्यभिजनो जातिः कुलं देशोवा, वृषला कुले यो हि·····क इति । शरीरं कार्यकरणङ्घातः । कुब्जो वामन इति कार्यनिन्दा । पङ्गुर्बधिर इति करणनिन्दा । कर्माणि धर्मार्थकाममोक्षप्रयोजना वर्णाश्रमविषया विवक्षावशान्निन्द्यन्ते तपस्विकः किरातो वेशकुक्कुटो भिक्षुक इति । गुणवचनमेषामेव । वर्णोत्तमो महाकुलीन इति, आर्यावर्त्तज इत्यभिजनस्य । पांशुर्व्यूढोरस्क इति कार्यस्य । प्राज्ञो वाग्मीति करणस्य तपोधनो विशांपतिर्विज्ञात इति (कर्मणः । वि) द्यायाः कर्मण्येवान्तर्भावः । कथमेतदिति पृछा विविधा किमर्थं करोमीति प्रयोजनविषया । किमहं करोमीति पृच्छ्यमानविषया । त्रिविषयमेव

प्रतिपदपञ्चिका

साम्प्रतं लेखाभिलेखनीयात्सम्भाविनस्त्रयोदश[1] निन्दादीनर्थानभिधाय स्वयमेव व्याचष्टे तत्रेत्यादि ।

---

१. सम्भावितान्—पा०

इति प्रत्याख्यानम् । अननुरूपं भवतः इत्युपालम्भः । मा कार्षीः इति प्रतिषेधः । इदं क्रियताम् इति चोदना । योऽहं स भवान्, मम यद् द्रव्यं तद्भवतः इत्युपग्रहः सान्त्वम् व्यसनसाहाय्य[1]मभ्यवपत्तिः सदोषमायति-

पतिपदपञ्चिका

तत्रेति निर्धारणे सप्तमी, अभिजनं कुलम् । तस्य दोषवचनममलजत्वोल्लिङ्गनम् शरीरं कायः तस्य दोषवचनमिन्द्रियोपघातश्वित्रकुष्ठादिवचनमप्रशस्तलक्षणाभिधानं वा । कर्म क्रिया, तस्य दोषवचनम् अधार्मिकत्वयत्किञ्चनकारित्वादिवचनम् । गुणवचनं गुणग्रहणमेतेषामेव अभिजनादीनां प्रशंसा, तद्यथा—विशुद्धसोमान्वयोत्पन्नोऽनुपहतसर्वेन्द्रियसर्वलक्षणोपेतो ज्वलशरीरो भव्यशक्यकल्याणारम्भीत्यादि । पृच्छामाह—कथमेतदिति, किञ्चित्कथमेतदिति सुहृदं तन्मन्त्रिपरिषदं वा स्वकर्तव्यं लेखेन यत्पृच्छति सा पृच्छा । स च पृष्टो यद् वक्ष्यति, एवमेतदिति । तदाख्यानम् । अर्थनामाह—यदा कंचित्सामन्तं हीनसन्ध्यादौ मित्रं वात्मीयमनेनार्थेन कोशदण्डादिकं किञ्चिद्देहीति

श्रीमूला

दिकं देहीति याचनमर्थना । अर्थितस्य न प्रयच्छामीति वचनं प्रत्याख्यानम् । अननुरूपं भवत इदं कार्यमित्युक्तिरुपालम्भः । मा कार्षीरित्यकार्यप्रवृत्तेर्वारणमाप्तभावात् क्रियमाणं प्रतिषेधः । इदं क्रियतां सन्धानं विग्रहणं वास्मिन् देश काल इति प्रेरणा चोदना । योऽहं स भवान्, मम यद् द्रव्यं तद् भवत इति स्वशरीरसम्बोध्य-

चाणक्यटीका

आख्यानमेवमिति । देही (ति) प्रार्थना ।"'प्रत्याख्यानम् (नप्रयच्छामीति) । द्वयमप्येतत् सापदेशं कार्यम् । तद्यथा—पराभियोगं कर्तुकामाय महद्दण्डंप्रयच्छ, एवं कार्ये भवद्विधान्येव मित्राणि युज्यन्त इति । निरन्तराभियोगस्यैता"'"न्धः कथमहं प्रयच्छामीति । अननुरूपमिति कृते चिकीर्षिते वानभिप्रेते तत्रोपरि स्नेहस्य किमनुरूपमेतद् भवतः, यदस्मदमित्रेण सन्धिः कृतः चिकीर्षितो वा इत्युपालम्भः । पुनः मा कार्षीरिति च कृते प्रतिषेधः । इदं क्रियतामिति धर्माद्यविरोधिनी सन्धेर्विपर्यासे विज्ञाते-

प्रतिपदपञ्चिका

प्रार्थयते साऽर्थना । स एवार्थितो यदा न प्रयच्छामीत्याह—तत्प्रत्याख्यानम् । उपालम्भमाह—

अननुरूपमनुचितमेतद्भवत इत्युपालम्भः । प्रतिषेधमाह—अकार्यप्रवृत्तं सुहृदं लेखेन कश्चिन्निवारयति, 'माकार्षीरित्ययं प्रतिषेध इति । चोदनामाह—इदं सन्धिविग्रहं क्रियतामित्येषा चोदना इति । सान्त्वमाह—योऽहं स यावान् यन्मम द्रव्यं तद्

१. अभ्युपपत्तिः इति चा० टी० ।

प्रदर्शनमभिभर्त्सनम्। अनुनयस्त्रिविधः—अर्थकृतावतिक्रमे पुरुषादिव्यसने चेति ॥

श्रीमूला

शरीरयोः स्वद्रव्यसम्बोध्यद्रव्ययोश्चाभेदवचनभङ्ग्यानुकूलनं सान्त्वम्। व्यसनेरिपूपप्लवादौ साह्यकरणमभ्यवपत्तिः। अनित्यं कुर्वाणमचिरात्—त्वां घातयेयं, बद्ध्वा वा कारागृहे निवेशयेयमित्येवमनर्थदोषयुक्तमुत्तरकालकथनमभिभर्त्सनमित्युच्यते। अनुनय इति। अर्थकृतावित्यादयो निमित्तसप्तम्यः। अर्थकरणनिमित्तोऽतिक्रमनिमित्तः पुरुषादिव्यसननिमित्त इति त्रिप्रकारोऽनुनयः। तत्र सामवायिकादिकार्यमवश्यं करणीयं कुर्वाणं प्रति तत्करणार्थं मित्रेण क्रियमाणोऽनुनय आद्यः। स्ववाक्यातिक्रमकुपितं प्रति कोपप्रशमनाय क्रियमाणोऽनुनयो द्वितीयः। पितृभ्रातृपुत्रमित्रामात्यमरणादिव्यसनेष्ववश्यानुग्राह्यं पूर्वमननुगृह्य पश्चात् कार्यवशात् तं प्रति क्रियमाणोऽनुनयस्तृतीयः।

चाणक्यटीका

चार्थे चोदना विधानमुद्देश इत्यर्थः। योऽहं स भवान्·········त्वा, यद्वत् त्वकार्यं तन्ममेत्यादिरूपग्रहः आत्मसात्करणं सान्त्वं सामविशेषः। व्यसनमिति कतिचिदहान्युपरोधं (समृताम्?) अहमेवं त्वय्यासक्तं श्येन इवोत्पत्योन्मथ्नामि·····ध्वंसयामीत्यादि साहाय्यदानमभ्युपपत्तिः सानाभ्यमुन्न मित्यर्थः (?)। न त्वां सदा राष्ट्रविलोपादि कुर्वन्तं वारयामि, अस्यातिवृत्तस्य फलं मयि विजयिनि प्रवृत्ते ज्ञास्यसि इत्यादिना सदोष (वच) नमभिभर्त्सनम् ॥

अनुनयः प्रत्यायनं चित्तग्रहार्थमित्यर्थः। स त्रिविधः। तत्र अर्थकृतौ प्रयोजनस्य साधने सति तदुत्तरकालं 'सुष्ठु कृतं त्वया अस्मदमित्रस्य पार्ष्णि गृह्णता, आपद्युपयुक्ताः कति भवद्विधाः' इति। अतिक्रमे स्वकृते यथा 'इदं नः प्रणयस्खलितमेकं क्षन्तव्यम्, यतोऽक्षोभ्यसत्त्वा न कलुषीभवन्ति महान्तः' इति। पुरुषादिव्यसनेषु यथा— 'मत्प्रियहितमनपेक्ष्यापि भवतास्मच्छरीरशापितेनमह्यं परिहार्य एषः' ॥

प्रतिपदपञ्चिका

भवत इत्यनेन शरीरद्रव्ययोरत्यनानात्वोपदर्शनपूर्वको य उपग्रहस्तत्सान्त्वम्। अभ्यवपत्तिमाह—व्यसने पराभिभवादौ साहाय्यादिना अनुग्रहोऽभ्युपपत्तिः। अभिभर्त्सनमाह—नदोषमिति, वधबन्धाद्यनर्थोपेतमायतिप्रदर्शनमागामिकालवेदनं तद् यथा न तिष्ठति, भवांस्तावदचिरान्न निगडपूर्णचरणं कारागृहे निक्षिप्तं इत्येवमाद्यभिभर्त्सनम्। अनुनयं त्रिविधमाह—अर्थकृतावितिं, अर्थः कार्यम्, कृतिः करणं, निमित्तसप्तमी चेयं, अर्थकृतावर्थकरणनिमित्तम् तद्यथा—सामवायिकादेर्दातव्योऽर्थो, मित्रेण वा याचितो न दत्तस्तन्निमित्तं असावनुमीयते। तथातिक्रमे वचनोल्लङ्घनादिके पुरुषादिव्यसनेषु पितृपुत्रामात्यमरणादिष्वनुग्राह्यो यदा नानुगृहीतः तदा स कार्यवशात् पुनरनुनीयते।

[शासनभेदानां निर्देशः]

प्रज्ञापनाज्ञापरिदानलेखाः
तथा परीहारनिसृष्टिलेखौ ।
प्रावृत्तिकश्च प्रतिलेख एव
सर्वत्रगश्चेति हि शासनानि ॥७०॥

[तत्र प्रज्ञापनालेखः]

अनेन विज्ञापितमेवमाह
तद्दीयतां चेद्यदि तत्त्वमस्ति ।
राज्ञस्समीपे (व) परकारमाह
प्रज्ञापनैषा विविधोपदिष्टा ॥७१॥

श्रीमूला

भूयोऽप्यष्टौ शासनभेदान् श्लोकेनोद्दिशति—प्रज्ञापनेत्यादि ।

श्लोकैरेव तेषां विवरणमारभमाणः प्रथमं प्रज्ञापनलेखं व्याचष्टे—अनेनेति । प्रज्ञापना नाम महामात्रादीन् प्रति तदीयगूढपुरुषैः क्रियमाणा तन्मित्रामित्रराजपुरुषवृत्तान्तस्यावेदना । एषा विविधा बहुप्रकारा उपदिष्टा ।ताममित्रविषयां पूर्वार्धेन प्रदर्शयति—अनेन राजानुचरेण देवदत्तनाम्ना विज्ञापितं राजान्तिके 'महामात्रेण कुतश्चिन्निधिरधिगत आत्मसात्कृत' इति । विज्ञापितश्च राजानेन प्रकारेणाह—'यदि महामात्रः स्वयं तं निधिं न प्रयच्छति तदाहमेव तं द्विगुणमाहारयिष्यामी'ति । तत्त्वमस्ति चेद्यदि तद् दीयतां, यदि निधिद्रव्याधिगमः सत्यः, तर्हि तद् दीयतां राज्ञ इत्यर्थः । मित्रविषयां तृतीयपादेन दर्शयति—राज्ञः समीपे वरकारम् आह कल्याणं कर्म त्वया क्रियमाणं निवेदयति, अर्थाद् देवदत्तादिः । इह चेत्पदयदिपदयोः सहप्रयोगोऽपिशब्दचशब्दयोरिव द्रष्टव्यः ।

चाणक्यटीका

निन्दादिषु प्रज्ञापनादीन् लेखजानर्थानाह—प्रज्ञापनेति । अस्य निर्देशमाह—शासनानीति लेखा इत्यर्थः ।

अस्य निर्देशमाह—अनेनेति । स्वाभिप्रायोपदेशार्थं पराभिप्रायाविष्करणं प्रज्ञापनम् । तद्यथा स्वाभिप्रायाविष्कारेण कस्यचित् किञ्चिद् राजगामि द्रव्यमित्थं मन्त्र्यादीनामन्यतमः अनुजिघृक्षन्निव राष्ट्रमुख्यादेर्लिखति-अनेन एवं संज्ञकेन विज्ञापितम्—अस्य राष्ट्रमुख्यस्य राजार्होऽश्वोऽस्तीति । राजापि एवमाह—अस्मादेव तेनाहमाराधित इति । तस्मात्त्वां प्रज्ञापयामिनद्दीयते चेद् राजः यदिचेत्तवास्ति को

[आज्ञालेखः]

भर्तुराज्ञा भवेद्यत्र निग्रहानुग्रहौ प्रति ।
विशेषेण तु भृत्येषु तदाज्ञालेखलक्षणम् ॥७२॥

[परिदानलेखः]

यथाऽर्हगुणसंयुक्ता पूजा यत्रोपलक्ष्यते ।
अप्याधौ परिदाने वा भवतस्तावुपग्रहौ ॥७३॥

चाणक्यटीका

लाभ इतिचेद् राजः समीपे वरकारमाह स एव लेखिता—एवं मयाज्ञातं राज्ञः शकाशाद्वास्य क्रियाभिप्रेतस्य ते निष्पत्तिरवश्यं भाविनीति । प्रज्ञापनैषा विविधोपदिष्टा न केवलंधनविषया । तद्यथा—तेन विज्ञापितः स चोरान्निवारयितुं क्षम इति, राजाप्येवमाह—पश्यत अस्मदाज्ञया विना—प्यनेन द्विन्त्रैरहोभिर्निगृहीत इति । एवमात्मसंभावनां बुध्वा निगृह्णासि चेन्महान्तौ स्थानमानवनुभविष्यसीति ॥

प्रतिपदपञ्चिका

भूयोऽप्यष्टौ प्रज्ञापनादिशासनभेदांच्छलोकेनोद्दिश्य श्लोकैरेव व्याचष्टे । प्रज्ञापनेत्यादि, सुबोधम् ।

अनेन विज्ञापितमित्यादि । केनचिन्महामात्रादिना शत्रुमित्राद्युपलब्धये राज्ञो गूढचरः प्रणिहितो यथोपलब्धं स्वेनावेदयति । तद् यथा-अनेकदवता दत्तेन केनचिद् वा विज्ञापितं राज्ञस्समावेदितम् यथा किल त्वया प्रभूतार्थकं निधानमुपलब्धमिति एवमाहेति, तेन विज्ञापिते सति राजा एवमाह—वक्ष्यमाणश्चेच्छब्दोऽत्र सम्बध्यते । यद्यसौ स्वयमेवदा(वाह)शोभनं अन्यथा स्वयमेव वहुतरमाह रिष्यामीत्येवमाह चेत् तद्दीयतामिति ।

गूढपुरुषवचनं यदि तन्निधानकं तत्वनिश्चितमेतत् भवताऽविलम्बितं[1] राज्ञः प्रेष्यतामित्याद्यतं साम्प्रतं सुहृद्वार्तामाह—राज्ञस्समीप इति, अयं विष्णुमित्रो राज्ञः समीपे(वरा)परकारं शोभङ्कारं त्वदीयं सर्वमाह—सर्वदागुणप्रग्रहणपर इति,[2] तद्भवता तदुपरि तादृशेनैव भवितव्यमित्येवमादिका विविधा वहुप्रकारा उपदिष्टा अधीता ।

श्रीमूला

सामान्यतो यस्मिन्कस्मिंश्चिज्जने विषये विशेषेण पुनर्भृत्येषु विषये निग्रहमनुग्रहं वाधिकुर्वती भर्तुराज्ञा यस्मिन् लेखे, स आज्ञालेख इत्याह—भर्तुरित्यादि ॥

---

१. अपिसम्मितम् —पा०

२. इत्यर्थः । —पा०

श्रीमूला

परिदानलेखमाह—यथार्हेत्यादि। यत्र यस्मिन् लेखे, यथार्हंगुणसंयुक्ता उत्तममध्यमाधमसम्बोध्यतारतम्यानुसारिणी, पूजा 'धार्मिकस्य गुणवतस्तवेदमसदृशं दुःखमुपनतं, किं कुर्मः, क्षन्तव्यमेव विवेकिभिरीदृशं कथञ्चिद्' इत्युक्तिरूपः शोककाले, 'स्वनियोगसविशेषानुष्ठानस्यापर्याप्तमपीदमस्माभिर्यत्किञ्चित् पारितोषिकं दीयमानं स्वीकरोतु भवानि'त्युक्तिरूपः स्वामिपरितोषकाले, स्वामिबहुमानः, उपलक्ष्यते, स परिदानलेख इति विधेयाध्याहारः, तस्यैव लक्षणीयतया क्रमप्राप्तत्वात्। तस्य विषयद्वैविध्येन द्वैविध्यं सूचयन्नाह—अपीति। तौ परिदानलेखौ, अप्याधौ परिदाने वा, अपिवाशब्दौ समुच्चयार्थौ, आधिर्बन्धुमरणनिमित्ता भृत्यानां मनोव्यथा परिदानं परिरक्षणं भृत्यविषयदयाविष्करणमिति यावत्, आधौ च परिदाने च उपग्रहौ स्वीकार-हेतू स्वतोतिशयप्रतिपत्तिहेतू, भवतः॥

चाणक्यटीका

भर्त्तुराज्ञेति। अयमस्माभिः श्रेष्ठिपदादपनीतः, अयं वास्मिन् पदे स्थापित इति। विशेषेणतु भृत्येषु कदाचित् सामन्तेष्वपि स्याद् भवतायं देशः परित्याज्यः, अथवा ते देशोऽपरो मया दत्त इति॥

यथार्हेति। यथार्हं हीनमध्याधिकैर्गुणैर्युक्ते हीनमध्याधिकैव प्रशंसा लेखे यत्रोप-लभ्यते। लिखितं कस्मिन् विषय इत्याह—आधाविति चित्तपीडायाम्, कथं भवन्तोऽपीदृशा विषीदन्तीति। परिदाने वेति उत्सवे वा, परिदीयते अस्मिन्निति-कृत्वा। पुनः कल्याणभाक् प्रभावसम्पत्तौ द्विषत्प्रतापहारिण्यां यतितव्यमिति। भवतस्तावु पग्रहाविति परस्वीकारविषयत्वात् तौ उपग्रहौ। आधावपि परिदान-संप्रयुक्तः कार्यइति परिदानलेख इत्यभिधीयते॥

प्रतिपदपञ्चिका

आज्ञामाह—भर्तुराज्ञा भवेद्यत्र[1] भर्तुः स्वामिनो, यत्र यस्मिन् लेखे निग्रहानु-ग्रहौ प्रत्याज्ञा भवति। तद् यथा—अमुको नाम कश्चित् गृहीतसर्वस्वः कारायां प्रक्षेप्तव्य इति निग्रहः। यथामुष्मै शतसाहस्रं देयमित्यनुग्रहः विशेषेण बाहुल्ये भृत्येषु राजानुजीविषु दुर्गराष्ट्रान्तपालादिषु तद्विपर्ययेण तदाज्ञालेखस्य लक्षणम्। परिदानमाह—यथार्हगुणसंयुक्तेति, यथोक्तगुणसमन्विता, यत्र यस्मिन् लेख उपलभ्यते। अप्याधौ मनोदुःखे बन्धुमरणार्थनाशादिनिमित्ते परिदाने शरीररक्षणादिके अपिशब्दाद्विपरीतेऽपि पुत्रजन्मादौ विशेषेण ग्रहणम्। अत्राप्यनुवर्तते। विशेषेणाधौ परिदाने वा, यदुपग्रहौ उपग्रहनिमित्तौ लेखौ भवतः। [2]उपग्रहः स्वीकारः, तौ परिदानलेखौ। अत्र च परिदान-शब्दो[3] व्याख्यातः द्विरावर्तते।

तत्रैकः परिदानशब्दः सप्तम्यन्तः स्वार्थाभिधायकः। द्वितीयस्तु द्विवचनान्तो लेखविशेषसंज्ञावाचक इति।

---

१. अमुकनामा। —पा० २. उपग्रहस्वीकार हेतू। —पा० ३. व्याख्यानाद् द्विरावर्तते।

[परिहारलेखः]

जातेर्विशेषेषु पुरेषु चैव
ग्रामेषु देशेषु च तेषु तेषु ।
अनुग्रहो यो नृपतेर्निदेशात्
तज्ज्ञः परीहार इति व्यवस्येत् ॥७४॥

[निसृष्टिलेखः]

निसृष्टिस्थापना कार्या करणे वचने तथा ।
एष वाचिकलेखस्स्यात् भवेन्नैसृष्टिकोऽपि वा ॥७५॥

श्रीमूला

परिहारलेखमाह—जातेरिति। अमुकस्य कालस्यामुकब्राह्मणेभ्यः करो न ग्राह्य इत्येवंप्रकारो यो जातिविशेषविषयोऽनुग्रहः, अमीषु नगरेषु वणिग्भ्यः शुल्कममुकस्य कालस्य न ग्राह्यमित्येवंविधो यः पुरविषयः, नवागतकुटुम्बिभ्यः इयतः कालस्य न ग्राह्यः कर इत्येवंप्रायो यो ग्रामविषयः, न कोऽपि राजभागधेयोऽमुकदेशे कालस्यैतावतो ग्राह्य इत्येवञ्जातीयो यो देशविषयः, स सर्वविधोऽप्यनुग्रहो राजशासनात् प्रवृत्तः परीहारसंज्ञित इति लेखप्रकाराभिज्ञो जानीयादिति श्लोकार्थः। तत्रानुग्रहः कश्चित् कराग्रहणरूपः, कश्चित् स्वयं धनदानरूपः कश्चिदुभयरूप इति त्रिप्रकारो वेदितव्यः ॥

निसृष्टिलेखमाह—निसृष्टीत्यादि। कार्यकरणे तथा वचने, निसृष्टिस्थापना कस्यचिदाप्तपुरुषस्य प्रामाण्याख्यानम् 'अमुकस्य क्रिया ममैव क्रिया अमुकस्य वचनं

चाणक्यटीका

जातेर्विशेषेष्विति। ब्राह्मणादिषु। मद्राष्ट्रे ब्राह्मणानां करो न ग्राह्यः तन्तुवायैर्नांशविष्टिः कार्येषु। पुरेषु वा स्थानीयादौ वास्तुकरः प्रतिमुक्तः इति। ग्रामेषु देशेषु च नानाविधेषु अस्यां दशग्राम्यां न सिञ्चेद्यदि देशे पञ्चवार्षिकः (प्रधा ?) नग्राह्य इति अनुग्रहो यो नृपतेरादेशाल्लिख्यते। तज्ज्ञः ज्ञाता। परीहार इतिव्यवस्येत् ॥

प्रतिपदपञ्जिका

परिहारमाह—जातेर्विशेषेष्वित्यादि, जातिविशेषादयः प्रतीताः, तेषु विषयभूतेषु। तद्यथा राजा समाहर्त्रादीर्लिखति, अमीषां ब्राह्मणानां दण्डकरावनुग्राह्यौ। पुरेषु अमीषां वणिजां भाण्डमूल्यनिमित्तमेतावद्देयम्, एतावन्ति वर्षाणि शुल्कादि च न ग्राह्यमिति, तथाऽमुष्मिन्ग्रामे नवागतानां कुटुम्बिनां विभजते निमित्तमेतावद्देयम्, न च वर्षङ्करमुचितं ग्राह्यमिति। एवं देशेष्वपि योजनीयम्। अनुग्रह उपकारः स कदाचित्स्ववित्तदानेन कदाचिदुचिताग्रहणेन, कदाचिदुभयथा नृपतेर्निदेशाद्राजाज्ञया राज्ञः राजशासनाभिज्ञः परिहारमित्येवंसंज्ञकं लेखं व्यवस्येत् जानीयात्।

[प्रावृत्तिकम्]

विविधां दैवसंयुक्तां तत्त्वजां चैव मानुषीम् ।
द्विविधां तां व्यवस्यन्ति प्रवृत्तिं शासनं प्रति ॥७६॥

श्रीमूला

ममैव वचनमि'त्येवं रूपं, निसृष्टिलेख इति लक्ष्यस्याध्याहारः क्रमप्राप्तत्वात् । एतस्य प्रकारद्वयमाह—एष निसृष्टिलेखः, वाचिकलेखः स्यात् वचनप्रमाणीकरणाख्यायी सन् वाचिक इति वक्तुमर्हः, नैसृष्टिकोऽपि वा भवेत् क्रियाप्रमाणीकरणाख्यायी सन् नैसृष्टिक इति वक्तुमर्हः ॥

प्रावृत्तिकमाह—विविधामिति । विविधाम् अनेकप्रकारां, दैवसंयुक्तां यथाकालवृष्टिपातसुभिक्षाद्यनुकूलदैवफलसिद्धिसम्बद्धाम् अग्निवात्योपप्लवादिदुर्दैवफलसिद्धिसम्बद्धां च, तत्त्वजां पारमार्थिकीम्, मानुषीं चैव यातव्यसमुच्छेदादिरूपां परचक्रचोरादिजनितराज्योपद्रवादिरूपां च, तां प्रवृत्तिं प्रावृत्तिकव्यपदेशनिमित्तभूतां वार्तां, शासनं प्रति लेखविषये, द्विविधां व्यवस्यन्ति शुभाशुभात्मना द्विप्रकारां निश्चिन्वन्ति । प्रवृत्तिद्वैविध्यवचनभङ्ग्या चानया तन्निवेदनफलकस्य प्रावृत्तिकलेखस्य द्वैविध्यमभिहितं वोद्धव्यम् ॥

चाणक्यटीका

निसृष्टिस्थापनां राज्ञः अनुज्ञाप्रख्यापनं कुर्यात् लिखितव्यम् । करणे वचने तथा यदनेन कृतं यद्वा अनेनोक्तं तत् प्रमाणं श्रद्धातव्यमिति । निसृष्टिः प्रयोजनमस्येति नैसृष्टिक इति वाचिकलेखे संज्ञा द्वितीया ॥

विविधामिति । इहाग्निर्दुर्भिक्षम्, आरोग्यं सुभिक्षमित्यशुभां शुभां च दैवजां चैव मानुषीमपि, यथा—कन्या ते गर्भिणी पुत्रस्ते जात इति । प्रवृत्तिं वार्त्ताम् अध्यवस्यन्ति दैवमानुषभेदाद् द्विविधं शासनलेखं प्रति लिखितव्यतया, अयमसौ प्रवृत्तिप्रयोजनः प्रावृत्तिक इति ॥

प्रतिपदपञ्चिका

निसृष्टे लेखेमाह—निसृष्टिस्थापनेत्यादि, निसृष्टिः प्रमाणीकरणं तस्मात् स्थापनाकरणं, तद्यथा—राजा लिखति, एष मयाप्ततमः प्रहितो यदनेन कृतमहितं वा तत्सर्वं नः प्रमाणमिति । एष इति, यत्र वचनं प्रमाणीक्रियते, स वाचिकलेखः । यत्र क्रिया स नैसृष्टिकः । प्रावृत्तिकमाह—विविधामित्यादि । विविधां दैवसंयुक्तां वृष्टिपातनदीपूरणादिसंयुक्ताम् अग्निमरकाद्युपेतां च तत्वजां सुनिश्चितां मानुषीममित्रयातव्यसमुच्छेदिकां परचक्रचोराधिकारिकृतराज्यविभ्रमादिकां च तामेव द्विविधां[1] व्यवस्यन्ति कथयन्ति । प्रवृत्तां कुशलाकुशलरूपां । शासनं लेखं प्रति ।

---

१. विविधाम् ।—पा०

[प्रतिलेखः]

दृष्ट्वा लेखं यथातत्त्वं ततः प्रत्यनुभाष्य च ।
प्रतिलेखो भवेत्कार्यो यथा राजवचस्तथा ॥७७॥

[सर्वत्रगः]

यत्रेश्वरांश्चाधिकृतांश्च राजा
रक्षोपकारौ पथिकार्थमाह ।
सर्वत्रगो नाम भवेत्स मार्गे
देशे च सर्वत्र च वेदितव्यः ॥७८॥

श्रीमूला

प्रतिलेखमाह—दृष्ट्वेति । लेखं परस्मादागतं, यथातत्त्वं दृष्ट्वा यथावास्थित-पदपदार्थानतिक्रमेण पूर्वं स्वयं वाचनया विज्ञाय, ततः प्रत्यनुभाष्य च पश्चाद् राज्ञः सकाशेऽनुवाच्य च, यथा राजवचः राज्ञ उत्तरवचनं भवति, तथा प्रतिलेखः कार्यो भवेत् ॥

यत्र लेखे राजा ईश्वरान् दुर्गराष्ट्रान्तपालादीन् समाहर्तृप्रशास्तृप्रभृतीनधि-कृतांश्च पथिकानां पथि सहायदानलक्षणां रक्षां भक्तयवसेन्धनादिदानलक्षणमुपकारं चाज्ञापयति, स लेखः राज्ञो देशान्तरसञ्चारणे स्वनिवासदेशे सर्वस्मिश्च काले लेखनार्हत्वान्नाम्ना सर्वत्रगो भवेदित्याह—यत्रेश्वरांश्चेत्यादि ॥

चाणक्यटीका

दृष्ट्वा लेखं परेण प्रेषितं यथातत्त्वं ततो लेखनाद् वर्णनारहितं यथाप्रधान-मर्थं प्रत्युच्चार्य च प्रतिवचनसमर्थोलेखो भवेत् । कर्तव्ये लेखने यथावधारितवतो राज्ञो यादृशं वचनं तदनुरूपमित्यर्थः ॥

यत्रेति । (प ? य) त्र लेखे अन्तपालाटविकादीन् ईश्वरान् अधिकृतांश्च समाहर्त्रादीन् । स्वामी राजा । रक्षोपकारौपथिकार्थमाह—अयं दूतः क्षेमेण सुप्रयुक्त-पानभोजनावासः अति (यात ? वाह) यितव्य इति । सर्वत्रगो नाम पत्रैकदेशमुद्रया साधारणो भवेत् । सर्वत्र यावत्जात्या प्रभवति तावति वेदितव्यः । इत्यष्टौ लेखभेदाः ॥

प्रतिपदपञ्चिका

प्रतिलेखमाह—दृष्ट्वा लेखमिति, परस्मादागतम् यथा तत्वमन्यूनानतिरिक्त-पदपदार्थादिकं प्रति प्रत्यनुभाष्य अनुवाच्य ततः प्रतिलेखो भवेत् । कार्यो यथा— राजवचस्तथेति, स्वमनीपिकापरिहारार्थं सर्वत्रगो नामा यत्रेश्वरांश्चेत्यादि, ईश्वरा दुर्गराष्ट्रान्तपालादयः । अधिकृताः समाहर्त्रादयः । रक्षोपकाराविति । रक्षा सहायेषु पथिषु सहायदानादिना उपकारो भक्तयवसेन्धनादिदानेन उचितस्याग्रहणेन

[शासनाधीनसन्धिविग्रहानुष्ठानो-
पयोग्युपायाः]

उपायाः सामोपप्रदानभेददण्डाः ।

[पञ्चविधसामोपदपानम्]

तत्र साम पञ्चविधम्-गुणसङ्कीर्तनं सम्बन्धोपाख्यानं परस्परोपकार-सन्दर्शनमायतिप्रदर्शनमात्मोपनिधानमिति । तत्राभिजनशरीरकर्मप्रकृति[1]श्रुतद्रव्यादीनां गुणागुणग्रहणं प्रशंसा स्तुतिर्गुणसङ्कीर्तनम् । ज्ञातियौन-मौखस्रौवकुलहृदयमित्रसङ्कीर्तनं सम्बन्धोपाख्यानम् । स्वपक्षपरपक्षयोरन्यो-न्योपकारसङ्कीर्तनं परस्परोपकारसन्दर्शनम् । अस्मिन्नेवं कृते इदमावयो-र्भवतीत्याशाजननमायतिप्रदर्शनम् । 'योऽहं स भवान्, यन्मम द्रव्यं तद्भवता स्वकृत्येषु प्रयोज्यताम्' इत्यात्मोपनिधानमिति ।

प्रतिपदपञ्चिका

च रक्षोपकारी पथिकार्यम् अध्वगसार्थादिनिमित्तम् राजा यत्र लेखे समादिशति सर्वत्रगो देशात् देशान्तरगमने देशे च विजिगीषुदेश एव सर्वत्रग्रहणं उभयत्र निषिद्ध-त्वज्ञापनार्थमिति ।

श्रीमूला

शासनाधीनत्वं सन्धिविग्रहयोरुक्तमधस्तात् । सन्धिविग्रहानुष्ठानस्य उपाय-प्रयोगसापेक्षत्वात् तेष्वपि व्युत्पत्तिः शासनलेखकस्यापेक्षितेति कृत्वा तान् दर्शयति—उपाया इत्यादि ।

तत्र साम्नः पञ्च प्रभेदानुद्दिशति—तत्र सामेत्यादि ।

तत्र प्रथमं सामप्रभेदं व्याचष्टे—तत्राभिजनेत्यादि । अभिजनः कुलं, शरीरं कर्म च प्रसिद्धे, प्रकृतिः स्वभावः, श्रुतं शास्त्रजनितः संस्कारः, द्रव्यं रथगजतुरगादि-परिग्रहः, आदिपदेन वयोरूपादिग्रहणम् । अभिजनादीनामेषां गुणग्रहणं गुणस्य वस्तुसतः स्वरूपाख्यानं, गुणागुणग्रहणमिति पाठे गुणागुणयोर्वस्तुसतोः स्वरूपाख्यानं प्रशंसा सश्लाघमाख्यानं, स्तुतिरविद्यमानगुणकीर्तनञ्च, गुणसंकीर्तनं नाम भवति ।

सम्बन्धोपाख्यानं व्याचष्टे—ज्ञातीत्यादि । ज्ञातिः समानकुलोत्पन्ना, यौनो योनिकृतः सम्बन्धो विवाहाख्यः, मौखो मुखकृतः सम्बन्धो वाक्सम्बन्धः, शिष्याचार्य भावलक्षणः, स्रौवः स्रुवनामकयज्ञपात्रविशेषकृतः सम्बन्धो याज्ययाजकभावरूपः, कुलं पूर्वपुरुषपरम्परा, हृदयं मनोनिबन्धः, मित्रम् उपकारकं, ज्ञात्यादीनां सप्तानां सङ्कीर्तनं सम्बन्धोपाख्यानमित्युच्यते ।

---

१. 'श्रुति' इति पा० ।

श्रीमूला

स्वपक्षेत्यादि। स्वपक्षपरपक्षयोः, अन्योन्योपकारसङ्कीर्तनं परस्परोपकारो यथा स्यात् तथा कथनं, परस्परोपकारसन्दर्शनं नाम सामभेदः।

अस्मिन्निति। अस्मिन् कार्ये, एवं कृते अनेन प्रकारेणानुष्ठितेसति, आवयोरिदं भवति तव च मम चैतत् फलं भविष्यति इत्याशाजननम्, आयतिप्रदर्शनं नाम।

योऽहमिति। योऽहं स भवान् आवामभिन्नौ, तस्मात्, मम यद् द्रव्यं भूमि-हिरण्याद्यस्ति, तद् भवतां स्वकृत्येषु प्रयोज्यतां स्वीयद्रव्यनिर्विशेषमुपयुज्यताम्, इतीदृशम्, आत्मोपनिधानं नाम पञ्चमः सामप्रभेदः।

चाणक्यटीका

सन्धिविग्रहयोर्मूलं शासनम्। (सन्धा ?) उपायः सामादयः अत्रान्तर्भवन्तो वर्ण्यन्ते। तत्राभिजनादीनां गुणग्रहणं प्रशंसा लिच्छवयोयूयमित्यभिजनस्य। बहुशालिन इति शरीरस्य। कर्मणो यज्वानइति। प्रकृतेः स्वभावस्य साध्वाचार इति। श्रुतस्य वेदवेदाङ्गवित् इति। द्रव्यादीनां वित्तेशो महासेन इति। एवंगुणानां विद्यमानानां प्रशंसा। स्तुतिश्चाभिप्रेताध्यारोपणमुभयं विद्यमानानामध्यारोपितानाञ्च गुणानांसङ्कीर्त्तनं परस्येति॥

जातियौनेति एकजातीया वयं भवन्तश्च। अपरे ज्ञातिशब्दं पठन्ति। ज्ञातिर्मातृपक्षः—या ते भगिनी सा मे मातुलानीति। यौनेन सम्बन्धेन या त्वद्भगिनी सा मम भ्रातृभार्येति। मौखेन सम्बन्धेन अस्मत्पितुः सकाशात्त्वयाधीत-मिति। स्रौवेण अस्मत्पितुर्यज्ञे त्वत्पिता होतासीत् त्वपितुर्यज्ञे वा अस्मत्पितेति सम्बन्धेन सम्बद्धा वयं भवन्तश्च। एकं कुलं पितृसम्बद्धमस्माकम्। एकहृदया वयं-यादृशं मे चित्तं तादृक् तवापीति। एकमित्राश्चेति यत् साधारणसङ्कीर्त्तनं तत् सम्बन्धोपाख्यानम्॥

स्वपक्षपरपक्षयोरिति न केवलमावयोरव अस्मत्पक्षाणामपि बन्धुभृत्य-मित्राणां युष्मदीयैः सह उपकार्योपकारकभावो नित्याविच्छिन्न इति सन्दर्शनम् उप-काराख्यानम्॥

अस्मिन्नेवमिति। अस्मिन्नन्तरोच्छेदे कृते निष्कण्टकमावयो राष्ट्रं भवितेति। आयतिरागामिकालः॥

यन्मे द्रव्यमिति। शरीरमात्रम् (एके ? अनेकम्) अपि एकचित्तत्वादर्थतो योऽहं स भवान् अतश्च यन्मम द्रव्यं तत् तव वाङ्मात्रेण तत्स्वकार्ये नियुज्यतामित्या-त्मनोऽर्पणम्॥

प्रतिपदपञ्चिका

साम्प्रतं शासनविधिमभिधाय तन्मूलत्वात् सन्धिविग्रहयोरिति शासनमूलत्वं षाड्गुण्यस्योक्तम्। तस्य च षाड्गुण्यस्य प्रयोग उपायपूर्वकः तदुपायप्रयोगोऽपि लेखेनावगन्तव्य इति, तत्प्रतिपादनार्थमाह—उपायस्सामोपप्रदानभेददण्डाः इति, उपायास्साधनानि। तत्रेति तेषूपायेषु साम्नो गुणसङ्कीर्तनादीन् पञ्च प्रभेदानभिधाय

[दानभेददण्डानां स्वरूपम्]

उपप्रदानमर्थोपकारः शङ्काजननं निर्भर्त्सनं च भेदः। वधः परिक्लेशोऽर्थहरणं दण्ड इति।

प्रतिपदपञ्चिका

स्वयमेव व्याचष्टे तत्रेति, तेष्वपि गुणग्रहः, सङ्कीर्तनं तावदुच्यते। तत्राभिजनशरीरकर्माणि प्रतीतानि। प्रकृतिः स्वभावः। श्रुतं शास्त्रसंस्कारः। द्रव्यं द्विपदचतुष्पदादिपरिग्रहः। आदिग्रहणं च बन्धुवयोनिवासादिपरिग्रहार्थम्। एतेषां प्रशंसा[1] स्तुतिरिति गुणानुच्चार्य[2]तद्वर्णनाद्वारेण स्तुतिर्गुणग्रहणं प्रशंसा स्तुतिरिति केचित्। अन्येतु गुणग्रहणं भूतानुवादः, प्रशंसा किंचिदधिकार्थवचनं, स्तुतिरविद्यमानगुणाद्यारोपः। स च पात्रविशेषेण प्रयुज्यत इति। अपरे स्तुतिशब्दान्नाधीयन्त एवेत्येतद्गुणसङ्कीर्तनम्। सम्बन्धोपाख्यानमाह—ज्ञात्यादीनां समानां सङ्कीर्तनं सम्बन्धोपाख्यानमिति। तत्र ज्ञातिः सकुल्यः। यौनो वैवाह्यः। मौखः शिष्याचार्यसम्बन्धः। स्रौवो याज्ययाजकसम्बन्धः। कुलमनंतरागीतपितृपितामहादिपुरुषाः। हृदयं स्नेहः। शौर्यत्यागादीत्यपरे। मित्रमुपकारकमुपकृतमित्येषां यत्संकीर्तनं तत्सम्बन्धोपाख्यानम्। परस्परोपकारसन्दर्शनमाह—स्वपक्षपरपक्षयोरिति।

उभयत्र पक्षग्रहणं तदाश्रितानामपि परस्परोपकारित्वख्यापनार्थम्। आयतिप्रदर्शनमाह—अस्मिन्नेवं कृत इति, अस्मिन् सन्ध्यादिके। एवमनेन प्रकारेण, कृते इदं भूमिहिरण्यदानादिकमावयोर्भविष्यतीत्याशाजननं, कृष्णाभिवर्धनमायतिप्रदर्शनम्। आत्मोपनिधानमाह—योऽहं स भवान् यन्मम द्रव्यं भूतिकोशदण्डादि तद्भवतात्मीयाविशेषेण स्वकृत्येष्वात्मकार्येपूपयुज्यतामित्येतदात्मोपनिधानमित्येवं पञ्चप्रकारं सामाभिहितम्।

श्रीमूला

उपप्रदानाख्यं द्वितीयमुपायं व्याचष्टे—उपेत्यादि। अर्थोपकारः भूमिहिरण्यादिरूपार्थदानेनोपकारकरणम्, उपप्रदानम्। तृतीयमुपायं व्याचष्टे—शङ्केत्यादि। मित्रेष्वेकस्यापकाराधानेनान्येषां हृदि 'अस्मानप्यसावुच्छेत्स्यती' ति शङ्काया अपरागस्पर्धाहेतोरुत्पादनमेको भेदः, 'त्वामविधेयमभिघातयिष्यामी' त्येवम्प्रकारं निर्भर्त्सनमपरो भेदः। दण्डं व्याचष्टे—वध इत्यादि। वधो व्यापादनं, परिक्लेशो बन्धनताडनादिभिर्दुःखोत्पादनम्, अर्थहरणं धनापहारः, इदं त्रयं दण्डः। इतिशब्दः समाप्तौ, लेखगुणाख्यानं परिसमाप्तमित्यर्थः।

---

१. गुणग्रहण प्र. अधि। —पा०

२. तद्वर्णेन द्वारेण स्तुतिरिति केचित्। —पा०

[लेखनदोषाणां परिगणनम् विवरणं च]

अकान्तिः व्याघातः पुनरुक्तम् अपशब्दः सम्प्लवः इति लेखदोषाः। तत्र कालपत्रकम् अचारुविषमविरागाक्षरत्वं अकान्तिः। पूर्वेण पश्चिमस्यानुपपत्तिर्व्याघातः। उक्तस्याविशेषेण द्वितीयमुच्चारणं पुनरुक्तम्। लिङ्गवचनकालकारकाणामन्यथाप्रयोगोऽपशब्दः। अवर्गे वर्गकरणं वर्गे चावर्गक्रिया गुणविपर्यासः सम्प्लव इति।

चाणक्यटीका

अर्थोपकार इति। अर्थेन परस्योपकारः आप्तसिद्धिस्तु पाड्गुण्यविद्धयेनैवोपपद्यते। 'देयविसर्गः गृहीतानुवर्त्तनम् आत्तप्रतिदानम् स्वद्रव्यदानम् अपूर्वम् परस्वेषु स्वयङ्ग्राह दानं चेति' (अधि० ९ अध्या० ६.)।

शङ्काजननमिति। 'अयं तदनुग्रहेण वृद्धं कुमारीव त्वामेवोच्छेत्स्यति' इत्यादिना शङ्काजननम्। 'अस्यवा अस्मदमित्रानुग्रहस्व परिणाममनुभवितासि' इत्येवं तर्जनं च भेदः, परस्माद् विश्लेषणमित्यर्थः ॥

प्रशासनमेकाङ्गस्य वधः। संरोधोऽङ्गुलिसन्दंशादिश्च परिक्लेशः अर्थहरणं शास्त्रोक्तमनुक्तं वा अर्थादानम्। इति ॥

प्रतिपदपञ्चिका

उपप्रदानमाह—अर्थोपकार इति, अर्थेन भूमिहिरण्यादिना य उपकारस्तदुपप्रदानम्। भेदमाह—शङ्काजननमभिभर्त्सनं च भेद इति, तत्र शङ्काजननं चित्तभ्रान्तिकरम्। तद्यथा, एकस्य विविधसारं वा घातयेयुः इतरेषु मैत्रीं ब्रुवाणाः इत्यादि। अभिभर्त्सनं तर्जनम्, अवश्यं भवतःस्सिद्धिर्भेदादिप्रकारैरपि व्यापादयिष्यामीति। दण्डमाह—वध इत्यादि, वधो घातः, परिक्लेशो यातना, अर्थहरणं वित्तादानम्। इतिशब्दो लेखगुणपरिसमाप्त्यर्थः।

श्रीमूला

अथ लेखदोषानाह—अकान्तिरित्यादि।

तत्रेति। तत्र लेखदोषेषु पञ्चसूद्दिष्टेषु मध्ये, कालपत्रकं काले मसीप्रसरणात् स्वभावतो वा मलिने पत्रे लिखितम्, अकान्तिः तदाख्यो दोषः। अचारुविषमविरागाक्षरत्वम् अचारूणि असुन्दराणि विषमाणि अनियतस्थौल्यसौक्ष्म्याणि विरागाणि शुद्धोदकप्रायमषीलिखितानि चाक्षराणि यस्मिंस्तस्य भावस्तत्त्वं च, अकान्तिः। एवमस्य दोषस्याधारप्रयुक्तत्वेनाधेयप्रयुक्तत्वेन च द्वैविध्यं दर्शितम्।

व्याघातमाह—पूर्वेणेत्यादि। पूर्वेणार्थेनोत्तरस्यानुपपत्तिर्विरोधः, व्याघातः, यथा 'प्रणम्याज्ञापयती' ति। इह हि प्रणामाज्ञापनयोर्विरोधः प्रतीतः।

श्रीमूला

पुनरुक्तमाह्—उक्तस्येत्यादि । तद्यथा—'पूज्यो मान्यो, इत्यादि लेखनम् ।

अपशब्दं व्याचाष्टे—लिङ्गेत्यादि । स्त्रीलिंगे 'प्रयोक्तव्ये' पुन्नपुंसकप्रयोगो लिंगस्यान्यथाप्रयोगः, एकवचने द्विवहुवचनप्रयोगो वचनस्यान्यथाप्रयोगः, वर्तमाने भूतभविष्यत्प्रयोगः कालस्यान्यथाप्रयोगः, कर्मकारके कर्तृकरणादिकारकप्रयोगः कारकस्यान्यथाप्रयोगः लिङ्गादीनामेवञ्जातीयोऽन्यथाप्रयोगोऽपशब्द इत्युच्यते ।

संप्लवमाह्—अवर्ग इति । वर्गो यतिश्छेद इति पर्यायाः, अवर्गे वर्गायोग्ये वर्गकरणं, वर्गे वर्गयोग्ये अवर्गक्रिया च इति द्वयं, गुणविपर्यासः गुणानामर्थक्रमादि-लेखगुणानां वैपरीत्यं च, संप्लवो नाम नाम्ना भवति ।

चाणक्यटीका

लेखसंपद्विपरीता दोषा एव तेभ्योऽन्येअकान्त्यादयः (इत्यादिः ?) । अकान्ति-रिति लिखित्वा परामृष्टत्वात् कालपतितं लेख्यम् । अचारूणि अनिष्पन्नत्वात् सन्दिग्धानि तकारनकारादीनामविशेषात्, विषमाणि सूक्ष्मभेदात, विरागाण्यनुज्ज्वल-त्वाद् अक्षराणि यत्र लेख्ये ॥

पूर्वेणेति प्रणम्याज्ञापयतीत्यादि पूर्वेणोत्तरस्य व्याघातः । उक्तस्याविशेषेणेति भवतो ज्येष्ठेन भ्रात्रा बलवता भवान् कनीयान् भ्राता दुर्बलोऽभियुक्त इति ॥

कियन्तो हस्तिरूपाः ये प्रहिताः कार्यक्षमा वयमिति लिङ्गस्यान्यथा प्रयोगः, वर्षायामतीतायामहमेव गमिष्यामीति वचनान्यत्वम् । यद्ययं सामन्त आजगाम प्रयोजनसिद्धिर्भविष्यतीति कालस्यान्यत्वम् । भवान् दुर्गे तिष्ठेति कारकान्यत्वम् । आदिशब्दाद् वर्णविकारादयो दुर्णीतमित्यादयः ॥

खट्वामारूढ इति प्राप्ते खाट्वरूढ़स्तिष्ठतु भवान् इत्यसमासे समासकरणम् । पुरस्कृत्येति प्राप्ते पुरस्तादेति किं योक्ष्यन्त इति समासेऽप्यसमासः । गुणविपर्यास इति लेखसम्पद्विपर्यय इत्यर्थः ॥

प्रतिपदपञ्चिका

साम्प्रतं तद्विपर्ययो दोष इति प्राप्ते प्राधान्यात्प्रदर्शनार्थं वा पञ्च दोषान-कान्त्यादीन् अभिधाय व्याचष्टे-तत्रेत्यादि, तत्र अकान्त्यादिषु मध्ये कलपत्रकं लिखितो-च्छिष्टे स्वतो वा मलिने पत्रे लिखितमयमाधारदोषः ? अचारु विषमविषमविरागा-क्षरत्वं स्पष्टत्वादहारीणि ? कानिचिद्विषमाणि कानिचित्स्थूलानि कानिचित्सूक्ष्माणि विरागाणि अत्यच्छमभिलिखितानि । अयं त्वाधेयदोषः । इत्येवमुक्तिकान्तिलेखदोषाः । असम्बन्धमाह—पूर्वेणेति, पूर्वमुक्तेनार्थेन पश्चिमस्यार्थस्य अनुपपत्तिर्व्याघातः । सोऽ सम्बन्धः । तद्यथा—अवनितलगतेन शिरसाप्रणम्याज्ञापयति इति प्रणामस्याज्ञापनस्य च विरोधात् असम्बन्धः । पुनरुक्तमाह—उक्तस्याविशेषेणेत्यादि, तद्यथा—पूज्यपादा-न्माननीयानित्यादि । अपशब्दमाह—लिङ्गवचनेत्यादि, लिङ्गादीनां चतुर्णाम् अन्यथा-प्रयोगस्य स्त्रीलिङ्गे कार्ये पुंन्नपुंसकयोः प्रयोगः । अपभ्रंशो साधुपदप्रयोग इत्ययमप-शब्दः । सम्प्लवमाह—अवर्गे वर्गकरणमित्यादि-वर्गा यतिः, तस्याः स्थाने करणं अवर्गे

[निगमनम्]

सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च ।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः ॥७९॥

[इत्यध्यक्षप्रचारे शासनाधिकारः दशमोऽध्यायः
आदित एकत्रिंशः]

प्रतिपदपञ्चिका

वर्गकरणम् । तच्च न्यूनाधिकभेदात् द्विधा भवति । तत्र न्यूनत्वमर्धपदे वर्गकरणादि । आधिक्यं च चतुःपञ्चादिपदेषु । तदेवमुभयत्रापि सम्प्लवे अर्थसाङ्कर्यम्, यतेरपि भागकरणात् अनभिव्यक्ततेत्यर्थः । गुणविपर्यास इति, यथोक्तानामर्थक्रमादिलेखगुणानां सर्वेषामविपर्यासस्तद्विपरीतदोषकरणं च सम्प्लवो नाम दोषो भवति । न(त्व)न्वर्थापत्तिन्यायात् गुणविपर्यासस्य दोषताया लब्धत्वात् तद्ग्रहणं विस्पष्टार्थमिति ।

श्रीमूला

अध्यायान्ते श्लोकमाह—सर्वेत्यादि । कौटल्येन, सर्वशास्त्राणि बार्हस्पत्यादीनि, अनुक्रम्य ज्ञात्वा, प्रयोगमुपलभ्य च शास्त्रानुष्ठानं दृष्ट्वा च, नरेन्द्रार्थे राज्ञः कृते प्रयोजनाय, शासनस्य विधिः, कृत उपदिष्टः । शास्त्रलोकदृष्टस्यापि सतः शासनविधेरिह कौटल्यकृतत्ववचनं कौटल्येन कार्त्स्न्यसौष्ठवातिशययोगसम्पादनादिति बोद्धव्यम् ।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
दशमोऽध्यायः शासनाधिकारः, आदित एकत्रिंशः ॥

चाणक्यटीका

धर्मार्थन्यायशब्दारोग्यविषयाणि सर्वशास्त्राणि शासनाङ्गभूतान्यालोड्य । प्रयोगं च शिष्टानाम्, अन्यैराचार्यैरप्रवर्तितपूर्वत्वात् । कौटिल्येन नरेन्द्रार्थं शासनप्रधानत्वाद् विधिः कृतः । सम्भावितत्वादनरेन्द्रैरपि यथायोगं युज्यत एवेति ॥

इति शासनाधिकारो दशमं प्रकरणम् ।
॥ दशमश्चाध्यायः ॥

प्रतिपदपञ्चिका

साम्प्रतमध्यायप्रान्ते श्लोकमाह—सर्वशास्त्राणीति, अनुक्रम्य ज्ञात्वा, प्रयोगमुपलभ्य दृष्ट्वा लक्षणं लक्ष्यं च दृष्ट्वेत्यर्थः । नरेन्द्रार्थे राजार्थे, प्रयोजने निमित्तसप्तमीयम् । शासनस्य विधिः कृत इति उपदिष्टः । कौटिल्यग्रहणं न कर्तव्यम्, विनयाधिकारिके तस्याभिहितत्वात् । उक्तं हि—

कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥ इति ।

तत्क्रियते शासनाधिकारः । कौटिल्येनैव कृतो नान्यैःशास्त्रकारैरिति ज्ञापनार्थमिति ।

इति भट्टस्वामिनकृतप्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायाम् अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे दशमोऽध्यायः,
आदितः एकत्रिंशोऽध्यायः । ओम् । श्रीः ।

एकोनत्रिंशं प्रकरणम्

एकादशोऽध्यायः

कोशप्रवेश्यरत्नपरीक्षा

[कोशप्रवेश्यरत्नादिस्वीकारक्रमः]

कोशाध्यक्षः कोशप्रवेश्यं रत्नं सारं फल्गु कुप्यं वा तज्जातकरणाधिष्ठितः प्रतिगृह्णीयात् ।

श्रीमूला

कोशप्रवेश्यरत्नपरीक्षेति सूत्रम। कोशो भाण्डागारं तत्प्रवेशनार्हाणां रत्नानां माणिक्यमुक्ताप्रवालादीनां, रत्नग्रहणेन सङ्ग्राह्यद्रव्योपलक्षणात् सारफल्गुकुप्यानां च, परीक्षाऽत्रोपदिश्यत इति सूत्रार्थः।

'कोशपूर्वाः सर्वारम्भाः' इति प्रक्रान्तायाः कोशप्रकृतेः समाहर्तृसन्निधातृव्यापारैरुत्पादनं रक्षणं च प्रागभिहितं, स्वरूपलक्षणं त्वनुक्तमिदानीमभिधीयत इति सङ्गतिः।

कोशाध्यक्ष इति। कोशाध्यक्षः भाण्डागाराधिकृतः कोशप्रवेश्यं रत्नं मणिमुक्तादिकं, सारं चन्दनागुरुप्रभृतिकं, फल्गु पट्टदुकूलजातीयं, कुप्यं कुप्याध्यक्षप्रकरणोक्तं सारदारुवेणुवल्कादिकम् आयुधागाराध्यक्षप्रकरणोक्तं यन्त्रायुधावरणादिकं च, वाशब्दः समुच्चये, तज्जातकरणाधिष्ठितः तेषु रत्नादिषु जातास्तज्जातास्तत्सम्बद्धव्यवहारैकवृत्तय इत्यर्थः। तज्जातैः करणैः कायस्थैश्च अधिष्ठितः समन्वितः सन् प्रतिगृह्णीयात्।

चाणक्यटीका

अमात्यसम्पदोपेतान् सर्वाध्यक्षान् विधाय प्राधान्याद् गुणविशेषेण च शासनाध्यक्ष (स्योक्तम् ? उक्तः)। इतरेषां कर्म वाच्यम्। तत्रापि 'कोशपूर्वत्वात् सर्वारम्भाणाम् इति तदध्यक्षव्यापार एव, कोशप्रवेश्यानां प्रकर्षेणाभिमुख्येन स्थापनाऽर्हाणाम्, रत्नानामित्युपलक्षणार्थत्वाद् रत्नादीनाम्, परीक्षेति प्रकरणमुच्यते ॥

कोशाध्यक्षः कोशमात्राधिकृतः कोशप्रवेश्यं कोशप्रवेशनार्हं रत्नादिकं प्रतिगृह्णीयात्, सन्निधातुः समाहर्तुर्वा रूप्यसुवर्णयोस्तु बहुवाच्यत्वात् पृथक्करणम्।

प्रतिपदपञ्चिका

कोशप्रवेश्यरत्नपरीक्षेति सूत्रम्।

कोशो भाण्डागारम् तस्मिन् प्रवेशमर्हतीति कोशप्रवेश्यम्। तद्ग्रहणं परीक्षा

[मौक्तिकभेदाः तदुत्पत्तिहेतवः उत्त
माधमलक्षणानि च]

ताम्रपर्णिकं पाण्ड्यकवाटकं, पाशिक्यं, कौलेयं, चौर्णेयं, माहेन्द्रं, कार्दमिकं, स्रौतसीयं, ह्रादीयं, हैमवतं च मौक्तिकम् । शुक्तिः शङ्खः प्रकीर्णकं च योनयः ।

प्रतिपदपञ्चिका

यत्नातिशयार्थम् रत्नं मणिमुक्तादि, लुप्तनिर्देशश्च[1] । अत्रादिशब्दो द्रष्टव्यः । सारवित्[2] फल्गुकुप्यानामपि परीक्षाविधानात् प्राधान्याद्वा हस्तिवननिर्देशः । तेषां रत्नादीनां, परीक्षा कोशप्रवेश्यरत्नपरीक्षा सेहाभिधीयते इति सूत्रार्थः । सम्बन्धस्तु कोशप्रकृतेः प्रक्रान्तायाः समाहार्तृसन्निधात्रादिपरीक्षाप्रसङ्गेन मुक्तादिकुप्यान्तं सर्वं कोशान्त इति कोशस्वरूपव्या(पा)रोपदेशप्रकारैरुत्पादनरक्षणादिकमुक्तम् । इदानीं रत्नादीनां परीक्षादिप्रकारैरभिधीयत इति । अथवा "तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्यामिति" कोशोऽभिहितः । तत्स्वरूपं तु नाभिहितम् । अतस्तत्प्रवेशार्हरत्नादिपरीक्षाप्रसङ्गेन मुक्तादिकुप्यान्तं सर्वं "कोश" इति कोशस्वरूपप्रतिपादनार्थमिदमभिधीयत इति सम्बन्धः । वक्ष्यति च कोशसन्धिपूर्वयोः प्रणयेत् ।

कुप्यं हस्त्यश्वं पागराद्धितमिति ? तदाह-कोशाध्यक्ष इति, कोशो भाण्डागारम् तत्र नियुक्तः कोशाध्यक्षः कोशप्रवेश्यं तत्प्रवेशार्हम् । तस्य ग्रहणं परीक्षा यत्नातिशयार्थं गुणवत्परिग्रहार्थं च । रत्नं मुक्तादि, साराश्चन्दनादयः, फल्गु पट्टवस्त्रदुकूलक्षौमवस्त्राजिनादि । कुप्यं कुप्याध्यक्षप्रदिष्टम सारदारुवेणुवल्कवल्यादि, तथा आयुधागाराध्यक्षाभिहितम् । यन्त्रशस्त्रावरणादिकं च ज्ञापकान्वक्ष्यति हि तदध्यायप्रान्ते 'इच्छामारंभनिष्पत्तिं प्रयोगव्याजमुदयम् क्षयव्ययौ च जानीयात् कुप्यानामायुधेश्वर' इति, तत्र कुप्यग्रहणत्तदध्यायपठितानामपि कुप्यसंज्ञा ज्ञाप्यते । हि विकल्पे, तत्र निपुणास्तज्जाताः, करणम् तदधिकृतपुरुषाणां सामग्री, तदधिष्ठितस्तत्समेतः प्रतिगृह्णीयात् प्रतीच्छेत् ।

श्रीमूला

अभ्यर्हितत्वान्मौक्तिकस्य परीक्षां प्रथममाह—ताम्रपर्णिकमिति । मौक्तिकं, ताम्रपर्णी नाम पाण्ड्येषु प्रसिद्धा नदी तस्याः समुद्रसङ्गमप्रदेशे समुत्पन्नं, पाण्ड्यकवाटकं मलयकोटिपर्वतोत्पन्नं, पाशिक्यं पाटलिपुत्रान्तिकगतायां पाशिकाख्यायां नद्यामुत्पन्नं, कौलेयं सिंहलद्वीपे मयूरग्रामे कुला नाम नदी तस्यामुत्पन्नं, चौर्णेयं केरलेषु

---

१. निर्विष्टस्य । —पा०

२. सारवित्तु कुप्यादीनामपि ।—पा०

श्रीमूला

मुरचिनामकपत्तनसमीपे चूर्णा नाम नदी तस्यामुत्पन्नम्। माहेन्द्रं महेन्द्रपर्वताभ्यर्णाम्भोधिसम्भवं, कार्दमिकं कर्दमा नाम पारसीकेषु नदी तस्यामुत्पन्नं, स्रौतसीयं बर्बरकूले स्रोतसी नाम नदी तस्यामुत्पन्नं, ह्रादीयं बर्बरकूले समुद्रैकदेशे श्रीघण्टो नाम ह्रदः तस्मिन्नुत्पन्नं, हैमवतं च हिमालयसम्भवं च, भवति। इत्थं मौक्तिकस्योत्पत्तिक्षेत्राणि दश भवन्ति।

मौक्तिकस्य योनीस्तिस्र आह—शङ्ख इत्यादि। शङ्खः शुक्तिश्च जलजौ प्रसिद्धौ। प्रकीर्णकं गजकुम्भादिकम्। आहुश्च—

"करका वारिधाराश्च मलयाश्चन्दनोदकम्।
शङ्खशुक्तिनिपीतं यन्मौक्तिकं तत् प्रजायते॥"
"सूकरमृगेन्द्रदंष्ट्रोद्भवानि करिकुम्भजातानि।
वंशाभोगभुजङ्गोत्तमाङ्गजानि प्रकीर्णानि॥" इति।

चाणक्यटीका

चतुर्विधं मौक्तिकं मणिं वज्रं प्रवालकञ्च क्रमेण दर्शयन्नाह—ताम्रेति। पाण्डयदेशे ताम्रपर्णिका नाम नदी समुद्रपतिता, तत्र भवं कोपधावर्णः ताम्रपर्णिकम्। पाण्डयानां यः कवाट इव पर्वतः तत्प्रभवासु नदीषु जातं पाण्ड्यकवाटम्। पाण्ड्यविषय एव समुद्रपार्श्वे पाशिकायां नद्यां भवं पाशिक्यम्। तथा कुला नामनदी तत्र भवं कौलेयम्। चूर्णानाम नदी केरलसमीपे तत्र भवं चौर्णेयम्। महेन्द्रोनाम पर्वतः समुद्रतटे तत्प्रभवासु नदीषु जातं माहेन्द्रम्। उत्तरापथे कर्दमिकायां नद्यां भवं कार्दमिकम्। स्रोतसी नदी पर्वते[1] तत्र भवं स्रौतसीयम्। तत्रैव ह्रदे भवं ह्रादीयम्। इति स्थानानि मौक्तिकस्य॥

तासु नदीषु याः शुक्तयो जायन्ते नदीसमुद्रे मेघशङ्खाः ? तन्मुखप्रविष्टतज्जलमेव मुक्तात्वेन परिणमति। ऐन्द्रं जलमित्यन्ये। प्रकीर्णकञ्चेति मत्स्यसर्पहस्तिनां मस्तकानि अन्यानि वंशादीनीति तिस्रो योनयः॥

प्रतिपदपञ्चिका

साम्प्रतं सर्वरत्नप्रधानस्य मौक्तिकस्य दश क्षेत्राणि त्रिविधां च योनिं प्रतिपादयितुमाह—'ताम्रपर्णिकमित्यादि, तत्र ताम्रपर्णिकं पाण्डयचेदुयेषु ताम्रपर्ण्याख्या नदी, समुद्रसङ्गमसमुत्पन्नं, पाण्डयकवाटकं तत्रैव, मलयकोटिपर्वतोत्पन्नं चञ्चत्कोष्ठागारकोटिमाचक्षते। पाशिक्यं पाशनिकं नदीनं, कौलेयं सिंहलद्वीपे मयूरग्रामसमीपे कुला नाम नदी तदुत्पन्नम्। चौर्णेयम्, केरलेषु मुरचीपत्तनसमीपे चूर्णा नाम नदी तस्यां जातम्। माहेन्द्रं महेन्द्रगिरिसमीपे समुद्रोत्पन्नम्। कार्दमिकं, पारसीकेषु कर्दमा नाम नदी तदुत्पन्नम्, स्रौतसीयम् बर्बरकूले स्रोतसी नाम नदी तदुत्पन्नम्। ह्रादीयं बर्बरकुल

———

१. बर्बरकूल इति भट्टस्वामी।

मसूरकं त्रिपुटकं कूर्मकं अर्धचन्द्रकं कञ्चुकितं यमकं कर्तकं खरकं सिक्थकं कामण्डलुकं श्यावं नीलं दुर्विद्धं चाप्रशस्तम् ।

प्रतिपदपञ्चिका

एव समुद्रैकदेशे श्रीघण्टाभिधानो ह्रदः तदुत्पन्नम् । हैमवतं हिमवद्गिरिजम् । एवं देशक्षेत्राण्यभिधाय त्रिविधां योनिमाह शङ्खः शुक्तिः प्रकीर्णकं च योनय इति । तत्र शङ्खशुक्ती जलजौ प्राणिविशेषौ प्रतीतौ । प्रकीर्णकं गजमस्तकादिप्रभवम् । तथा च—

करका वारिधाराश्च मलयाश्चन्दनोदकम् ।
शङ्खशुक्तिनिपीतं यन्मौक्तिकं तत्प्रजायते ॥
वर्णच्छायाप्रमाणाद्यैरुपेतः कालयोगतः ।
विविधं तद्विजानीयात् परमार्थसमं क्रमात् ॥
सूकरमृगेन्द्रदंष्ट्रोद्भवानि[1] करिकुम्भजेषु जातानि ।
वंशाभोगभुजङ्गोत्तमाङ्गजानि प्रकीर्णकानि ॥

श्रीमूला

अथ मौक्तिकस्य त्रयोदश दोषानाह—मसूरकमिति । मसूरकं तदाख्यधान्यविशेषाकारं, त्रिपुटकं तदाख्यधान्याकारं, कूर्मकं तदाकारम्, अर्धचन्द्रकम् अर्धचन्द्राकृति, कञ्चुकितं पटलितं, यमकं युग्मकं, कर्तकं छिन्नकं, खरकम् अश्लक्ष्णं सिक्थकं सिक्थाकारविन्दुयुक्तं, कामण्डलुकं कमण्डल्वाकारं, श्यावं कपिशवर्णं, नीलं नीलवर्णं, दुर्विद्धम् अस्थानविद्धम्, ईदृशं मौक्तिकम् अप्रशस्तम् । गुणात् प्राग् दोषवचनं दुष्टस्यात्यन्तानुपादेयत्वद्योतनार्थम् ।

चाणक्यटीका

मसूरसंस्थानं मसूरकम् । कलापसंस्थानं त्रिकोणं त्रिपुटकम् । कूर्मपृष्ठसंस्थानं कूर्मकम् । अर्धचन्द्रसंस्थानम् अर्धचन्द्रकम् । कमण्डलुसंस्थानं मध्ये विशालमुभयान्तयोस्तनु कामण्डलुकम् इति । खर (का) वसानं[2] स्थानदोषाः । श्यावं नीलमिति च वर्णदोषाः । दुर्विद्धम् अदेशविद्धम् इति संस्कारदोषाः ॥

प्रतिपदपञ्जिका

गुणवदुपादानायाप्रशस्तानां वर्जनीयतरत्वप्रतिपादनाय च प्रथमतरं त्रयोदशविधं दोषमाह—मसूरकमित्यादि । मसूरकं त्रिपुटकं कूर्मकार्धचन्द्रककामण्डलुकानि तदाकृतीनि । तत्र मसूरत्रिपुटौ धान्यविशेषौ, कूर्मः कच्छपः, अर्धचन्द्रः प्रतीतः कमण्डलुः

---

१. आकर ।—पा०

२. 'सारतरं मयालब्धम्—अखरकम्, अकर्करम्,' अकञ्चुकम् अयमकम्, अकूर्मकम्, असिक्थकञ्च, मुक्ताजातमिदम्……निस्तल-स्थुल-वृत्त-स्निग्ध-भ्राजिष्णु-गुरु-श्वेत-देशविद्धान्यमूनि मौक्तिकानि' इत्यवन्तिसुन्दरी ।

स्थूलं वृत्तं निस्तलं भ्राजिष्णु श्वेतं गुरु स्निग्धं देशविद्धं च प्रशस्तम् ॥

[मौक्तिकसराणां पञ्चभेदाः, शीर्षकादिसङ्ख्यानुगुण्येन तेषां परस्परमिश्राणामिश्रणाभ्यां च व्यवहार्याणि भूषणनामानि]

शीर्षकं उपशीर्षकं प्रकाण्डं अवघाटकं तरलप्रतिबन्धं चेति यष्टिप्रभेदाः ।

प्रतिपदपञ्चिका

यतीनामुदकपात्रं । कञ्चुकितं सपटलकं, यमकं युग्मकं, एकलग्नं कर्तकच्छिन्नम्, खरकं अस्निग्धम्, अश्लक्ष्णं वा सिक्तकं, बिन्दुचित्रं श्यावं कृष्णत्वानुगतं, सुस्थानमपि वर्णदोषात् दुष्टं नीलं नीलवर्णं दुर्विद्धम् अप्रदेशविद्धम् । सुस्थानवर्णापितमपि वेधदोषात् तद्[1], दुष्टमेव ।

श्रीमूला

मौक्तिकस्याष्टौ गुणानाह—स्थूलमिति । स्थूलं पृथु, वृत्तं चारुपरिमण्डलं, निस्तलं तलरहितं मसृणं भूम्यनवस्थायि, भ्राजिष्णु दीप्तिमत्, श्वेतं धवलं, गुरु अलघु, स्निग्धम् अरूक्षं, देशविद्धं च यथास्थानविद्धं च, मौक्तिकं प्रशस्तम् । एषु यस्य कस्यचित् पूर्वोक्तदोषाभावरूपतया सिद्धस्यापीह शब्दतो ग्रहणं स्थूलत्वादिनिर्विशेषं गुणत्वं द्योतयितुम् ।

चाणक्यटीका

वृत्तं वर्तुलम् । निस्तलं स्वानतम् । अन्ये निस्तुलमिति पठन्ति एवं वृत्तमित्यनेनैव सिद्धत्वात् । भ्राजिष्णु प्रभास्वरम् । श्वेतं शुद्धवर्णम् । स्निन्धम् अपरुषम् । देशविद्धम् मध्यविद्धमुपयोगार्थम् ॥

प्रतिपदपञ्चिका

दोषानभिधायाऽष्टौ मौक्तिकगुणानाह—स्थूलमित्यादि, स्थूलं महत्, वृत्तं सुपरिमण्डलं, निस्तलं श्लक्ष्णायां भूमावन वस्थायि, पांसुनिका यदुपरिमुक्तं तलाभावान्नावतिष्ठते । भ्राजिष्णु द्युतिमत्, श्वेतमतिधवलं, गुरु भारिकम्, स्निग्धम् अरूक्षच्छायं, देशविद्धं यथोक्तदेशविद्धं न तुवृत्तस्निग्धदेशविद्धानां तद्विपरीतदोषवचनादर्थापत्या गुणत्वे सिद्धे तद्ग्रहणं नियमप्रतिषेधार्थम्, अन्यथा हि स्थूलनिस्तलभ्राजिष्णुगुरुश्वेतानामिव पञ्चानां नियमेन वचनसामर्थ्यात् गुणत्वं स्यादिति ।

श्रीमूला

अथ पञ्च यष्टिभेदानाह—शीर्षकमिति । मौक्तिकं महदेकं मध्ये, पार्श्वयोस्तु सर्वाणि तनूनि समानि यस्याः सा यष्टिः शीर्षकमित्युच्यते । उपशीर्षकं नाम महदेकं मौक्तिकं मध्ये, तत्पार्श्वयोस्तु सममल्पपरिमाणमेकैकमित्येवङ्क्रमेणानेके-

---

१. तदा ।—पा०

यष्टीनामष्टसहस्रमिन्द्रच्छन्दः। ततोऽर्धं विजयच्छन्दः। शतं देवच्छन्दः। चतुष्षष्टिरर्धहारः। चतुष्पञ्चाशद्रश्मिकलापः। द्वात्रिंशद्गुच्छः। सप्तविंशतिर्नक्षत्रमाला। चतुर्विंशतिरर्धगुच्छः। विंशतिर्माणवकः।

श्रीमूला

स्त्रिकैः समैर्ग्रथिता यष्टिः। प्रधानमेकं मध्ये, तत्पार्श्वयोर्द्वे द्वे इत्येवङ्क्रमेणानेकैः पञ्चकैर्ग्रथिता यष्टिः प्रकाण्डकम्। प्रधानमेकं महन्मौक्तिकं मध्ये कृत्वा, पार्श्वयोः क्रमकृशोत्तरोत्तरमौक्तिकैर्ग्रथिता यष्टिरवघाटकाख्या। तरलप्रतिबन्धं नाम समप्रमाणमौक्तिकगुम्फिता यष्टिः। चशब्दः समुच्चये। इति यष्टिप्रभेदाः यष्टीनां सराणां प्रभेदाः।

चाणक्यटीका

रचनाविशेषमाह—शीर्षकमिति। शीर्षकशब्दः शिरःपार्श्वयोः द्रष्टव्यः। प्राधान्यसामान्यादुपचारेण महाप्रमाणयष्टिमध्ये मौक्तिकम्। तत्पार्श्वयोः किञ्चिदूनप्रमाणम् (अवशिष्टकम् ? उपशीर्षकम्) तयोर्बहिर्मध्यप्रमाणं प्रकाण्डकम्। तयोर्बहिन्र्यूनतरप्रमाणम् अवघाटकम्। तयोर्बहिन्र्यूनतरप्रमाणान्तरं (अ)नन्ते (?) पश्चात् प्रतिबद्धं क्रियत इति तरलप्रतिबन्ध इत्युच्यते। यष्टिर्माला लतिका सरिकेत्यन (र्था) न्तरम्। तासां चारुरूपमुक्ताफलावस्थानार्थं प्रदेशावयवा गुटिकाः। सङ्ख्या त्वत्र उपयोगापेक्षया द्रष्टव्या। उपशीर्षकादयश्चत्वारः षड् वेति नायं नियमः। अन्यथा शीर्षकादिद्वययोगात् दशगुटिका यष्टिः स्यात्॥

प्रतिपदपञ्चिका

एवं दोषान् गुणांश्चाभिधाय सम्भवतः पञ्चयष्टिभेदानाह—शीर्षकमित्यादि, शीर्षकमेकं प्रधानं पञ्चमौक्तिकमध्ये प्रकाण्डकं, तथा प्रधानमेकं यस्याशेषाणि तु सर्वाणि तुल्यानि। (उपशीर्षकं स) साभ्रदानपञ्चमौक्तिकमध्यं प्रकाण्डकं, तथा प्रधानमेकंमज्ज(ध्व)मौक्तिकं मध्ये कृत्वा, तदनु किञ्चित् किञ्चित् अपचीयमानक्रमेण ग्रथितसमस्तमौक्तिकं गोपुच्छाकारकारकमवघाटकं, तथा तुल्यप्रमाणसमस्तमौक्तिकग्रथितं तरलप्रतिबन्धम्। चशब्दः समुच्चये। इतिशब्दः प्रकारे। यष्टिप्रभेदा लताभेदाः, यष्टीनामष्टसहस्रादिसङ्ख्यानियमेन इन्द्रच्छन्दादिसंज्ञादिकानि एकादश आभरणानि प्रत्येकं शीर्षादिप्रधानपाञ्चविध्यात् पञ्चांशा भवन्ति।

श्रीमूला

शीर्षकादीनां पञ्चानां यष्टीनां प्रत्येकं सङ्ख्यानियमप्रयुक्तानेकादशभेदानाह—यष्टीनामिति। यष्टीनां शीर्षकादिलक्षणानामुक्तानाम्, अष्टसहस्रम् अष्टोत्तरं सहस्रम्, इन्द्रच्छन्दः तदाख्यं भूषणमुच्यते, शीर्षकेन्द्रच्छन्द उपशीर्षकेन्द्रच्छन्द इत्यादिप्रकारैर्व्यपदिश्यत इत्यर्थः। एवमुत्तरत्रापि बोद्धव्यम्। ततोऽर्धं चतुरुत्तरा पञ्चशती, विजयच्छन्दः। शतं देवच्छन्दः, शतयष्टिकं देवच्छन्दाख्यम्। एकाशीत्युत्तरैर्यष्टीनामष्टभिः शतैर्युक्तो देवच्छन्द इति क्वचिद् व्याख्यातम्। चतुष्षष्टिरित्यादिकम्।

ततोऽर्धमर्धमाणवकः। एत एव मणिमध्यास्तन्माणवका भवन्ति। एकशीर्षकश्शुद्धो हारः। तद्वच्छेषाः। मणिमध्योऽर्धमाणवकः त्रिफलकः फलकहारः पञ्चफलको वा। सूत्रमेकावली शुद्धा। सैव मणिमध्या यष्टिः।

चाणक्यटीका

यष्टीनामिति यथोक्तावयवानाम् अष्टाधिकं सहस्रमिन्द्रच्छन्दसंज्ञको दे (वल ? वालय) वितानादिषु शोभाकरणार्थमवलम्ब्यते। ततोऽर्धं विजयच्छन्द इति शतार्द्धम्। एत एवेति एकादशाप्येते यन्मणिमध्या भवन्ति तैर्विशेषणीयास्तन्माणवकास्तदात्मान इत्यर्थः। तद्यथा पद्मरागेन्द्रच्छन्दः इत्यादयो योज्याः। एकशीर्षक इति एकप्रमाणाः शीर्षका एव यस्य गृह्यन्ते स शुद्धो हारः। कतिपययष्ट्य इति चेन्माणवकानन्तर्याद् विंशतिरिति गम्यते। विशेषानभिधानादेकयष्टिरित्यन्ये तद्वच्छेषं शुद्धोपशीर्षकं शुद्धप्रकाण्डकमित्यादियोज्यम्।

प्रतिपदपञ्चिका

तान्याह—यष्टीनामष्टसहस्रमित्यादि, यष्टीनां लतानां अष्टोत्तरसहस्रमिन्द्रच्छन्द इत्येवंसंज्ञं भवति। शेषं सुबोधम्। त एवेति, पूर्वोक्ता एवेन्द्रच्छन्दादयो मणिमध्याः तन्माणवका इति। इन्द्रच्छन्दाद्युपपदमाणवकसंज्ञा भवन्ति। तत्र एकशीर्षकःशुद्धो हार इति एकशब्दः केवलवाची, केवलाभिशीर्षकलक्षणाभिरुपशीर्षकादिरहिताभिर्यष्टिभिः

श्रीमूला

अर्धमाणवक इत्येवमान्तमुत्तानार्थम्। एत एवेति। उक्ता एवेन्द्रच्छन्दादयो, मणिमध्या माणिक्यमध्याः सन्तः, तन्माणवका भवन्ति, इन्द्रच्छन्दाद्युपपदमाणवकाः भवन्ति, इन्द्रच्छन्दमाणवको विजयच्छन्दमाणवक इत्येवमादिसंज्ञायुक्ता भवन्तीत्यर्थः। एकेत्यादि। एकशीर्षकः शुद्धो हारः एकानि केवलान्युपशीर्षकादिलक्षणास्पृष्टानि शीर्षकाणि शीर्षकाख्याः यथोक्तसङ्ख्या यष्ट्यो यस्य स तथाभूतः, अर्थाद् इन्द्रच्छन्दादिर्विशेष्य शुद्धहाराख्यो भवति, इन्द्रच्छन्दशीर्षकशुद्धहारो विजयच्छन्दशीर्षकशुद्धहारो देवच्छन्दशीर्षकशुद्धहारोऽर्धहारशीर्षकशुद्धहारो रश्मिकलापशीर्षकशुद्धहार इत्यादिरीत्या व्यवहार्यो भवतीत्यर्थः। शीर्षकविषयेऽभिहितं शुद्धहारव्यपदेशमुपशीर्षकादावतिदिशति—तद्वदिति। तद्वद् शीर्षकवत्, शेषा उपशीर्षकादयः, बोद्धव्या इति शेषः। एतदुक्तं भवति—एकशीर्षकवद् एकोपशीर्षक एकप्रकाण्डक एकावघाटक एकतरलप्रतिबन्ध इत्यपरे चत्वारः शुद्धहाराः। इन्द्रच्छन्दोपशीर्षकशुद्धहारो विजयच्छन्दोपशीर्षकशुद्धहार इत्यादिक्रमेण प्रत्येकमुपगृहीतेन्द्रच्छन्दविजयच्छन्दादिसंज्ञाका ऊहनीया इति। मणिमध्य इति। मणिर्मरतकादिर्मध्ये यस्य स मणिमध्यः, अर्धमाणवकः पूर्वोक्तो दशयष्टिः, त्रिफलकः पञ्चफलको वा त्रिभिः पञ्चभिर्वा स्वर्णफलकैर्युक्तो भवन्, फलकहारः फलकहारसंज्ञो भवति, स च द्विप्रकारः। सूत्रमिति। शुद्धा मणिहीना, एकावली एकः सरः शीर्षकाद्यन्यतमलक्षणः, सूत्रं तदाख्या भवति।

हेममणिचित्रा रत्नावली । हेममणिमुक्तान्तरोऽपवर्तकः । सुवर्णसूत्रान्तरं सोपानकम् । मणिमध्यं वा मणिसोपानकम् ।

चाणक्यटीका

मणिमध्य इति दशयष्टिरर्द्धमाणवको मणिमध्यः, (स) त्रिभिः सुवर्णफलकैः पञ्चभिर्वा मणिरचितैः सान्तरालो ग्रथितः फलकहारसञ्ज्ञो भवति सूत्रमिव, एकैव मुक्तामालादीनां पञ्चावयवानामेकजातीयावयवानां वा । सैव मणिमध्या एकावली यष्टिः । हेम्ना मणिभिश्च क्वचित् क्वचित् चित्रा रत्नावली ॥

प्रतिपदपञ्चिका

निबद्धसङ्ख्याप्रभेदविहितसंज्ञोपपदश्च शुद्धहारसंज्ञो भवति । तद्यथेन्द्रच्छन्दशीर्षकः-शुद्धहार इत्यादि । तद्वदेकशीर्षवत् । शेपाश्चोपशीर्षकप्रकाण्डकादयः स्वसंज्ञोपपदशुद्धहारा व्याख्येयाः । ये त्वत्र मानुषाणां, अनुचिसारते देवतानामवगन्तव्याः । मणिमध्योर्ध्वंमाणवक इति । मणिमध्यः पद्मरागादिर्मणियुक्तोऽर्धमाणवकः । प्रागभिहितो दशयष्टिः स एव त्रिभिः फलकैः सौवर्णफलकैः पञ्चभिर्वा पद्मरागाद्युपलाश्रयभूतैरुपेतः फलकहार-संज्ञो भवति । सूत्रमेकावलिरिति, (रिवर्णो वर्जनोयः ।) एका अद्वितीया, आवली

श्रीमूला

सैवेति । सैव एकावल्येव, मणिमध्या सती, यष्टिः यष्टिसंज्ञा । हेमेत्यादि हेममणिचित्रा हेममयैर्मणिभिराहितवैचित्र्या यष्टिः, रत्नावली तदाख्या । हेममणिमुक्तेत्यादि । हेममणिमुक्तान्तरः हेममणिमुक्ताः पूर्वं हेमगुलिका, ततः पद्मरागादिरत्नं, ततो मौक्तिकमित्येवङ्क्रमगुम्फिताः अन्तरे मध्ये यस्य स तथाभूतः, अपवर्तकः तदाख्यः । सुवर्णेत्यादि । सुवर्णसूत्रान्तरं सुवर्णसूत्रम् अप्रत्युप्तमणिकं केवलस्वर्णफलकम्, अन्तरे मध्ये यस्य तत् तथाभूतं, सोपानकं तत्संज्ञम् । मणीत्यादि । मणिमध्यं मणिसोपानकं । मणियुक्तं प्रत्युप्तमणिकं मध्यं मध्यसुवर्णफलकं यस्य तत् तथाभूतं मणिसोपानकाख्यम् ।

चाणक्यटीका

अपरे त्वाहुः—सूत्रवत्, सूत्रम् एकावलीत्युच्यते, विशुद्धा मणिभिः फलकैश्चासंसृष्टत्वात् । यदा मणिमध्या सैव एकावली, तदा यष्टिरिति । हेममणिगुटिकाभिर्विकलीकृत्य युक्ता रत्नावली ॥

हेममणिमुक्ता (न्तरित) इति । हेममणय एव एकैकमुक्तान्तरिता (यत्र) । तद्यथा—पूर्वं मुक्ता ततो हेमगुटिका ततो मणिः पुनर्मुक्तेत्यपवर्तकसंज्ञः । सुवर्णसूत्रान्तरितमिति सुवर्णसूत्रेणैकेनान्तरितं मौक्तिकं यत्र तत् सुवर्णसोपानकम् । तदेव तन्मणिमध्यं मणिसोपानकम् । मणिविशेष (णा ?) विशेषेणोयं वैडूर्यसोपानकमित्यादि ॥

(तेनेति ?) तेषां ये युक्त (?) प्रमाणा माणवकाः ते ग्रीवासक्ताः प्रालम्बादयः, (कृपण ? कण्ठ) शरीरभूषणास्तदायामाः । महाप्रमाणाश्चेन्द्रच्छन्दादयो देवशय्यागृहादिभूषणानि ॥

तेन शिरोहस्तपादकटीकलापजालकविकल्पाः व्याख्याताः ॥

प्रतिपदपञ्चिका

लताः शुद्धमणिरहिताः शीर्षकादिपञ्चप्रभेदा विसूत्रसंज्ञा भवन्ति । सैवेति, पूर्वोक्तैकावली मणिमध्या मणियुक्तमध्या यष्टिसंज्ञा भवति । हेममणिचित्रेति, यष्टिरिति हेममणिभिश्च-चित्रा यष्टिः रत्नावली भवति । हेममणिमुक्तान्तर इति, मुक्ताप्रमाणः पूर्वः सौवर्णो[१] मणिः, ततः पद्मरागादिमणिः ततो मौक्तिक इत्येवमन्तर एवंग्रथितमध्योऽपवर्तकसंज्ञो भवति इति । त्रिफलकं पञ्चफलको वेत्यत्र फलकं वा युक्तमुक्तम् । तद्द्विविधम् केवलसुवर्णं मणिरहितं च तदाह—सुवर्णसूत्रान्तरमित्यादि ।

सुवर्णमेव केवलं पत्रभङ्गादिपरिकर्मंवति । सूत्रान्तरमिति मध्ये निबन्धनसूत्र-प्रदेशे यद्विहितं रन्ध्रं सूत्रविन्धनार्थं विहितोभयपार्श्वपाशकं वा । तथा च सति समास-द्वयं भवति । सूत्रमन्तरे मध्ये यस्य सूत्रयो र्वा अन्तरं सुवर्णं च तत् सूत्रान्तरं च सुवर्ण-सूत्रान्तरं सोपानकं भवति । मणिमध्यं मणिसोपानकं भवति ।

श्रीमूला

तेनेति । तेन यथोक्तेन शीर्षकादिकण्ठाभरणप्रकारेण, शिरोहस्तपादकटीकला-पजालकविकल्पाः शिरआदिचतुष्टयस्य कलापजालकविकल्पाः कलापः सरः जालकं सरसमूहः तयोर्विकल्पाः—प्रकाराः व्याख्याताः उक्तप्राया इत्यर्थः । अत्रायं सङ्ग्रह-श्लोकः श्रीभट्टस्वामिनः—

"अष्टौ गुणास्त्रिधा योनिर्दश सम्पत्तिभूमयः ।
त्रयोदशैव मुक्तानां दोषा हाराश्च विंशतिः ॥"

इति मौक्तिकप्रकरणम् ।

चाणक्यटीका

इदानीं मस्तकादिभूषणविधानार्थमाह—तेन शीर्षकादिन्यासक्रमेण शिरो-हस्तादिभूषणार्थाः कलापविकल्पाः जालविकल्पाश्चानुप्रधानाः शुद्धा मणिमध्या च व्याख्याताः । मौक्तिक (करणं ? रत्नं) व्याख्यातम् ।

प्रतिपदपञ्चिका

तेनेति, पूर्वोक्तेन शीर्षकाद्यकण्ठाभरणप्रकारेण शिरःप्रभृतीनां कलापजालकवि-कल्पान्याभरणान्याख्याताः । कलापो लता जालकं, तत्समूहः । विकल्पः तत्प्रभेद इति केचित् । अपरे तु कलापो लतासमूहः—जालकं फलकं, विकल्पः प्रकार इति ।
तथा च अष्टौ गुणाः—त्रिधा योनिः दश[२] सम्पत्तिभूमयः ।
त्रयोदशैव मुक्तानां दोषा हाराश्च विंशतिः ।

---

१. स्नेहवर्णो—पा०

२. दल—पा०

[मणीनां त्रिधा विभागः]

मणिः—कौटो मालेयकः पारसमुद्रकश्च ।

[मणिपु पञ्च माणिक्यभेदाः]

सौगन्धिकः, पद्मरागः' अनवद्यरागः, पारिजातपुष्पकः, बालसूर्यकः ।

श्रीमूला

अथ मणीनां गुणादीन् वक्तुमुपक्रमते—मणिरिति । मणिः, कौटः कोटिमलयसागरान्तरं तत्रभवः, मलयैकदेशः कर्णीवनाख्यो माला तस्यां जातो मालेयकः, पारसमुद्रः सिंहलद्वीपस्थो रोहणाद्रिः, तज्जः पारसमुद्रकः, इति त्रिविध इत्यर्थः । एवं च मणीनां योनयस्तिस्र इत्युक्तं भवति । प्रायिकं चैतत् स्फटिकवैदूर्यमरतकादीनां विन्ध्यविदूरदर्दुरादिपूत्पत्तिदर्शनादित्याहुः । श्लोकं चोदाहरन्ति—

"विन्ध्यो विदूरशैलो मलयो विन्ध्योपलक्षणोद्देशः ।
स्त्रीराज्यं चेति पुनस्तस्याकरभूमयोऽभिहिताः ।। इति ।

मणिपु पञ्चप्रकारां माणिक्यजातिमाह—सौगन्धिक इति । सौगन्धिकः तदाख्यकुसुमवद् ईषन्नैल्यरूपितरक्तवर्णः, पद्मरागः पद्मवर्णः, अनवद्यरागः अनवद्यं कुङ्कुमं तद्वर्णः, पारिजातपुष्पकः पारिजातकुसुमवर्णः, बालसूर्यकः उदीयमानसूर्यारुणः ।

चाणक्यटीका

मणिरत्नमाह—मणिरिति । कूटाख्ये पर्वते मलयपर्वते च भवः कौटः, मालेयः प्रालेयवत् "केकयुमित्रयुप्रलयानां यादेरियः" (७. ३. २.) इत्यत्रोपसङ्ख्येयः, पृषोदरादिषु वा द्रष्टव्यः । समुद्रपारे भवः पारेसमुद्रकः सिंहलद्वीपज इत्यर्थं । त्रिविध आकरः ॥

(रात्रि ? रत्न) भेदान् सवर्णविशेषानाह—सौगन्धिकपुष्पवर्णः सौगन्धिकः । रक्तपद्मस्येवानवद्यरागः पद्मरागः । पारिजातपुष्पसदृशोऽतिलोहितो बालसूर्यक इति (यः ?) पद्मरागभेदाः ॥

प्रतिपदपञ्चिका

एवं मौक्तिकानां क्षेत्रगुणादीनभिधाय मणीनामाह—मणिरित्यादि । तत्र त्रिविधं क्षेत्रं कौटमालेयकपारससमुद्रकाख्यञ्च । तथा च :—

'अनुवेलं मलयगिरिं सिंहलभूमौ च रोहणो देशः ।
कर्णिवनं च तेषां उत्पत्तेर्योनयस्तिस्रः ।।' इति ।

प्रायिकं चैतदन्यत्रापि माणिक्यापर्यायाणां स्फटिकवैडूर्यमरकतानां विन्ध्यविदूर दर्दुरमलयादिपूत्पत्तिदर्शनाद । उक्तं हि :—

'विन्ध्यो विदूरशैलो मलयो विन्ध्योपलक्षणोद्देशः ।
स्त्रीराज्यं चेति पुनः तस्याकरभूमयोऽभिहिताः ।।' इति

[अष्टौ वैडूर्यभेदाः]

वैडूर्यः—उत्पलवर्णः शिरीषपुष्पकः उदकवर्णः वंशरागः शुकपत्रवर्णः पुष्परागो गोमूत्रको गोमेदकः ।

[अष्टौ इन्द्रनीलभेदाः]

नीलावलीयः इन्द्रनीलः कलायपुष्पकः महानीलः जाम्बवाभः जीमूतप्रभः नन्दकः स्रवन्मध्यः ।

प्रतिपदपञ्चिका

तथा सौगन्धिकादिसूर्यकान्तान्तपञ्चविंशतिभेदा जात्यमणिजातिः । तत्र सौगन्धिप(वद्म)पद्मरागानवद्यरागपारिजातपुष्पकबालसूर्यकभेदात् पञ्चप्रकारामाणिक्यजातिः ।
तथा च— शशरुधिरजपाबन्धूकसन्निभाः पारिजातपुष्पाभाः—
तरुणतरणित्विषोवा त एव खलु पद्मरागाः स्युः ।

श्रीमूला

अष्टप्रकारां वैडूर्यजातिमाह—वैडूर्य इति । वैडूर्य इत्यधिकारः । उत्पलवर्णः कोकनदवर्णः, शिरीषपुष्पकः शिरीषपुष्पवर्णः, उदकवर्णः उदकवत् स्वच्छवर्णः, वंशरागः वेणुपत्रवर्णः, शुकपत्रवर्णः शुकपक्षच्छविः, पुष्परागो हरिद्रापिञ्जर इति स्वामी, गोमूत्रकः गोमूत्रच्छायः, गोमेदकः गोमेदो गोरोचना तद्वर्णः ।

अष्टविधामिन्द्रनीलजातिमाह—नीलेत्यादि । नीलावलीयः शुक्लः एव नीलराजितरङ्गितः, इन्द्रनीलः मयूरवर्हवर्णः, कलायपुष्पकः कलायो धान्यभेदः तत्पुष्पसमच्छविः, महानीलः भ्रमरवर्णः, जाम्बवाभः जम्बूफलवर्णः, जीमूतप्रभः मेघवर्णः, नन्दकः अन्तःशुक्लो वहिर्नीलः, स्रवन्मध्यः स्रवज्जलाकाररश्मिप्रसरः ।

चाणक्यटीका

उत्पलवर्णो नीलोत्पलवर्णो नीलः । शिरीशपुष्पकः शिरोषपुष्पवर्णः । उदकवर्णः उदकाभः । वंशरागः वंशत्वगिव हरितः । पत्रवर्णः पत्रवद्धरितः । वंशोऽत्यर्थं हरितः, न तथा पत्रमिति भेदः । एते वैडूर्यभेदाः ॥

गोमुत्रको गोमेदकश्च नाम्नैव प्रतीतवर्णौ । शुद्धस्फटिको व्यक्तवर्णः । मूला (दि ? टी) वर्णः (मृणालीपर्ण ?) स्निग्धः श्वेत इत्यर्थः । अथवा मूलादिर्मूलक, तत्सदृशवर्णः । एते पुष्परागभेदाः ॥

नीलावलीयकः भ्रमरवर्णः । कलायपुष्पकः, कलायपुष्पवर्णः । एताविन्द्रनोलभेदौ ॥

जाम्बवाभो जम्बूफलवर्णः । जीभूतप्रभः कालमेघवर्णः । इति महानीलभेदौ ॥

नन्दकः अवस्थानादेव द्रव्याणां वृद्धिकरः । चन्द्रकान्तः स द्विविधः—स्रवन्मध्यः यश्चन्द्रकिरणसंस्प (र्शः ? र्शात्) स्रवति मध्यात् ।

[चत्वारः स्फटिकभेदाः]

शुद्धस्फटिकः मूलाटवर्णः शीतवृष्टिः सूर्यकान्तश्चेति मणयः ।

प्रतिपदपञ्चिका

एवमुत्पलवर्णः शिरीषपुष्पकोदकवर्णवंशरागशुकवक्त्राभ्रवर्णपुष्परागगोमूत्रकगोमेदकप्रभेदा दृष्टप्रकारा वैडूर्यजातिः ।

शुकवर्हवारि सैन्धवशिरोषकुसुमप्रभं वीताभम्[1] ।
मार्जारनयननैल्यं वंशच्छदकान्ति वैडूर्यम् ॥ इति ।

तथा इन्द्रनील-नीलावलीय-कलायपुष्पक-महानीलजाम्ब्वाभजीभूतप्रभ-नन्दक-स्रवन्मध्यभेदादष्टधैव इन्द्रनीलजातिः । तथा च—

बर्हिणचन्द्रवर्णभ्रमराभाः पक्वजंब्वाभाः ।
सूर्यांशुतापयोगात् कृच्छालोका महानीलाः ॥
मन्दरमथनायासितवासुकिजविषोद्भवा मरकतस्य ।
प्रथमोत्पत्तिः केचिदुरगाण्डजाति जगुः ।
गरुडच्छदप्रकाशं कदलीदलवंशपत्रवर्णं वा ॥
परिपक्वकलमकणिशानुकारि वा मरतकं गदितम् ॥

श्रीमूला

चतुर्विधां स्फटिकजातिमाह—शुद्धेत्यादि । शुद्धस्फटिकः अत्यन्तशुक्लः, मूलाटवर्णः उद्धृतस्नेहदधिच्छायः, शीतवृष्टिः चन्द्रकान्तः यश्चन्द्रकिरणस्पर्शे द्रवति । सूर्यकान्तः यः सूर्यकरसम्पर्केऽग्निं वमति । चशब्दः समुच्चये । इति मणयः मणिभेदाः ।

आयश्चात्राचार्यैरुदाहृताः—

"शशरुधिरजपाबन्धूकसन्निभाः पारिजातपुष्पाभाः ।
तरुणतरणित्विषो वा त एव खलु पद्मरागाः स्युः ॥
शुकवर्हवारिसैन्धवशिरीषकुसुमप्रभं हरिद्राभम् ।
मार्जारनयननैल्यं वशंच्छदकान्ति वैडूर्यम् ॥
वर्हिणचन्द्रकवर्णा भ्रमराभाः पक्वजम्ब्वाभाः ।
सूर्यांशुतापयोगात् कृच्छालोका महानीलाः ॥
मन्दरमथनायासितवासुकिजविषोद्भवा मरतकस्य ।
प्रथमोत्पत्तिः कथिता केचिद् भुजगाण्डजेति जगुः ॥
गरुडच्छदप्रकाशं कदलीदलवंशपत्रवर्णं वा ।
परिपक्वकलमकणिशानुकारि वा मरतकं गदितम् ॥" इति ।

---

१. पोता ।—पा०

श्रीमूला

केचित् पुन: सौगन्धिकशब्दस्य माणिक्यपर्यायतां वदन्त: सौगन्धिक इति वैदूर्याधिकारवद् माणिक्याधिकारस्तस्य प्रभेदा: पद्मरागादयश्चत्वार इति, उत्पलवर्णादयो नीलावलीयान्ता वैदूर्यस्य नव प्रभेदा इति। इन्द्रनील इत्यधिकार: कलायपुष्पकादय: स्रवन्मध्यान्तास्तस्य षट् प्रभेदा इति, शुद्धस्फटिकादयश्चत्वार: स्फटिकप्रभेदा इति च व्याचक्षत इत्याह स्वामी।

चाणक्यटीका

य: स्रव: स्रवन्नपि शीतं जनयति स शीतवृष्टि:। य: सूर्यकिरणसंस्पर्शाद् अग्निमुद्वमति स सूर्यकान्त:। इति मणिभेदा:॥

प्रतिपदपञ्चिका

एवं शुद्धस्फटिकमूलाटिवर्णशीतवृष्टिसूर्यकान्तभेदाच्चतुर्धा स्फटिकजातिरिति केचित्। अपरे तु सौगन्धिक इति माणिक्यजातिपर्यायमाचक्षाणा: तं लक्षीकृत्य पद्मरागानवद्यरागपारिजातपुष्पबालसूर्यकभेदाच्चतुर्विधां माणिक्यजातिं ब्रुवते। तथा नीलावलीयं वैडूर्यजात्यन्तर्गतं व्याचक्षाणा नव प्रभेदां वैडूर्यजातिं ब्रुवते। तथेन्द्रनीलमपि तज्जातीयपर्यायमावेदयन्त: कलायपुष्पकादिस्रावन्मध्यान्ता: षड्विधेन्द्रनीलेजातिरिति। स्फटिकस्तु तेषामपि चतुर्विध एव। त्रयोविंशतिस्समस्ता जात्यमणिजातिरिति। तत्र मलयसमुद्रान्तरं कोटि:। तत्रभव: कौट:। मलयस्यैवैकदेश: कर्णिवनमिति प्रतीतो माला, तस्यां भवो मालेय:। परसमुद्रे:सिंहलद्वीपे रोहणाभिधान:, तत्र भव: पारसमुद्रक: सौगन्धिको रक्तवर्णो मनाङ्नीलवर्ण इति केचित्।

अन्ये तु सौगन्धिक इति माणिक्यजात्यधिकारान्तस्य व्याख्या। पद्मानवद्यरागादि रागशब्द: प्रत्येकं पद्मं प्रतीतम्। अनवद्यं कुङ्कुमम्, पारिजातपुष्पक: पारिभद्रपुष्पवर्ण:, बालसूर्यक: अर्धोदितदिनकरारुण:। वैडूर्यं इत्यधिकार:। उत्पलवर्णो रक्तोत्पलच्छवि:, शिरीषपुष्पवर्णकम् उदकवर्ण: वैमल्यादपि भावितवर्ण: वंशरागो वंशपत्रवर्ण:, शुकपत्रवर्ण: शुकपिछाभ:, पुष्परागो हरिद्रापिञ्जर:। गोमूत्रको गोमूत्रवर्ण: गोमेदको रोचनरुचि:। नीलावलीयोऽत्यन्तनीलभ्रमराभ इति केचित्।

अन्ये तु शुक्लस्तरङ्गाकारनीलावली(य)बहुश इति इन्द्रनीलश्शिखिपिच्छकनिभ:। अपरे तु कलायपुष्पकादीनां जातिवाचकमधिकारमाचक्षते। कलायपुष्पक: कलायाख्यधान्यविशेषकुसुमाकार:। महानील: भ्रमराभ:। जाम्बवाभ: पक्वजंबूजीमूतप्रभो मेघवर्ण:, नन्दकोऽन्त: शुक्लो बहिर्नील:। स्रवन्मध्य: स्यन्दमानोदकाकारकिरण:।

शुद्धस्फटिक: नीलान्त:शुक्ल:, मूलाटिवर्ण: उद्धृतस्नेहदधिवर्ण: शीतवृष्टिश्चन्द्रकन्ति:, सूर्यकान्त: सूर्यमणिरिति।

[मणिगुणानां एकादशानां निरूपणम्]

षडश्रः चतुरश्रः वृत्तो वा, तीव्ररागः संस्थानवान् अच्छः स्निग्धः गुरुः अर्चिष्मान् अन्तर्गतप्रभः प्रभानुलेपी चेति मणिगुणाः ।

[सप्त मणिदोषाः]

मन्दरागप्रभः सशर्करः पुष्पच्छिद्रः खण्डो दुर्विद्धो लेखाकीर्णः इति दोषाः ।

श्रीमूला

अथैकादश मणिगुणानाह—षडश्र इति । षडश्रः षट्कोटिः, चतुरश्रश्चतुष्कोटिः, वृत्तः चारुपरिमण्डलः, तीव्ररागः अत्यन्तभास्वरः, संस्थानवान् भूषणप्रतिवापयोग्यावयवसन्निवेशः, अच्छः निर्मलः, स्निग्धः मसृणः, गुरुः भारवान्, अर्चिष्मान् दीप्तिमान्, अन्तर्गतप्रभः मध्यभागेऽपि प्रभातरलः, प्रभया स्वीयया सन्निकृष्टमनुलिम्पतीति प्रभानुलेपी, चेति समुच्चये ।

सप्त मणिदोषानाह—मन्देत्यादि । मन्दरागप्रभः मन्दरागो वर्णरहितः मन्दप्रभो द्युतिहीनः, सशर्करः पुलकितः, पुष्पच्छिद्रः बिन्दुगर्भः, खण्डः दीर्णः, दुर्विद्धः अस्थानविद्धः, लेखाकीर्णः राजियुक्तः, इति दोषाः । अत्र भट्टस्वामिना बार्हस्पत्यौ द्वौ श्लोकावुदाहृतौ—

"पुष्पच्छिद्रोऽथ दुर्विद्धः शर्करानुगतस्तथा ।
मन्दरागप्रभश्चैव जातिभेदाः प्रकीर्तिताः ॥
प्रान्तश्च वामवृत्तश्च वलितास्यः(क)शान्वितः ।
कृष्णिकश्च विशीर्णश्च न हि शास्त्रे प्रशस्यते ॥" इति ।

चाणक्यटीका

तीव्ररागः उज्ज्वलवर्णः । संस्थानवान् अवक्रादिसंस्थानः नार्बुदमिव[1] कस्मिश्चित् पार्श्वे निर्गत (म ?) स्थानः । अ (न्त ? च्छः) अकलुषः । स्निग्धः अपरुषः । अन्तर्गतप्रभः यस्यान्तर्गतं प्रतिविम्बमिव दृश्यते । प्रभानुलेपी प्रभासंसक्तं द्रव्यान्तरं वा अवलिम्पति ! इति साधारणा मणिगुणाः ॥

सशकरः सपाषाणः । पुष्पच्छिद्रः पुष्पाकारैः छिद्रैः युक्तः घुणजग्धाकार इत्यर्थः । (लेखाकीर्णः) लेखाकीर्णः राजिभिः व्याप्तः । इति साधारणा दोषाः ॥

प्रतिपदपञ्चिका

सम्प्रत्येकादशमणिगुणानाह—षडश्र इत्यादि, षडश्रः षट्कोटिः, तद्वच्चतुरस्रः वृत्तं प्रतीतम् तीव्ररागोऽतिभास्वरः, संस्थानवानाभरणयोजनयोग्यः संस्थानः, अच्छः अतिनिर्मलः, स्निग्धः स्पर्शसुखः गुरुकः भूरिकः[2] । अर्चिष्मान् श्रीमान्, अन्तर्गतप्रभः मध्येऽप्यत्तिभास्वरप्रभः । भिद्यमानोऽप्यभिन्नच्छाय इत्यपरे । प्रभानुलेपी स्वतेजोरञ्जितापाश्रयः[3] ।

---

१. अर्बुदोऽस्त्रियां मांसकीलाह्वे रोगभेदे इति केशवस्वामी ।

२. मारिकः—पा० । ३. स्वतेजसा—पा०

[वर्णभेदेन भिन्नाः अष्टादश मणिभेदाः अति-
रिक्तानां अप्रशस्तत्वं च]

विमलकः सस्यकः अञ्जनमूलकः पित्तकः सुलभकः लोहितकः अमृतांशुकः ज्योतीरसकः मैलेयकः आहिच्छत्रकः कूर्पः प्रतिकूर्पः सुगन्धिकूर्पः क्षीरपकः शुक्तिचूर्णकः शिलाप्रवालकः पुलकः शुक्रपुलकः इत्यन्तरजातयः। शेषाः काचमणयः ॥

श्रीमूला

अथावान्तरजातिमणीनाह—विमलक इति। विमलकः श्वेतहरितः, सस्यको नीलः अञ्जनमूलकः नीलश्यामः, पित्तको गोपित्तवर्णः, सुलभकः शुक्लः, लोहिताक्षः पर्यन्तरक्तः कृष्णमध्यः, मृगाश्मकः सितासितः ज्योतीरसकः शुक्ललोहितः, मैलेयकः हिङ्गुलकच्छायः, आहिच्छत्रकः मन्दरागः, कूर्पः शर्करिलः, प्रतिकूर्पः सिक्थकरुचिः, सुगन्धिकूर्पः मुद्गवर्णः, क्षीरपको दुग्धवर्णः, शुक्तिचूर्णको नेकवर्णः, शिलाप्रवालकः प्रवालवर्णः, पुलकः कृष्णगर्भः, शुक्रपुलकः शुक्लगर्भः, इत्यन्तरजातयः अनेन प्रकारेणाष्टादशावान्तरजातिमणयो बोद्धव्याः। त एते प्रशस्ताः।

अप्रशस्तानाह—शेषा इति। शेषाः उक्तेभ्योऽन्ये, काचमणयः अधममणयः। अत्र सङ्ग्रहश्लोकं पठन्ति—

"पञ्चविंशतिभेदानां गुणास्त्वेकादश स्मृताः।
सप्त दोषा मणीनां तु दशाष्टौ च विजातयः॥" इति।

चाणक्यटीका

विमलको विमलाञ्जनवर्णः। नालिकेरसवर्णः सस्य[1] (ज ? कः)। अञ्जनपर्वतजो मूलदेशे नीलः उपरिष्टाच्च शुक्लः अञ्जननीलकः। पित्तवर्णः पित्तकः। सुलभकः शुद्धस्फटिकः। लोहिताक्षः सुलभः इति रक्तवर्णः। मृताश्मको[2] घनप्रलेपवर्णः। ज्योतीरसकः कोण्डावत्याप्रदेशभवः। मलयपर्वतभवो मालेयकः। कोण्डावत्या एकदेशभवः आहिच्छत्रकः। कूर्पः सैन्धववर्णः। प्रतिकूर्पस्तद्वर्ण इव। सुकुमारस्तु सुगन्धिकूर्पः सुगन्धिपाषाणाकृतिवर्णः। क्षीरवकः क्षीरवर्णः। हस्तिचूर्णको हस्तिछव्याकारः। शिलाप्रवालको रक्तवर्णः। पुलको (रुञ्ज ?) अञ्जनक्षौद्रवर्णः। शुक्लपुलकः शुक्लः एते पूर्वेभ्यो न्यूनत्वात् काचमणिभ्यश्चोत्कृष्टत्वाद् अन्तरजातयो मध्यगुणा इत्यर्थः॥

---

१. सस्येन परिजातः सस्यको मणिः आकार शुद्धः इति काशिका।

२. अमृताश्मक इति स्यात् अनोश्मायम् (५।५।९४) इति सूत्रे अमृताश्मेति काशिका। अमृतांशुक इति महिशूरमुद्रितपाठः। मृताश्मकः पा०

[वज्रमणेः आकरप्रदेशाः उत्पत्ति-
स्थानानि च]

सभाराष्ट्रकं मध्यमराष्ट्रकं काश्मक(स्तीर)राष्ट्रकं श्रीकटनकं मणिमन्तकं

चाणक्यटीका

(शेषाः) काचमणय इति यथोक्त मणिरागप्रभानुकारिण इत्यर्थः । अन्यस्त्वाह—मणिरागाश्ममणय इति । काचशब्दोऽपिमाया (या) मपि दृष्टः "शरावमग्निष्ठमिति काचमिति" (अधि० २. अध्या० १४) ॥

प्रतिपदपञ्चिका

एवं गुणानभिधाय सप्त मणिदोषानाह—मन्दरागप्रभ इत्यादि ।

मन्दशब्दः प्रत्येकम्, मन्दरागो वर्णरहितः, मन्दप्रभो द्युतिरहितः, सशर्करः पुलकितः, पुष्पच्छिद्रो विन्दुच्छिद्रः । अन्ये तु पुष्पच्छिद्र इति द्वयं पठन्तः पुष्प (स) बिन्दुच्छिद्रं सरन्ध्रमाहुः । तेषामष्टौ दोषाः, खण्डः कीर्णैकदेशः दुर्विद्धो दुर्देशविद्धः, लेखाकीर्णो राजिजमानीति ।

बार्हस्पत्यौ आत्र श्लोकौ भवतः—

पुष्पच्छिद्रोऽथ दुर्विद्धः शर्करानुगतस्तथा ।
मन्दरागप्रभश्चैव जातिभेदाः प्रकीर्तिताः ॥
प्रान्तश्च वामवृत्तश्च वलितास्यकशान्वितः ।
कृष्णीकश्च विशीर्णश्च न हि शास्त्रे प्रशस्यते ॥ इति ।

अष्टादशप्रकारान्तरजातिमणीनीह—विमलक इत्यादि ।

विमलकः[१] श्वेतहरितः, सस्यको नीलः अञ्जनमूलको नीलश्यामः, पित्तको गोपित्ताभः, सुलभकः शुक्लः, लोहितकः पर्यन्ते रक्तः मध्ये कृष्णः, अमृगाश्मकस्सितासितः, ज्योतीरसकः शुक्ललोहितः, मैलेयको हिङ्गुलकच्छविः । आहिच्छत्रको मन्दरागः । कूर्पः शर्कराकीर्णः, पूतिकूर्पस्सिक्थकच्छायः, मधूच्छिष्टच्छाय इत्यन्ये । सुगन्धिकूर्पो मुद्गवर्णः, क्षीरवको दुग्धधवलः । शुक्तिचूर्णकोऽनेकवर्णः, शिलाप्रवालकः प्रवालवर्णः, पुलकः कृष्णगर्भः शुक्रपुलकः शुक्लान्तर इत्यन्यतरजातयः ।

पूर्वोक्तास्तूत्तमाः वक्ष्यमाणाः काचमणयोऽधमा इति, तदाह—शेषाः काचमणय इति, काचो धातुद्रव्यं येन स्नेहसुरादिभाण्डानि क्रियन्ते । तन्मया मणयो काचमणयो सदा ?गाः काचमणय इत्यन्ये । तथा च—

"पंचविंशतिभेदानां गुणास्त्वेकादश स्मृताः ।
सप्त दोषा मणीनां तु दशाऽष्टौ च [२]विजायते ॥" इति ।

श्रीमूला

अथ वज्रमणेराकरयोनिवर्णगुणदोषा वर्ण्यन्ते । तत्राकरानाह—सभेत्यादि ।

---

१. श्चोति—पा० २. विजातयः—पा०

इन्द्रवानकं च वज्रम् । खनिः स्रोतः प्रकीर्णकं च योनयः ।

[वज्रवर्णाः]

मार्जाराक्षकं च शिरीषपुष्पकं गोमूत्रकं गोमेदकं शुद्धस्फटिकं मूलाटीपुष्पकवर्णं मणिवर्णानामन्यतमवर्णमिति वज्रवर्णाः ।

श्रीमूला

वज्रं हीरः, सभाराष्ट्रकं, वैदर्भकं, मध्यमराष्ट्रकं, कोसलोत्पन्नं, कास्तीरराष्ट्रकं कास्तोरराष्ट्रजं, श्रीकटनकं श्रीकटनपर्वतभवं, मणिमन्तकम् उत्तरापथवर्तिमणिमन्तकाख्यपर्वतजम् इन्द्रवानकं कालिङ्गकं, चः समुच्चये । एवं सभाराष्ट्रादयो वज्रस्य षडाकरा उक्ताः । एतच्चोपलक्षणमन्यत्रापि वज्रस्योत्पत्तिदर्शनादिति ज्ञेयम् ।

वज्रस्य त्रिविधां योनिमाह—खनिरिति । खनिः खन्यमानो भूप्रदेशविशेषः, स्रोतः जलप्रवाहविशेषः, प्रकीर्णकं गजदन्तमूलादि ।

वज्रस्य वर्णानाह—मार्जारेत्यादि । मार्जाराक्षकं मार्जारनेत्रच्छायम् । शेषं व्याख्यातचरम् । मार्जारनेत्रादिपुष्पकान्तसवर्णत्वंप्रायिकत्वात् पृथगभिधाय विरलदर्शनं । मण्यन्तरसाधारणं वर्णान्तरमतिदिशति—मणिवर्णानामन्यतमवर्णमिति । इति वज्रवर्णाः ।

चाणक्यटीका

वज्ररत्नमाह—वैदर्भविषये वेण्णातटपार्श्वे जातं सभाराष्ट्रकम् । (तज्जु ? मध्य) म राष्ट्रकं कलिङ्गोद्भवं भोगवल्लीति देशभाषया । कास्तीरराष्ट्रकं शूर्पारकभूमिः । श्रीकटनकं काञ्चीदेशः, कङ्कादिषु पर्वत इत्येके । मणिमन्तकं (श ? क) र्कभूमिजम् । इन्द्रवानकं कालि (न्द्य ? ङ्गय) म् । इत्याकरतो वज्रम् ॥

खनिः—खन्यत इति । (सद्यः ?) प्रकीर्णकं वेण्वादि ।

मार्जाराक्षम् इत्यादि संज्ञयैवानु (ग ?) मितार्थम् । उक्तानां च मणिवर्णानाम्न्यतममणिवर्णमिति साधारणा वज्रवर्णाः ॥

प्रतिपदपञ्चिका

सम्प्रति वज्रस्याकरयोनिवर्णगुणदोषानाह—सभाराष्ट्रकमित्यादि, सभाराष्ट्रकं वैदर्भकं मध्यमराष्ट्रकं कोसलोद्भवं, काश्मीकर(श्मक)राष्ट्रकं [1]कोशीविषयजम् । श्रीकटनकं वेदोत्कटपर्वतजम् । मणिमन्तकं उत्तरापथे मणिमन्तकपर्वतजम्, इन्द्रवानकं कालिङ्गकम् उपलक्षणं चैतत् [2]अन्यत्रापि सम्भवात् । तथा च मगधकालिङ्गकशूर्पकजलदायसपौण्ड्रकार्बुदत्रिपुरमणिमन्तकसह्यविन्ध्याः । [3]काश्मकराष्ट्रक हिमवदावलन्त्यपदावेदोत्कटनिमिकोसलवैदर्भा जन्मभूमयः बहुधा निर्दिष्टाः वज्राणां [4]येषूत्पत्तिः स्समाम्नाता । तेषां त्रिविधां योनिमाह—

खनिरित्यादि, खल्प(न्य)त इति खनिः भूप्रदेशविशेषः स्रोतः खन्यतिरिक्तो

---

१. काश्ति—पा० । २. अन्यस्यापि—पा० ।

३. काशिकल्पराष्ट्रहिमवावप्यापहितो वेदोत्कट—पा० । ४. तेषूत्पत्तिः—पा० ।

[वज्रेषु उत्तमाः अधमाश्च]

स्थूलं स्निग्धं गुरु प्रहारसहं समकोटिकं भाजनलेखि तर्कुभ्रामि भ्राजिष्णु च प्रशस्तम् । नष्टकोणं निरश्रि पर्श्वापवृत्तं च अप्रशस्तम् ।

प्रतिपदपञ्चिका

जलप्रवाहविशेषः प्रकीर्णकं च पूर्ववत्[1] । वेणु शरभ वराह रजतदण्डमालकोलादि[2] ।

वर्णानाह—मार्जाराक्षं मार्जारनयनाभं शिरीषपुष्पकादयस्तु कृतव्याख्याः। ननु मणिवर्णनामन्यतमवर्णमित्यनेनैव तेषां गतत्त्वात् । तद्ग्रहणं प्रायस्तद्वर्णमिव वज्रं भवतीति ज्ञापनार्थम् ।

श्रीमूला

अष्टौ गुणानाह—स्थूलमिति । स्थूलादित्रिकमवगतार्थम् । प्रहारसहं शिलापुत्रकप्रहारेणाप्यभेद्यं, समकोटिकं समास्तुल्याः कोटयो यस्य तत्, भाजनलेखि सोदकमसृणकांस्यपात्रनिवेशितं वज्रं परिचाल्यमानं सत् पात्रे लेखोत्पादकम्, तर्कुभ्रामि तर्कुर्भ्रमियन्त्रं तद्वद् भ्रमणशीलम्, भ्राजिष्णु अतिमात्रदीप्तिकम्, चः समुच्चये, प्रशस्तम् उत्तमं वज्रम् । श्लोकाश्चात्र भवन्ति—

"तर्कुभ्रामि स्निग्धं समकोटि महद् गुरु प्रहारसहम् ।
तरति च भाजनलेखि प्रशस्ततमं वज्रमुद्दिष्टम् ॥
क्षिप्तमग्नौ च यद् वज्रं वर्णान्यत्वं न गच्छति ।
शाणे वा घृष्यमाणं च निकषे वा विरज्यते ॥
वृत्तिकैराहतं यच्च विपत्तिं नैव गच्छति ।
रागवर्णसमायुक्तं वह्नी रश्मिसमन्वितम् ॥
गुरुस्नेहयुतं चैव गुणैरेभिः समन्वितम् ।
एतद् विशिष्टं वज्राणां रत्नाधिपतिकीर्त्तितम् ॥
नष्टकोणं निरश्रीकं पार्श्वयातं च वर्जयेत् ॥" इति ।

अधमं त्रिविधमाह—नष्टेत्यादि । नष्टकोणं शिखरशून्यम् निरश्रि अश्रिरहितम् पार्श्वापवृत्तम् एकपार्श्वनिस्सृतम् । अन्ये तु दोषा यथोक्तगुणवैपरीत्यात्मानः स्वयमूहनीयाः । यदाहुः—

"विरूपान् मन्दरागांश्च निष्प्रभान् क्रूरदर्शनान् ।
दग्धांश्चोद्गारिणश्चैव वज्राञ्छत्रुषु निक्षिपेत् ॥" इति ।

इति वज्रनिरूपणम् ।

चाणक्यटीका

प्रहारसहं मुष्टिना हन्यमानमपि न भिद्यते । समकोटिकं समसन्निविष्टाग्रम् । भाजनलेखि यच्चाल्पाश्रयं तल्लिखति (तर्कुभ्रामि) तर्कुवद् भ्रमति भ्राम्यमाणम् ॥

---

१. पूर्ववद्रूपेण । २. दण्डमालादि—पा० ।

[प्रवालानां निरूपणम्]

प्रवालकं आलकन्दकं वैवर्णिकं च, रक्तं पद्मरागं च, करटं गर्भिणिकावर्जमिति ।

चाणक्यटीका

नष्टकोणं नष्टशिखरम् । निरश्रि वृत्तम् । पार्श्वापवृत्तम् । वेल्लितपार्श्वम् गुणाभावे तु दोषवत्तार्थोक्तैव ॥

प्रतिपदपञ्चिका

तथा अष्टौ वज्रगुणानाह—स्थूलमिति, तत्र स्थूलस्निग्धगुरुणि गतार्थानि, प्रहारसहं पुत्तिकादिः[1] प्रहारैरप्यभेद्यम् । समकोटिकं षडपि कोटयस्तुल्याः, यस्य भाजने लेख भूषणादौ गाढमपि निबद्धं स्तोककालाच्छिथिलीभवति । सोदके पाकस्य पात्रे निक्षिप्तं प्रचाल्यमानं भाजनं लिखतिलेखां जनयति । तत्क्वयात्कभूभिमिति[2], अभ्रमवदपि भ्रमदिवाभाति । आत्मगतं तमन्तिपरे । भ्राजिष्णु दीप्तिमत्, तथा च ।

तत्कुंभ्रामि स्निग्धं समकोटिमहद् गुरु प्रहारसहं ।
तमत्ति च भाजनलेखि प्रशस्ततमं ॥ वज्रमुद्दिष्टम् ।
"क्षिप्तमग्नौ च यद्वज्रं वर्णान्यत्वं न गच्छति ।
शाणे वा घृष्यमाणं च निकशे वा विरज्यते ॥
वृत्तिकैराहतं यच्च विपत्तिं नैव गच्छति ।
रागवर्णसमायुक्तं वह्नीरश्मिसमन्वितम् ॥
छायायुक्तं सुसंस्थानं शुभाभिः कोटिभिवृतम् ।
गुरुस्नेहयुतं चैव गुणैरेभिस्समन्वितम् ॥
एतद्विशिष्टं वज्राणां रत्नाधिपतिकीर्तितम् ।
नष्टकोणं निरश्रीकं पार्श्वयातं च वर्जयेत् ॥" इति ।

त्रीन् दोषानाह—नष्टकोणमित्यादि, नष्टकोणं कुण्ठशिखरं, निरश्रीकं[3] अश्रीकरहितम् । पार्श्वापवृत्तं एकपार्श्वनिस्सृतमिति, येत्वन्ये दोषाः ते यथोक्तगुणवैपरीत्यात्तत्रैव अन्तर्भूताः द्रष्टव्याः । तथा च आगमः—

"विरूपान्मन्दरागांश्च निष्प्रभान् क्रूरदर्शनान् ।
दग्धांश्चूत्कारिणश्चैव[4] वज्रान् शत्रुषु निक्षिपेत् ॥" इति ।

श्रीमूला

अथ प्रवालमाह—प्रवालकमिति । प्रवालकम्, आलकन्दकम् अलकन्दो नाम बर्बरकूले समुद्रैकदेशस्तत्र भम्, वैवर्णिकं विवर्णो नाम यवनद्वीपे समुद्रैकदेशस्तत्रोत्पन्नं च, इति द्वियोनिकम् । रक्तं पद्मरागं चेति द्विवर्णकम् । करटगर्भिणिकावर्जमिति द्विदोषत्ववचनम्, करटं क्रिमिजग्धं गर्भिणिकां स्थूलमध्यं च वर्जयित्वान्यत् प्रवालक-

१. पुत्रिकादिः । —पा० २. तकुंभ्रामिति ।—पा०
३. निरसुकम् असुरहितम्—पा० ४. चोद्गारिणः —पा०

[सारवर्गेषु चन्दनसम्बन्धिजातिवर्ण-
गन्धानां निरूपणम्]

चन्दनं—सातनं रक्तं भूमिगन्धि; गोशीर्षकं कालताम्रं मत्स्यगन्धि; हरिचन्दनं शुकपत्रवर्णं आम्रगन्धि; तार्णसं च; ग्रामेरुकं रक्तं रक्तकालं वा बस्तमूत्रगन्धि; दैवसभेयं रक्तं पद्मगन्धि; जावकं च;

श्रीमूला

मुपादेयमित्यर्थः। इतिशब्दः समाप्तौ, रत्नपरीक्षा समाप्तेत्यर्थः।

इति प्रवालनिरूपणम्।

चाणक्यटीका

प्रवालकरत्नावयवमाह—अलत्सान्द्रदेशभवम् ? अलत्साद्रकं रक्तम्। विवल्गुके भवं वैवल्गुकम्, तत् पद्मरागसदृशरागम्। द्विविधं प्रवालकं करटगर्भिणीवर्जमिति क्रिमिजग्धमिव यत्, गर्भध्यातमिव यत्, इत्येतद्दोषद्वयवर्जं सर्वं प्रशस्तमिति। रत्नं व्याख्यातम्॥

प्रतिपदपञ्चिका

प्रवालकद्वियोनिं द्विवर्णं द्विदोषं चाह—प्रवालकमित्यादि, तत्रालकं द्वे बर्बरकूले समुद्रैकदेशे तत्र जातमालकन्द्रकं रक्तवर्णम्, यवनद्वीपे विवर्णोनाम समुद्रैकदेशः तत्र भवं वैवर्णिकम्। तत्पद्मरागं पद्मवर्णं चकाराद्रक्तं च भवति। करटं कृमिभिरुपभक्षितं गर्भिणीकामध्ये स्थूला यष्टिरिति, इति शब्दो रत्नपरीक्षापरिसमाप्त्यर्थः।

श्रीमूला

अथ सारेषु निरूपणीयेषु प्रथमं सारमुख्यं चन्दनमाह—चन्दनमिति। चन्दनम् अधिक्रियत इत्यर्थः। तस्य सातनादय उत्पत्तिभूमयः षोडश, रक्तादयो वर्णा नव, भूमिगन्धदयो गन्धाः षट्, लघुत्वादयो गुणा एकादश। त एतेऽभिधीयन्ते। सातनमिति। सातनं सातनदेशभवम्, रक्तं रक्तवर्णं, भूमिगन्धि नवसिक्तभूसमानगन्धम्। गोशीर्षकं तद्देशजम्, कालताम्रां कृष्णशोणम्, मत्स्यगन्धि मत्स्यतुल्यगन्धम्, रक्तकरवीरतुल्यगन्धीति स्वामी। हरिचन्दनं हरिदेशजं चन्दनम्, शुकपत्रवर्णम्, आम्रगन्धि चूतफलतुल्यगन्धि। तार्णसं च तृणसाख्यनदीनिकटभवं चन्दनं चकारात् शुकपत्रवर्णमाम्रगन्धि च ग्रामेरुकं ग्रामेरुप्रभम्, रक्तं रक्तकालं वा, वस्तमूत्रगन्धि अजमूत्रगन्धि, वस्तशब्दः कस्तूरीमृगवचन इत्यन्ये। दैवसभेयं देवसभायां भवम्, रक्तम्, पद्मगन्धि सातनादयस्त्रायोदश मलयैकदेशाः। जावकं च जावकदेशभवं च रक्तं पद्मगन्धि

चाणक्यटीका

सारमाह—सातनपर्वते जातं सातनं प्रथमवर्षाभिपिक्तभूमिसमानगन्धि। गोशीर्षाकृतिपर्वतोत्पन्नं गोशीर्षकं नाम। कालताम्रं व्यामिश्रवर्णम्। मत्स्यगन्ध्यपि सन्तापहरम्। हरिमण्डूकस्तदाकार पर्वते जातं हरिचन्दनं पक्वाम्रफलगन्धि। तृणसा

जोङ्गकं रक्तं रक्तकालं वा स्निग्धम्; तौरूपं च; मालेयं पाण्डुरक्तम्; कुचन्दनं कालवर्णं गोमूत्रगन्धि; कालपर्वतकं रुक्षमगुरुकालं रक्तं रक्तकालं वा; कालपर्वतकमनवद्यवर्णं वा; कोशकारपर्वतकं कालं कालचित्रं वा;

प्रतिपदपञ्चिका

एवं रत्नान्यभिधाय साराण्यभिधास्यन् सर्वसारप्रधानस्य चन्दनस्य जातिवर्ण-गन्धगुणानाह—चन्दनमित्यादि, चन्दनमित्यधिकारः। तत्र सातनादीनि षोडश क्षेत्रणि। भूमिगन्धादयः षड्गन्धाः। रक्तादयो नव वर्णाः। लाघवादयः एकादशगुणाः तानाह—सातनमिति।

तत्र सातनादयस्त्रयोदश मलयैकदेशः जापकादयस्त्रयःकामरूपेषु भवन्ति। सातनादीनि सातनं रक्तं विर्णतः भूमिगन्धि नवजलसिक्तं भूमिगन्धि गोशीर्षकं कालं-कालरूपं शुकपत्रवर्णं शुकपिच्छवर्णं आम्रगन्धि सहकारगन्धि तार्णसं च। शुकपत्रवर्ण माह—मात्र(नृ)गन्धि चेति, ग्रामेरुकं रक्तं वस्तमूत्रगन्धि, वस्तः छागः तन्मूत्रस्य हि परिणामे अतीव सौगन्ध्यं भवतीति तत्तुल्यगन्धि। अन्येतु कस्तूरिकामाचक्षते। दैव-

श्रीमूला

चेत्यनुषज्यते। जोङ्गकं, रक्तं रक्तकालं वा, स्निग्धं स्नेहगुणयुक्तं, गन्धान्तरानुवत्याऽत्रापि पद्मगन्धीति सम्बध्यते। तौरूपं च, जोङ्गकमिव रक्तं रक्तकालं वा स्निग्धं पद्मगन्धि चेत्यर्थः। जावकादित्रिकं कामरूपजं बोद्धव्यम्। मालेयम्, पाण्डुरक्तं पूर्ववत् पद्मगन्धि च। एवञ्च दैवसभेयादिमालेयकान्तपञ्चकस्य पद्मगन्धित्वमुक्तं भवति। कुचन्दनम्, कालवर्णकं कृष्णम्, गोमूत्रगन्धि गोमूत्रं हि परिणामे सुगन्धि, अपरे तु गोमूत्रं नीलोत्पलमिति सम्प्रदाय इत्याहुः। कालपर्वतकं तद्देशभवम्, रुक्षं खरम्, अगुरुकालम् अगुरुवत् कृष्णम्, रक्तम्, रक्तकालं वा कृष्णारुणं वा। पूर्वोक्तन्ययेनात्र गोमूत्रगन्धीति सम्बन्धनीयम्। केषुचिदादर्शेषु 'कुचन्दनं कालरूक्षमगुरुकालं रक्तं रक्तकालं वा कालपर्वतकमनवद्यवर्णं वा' इति पाठो दृश्यते। स गन्धानुक्तेरशुद्धः प्रतिभाति। तत्रा'नवद्यवर्णमि'त्यस्य कुङ्कुमवर्णमित्यर्थः, शेषं तु सुबोधम्। कोशकारपर्वतकं

चाणक्यटीका

नाम नदी, तत्तटपर्वते जातं तार्णसं हरिचन्दनगुणमेव। ग्रामेरुकं ग्रामेरुपर्वते जातम्। दैवसभेयमिति मलयदर्दुरदेवसभाश्रयः पर्वतः पाण्ड्यविषये सहावस्थितः, देवसभे जातं दैवसभेयम्। जावकं च जावकपर्वते जातम्। तत्सदृशमेव जोङ्गकं कामरूपे जोङ्गपर्वते जातं (स्निग्धच्छेदकः ?) पद्मगन्धेवाधिकारात्। कौङ्कुमकं च कुङ्कुमपर्वत (ज) मपि। एवमेव मालेयकं मालपर्वतभवं पाण्डुरक्तमिति॥

कालं कुचन्दनमिति मालेयकमेवेदमगन्धं गन्धस्यानभिधानाद् रुक्षत्वात् कुचन्दनं कुत्सितचन्दनम्। कालवर्वतकं कालपवर्तजं अन (व) द्यवर्णं वा, (गी ? ाक) लं वेति वा शब्दात्। कोशकारपर्वकं कोशकाराण्डाकारपर्वतजं कालचित्रं

शीतोदकीयं पद्माभं कालस्निग्धं वा; नागपर्वतकं रूक्षं शैवलवर्णं वा; शाकलं कपिलमिति ॥

[चन्दनगुणाः]

लघु स्निग्धम् अश्यानं सर्पिस्स्नेहलेपि गन्धसुखं त्वगनुसारि अनुल्बणं अविरागि उष्णसहं दाहग्राहि सुखस्पर्शनमिति चन्दनगुणाः ।

श्रीमूला

तदाख्यदेशभवम्, कालं कालचित्रं वा कृष्णकर्वुरं वा । शीतोदकीयं शीतोदकदेशभवम्, पद्माभं पद्मवर्णम्, कालस्निग्धं वा । नागपर्वतकं तदाख्यदेशजम्, रूक्षं खरम्, शैवलवर्णं जल नीलीवर्णम् । शाकलं शाकलदेशोद्भवं, कपिलं कडारवर्णम् । इह कालपर्वतकादीनां शाकलान्तानां कुचन्दनवद् गोमूत्रगन्धित्वं द्रष्टव्यम् ।

चाणक्यटीका

काललेखाचित्रम् । शीतोदका नदी, तत्समीपपर्वतजं शीतोदकीयम् । नागाकारपर्वतजं नागपर्वतकं शैवलवर्णं वा, कालं वेति (वा) शब्दात् । शकलपर्वतजं शाकलम् । षड्भिश्चन्दनैर्निर्गन्धैः सह षोडश चन्दनानि भवन्ति ॥

प्रतिपदपञ्चिका

सभेयं रक्तं पद्मगन्धि, जावकं च कामरूपजं रक्तं पद्मरागं[1] च जोङ्गकं कामरूपजमेव । तद्रक्तं भवति । रक्तकालं वा स्निग्धं स्नेहवत् । गन्धतस्तु पद्मगन्ध्येव [2]तौरूपं च कामरूपजमेव तत् जोङ्गकवद्रक्तम्[3] । रक्तकालं वा स्निग्धं पद्मगन्ध्येव मालेयं पाण्डुरक्तम् पद्मगन्ध्येव एवं च सति दैवसभेयादीनि मालेयान्तानि पञ्च पद्मगन्धीनि भवन्ति । कुचन्दनं कालवर्णकं गोमूत्रगन्धि गोमूत्रं हि परिणामे अतीव सुगन्धि भवति । गोमूत्रं नीलोत्पलमित्यपरेषां च सम्प्रदायः कालवर्वतकं रूक्षं अगुरुकालं रक्तं रक्तकालं वा । कालपर्वतकं कालं कालचित्रं वा कृष्णशबलं शीतोदकीयं पद्मरागं पद्मवर्णं कालस्निग्धं वा कृष्णस्निग्धं नागपर्वतकं रूक्षं शैवलवर्णं शाकलं बहुवर्णम् ।

श्रीमूला

एवं जातिवर्णगन्धा उक्ताः । गुणानाह—लघ्वित्यादि । लघु अभारिकम्, स्निग्धं मसृणम्, अश्यानं चिरशोषि, सर्पिःस्नेहलेपि घृतमिव देहं स्नेहेन लिम्पति यत् तथाभूतम्, गन्धसुखं गन्धेन मोदजनकं त्वगनुसारि त्वचमनुप्रविश्य सुखकरम्, अनुल्बणं सूक्ष्मत्वादस्फुटम्, अविरागि द्रव्यान्तरमिश्रणे स्वेदाद्युपघाते चाविकृतवर्ण-गन्धम्, उष्णसहं स्वलिप्ताङ्गस्योष्णसंवेदनप्रतिबन्धि, दाहग्राहि सन्तापहरम्, सुखस्पर्शनं स्पर्शो नवनीतवत् सुखावहम् । इति चन्दनगुणाः अनेन प्रकारेणैकादश चन्दनस्य

---

१. पद्मगन्धं च—पा० । २. ता—पा० । ३. छ—पा० ।

[अगुरुजातिवर्णगन्धानां निरूपणम्]

अगुरुः—जोङ्गकं कालं कालचित्रं मण्डलचित्रं वा । श्यामं दोङ्गकम् । पारसमुद्रकं चित्ररूपम् । उशीरगन्धि नवमालिकागन्धि वेति ।

श्रीमूला

गुणा विज्ञेयाः । अत्र संग्रहश्लोकं पठन्ति—

"षड् गन्धा नवधा वर्णो गुणाश्चैकादश स्मृताः ।
चन्दनानां समासेन षोडशोत्पत्तिभूमयः ॥" इति ।

चाणक्यटीका

लघु लिप्तगात्रस्य लाघवत् । अश्यानम् नाशु शुष्यति । सर्पिः स्नेहानुलेपि सर्पिः स्नेहवदनुलेप्तुं शीलमस्येति सर्पिः । स्नेहानुलेपनप्रख्यं सुकुमारस्पर्शत्वात् सर्वगात्रानुसर्पणाद्वा न तैलस्नेहवदिति सर्पिग्रंहणम् । गन्धसुखं हृद्यगन्धत्वात् । त्वगनुसारि रोमकूपैस्त्वगन्तः प्रवेशि । अनुल्वणं सममेव स्थितं नान्यस्मिन् प्रदेशे बहुलम् अन्यस्मिन्न (च्छं ? ल्पम्) । अविरागि नातपेन विक्रियते । येनानुलिप्तः पश्चादुष्णेन न पीड्यते तद् उष्णसहम् । यदुन्मत्तचारितापशमनं तद् दाहग्राहि । येनानुलिप्य स्नातस्य स्पर्शमात्रेणैव सुखमुत्पद्यते सुखस्पर्शम् । इत्येते यथासम्भवं साधारणाश्चन्दनगुणाः ॥

प्रतिपदपञ्चिका

एवं जातिवर्णगन्धानभिधाय गुणानाह—लघु स्निग्धमित्यादि, लघु शरीरलग्नमभारिकं स्निग्धं अपरुषं अश्यानमचिरशोषि सर्वं स्नेहलेपि—यच्छरीरं स्नेहेनानुलिम्पति न मृत्तिकेव त्वचं सङ्कोचयति । गन्धसुगन्धेन सुखावहं त्वगनुसारि रोमकूपाननुप्रविश्य त्वगन्तराह्लादि । अनुल्वणं सूक्ष्मत्वादनुद्धतम्, अविरागिवर्णगन्धयोरविकारिद्रव्यान्तरमिश्रीभावे स्वेदाद्युपघाते चोष्णसहं[1] तदा लिप्तस्य हि तीव्रतापेपि बाधाभावात् । दाहग्राहि परितापहारि सुखस्पर्शं सूक्ष्मत्वात् नवनीतवत् सुखावहं गुणचूर्णवदपरुपस्पर्शमिति । तथा च—

"षड्गन्धा नवधा वर्णा गुणाश्चैकादश स्मृताः ।
चन्दनानां समासेन षोडशोत्पत्तिभूमयः । इति ।

श्रीमूला

अथाऽगुरुजातिवर्णगन्धगुणानाह—अगुर्वित्यादि । अगुर्वित्याधिकारः । जोङ्गकं तदाख्यमगुरु त्रिविधम्, कालं कृष्णम्, कालचित्रम् कृष्णगौररेखामिश्रम्, मण्डलचित्रं कृष्णगौरबिन्दुचित्रमिति स्वामी, वाशब्दः समुच्चये । दोङ्गकं तदाख्यम्, श्यामम् । जोंगकदोंगके कामरूपभवे । पारसमुद्रकं सिंहलद्वीपोत्पन्नम्, चित्ररूपं नानावर्णम् । गन्धमाह—उशीरगन्धि, नवमालिकागन्धि वेति । गन्धद्वैविध्यमनेनोक्तम् ।

---

१. सम्भवः ।

[अगुरुगुणाः]

गुरु स्निग्धं पेशलगन्धि निर्हारि अग्निसहं असंप्लुतधूमं समगन्धं विमर्दसहमिति अगुरुगुणाः ।

चाणक्यटीका

अगुरुसारमाह—(जोङ्गकम्) कालचित्रं काललेखाभिश्चित्रम्, मण्डलैर्वा विवर्णम् । वङ्गदेशभवं वाङ्गकं समतभवं (?) श्यामम् । पारेसमुद्रकं यवनादि-द्वीपान्तरजं चित्ररूपमनेकवर्णं गुरुमत्प्रमाणादगुर्वन्तरादित्यर्थः ॥

प्रतिपदपञ्चिका

अगुरुजातवर्णगन्धगुणानाह—जोङ्गकमित्यादि ।

जोङ्गकं त्रिविधं कालं कृष्णं कालचित्रं कृष्णं गौरलेखामिश्रं मण्डलचित्रं कृष्णं गौरविन्दुचित्रं जोङ्गकम् श्यामं वर्णतस्तदुभयं कामरूपजंपारसमुद्रकं सिंहलद्वीपजं चित्ररूपं अनेकवर्णम् । गन्धतस्तु द्विविधं उशीरगन्धि नवमालिकागन्धि चेति ।

श्रीमूला

अगुरुणो जातिवर्णगन्धानुक्त्वा । गुणानाह—गुर्विति । गुरु भारिकं, स्निग्धम् अपरुषम्, पेशलगन्धि हृद्यगन्धम्, निर्हारि दूरप्रसृत्वरगन्धम्, अग्निसहम् अग्निना क्षिप्रं न दह्यते, असंप्लुतधूमम् अव्याकुलधूमम्, समगन्धं दह्यमानमादिमध्यान्तेष्वेकरूप-गन्धम्, विमर्दसहं वस्त्रादिनिर्मार्जनेऽप्यक्षीयमाणगन्धमित्यर्थः । इति अगुरुगुणाः । तदेवम्—

"उत्पत्तिभूमयस्तिस्रः कृष्णो वर्णः प्रधानतः ।
द्वावेवागुरुणो गन्धौ गुणास्तस्याष्ट कीर्तिताः ॥"

इति संग्रहश्लोकः ।

चाणक्यटीका

पेशलगन्धं मनोज्ञगन्धम् । निर्हारि दूरोपनिपातिगन्धं स्थिरगन्धमित्यर्थः । अग्निसहं चिराद् दह्यते, नाशु भस्मसाद् भवति । असम्प्लुतधूमम् अवस्थितधूमम् बहुलधूमम् (समगन्धम्) आदिमध्यावसानेषु सदृशगन्धम् । विमर्दसहं द्रव्यान्तरसङ्गमे कालान्तरे च स्वरूपापरित्यागात् ॥

प्रतिपदपञ्चिका

अष्टौ गुणानाह[1] गुर्वित्यादि, गुरु भारिकं स्निग्धं स्पर्शे पेशलं बहुलगन्धं निर्हारि दूरनिर्गतस्थायिगन्धमग्निसहं चिराद्दह्यते । असम्प्लुतधूममविच्छिन्नधूमकम् समगन्धि दह्यमादिमाध्यावसानेषु द्रव्यान्तरयोजितं वा समगन्धं विमर्दसहं निवसन-प्रावरणाद्युपभोगैरप्यक्षीयमाणमिति । तथा च "उत्पत्तिभूमयस्तिस्राः कृष्णो वर्णः प्रधानतः । द्वावेवागुरुणो गन्धौ गुणास्तस्याष्ट कीर्तिताः)" इति ।

---

१. अगुरुगुणानाह—पा०।

[देशवर्णगन्धादिभेदेन भिन्नानां तैलपर्णिका-
भिधानगन्धवृक्षाणां भेदाः]

तैलपर्णिकम्—अशोकग्रामिकं मांसवर्णं पद्मगन्धि; जोङ्गकं रक्तपीतकमुत्पलगन्धि गोमूत्रगन्धि वा; ग्रामेरुकं स्निग्धं गोमूत्रगन्धि; सौवर्णकुडयकं रक्तपीतं मातुलुङ्गगन्धि; पूर्णकद्वीपकं पद्मगन्धि नवनीतगन्धि चेति।

[वर्णगन्धदेशादिभेदेन भिन्नानां भद्रश्रीया-
भिधानचन्दनविशेषाणां भेदाः]

भद्रश्रीयम्—पारलौहित्यकं जातीवर्णम्; आन्तरवत्यं उशीरवर्णम् उभयं कुष्ठगन्धि चेति।

श्रीमूला

अथ तैलपर्णिकस्य योन्यादिकमाह—तैलपर्णिकमित्यादि। तैलपर्णिकमित्यधिकारः। अशोकग्रामिकम् अशोकग्रामे कामरूपवर्तिनि भवम् मांसवर्णं हरिणमांसपेशीवर्णमिति स्वामी, पद्मगन्धि। जोङ्गकं कामरूपस्थे जोङ्गाख्ये प्रदेशे भवम् रक्तपीतकं मनश्शिलावर्णम्, उत्पलगन्धि गोमूत्रगन्धि वा भवति। ग्रामेरुकं कामरूपवर्तिनि ग्रामेरुसंज्ञे ग्रामे भवम्, स्निग्धं, गोमूत्रगन्धि, जोङ्गकवद् रक्तपीतवर्णम्। सौवर्णकुड्यकं सुवर्णकुड्यो नाम ग्रामः कामरूपगः तत्र जातं रक्तपीतम्, मातुलुङ्गगन्धि। पूर्णकद्वीपकं पूर्णकद्वीपः कामरूपेष्वेव तत्र भवम्, पद्मगन्धि, नवनीतगन्धि वा, वर्णतस्तु रक्तपीतम्।

भद्रश्रीयस्य योन्यादिकमाह—भद्रश्रीयमित्यादि। भद्रश्रीयं चन्दनविशेषः। भद्रश्रीयपदार्थे—

'केचित् कर्पूरमित्याहुस्तक्कोलमिति चापरे।
श्रीवासकं तथा केचित् केचिल्लोहितचन्दनम्॥'

इति विप्रतिपत्तयः स्वामिनोक्ताः। पारलौहित्यकं कामरूपे लौहित्याख्यनदपारभवं, जातीवर्णं जातीकुसुमवर्णम्। आन्तरवत्यं कामरूपेष्वेवान्तरवत्याख्यनदीतीरे जातम्, उशीरवर्णं लामज्जच्छायम्। उभयं पारलौहित्यकादिद्विकम्, कुष्ठगन्धि च पारिभाव्याख्यौषधगन्धि च। इति शब्दः भद्रश्रीयनिरूपणसमाप्तौ।

चाणक्यटीका

सारान्तरमाह—तैलपर्णिकं नाम चन्दनाकारापरद्रव्यम्। तत् पञ्चविधम्—अशोकग्रामे भवम् अशोकग्रामीयम्। जोङ्गकं कामरूपजम्। ग्रामेरुकं ग्रामेरुदेशभवम्। सौवर्णकुड्यकं सुवर्णकुड्यदेशभवम्। सुवर्णद्वीपकं च॥

भद्रश्रीयं जातिनाम गन्धद्रव्यस्येदम्। पारेलौहित्यकं लोहित्यपारे भवम्। जातिवर्णकं जातिपुष्पवर्णम्। आन्तरवन्त्यं अवन्तीनामन्तरले जातम्॥

कालेयकाभिधानकाष्ठविशेषस्य देशादिभेदाः
तैलपर्णिकादीनां गुणाश्च]

कालेयकः—स्वर्णभूमिजः; स्निग्धपीतकः; औत्तरपर्वतको रक्तपीतक इति साराः। पिण्डक्वाथधूमसहम् अविरागि योगानुविधायि च। चन्दनागुरुवच्च तेषां गुणाः।

प्रतिपदपञ्चिका

तैलर्वाणिकस्य योनिवर्णगन्धगुणानाह-तैलर्वाणिकमित्यादि, तैलर्वाणिकं ग्रन्थिवर्णिकं। अशोकग्रामः कामरूपेषु तत्रभवं अशोकग्रामीयं, हरिणमांसपेशिवर्णं पद्मगन्धि-जोङ्गकं कामरूपेष्वेवान्तरवत्यभिधानं तत्र भवं जोङ्गकं। रक्तपीतं मनःशिलावर्णं उत्पलगन्धि गोमूत्रगन्धि वा ग्रामेरुकं कामरूपेष्वेव तत्र भवं ग्रामेरुकं स्निग्धं गोमूत्रगन्धि वर्णस्तु जोङ्गकवत्।

सौवर्णकुड्यकं कामरूपेष्वेव सुवर्णकुड्यः तत्र भवं रक्तपीतकं। मातुलुङ्गगन्धि। पूर्णकमपि कामरूपेष्वेव शेषमृजुभद्रश्रीयमाह-भद्रश्रीयमित्यादि, तत्र प्रति विप्रतिपत्तयो व्याख्यातॄणां—

केचित्कर्पूरमित्याहुः, तक्कोलमिति चापरे।
श्रीवासकं तथा केचित्केचिल्लोहितचन्दनमिति,

पारलौहित्यकम् कामरूपेष्वेवान्तरवत्यभिधाननदीकूलजम्।

श्रीमूला

कालेयकस्य योन्यादिकमाह।—कालेयक इति। कालेयको नाम काष्ठविशेषः, स स्वर्णभूमिजः सुवर्णभूमिर्भर्मदेशस्तत्रोत्पन्नः, स्निग्धपीतकः मसृणः पीतवर्णश्च। औत्तरपर्वतकः हैमवतः, रक्तपीतकः मनःशिलावर्णः। इति उक्तैः प्रकारैः, साराः चन्दनादिकालेयकान्ताः सारपदार्था निरूपिता इत्यर्थः।

अथ तैलपर्णिकादीनां त्रयाणां गुणमाह—पिण्डेत्यादि। पिण्डक्वाथधूमसहं पिण्डं पेषणादिना पिण्डीकरणं क्वाथम् अग्निना क्वथनं धूमं धूपनं च सहत इति तथाभूतं, पेषणक्वथनधूपनेष्वविसंवादिगन्धमित्यर्थः, अविरागि द्रव्यान्तरमिश्रणेन कालान्तरेण वा निर्विकारस्वभावम्, योगानुविधायि च गन्धयुक्त्यनुकूलं च। तैलपर्णिकादित्रिकं तु विशेष्यं गम्यम्। उक्ताः पिण्डसहत्वादयो न केवलं तैलपर्णिकादीनां गुणाः, किन्तु चन्दनागुरुवच्च तेषां गुणा भवन्तीत्याह—चन्दनागुरुवच्च तेषां गुणा इति। चन्दनवद् गुणाः एकादश लघुत्वादयः, अगुरुवद् गुणा अष्टौ गुरुत्वादयः।

इति सारनिरूपणम्।

[फल्गूनां मध्ये पञ्चदश चर्मजातयः]

कान्तनावकं प्रैयकं चौत्तरपर्वतकं चर्म। कान्तनावकं मयूरग्रीवाभं, प्रैयकं नीलपीतं श्वेतं लेखाचित्रं बिन्दुचित्रं; तदुभयमष्टांगुलायामम्।

चाणक्यटीका

कालेयको जात्या गन्धद्रव्यम्। स द्विविधः सुवर्णभूमिजः। औ (त्क ? त्त रपर्वतकः हैमवतः। इतिसाराः॥

पिष्टम्, अन्येन संसर्गं, सहत इति पिण्डसहम्। पिटकादिषु क्वाथं सहते वैवर्ण्यं न भजते। अन्येन युज्यमानं स्वगन्धं न जहाति। अविरागि स्नेहादिषु न वैवर्ण्यं भजते। योगानुविधायि सर्वद्रव्यसंसर्गानुगुणमित्यर्थः। तैलपर्णिकादीनामेते वैशेषिका गुणाः, साधारणास्तु चन्दनागुरुवदिति॥

प्रतिपदपञ्चिका

शेषमृजुकालेयकमाह-कालेयक इत्यादि, कालेयकः काष्ठविशेषः। स द्विविधः सुवर्णभूमिजः सुवर्णद्वीपोत्पन्नः स्निग्धपीतकः उत्तरपर्वतो हिमवान् तत्र भवः औत्तरपर्वतकः रक्तपीतक इति। सारा इतिशब्दः[1] प्रकारे, साराश्चन्दनादयः कालेयकपर्यन्ता व्याख्याता इति। तत्र तैलपर्णिकभद्रश्रीयकालेयकानां गुणानाह-पिण्डक्वाथधूमसहमित्यादि,

पिण्डसहं पिष्यमाणमपि संवादि क्वाथसहं[2] क्वाथ्यमानमपि कृतगन्धं धूमसहं। चिरं दह्यमानं तिष्ठति, अविरागि कालान्तरेण द्रव्यान्तरमिश्रितं वा न विरज्येत। चन्दनागुरुवदिति। त एव द्रव्यगुणाश्चैषां भवन्तीति। एवं रत्नानि

श्रीमूला

अथ फल्गुषु निरूपणीयेषु प्रथमं पञ्चदशप्रकारा चर्मजातिर्निरूप्यते-कान्तनावक-मित्यादिना इति चर्मजातय इत्यन्तेन। तत्रादौ प्रकारद्वयमुद्दिशति—कान्तनावक-मिति। कान्तनावकं तदाख्यदेशभवं, प्रैयकं च तदाख्यदेशभवं च औत्तरपर्वतकं हैमवतम्, चर्म। एवञ्च कान्तनावकप्रैयकाख्यौ हिमवत एवैकदेशौ बोद्धव्यौ। तत्र कान्तनावकम्, मयूरग्रीवाभमित्येकविधम्। प्रैयकं तु, नीलपीतं, श्वेतं, लेखाबिन्दुचित्रं लेखाभिः कृतवैचित्र्यं बिन्दुभिः कृतवैचित्र्यं चेति चतुर्विधम्। तदुभयं कान्तनावकं प्रैयकं च, अष्टाङ्गुलायामम्।

चाणक्यटीका

इदानीं फल्गुद्रव्याण्याह—कान्तनावे जातम्। प्रैयकञ्च[3] उत्तरपर्वतैकदेश (ज)—

---

१. तैलवर्णिक पा० -२. सम्पाति पा०

३. प्रियकोऽजिनयोनिर्हरिण इत्यमरः। तस्य तु वैडूर्यमयं प्रियकाजिनसंवृनम् महत मापाश्रयं भेज दावणः परमासमयम् (रामायणम्)

बिसी महाबिसी च द्वादशग्रामीये। अव्यक्तरूपा दुहिलि(त)का चित्रा वा बिसी, परुषा श्वेतप्राया महाबिसी; द्वादशाङ्गुलायाममुभयम्।

चाणक्यटीका

त्वाद् द्विविधं हैमवमूषि (कां ? क) चर्म। नीलकोटिश्वेतबिन्दुभिश्च चित्रम्। तदुभयमष्टाङ्गुलायामम्। तदनुरूपविस्तारमित्यर्थोक्तम् ॥

प्रतिपदपञ्चिका

सारांश्चाभिधाय फल्गून्याह-तत्रापि चर्मणां प्राधान्यात् पञ्चदशप्रकाराणि मूषिकादि चर्माण्याह। तानि च समुद्दिश्य यथोद्देशं स्वयमाचार्य एव व्याचष्टे-कान्तनावक मित्यादि,

कान्तनावकप्रैयके हिमवत्येकदेशजे औत्तरपर्वतकं हैमवतम् अधिकारश्चा· सर्वचर्मणाम्। तत्र कान्तनावकमेकप्रकारमेव। मयूरग्रीवाभम्। प्रैयकं चतुर्विध, नीलपीतकं श्वेतं लेखाचित्रं बिन्दुचित्रं च। तदुभयं कान्तनावकम् प्रैयकं चाष्टाङ्गुलायामं प्रमाणतः।

श्रीमूला

बिसीति। बिसी महाबिसी च इत्येते चर्मणी, द्वादशग्रामीये हिमालयस्थेषु द्वादशम्लेच्छग्रामेषु भवे। तत्र बिस्याः स्वरूपमाह—अव्यक्तेत्यादि। बिसी, अव्यक्तरूपा सरटविशेषवद् बहुवर्णप्रतिभासयोगादनिर्धारितैकवर्णा, दुहिलिका लोमशा, दुहिलितिकेति क्वापि पाठः, चित्रा वा, भवति। महाबिसी परुषा खरस्पर्शा, श्वेतप्राया धवलवर्णभूयिष्ठा। उभयं बिसी महाबिसीति द्वयम्, द्वादशाङ्गुलायामम्।

चाणक्यटीका

द्वादशग्रामीये। उत्तरापथे द्वादशग्रामाः तयोः प्रभवः। अव्यक्तरूपा न यथा (ल)क्ष्यमाणवर्णा दुहिलिका गृहगोधकाकारा। चित्रा वा नानावर्णा। द्विविधा अपि मूषिकाः ॥

प्रतिपदपञ्चिका

तथापि बिसी महाबिसी च द्वादशग्रामीये हिमवत्येव म्लेच्छादिवासभूता द्वादशग्रामाः तेषु च भवा द्वादशग्रामाः तेषु भवे द्वादशग्रामीये। द्वे चर्मणी तयो रूपमाह—अव्यक्तवर्णेति, सर्ववर्णोपेतत्वादपि भावितैककतरवर्णा दुहिलितिका वहुतररोमोपेता चित्रा वा शुक्ललेखाकीर्णा बिसिः। परुषा कर्कशस्पर्शा श्वेतप्राया वर्णान्तरव्यतिकरेऽपि बहुतरधवलवर्णा महाबिसी। तदुभयमपि बिसीमहाबिसीसंज्ञम्। द्वादशाङ्गुलायामं प्रमाणतः। हिमवदन्तर्गत एवारोहाभिधानो देशः। तत्र भवः।

श्यामिका कालिका कदली चन्द्रोत्तरा शाकुला चारोहजाः ।

कपिला बिन्दुचित्रा वा श्यामिका; कालिका कपिला कपोतवर्णा वा; तदुभयमष्टांगुलायामम् । परुषा कदलीहस्तायता ।

सैव चन्द्रचित्रा चन्द्रोत्तरा । कदलीत्रिभागा शाकुला कोठमण्डल-चित्रा कृतकर्णिकाऽजिनचित्रा चेति ।

श्रीमूला

आरोहाख्यहिमवत्प्रदेशभवान् श्यामिकाकालिकादीन् पञ्च भेदान् उद्दिशति—श्यामिकेत्यादि । श्यामिका, कपिला कडारवर्णा, बिन्दुचित्रा वा, भवति । कालिका, कपिला, कपोतवर्णा वा, भवति । तदुभयं श्यामिकादिद्वयम्, अष्टांगुलायामम् । कदली, परुषा कर्कशस्पर्शा, हस्तायता चतुर्विंशत्यङ्गुलदीर्घा । वर्णस्त्वस्याः कालिकावत् । सैव कदली, चन्द्रचित्रा चन्द्राकारमण्डलयुक्ता, चन्द्रोत्तरा नाम भवति । प्रमाणं त्वस्याः कदलीवत् । शाकुला, कदलीत्रिभागा कदल्यपेक्षया त्रिगुणपरिमाणा त्रिहस्तायामेत्यर्थ इत्येके, कदलीप्रमाणतृतीयांशप्रमाणा अष्टांगुलायतेत्यर्थ इत्यपरे, कोठमण्डलचित्रा रक्तमण्डलयुक्ता, कृतकर्णिकाजिनचित्रा कृतैः स्वभावकृतैः कर्णिकाजिनैश्चर्मग्रन्थिभिः चित्रा जनितशोभा । चशब्दः समुच्चये । इतिशब्द आरोहजसमाप्तौ ।

चाणक्यटीका

आरोहजा इति । आरोहदेशजाः पञ्चतय्यः । (कोद्याः ? कास्ताः) कपिला बिन्दुभिश्चित्रा श्यामिका । चन्द्रकैश्चित्रा । त्रिभागेति हस्तत्रिभागायता । तनग (?)-मण्डलचित्रेति[1] गाङ्ग(?)स्थानैर्मण्डलैश्चित्रा । तोङ्गं (?) द्विविधमित्यन्ये । कृता च कर्णिका अजिने चतुर्ष्वपि पार्श्वेषु यस्या इति ॥

प्रतिपदपञ्चिका

पञ्चप्रकारं चर्माह—श्यामिकेत्यादि,

कपिला बभ्रुवर्णा बिन्दुभिश्चित्रा वा श्यामिका भवति । कपिला कपोतवर्णा वा हि कालिका भवति । तदुभयमपि चाष्टाङ्गुलायामं प्रमाणतः । परुषा कर्कशा स्पर्शे कदलीहस्तायता चतुर्विंशत्यङ्गुला भवतीति । येषां चर्मणां वर्णप्रमाणानि नोक्तानि तान्यनन्तरं पूर्वाभिहितान्येव द्रष्टव्यानि इति केचित् । अनियतवर्ण-प्रमाणत्वात् । अनिर्देश इत्यपरे । सैव कदली चन्द्रचित्रा चन्द्राकारशुक्लमण्डलचित्रा चन्द्रोत्तमा भवति । कदलीत्रिभागा हस्तायता कदलीकृतो यो भागो यस्यास्सा

---

१. कोठमण्डलचित्रेति भट्टस्वामी । कोठी मण्डलकमित्यमरः । कान्तनावकादि· शाकुलान्तासु: जिनरअप्रतिवादकः । कौटिलीयो ग्रन्थभाग:प्रायशोनूदितो दण्डिना अवन्तिसुन्दरीकथायाम् ।

सामूरं चीनसी सामूली च बाह्लवेयाः ।

षट्त्रिंशदंगुलमञ्जनवर्णं सामूरम् । चीनसी रक्तकाली पाण्डुकाली वा । सामूली गोधूमवर्णेति ।

सातिना नलतूला वृत्तपुच्छा च औद्राः ।

सातिना कृष्णा । नलतूला नलतूलवर्णा । कापिला वृत्तपुच्छा च—इति चर्मजातयः ।

प्रतिपदपञ्चिका

कदली त्रिभागा । अष्टाङ्गुलेत्यपरे । शालका[1] भवति । कोठमण्डलचित्रा रक्तमण्डलबहुला कृतकर्णिकाजिना स्वाभाविकोत्पन्नचर्मग्रन्थिकेति । आरोहजा एताः श्यामिकादय इति ।

श्रीमूला

त्रिप्रकारां बाल्हवेयजातिमाह—सामूरमित्यादि । बाह्लवः हिमवत एकदेशः तत्र भवाश्चर्मजातयो बाह्लवेयाः । ढप्रत्ययान्तश्चायम् । षट्त्रिंशदित्यादि चीनसीसामूल्योः प्रमाणं सामूरवत् षट्त्रिंशदंगुलं द्रष्टव्यम् । इतिशब्दः समाप्तौ ।

इत्थं मूषिकादिस्थलचरचर्माण्यभिधाय जलचरचर्माण्याह—सातिनेति । सातिना नलतूला वृत्तपुच्छा च इति त्रिविधाः, औद्राः उद्रो जलमार्जारस्तस्येमे त्वग्भेदा इत्यर्थः । सातिना, कृष्णा कृष्णवर्णा । नलतूला नलतूलवर्णा नलतूलो नलाख्यतृणविशेषस्य पक्ष्म तस्येव वर्णो यस्याः सा । वृत्तपुच्छा, कपिला कडारवर्णा । इति चर्मजातयः । उक्तेन प्रकारेण चर्मजातयोऽनुक्ता अपि यथाप्रसिद्धि बोद्धव्या इत्यर्थः ।

चाणक्यटीका

बाह्लवदेशे जातं बाह्लवेयं त्रिविधम् । त्रोधती कृष्ण (?) ॥

औद्राह्वा[2] उद्रदेशजाता त्रिविधा । पञ्चसु मूलदेशेषु पञ्चदशमूषिकजातयः अनुक्तप्रमाणाश्च प्रमाणनियतमेव द्रष्टव्यम् । व्याकर्षेणाध्यर्धमित्यन्ये ॥

प्रतिपदपञ्चिका

त्रिविधं बाह्लवेयमाह—सामूरमित्यादि,

बाल्हवादिभवदेकदेशः आञ्जनवर्णमिति । कृष्णं सामूरं भवति । चीनसी द्विधा रक्तकाली पाण्डुकाली वा सामूली गोधूमवर्णेति त्रिविधम् ।

---

१. शाकुला—पा०

२. उद्रो जलचर प्रगटीविशेषा तदीया औद्रा इति भट्टस्वामी ।

[चर्मसु प्रशस्तानि]

चर्मणां मृदु स्निग्धं बहुलरोम च श्रेष्ठम् ।

[मेषलोमनिर्मितानाम् आच्छाद्यानां वर्णक्रिया—
संस्थानभेदैः सप्तदशविधत्वम्]

शुद्धं शुद्धरक्तं पक्ष्मरक्तं च आविकम्; खचितं वानचित्रं खण्डसंघात्यं तन्तुविच्छिन्नं च । कम्बलः केचलकः कलमितिका सौमितिका तुरगास्तरणं वर्णकं तलिच्छकं वारवाणः परिस्तोमः समन्तभद्रकं च आविकम् ।

श्रीमूला

चर्मगुणांस्त्रीनाह—चर्मणामित्यादि । चर्मणामिति निर्धारणे षष्ठी । शेषं स्पष्टम् । इति चर्मनिरूपणम् ।

अथाविकं सप्तदशप्रकारं निरूपयिष्यन् प्रथमं रागभेदेन त्रिविधमाह—शुद्धमिति । अवयो मेषा नाम लोमोपकारिणः पशवः, तल्लोमभवम् आविकम् । अधिकारश्चायम् । शुद्धं शुल्कं, शुद्धरक्तं सर्वारुणं, पक्षरक्तं च एकदेशारुणं च, भवति । क्रियाभेदेन चतुर्विधमाह—खचितमिति । खचितं सूचिवानकर्मनिष्पादितं, वानचित्रं वानकर्मणा कृतवैचित्र्यं, खण्डसंघात्यं खचितानामुतानां वा बहूनां खण्डानां संघातेन निष्पादितं, तन्तुविच्छिन्नं च अनुतविसृष्टैस्तन्तुभिर्मध्ये कृतविच्छेदं जालकोपयोगि च ।

संस्थानकृतान् दश भेदानाह—कम्बल इति । कम्बलः प्रसिद्धः, केचलकः वन्यशिरस्त्राणं, कीचपक इत्यपपाठः । कलमितिका गजोपर्यास्तरणम्, कुलमितिकेति क्वचित् पाठः । सौमितिका कलमितिकैव कृष्णवर्णा गजपर्याणोपर्यास्तरणम्, तुरगास्तरणं प्रसिद्धम्, वर्णकं वर्णकम्बलः, तलिच्छकं कम्बलविशेषः, तल्लिक्थकमित्यपि पाठः । वारवाणः कञ्चुकः, परिस्तोमः कम्बलभेदो विस्तारचित्रः, यो विस्तृतवदवभासते निर्माणवैचित्र्यात् स इति व्याचक्षते, कुथ इति त्वेके । समन्तभद्रकं सन्नाहपट्टः, गजादिजघनत्राणमित्यपरे । चशब्दः समुच्चये । इहाविकाधिकारे पुनराविकमिति वचनं वैचित्र्यार्थम् ।

चाणक्यटीका

शुद्धमिति यथाजातमनाहितवर्णम् । शुद्धरक्तं सर्वरक्तम् । किञ्चिच्छुद्धं किञ्चिद्रक्तमित्येव पक्ष्मरक्तं यस्योतस्य पक्ष्माणि रक्तानि । त्रिविधं वर्णत आविकम्, क्रियातस्तु चतुर्विधम् । अविचितं सूचीमुक्तम् (?) । वानचित्रं तन्त्रारोपितं कृत्वा नानाप्रकारैर्भक्तिविशेषैरुपेतम् । खण्डसङ्घात्यं खण्डानवयवानुतान् कृत्वा पश्चात् संहृत्य यत् क्रियते । तन्तुविच्छिन्नं तन्तुभिर्विच्छिद्य यदूयत इति ॥

तस्य (नाम ? वान) विकल्पानाह—कम्बलकोचैवकौ स्वनाम्नैव प्रतीतौ । विलासिस्त्रीणां कलमिति (का) देनवततः (?) । सोमितिका कर्णत्राणम् । तल्लि-

चाणक्यटीका

च्छकं वृत्तास्तरणम्। वारबाणः कञ्चुकः। परिस्तोमः कुथो गजास्तरणम्। समन्तभद्रं सन्नाहतलपट्टकम् एवं नवविधम् आविक (विक) पमेव कार्पासादिभिरमिश्रमित्यर्थः। क्रियाविशेषस्तेषां (ख उ) ताद्यपेक्षाया यथासम्भवमभ्यूह्यः। ननु (म?) कलमितिकायाः किङ्कृतः क्रियाविशेष इतिचेत्, खण्डसङ्घात्ये अन्तर्भावात्। खण्डशब्दस्योपलक्षणार्थत्वाल्लोमसङ्घात्यपि द्रष्टव्यम् ॥

प्रतिपदपञ्चिका

जलचराजिनमाह—सातिनेत्यादि, उद्रो जलचरः प्राणिविशेषः तदीया औद्राः। तत्र सातिना कृष्णा नलतूला नलतूलवर्णा। नलस्तृणविशेषः। तत्तूलं कुसुमपक्ष्म तद्वर्णा। वृत्तपुच्छा कपिला इतिशब्दः प्रकारे। एतेन अनुक्तमपि मार्जारचर्म जायते तद्देशप्रसिद्धा[1] गृहीता द्रष्टव्या।

चर्माण्यभिधाय चर्मगुणानाह—मृद्वित्यादि,

मृदु सुकुमारं स्निग्धमरूक्षं बहुलरोम च श्रेष्ठं भवति। रागभेदेन त्रिविधम्। क्रियाभेदेन चतुर्विधम्। संस्थानभेदेन दशविधमेवं सप्तदशविधमाविकमाह—

रागभेदेन तावत् शुद्धं शुक्लं शुद्धरक्तं सर्वं रक्तं पद्मरक्तं[2] एकदेशरक्तमाविलं अवयो रोमोत्थकारिणः पशुविशेषाः तद्रोमभवः। क्रियाभेदाच्चातुर्विध्यमाह—(ख)चित्तं सूचिवानं वानचित्रं वानेनैव चित्रं खण्डसङ्घात्यं पृथग्विरचितावयवम् सङ्घातम्। तन्तुविच्छिन्नम् जालकोपकारि। संस्थानभेदाद् दशविधमाह[3]—कम्बल इत्यादि,

कम्बलः प्रतीतः केचलकः[4] वनगोचराणां शीतवारणं शिरस्त्राणम्। कलमितिका। गजास्तरणं पर्याणाधस्तान्नीयते सौमितिका। सैव कृष्णवर्णा गजपर्याणस्योपरि दीयते। तुरगास्तरणं प्रतीतम्। (र)लघुरप्यपदेश इत्यपरे। वर्णकं वर्णकम्बलः तलि धरुतल्पकः। वारवाणः कञ्चुकं। परिस्तोमः विस्तारिका। चित्रा कुथेत्यपरे। समन्तभद्रकं सन्नाहपट्टः गजादिजघनमित्यपरे। चस्समुच्चये। आविकमिति। आविकग्रहणेनानुवर्तमाने खचितवानचित्रखण्डं सङ्घात्यतन्तुविच्छिन्नानि कार्पासकान्यपि भवन्तीति।

———

१. जातद्देश—पा०
२. पद्मरक्तं—पा०।
३. द्वाराविध्य—पा०
४. कौपचपाकः—पा०

[तेषु प्रशस्ताः]

पिच्छिलमार्द्रमिव च सूक्ष्मं मृदु च श्रेष्ठम् ।

[नेपालदेशीयमेषरोमनिर्मित-
वस्त्रभेदाः गुणाश्च]

अष्टप्लोतिसङ्घात्या कृष्णा भिङ्गिसी वर्षवारणमपसारकः इति नैपालकम् ।

श्रीमूला

गुणानाह—पिच्छिलमिति । पिच्छिलमिव श्लक्ष्णमिव भासमानम्, आर्द्रमिव च भासमानं, सूक्ष्मं, मृदु च, श्रेष्ठं भवति ।

अष्टेत्यादि । अष्टप्लोतिसङ्घात्या प्रोतय एव प्लोतयः खण्डाः तत्सङ्घातनिष्पन्ना, सा कृष्णा कृष्णवर्णा, वर्षवारणं वृष्टिरोधसाधनभूता च भिङ्गिसी तदाख्यः कम्बलभेदः एकः, अपसारकः काण्डपट इत्यपरः । अनयोर्भेदयोर्गुणात् प्रागनभिधानं गुणसम्बन्ध-द्योतनार्थम् । इति नैपालकम् अनेन प्रकारेण नेपालदेशभवमाविकं निरूपितमित्यर्थः । नेपालग्रहणाच्च वक्ष्यमाणं मृगरोमादिकमन्यदेशजं सूचितम् ।

चाणक्यटीका

पिच्छिलं यत्र हस्तः स्रंसते । आर्द्रमिव तच्छुष्कं विप्रतिभाति । सूक्ष्ममस्थूलांशुकम् । मृदु च तनु यत्तच्छ्रेष्ठमाविकम् ॥

अष्टप्लोतिसङ्घात्येति सूक्ष्मैरष्टाभिः प्लोतैः पटैरेकीकृतैः सङ्घात्या (?) कृष्णवर्णा नाम्ना (टिलि ? भिङ्गि) सीति । अवकरलोम (भिः) स्थूलैः संस्कृतः अपसारकः वर्षत्राणं शरीरगृहाच्छादनार्थम्, सूक्ष्मैस्तु वर्षासु ये नश्यन्ति··धितत्राणार्थैर्वेत्यर्थोक्तम् । एतद् द्वयमपि नेपालदेशजं, नान्यत्रेति ॥

प्रतिपदपञ्चिका

तत्प्रतिषेधार्थं गुणानाह—पिच्छिलमित्यादि, इव प्रत्येकं पिच्छिलमिव पिच्छिलमतिश्लक्ष्णं आर्द्रमिवार्द्रमतिगुरु सूक्ष्मं प्रतनु मृदु सुकुमारं तत्श्रेष्ठं भवति ।

प्लोतयः खण्डानि तैरष्टाभिः संहताष्टप्लोतिसङ्घात्या कृष्णा कृष्णवर्णादि त्राणं भिङ्गिसी कुटी अवसारकः काण्डवटकः सोऽप्यष्टप्लोतिसङ्घात्य कृष्ण एव यत्र वर्णान्तरमनुपदिष्टं तत्र सर्वत्र शुद्धादिकमनुवर्तते । पिच्छिलादींश्चतुरो गुणानभिधाय-पश्चाद्भिङ्गिस्यपसारयोरभिधानं वर्षादित्राणव्यवध[1] नैपालकं नेपालविषयजमाविक मुक्तमभिहितमिति । इह (ने)पालग्रहणात् मृगरोमाद्यन्यदेशजं व्याख्यातम् ।

---

१. व्यवधानैकोर्ययोगित्वात् पिच्छिलादिगुणवैयर्थ्यात् इति ।

[मृगरोमजानि षड्विधानि]

सम्पुटिका, चतुरश्रिका, लम्बरा, कटवानकम्, प्रावरकः, सत्तलिकेति मृगरोम ।

[दुकूलतद्वानयोः प्रत्येकं त्रयो भेदाः
भेदान्तराणि च]

वाङ्गकं श्वेतं स्निग्धं दुकूलं, पौण्ड्रकं श्यामं मणिस्निग्धम्, सौवर्णकुड्यकं सूर्यवर्णम् । मणिस्निग्धोदकवानं चतुरश्रवानं व्यामिश्रवानं च । एतेषामेकांशुकमध्यर्धद्वित्रिचतुरंशुकमिति ।

श्रीमूला

षड्विधं मृगरोमजमाह—सम्पुटिकेति । सम्पुटिका जङ्घात्राणं सुक्थणाभिधानमिति क्वचिट्टीकादर्शे लिखितं, सन्थनमित्यन्यत्र लिखितं दृश्यते । चतुरश्रिका दशारहिता नवाङ्गुलिचिह्नितकोणा । लम्बरा प्रच्छदपटविशेषः । कटवानकं स एव स्थूलसूत्रो भाष्यक इति तद्देशीयानां प्रसिद्ध इति स्वामी । प्रावरकः पूर्वोक्त एवान्यतरतोदशो रोमावर्तक इति तद्देशप्रसिद्ध इति स्वामी । सत्तलिका तूलिकाख्य आस्तरणविशेष इति स्वामी । इति मृगरोम अनेन प्रकारेण मृगरोमजमुक्तम् ।

अथ त्रिप्रकारं दुकूलमाह—वाङ्गकमित्यादि । वाङ्गकं वङ्गदेशभवं, दुकूलं, श्वेतं स्निग्धं मसृणम्, पौण्ड्रकं पुण्ड्रदेशभवं, श्यामं, मणिस्निग्धं मरतकस्निग्धम् । सौवर्णकुड्यकं कामरूपस्थे सुवर्णकुड्याख्ये प्रदेशे भवं, सूर्यवर्णम् उद्यदादित्यद्युति । दुकूलस्य वानमपि त्रिप्रकारमाह—मणीत्यादि । मणिस्निग्धोदकवानं नाम दुकूलस्य साधनद्रव्यं जलेनार्द्रीकृत्य मणिबन्धेनावघृष्य वानं, चतुरश्रवानं वर्णान्तरासंसृष्टं शुद्धं वानं, व्यामिश्रवानं कार्पासकतन्तुमिश्रितैः कौशेयकतन्तुभिर्वानम्, अथवा वर्णान्तरसंसृष्टवानम् । चः समुच्चये ।

एतेषामिति । एतेषां दुकूलानां मध्ये, एकांशुकं तानवानयोरेकतन्तुकम्, अर्थात् प्रशस्तं सूक्ष्मत्वात् । अध्यर्धद्वित्रिचतुरंशुकम् अध्यर्धांशुकं द्व्यंशुकं त्र्यंशुकं चतुरंशुकं च, अर्थादपकृष्टमुत्तरोत्तरं स्थूलत्वात् । तत्र यदेकगुणं तन्यते द्विगुणमूयते द्विगुणं वा तन्यते एकगुणमूयते तदध्यर्धांशुकम् । यद् द्विगुणं तन्यते द्विगुणमूयते तद् द्व्यंशुकम् । यत् त्रिगुणं तन्यते त्रिगुणमूयते तत् त्र्यंशुकम् । यच्चतुर्गुणं तन्यते चतुर्गुणमूयते तच्चतुरंशुकम् । इतिशब्दो दुकूलनिरूपणसमाप्तौ ।

चाणक्यटीका

सङ्कटिका कामगुणघटनात्वादल्पवाटा । सैव समचतुरश्रा चतुरश्रिका । लम्बुवानकम् इन्द्राक्षिकाकृतिवानम् शय्योत्तरच्छदः । कटकवानकं कटकस्येव मण्डि-

चाणक्यटीका

कावानं यस्य। प्रावार इव प्रावारकं पुष्पपटसदृशम्, तदुभयं शीतत्राणार्थम् सतलिका सहान्येन तटपट्टेनास्तरणार्थं व। तूलिकेत्यन्ये। त एते मृगरोमकृताः षड्विधाः पूर्वोक्तरोमक्रिया (वि) शेषाः ॥

कुप्यमिदानीं कोशप्रवेशयोग्यमुच्यते—वाङ्गकमिति वङ्गेषु भवम्। पुण्ड्रेषु सुवर्णकुड्ये च भवं प्रभूतं त्रिविधम् मणिस्निग्धं मणिवर्णस्निग्धमित्यर्थः। मणिस्निग्धञ्च तदु (भा ? दक) वानञ्च मणिनावघृष्य स्निग्धं कृत्वा उदकेनार्द्रीकृत्य यदूयत इत्यर्थः। व्यामिश्रं वानं यस्य कौशेयः कार्पासो वारवाणः चतुरश्रवाणं शुद्धदुकूलवानम्, चतुरश्रशब्दस्य निर्व्याज (व) वाचित्वात् ॥

एषामेव वाङ्गादीनामपरो विशेषः एकेनैवांशुकेन यदूयते तद् एकांशुकम् इत्यादि योज्यम्। वांशुकन्तु (?) नास्ति दुकूलमिति नोक्तम्, एदद् यथापूर्वं श्रेष्ठम् ॥

प्रतिपदपञ्चिका

तस्य हिमवन्तकोटशम्बरेष्वर्बुदकुन्देष्वेव सम्भवात् तद् षड्विधमाह—सम्पुटिकेत्यादि,

सम्पुटिका सुक्थणाभिधाना जङ्घात्राणार्थं, चतुरस्रिका दशारहिता कोणेषु नवाङ्गुलोच्छ्रिता शिरस्त्राणार्थं[1] भवति। लम्बरा नाम प्रच्छदपटः कटवानकं स एव स्थूलसूत्रोतोभाम्यकमिति तद्देशीयानां प्रसिद्धः स एवान्यतरो दशो रोमावर्तक इति तद्देशीयानां प्रसिद्धः। सतलिका तूलिकाख्यास्तरणविशेषः द्विपुटं प्रावरणमित्यपरे।

त्रिविधं दुकूलमाह—वाङ्गकमित्यादि। वाङ्गकं वङ्गेषु भवं, श्वेतं वर्णतः स्निधं (अ) परुषं दुकूलं, सूक्ष्मवल्कलं, पौण्डकं पुण्ड्रेषु भवं श्यामं व (र्ण) तः मणिस्निग्धं मरकतस्निग्धम्। सौवर्णकुड्यकं, कामरूपेषु सुवर्णकुड्ये भवं सूर्यवर्णम्। बालार्कप्रभं त्रिविधमेव। वयनप्रकारमाह—मणिस्निग्धोदकवानं, यदुक्तं दुकूलस्य द्रव्यं तदुदकेनार्द्रीकृत्य मणिना अपघृष्य इति चतुरस्रवानम्। वर्णान्तरासंस्पृष्टं शुद्धं दुकूलवानं व्यामिश्रकवानम्।

कौशेयकेन कार्पासकेन वा वानं क्षेप्त्रेण तन्यति वीरतेनोयते वीरणेन वा तन्यते क्षेत्रेणोयत इति केचित्। वर्णान्तरव्यामिश्रमित्यपरे। एवं त्रिविधं दुकूलवानं भवति। एतेषां दुकूलानामेकांशुकं एकतनमेकतन्तुकं च सूक्ष्मत्वाच्छ्रेष्ठं भवति। अस्यार्धांशुकं यदेकगुणं तन्यते द्विगुणमूयते द्विगुणं वातन्यते एकगुणमूयते तत् द्वयर्धांशुकं स्थूलात्थादेकांशुकादवकृष्टं खवति। एवमपरेष्वपि योज्यम्।

———

१. शीतत्राणार्थम्—पा०

[पट्टसूत्रभेदाः, तद्योनयः, तद्वर्णाः,
तेषूत्तमादिनिर्देशश्च]

तेन काशिकं पौण्ड्रकं च क्षौमं व्याख्यातम् । मागधिका पौण्ड्रिका सौवर्णकुड्यका च पत्रोर्णाः । नागवृक्षो लिकुचो वकुलो वटश्च योनयः । पीतिका नागवृक्षिका, गोधूमवर्णा लैकुची, श्वेता वाकुली, शेषा नवनीतवर्णा । तासां सौवर्णकुड्यका श्रेष्ठा । तया कौशेयं चीनपट्टश्च चीनभूमिजा व्याख्याताः ।

———————

श्रीमूला

तेनेति । तेन दुकूलगताध्यर्धांशुकत्वादिनिरूपणेन, काशिकं काशिदेशभवं, पौण्ड्रकं च पुण्ड्रदेशजं च, क्षौमं व्याख्यातं क्षौममेव निरूपितम् अध्यर्धांशुकद्व्यंशुकादिरूपं स्थूलं दुकूलमेव हि क्षौममिति व्यपदिश्यत इत्यभिप्रायः ।

मगधपुण्ड्रकसुवर्णकुड्यकाख्यदेशत्रयभवां नगकेसरडहुमद्यगन्धन्यग्रोधाख्यवृक्षचतुष्टययोनिं पत्रोर्णामाह—मागधिकेति । पत्रोर्णाः वृक्षपत्रेषु क्रिमिलालाकृता ऊर्णाः पट्टसूत्रस्य योनयः । तासां योनिभेदनिमित्तं गुणभेदमाह—पर्वतिकेत्यादि । नागवृक्षिका पीतिका नागवृक्षयोनिः पीतवर्णा । लैकुची लिकुचयोनिः । वाकुली वकुलयोनिः । शेषा वटयोनिः ।

मागधिकादीनां पत्रोर्णानां मध्ये श्रेष्ठामाह—तासामित्यादि । तयेति । तया पत्रोर्णया, कौशेयं कोशकारभवं, चीनभूमिजाश्चीनपट्टाश्च चीनदेशभवा वस्त्रविशेषाश्च, व्याख्याताः योनितो वर्णतश्च निर्दिष्टाः, तेऽपि पत्रोर्णवन्नागवृक्षादियोनयः पीतकादिवर्णाश्चेत्यभिप्रायः ।

चाणक्यटीका

तेनेति दुकूलेन काशिषु जातं पौण्ड्रञ्च यत् क्षौमं तद् वर्णतः वानतः अंशुकभेदाच्च व्याख्यातम् ।।

पित्रोर्णा देशतस्त्रिविधा । तत्र मगधभवा (मागधिका) । पत्रेषु क्रिमिभिर्या (प्रमी ? ऊर्णू) यते सा पत्रोर्णा । वटोद्भवेति वक्तव्ये शेषग्रहणाद् अ (न्यस्य ? न्या) अप्येवं प्रका (रेषु ? रा) भवति इति ज्ञाप्यते ।।

श्रेष्ठेति इत्यर्थं प्रविशस्ता (?) इत्यर्थः । देशगतभेदस्तूपदेशाद् वोद्धव्यः । अवभीक्ष्यत्वात्तु नोक्तम् (?) तया पत्रोर्णया कौशेयं कोशकारजन्तुजम् । चीनपट्टः प्रसिद्धः । व्याख्याता इति तेषामपि नागवृक्षादयो व्याख्याता इति । तेषामपि नागवृक्षादयो योनिरित्यर्थः ।।

[कार्पासिकेषु उत्तमानि]

माधुरम् आपरान्तकं कालिङ्गकं काशिकं वाङ्गकं वात्सकं माहिषकं च कार्पासिकं श्रेष्ठमिति ॥

प्रतिपदपञ्चिका

अथ षड्सप्तहस्तादिकं दुकूलपट्टप्रमाणं नियम्य ततोधिककरणादध्यंशुकादि दुकूलप्रकरणेन काशिकं पौण्ड्रकं च तद्देशजम्। क्षौमं स्थूलदूकूलं व्याख्यातम्। वर्णतो वानतोंऽशुकप्रविभागतश्चेति। क्षौमदुकूलयोः स्थूलसूक्ष्मत्वकृतो वा भेद इति।

त्रिदेशजातां चतुर्वृक्षयोनिं पत्रोर्णामाह—तत्र मगधादयः त्रयोदश, नागवृक्षादयश्चत्वारो वृक्षाः। पीतादयश्चत्वारो वर्णाश्च प्रतीताः। पत्रोर्णापट्टसूत्रयोनिः कोशिकाग्रविशेषः। तासां च पत्रोर्णानां सौवर्णकुड्यकाः श्रेष्ठाः तया पत्रोर्णया कौशेयं कौशिकारभवं चीनपट्टाश्चीनविषयोद्भवा वस्त्रविशेषा व्याख्याताः निर्दिष्टाः। तेषामपि नागवृक्षादयो योनयः पीतकादयश्च वर्णा इति।

श्रीमूला

कार्पासिकमाह—माधुरमिति। माधुरं मधुरा पाण्ड्यराजधानी तया पाण्ड्यदेशलक्षणात् पाण्ड्यदेशजमित्यर्थः, आपरान्तकम् अपरान्तः कोङ्कणदेशस्तत्प्रभवं, कालिङ्गकं कलिङ्गभवं, काशिकं काशिजं वाङ्गजं. वङ्गजं, वात्सकं वत्सविषयोद्भवं, माहिषकं माहिष्मतो कुन्तलदेशराजधानी तया देशलक्षणात् तद्देशभवमित्यर्थः, यद्वा महिषकदेशोत्पन्नं, चः समुच्चये, कार्पासिकं पाण्ड्यादिदेशसप्तकभवं कार्पासतन्तुजं वस्त्रं, श्रेष्ठम्। इतिशब्दः फल्गुसमाप्तौ। इति फल्गुनिरूपणम्।

चाणक्यटीका

माधुरं दक्षिणमाधुरोत्तरमाधुरभूमिजम्। अपरान्तदेशभवम् आपरान्तकम्। वत्सदेशविषय (भवं वात्सकम्)। महिषविषये च भवं महिषकम्। कार्पासिकमिति तन्निर्मितं वस्त्रम् श्रेष्ठम् अन्यदेशजेभ्यः ॥

प्रतिपदपञ्चिका

[1]माथुरादिसप्तविधं कार्पासिकमाह—माधुकं दक्षिणापथं मथुरोत्पन्नं आपरान्तकं कोङ्कणविषयजं। कलिङ्गकाशिवङ्गाः प्रतीताः। तत्र भवं कालिङ्गकादिकं वात्स्यकं कौशाम्बिदेशजं माहिषं माहिष्मतीदेशजं कार्पासिकं कार्पासविकारः श्रेष्ठमुत्तममिति।

---

१. माधुर पा०। मांधुरं दक्षिणपाथं मधुरोत्पन्नं आपरान्तकम् कोङ्कणविषयजं कलिङ्गकाशीवङ्गाः प्रतीताः।

[अनुक्तानां समानन्यायत्वोक्त्या निगमनम्]

अतः परेषां रत्नानां प्रमाणं मूल्यलक्षणम् ।
जातिं रूपं च जानीयान्निधानं नवकमं च ॥८०॥

श्रीमूला

अध्यायान्ते श्लोकावाह—अत इति, पुराणेत्यादि च। अतः अस्मादुक्तात् मौक्तिकादिकार्पासिकान्तात् सप्तदशकात्, परेषामन्येषां, रत्नानां रत्नप्रभृतीनां, प्रमाणं मापकाङ्गुलादिकं तुलामानपौतवदेशकालमानप्रकरणयोर्वक्ष्यमाणं, मूल्यलक्षणं मूल्यं लक्षणं च, तत्र मूल्यं—

"द्वे शते यद् धृतं रत्नं तण्डुलानां प्रमाणतः ।
शतद्वयं सहस्राणां तस्य मूल्यं प्रकीर्तितम् ॥"

इत्युक्तरूपं, लक्षणं प्राशस्त्यं यथा मौक्तिकानां स्थूलनिस्तलादि, अथवा लक्षणम्—

"क्षीरकुम्भे मणिः क्षिप्तो यो रञ्जयति तेजसा ।
शुक्लत्वं चोद्धृतो याति तं शुद्धमिति निर्दिशेत् ॥"

इत्युक्तजातीयं, जातिं मुक्तादीनां ताम्रपर्णिकत्वादिकं रूपं वर्णं षडश्रचतुरश्रादिकं वा, निधानं निधीयमानवस्त्वेकान्तगोपनानुकूलं निधानप्रकारं, नवकर्म च आकरोद्धृतमात्रस्य शोधनवेधनघर्षणादिकं ।

चाणक्यटीका

अत इति यथोक्तात् इन्द्रदेशोपदेशात् (?) अन्येषामपि कोशप्रवेश्यानाम् । रत्नानामिति प्रदर्शनार्थत्वाद् रत्नसारफल्गुकुप्यानाम् । प्रमाणं "विंशतितण्डुलं वज्रधरणम्" इत्यादि । मूल्यं गुणवृद्धिहानिक्रमेण । लक्षणं परीक्षा यथा—"क्षीरप्रक्षिप्तमिन्द्रनीलं स्वाभासं जनयति । वत्समुखप्रक्षिप्तं तच्चूषणान्न विक्रियते" इति । जातिम् मणयोऽन्तरजातय इति । रूपं रक्तं भासुरमिति । निधानम् इदमस्मिन् भाण्डे स्थापनीयमिति । इदमत्रोपहितं शोभत इति । अथवा इदं शुभम् अस्मिन् गृहे निधेयम्, अशुभं राष्ट्र इति । नवकर्म च आकरोद्गतस्य घर्षणपेषणादि ॥

प्रतिपदपञ्चिका

साम्प्रतमध्यायप्रान्ते श्लोकमाह—अतः परेषामित्यादि, अतो यथाभिहितान्मुक्तादेः कार्पासिकान्तात् सप्तदशकात् गणात् परेषामप्येषां रत्नादीनां प्रमाणं मापकाङ्गुलादिकं वक्ष्यमाणं वक्ष्यति । विंशतितण्डुलं वज्रधरणमिति । तथा अष्टौ यवमध्या अङ्गुलमध्यमस्य पुरुषस्य मध्यमया अङ्गुल्या मध्यं प्रकर्षा वा अङ्गुलमिति । उक्तं च, कान्तनावकं प्रेयकं (का) च तदुभयमष्टाङ्गुलायामिमित्यादि मूल्यमर्घं तथा च—

पुराणप्रतिसंस्कारं कर्मगुह्यमुपस्करान् ।
देशकालपरीभोगं हिंस्राणां च प्रतिक्रियाम् ॥८१॥

[इत्यध्यक्षप्रचारे कोशप्रवेश्यरत्नपरीक्षा, एकादशोऽध्यायः ।
आदितो द्वात्रिंशः]

प्रतिपदपञ्चिका

द्वे गते य(भ)द्रकं रत्नं तण्डुलानां प्रमाणतः ।
शीतद्वयं सहस्राणां तस्य मूल्यं प्रकीर्तितम् ॥ इति ॥

लक्षणं प्रशस्तं तद्यथा मुक्तानां स्थूलनिस्तलमित्यादि । मणीनां षडश्रं चतुरस्रं वेत्यादि । अथवा,

क्षीरकुम्भे मणिः क्षिप्तो यो रञ्जयति तेजसा ।
शुक्लत्वं चोद्धृते याति तं शुद्धमिति निर्दिशेत् ॥

जातिरुत्पत्तिस्ताम्रपर्ण्यादि काचमणीनामित्यादि । रूपं षडश्रचतुरस्रादिकं एतत्कोशाध्यक्षो जानीयात् । निधानं सुगोपायनविधिः[1] यथा निधीयमानमनाशि भवति । नवकर्म नवकस्याकरोत् । गतस्य कर्म संशोधनवेधनादिकं ।

श्रीमूला

पुराणप्रतिसंस्कारं पुराणस्य असम्भोगातिभोगादिभिर्विवर्णितस्य वन्धच्युतस्य श्लथवन्धस्य वा नवीकरणम् । यदाह—

"अतिभोगादसम्भोगाद् धूमाग्निस्वेदघर्षणात् ।
भूम्यम्बुलवणैश्चापि मुक्तावर्णो विरज्यते ॥"

इति, कर्मगुह्यं कर्मरहस्यं रत्नादीनां वर्णापचारणरञ्जनघर्षणादिकम्, उपस्करान् शाणादीनि रत्नादिकर्मोपकरणानि, देशकालपरिभोगमिति समाहारद्वन्द्वः, तत्र देशकालौ रत्नादीनामुत्पत्तिक्रयविक्रयानुकूलौ, परीभोगः उपयोगः शीतयोर्देशकालयोर्मृगरोमजमुपयोज्यम् उष्णयोः कार्पासिकमित्येवंरूपः, हिंस्राणां क्षौमाद्युपघातकानां मूषिकादीनां, प्रतिक्रियां मार्जारोत्सर्गादिना प्रतिविधानं कृमिमूषिकादिजग्धानां वस्त्रादीनां सीवनादिना संस्करणं च, जानीयात्, अर्थात् कोशाध्यक्षः ।

एषोऽत्र भट्टस्वामिनः सर्वसंङ्ग्रहः—

"मौक्तिकं मणयो वज्रं प्रवालं च समासतः ।
रत्नं चतुर्विधं प्रोक्तं साराः पञ्चविधा मताः ॥
चन्दनागुरुणी श्रेष्ठे मध्यमं तैलपर्णिकम् ।
भद्रश्रीयं च जानीयात् कालेयकमथेतरत् ॥

---

१. संगोपायन पा० ।

श्रीमूला

चर्माविमृगरोमाणि दुकूलं क्षौमजातयः ।
कार्पासिकं च पत्रोर्णं कौशेयं फल्गु चाष्टधा ॥
कुप्यं कुप्यायुधाध्यक्षप्रोक्तमित्यत्र नोदितम् ।
मुक्ताफलाद्यशेषास्तु भेदाः सप्तदशोदिताः ॥" इति ॥

इति कौटिलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे एकादशोध्यायः ।
कोशप्रवेश्यरत्नपरीक्षा, आदितो द्वात्रिंशः ॥

चाणक्यटीका

तथा पुराणानां नष्टवर्णादीनां (शा ? ले) पविशेषैर्गुणप्रत्यादानं प्रतिसंस्कारम् । कर्मगुह्यं स्फुटितं तुन्नवायादिकर्म । उपस्करान् शाणशूचीपिप्पलादि । देशकालाः अस्मिन् देशे इदं भुज्यते, काले अस्मिन् इदमुपयुज्यते वर्षेषु कम्बलः हेमन्ते मृगरोम इति । (परी) भोगानिति अध उपरि वा भोक्तव्यं नोपवेष्टव्यं वा प्रावृणोतिवेति । हिंस्राणाञ्च मूषिकादीनाम् । प्रतिक्रियां यूपनीरपत्रकृष्णाजितामार्जारस्थान विवयायं पदातिरित्ति (?) ॥

इति कोशप्रवेश्यरत्नपरीक्षा एकादशं प्रकरणम् ।
एकादशश्चाध्यायः ॥

प्रतिपदपञ्चिका

पुराणप्रतिसंस्कारमिति । पुराणस्यासंभोगादतिभोगादिभिः[1] निश्चायितस्य श्लथीभूतपूर्वनिबन्धनस्य च पुनर्नवीकरणमुक्तम् । हि—

अतिभोगादसंभोगाद् धूमाग्निस्वेदघर्षणात् ।
भूम्यंबुलवणैश्चापि मुक्तावर्णोऽपि रज्यते ॥

कर्मगुह्यमिति, रत्नानां वर्णापचारणरञ्जनघर्षणादिकं तथा कौशेयवल्कलरोमजानामरिकर्दमदष्टकाकपत्रप्रक्षेपादि सर्जिकाक्षारादिभिश्चोदनं उपस्कराङ्क(ल । श ।) णमुष्टिकवेधनयन्त्रादीन् देशकालोत्पत्तेः क्रयविक्रयादेर्वा परिभोगः उपभोगः कथमकरोत । तद्यथा,

शीतप्राये देशे मृगरोम घर्मप्राये तु कार्पासिकमेवं कालेऽपि योज्यं । हिंस्राणां कासारिकादीनां प्रतिक्रिया प्रतिविधानमात्मपरोक्षणं । तत्र प्रक्षेपादि मूषिकाणां मार्जारनकुलोत्सर्गः । ऊष्मोपस्नेहयोरन्यथावस्थानंक्रिमिभूषिकोपहतानां तुन्नवायैः संश्लेषणसंसेवनादि[2] संस्कारकमित्यादि । सर्वसङ्ग्रहस्तु—

मौक्तिकं मणयो वज्रं प्रवालं च समासतः ।
रत्नं चतुर्विधं प्रोक्तं साराः पञ्चविधा मताः ॥

---

१. अतिभोगादिभिः पा० । २. संसीवनादि पा० ।

प्रतिपदपञ्चिका

चन्दनागुरुणी श्रेष्ठं मध्यमं तैलवर्णिकम् ।
भद्रश्रियं च जानीयात् कालेयकमथेतरत् ॥
चर्माणि मृगरोमाणि दुकूलं क्षौमजातयः ।
कार्पासिकं च पत्रोर्णं कौशेयं फल्गु चाष्टधा ॥
कुप्यं कुप्यायुधाध्यक्षप्रोक्तमन्यत्र नोदितम् ।
मुक्ताफलाद्यशेषास्तु भेदास्सप्तदशोदिताः ॥

इति भट्टस्वामिनः प्रतिपदपञ्चिकायां अध्यक्षप्रचारिके द्वितीयेऽधिकरणे,
एकादशोऽध्यायः। कोशाप्रवेश्यरत्नपरीक्षा ।
आदितो द्वात्रिंशोऽध्यायः ॥

त्रिंशं प्रकरणम्

द्वादशोऽध्यायः ।

आकरकर्मान्तप्रवर्तनम् ।

[लक्षणैस्सहायसम्पत्त्या च आकारस्थानपरीक्षावश्यकंता]

आकराध्यक्षः शुल्वधातुशास्त्ररसपाकमणिरागज्ञः तज्ज्ञसखो वा तज्जातकर्मकरोपकरणसम्पन्नः किट्टमूषाङ्गारभस्मलिङ्गं वाऽऽकरं भूतपूर्वम्, अभूतपूर्वं वा भूमिप्रस्तररसधातुं अत्यर्थवर्णगौरवं उग्रगन्धरसं परीक्षेत ।

श्रीमूला

आकरकर्मान्तप्रवर्तनमिति सूत्रम् । आकरेषु सुवर्णाद्युत्पत्तिस्थानेषु कर्मान्ताः तदुपलम्भानुकूलाः क्रियाः आकरकर्मान्ताः तेषां प्रवर्तनमनुष्ठापनमाकरकर्मान्तप्रवर्तनम्, तदिहाभिधीयत इति सूत्रार्थः ।

'गुप्तपुत्रदारानाकरकर्मान्तेषु वासयेदि'ति पूर्वमुक्तम् । आकरकर्मान्तास्तु नोक्ताः, त इदानीमुच्यन्त इति सङ्गतिः ।

आकराध्यक्ष इति । शुल्वधातुशास्त्ररसपाकमणिरागज्ञः शुल्वशास्त्रं भूसिराविज्ञानं शाकलादि, अथवा शुल्वं ताम्रं तस्य ताम्ररजतहेमता येनोपदिश्यन्ते तच्छुल्वशास्त्रम्, कनकपञ्चाशीक्रियावादशुल्वशास्त्रमिति स्वामी, धातुशास्त्रं धातुभ्यः सर्जिकागन्धकादियुक्त्या सत्त्वपातनोपदेशकं धातुकौटल्यादिशास्त्रम्, रसः रसबन्धविज्ञानं 'रसोपनिषदाख्यमि'ति स्वामी, पाकः कनकादीनां वर्णकोत्कर्षणाद्यनुकूलमग्निपचनकर्म, मणिरागः मणीनां वर्णभेदोत्पादनकर्म, एषु शुल्वशास्त्रादिषु ज्ञः कोविदः, तज्ज्ञसखो वा शुल्वशास्त्राद्यभिज्ञसहायश्च, तज्जातकर्मकरोपकरणसम्पन्नः तज्जातैस्तन्नित्योद्योगिभिः कर्मकरैः उपकरणैश्च खनित्रभस्त्रासन्दंशशाणयन्त्रादिभिः सम्पन्न उपेतः आकराध्यक्षः, किट्टमूषाङ्गारभस्मलिङ्गं किट्टं लोहमलं मूषा आवर्तनभाण्डम्, अङ्गारो भस्म च लिङ्गं भूतपूर्वत्वचिन्हं यस्य तं तथाभूतं, भूतपूर्वं पूर्वप्रवृत्तविच्छिन्नम्, आकरं परीक्षेत उक्तलिङ्गदर्शनेन जानीयात् । भूमिप्रस्तररसधातुं भूमिर्मृत्तिका, प्रस्तरः पाषाणः, रसः सलिलपारदादिः भूमिप्रस्तररसात्मकाः धातवः सत्त्वप्रकृतयो यस्मिंस्तं भूमिधातुकं प्रस्तरधातुकं रसधातुकं चेत्यर्थः, अत्यर्थवर्णगौरवं वर्णोत्कर्षयुक्तं भारोत्कर्षयुक्तं च, उग्रगन्धरसं तीव्रगन्धयुक्तं तीव्ररसयुक्तं च, अभूतपूर्वम् आकरं वा परीक्षेत नवमाकरं च परीक्षेत, किमाकरगता

श्रीमूला

धातवः उत्कृष्टसत्वा उतापकृष्टसत्त्वा आहो मध्यमसत्त्वा इति तदीयवर्णगुरुत्वगन्धरसानां दर्शनतोलनाघ्राणास्वादनैर्निश्चिनुयादित्यभिप्रायः ।

चाणक्यटीका

"आकारप्रभवः कोशः" इति वक्ष्यति[1] । तस्मात् पूर्वोक्तप्रभवस्य आकरस्य कर्मान्तानां प्रवर्त्तनमिति प्रकरणमारभ्यते ।

आकाराध्यक्ष इति । शुल्वशास्त्रज्ञः भूमिपरीक्षाशास्त्रज्ञः, इयं भूमिरासन्नोदका अन्तःपरुषा अन्तःशल्या अन्तःशर्क (रोदि ? राहि) ता इत्येवमादिविशेषज्ञः । धातुशास्त्रमिति, धीयन्तेऽस्मिन् दधति वा सुवर्णादीनीति धातुः, मृत्तिकापाषाणादिः, तस्य शास्त्रं धातुवादः, तज्जानाति । वक्ष्यमाणरसानां पाकः । मणीनाञ्च रागज्ञः । 'धातुशास्त्रज्ञ' इत्यत्रान्तर्भूतयोरनयोरप्युपादानं कर्मपरिज्ञानप्राधान्यार्थम्, न शास्त्रविज्ञानमात्रादर्थविज्ञानम् अप्रयोगज्ञतयेति । तज्ज्ञसखो वेति । तत्त्वेनात्मन आत्मकल्पानां च ज्ञानम्, ज्ञानमन्तरेण आकरकर्म न सुकरमनेनेति । तथा सत्यपि तज्ज्ञानितद्योगतया तस्मिन्नेव जातैः ध्नमापकखनकादिभिः कर्मकरैः उपकरणैश्च भस्त्रासन्दंशादिभिः सम्पन्नः । किट्टं लोहमलम् । मूषा यत्र आवर्त्यते किट्टादि लिङ्गं भूतपूर्वम् । अनुपलब्धलिङ्गम् अभूतपूर्वम् । तस्यभेदानाह—भूमिविशेषं प्रस्तरविशेषं रसविशेषमेव वा सुवर्णादीनां धातूनां कारणम् । अत्यर्थवर्णम् अतिशुक्लम् अतिकृष्णम् । अत्यर्थगौरवं समानजातिभ्यो गुरुतरम् । उग्रगन्धरसम् अनिष्टगन्धरसमित्यर्थः । परीक्षेत सर्वत आगमेन चक्षुषा स्पर्शेन घ्राणेन जिह्वया च, यदि वा सर्वस्मिन् देशेऽपि ईक्षेत ॥

प्रतिपदपञ्चिका

आकरकर्मान्तप्रवर्त्तनमिति सूत्रम् ।

आकरः सुवर्णाद्युत्पत्तिस्थानम् । कर्मान्तास्ततक्रियारम्भाः तेषां प्रवर्त्तनम् अनुष्ठापनम् । आकरकर्मान्त प्रवर्तनमिति सूत्रार्थः । सम्बन्धस्तु कोशप्रकृतिः प्रक्रान्ता सन्निधातृनिचयकर्मादिभिः कोश्यप्रवेश्यरत्नपरीक्षान्तैःस्तत्प्रतिपादनार्थमभिधीयत इति सम्बन्धः ।

तदाह-आकराध्यक्ष इत्यादि । शुल्वशास्त्रं भूसिराज्ञान शाकलादि तेनाभूतपूर्वप्रवर्तने कूपखननादिके चोपयोगः । यद्वा, शुल्वं ताम्रं तस्य ताम्ररजतहेमता वा येनोपदिश्यते तत्कनक[2]पञ्चाशत्क्रियावादःशुल्वशास्त्रं धातुज्ञानं धातुभ्यस्सत्वपातनविधायि । धातुकौटिल्याभिज्ञानं रसज्ञानं रसबिन्धविज्ञानं[3] रसोपनिषदाख्यं हस्तकटकादि वा । पाकज्ञानम् वर्णकोत्कर्षादि कौशलं । रसस्य वा पाकः पचनं द्रव्यान्तरयोगेन मारणजारणरञ्जनादिज्ञानं मणीनां नानावर्णोत्पादनज्ञसखः शुल्व-

---

१. प्रस्तुताध्यायान्ते ।

२. पञ्चाशत्—पा०

३. रसबन्धविज्ञानम्—पा०

[सप्तसु लोहधातुषु स्यन्दनस्थानभेदेन पञ्चविधानां
सुवर्णहेतुरसानां निर्देशः]

पर्वतानामभिज्ञातोद्देशानां बिलगुहोपत्यकालयन(नि)गूढखातेष्वन्तः प्रस्यन्दिनः जम्बूचूततालफलपक्वहरिद्राभेदहरितालमनश्शिलाक्षौद्रहिङ्गुलकपुण्डरीकशुकमयूरपत्रवर्णाः सवर्णोदकौषधिपर्यन्ताः चिक्कणाः विशदाः भारिकाश्च रसाः काञ्चनिकाः ।

प्रतिपदपञ्चिका

शास्त्राद्यभिज्ञसहायः समुच्चयार्थो वा शब्दः । तज्ज्ञानवतस्तत्सहायस्य च सर्वकर्मसु शक्तत्वात् । तथा च :—

न ह्यशक्तिमतः कश्चित्कार्यारम्भः प्रसिद्ध्यति ।
वियता पक्षहीनस्य पक्षिणो गमनं यथा ॥ इति ।

तज्जाताः तद्योग्याः[1] कर्मकराः सरक-पांसुधावक-लोहकारादयः । उपकरणानि खनित्रभस्त्रासंदंशाधिकरणमुष्टिकादीनि तैस्संपन्नः समेतः किट्टादिभिः लिङ्गैराकारं भूतपूर्वमत्यर्थगौरवादिभिश्चाभूतपूर्वं परीक्षेत । किट्टं लोहमलं, मूषा मृण्मयमावर्तनभाण्डम्, अङ्गारभस्मनी प्रतीते लिङ्गं चिह्नं भूतपूर्वं पूर्वप्रवृत्तं, विच्छिन्नमभूतपूर्वं अभिनवं, भूमिः मृत्तिका, प्रस्तरः पाषाणो, रसः सलिलपारदादिधातुः, सत्त्व प्रकृतिः । स च भूम्यादिभिः प्रत्येकमभिसम्बद्ध्यते । अत्यर्थवर्णम् । उत्कृष्टस्वभाववर्णं चक्षुषा परीक्षेत । अत्यर्थगौरवमतिभारिकं तोलनेन, उग्रगन्धं तीव्रगन्धं घ्राणेन, उग्ररसमत्यर्थकटुकादिरसोपेतमास्वादनेन, इत्येवं चतुर्भिः प्रकारैराकरं परीक्षेत, धातोः सत्वोत्कर्षापकर्षं निरूपयेत् । तत्र भूमिप्रस्तरधात्वोः पश्चादप्युद्दिष्टस्य रसधातोरपि च लता फलरूपसुवर्णैकयोनित्वेन महाफलत्वादल्पप्रयासत्वाच्च ।

श्रीमूला

भूमिप्रस्तररसधातुषु रसः परनिर्दिष्टोप्यव्यभिचरितफलरूपसुवर्णयोनित्वेन महाफलत्वादल्पायासत्वाच्चाभ्यर्हित इति कृत्वा तमेव पञ्चप्रकारं प्रथमं निरूपयति—पर्वतानामिति । अभिज्ञातोद्देशानाम् अभिज्ञाताः पूर्वभूपपरिज्ञाताः आकरविद्याधीता वा उद्देशाः येषां तथाभूतानां, पर्वतानां, बिलगुहोपत्यकालयनगूढखातेषु बिलं भूविवरं । गुहा देवखातगृहम्, उपत्यका शैलासन्नभूमिः, लयनं शिलाटङ्कनकर्मनिर्मितं गृहं । गूढखातं महाशिलापिहितद्वारं बिलम् इत्येतेषु पञ्चसु, अन्तःप्रस्यन्दिनः मध्यप्रस्राविणः, जम्बूचूततालफलपक्वहरिद्राभेदहरितालक्षौद्रहिङ्गुलकपुण्डरीकशुकमयूरपत्रवर्णाः । जम्बूफलादित्रिकं प्रसिद्धं पक्वहरिद्राभेदः शोधितहरिद्राभङ्गः हरितालं

---

1. तद्योगाः—पा०

[ताम्रादेः सुवर्णत्वापादकरसलक्षणम्, शिलाजतुवैलक्षण्यं च]

अप्सु निष्ठ्यूतास्तैलवद्विसर्पिणः पङ्कमलग्राहिणश्च ताम्ररूप्ययोश्शता-दुपरि वेद्धारः ।

श्रीमूला

धातुभेदः, क्षौद्रं मधु, हिङ्गुलको रागद्रव्यविशेषः, पुण्डरीकम् सिताम्बुजम् शुकमयूरपत्रे शुकपक्षमपूरपक्षौ, जम्बूफलादीनां दशानां वर्ण इव वर्णो येषां ते तथाभूताः सवर्णोद-कौषधिपर्यन्ताः परिसरप्रदेशो येषां ते तथाभूताः, चिक्कणाः स्पृष्टहस्तसङ्गिनः, विशदाः शुचयः, भारिकाश्च गुरवश्च, रसाः, काञ्चनिकाः काञ्चनं सुवर्णं तत्प्रयोजनाः ।

चाणक्यटीका

यस्मात् सर्वत्र भूमिः वसुमती विशेषेणे पर्वतानां बिलादिषु शास्त्राल्लोक-प्रसिद्धेर्वा प्रख्यातोद्देशानाम् । गुहा (व्याभावोति ?) गुहाऽऽकृतिः । उपत्यका नितम्बैकदेशः । लयनं शिला (गनं ? गृहं) रचितम् । दृढखातं महाशिलाहितमन्तः—सुषिरम् । महाफलतयां प्राधान्याद् रसधातूनाह—अन्तः प्रस्यन्दिन इति । गुहा-दिष्वन्तः स्रवन् प्रस्यन्दो येषाम् न तु निर्झरवद् बहिर्भूत इति । जम्बूचूतफलानि पक्वानि । हरिद्राभेदाः भग्ना हरिद्राः पीतलोहिता भवन्ति । हरितालादयः प्रसिद्धाः । पुण्डरीकं पद्मम्, शुकपत्रं शुकपक्षः, तत्समानवर्णमुदकं ओषधयश्च येषां समीप इति ते तथोक्ताः । चिक्कणाः स्निग्धाः मधुपितकवद्विसरणे विशदाः । भारिका गुरवः । काञ्चनकरणे प्रभवन्तीति काञ्चनिकाः ॥

प्रतिपदपञ्चिका

बिलगुहादि पञ्चाधिष्ठनान्रसानेव तावदाह—पर्वतानामित्यादि[४], अभिज्ञाताः पूर्वनरेन्द्रैः चिन्तिताः । तच्छास्त्रेषु वा परिपठिताः उद्देशाः प्रदेशाः येषामिति । बिलं सुरङ्गाकारादरी भूमिविवरं वा । गुहा देवकृतगृहम् । अश्मगृहकृतम् । उपत्यका पर्वतासन्ना भूमिः, लयनं पौरुषेयं टङ्कोत्पादितगृहम्, गूढखातं महाशिलापिहितद्वारं बिलमन्तर्गतगूढनदी वा । एतेषामन्तर्मध्ये प्रस्यन्दिनः जम्बू-फलादिदशोपमानवर्णाः जम्बूचूततालानि प्रतीतानि, पक्वहरिद्राभेदः शोधित-हरिद्राभङ्गः, हरितालहिङ्गुलकौ पाषाणविशेषौ । क्षौद्रं मधु पुण्डलीकं श्वेतपद्मम्, शुकमयूरयोः पत्रम् तत्पिच्छमेतत् । (सवर्णवर्ण) सवर्णोदकाः तत्तुल्यवर्णोदकाः । तत्स-वर्णा ओषधयश्च, पर्यन्ताः समीपप्रदेशाः येषामिति । चिक्कणाः स्पृश्यमाना हस्ता सङ्गिनः, विशदाः तद्विपरीता भारिका गुरवःरसाः शिलाकन्दरादिनिष्यन्दाः, काञ्च-निकाः सुवर्णप्रयोजनाः ।

श्रीमूला

तेषामेव लक्षणान्तरमाह—अप्स्विति । अप्सु निष्ठ्यूता जले क्षिप्ताः, तैलवद्वि-

४. प्रवत्तनामित्यादि—पा०

तत्प्रतिरूपकमुग्रगन्धरसं शिलाजतु विद्यात् ।

श्रीमूला

सर्पिणः जले तैलवद् विसर्पणशीलाः, पङ्कमलग्राहिणश्च जलगतं पङ्कमादाय कतकवदधोगत्वराश्च, यथोक्ताः काञ्चनिकाः रसाः, ताम्ररूप्ययोरुपरि वेद्धारः ताम्रस्य रूप्यस्य चोपरि क्षिप्ताः सन्तः जात्यन्तरापादकाः सुवर्णत्वापादका इत्यर्थः । वेध्यवेदध्रोः योगपरिमाणमाह—शतादिति । शतमासाद्य, ल्यब्लोपे पञ्चमी, तच्च शतं ताम्ररूप्य योर्वेध्ययोः पलशतं वेद्धुस्तु रसस्य परिमाणम् एकपलात्मकं विशेषाकथनात्, तथा च ताम्रपलशते रूप्यपलशते वा काञ्चनिकरसो वेधशास्त्रविधिनैकपलः क्षिप्तस्तत्सर्वं स्वर्णीकरोतीत्युक्तं भवति । इह वेद्धार इति 'विध विधान इत्यस्मात् तृच्, विधानं च रूपान्तरापादनलक्षणं विवक्षितमिति वोद्धव्यम् ।

तत्समरूपगन्धरसे शिलाजतुनि तद्भ्रमापनोदनार्थमाह—तत्प्रतिरूपकमिति । तत्प्रतिरूपकं तस्य काञ्चनिकरसस्य प्रतिरूपकं सदृशरूपं समानवर्णम्, उग्रगन्धरसं तद्वदुग्रगन्धमुग्ररसं च रसवस्तु, शिलाजतु तत्संज्ञं द्रव्यान्तरं, विद्याद् उपयोगादिना परीक्ष्य निश्चिनुयात् । अथवा रूपगन्धरसमात्रसाम्योक्त्या तैलवद्विसर्पित्वपङ्कमलग्राहित्वयोरभावस्य द्योतनात् तेनैव शिलाजतुत्वमवधारयेदित्यर्थः ।

चाणक्यटीका

निष्ठ्यूता: क्षिप्ताः पङ्कग्रा (वाः ? हिणः) गुरुत्वात् पङ्कं श्रयन्ति । शतादुपरीति अधिकेनैव एकेन भागेन परेणेत्यर्थः । वेद्धारः सुवर्णस्य कर्त्तारः इत्यर्थः ॥

उग्रगन्धरसमिति । न सर्वैर्गुणैः किन्तु गन्धरसाभ्यामेव तत्सदृशं शिलाजतु ज्ञात्वा तदर्थी गृह्णीयात् ॥

प्रतिपदपञ्चिका

पुनः परीक्षान्तरमाह—अप्सु, निष्ठ्यूता जले प्रक्षिप्तास्तैलवद्विसर्पिणः सद्यो—व्यापिनः पङ्कमलग्राहिणः अपरित्यक्तनील पङ्कजमलत्वान्नस्वच्छीभवन्तीत्यर्थः । उदकप्रक्षिप्ता वा तत्पङ्कमलमादाय गुरुत्वादधो गच्छन्तीत्यपरे ।

त एवं लक्षणाः स्ताम्ररूप्ययोश्शतादुपरि वेद्धार इति । ताम्रपलशते रूप्यपलशते वा स्वेन विधिना पलकमेकमुपक्षिप्तम् सर्वं काञ्चनीकरोति । शतादिति, पञ्चम्या वेद्धा इति, गुणप्रसारणयोश्च लक्षणं मृग्यम् ।

सर्व एवैवं लाक्षणिको रसः । काञ्चनिक इति प्राप्ते तदपवादमाह—तत्प्रतिरूपमिति । तत्तुल्यवर्णमुग्रगन्धरसम् गन्धरसाभ्यामपि समानम् । शिलाजतु विद्यात् । शिलाजतु नाम द्रव्यान्तरमुपयोगान्तरादन्वयव्यतिरेकाभ्याम् अभ्यासवशेन वा जानीयादिति केचित् । अप्सु तैलवदविसर्पणात् पङ्कमलाग्रहणाद्वा विद्यादित्यपरे ।

[ताम्रादेः स्वर्णत्वापादकानां त्रिविधानां भूमिधातुरसधातूनां लक्षणानि, तत्परीक्षाक्रमाश्च]

पीतकास्ताम्रकास्ताम्रपीतका वा भूमिप्रस्तरधातवः, भिन्ना नीलराजिमन्तो मुद्गमाषकृसरवर्णा वा दधिबिन्दुपिण्डचित्रा हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णा वा भिन्नाश्चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः सगुलिका अर्चिष्मन्तः, ताप्यमाना न भिद्यन्ते, बहुफेनधूमाश्च, सुवर्णधातवः प्रतीवापार्थाः ताम्ररूप्यवेधनाः ।

श्रीमूला

अथ त्रिविधान् भूमिप्रस्तरधातूनाह—पीतका इति । पीतकाः केवलपीताः, ताम्रकाः केवलताम्राः, ताम्रपीतकाः उक्तोभयमिश्राः । वेति विकल्पे, एवं त्रिविधाः, भूमिप्रस्तरधातवः भूमिधातवः प्रस्तरधातवश्च, भिन्ना नीलराजीमन्तः विदारिताः, मध्ये नीलरेखायुक्ताः, मुद्गमाषकृसरवणी वा मुद्गमाषतिलौदनसवर्णाः । वेति विकल्पे । दधिबिन्दुपिण्डचित्राः दधिबिन्दुचित्राः दधिकणाकारैः सूक्ष्मैर्बिन्दुभिराकीर्णाः दधिपिण्डचित्राश्च दधिपिण्डसदृशैः स्थूलबिन्दुभिराकीर्णाश्च, हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णाः हरिद्रा रजनी, हरीतकी पथ्या, पद्मपत्रं पद्मदलं । शैवलं जलनीली यकृत्, कालखण्डाख्यो मांसविशेषः, प्लीहा गुल्मः, अनवद्यं कुङ्कुमम् एषामिव वर्णो येषां ते तथाविधाः । भिन्नेषु विशेषमाह—भिन्नाः सन्तः, चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः चुञ्चुवालुका सूक्ष्मवालुकेति स्वामी । तद्वन्तः लेखा राजयः तद्वन्तः बिन्दुमन्तः स्वस्तिकस्त्रिकोणरेखाविशेषस्तद्वन्तः, सगुलिकाः गुटिकाकारशर्करोपेताः, अर्चिष्मन्तो दीप्तिमन्तः । परीक्षान्तरमाह—ताप्यमानाः सन्तः न भिद्यन्ते न स्फुटन्ति । कीदृशास्तर्हि भवन्तीत्यत्राह—बहुफेनधूमाः बहुफेनाः बहुधूमाश्च भवन्ति । चशब्दः समुच्चये । एवंलक्षणाः भूमिप्रस्तरधातवः, प्रतीवापार्थाः प्रतीवापो नाम वेधनद्रव्यस्यावर्तमाने ताम्रे रूप्ये वा चूर्णीकृत्य प्रक्षेपः तदर्थास्तत्प्रयोजनाः, ताम्ररूप्यवेधनाः ताम्रस्य रूप्यस्य वा स्वर्णत्वापादकाः, अत एव सुवर्णधातवः सुवर्णहेतुभूता धातव इत्युच्यन्त इत्यर्थः ।

चाणक्यटीका

नवा ताम्रपीतका मनश्शिलावद् भूमिधातवः (प्रस्तुतकथातप ? पीतकास्ताम्रकावा) शुद्धसङ्कीर्णभेदात्त्रिविधाः । तेषां विशेषमाह—भग्ना इति । नीलराजीवन्त इति नीलरेखान्विताः । दधिबिन्दुचित्राः दधिबिन्दुभिरन्तश्चित्राः । यकृत्प्लीहाउभये रागौ । यकृदित्यन्ये कालेयकमाहुः । हरिद्रादीनामिव येषामनवद्यो वर्णः । चूर्णाद्धिविशेषः तद्बीजसदृशानाम् । लेखावन्त इति स्वस्तिकवन्तः स्वस्तिकाकारलेखायुक्ताः । सुगुटिका (गुटिका) युक्ताः । सुवर्णधातवः श्वेताः सुवर्णाभा भूमिभेदाः प्रस्तरभेदाश्च । ताम्रवेधनाः प्रतीवापेन स्वशक्त्यपेक्षेण भागेनेति बोद्धव्यम् ॥

[रूप्यहेतूनां अष्टादशप्रकाराणां धातूनां लक्षणानि]

शङ्खकर्पूरस्फटिकनवनीतकपोतपारावतविमलकमयूरग्रीवावर्णाः सस्यकगोमेदकगुडमत्स्यण्डिकावर्णाः कोविदारपद्मपाटलीकलायक्षौमातसीपुष्पवर्णाः ससीसाः साञ्जनाः विस्राः, भिन्नाः श्वेताभाः कृष्णाः कृष्णाभाः श्वेताः, सर्वे वा लेखाबिन्दुचित्राः मृदवो ध्मायमाना न स्फुटन्ति बहुफेनधूमाश्च रूप्यधातवः ।

प्रतिपदपञ्चिका

भूमिप्रस्तरलक्षणं सुवर्णधातुमाह—पीतका इत्यादि, पीतकाः शुद्धपीताः ताम्राः शुद्धताम्राः ताम्रपीता उभयवर्णा इत्येवं विविधा भूमिधातवः प्रस्तरधातवश्च। मध्येप्येते किमेवंवर्णा एव नेत्याह—भिन्ना विदारिता नीलराजिमन्तो नीललेखाकीर्णाः। मुद्गमाषौ प्रतीतौ धान्यविशेषौ। कृसरस्तिलौदनः तद्वर्णा वा विकल्पे। दधिबिन्दुचित्राः दधिवर्णाः ननु[1] वृषदताकीर्णाः दधिपिण्डचित्राः दधिवर्णाः स्थूलबिन्दुशबलाः तथा हरिद्रादिसप्तविधवर्णाश्च। तत्र हरिद्रादयः प्रतीताः।

यकृदुदरान्तर्गतः कालखण्डाख्यो मांसविशेषः तद्वत्। प्लीहा डिम्भः अनवद्यकुङ्कुमवर्णा तद्वर्णा वा किमेते अभिन्ना अप्येतद्वर्णा एवेत्याह—भिन्ना इत्यादि,

चुञ्चुवालुका सुक्ष्मवालुकेत्युपदेशेन। अन्ये तु चञ्चुवालुकेति पठन्तः चञ्चुपलाकाराः चञ्चुवालुकेति[2] वर्णयन्ति। चञ्चुश्चार्टकिः शाणविशेषः। लेखा राजयः। बिन्दुः प्रतीतः। स्वस्तिको नन्द्यावर्तः। सगुलिकाः निम्बफलाकारशर्करोपेताः अर्चिष्मन्तो दीप्तिमन्त इत्येवं बहिः परीक्षामभिधाय अग्निगतानां[3] परीक्षामाह—

ताप्यमाना इति, ध्मायमाना अभिद्यमानास्ते न स्फुटन्ति[4]। बहुफेनाः बहुधूमाश्च ताप्यमाना एवमेते सुवर्णधातवः। कथं पुनस्तेषां सुवर्णधातुत्वमित्याह—प्रतीवापार्था इति। प्रतिवापश्चूर्णीकृत्य आवर्तमाने ताम्रे रूप्ये वा तच्छास्त्रोक्तविधिना प्रक्षेपः। तदर्थास्तदेकप्रयोजनाः। ताम्ररूप्यवेधना इति ताम्ररूप्यस्य वा हेतुत्वापादनाः।

श्रीमूला

रूप्यधातूनाह—शङ्खेत्यादि। रूप्यधातवः रूप्यहेतवो धातवः, शङ्खवर्णकर्पूरवर्णादयोऽष्टौ सस्यकवर्णगोमेदकवर्णादयश्चत्वारः कोविदारवर्णपद्मवर्णादयः षडित्येवमष्टादशप्रकाराः। तत्र कपोतः आरण्यः कलरवः, पारावतो ग्राम्यः, विमलकः

---

१. ननु ?

२. चुञ्चुवालुकेति—पा०

३. अग्निप्रतानां—पा०

४. न भिद्यन्ते—पा०

[धातुसामान्ये गुरुत्वानुगुण्येन साराधिक्यम्,
अशुद्धधातुशोधनक्रमश्च]

सर्वधातूनां गौरववृद्धौ सत्त्ववृद्धिः ।

श्रीमूला

श्वेतरक्तो मणिः । सस्यको नीलमणिः गुडः पिण्डशर्करा, मत्स्यण्डिका शर्करा । कोविदारस्ताम्रपुष्पाख्यो वृक्षः, पाटली अमोघाख्या, कलायः सतीनकः क्षौमं क्षुमाभेदः, अतसी उमाख्या । शेषं प्रसिद्धम् । ससीसाः योगेष्टाख्यलोहानुविद्धाः, साञ्जनाः सीसकवच्छुक्लवर्णमञ्जनमिति स्वामी, तदनुविद्धाः, विस्राः दुर्गन्धाः, भिन्नाः खण्डितांश्चेत्, श्वेताभाः कृष्णाः श्वेतवर्णाः सन्तो मध्ये कृष्णवर्णाः, कृष्णाभाः श्वेताः कृष्णवर्णाः सन्तो मध्ये श्वेतवर्णाः । सर्वे वा वेति विकल्पे शङ्खादिवर्णा अष्टादशविधा अपि । लेखाबिन्दुचित्राः स्ववर्णभिन्नवर्णाभिर्लेखाबिन्दुभिश्च चित्राः, मृदवः, ध्मायमाना न स्फुटन्ति ताप्यमाना न भिद्यन्ते बहुफेनधूमाश्च भवन्ति ।

चाणक्यटीका

शङ्खेत्यादि । मत्स्यण्डिका खण्डः । विस्रगन्धाः । कृष्णा भिन्नाः सन्तः श्वेताभाः । श्वेता भिन्नाः कृष्णाभाः । सर्वेवा भिन्ना इत्येव । रूप्यधातवः भूमिभेदाः प्रस्तरभेदाः ॥

प्रतिपदपञ्चिका

इत्येवं सुवर्णधातूनभिधाय रूप्यधातूनाह—शङ्खकर्पूरेत्यादि, तत्र शङ्खवर्णादयोऽष्टौ सस्यकवर्णादयश्चत्वारः कोविदारकपुष्पवर्णादयः षडित्येवमष्टादशधा रूप्यधातवः । तत्र शङ्खादयः प्रतीताः । विमलकः श्वेतरक्तो मणिविशेषः । सस्यको नीलः गोमेदको गोपित्ताकारः । मत्स्यण्डिका शर्करा । कोविदारः काष्टाच(व)म्पकः पद्मकलायौ प्रतीतौ । पाटली पाटला । क्षौमं शुक्लपटं अतसी प्रतीता कोविदारादीनां पुष्पवर्णम् ससीसकाः सीसकानुविद्धाः सर्जना सीसकवत् शुक्लवर्णमञ्जनं तदनुविद्धा । विस्रा दुर्गन्धा, भिन्नाः कृष्णास्सन्तो मध्ये श्वेताभाः श्वेतास्सन्तः कृष्णास्सर्वे वाष्टादशप्रकाराः ।

शङ्खकर्पूरादिवर्णाभिन्नास्सन्तः तदन्य(स्य)वर्णलेखा चित्रा बिन्दुचित्रा वा मृदवो धात्वन्तरापेक्षया, ध्मायमाना स्तप्यमानाः न स्फुटन्ति न तटतटायन्ते । बहुफेना बहुधूमाश्च रूप्यधातव इति रूप्यहेतवः ।

श्रीमूला

सर्वधातूनामिति । सर्वधातूनां सर्वेषामुक्तानां वक्ष्यमाणानां च धातूनां, गौरववृद्धौ गुरुत्वोत्कर्षे सति, सत्त्ववृद्धिः । सत्त्वं धातुगतः सारः तस्य वृद्धिः, भवति ।

चाणक्यटीका

गुरुत्ववृद्ध्यन्तर्गता सत्त्ववृद्धिः ।

तेषामशुद्धाः मूढगर्भा वा तीक्ष्णमूत्रक्षारभाविताः राजवृक्षवटपीलु-गोपित्तरोचनामहिषखरकर (भ) टमूत्र लण्डपिण्डबद्धाः तत्प्रतीवापाः तद-वलेपा वा विशुद्धाः स्रवन्ति ॥

प्रतिपदपञ्चिका

सर्वधातूनामिति प्रागुक्तानां भूमिप्रस्तररसानां सुवर्णरूप्यधातूनां वक्ष्यमाणानां च ताम्रादिधातूनां गौरववृद्धौ गुरुत्वोत्कर्षे सत्ववृद्धिः सत्वोत्कर्षो मन्तव्य इति वाक्य-शेषः ।

श्रीमूला

अशुद्धानामनभिव्यक्तसत्त्वानां शोधनप्रकारमाह—तेषामिति । तेषां धातूनां मध्ये, अशुद्धाः अशुद्धद्रव्यान्तरसंसर्गदुष्टाः, मूढगर्भा वा स्वदोषादेवाप्रकाशमानसत्त्वा वा धातवः, तीक्ष्णमूत्रक्षारभाविताः तीक्ष्णमूत्रं नरमूत्रमित्येके । गजाश्वगोगर्दभच्छाग-मूत्रमित्यपरे इति स्वामी ।. तीक्ष्णक्षारः, कदल्यपामार्गादिभस्म ताभ्यां भाविताः असकृत् सेचनादिना संस्कृताः । राजवृक्षवटपीलुगोपित्तरोचना महिषखरकरभमूत्रलण्ड-पिण्डबद्धाः राजवृक्षः शम्याकः, वटः प्रसिद्धः, पीलुर्गुडफलाख्यो वृक्षः, गोपित्तरोचना गोपित्तं गोरोचना च, महिषखरकरभमूत्रलण्डं सौरिभगर्दभबालोष्ट्राणां मूत्रपुरीषम् एतैः पिण्डबद्धाः राजवृक्षादिकल्कैर्महिषादिमूत्रलण्डेन च सह मिश्रितैरुक्ततीक्ष्णमूत्र-क्षारभावितस्यात्मनश्चूर्णैर्बद्धपिण्डा इत्यर्थः, तत्प्रतीवापाः राजवृक्षादिचूर्णकृतप्रतीवापाः तदवलेपा वा तच्चूर्णकृतोपलेपा वा सन्तः, विशुद्धाः द्रव्यान्तरसंसर्गजदोषनिर्मुक्ताः, स्रवन्ति मूढगर्भतापहानेन सत्त्वमुद्गिरन्ति ।

चाणक्यटीका

तेषां यथोक्तैर्गुणैः परीक्षितानां ये केचिदन्यलोहसंसर्गाद् अशुद्धाः, शुद्धत्वे वा पृथक्भाभि (? भूताभि) र (थ ?) विस्राविणो मूढगर्भाः । तेषां प्रतिक्रियोच्यते । हस्त्यादीनां तीक्ष्णेन मूत्रेण अपामार्गकदलीमोक्षकादीनां तीक्ष्णेन क्षारेण पौनःपुन्येन वासिताः पश्चाद् राजवृक्षादिभिः संयुक्तैः पिण्डीकृतैरन्तः प्रक्षेप्य वेष्टिताः तत्प्रतीवापाः तदनु-लेपात् त्रिविधेन कल्केन शुद्धा भवन्ति स्रवन्ति च ॥

प्रतिपदपञ्चिका

तेषामिति, सर्वधातूनामशुद्धधात्वन्तरसम्पर्कात् मूढगर्भा वा स्वदोषेण सत्वममुञ्चतः प्रतिविधेया इत्याह—तीक्ष्णमूत्रक्षारभाविता इति ।

तीक्ष्णं नरमूत्रम् हस्त्यश्वगोजावित्वरेषु मूत्रमित्यपरे । तीक्ष्णक्षारः कदल्यपा-मार्गदेवताली(हि)विवाकुचि(चु)कायवतिलादि भस्म तद्भाविता असकृत्पायिता राजवृक्षं किरिकालकः[1] वटादिगोपित्तान्ताः गोरोचना महिषखरकर(ट)भाषाणां मूत्रलण्डं मूत्र-

---

१. चिरिकालकः—पा०

[सुवर्णरूप्ययोः मार्दवोपजनकप्रकारद्वयम्, मार्दपविलोपनप्रकारश्च]

यवमापतिलपलाशपीलुक्षारैः गोक्षीराजक्षीरैर्वा कदलीवज्रकन्दप्रतीवापो मार्दवकरः ।

मधुमधुकमजापयः सतैलं
घृतगुडकिण्वयुतं सकन्दलीकम् ।

प्रतिपदपञ्चिका

पुरीपं तेन पिण्डवन्धा धातुद्रव्यमूत्रक्षारभावितं चूर्णीकृत्य राजवृक्षादि द्रव्यकल्केन सहवद्धपिण्डा तत्प्रतीवापास्तच्चूर्णदत्तप्रतीवापाः तदवलेपा भूमयः तत्कल्कोपदेहाः शुद्धा (म) मुक्तधात्वन्तर[1] सम्पर्कदोपाः स्रवन्ति ।

स्वमूढगर्भत्वदोपं च उत्सृज्य सत्वं मुञ्चन्ति । तथा वक्ष्यमाणमपि यवमापतिलेत्यादिकमशुद्धमूढगर्भाणां पूर्ववत् पिण्डवन्धादिप्रकारैः प्रतिकृते सत्वमालक्षयति-कठिनस्य[2] मृदुकरणमित्यपरे ।

श्रीमूला

यवमापतिलपलाशपीलुभस्मभिगोक्षीराजक्षीरैश्च सम्मिश्रिताभ्यां कदलीकन्दवनसूरणकन्दाभ्यां प्रतीवापात् स्वर्णरुप्ययोर्मार्दवमुपजायत इत्याह–यवमाषेत्यादि । इह वेत्यन्तस्य विशुद्धाः स्रवन्तीत्यनेन सम्वन्धं मत्वा यवक्षारादिभिः साधनैः पूर्ववत् पिण्डवन्धनादिविधया वा धातवो विशुद्धाः स्रवन्तीत्यर्थं केचिद् वर्णयन्ति ।

चाणक्यटीका

यवमापादिभिर्विलेपविकल्पः । गोक्षीरेण वा यवक्षारादीनामसंसर्गार्थं पृथक्करणम् । कन्दली श्वेतक्षेत्रे भवति । वज्रकन्दश्च (मँहं ?) प्रतीतः मार्दवकरः ।।

प्रतिपदपञ्चिका

यवमापतिलादयः प्रतीताः । कन्दली घनागमोद्भेदिनी[3] कन्दलीतुल्यपत्रा विज्रकन्दो विष्णुकन्द इति केचित् । सुरभीत्यपरे । वनसूरण इत्यन्ये । एवं यवादिक्षारं तद्भस्म गोक्षीरं, कन्दलीवज्रकं द्वौ च मिश्रीकृत्य तत्प्रतिवापात् कठिनमपि हेमतारं मृदु भवति ।

श्रीमूला

मृदुकरणप्रकारान्तरं श्लोकेनाह—मधुमधुकमिति । सतैलं, घृतगुडकिण्वयुतं

---

१. ममुक्त—पा०

२. कनेस्य अनेकस्य—पा० ?

३. परागमोद्भेदिनी—पा०

यदपि शतसहस्रधा विभिन्नं
भवति मृदु त्रिभिरेव तन्निषेकैः ॥८२॥

गोदन्तशृङ्गप्रतीवापो मृदुस्तम्भनः ।

[ताम्रसीसत्रपूणां हेतुभूताः धातवः, तद्वर्णाश्च]

भारिकः स्निग्धो मृदुश्च प्रस्तरधातुर्भूमिभागो वा पिङ्गलो हरितः पाटलो लोहितो वा ताम्रधातुः ।

श्रीमूला

सर्पिश्शर्करासुराबीजसहितं, सकन्दलीकं कच्छजझाटभेदयुक्तं, यत्, मधु क्षौद्रं, मधुकं यष्ट्याख्यम्, अजापयः छागीक्षीरं च, त्रिभिरेव, तन्निषेकैः निषेको नाम स्वर्णादावौषधकल्कनिक्षेपः मध्वाद्यष्टककल्कनिक्षेपैः, शतसहस्रधा विभिन्नमपि नानाप्रकारकाठिन्ययुक्तमपि स्वर्णादिकं मृदु भवति ॥

चाणक्यटीका

भावितानां विभिन्नं स्फुटितम् । मृदु भवति मध्वादिनिषेचितः ॥

प्रतिपदपञ्चिका

अन्यन्मृदुकरणमाह—मधु मधुकेत्यादि, मधु क्षौद्रं मधुकं यष्टिमधुकं किण्वं सुराकरणद्रव्यम् । अन्ये तु गलचूर्णयुतमिति पठन्तश्चिक्कणगुणप्रतिषेधमाचक्षते—शेषं सुबोधम् । निषेको विकृतस्य सुवर्णादेरुपरि औषधकल्कनिक्षेपः । मृदुस्तम्भनमाह—

श्रीमूला

मार्दवापायकरमाह—गोदन्तेत्यादि । गोदन्तशृङ्गप्रतीवापः गोर्दन्तशृङ्गचूर्णयोर्द्रुतसुवर्णाद्युपरि प्रक्षेपः, मृदुस्तम्भनः मार्दवविलोपनो भवति इति स्वर्णरूप्यधातुप्रकरणम् ।

अथ ताम्रधातुमाह—भारिक इति । भारिकः गुरुः, स्निग्धो मसृणः, मृदुश्च, प्रस्तरधातुः पाषाणधातुः, भूमिभागो वा भूमिधातुर्वा, ताम्रधातुः ताम्रयोनिर्भवति । तस्य चतुर्विधान् वर्णानाह पिङ्गलः कपिलः हरितो नीलः, पाटल ईषद्रक्तः, लोहितो वा रक्तो वा ।

चाणक्यटीका

मृदुस्तम्भन इति मृदुत्वेन अकर्मण्यस्य स्तम्भनकर इत्यर्थः ॥ कर्बुरवर्णः शबलवर्ण इत्यर्थः ।

प्रतिपदपञ्चिका

गोदन्तेत्यादि, गोदन्तं गोशृङ्गं चूर्णीकृत्य द्रवीभूतसुवर्णे तत्प्रक्षेपो मृदुस्तम्भनः । घनत्वापादनः । अत्र गोशब्देन केचित्सम्प्रदायाच्छागमाचक्षते ।

काकमेचकः कपोतरोचनावर्णः श्वेतराजिनद्धो वा विस्रस्सीसधातुः । ऊपरकर्बुरः पक्वलोष्टवर्णो वा त्रपुधातुः ।

[अयोवैक्रन्तकयोः हेतुभूताः धातवः,
मणिधातवश्च]

कुरुम्बः पाण्डुरोहितसिन्दुवारपुष्पवर्णो वा तीक्ष्णधातुः । काण्डभुजपत्रवर्णो वा वैक्रन्तकधातुः ।

प्रतिपदपञ्चिका

इत्येवं सुवर्णरूप्यधातूनभिधाय ताम्रधातूनाह—भारिक इत्यादि, तत्र भारिकादयः प्रतीताः, प्रस्तरधातुः पाषाणधातुः, भूमिभागो मृद्धातुः वा विकल्पे । साम्प्रतं चतुरस्ताम्रधातुवर्णानाह—पिङ्गल इत्यादि, पिङ्गलः कपिलः हरितो नीलः पाटलः पाटलीपुष्पाभः लोहितो रक्तः ताम्रधातुः ताम्रयोनिः ।

श्रीमूला

सीसधातुमाह—काकेत्यादि । काकमेचकः काक इव कृष्णः, कपोतरोचनावर्णः कपोतवर्णो गोरोचनावर्णश्च, श्वेतराजिनद्धः धवललेखाबहुलः, विस्रो वा दुर्गन्धो वा, सीसधातुः सीससंज्ञलोहयोनिर्धातुर्भवति ।

त्रपुसंज्ञस्य शुक्लसीसस्य योनिं धातुमाह—ऊषरेत्यादि । ऊपरकर्बुरः ऊषरदेशवदापाण्डुः, पक्वलोष्टवर्णो वा, त्रपुधातुः ।

अयोधातुमाह—कुरुम्ब इति । कुरुम्बः श्लक्ष्णपाषाणप्रायः इति स्वामी, पाण्डुरोहितः श्वेतरक्तः सिन्दुवारपुष्पवर्णो निर्गुण्डीपुष्पवर्णः, वेति विकल्पे, तीक्ष्णधातुः तीक्ष्णम् अयः तद्योनिर्धातुर्भवति ।

वैक्रन्तकधातुमाह—काकाण्डेत्यादि । काकाण्डभुजपत्रवर्णो वा काकाण्डवर्णो भूर्जपत्रवर्णो वा, क्वचिद् भूर्जेत्येव पाठः । काण्डेति पाठे काण्डो वृक्षजातिविशेष इति व्याख्येयम् । वैक्रन्तकधातुः वैक्रन्तकाख्यलोहविशेषयोनिर्धातुः । कांस्यादिकं तु तमरकादियुक्तताम्रादिनिष्पाद्यमिति तस्य न धात्वन्तरमस्ति । एवं लोहधातवः सप्ताभिहिताः ।

चाणक्यटीका

सीसधातुस्त्रपुधातुः । प्रस्तरो भूमिभागो वेति वर्त्तते ॥

मुरवः[1] पाषाणविशेषः । वैक्रन्तधातुरच्छलोहस्य धातुरित्यर्थः । वैक्रन्तको हि वारकुश(? वर्वरकू)ले चोनदेशे वा समुत्पद्यते । सुवर्णादिलोहानां सप्तानां धातवोऽभिहिताः ।

वृत्तलोहन्तु ताम्रकाप्यसंसर्गात्, काप्यमपि त्रपुसंसर्गादिति पृथङ् नोच्यते ॥

---

१. 'कुरुम्ब' इति भट्टस्वामी, 'सुरुम्ब' इति केरलभाषाटीका, 'मुरुम्ब' इति रसोपनिषत् ।

अच्छः स्निग्धः सप्रभो घोषवान् शीततीव्रस्तनुरागश्च मणिधातुः ।।

प्रतिपदपञ्चिका

सीसधातुमाह—काकमेचक इत्यादि, काकमेचकः काक इव कृष्णवर्णः कपोतवर्णः प्रतीतः रोचनावर्णः गोरोचनावर्णः श्वेतराजिनद्धः शुक्ललेखाबहुलः। विस्रो दुर्गन्धः सीसाख्यलोहहेतुः । त्रपुधातुमाह—ऊषरकर्बुर इति, उपरवदापाण्डुरक्तः[1] पक्वलोष्ठवर्णः अयं च त्रपुधातुः त्रपुणः शुक्लसीसस्य धातुः कारणम् ।

तीक्ष्णधातुमाह—कुरुम्ब इत्यादि, कुरुम्बः श्लक्ष्णपाषाणप्रायः, पाण्डुलोहितः प्रतीतः, सिन्दुवारपुष्पवर्णे निर्गुण्डीकुसुमवर्णः। तीक्ष्णधातुः अयोधातुः। वैक्रन्तकधातुमाह—काण्डमित्यादि। काण्डं समुद्रान्तरक्तम्। वल्लीफलं भूर्जपत्रम्। भूर्जाभिधानो वृक्षः तत्फलवर्णं वैक्रन्तकं लोहविशेषः। तथा च—

वैमल्ययुक्तं[2] भिदुरं सितं च वैक्रन्तकं नभोलोहविकर्तनं च।
तद्धातुवादेन सह, धनं च शस्त्रे च शस्त्रं प(क)चिदेव सूच्ये[3] ।

ताम्रादिभ्य एव संयोगविशेषे कांस्यवृत्तलोहादीनां निष्पत्तिरतस्तेषां पृथक् धात्वन्तराभावात् इहानभिधानमिति ।

श्रीमूला

अथ मणिधातूनाह—अच्छ इति। अच्छो बिम्बग्राही, स्निग्धो मसृणः, सप्रभः सद्युतिः, घोषवान् अग्नितापने टङ्कच्छेदने च महाशब्दः, शीततीव्रः अतिशीतस्वभावः अग्नेरपनयने क्षिप्रशीतो वा, तनुरागः अल्परागः, मणिधातुः मणियोनिर्धातुर्भवति। इयमत्र सङ्ग्रहार्या—

"कनकं रूप्यं ताम्रं सीसं त्रपु तीक्ष्णकं च वैक्रन्तम्।
मणयोऽष्टौ निर्दिष्टा अष्टानां धातवोऽप्यष्टौ ॥" इति।

चाणक्यटीका

अच्छोऽन्तर्गतस्याप्यवसायात्। घोषवानभिहन्यमानः। शीतः स्पर्शगतः। तीव्रतरराग: लोहितादित्यस्य रागेणोपदिग्धः मणिधातुः प्रस्तरो भूमिभागो वा॥

प्रतिपदपञ्चिका

एवं सप्तप्रकारान् धातूनभिधाय मणिधातूनाह—अच्छ इत्यादि। अच्छः येन व्यवहितमपि द्रव्यान्तरमुपलभ्यते। स्निग्धः स्नेहार्द्र इव लक्ष्यते। सप्रभो दीप्तिमान्

---

१. ऊपरवद्पाण्डुरक्तः—पा०

२. वैमल्ययुक्तं विदुरं सितं च वैक्रन्तकंलोह विकर्तनं च।
तद्धातुवादे रस साधनं च शस्त्रे च शस्त्रं क्वचिदेव पक्वम् ॥

३. 'पचिदेव'इत्त शुद्धं प्रतिभाति।

[आकरोत्पन्नद्रव्याणां सदुपयोगविधिः,
आकरकर्मणां प्रवर्तनक्रमश्च]

धातुसमुत्थितं तज्जातकर्मान्तेषु प्रयोजयेत् ।

कृतभाण्डव्यवहारमेकमुखम्, अत्ययं चान्यत्र कर्तृक्रेतृविक्रेतॄणां स्थापयेत् । आकरिकमपहरन्तमष्टगुणं दापयेदन्यत्र रत्नेभ्यः ।

प्रतिपदपञ्जिका

घोषवान् । ध्मायमानो महाघोषः टङ्कादिभिः विच्छिद्यमानो वा शीततीव्रः अग्नेरपनीतश्शीघ्रं शोतो भवति । स्वतोऽतिशीत इत्यपरे । तनुरागः स्वल्परागः मणिधातुः काचफलहेतुः । तथा च—कनकं रूप्यं ताम्रं सीसं त्रपु तीक्ष्णकं च । वैकृतं मणयोऽष्टौ निर्दिष्टाः । अष्टानां धातवोऽप्यष्टौ ।

श्रीमूला

इत्थं धातुपरीक्षामुपदिश्य तत्कर्मान्तप्रवर्तनमधिकृत्याह—धातुसमुत्थमिति । धातुसमुत्थितमित्यपि पाठः । धातुभ्यः स्वल्पधनव्यययत्नेन प्रथममुत्पन्नं स्वर्णादिद्रव्यं, तज्जातकर्मान्तेषु धातुसम्बन्धकर्मस्थानेषु स्वर्णरूप्याद्याकरेषु, प्रयोजयेत् विनियुञ्जीत बहुतरोत्पत्त्यर्थम् । विनियोज्यस्य धातुसमुत्थत्ववचनं पूर्वपूर्वसम्यक्प्रवृत्तिफलोपलम्भे सत्येवोत्तरोत्तरप्रवृत्तिः कार्येति द्योतयितुम् ।

कृतेत्यादि । कृतभाण्डव्यवहारं घटितसुवर्णादिभाण्डविक्रयम्, एकमुखम् एकद्वारकमेकविक्रयस्थानकं, स्थापयेत् प्रख्यापयेत् । अन्यत्रकर्तृक्रेतृविक्रेतॄणां स्थापितान्यदेशे भाण्डक्रियाक्रयविक्रयकारिणाम्, अत्ययं च दण्डं च 'पञ्चविंशतिपणमत्ययं चान्यत्रकर्तृक्रेतृविक्रेतृपरीक्षितृभ्य' इति लक्षणाध्यक्षोक्तं, स्थापयेत् । दण्ड इह द्रव्यसारतारतम्यापेक्षः शुल्काध्यक्ष—धर्मस्थीयकण्टकशोधनोक्तोऽपराधानुरूपः कल्पनीयः प्रमाणाकथनादिति केचित् ।

आकरिकमिति, अपहरन्तम् आकराद् द्रव्यं हरन्तं, आकरिकम् आकरकर्मकरम्, अष्टगुणम् अपहृतद्रव्याष्टगुणमत्ययं दापयेत् । तत्रापवादमाह—अन्यत्र रत्नेभ्य इति । रत्नापहारे तु नायं दण्डः, किन्तु घातो वक्ष्यते ।

चाणक्यटीका

धातुसमुत्थं सुवर्णादि तत्करणसंस्कारकुलानां सुवर्णकारादीनां कर्मान्तेषु प्रयोजयेद् भाजनशस्त्रालङ्कारार्थम् ॥

(अ ?) कृतभाण्डानाञ्च विक्रयादिव्यवहारम् । एकमुखम् एकायत्तम् । अत्ययञ्च विनयद्रव्यजातिप्रमाणापेक्षया यथार्हं वक्ष्यमाणप्रमाणापेक्षं वा । अन्यत्रेति निर्दिष्टस्थानात् । कुर्वतां क्रीणतां विक्रेतॄणाञ्च स्थापयेत् ॥

स्तेनमनिसृष्टोपजीविनं च बद्ध्वा कर्म कारयेत्, दण्डोपकारिणं च ।

चाणक्यटीका

आकरिकम् आकराध्यक्षम् । धातुकर्मान्तोद्भवम् अपहरन्तमित्यर्थः । अष्टगुणमपहृत(द्रव्यस्य) अन्यत्र रत्नेभ्य इति । रत्नापहारे तु वध एव दण्डोऽन्यत्रोक्त इति ॥

प्रतिपदपञ्चिका

सुवर्णादीनामुत्पत्तिमभिधाय विनियोगप्रकारमाह—धातुसमुत्थमित्यादि । धातुसमुत्थमाकरोत्पन्नं सुवर्णादिद्रव्यं तज्जातकर्मान्तेषु सुवर्णाद्याकरेषु प्रयोजयेत् । प्रभूततरोत्पत्तये विनियोजयेत् ।

अथवा तज्जाताः, तज्जातीया निपुणास्तैरधिष्ठिताः कर्मान्तास्तज्जातकर्मान्तास्तेषु दृष्टप्रत्ययात् प्रयोजतेत् ।

कृतभाण्डव्यवहारमिति, ईषद्घटिताघटितभाण्डसुवर्णादिक्रयमेकमुखमेकापणमस्मिन्नेव प्रदेशे क्रयविक्रयादिकं कर्तव्यमिति ।

कृतनियममत्ययं दण्ड्यादन्यत्र कर्त्रादीनां स्थापयेत् । श्रावयेत्तत्र दण्डप्रमाणस्य अनभिधानात् वक्ष्यमाणलक्षणाध्यक्षाभिहितपञ्चविंशतिपणत्ययं चेति । पञ्चविंशतिपणाः इत्ययं स्थापयेदिति केचित्द्रव्याणां सारासारापेक्षया शुल्काध्यक्षधर्मस्थीयकण्टकशोधनोक्तापराधानुरूपो दण्डः कल्पनीय इत्येव । तत्प्रमाणानभिधानमित्यपरे । अन्यत्र कर्ता तदाकरादन्यत्र धातुभ्यस्सुवर्णादियायिता । क्रेतृविक्रेतारौ प्रतीतौ ।

श्रीमूला

स्तेनमिति । स्तेनम् आकरिकमनाकरिकं वा चोरम्, अनिसृष्टोपजीविनं च विना राजानुमतिं धातुवादविद्यया वृत्तिं वर्तयन्तं च बद्ध्वा निगडितं कृत्वा, बद्धमिति पाठेऽप्ययमेवार्थः । कर्म आकारव्यापारं, कारयेत् । दण्डोपकारिणं च महापराधेषु प्राड्विवाकनिर्णीतो देहदण्डप्रतिनिधिर्धनदण्डो देहपीडापरिहार्थत्वादपराधिनं प्रति उपकारो भवतीति दण्डोपकारः स उच्यते तद्वन्तं च अर्थाददत्तदण्डं, बद्ध्वा कर्म कारयेत् ।

चाणक्यटीका

स्तेनम् आकरेऽन्यत्र वा । अनिसृष्टोपजीविनम् अननुज्ञातमाकरम् अन्यद्वा स्वयमुपजीवन्तम् । कर्म कारयेत् आकरेष्वेव । दण्डोपकारिणश्चेति । दण्डं हिरण्यं दातुमसमर्था ये केचिद् दरिद्रत्वात्, तानपीत्यर्थः ॥

ननु च दासकर्मकरकल्पे वक्ष्यत्येव "दण्डप्रणीतः कर्मणा समुपनयेत्" (अधि० ३. अध्या० १३) इति । सत्यमेवम् । अन्यकर्मणि चरितार्थानामन्यतरकर्मणि । अथवा वधार्हाः सन्तो ये दण्डेनोपचिकीर्षिताः तानाकरेष्वित्यर्थः ॥

प्रतिपदपञ्चिका

आकरिकमाकरनियुक्तकर्मकरादिकं किञ्चिद्द्रव्यजातमपहरन्तमष्टगुणं दापयेत् । अन्यत्र रत्नेभ्य इति । रत्नापहारे तु घातं वक्ष्यति ।

व्ययक्रियाभारिकमाकरं भागकेन प्रक्रयेण वा दद्यात्, लाघविकमात्मना कारयेत् ।

[लोहोत्पादनतत्क्रयविक्रयाणां
लोहाध्यक्षकर्तव्यता]

लोहाध्यक्षः ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् कारयेत् । लोहभाण्डव्यवहारं च ।

प्रतिपदपञ्चिका

स्तेनं तस्करम् । आकरिकमनाकरिकं वा अष्टगुणदण्डदानासमर्थम् अनिसृष्टोपजीविनमननुज्ञातधातुवादव्यवहारिणं बद्ध्वा निगडसंयुतं कृत्वा ध्मानादि कारयेत् । भाण्डोपकारिणश्च सङ्ग्रहणाद्युपक्रोशगृहीतान् तद्दण्डदानासमर्थान् बद्ध्वा कर्म कारयेत् । चः समुच्चये ।

श्रीमूला

व्ययक्रियेत्यादि । व्ययक्रियाभारिकं व्ययक्रिययोर्भारिकं गुरुं गुरुधनव्ययसाध्यं गुरुप्रयत्नसाध्यं चेत्यर्थः, आकरं, भागेन् दद्याद्व्ययलाभभागव्यवस्थया परेषां प्रतिपादयेत् । प्रक्रयेण वा दद्यात् । अस्याकरस्यैतावत् सुवर्णादिकम् राजार्थे देयमिति परिपण्य वा परेषां दद्यात् लाघविकं लघुव्ययसाध्यं लघुश्रमसाध्यं चाकरम्, आत्मना कारयेत् स्वयं व्यापारयेत् ।

अथावान्तराध्यक्षव्यापारमाह—लोहाध्यक्ष इति । लोहाध्यक्षः सुवर्णरूप्ययोर्वक्ष्यमाणत्वात् तदतिरिक्तं ताम्रादिकमिह लोहः तदध्यक्षः, ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् आरकूटो रीतिः, वृत्तं तदाख्यो लोहः कंसो घोषाख्यः तालः, कांस्यं सातिशयनादयुक्तं वाद्योपयोगि लोहः कालायसं ताम्रादीनां कर्मान्तान् तद्भाण्डघटनकर्माणि कारयेत् लोहभाण्डव्यवहारं च ताम्रादिनिर्मितभाण्डक्रयविक्रयव्यवहारं च कारयेत् ।

चाणक्यटीका

व्ययक्रियाभारिकमिति व्ययेन भारिकं महाव्ययम् । क्रियया च भारिकं देशादिदोषाद् दुष्करतरम् । भागेन पञ्चमेन षष्ठेन वा । प्रक्रयेण क्लृप्तेन इयता हिरण्येनायं भुज्यतामिति । अन्येभ्यश्चेति[1] षड्भ्यो दापयेद् अध्यक्षो राजेत्यर्थः । लाघविकं व्ययक्रियाभ्याम् । आत्मना कारयेत् ॥

लोहाध्यक्षः ताम्रादिलोहानाम् एतद्विकाराणाञ्च भाण्डानां निष्पत्तिं कारयेत् । आरकूटं रीतिका । लोहव्यवहारश्चेति पूर्वोक्तमेकमुखमित्याद्यपेक्षणीयम् ॥

---

१. "अन्येभ्यश्च षड्भ्यो दापयेदध्यक्षः" इति टीकानुसारो पाठः स्यात् ।

[विविधप्रमाणयोगेन नाणकादिनिर्माणस्य
टङ्कशालाध्यक्षकर्तव्यता]

लक्षणाध्यक्षः चतुर्भागताम्रं रूप्यरूपं तीक्ष्णत्रपुसीसाञ्जनानामन्यतमं माषबीजयुक्तं कारयेत्, पणमर्धपणं पादमष्टभागमिति, पादाजीवं ताम्ररूपं माषकमर्धमाषकं काकणीमर्धकाकणीमिति ।

प्रतिपदपञ्चिका

व्ययक्रियाभारिकमिति, व्ययभारिकं बहुपरिव्ययसाध्यं क्रियाभारिकं कर्म भूयिष्ठं आकरं भागकेन च पञ्चभागषड्भागादिना प्रक्रयेण परिपणेन वा अन्येषां दद्यात् । लाघविकमल्पव्ययमल्पप्रयासं चाकरमात्मना कारयेत् ।

इदानीमवान्तराध्यक्षव्यापारमाह—लोहाध्यक्ष इति, लोहशब्देन सुवर्णरजतव्यतिरिक्तं ताम्रादिकं गृह्यते । तदध्यक्षस्तत्कर्मान्ताधिकारी, ताम्राद्युपस्करघटनकर्मान्तान् कारयेत् । ताम्रादयः प्रतीताः आरकूटको रीतिका वृत्तं वृत्ताख्यलोहभाण्डव्यवहारं चेत्यत्र लोहशब्दस्ताम्रादिसमस्तवाचकः । भाण्डव्यवहारं घटिका ताम्रापस्करादिक्रयविक्रेयव्यवहारं चः समुच्चये ।

श्रीमूला

अथ पण्यव्यवहारार्थं लक्षणाध्यक्षव्यापारमाह—लक्षणेत्यादि । लक्षणाध्यक्षः लक्षणं पणमाषकादिरूपनिर्माणं तदध्यक्षः टङ्कशालाध्यक्ष इति यावत् । पणव्यवहारश्च रूप्यरूपश्चतुर्विधः ताम्ररूपश्चतुर्विधः इत्यष्टविधे तस्मिन् रूप्यरूपः चतुर्भागताम्रमित्यादिना, ताम्ररूपश्च पादाजीवमित्यादिना व्युत्पाद्यते । षोडशमाषको हि पणः प्रसिद्धः, तस्य चतुर्भागश्चत्वारो माषाः तत्प्रमाणं ताम्रं यस्य तथाविधम्, तीक्ष्णत्रपुसीसाञ्जनानामन्यतममाषबीजयुक्तं तीक्ष्णं कालायसं त्रपु रङ्गं सीसं योगेष्टाख्यम्, अञ्जनं रसाञ्जनम्, एषां चतुर्णामन्यतमस्य माषप्रमाणेन बीजेन निर्माणार्थेन युक्तम्, अर्थात् परिशिष्टैकादशमाषपरिमाणरूप्यकम्, रूप्यरूपं रूप्यांशभूम्ना रूप्यमयम्, पणं पणसंज्ञं नाणकविशेषम्, कारयेत् । इति उक्तेन प्रकारेण, अर्धपणं पादम् अष्टभागं कारयेत् पणोक्तताम्राद्यर्धप्रमाणयोगेनार्धपणाख्यं तच्चतुर्भागप्रमाणयोगेन पादपणं तदष्टभागप्रमाणयोगेनाष्टभागाख्यं च निर्मापयेदित्यर्थः । प्रकारान्तरार्थो वा इति शब्दः इति कारयेदिति योज्यः, त्रिपादकादिकं प्रकारान्तरमपि व्यवहारानुगुणं निर्मापयेदित्यर्थः । पादाजीवं रूप्यरूपचतुर्भागव्यवहार्यम्, ताम्ररूपं ताम्रांशभूम्ना ताम्रमयं रूपम्, माषकं माषकाख्यं कारयेत् । ताम्रस्यैकादश धान्यमाषाः रूप्यस्य चत्वारस्तीक्ष्णाद्यन्यतमस्यैक इति योगप्रमाणेन रूप्यरूपपणवत् षोडशधान्यमाषप्रमाणकोऽयं ताम्ररूपमाषको द्रष्टव्यः । एवं माषकोक्तताम्राद्यर्धप्रमाणयोगेनार्धमाषकम् तच्चतुर्भागप्रमाणयोगेन काकणीं, तदष्टभागप्रमाणयोगेनार्धकाकणीं च कारयेत् ।

[नाणकप्रचारव्यवस्थाया रूपपरीक्षककर्तव्यता,
तत्तद्देयांशाः, चोराणां दण्डश्च]

रूपदर्शकः पणयात्रां व्यावहारिकीं कोशप्रवेश्यां च स्थापयेत् ।

चाणक्यटीका

लक्षणाध्यक्षः हट्टाङ्कितगजपतिरित्यर्थः । (चतुर्भागताम्रं) चतुर्भागं ताम्रं यस्य तम् । रूप्यरूपमिति प्राधान्याद् व्यपदेशः । तीक्ष्णत्रपुसीसलोहानाम् अञ्जनस्य मापकप्रमाणेन बीजस्थानीयेन सर्वद्रव्यैकीकरणार्थेन वर्णान्तरकरणार्थेन च युक्तं कारयेत् । वर्णादिभेदेन चतुर्विधम् ॥

पादाजीवं ताम्रप्रक्षेपाद् (रूपाद् अलाभितं ?) शुद्धरूप्यसमानरूपमित्यर्थः । परिमाणप्रसिद्धया षोडशपरिमाणं यथोच्यते पुराकल्पे । एतदपि षोडशपलमाष-(शवर्यंत् ?) षोडशमाषं कार्षापणमिति । द्वादशपणो दण्ड इत्यादिपरिज्ञानार्थं तूच्यते त्र्कार्षिकः ताम्रिकः पण इति । रूप्यपणादिव्यवहारादपि लाघवार्थमाह—ताम्ररूपमिति । ताम्रमापकाष्टभागोऽर्धकाकणी । अपरे योगविभागेन व्याचक्षते—ताम्रं रूपं किं प्रमाणमिति चेत्, पणमर्धपणमित्यादि । तच्च दण्डकर्मौपयिकम् । ततो मापकमित्यादि । एवंरूपं रूपं चतुर्विधमष्टविधमिति (अ ?) नयने सुवर्णरूपाण्यपि व्यवहारविशेषार्थं योजनीयानीति ॥

प्रतिपदपञ्चिका

एवं लोहाध्यक्षव्यापारमभिधाय पणयात्राव्यवहारार्थं, लक्षणाध्यक्षव्यापारमाह-लक्षणाध्यक्ष इत्यादि । लक्षणाध्यक्षष्टङ्कशालाधिकारी । स व्यवहारार्थं रूप्यरूपं कार्षापणमिति च ।

प्रसिद्धव्यपदेशं रूप्यमयं तावदाह—चतुर्भागताम्रमित्यादिना । शास्त्रान्तर-प्रसिद्धः षोडशमाषकः पणः तस्य चतुर्भागः चत्वारो (माषप्रमाणेन) माषकास्ताम्रं तीक्ष्णादीनां चतुर्णामेकतमस्य माषप्रमाणेन बीजेन बन्धनार्थेन युक्तमेकादशरूप्यमाषक-पणाख्यमुत्तमरूपं कारयेत् । एतेनैव योगेन तदर्धप्रमाणमर्धपणं चतुर्भागप्रमाणकं पादकं पादार्धेनाष्टभागमिति कारयेत् ।

एवं सारतमां कोशप्रवेश्यां पणयात्रामुक्त्वा व्यावहारिकीमाह—पादाजीव-मित्यादि । आजीव्यत इत्याजीव्यो रूप्यरूपस्य चतुर्भागः । ताम्ररूपमिति ताम्रमयं रूपं रूप्यस्य चत्वारो भागास्ताम्रस्य चैकादश भागाः पूर्ववत्तीक्ष्णादीनाम् अन्यतम-भागयुक्तं माषकं धान्यमाषकदशकप्रमाणमर्धमाषकं तदर्धं काकणीं माषचतुर्भागमर्धका-कणीम्माषकाष्टकभागमित्येवं कारयेत् ।

श्रीमूला

रूपदर्शक इति । रूपदर्शकः रूपपरीक्षकः, पणयात्रां पणदानादानप्रस्थानम्, व्यवहारिकीं व्यवहारप्रयोजनाम्, कोशप्रवेश्यां च कोशप्रवेशनयोग्यां च, स्थापयेद् ईदृशी

रूपिकमष्टकं शतं, पञ्चकं शतं व्याजीं, पारीक्षिकमष्टभागिकं शतं; पञ्चविंशतिपणमत्ययं चान्यत्र कर्तृक्रेतृविक्रेतृपरीक्षितृभ्यः ॥

श्रीमूला

पणयात्रा व्यवहारार्था ईदृशी कोशप्रवेशनार्थेति तत्सारासारभावपर्यालोचनया व्यवस्थापयेत्। इयं राजकर्तृका पणयात्रा।

जानपदकारितायां तस्यां राजभाव्यमाह—रूपिकमित्यादि। अष्टास्योपदा दीयते अष्टकम् पञ्चास्योपदा दीयते पञ्चकम्। अष्टकं शतं पणशतेऽष्टपणग्रहणं रूपिकसंज्ञम्; पणशते पञ्चपणग्रहणं व्याजीसंज्ञम्, पणशतेऽष्टभागग्रहणं पारीक्षिकसंज्ञम्। रूपिकं व्याजीं पारीक्षिकं च यथोक्तलक्षणं स्थापयेत् व्यवस्थापयेत्। तत्र रूपिकं कर्मकरभृतिः, व्याजी राजभागः, पारीक्षिकं परीक्षकभृतिरिति बोद्धव्यम्। पञ्चविंशतिपणम्, अत्ययं च दण्डं च स्थापयेद्, अर्थादपराधे सति। स चापराधः सन्निहिताष्टभागिकपदानुकर्षणेनाष्टभागभवं दण्डमिति व्याख्यानादष्टभागापहारलक्षणो द्रष्टव्यः। अनया दिशा चतुर्भागाद्यपहारे दण्डद्वैगुण्यादिकमुन्नेयम्। केष्वपराधिषु विषयेऽयं दण्डमित्याकाङ्क्षायामाह—अन्यत्रकर्तृक्रेतृविक्रेतृपरीक्षितृभ्य इति। ये करणक्रयणादावधिकृतास्तदतिरिक्तेषु विषये। ते च जानपदा अध्यक्षपुरुषकर्मकरा वेत्यवसेयम्। अन्यत्र कर्त्रादीनां त्वपराधे द्रव्यसारासारतापेक्षो दण्डः प्रागुक्त एव। भट्टस्वामी त्वाह—'तेषां त्वन्यत्र-कर्त्रादीनामुक्त एव दण्डः "कूटकुरूपकं कुर्वतः कारयतो निपातयतो वा सहस्रदण्ड इति" इति। ईदृशं मूलवाक्यं मृग्यम्।

चाणक्यटीका

रूपदर्शकः परीक्षाकुशलः। तदाजीवपणस्थितिः द्विः प्रकारा (भाति स्पष्टा तैः पणैः ?) क्रयादिव्यवहारार्थां कोशप्रवेश्यां चातिस्पष्टलक्षणैः स्वार्थानि पञ्चावराणि।

पारीक्षिकमिति परीक्षायां भवं नवं पुराणं वा शतं परीक्ष्य रूपमष्टभागं लभेत। पञ्चविंशतिपणमत्ययञ्च राजकर्मान्तात् अन्यत्र कर्त्रादीनां स्थापयेद् दण्डमध्यक्षः॥

प्रतिपदपञ्चिका

रूपदर्शकइति, रूपपरीक्षकः पणयात्रां दातृगृहीतृव्यवहारं द्विविधां व्यावहारिकीं लोकव्यवहारार्थं पादाजीवं ताम्ररूपमित्येवं लक्षणां कोशप्रवेश्यां च व्ययभाण्डागारप्रवेशनार्हां चतुर्भागताम्रं रूप्यरूपमित्येवंलक्षणां हीनोत्कृष्टभेदेनापि व्यवस्थापयेत्।

इत्येवं राजकर्तृकां पणयात्रामभिधाय जानपदानां कारयतां राजभाव्यमाह—रूपिकम् अष्टकं शतमित्यादि, अष्टौपणा गृह्यास्तस्य च रूपिकामिति संज्ञा। तथा पणशते पञ्चपणाग्राह्यास्तस्य च व्याजीति संज्ञा। पारीक्षिकं परीक्षानिमित्तमाष्टभगिकं शतं पणशते पणस्य अष्टभागो ग्राह्यः, तस्य च पारीक्षिकमिति संज्ञा। पञ्चविंशतिपणमत्ययं च स्थापयेदिति वर्तते। यथा रूपितव्याजि पारीक्षिकाणि त्रीण्युपादानानि तद्वत्पञ्चविंशतिपणात्ययं च, चकारादनन्तरोक्तोऽष्टभागिकशब्दोऽत्रानुकृष्यते। ततश्चाष्ट-

[स्वर्णाद्याकराध्यक्षकर्तव्यानि]

खन्यध्यक्षः शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् कारयेत् पणनव्यवहारं च ॥

[लवणाध्यक्षकर्तव्तसङ्ग्रहः]

लवणाध्यक्षः पाकमुक्तं लवणभागं प्रक्रयं च यथाकालं सङ्गृह्णीयात्, विक्रयाच्च मूल्यं रूपं व्याजीं च ।

प्रतिपदपञ्चिका

भागिकमष्टभागे भवं पणाष्टभागमात्रापचारेण जानपदादीनां अध्यक्षपुरुषकर्मकराणां वा पञ्चविंशतिपणमत्ययं दण्डं स्थापयेत् एवं पणचतुर्भागापहारे चतुर्भागिकं पञ्चाशत्पणमित्येवमपचारवृद्धौ दण्डवृद्धिः। किमयं सर्वेषामेवापचारेषु दण्डो नेत्याह—अन्यत्र कर्तृक्रेतृपरीक्षितृभ्य इति। अन्यत्र अन्यस्मिन्नपराधेष्टभागापहरणादौ लक्षणाध्यक्षमाह—लक्षणाध्यक्ष इत्यादि। पाकामुक्तमुखादिषु अयमन्यत्रशब्दो व्याख्यानाद्द्विरावर्तत इति। तेषां त्वन्यत्र कर्त्रा मुक्त एव दण्डः कूट कुरूपकं कारयतो निपातपतो वा सहस्रदण्ड इति।

श्रीमूला

अथ खन्यध्यक्षव्यापारमाह—खन्यध्यक्ष इत्यादि। खन्यध्यक्षः स्वर्णरत्नाद्याकराधिकारी, शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् शङ्खानां कर्मान्तान् पाटनघर्षणादिक्रियाः वज्रमणिमुक्ताप्रवालानां कर्मान्तान् खननशोधनरञ्जनादिक्रियाः क्षाराणां कर्मान्तान् यवक्षारादीनाम् उत्पादनादिक्रियाश्च, कारयेत्। पणनव्यवहारं च शङ्खादिक्रयविक्रयव्यवहारं च कारयेत्।

लवणाध्यक्षव्यापारमाह—लवणेत्यादि। लवणाध्यक्षः, पाकमुक्तं परिणतं निष्पन्नम्, लवणभागं भागार्पिताकरलभ्यं लवणस्य भागम् प्रक्रयं च प्रक्रयः परिपणः अमुकाकरस्यैतावल्लवणं देयमिति परिभाष्यार्पितादाकराल्लभ्यं चेत्यर्थः, यथाकालं क्लृप्तकालानतिक्रमेण, सङ्गृह्णीयात्। तदिदं राजपण्यं वणिग्भिर्विक्रेतव्यम्। विक्रयाच्चेति। विक्रयाच्च तद्विक्रयलब्धद्रव्याच्च, मूल्यं पण्यमूल्यम्, रूपं पारीक्षिकमष्टभागिकलक्षणम्, व्याजीं च पुनर्मीयमानीनतापरिहारार्थमधिकतया गृह्यमाणां मानव्याजीं च सङ्गृह्णीयादिति वर्तते।

चाणक्यटीका

खन्यध्यक्षः खनिकर्मनियुक्तः शङ्खादीनां संस्कारोऽवतरणक्रियारूपाणि। क्षारस्य धात्वादिशोधनार्थान् कर्मान्तान् कारयेत्। सुवर्णादीनां तु कर्मान्ता विहिताः पुनश्च विशेषा वक्ष्यन्ते। लक्षणकर्मान्तश्च पण्यव्यवहारश्च। एकमुखमित्यादि योज्यम् ॥

आगन्तुलवणं षड्भागं दद्यात् । दत्तभागविभागस्य विक्रयः ।

चाणक्यटीका

लवणाध्यक्षः लवणाधिकृतः । पाकमुक्तमिति पाकमात्रमन्यद्रव्येणादुष्टम् । लवणभागं (किम ? क्लृप्त) प्रमाणम् । दशपञ्चदशभागमिति वचनात्[1] । यथाचरित्रं वा न्यूनमधिकं वा एतद् अ (न)ल्पव्ययक्रियाकारितमाकरं भागेन यद (ध्यात्म ? ध्यक्ष) स्योक्तम् । (यत्तु प्रक्रयेण तस्य प्रक्रयः किं पाकमुक्तवचने ?) एवं यथा-परिभाषितता, एवमादौ फलकाले विक्रीय वा दास्यामीति यथा प्रदिष्टं सङ्गृह्णीयात् । विक्रयादिति भागप्राप्तस्य लवणस्य विक्रयाद् यथोचितं मूल्यं हिरण्यादिकं-प्राप्यव्याजी च वर्ज्यमाने स्वदेशसमुत्थस्य विक्रयात् सङ्गृह्णीयात् ॥

प्रतिपदपञ्चिका

एवं लक्षणाध्यक्षव्यापारमभिधाय खन्यध्यक्षव्यापारमाह—खन्यध्यक्षश्शङ्ख-वज्रेत्यादि शंङ्खादीनां षण्णां कर्मान्तान् कारयेत् । तत्र शङ्खकर्मान्तान् पाटनघर्षणादिभिः वलयादि क्रिया, वज्रमणिमुक्ताप्रवालानां खनन-शोधन-रञ्जन-वेधना क्रिया, क्षाराणां यवक्षारादीनां उत्पादनपरिष्क्रियादिकाः पणनव्यवहारं च तेषामेव शङ्खदीनां क्रयविक्रि-यादि खन्यन्तर्गतमेव ।

लवणाध्यक्षमाह—लवणाध्यक्ष इत्यादि । पाकमुक्तं लवणभागं भागार्पितलवणा-करलब्धव्यं प्रक्रयं च परिपणार्पिताकरलब्धव्धम् । उक्तं हि, व्ययक्रिया हारिकर्माकिरं भागकेन प्रक्रयेण वा दद्यादिति तद्द्विविधं चैतद् द्रष्टव्यम् । यथाकालमिति यथापरिभाषितकालं सङ्गृह्णीयात् । तच्च सङ्गृहीतं राजपण्यं वैदेहकादिना विक्रेतव्यम् ।

तस्मच्च विक्रयाद् यदादेयं तदाह—विक्रयाच्च रूपमिति रूपं पारीक्षिकं मूल्यं च यथार्थं पण्यमूल्यं व्याजितं च आयमानव्यावहारिकमनयोर्विशेपमुक्तं हि । मानोन्मानविशेषो व्याजीति ।

श्रीमूला

इत्थं राजपण्यसम्बद्धर्मभिधायागन्तुकपण्यसम्बद्धमाह—आगन्तुलवणमिति । अगन्तुलवणं परदेशागतं लवणम्, अर्थात् तद्विक्रेता, षड्भागं दद्यात् षष्ठं भागं राज्ञे दद्यात् । दत्तभागविभागस्य दत्तो राज्ञेऽर्पितः भागः षड्भागो विभागो मानव्याजी च येन तस्यागन्तुलवणव्यवहारिणः, विक्रयो भवति । विक्रये इति सप्तम्यन्तपाठस्तु श्रेयान् उत्तरग्रन्थेनैकवाक्यत्वस्य स्वरसतो लाभात् ।

---

१. दशभागः पञ्चदशभागो वेति लवणेतरस्य क्षौमदुकूलादेः शुल्कं विहितं शुल्क-व्यवहारे । ११।२२ ।

पञ्चकं शतं व्याजीं, रूतं, रूपिकं च। क्रेता शुल्कं, राजपण्यच्छे-दानुरूपं च वैधरणं दद्यात्, अन्नत्रक्रेता षट्छतमत्ययं च।

चाणक्यटीका

(इयत्यवसून् कुतः ? आगन्तुक) लवणमिति परदेशादागतम्। यदुपचारात् तर्क्यंभूतम्। षड्भागं दद्यात्। दत्तभागविभागस्येति दत्तयथोक्तभागस्य दत्तरूपव्याजी-विभागस्य स्वदेशमुक्तस्यागन्तुकस्य वा विक्रयोऽनुज्ञेयः।

प्रतिपदपञ्चिका

इत्येवं राजपण्यादेयं निगद्यागन्तुकपण्यस्याह आगन्तुकलवणमिति। परविषयादा-गतं षड्भागं दद्यात्। राज्ञः तच्च षड्भागं कदाचित् कालान्तरमास्ते। कदाचित् तदानीमेव क्रि(वि)क्रीयते च।

विक्रये च यदादेयं तदाह—दत्तभागविभागस्येत्यादि भागः षड्भागः,

श्रीमूला

न केवलं षड्भाग—मानव्याज्योर्द्वयोरेलदानम्, किन्त्वन्येषामपि त्रयाणां तद् भवतीत्याह—पञ्चकमित्यादि। पणशते पणपञ्चकलक्षणां व्याजीम्, पारीक्षिकं शतस्याष्टभागिकलक्षणं रूपशब्दवाच्यं पणशते पणाष्टकलक्षणं रूपिकसंज्ञं च, दद्यादित्यनुषज्यते।

क्रेतेति। क्रेता शुल्कं दद्यात्, न तु विक्रेता। राजपण्यच्छेदानुरूपं राजपण्याद् विक्रीयमाणाद् यश्छेदः यावन्नष्टं तदनुरूपम् वैधरणं वैधरणशब्दितं छिन्नपूरणं च दद्यात्। अन्यत्र क्रेता विद्यमाने राजपण्येऽन्यतो लवणं क्रीणानः, षट्छतम्, अत्ययं च दण्डं च, दद्यात्।

चाणक्यटीका

पञ्चकं शतमिति पञ्च दीयन्ते यस्मिंस्तत् पञ्चकं शतं व्याजीम्। रूपं चाष्टकम्,।

एवं पलशते त्रयोदश (वप्रानि राज्ञो भवतः ?), क्रेता शुल्कं यथोक्तं दद्यात्। राजपण्यानाम् अवपातयिता छेदानुरूपं वैधरणं विसदृशकरणात्। स एव क्रमो राजलवणस्य। सहस्रं गृहीत्वा विक्रीणानस्य यच्छिद्यते शतमध्यर्धं वा तत्तत् पूरयेदित्यर्थः। अन्यत्र क्रेता राजलवणे सति षट् शतं दद्यात्। षडेव शतात् (षट्-छतमधिकं शतमिति ?) अधिकं शतं षड्छतमिति ॥

प्रतिपदपञ्चिका

विभागो मानव्याजीति। पुनः पञ्चकं शतं व्याजीति पणशते पञ्चपणग्रहणस्य च व्याजीति संज्ञा। रूपं च पारीक्षितमष्टभागिकम्। रूपिकं अष्टकंशतमित्येव मागन्तुलवणस्य पञ्चोपादानविशुद्धो विक्रय इति।

विलवणमुत्तमं दण्डं दद्यात्, अनिसृष्टोपजीवी च अन्यत्र वानप्रस्थेभ्यः ।

श्रोत्रियास्तपस्विनो विष्टयश्च भक्तलवणं हरेयुः ।

अतोऽन्यो लवणक्षारवर्गः शुल्कं दद्यात् ।

प्रतिपदपञ्चिका

क्रेता शुल्कमिति[1], शुल्कं तु क्रेता दद्यात् । न विक्रेता । निजपण्यस्य राजपण्यस्य विक्रयार्थमध्यक्षस्य वैदेहकस्य वा अर्पितस्य यस्मिन्नाशितं तदनुरूपं तावन्मात्रमेवासौ वैधरणं दद्यात् । वैधरणमिति छिन्नपूरणस्य संज्ञा अन्यत्र क्रेता राजपण्ये सति षट्शतदण्डं दद्यात् ।

श्रीमूला

विलवणमिति । विलवणं विड-(कृतकलवण)-मृदादिमिश्रं लवणम्, अर्थात् तथा विधलवणव्यवहर्ता, उत्तम दण्डम् उत्तमसाहसम्, दद्यात् । अनिसृष्टोपजीवी च यो राजाननुमत एव लवणमुत्पाद्योपजीवति स च उत्तमं दण्डं दद्यात् ।

तत्रापवादमाह—वानप्रस्थेभ्योऽन्यत्र वानप्रस्थान् विहाय । तेषां त्वनिसृष्टोपजीविनां न दण्ड इत्यर्थः ।

श्रोत्रिया इति । श्रोत्रियाः वेदाध्यायिनः, तपस्विनः दीनाः, विष्टयः हठकारितकर्मकारिणश्च, भक्तलवणम् अन्नाभ्यवहारमात्रपर्याप्तं लवणम् हरेयुः विनैव शुल्कं नयेयुः ।

अत इति । अतोऽन्यः उक्तादितरः, लवणक्षारवर्गः 'सैन्धव-सामुद्रविड-यवक्षार-सौवर्चलोद्भेदजा लवणवर्गः' इति 'फाणित-गुड-मत्स्यण्डिका-खण्डशर्कराः क्षारवर्गः' इति च कोष्ठगाराध्यक्षे वक्ष्यमाणो लवणवर्गः क्षारवर्गश्च, अर्थात् तत्कर्ता, शुल्कं दद्यात् शुल्कमेव दद्यान्न तु व्याज्यादिकमित्यर्थः ।

चाणक्यटीका

(विडलवणं)[2] मृत्तिकादियुक्तं विक्रीयमाणम् । उपचारात् कर्तृनिर्देशः, विक्रीणानो वेत्यध्याहार्यम् । अनिसृष्टोपजीवी च । अनिसृष्टोपजीविनश्च बध्वा कर्म कारयेत् । तत्रैवाकर इत्यर्थः । लवणाकरे तूत्तमं दण्डं दद्यात् । वानप्रस्थास्तु अनिसृष्टोपजीविनोऽपि स्तोकं गृह्णन्तः (त्रपु ? ऋतु) धर्मार्थमनुज्ञेयाः । अतस्त्वन्ये श्रोत्रियास्तपस्विनो विष्टयश्च तत्कर्मकराः भक्तार्थमेव लवणं हरेयुः नाल्पमप्यधिकम् ॥

---

१. क्रेता शुल्कमिति मूले पाठान्तरमिति ।

२. विडयवक्षारसौवर्चलोद्भेदजा लवणवर्ग इति कोष्ठागाराध्यक्षे ११।१५ वक्ष्यति ।

[आकरेषु प्रधानद्रव्यसङ्ग्रहस्य
सर्वार्थसाधकता]

एवं मूल्यं विभागं च व्याजीं परिघमत्ययम् ।
शुल्कं वैधरणं दण्डं रूपं रूपिकमेव च ॥८३॥
खनिभ्यो द्वादशविधं धातुं पण्यं च संहरेत् ।

चाणक्यटीका

अत इति । अस्मादुक्ताल्लवणाद् अन्यः लवणवर्गः सैन्धवादिः क्षारवर्गश्च । भागं (दस्वाद्धि ? विंशति) कादिमं[1] शुल्कमेव केवलं दद्यात् । न भागं रूपं व्याजीं वेति विशेषणार्थमभिधानम् ॥

प्रतिपदपञ्चिका

विलवणं विलादिविमिश्रत्तं तद्ग्रहणेन तद्व्यवहारी गृह्यते । स उत्तमं दण्डं दद्यात् । अनिसृष्टोपजीवी च, अननुज्ञातः स्वयमुत्पाद्य उपजीवो च उत्तममेव दण्डं दद्याद् ।

किमेवं सर्व एव दण्डं दद्यात्, नेत्याह—अन्यत्र वानप्रस्थेभ्य इति । ते ह्यनिसृष्टोपजीविनोऽपि नादण्ड्याः श्रोत्रिया वेदाध्यायिनोऽपि गृहस्थाः ब्राह्मणाः तपस्विनः पाषण्डाः अन्येषां सम्भवात् । विष्टयश्च तत्कर्मपराः । ततो भक्तोपभोगमात्रमिति ।

पाथेयभैक्षादिभोजनमात्रोपयोगि लवणं हरेयुः तावन्मात्रमदोषायेति । अतोऽन्यत्र उक्तव्यतिरेके लवणक्षारवर्गः शुल्कमेव दद्यात् । तच्च स्वयमेव वक्ष्यति, सैन्धवसामुद्रिकवि(ड)लयवक्षारसुवर्चिकोद्भेदजलवणवर्जमिति सैन्धवसामुद्रविल(जा)यानि यवक्षारसुवर्चिकोद्भेदजादयः क्षारा इति ।

श्रीमूला

अथ श्लोकनाह—एवमित्यादि । एवम् उक्तप्रकारेण, खनिभ्यः, मूल्यं प्रतीतम्, विभाग षड्भागं, व्याजी पञ्चकं शतं मानव्याजीत्युभयविधाम् परिघं पारीक्षिकं धातुसमुत्थितानां तज्जातकर्मान्तेषु प्रयोगात् सिद्धं लाभविशेषं वा, अत्ययम् आश्रावितं दमम्, शुल्कं प्रतीतम् वैधरणं छिन्नपूरणम् दण्डम् अश्रावितं दमम्, रूपं रूप्यरूपं ताम्ररूपमिति द्विविधम् रूपिकम् अष्टकं शतम्, धातुं सुवर्णरूप्यादिधातुं, पण्यं विक्रेयं च, द्वादशविधम् उक्तद्वादशप्रकारम् उपादानम्, संहरेत् समुत्पादयेत् ।

---

१. क्षारलवणादीनां विंशतिभागः पञ्चविंशतिभागो वेति शुल्कव्यवहारे वक्ष्यते ।

एवं सर्वेषु पण्येषु स्थापयेन्मुखसङ्ग्रहम् ॥८४॥
आकरप्रभवः कोशः कोशाद्दण्डः प्रजायते ।
पृथिवी कोशदण्डाभ्यां प्राप्यते कोशभूषणा ॥८५॥

[इत्यध्यक्षप्रचारे आकरकर्मान्तप्रवर्तनं द्वादशोऽध्यायः
आदितः त्रयस्त्रिंशः]

चाणक्यटीका

एवमिति, यथोक्तनिगमनम् । परिघमिति, अत्र व्यवहारविघातम् । यथोक्तं व्यवहारम् एवमास्थापयेदिति ।

रूपमिति, पणमर्धपणमित्यादिकम् । धातुं सुवर्णादीनाम् । पण्यञ्च शङ्खादिकम् । शेषं गतार्थम् ।

प्रतिपदपञ्चिका

अध्यायप्रान्ते श्लोकानाह—एव मिति । यथोक्तोपसंहारः मूल्यादीनि, दशधातुपण्ये च द्वे इत्येवमेतानि द्वादश संहरेत् । तत्र मूल्यविभागो प्रतीतो, व्याजी द्विविधा, पञ्चकं शतम् । मनोन्मनाविशेषश्च परिघः पारीक्षिकमिति केचित् । धातुसमुत्थितानां तज्जातकर्मान्तेषु प्रयोगाल्लाभविशेष इति । अपरेऽत्ययदण्डयोः विशेषः अत्ययः आश्रावितः । वक्ष्यति हि अत्ययं च ज्ञापयेदिति ।

दण्डः प्रश्रावित एव । शुल्कवैधरणावृत्तौ रूपं द्विविधमभिहितं रूप्यरूपं ताम्ररूपं चेति । रूपिकमष्टकं शतमिति, एतद्धातुपण्याभ्यां सह खनिभ्यो द्वादशप्रकारमप्युपादानं संहरेत् ।

श्रीमूला

एवं, सर्वेषु पण्येषु पणनयोग्येषु मध्ये, मुखसङ्ग्रहं मुखमिव मुखं प्रधानं सारस्तस्य सङ्ग्रहं, स्थापयेत् ॥

आकरस्य सर्वार्थसाधकतामध्यायान्तिमश्लोकेन दर्शयति—अकरेत्यादिना ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वादशोऽध्यायः । आकरकर्मान्तप्रवर्तनम्, ॥ आदितस्त्रयस्त्रिंशः ॥

चाणक्यटीका

एवं सर्वेष्विति एवमतो व्यतिरिक्तेषु भाण्डाजिनादिष्विवपण्येषु यथार्हमायानां मुखसङ्ग्रहं स्थापयेत् ॥

आकरप्रभव इत्यस्य माहात्म्यमाह । कोशात् स्वदण्डभरणेन पराणाञ्चोपजापेन ॥

इत्याकरकर्मान्तप्रवर्तनं द्वादशं प्रकरणम् ।
॥ द्वादशश्चाध्यायः ॥

प्रतिपदपञ्चिका

उपरितो यथैतत्संहरेदेवं सर्वेषु पण्येष्विति निर्धारणे सप्तमी उ सङ्ख्यानेमुखसङ्ग्रहं सारसङ्ग्रहं स्थापयेदिति केचित् ।

अन्ये तु मुखसङ्ग्रहमेकार्पणं स्थापयेदिति, अनुष्ठानादरातिशयार्थम् आकर-कर्मान्तप्रवर्तनस्य प्राधान्यमध्यायप्रान्ते प्रतिपादयति आकरप्रभव इत्यादि । निगदव्याख्यातश्लोक इति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायां अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे द्वादशोऽध्यायः ।
आदितस्त्रयस्त्रिंशोऽध्यायः ।

एकत्रिंशं प्रकरणम

त्रयोदशोऽध्यायः ।

अक्षशालायां सुवर्णाध्यक्षः ।

[भूपणाद्युपकरणनिर्माणशालावश्यकता सौवर्णिकगुणश्च]

सुवर्णाध्यक्षः सुवर्णरजतकर्मान्तानां असम्बन्धावेशनचतुश्शालाम् एकद्वाराम् अक्षशालां कारयेत् ।

श्रीमूला

अक्षशालायां सुवर्णाध्यक्ष इति सूत्रम् । अक्षशालायां सुवर्णरूप्यादिनिर्माणशालायां, नियुक्तः सुवर्णाध्यक्षः, अर्थात् तस्य व्यापार इहाभिधीयत इति तदर्थः । प्रक्रान्तायां कोशप्रकृतौ प्रधानभूतस्य सुवर्णादेरुत्पत्तिः समनन्तराध्याययोरुक्ता । तस्यावस्थान-जाति-वर्ण-गुणशोधन-दोपपरीक्षण-परिकर्मादिकथनपूर्वमर्जनं रक्षणं चेदानीमभिधीयते ।

सुवर्णाध्यक्ष इति । सुवर्णाध्यक्षः, सुवर्णरजतकर्मान्तानां सुवर्णरजतसम्बद्धानामलङ्कारादिघटनक्रियाणाम्, अक्षशालाम् अवस्थानभूतां शालां, कारयेत् । सुवर्णादिपरिकर्मस्थानमक्षशालेत्यभिधीयते । तां कीदृशीम्, असम्बन्धावेशनचतुश्चालाम् असम्बन्धानि परस्परानुपश्लिष्टानि आवेशनानि शिल्पकर्मस्थानभूतानि चतुश्शालानि पृथक्-पृथक् चतस्रश्चतस्रः शाला यस्यां ताम् । असम्बाधावेशनेति पाठेऽप्ययमेवार्थः । एकद्वारां रक्षासौकर्यार्थं द्वारेणैकेन युक्तां च ।

चाणक्यटीका

आकरोद्गतानां लोहानां शालानाञ्चाऽप्यध्यक्षव्यापारः (उक्तः) ।

इदानीं प्राधान्याद् भूयस्त्वाच्च सुवर्णाध्यक्षव्यापारः पृथगुच्यते—सुवर्णाध्यक्ष इति । सुवर्णरजतव्या''''द्या विशन्ति सुवर्णकारवस्तूनि कर्मस्थानानि आवेशनानि इतरेतरसत्त्वात् प्रतिषेधार्थमारम्भकाणि चतसृषु शालासु अनेकव्यापारार्थसु एवंविधाश्चतस्रः शाला यस्याः । तासां स्वारक्षार्थम् एकद्वाराम् । अक्षशालामिति एवंप्रसिद्धसंज्ञां कारयेत् ।

प्रतिपदपञ्चिका

अक्षशालायां सुवर्णाध्यक्ष इति सूत्रम् ।

विशिखामध्ये सौवर्णिकं शिल्पवन्तमभिजातं प्रात्ययिकं च स्थापयेत् ।

प्रतिपदपञ्चिका

अक्षशाला सुवर्णरूप्यादिघटनशाला । तस्यामधिकृतोऽक्षशालायां सुवर्णाध्यक्षः तद्ग्रहणेन तद्व्यापारो गृह्यते । स इहाभिधीयत इति सूत्रार्थः । सम्बन्धस्तु कोश-प्रकृतिः प्रक्रान्ता सा पूर्वोक्तप्रकरणैरनेकशो अभिहितानन्तराध्यायद्वयेनैव प्रधानभूतस्य रत्नसुवर्णादिरुत्पत्तिरुक्ता ।

तस्येदानीं अवस्थितिवर्णशोधनपरीक्षणपरिकर्मभेदादि कथनप्रकारैरर्जनं रक्षणं चाभिधीयत इति । तदाह—सुवर्णाध्यक्ष इति । सुवर्णरजतकर्मान्तानाम् अलङ्कारादिषु घटनक्रियाना वस्थानभूतां शालां कारयेत् ।

किंविशिष्टामित्याह—असम्बन्धावेशनेत्यादि । असम्बन्धानि परस्परमसंश्लिष्टानि आवेशनानि शिल्पकर्मस्थानानि, चतुश्शालानि प्रत्येकं चतस्रः चतस्रः परस्परावलोकिन्यः शाला येषु तानि । असम्बन्धावेशनचतुश्शालानि । यस्यां शालायां तामसम्बन्धावेशनचतुःशालां दारुकाख्यामवस्थानं ताम् । एकद्वारामिति, रक्षासौकर्यार्थम् । अक्षशालेति सुवर्णादिपरिकर्मावस्थानस्य संज्ञा, तां कारयेत् ।

श्रीमूला

विशिखामध्ये रथ्यामध्ये, सौवर्णिकं पौरजानपदानां रूप्यसुवर्णक्रयविक्रयकर्माधिकारिणं, स्थापयेत् । कथम्भूतं, शिल्पवन्तम् क्षेपणादिवक्ष्यमाणकर्मनिपुणम्, अभिजातं कुलीनम्, प्रात्ययिकम् उपधाशुद्धम् । चकाराज्जानपदत्वादिगुणयुक्तं । सौवर्णिकस्य व्यापारः सौवर्णिकप्रचारे वक्ष्यते । तस्यात्र निर्देशः सुवर्णाध्यक्षाधीनत्वज्ञापनाय राजधनपौरजानपदधनानां रक्षाविधानतुल्यत्वज्ञापनाय च ।

चाणक्यटीका

विशिखामध्य इति । अथवा इदं सुवर्णाध्यक्षो (बहिरावरणमपि मध्ये ?) सुवर्णविषयं यस्य शिल्पवन्तं सौवर्णिकं शिल्पकर्मणि (कुशले ?) कुशलिनं ल······ त्येवमर्थः ॥

प्रतिपदपञ्चिका

विशिखामध्ये रथ्यामध्ये सौवर्णिकं पौरजानपदानां रूप्यसुवर्णक्रयविक्रयघटनादिनियोगाधिकारिणं शिल्पवन्तं क्षेपणादिसर्वकर्मकुशलमभिजातं कुलोद्गतं कुत्सितकर्मप्रतिषेधार्थं प्रात्ययिकमनेकशोदृष्टप्रत्ययमुपधाशुद्धमित्यपरे । चकाराज्जानपदादिगुणोपेतं च तमेवंभूतं स्थापयेत् । तद्व्यापारश्चोपरितनाध्यायेऽभिधास्यते । इह त्वस्य निर्देशः ।

सुवर्णाध्यक्षाधीनत्व-ज्ञापनार्थं राजद्रव्याणां पौरजानपदद्रव्याणां च रक्षाविधानं प्रति तुल्यत्व-ज्ञापनार्थं च ।

[देशवर्णयोः भेदेन सुवर्णस्य पाञ्चविध्यम्,
योनिभेदगुणभेदयोः त्रैविध्यं च]

जाम्बूनदं शातकुम्भं हाटकं वैणवं शृङ्गिशुक्तिजं; जातरूपं रसविद्धं आकरोद्गतं च सुवर्णम् ।

श्रीमूला

अथ पञ्चविधं पञ्चवर्णं त्रियोनि सुवर्णमाह—जाम्बूनदमिति । सुवर्णं, जाम्बूनदं मेरुप्रभवजम्बूनदीसमुद्भूतं जम्बूफलरसवर्णं, शातकुम्भं शतकुम्भपर्वतोत्पन्नं पद्मकिञ्जल्कवर्णं, हाटकं हाटकाकरोत्पन्नम्, अम्लानाख्यकुरण्डकुसुमसवर्णम्, वैणवं वेणुपर्वतजं कर्णिकारपुष्पवर्णम्, शृङ्गशुक्तिजं सुवर्णभूमिजमिति भाषाटीका, तच्च मनश्शिलावर्णम् इति । पञ्चप्रकारस्य पञ्चवर्णस्य सुवर्णस्य त्रिविधामुत्पत्तिमाह—जातरूपमिति । जातरूपं स्वतः सुवर्णमेवोत्पन्नं, रसविद्धं रसयोगेन काञ्चनीकृतम्, आकरोद्गतं च आकरगतमृत्पाषाणादिभ्यः पातितं च । क्रियावादोत्पन्नमित्यपि केचित् । तत्पक्षे चतुर्योनित्वं बोध्यम् । अत्रायं भट्टस्वामिनः श्लोकः—

"हेम्नः पञ्चप्रकारस्य त्रियोनेः पञ्चवर्णकाः ।
जम्बूकोकनदाम्लानकर्णिकारमनश्शिलाः ॥" इति ।

चाणक्यटीका

(जाम्बूनदं, ज)म्बूनदी यया जम्बूद्वीपो विशेषव्यपदेशः, तस्यां नद्यां वालुकाकारं यद् भवति तज्जाम्बूनदम् । तथा शतकुम्भे हाटके च जातम् । वेणके भवम् । एवं शृङ्गशुक्तिसंस्थानं सुवर्णदीपाकारः······(पञ्च) विधमित्येतज्जातरूपम् । कतिवर्णमिति केचिद् योजन्ति । अन्ये त्वाहुः (एतानि रूपं च स्वभावादार्द्रकग्रन्थानार्गतसंस्थानं सप्तममिति ?) पूर्वोक्तलक्षणेन रसेन विद्धं भावितम् आकारोद्भवं······भं चापरमिति भिन्नक्रमश्चशब्दः ।

प्रतिपदपञ्चिका

साम्प्रतं पञ्चभेदपञ्चवर्णत्रियोनिसुवर्णमाह—जाम्बूनदमित्यादि । जाम्बूनदं मेरौ जम्बूनदी, तत्समुत्पन्नं जम्बूरसवर्णं तच्च देवतानामेवेह तस्य निर्देशः । कदाचिद् विद्याधरादिभिरानीयेत, अर्जुनवद्दैवतानुभावयोगिनां तद्देशगमनमपि सम्भाव्येत वा, शातकुम्भं शतकुम्भपर्वतजं पद्मकेसरवर्णम्, हाटकं हाटकाकरोत्पन्नम्, कुरण्टकुसुमवर्णं, वैणवं वेणुपर्वतजं कर्णिकारकुसुमाभम्, शृङ्गिशुक्तिसुवर्णादि, तज्जं मनश्शिलाभम् ।

एवमेतस्य पञ्चप्रकारस्यापि त्रिविधामुत्पत्तिमाह—जातरूपमिति जातरूपं सुवर्णमेवोत्पन्नं रसविद्धं रसेन काञ्चनीकृत्य आकरोद्गतं मृत्पाषाणेभ्यश्च पातितम् । (जातरूपं सुवर्णमेवोत्पन्नं) चकारात् क्रियावादोत्पन्नमिति केचित् । तेषां चतुर्धा योनिः । तथा च— हेम्नः पञ्चप्रकारस्य त्रियोनेः पञ्चवर्णतः ।

किञ्जल्कवर्णं मृदु स्निग्धं अनादि भ्राजिष्णु च श्रेष्ठम्। रक्तपीतकं मध्यमम्। रक्तमवरम्।

[द्रव्यान्तरमिश्रिताकरोत्पन्नयोः सुवर्णयोः शोधनप्रकारः]

श्रेष्ठानां पाण्डु श्वेतं च अप्रासकम्।

तत् येनाप्रासकं तच्चतुर्गुणेन सीसेन शोधयेत्।

श्रीमूला

गुणानाह—किञ्जल्केत्यादि। किञ्जल्कवर्णं, मृदु तप्तमतप्तं चारूक्षं, स्निग्धम् अखरम्, अनादि नादरहितम्, अनुनादीति पाठे दीर्घनादम्, भ्राजिष्णु भास्वरं च, सुवर्णं श्रेष्ठम् उत्तमोत्तमं भवति। रक्तपीतकं लोहितहरिद्रवर्णं मध्यमं श्रेष्ठानामेव मध्ये भवति। रक्तम् अवरम् उत्तमाधमं भवति।

अथ शोधनप्रकारमाह—पाण्डुश्वेतमिति। पाण्डु हरिणवर्णम्, श्वेतं सितं च, अप्रासकं तत्संज्ञं द्रव्यान्तरयोगेनोत्तमवर्णतामप्राप्तमिति कृत्वा। तत् तथाविधं स्वर्णम्, येनाप्रासकं येनापद्रव्येणाशुद्धतां गतम् तच्चतुर्गुणेन सीसेन, शोधयेद् आवर्तयेद् आ सीसक्षयात्।

चाणक्यटीका

श्रेष्ठानामिति। तत्रप्रकार (मिति हि ? मपीदं) श्रेष्ठ (मूल्य ? मध्य) हीनानां श्रेष्ठानां श्रेष्ठमित्यर्थः। तेन श्रेष्ठस्य मध्यमाधमे मध्यमस्य मध्यमावरे इति (भावा ? भेदा) द्रष्टव्याः।

पाण्डु श्वेतञ्च द्विप्रकारमपीदं सुवर्णगुणम् अप्रासत्वाद् अन्यलो (हा ? ह) संसृष्टत्वाद् व्यवहाराप्रासत्वाद् अधमाधममित्यर्थः। तद् येनाप्रासमिति। तद्यत्प्रमाणेन (प्रोक्तं ? प्रासं) तन्न संसर्गात् प्रासमतस्तस्यापि वक्ष्यमाणवर्णिकया परिच्छिद्यैतावतेति काकिणीभिरिदमपसारितमिति। तच्चतुर्गुणेन (रसेन ? सीसेन) ध्मापितं परीक्ष्य लोहं शोधयेत्। सुवर्णं तत्रावशेषयेत्।

प्रतिपदपञ्चिका

जम्बूकोकनदादि म्लानकर्णिकारमनश्शिला इति।

गुणानाह—किञ्जल्कवर्णमिति, तप्तमतप्तं च पद्मकेसरवर्णं मृदु अरूक्षस्निग्धमपरुषमुखरम् अनादिस्वनरहितम्। अपरे त्वनुनादीति पठन्तो दीर्घस्वनमिति व्याचक्षते। भ्राजिष्णु रुचिमत्। एतच्छ्रेष्ठमुत्तमोत्तमं। रक्तपीतं वर्णद्वयोपेतमध्यममुत्तमानामेव भवति। रक्तं रक्तैकवर्णम्, अपरमधमम्। श्रेष्ठमध्यमाभ्यां तदव्यक्तमेव।

साम्प्रतमशुद्धस्य लक्षणं शोधनप्रकारं चाह—पाण्डुश्वेतं चाप्रासकमिति। पाण्डुशरकान्डगौरं श्वेतमष्टादिकुसुमाभं, चः समुच्चये, अप्रासकं द्रव्यान्तरसङ्गमादुत्तमवर्णितमागतं तद् येन यावतापद्रव्येणाप्रासकमशुद्धं तच्चतुर्गुणेनापद्रव्यचतुर्गुणेन सीसेन शाधयेत्। आवर्तयेदासीसक्षयात्।

सीसान्वयेन भिद्यमानं शुष्कपटलैर्ध्मापयेत् । रूक्षत्वाद् भिद्यमानं तैलगोमये निषेचयेत् ।

आकरोद्गतं सीसान्वयेन भिद्यमानं पाकपत्राणि कृत्वा गण्डिकासु कुट्टयेत् कन्दलीवज्रकन्दकल्के वा निषेचयेत् ।

श्रीमूला

सीसान्वयेन सीसानुवेधेन, भिद्यमानं वियुज्यमानम्, शुष्कपटलैः शुष्कारण्यगोमयैः, ध्मापयेत् । रूक्षत्वाद् भिद्यमानम्, तैलगोमये तैले गोमये च, निषेचयेत् पुनःपुनरावर्त्य प्रक्षिपेत् ।

आकरोद्गतस्य शोधने विशेषमाह—आकरोद्गतमिति । आकरोद्गतं सुवर्णम्, सीसान्वयेन भिद्यमानम् पाकपत्राणि कृशपत्राणि, कृत्वा, गण्डिकासु काष्ठफलकेषु, कुट्टयेत् अर्थात् काष्ठेन । अथवा, कन्दलीवज्रकन्दकल्के कन्दली वल्लिभेदः, वज्रं श्रीबेरं, कन्दं पद्ममूलम्, एतद्योगसिद्धे कषाये, निषेचयेत् ।

चाणक्यटीका

सीसान्वयेनेति । तत् (नीत ? सीस) व्यामिश्रयता स्फुटत् शुष्कपटलैः शुष्कारण्यगोमयैः विध्मापयेत् (पलेन गोवासितक्षयात् ?) । रूक्षत्वादिति (सोसेवकाद् ?) रूक्षीकृतं रूक्षमपि भिद्यमानम् । पाकयोग्यानि श्लक्ष्णानि कृत्वा (गोष्ठगर्त्ति ? काष्ठगण्डि) कासुपुनः कुट्टयेत् । ततः सन्ताप्य तैलयुक्ते गोमये निषेचयेत् । गोमयग्रहणेन रसस्य ग्रहणम् ॥

आकरसमुत्थम्, आकरसमुत्थेनैव······णं पाकयोग्यानि श्लक्ष्णपत्राणीति कृत्वा काष्ठगण्डिकासु पुनः पुनः कुट्टयेत् । ततः पचेत् पाकार्थानि पत्राणीति वचनात् । कन्दलीवज्रकन्दकल्कानि सेचयेत् । पक्वानीति द्वितीयः कल्पः ॥

प्रतिपदपञ्चिका

सीसान्वयेन सीसद्रवानुवेधेन[1] भिद्यमानं शुक्लपटलैरारण्यगोमयैर्ध्मापयेदाध्मापयेत् । रूक्षत्वाद्भिद्यमानं तैलगोमये निषेचयेत् आवर्त्यावर्त्य प्रक्षिपेत् । अयं च विधिः जातरूपरसविद्धयोः द्रष्टव्यः । आकरोद्गतस्य विध्यन्तरविधानात् इति केचित् ।

आकरदोषात् सीसानुविद्धोत्पन्नस्य शुद्धिविधिमाह—आकरोद्गतमिति, सीसान्वयेन भिद्यमानपाकपत्राणि तनुपत्राणि, कृत्वा गण्डिकासु काष्ठाधिकरणेष्ठकाष्ठचुक्रि(न्ति)कया कुट्टयेत् । यद्वा-कन्दलीवज्रकन्दकल्के तत्कषाये निषेचयेत् । वा विकल्पे ।

---

१. सीसद्रव्यानुरोधेन ।

[रूप्यस्य चतुर्धा विभागः, तत्र उत्तमादेः लक्षणम्, शोधनक्रमश्च]

तुत्थोद्गतं गौडिकं काम्बुकं चाक्रवालिकम् च रूप्यम् । श्वेतं स्निग्धं मृदु च श्रेष्ठम् । विपर्यये स्फोटनं च दुष्टम् । तत् सीसचतुर्भागेन शोधयेत् ।

उद्गतचूलिकं अच्छं भ्राजिष्णु दधिवर्णं च शुद्धम् ।

श्रीमूला

रूप्यं चतुर्विधमाह—तुत्थोद्गतमिति । तुत्थोद्गतं तुत्थपर्वतजं जाति कुसुमाभम्, गौडिकं कामरूपजं तगरकुसुमवर्णम्, काम्बुकं कम्बुपर्वतोत्पन्नम्, चाक्रवालिकं चक्रवालाकरोद्भूतं तदुभयं कुन्दपुष्पाभम् इति चतुर्धा रूप्यं श्रेष्ठम् ।

तस्य श्वैत्यं स्निग्धत्वं मार्दवमिति त्रीन् गुणानाह—श्वेतमित्यादि । दोषानाह—विपर्यय इति । विपर्यये दुष्टम् उक्तगुणवैपरीत्ये दोषाः कृष्णत्वरूक्षत्व-खरत्वरूपाः, स्फोटनं च दुष्टं भिद्यमानत्वं च दोष इत्याहुः । चत्वारो दोषाः । शुद्धिमाह—तद् दुष्टं रजतम्, सीसचतुर्भागेन रजतप्रमाणचतुर्भागेन सीसेन, शोधयेत् ।

शुद्धस्य लक्षणमाह—उद्गतचूलिकमित्यादि । उत्थितबुद्बुदम्, स्वच्छं, रुचिमत्, दधिप्रभं च शुद्धम् ।

चाणक्यटीका

(कृत्वो ? तुत्थो)द्गतमिति यत्र क्वचिद्देशे (कृत्वा ? तुल्य) द्रव्यवि······ द्धपर्वतके भवम् । कम्बुपर्वते चक्रवालपर्वते च प्रभवं देशविशिष्टं त्रिविधमिति चतुर्विधं रूप्यम् ।

विपर्यय इति श्यामं रूक्षं कठिनमित्यर्थः । तद् दुष्टं शोधयेत् ।।

एवं चतुर्भागशुद्धं कथं ज्ञेयमित्याह—उद्ग(तचूलिकं)···यदूर्ध्वं बुद्बुदिकाभं शुद्धम् ।।

प्रतिपदपञ्चिका

एवं सुवर्णमभिधाय चतुर्विधं रूप्यमाह—तुत्थोद्गतमित्यादि । तुत्थोद्गतं तुत्थपर्वतोत्पन्नं जतिकुसुमाभं, गौलि(डि)कं कामरूपजं तगरपुष्पाभं, काम्बुकं कम्बुपर्वतजं चाक्रवालिकं चक्रवालाकरोद्भवं तदुभयं कुन्दकुसुमोपममिति रूप्यम् ।

तस्य गुणत्रयमाह—श्वेतमित्यादि । तच्च श्वेतादि प्रतीतम् ।

चतुरो दोषानाह—विपर्यय इति । श्वेतादिगुणविपर्यये, कृष्णरूक्षखरा दोषाः । स्फोटनं च भिद्यमानत्वं तैर्दुष्टं भवति ।

तस्य शुद्धिमाह—तदिति । तद्दुष्टं सीसचतुर्भागेन तत्प्रमाणचतुर्भागेन सीसेन शोधयेत् ।

[शुद्धस्य सुवर्णस्य षोडशवर्णकाः]

शुद्धस्यैको हारिद्रस्य सुवर्णो वर्णकः। ततः शुल्वकाकण्युत्तरापसारिता आचतुस्सीमान्तादिति षोडशवर्णकाः।

प्रतिपदपञ्चिका

शुद्धस्य लक्षणमाह—उद्गतचूलिकमिति उत्थितबुद्बुदमुत्थितरश्चि(श्मि) कतित्यपरे, शेषमृजु।

अथ शुद्धसुवर्णस्य षोडश वर्णकानाह—शुद्धस्येति। शुद्धस्य स्वभावशुद्धस्य यथोक्तविधिशोधितस्य वा, हारिद्रस्य हरिद्राभङ्गभासुरस्य सुवर्णस्य, सुवर्णः षोडशमाषप्रमाणः एकोवर्णकः शुद्धो भवति। ततः तस्मिन् वर्णके, शुल्वकाकणी शुल्वस्य ताम्रस्य काकणी माषचतुर्भागः, प्रक्षिप्तेति शेषः, उत्तरा अधिका सुवर्ण-काकणी, अपसारिता तस्माद् वर्णकाद् अपनीता च, भवति। आ कुतः इमे काकणी-प्रक्षेपापसारणे इत्यत्राह—आ चतुस्सीमान्तात् आ चतुर्माषावधेः आ षोडशकाकण्यव-धेरित्यर्थः। इति एकादिषोडशान्तानां शुल्वकाकणीनां वर्णके मिश्रणं स्वर्णकाकणीनां वर्णकादपनयनं चेत्यनया रीत्या, षोडश वर्णकाः, मिश्राः सम्पद्यन्त इति शेषः। त एते शुद्धवर्णकेन सह सप्तदश भवन्ति। इह चतुरित्यनेन काकणीग्रहणे वर्णकषोडशत्वासिद्धया तत्सिद्धये षोडशपर्यन्तकाकण्यपेक्षणात् सामर्थ्याच्चतुर्माषग्रहणं विज्ञेयम्।

चाणक्यटीका

शुद्धपरिज्ञानार्थं वर्णकानाह—शुद्धस्यैक इति। यथोक्तशुद्धस्य एको हरिद्रा-वर्णस्य सुवर्णः षोडशमाषो वर्णकः प्रथम इत्यर्थः। ततः परं ताम्रस्य आता""" वा अथवा अपसारिता प्रमाणसुवर्णमात्रा (आ) चतुर्थी यावदिति (अतेशव ? आषोडश) परात् सीमान्तावधयो माषकाश्चत्वारः (एष एतत् एषोवशतान्योन्तस्य ?) षोडश-कस्य वर्णकस्य भवति। एवं चतुर्थ""" (वभव्यतो ?) न्यूनमप्यपसारितमिति शुद्धेषु सह सप्तदश वर्णकाः कर्षप्रमाणकाः।

प्रतिपदपञ्चिका

सम्प्रति षोडशसुवर्णवर्णकानाह—शुद्धस्येत्यादि। शुद्धस्य यथोक्तविधिना शोधितस्य स्वभावशुद्धस्य वा हारिद्रस्य सुवर्णजातेः सुवर्णषोडशमाषप्रमाणक एको वर्णः, प्रधाना वर्णिका भवति। ततस्तस्माद् वर्णकादन्ये षोडशवर्णा उत्पद्यन्ते। शुल्वका-कण्युत्तरापसारितेति शुल्वं। ताम्रं काकणी माषचतुर्भागस्तां सुवर्णे प्रक्षिप्य उत्तरा अधिका सुवर्णकाकण्यपसारिता अपनीता यदिह भवति। वीप्सा लोपश्चात्र द्रष्टव्यः।

शुल्वस्य काकणीं प्रक्षिप्य उत्तरा सुवर्णा काकणी यदा अपसारिता, अपनीता भवति। अत इत्याह—चतुस्सीमान्तादिति। सीमान्तोऽवधिः, आशुल्वचतुर्माषाव-

[तेषां निकषः परीक्षाः]

सुवर्णं पूर्वं निकष्य पश्चाद् वर्णिकां निकषयेत्। समरागलेखमनिम्नोन्नते देशे निकषितम्।

परिमृदितं परिलीढं नखान्तराद् वा गैरिकेणावचूर्णितं उपधिं विद्यात्।

प्रतिपदपञ्चिका

घेस्तदिह काकणीग्रहणात्। षोडशवर्णकाभिधानाच्च माषकग्रहणमनुक्तमपि न्यायाल्लभ्यत इत्येवं शुद्धवर्णकेन सह एते सप्तदशवर्णका भवन्ति।

श्रीमूला

निकषच्छेदतापलक्षणां त्रिविधां वर्णकपरीक्षामाह—सुवर्णमिति। सुवर्णं परीक्ष्यम्, पूर्वं प्रथमम्, निकष्य निकषे घर्षणेन दत्तरेखं कृत्वा, पश्चाद्, वर्णिकाम्, तद्वर्णकपरीक्षार्थं निकषयेत्। निरूपाधिकं निकषितमाह—समरागेत्यादि। समरागलेखं तुल्यरागया रेखया युक्तम्, अनिम्नोन्नते देशे निकषोपलप्रदेशे, निकषितम्, न्याय्यं भवतीति शेषः।

व्याजनिकषितमाह—परिमृदितमित्यादि। परिमृदितं गाढनिकषितं वर्णकोत्कर्षार्थं विक्रेता करोति। परिलीढम् अगाढनिकषितं वर्णापकर्षार्थं क्रेता करोति, हस्तेनोन्मृष्टलीढमिति स्वामी। नखान्तराद् गैरिकेण नखान्तरनिहितेन पीतधातुना, अवचूर्णितं प्रक्षिप्तचूर्णम्, उत्कर्षार्थं विक्रेता तत्पक्ष्यो वा परीक्षकः करोति। इति त्रिविधम् उपधिं विद्यात्।

चाणक्यटीका

पूर्वं परीक्षणीयं सुवर्णं परिच्छिन्नवर्णत्वात् निकष्य पश्चात् सादृश्यं शङ्केत्। ......यत् शोधितं चेत् सुवर्णमतोऽधिकं निकषयेत्। न्यूनं चेन्न्यूनं यावत्समेन परिच्छिन्नमिति। एवमुक्तं च पश्चाद् भावनीयार्थं पश्चाद् ग्रहणम्। इतरथा तत्प्रत्ययेनैव क...स्यात्। निकष्येत्यन्तर्भावितण्यर्थो द्रष्टव्यः, निकषयेदित्युत्तरपाठानुमानात्। निकषप्रमाणं समरागलेखमिति आदिमध्यावसानेषु समरागा लेखा यस्य। देशे पाषाणे। तदपि नि (क) ष्य पुनर्मृदितं मृष्टमित्यर्थः। परिलीढं निकषकाल एवाङ्गुल्या उद्गच्छन्त्या प्रमृष्टम्। तदुभयमपकर्षार्थम्। नखान्तराद्वा गैरिकेण अवचूर्णितम् उत्कर्षार्थमवचूर्ण्य। परिनिकर्षतर्षितः ?) एतद्द्विविधम् उपधिं व्याजनिकषं विद्यात्।

प्रतिपदपञ्चिका

तत्परिज्ञानार्थं निकषच्छेदतापलक्षणां त्रिविधां परीक्षामाह—सुवर्णं पूर्वं निकृष्येत्यादि।

सुवर्णं परीक्षणीयं पूर्वं प्रथमं निकृष्य ततः पश्चाद्वर्णकं तत्परिच्छेदाय वर्णिकां निकषयेत्।

जातिहिङ्गुलकेन पुष्पकासीसेन वा गोमूत्रभावितेन दिग्धेनाग्रहस्तेन संस्पृष्टं सुवर्णं श्वेतीभवति ।

सकेसरः स्निग्धो मृदुः भ्राजिष्णुश्च निकषरागः श्रेष्ठः ।

प्रतिपदपञ्चिका

निरुपाधिकं निर्कापितमाह—समरागलेखमित्यादि, समरागा तुल्यरागा रेखा यस्मिन् तत् अनिम्नोन्नते समे देशे निकषपाषाणप्रदेशिनि(क)पितं सच्छद्म विद्यादिति वाक्यशेषः ।

सोपाधिकमाह—परिमृदितमिति । अवष्टभ्यं निक्षिप्तं तदुत्कर्षार्थं विक्रेता करोति । परिलीढं हस्तेनोन्मृष्टलीढं तदपकर्षार्थं क्रेता करोति । नखान्तराद् वेति पूर्वं नखान्तर-निहितेन सुवर्णं गैरिकाख्येन धातुविशेषेणापचूर्णितं तदुत्कर्षार्थं विक्रेता तदभ्यर्थितो वा परीक्षकः करोति । एवं त्रिविधमुपधिच्छद्म विद्यात् ।

श्रीमूला

उपधिमन्यमाह—जातीत्यादि । गोमूत्रभावितेन जातिहिङ्गुलकेन हंसपादा-ख्यहिङ्गुलकविशेषेण, पुष्पकासीसेन वा किञ्चित्पीतवर्णेन हरितालेन वा, दिग्धेन लिप्तेन, अग्रहस्तेन, संस्पृष्टं, सुवर्णं, श्वेतीभवति हीनवर्णं भवति । अयं क्रेतृप्रयोज्यो व्याजः ।

गुणानाह—सकेसर इति । सकेसरः बहुलकेसरः, स्निग्धो, मृदुः भ्राजिष्णुश्च, निकषरागः निकषरेखावर्णः, श्रेष्ठः ।

चाणक्यटीका

अपरं निपुण(रिपु ? मुपधि)माह—जातिहिङ्गुलकेनेति । जातिपुष्पयोर्ग्रहण-मन्यनिवृत्त्यर्थम् । तयोरन्यतरेण गोमूत्रभावितेन (यो ? दिग्धेन) अग्रहस्तेन स्पृष्टम् ॥

शोभ··(सके) सरः केसरा इव (रावातो ?) बहिर्गता यस्य । मृदुः पाषाणलेपित्वादपि (तत् ?) ॥

प्रतिपदपञ्चिका

पुनरपरं क्रेतृप्रयोज्यमेव उपधिमाह—जातिहिङ्गुलिकेन सह सपदाख्यहिङ्गुलक-विशेषेण पुष्पकासीसेन धातुकासीसेन यद्वा पुष्पं पारत(द)ल्कासीसं वत्तरागद्रव्यं तयोः गोमूत्रभावितयोरन्यतरदिग्धेन लिप्तेनाग्रहस्तेनाङ्गुलीभिः स्पृष्टं सुवर्णं हेम श्वेती-भवति । अपकृष्टवर्णं भवति ।

निकर्षणगुणानाह—सकेसर इति । सकेसरो बहलपक्ष्मलः, स्निग्धादयः प्रतीताः, निकषरागो निकषरेखावर्णः, श्रेष्ट उत्तमः ।

[निकषगुणाः]

कालिङ्गकः तापीपाषाणो वा मुद्गवर्णो निकषः श्रेष्ठः। समरागि विक्रयक्रयहितः। हस्तिच्छविकः सहरितः प्रतिरागी विक्रयहितः। स्थिरः परुषो विषमवर्णश्चाप्रतिरागी क्रयहितः।

[तेषां छेदैः तापैश्च परीक्षाः]

छेदः चिक्कणः समवर्णः श्लक्ष्णो मृदुर्भ्राजिष्णुश्च श्रेष्ठः।

तापे बहिरन्तश्च समः किञ्जल्कवर्णः कारण्डकपुष्पवर्णो वा श्रेष्ठः। श्यावो नीलश्चाप्राप्तकः ॥

श्रीमूला

निकषगुणमाह—कालिङ्गक इति। कालिङ्गकः कलिङ्गदेशे महेन्द्रपर्वतादुत्पन्नः पाषाणः, तापीपाषाणो वा तापी नाम आरट्टदेशवाहिनी नदी, तद्गतः पाषाणो वा, मुद्गवर्णो निकषः श्रेष्ठः। समरागी यथास्थितवर्णग्राही, विक्रयक्रयहितः क्रेतृविक्रेत्रोरुभयोरप्यनुकूलः। हस्तिच्छविकः गजचर्मवत् खरशुष्कः, सहरितः हरितवर्णयुक्तः, प्रतिरागी अपकृष्टस्यापि सुवर्णस्य रागोत्कर्षप्रदर्शकः, विक्रयहितः विक्रेतुरनुकूलः। स्थिरः दृढः, परुषः खरः, विषमवर्णः नानावर्णश्च, अप्रतिरागी उत्कृष्टस्यापि सुवर्णस्य यथास्थितरागाप्रदर्शकः निकषः, क्रयहितः क्रेतुरनुकूलः।

निकषमुक्त्वा छेदमाह—छेद इति। छेदः छिन्नः स्वर्णखण्डः। चिक्कणः स्निग्धः, समवर्णः बहिरन्तश्च तुल्यवर्णः, श्लक्ष्णः मसृणः, मृदुः भ्राजिष्णुश्च श्रेष्ठः।

अथ तापमाह—ताप इति। अग्नितापितः स्वर्णभागः, बहिरन्तश्च समः समानवर्णः, तापनात् पूर्वं पश्चाच्च किञ्जल्कवर्णः, कुरण्डकपुष्पवर्णो वा अम्लानकुसुमवर्णो वा, श्रेष्ठः। श्यावः कपिशः, नीलश्च, अप्राप्तकः तत्संज्ञः अशुद्ध इति यावत्।

चाणक्यटीका

कालिङ्गकः कलिङ्गदेशभवः। तापी नदी महाराष्ट्रीया[1] मुद्गवर्णः उभयो निकषः निकष्यतेऽस्मिन्निति। समरागी (नामपि मलिनोज्ज्वलरागः ?)। सहरितः परभागं करोति। प्रतिरागी हीनस्याविशेषेण रञ्जयिता। स्थिरः कठिनत्वात् सुवर्णस्यातिलेपी परुषः स्वभावात् परुषयिता। विषमवर्णः नानावर्णत्वाद् इदम् ईदृशमित्यनिश्चयकारी। अप्रतिरागी शोभनस्याप्रतिरञ्जयिता (विक्तं नो मधूः ?)······।

अन्तर्बहिश्च श्लक्ष्णो मसृणः समः सदृशवर्णः। अप्राप्तको लोहान्तरसंसृष्ट इत्यर्थः।

---

१. आरट्टदेशवाहिनीति केरलभाषाटीका।

[रूप्यसुवर्णव्यवहारोपयोग्युन्मानविधिः]

तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः। तेनोपदेशेन रूप्यसुवर्णं दद्यादाददीत च।

[सुवर्णादिपरिकर्मस्थानरक्षणविधिः]

अक्षशालाम् अनायुक्तो नोपगच्छेत्। अभिगच्छन् उच्छेद्यः। आयुक्तो वा सरूप्यस्वर्णस्तेनैव जीयेत।

विचितवस्त्रहस्तगुह्याः काञ्चनपृषतत्वष्टृतपनीयकारवो ध्मायकचरकपांसुधावकाः प्रविशेयुः निष्कसेयुश्च।

श्रीमूला

अथ रूप्यसुवर्णयोरुन्मानविध्यपेक्षायामाह—तुलेत्यादि। तुलाप्रतिमानं तुलापरिच्छेदविधिम् पौतवाध्यक्षे तुलामानपौतवप्रकरणे, वक्ष्यामः। इयमनागतावेक्षणरूपा तन्त्रयुक्तिः। तेनोपदेशेन तत्प्रकरणोक्तमानविधिना, रूप्यसुवर्णम्, दद्याद्, आददीत च गृह्णीयाच्च।

पालनविधिमाह—अक्षशालामिति। अक्षशालाम्, अनायुक्तः अनधिकृतः, नोपगच्छेत्। अभिगच्छन् वारितोऽप्यभिमुखं गच्छन्, उच्छेद्यः हृतसर्वस्वः कर्तव्यः। आयुक्तो वा नियुक्तोऽपि वा सरूप्यस्वर्णः रूप्यस्वर्णसहितो, गच्छन् तेनैव रूप्येण स्वर्णेन च जीयेत दण्डयेत्।

विचितेत्यादि। विचितवस्त्रहस्तगुह्याः वस्त्रं हस्तो गुह्यं च विचितं रूप्यस्वर्णयुक्तं न वेति परीक्षितं येषां ते तथाविधाः भूत्वा, काञ्चनपृषतत्वष्टृतपनीयकारवः काञ्चनकारवः रसवेधस्वर्णीकरणशिल्पिनः पृषतकारवो गुलिकादिसूक्ष्मशिल्पकारिणः त्वष्टृकारवः पट्टपात्रादिशिल्पिनः तपनीयकारवः नानाजातीयभूषणशिल्पिनश्च, ध्मायकचरकपांसुधावकाः भस्त्राध्मायकाः परिचारकाः धूलिशोधकाश्च, प्रविशेयुः अक्षशालां निष्कसेयुश्च ततो निर्गच्छेयुश्च।

चाणक्यटीका

पीतवाध्यक्षे वक्ष्यामः। सुवर्णपरीक्षा प्राप्तापि वाह्यत्वात् अनेकार्थत्वाच्च। तेनोपदेशेनेति यथोक्तेन······येण वक्ष्यमाणेन तुलाप्रतिमानेन दद्यात् कर्मार्थं कारुभ्यः। निष्पन्नञ्च आददीत असंभवात् (?)। स्वर्णवदेव रूप्यस्येति रूप्यग्रहणेन ज्ञापयति॥

उच्छेद्य इति। अपरिजिहीर्षयोपदेशेन······सर्वस्वमाहार्यं इत्यन्ये। सरूप्यसुवर्ण इति। आत्मीयरूप्यसुवर्ण इति। आत्मीयरूप्यसुवर्णस्तेनैव तद्द्रव्येण जीयेत तदेवास्यापह्रियेत इत्यर्थः। परिवर्तयितुकामत्वादस्येति॥

सर्वं चैषामुपकरणमनिष्ठिताश्च प्रयोगास्तत्रैवावतिष्ठेरन् । गृहीतं सुवर्णं धृतं च प्रयोगं करणमध्ये दद्यात् । सायं प्रातश्च लक्षितं कर्तृकारयितृमुद्राभ्यां निदध्यात् ।

चाणक्यटीका

विचितवस्त्रगुह्या इति । विचितं वस्त्रं गुह्यञ्च मुखकर्णरन्ध्रादीनि येषामिति । काञ्चनकारवः क्षेपणकारवः । अन्येषां कर्मणां स्वशब्देनाभिधानम् । पृषतत्वष्टृतपनीयकारव इति । (मरकारौशकीरादिस्सूदादि···? ध्मायकाः सरकपांसुधावकाः[1] । ये पांसून् सुवर्णमिश्रान् जलेन क्षालयन्ति तेषां प्रविशतां यदि सुवर्णादि दृश्यते, तदा यथानुरूपो दण्ड इत्यर्थादापन्नम् ॥

श्रीमूला

सर्वं चेति । एषां कारुप्रभृतीनां, सर्वम् उपकरणम्, अनिष्ठिताः प्रयोगाश्च असमाप्तानि शिल्पानि च, तत्रैव अवतिष्ठेरन् अक्षशालातो बहिर्न नीयेरन् । गृहीतमति । गृहीतं भाण्डागाराद् आत्मनोपात्तं सुवर्णं, प्रयोगं च यत्र सुवर्णं प्रयुक्तं तं पदार्थं च, करणमध्ये धृतं दद्यात्, करणानां राजलेखकानां स्वस्वपुस्तकेष्वर्थं लिखतां साक्षिभूतानां मध्ये तुलाधृतं कृत्वा प्रत्यर्पयेत्, अर्थात् सुवर्णाध्यक्षः । सायं प्रातश्च दैनन्दिनव्यापारस्यावसाने प्रारम्भे च, कर्तृकारयितृमुद्राभ्यां लक्षितं कर्तृकारयित्रोः सौवर्णिकसुवर्णाध्यक्षयोर्मुद्राभ्यां चिह्नितम् स्थापयेत्, सुवर्णम् । करणमध्य इत्येव ।

चाणक्यटीका

उपकरणं भस्त्रासन्दंशादि । अनिष्ठितान्·····प्रयोगा इति प्रयुज्यमानान्यलङ्कारभाण्डानि । तत्रैव अक्षशालायाम् । तिष्ठेयुः आपरिसमाप्तेरिति ॥

गृहीतं कोशागारात् । करणमध्य एवाध्यक्षः (तं रुप्यो ?) दद्यात् । धृतञ्चेति परी·····पणकाचार्पणादि । (अ) निष्पन्नं करणमध्य एवार्पयेद् राज्ञ इति । लक्षितं विदितं विदध्यात् । प्रातःकरणमध्ये कर्तुम् । सायमक्षशालायामिति ॥

प्रतिपदपञ्चिका

पालनविधिमाह—सायं प्रातश्च रात्र्यादौ प्रत्युषसि च लक्षितं चिह्नितं कर्तृकारयितृमुद्राभ्यां सुवर्णकाराध्यक्षमुद्राभ्यां निदध्यात् स्थापयेत् । करणमध्य इति वर्तते ।

---

१. "सरकपांसुधावकाः सारत्रिभागं लभेरन्" इति कारुकरक्षणे वक्ष्यते । 'सरकोऽस्त्री मणी' इति केशवस्वामी ।

[तत्र प्रवर्तयितव्यानां कर्मणां भेदाः, विवरणं च]

क्षेपणो गुणः क्षुद्रकमिति कर्माणि । क्षेपणःकाचार्पणादीनि । गुणः सूत्रवानादीनि । घनं सुषिरं पृषतादियुक्तं क्षुद्रकमिति ।

[शुद्धमिश्रमणिसंयोजनयोः विधिः]

अर्पयेत् काचकर्मणः पञ्चभागं काञ्चनं दशभागं कटुमानम् । ताम्रपादयुक्तं रूप्यं रूप्यपादयुक्तं वा सुवर्णं संस्कृतं कं तस्माद् रक्षेत् ।

श्रीमूला

अथ कर्म त्रिधा विभज्य व्याचष्टे—क्षेपण इत्यादि । क्षेपणः तदाख्यं कर्म, काचार्पणादीनि मणिसंयोजनादीनि । गुणः तत्कर्म, सूत्रवानादीनि कटिसूत्रग्रथनादीनि । क्षुद्रकं सूक्ष्मपरिकर्म, घनं कटकाङ्गुलीयकादि, सुषिरं सरन्ध्रम् स्थालीभृङ्गारादि, पृषतादियुक्तं पृषतो गुटिका आदिपदात् पत्रभङ्गादि तद्युक्तम् । इतिशब्दः प्रकारान्तरसङ्ग्रहार्थः ।

अर्पयेदिति । काचकर्मणः मणिसंयोजनस्य विधिरुच्यत इति वाक्यशेषः । पञ्चभागं मणेः पञ्चमं भागं तलभागं काञ्चनम् अर्पयेद् आधारसुवर्णे प्रवेशयेत् । दशभागं काञ्चनप्रवेशितस्य भागस्यार्धम्, कटुमानम् अर्पयेत् मणिदार्ढ्यार्थो वास्तुकोपरिसुवर्णपट्टिकाबन्धः कटुमानमित्युच्यते । तत्र प्रवेशयेदित्यर्थः । रत्नार्पणाधारबन्धे रूप्यमये ताम्रपादयोजनेन तावद्रूप्यहरणम् सुवर्णमये रूप्यपादयोजनेन तावद् सुवर्णहरणं च पश्यतोहरैः सुकरं यतः, तस्मात् कारणाद् आधारबन्धो द्रव्यान्तरमिश्रणाद् यत्नेन रक्षणीय इत्युपदिशति—ताम्रपादेत्यादि । संस्कृतकं, यथोक्तमिश्रणाशुद्धमपि रूप्यं सुवर्णं वा शुद्धसदृशं प्रतिभायादित्यर्थः ।

चाणक्यटीका

सम्प्रति कर्माण्युच्यन्ते—क्षिप्यन्तेऽस्मिन् सुवर्णकाराद्य······क्षेपणः । काचार्पणादीनि, काचोऽर्प्यते यस्मिन् मणिर्मुक्ता वज्रः प्रवालो वा अवबध्यत इति, उदाहरणार्थत्वात् काचस्य । सूत्रवानादीनीति । सूत्रीकृत्य सुवर्णं यत्र शृङ्खलावेणीपट्टिकाद्यूयते । कण्ठादिभूपण······काञ्चनेनासुषिरेण यद् युक्तम्[१] अङ्गुलीयादि । (शुचि ? सुपिर) युक्तं मकुटकटकादियुक्तम् तदेव (सिद्ध्यर्थकादि ?) गुटिकायुक्तम् । आदिशब्दात् पत्रादियुक्तमपि (संयूह्यादि ?) घटादिद्रव्यम् ॥

तस्य प्रकारमाह—अर्पयेदिति । काचकर्मणः (संग्रामा ? संस्कृताद्) वास्तुकात् पञ्चमं भागं येन काचोऽवबध्यते । ननु च काचमर्पयेत् सुवर्णं इति वक्तव्यम् । सत्यम् । एवं सुवर्णवृत्त्या अर्पितं भवत्येवेति न दोषः । दशभागं कट(टु)मानमिति सुवर्णस्य ।

---

१. घनसुषिरपृषतादियुक्तं क्षुद्रकमिति टीकाकृतः समस्तपाठः ।

पृषतकाचकर्मणः त्रयो हि भागाः परिभाण्डं, द्वौ वास्तुकं; चत्वारो वा वास्तुकं, त्रयः परिभाण्डम् ।

चाणक्यटीका

(पञ्चसुवर्णस्य सुवर्णात् सहिता एकेन भागेन तावस्य विको वध्यते । ?) दशभागेन सुवर्णेन कटमानं मधूच्छिष्टस्य लाक्षाया वा प्रच्छादनं कार्यम् । शेषं सुवर्णत्रयं सार्धं वास्तुकर्म भवति । (सं) स्कृतमिति, ईदृशेषु सूचनीयमानं दुर्लक्षं कृत्रिमञ्च भवति । तस्माद् रक्षणीयं विशेषेणेति सर्वत्र योज्यम् ।

प्रतिपदपञ्चिका

त्रिप्रकारं कर्माह—क्षेपण इत्यादि । तानि च स्वयमेव व्याचष्टे—क्षेपणः काचार्पणादीनि मणियोजनादीनि । गुणःसूत्रवनादीनि कटिसूत्रग्रथनादीनि । घनम् अङ्गुलीयकटकमहीस्थलाकादि । सुषिरं भृङ्गारादि । पृषितं गुलि (ट) का तद्युक्तम् । आदिशब्दात् पतिकापत्रभङ्गादियुक्तं च । क्षुद्रकं सूक्ष्मपरिकर्म, इतिशब्दः प्रकारे ।

क्षेपणविधिमाह—अर्पयेत् प्रवेशयेत् । काचकर्मणः मणिसंयोजनकर्मणः मणौ पञ्चमं भागं तलभागं काञ्चनमित्याधारसुवर्णं प्रवेशयेत् । दशभागं सुवर्णप्रवेशितार्थं कटमानं प्रवेशयेत् ।

मणेर्दार्ढ्यार्थं वास्तुकोपरि सुवर्णपट्टिकाधानं कटु(ट)मानं ताम्रपादयुक्तमित्यादिना हरणोपायसम्भवमभिधाय रक्षाप्रयत्नाधिक्यार्थम् आह—संस्कृतकर्मिति, संस्कृतमिव शुद्धसदृशं यतो भवति तस्माद् रक्षेत् । शेषमृजु ।

श्रीमूला

शुद्धकाचकर्मविधिमुक्त्वा मिश्रकाचकर्मविधिमाह—पृषतेत्यादि । पृषतकाचकर्मणः गुटिकामिश्रकाचकर्मणि क्रियमाणे, तदर्थं सुवर्णं पञ्चधा विभज्य त्रयो भागाः, परिभाण्डं पद्मस्वस्तिकाद्याकारं पृषतमणिप्रतिवापस्थानं भवति, द्वौ वास्तुकं द्वौ भागौ आधारपीठबन्धः इत्येकः प्रकारः । यदि मणयः स्थूलास्तदा विधिमाह—चत्वारो वेत्यादि ।

चाणक्यटीका

पृषतकाचकर्मण इति, गुणकर्मण्येकरूपत्वाद् विभागो नोक्तः, क्षुद्रकर्मण्युच्यते । अङ्गुलीयकादौ पृषतं काचश्च विद्येते इति । पृषतकाचकर्मणः पञ्च भागान् सुवर्णकस्य कृत्वा त्रयो भागाः (च ?) भाण्डे सर्वत इति (अपरपिण्डितादि ?) संस्कारार्थाः[1] । द्वौ भागौ वास्तुकं मण्डलम् उपरिसंस्काराधारभूतं वास्तुस्थानीयं कारयेत् । एवं सप्त भागान् कृत्वा चत्वारो भागा वास्तुकम् । वा शब्दो विकल्पार्थः । यथा वा साधु समस्येत तथा वास्तुपरिभाण्डं वा विकल्पयेदित्यर्थः ।

---

१. 'परिमाण्डे सर्वत इति परिमाण्डं परिमाण्डादिसंस्कारार्थाः' इति पठनीयं भाति ।

[संयोजनावलेपनवासनानां त्वष्टृकर्मणां विधिः]

त्वष्टृकर्मणः—शुल्वभाण्डं समसुवर्णेन संयूहयेत् । रूप्यभाण्डं घनं घनसुषिरं वा सुवर्णार्धेन अवलेपयेत् । चतुर्भागसुवर्णं वालुकाहिङ्गुलकस्य रसेन चूर्णेन वा वासयेत् ।

प्रतिपदपञ्चिका

शुद्धकाचकर्मणां विधिमभिधाय पृषतव्यामिश्रकाचकर्मणो विधिमाह—पृषतकाचकर्मण इति, पृषतव्यामिश्रकाचकर्मणः पञ्चधा सुवर्णं विभज्य त्रयो भागाः परिभाण्डं पृषतमणिबन्धाद्यर्थं देयम् । द्वौ वास्तुकमाधारपीठनबन्धः, यद्वा परिकर्मवशात् सुवर्णं सप्तधा विभज्य चत्वारो वास्तुकं त्रयः परिभाण्डमिति ।

श्रीमूला

त्वष्टृकर्माह—त्वष्टुरित्यादि । त्वष्टृकर्मणः ताम्ररजतनिर्मितघनपत्रादिकर्मणः विधिरुच्यत इति शेषः । शुल्वभाण्डं ताम्रभाण्डं, समसुवर्णेन संयूहयेत् ताम्रपलतुल्यपलेन सुवर्णेन दृढपत्रीकृतेन संयोजयेत् । रूप्यभाण्डं, घनम् अङ्गुलीयककङ्कणादि, घनसुषिरं वा स्थालीकलशभृङ्गारादिकं वा, सुवर्णार्धेन अवलेपयेत् रूप्यपलशतकृतं भाण्डं पञ्चाशता सुवर्णपलैस्तनुपत्रीकृतैरेव श्लेषयेत् । अवलेपविधिमुक्त्वा वासनाविधिमाह—चतुर्भागसुवर्णमिति । रूप्यभाण्डमिति वर्तते । अयमर्थः—रूप्यपलशतकृतं भाण्डं पञ्चविंशतिपलसुवर्णेन चूर्णीकृतेन वालुकाहिङ्गुलकचूर्णमिश्रेण पारतयुक्तेन तुषाग्निद्रवीकृतेन वासयेत् । एवं तावत् सुवर्णस्य समस्यार्धस्य चतुर्भागस्य च योजनेन त्रिप्रकारं त्वष्टृकर्म व्युत्पादितम् ।

चाणक्यटीका

त्वष्टृकर्मण इति सुषिरस्य (तटा ? कटका) देः पत्रकर्मणः ताम्रमयं रूप्यमयं वा कटकघटकादि कृत्वा अन्यतमेन तत्प्रमाणेन सुवर्णेन श्लक्ष्णपत्रीकृतेन संयूहयेत् वेष्टयेदित्यर्थः । शिष्टप्रयोगाद् यूहतिर्धातुरनुमेयः । ऊहतेर्वा पृषोदरादिपाठाद् युगागमः । अयमतिस्फीतस्य विधिः ॥

रूप्यभाण्डं घनं घनसुषिरं वा ईषत्सुषिरं तदर्धेन सुवर्णेन तनुपत्रीकृतेन लेपयेत् । मध्यमविभवस्यायं विधिः । चतुर्भागसुवर्णं वा रूप्यताम्रभाण्डं वालुका हिङ्गुलुकेन द्रवीकृतेन । यवनेष्वेवायं (भ ? द्र) वतीति तदसम्भवाच्चूर्णीकृतेन वा वासयेद् भावयेत् । पश्चान्मन्दाग्निना निष्टप्य श्लक्ष्णीकुर्यात् । यावद् भाण्डेन सङ्घातं गमितमिति । अयं मन्दविभवस्य ॥

प्रतिपदपञ्चिका

त्वष्टृकर्माह—त्वष्टृकर्मण इति, घनपत्रादिकर्मणो विधिरुच्यत इति वाक्यशेषः । शुल्वभाण्डं ताम्रभाण्डं समसुवर्णकेन यावद्भिः शुल्व(वलै)पत्रैः भाण्डं कृतं तावता सुवर्णेन

[नीलपीतादिवर्णप्रकृतिभूतानां स्वर्णानां रजतानां च निर्देशः,
अशुद्धानां तेषां शुद्धिक्रमः, तत्तद्वर्णोत्पादनरीतयश्च]

तपनीयं ज्येष्ठं सुवर्णं सुरागं समसीसातिक्रान्तं पाकपत्रपक्वं सैन्धविकयोज्ज्वालितं नीलपीतश्वेतहरितशुकपीतवर्णानां प्रकृतिर्भवति ।

प्रतिपदपञ्चिका

(यावद्भिः शुल्वपत्रैः) संयूहयेत् दृढपत्रीकृतेन संयोजयेत् । रूप्यभाण्डं घनं लोलं-कटकस्थाल्यादि घनसुषिरं वाऽभ्यगारकलशादि सुवर्णार्धेनावलेपयेत् · रूप्यपलशतं भाण्डं पञ्चाशता सुवर्णपलैस्तनुपत्रकृतैरवलेपयेत् शोपयेत् । चतुर्भागसुवर्णं वा रूप्यभाण्ड-मिति वर्तते, पलशतघटितं रूप्यभाण्डं पञ्चविंशत्या सुवर्णपलैश्चूर्णीकृतैर्वालुका हिङ्गुल-कचूर्णव्यामिश्ररसेन पारतेन योजितैस्तत्तुषाग्निना द्रवीकृतैर्वासयेत् । तदेव सोमेनार्थेन(?) चतुर्भागेन च त्वष्टृकर्मणा सुवर्णं योजयेदिति ।

श्रीमूला

तपनीयकर्माह—तपनीयमित्यादि । तपनीयम् अलङ्कारार्थम् घटनीयं कनकं, ज्येष्ठम् उत्तमं सप्तदशवर्णकं षोडशवर्णकं वा, सुवर्णं किञ्जल्काद्यन्यतमवर्णम्, सुरागं स्निग्धभ्राजिष्णुरागम्, नीलपीतादीनां पञ्चानां प्रकृतिः कारणं भवति । अनेवम्भूता-शुद्धस्वर्णविषये आह—समसीसेत्यादिना । समसीसातिक्रान्तं तत्तुल्यमानसीसशोधितम्, पाकपत्रपक्वं तनुपत्रात्मकं कृत्वारण्यगोमयदग्धम्, सैन्धविकया सौराष्ट्रमृत्तिकया सह उज्ज्वालितम्, इत्थं शोधनेन संस्कृतम्, नीलादीनां प्रकृतिर्भवति ।

चाणक्यटीका

तपनीयमिति, तपनीयं वक्ष्यत इति वाक्यशेषः । तस्य प्रकृतिमाह—ज्येष्ठं सुवर्णम् । यदुक्तम् 'किञ्जल्कवर्णम्' इत्यादि । तन्मिश्रताम्रप्रतिषेधार्थं सुरागग्रहणम्, ज्येष्ठमपि हि प्रकम्पेत् । यथोक्तम् 'रक्तमवरञ्च श्रेष्ठानाम्' इति । कथं पुनस्तद् भवतीति चेत्, तुल्यमानेन सीसेन सहान्तर्मूपाध्माते गोमयक्षीरे वा निषेवित्तं विवासयेत् । न च तयोर्भेदः, तस्य परिहारार्थं (घृत ? पाक) पत्रादि कृत्वा वासितम् (आपेक्ष-वात् ?) सैन्धविकया च सौराष्ट्रमृत्तिकया उज्ज्वलितम् । वर्णव्यक्त्यर्थं सुराग-मित्युच्यते । तन्नीलादीनां लोहान्तरसंसृष्टानां प्रकृतिर्भवति ।

प्रतिपदपञ्चिका

तपनीयकर्मणि वर्णप्रकृतिमाह—तपनीयमित्यादि, तपनीयं घाटनीयं ज्येष्ठमुत्तमं सप्तदशवर्णकं षोडषवर्णकं वा सुवर्णं किञ्जल्ककुरण्टककाद्यन्यतमवर्णं सुरागं स्निग्धं भ्राजिष्णु रागनीलादीनां प्रकृतिर्भवति । यत् पुनरेवंभूतं न भवति ।

तीक्ष्णं चास्य मयूरग्रीवाभं श्वेतभङ्गं चिमिचिमायितं पीतचूर्णितं, काकणिकः सुवर्णरागः । तारमुपशुद्धं वा ।

अस्थितुत्थे चतुः, समसीसे चतुः, शुष्कतुत्थे चतुः, कपाले त्रिः, गोमये द्विः, एवं सप्तदशतुत्थातिक्रान्तं सैन्धविकयोज्ज्वालितम् ।

श्रीमूला

तीक्ष्णं चेति । अस्य तपनीयस्य, तीक्ष्णं तदाख्यो लोहविशेषश्च, प्रकृतिर्भवतीत्यनुवर्तते, अर्थान्नीलादीनां पञ्चानाम् । कीदृशं तीक्ष्णम् मयूरग्रीवाभम्, श्वेतभङ्गं छेदे शुक्लम्, चिमिचिमायितम् अत्यन्तभास्वरम्, ईदृशं तीक्ष्णम्, पीतचूर्णितं तप्तचूर्णीकृतं स्वर्णे प्रक्षिप्तमित्यार्थम् । कियति स्वर्णे कियत् तीक्ष्णं रञ्जनार्थं प्रक्षेप्तव्यमित्यत्राह—काकणिक इति । सुवर्णरागः षोडशमाषप्रमाणस्य सुवर्णस्य रागो रञ्जकस्तीक्ष्णांशः, काकणिकः काकणो माषचतुर्भागस्तत्प्रमाणकः ।

स्वर्णानन्तरं रूप्यमाह—तारमित्यादि । उपशुद्धम् अत्यन्तशुद्धम्, तारं रजतं वाशब्दो विकल्पे । नीलादीनां प्रकृतिर्भवतीत्यनुवर्तते ।

तारस्याशुद्धस्य शोधनप्रकारमाह—अस्थितुत्थ इति । अस्थितुत्थे अस्थिचूर्णयुक्तमृत्तिकानिर्मितायां मूषायाम्, चतुः चतुर्वारान्, आवर्तितम्, एवं समसीसे मृत्तिकासीससमप्रमाणनिर्मिते तुत्थे चतुः, शुष्कतुत्थे 'शुष्कतुत्थः कटुशर्करा मूषा' इति भट्टस्वामी, तस्यां चतुः, कपाले शुद्धमृत्तिकामूषायां त्रिः, गोमये गोमयकृतमूषायां द्विः, एवं सप्तदशतुत्थातिक्रान्तं सप्तदशमूषावर्तितं, पश्चात्, सैन्धविकया लवणयुक्तसौराष्ट्रमृत्तिकया सह, उज्ज्वालितम् उज्ज्वलनसंस्कृतम्, शुद्धमित्यार्थम् ।

चाणक्यटीका

तीक्ष्णमिति । कालायसं चास्य माषस्य तपनीयविशेषस्य प्रकृतिः । कीदृशं चेत्, मयूरग्रीवाभं श्वेतं भङ्गे यत् चिमिचिमायति मेचकं भवतीत्यर्थः । तत् प्रताप्य उदकोक्षितं ततश्चूर्णितं काकणीप्रमाणं ज्येष्ठसुवर्णमाषस्य मिश्रितं रागो भवति, नीलवर्णाधानार्थः ॥

तारमुपशुद्धं वेति । तारं ज्येष्ठमित्यपेक्षणीयम् । तच्चोक्तम्—"श्वेतं स्निग्धं मृदु च श्रेष्ठम्" इति । उपायैः शुद्धं वा । ज्येष्ठाभावे तानुपायानाह—गवास्थिलिप्तायां मूषायां तत्कृतायां वा चतुरो वारान् शुद्धम्, समसीसप्रमाणे वा यत्र क्वचन मूषायां चतुष्कृत्वः, एवं शुष्कीकृते (रिक्त ? तुत्थ) मूषायां चतुष्कृत्वः, कपालसम्पुटेति पुटपाकपक्वे क्वचिन्मूषायां (त्रिर्) विपाच्य महिषगोमये द्विर्निषेचयेत् । एवमनेन क्रमेण सप्तदशभ्योऽतिक्रान्तम् । एतच्च तपनीयप्रकृतिर्भवति ।

प्रतिपदपञ्चिका

तस्य शोधनप्रकारमाह—समसीसातिक्रान्तं तत्तुल्यसीसशोधितम् पाकपत्रपक्वम्

एतस्मात् काकण्युत्तरापसारिता आ द्विमापादिति सुवर्णे देयं, पश्चाद् रागयोगः, श्वेततारं भवति ।

त्रयोंऽशाः तपनीयस्य द्वात्रिंशद्भागश्वेततारमूर्छितं सत् श्वेतलोहितकं भवति । ताम्रं पीतकं करोति । तपनीयमुज्ज्वाल्य रागत्रिभागं दद्यात् । पीतरागं भवति ।

प्रतिपदपञ्चिका

अरण्यगोमयदग्धं सैन्धविकया सौराष्ट्रमृत्तिकयोज्ज्वालितं निष्टप्तं नीलादिवर्णानां पञ्चानां प्रकृतिः कारणं भवति ।

किं तदेव केवलं, नेत्याह—तीक्ष्णं चास्येति । तीक्ष्णं लोम(ह)विशेषः चस्समुच्चये । अस्य नीलादेर्वर्णस्य प्रकृतिर्भवतीति वर्तते । तस्य लक्षणमाह—मयूरग्रीवाभमिति । तत्तुल्यवर्णं श्वेतभङ्गं शुक्लच्छेदं चि चम (चि) चमायति, अतिभास्वरत्वात् । कणिका ज्वलन्त्य इव दृश्यन्ते । तदेवम्भूतं पीतचूर्णितं प्रतप्तनिक्षिप्तं चूर्णीकृतम्, काकणिकः माषचतुर्भागिकः । सुवर्णराग इति । सुवर्णष्षोडशमाषकप्रमाणः, तस्य रागार्थं देय इति ।

एवं सुवर्णमभिधाय रूप्यमाह—तारमित्यादि, तारं रूप्यम् उपशुद्धं सम्यक् शुद्धम् । वा विकल्पे । नीलादीनां प्रकृतिर्भवति ।

तस्याप्यशुद्धस्य शोधनविधिमाह—अस्थितुत्थ इत्यादि । अस्थितुत्थः अस्थिचूर्णमिश्रमृत्तिकामूषा, तत्र चतुरो वारानावर्तितम् । तद्वत् समसीसे तुल्यसीसे च चतुष्कृत्वः शुष्कतुत्थः कटकशर्करामूषा, तत्र चतुः कृत्वा कपालं शुद्धमृत्तिकामूषा तत्र त्रिर्गोमयं गोमयमिश्रमृत्तिकामूषा, तत्र द्विः । एवं सप्तदशतुत्थातिक्रान्तं सप्तदशमूषाविशोधितं सैन्धविकयेति पूर्ववदुज्ज्वालितम् । एतस्मादुक्तलक्षणाच्छोधितरूपात् काकणीमपनीय शोधितरूप्य(प्य)काकणीप्रक्षेपोऽपचयक्रमेण द्विमाषकादिति सुवर्णे रूप्यकर्षे देयम् ।

श्रीमूला

एतस्मात् काकणी उत्करीत्या शोधिताद् रूप्यात् काकणी, सुवर्णे प्रक्षिप्ता, उत्तरा अपसारिता अधिका सुवर्णकाकणी अपनीता भवति । इति आ द्विमाषात् सुवर्णे देयम्, एवं सुवर्णकाकण्यपनयनपूर्वकरूप्यकाकणीप्रक्षेपोपचयक्रमेण अष्टकाकण्यधिकः सुवर्णे रूप्यप्रक्षेपः कर्तव्यः । पश्चाद्, रागयोगः रागयोगार्थो यथोक्ततीक्ष्णकाकणीप्रक्षेपः । श्वेततारं भवति एवंकरणे स्वर्णं श्वेततारसमप्रभं सम्पद्यते । केचित् तु श्वेततारं रागार्थं भवतीति व्याचक्षते ।

रागयोगमाह—त्रयोंऽशा इत्यादि । एवं स्वामी व्याचष्टे—सामान्यसुवर्णाद् द्वात्रिंशद्धा विभक्ताद् अंशत्रयमपनीय, तपनीयस्य यथोक्तप्रकारशोधिततपनीयस्य, त्रयोंऽशाः सामान्यस्वर्णे प्रक्षिप्यन्त इति शेषः । तत् स्वर्णम्, द्वात्रिंशद्भागश्वेततारमूर्छितं

श्रीमूला

द्वात्रिंशद्भागिकेन श्वेतरजतेन सहावर्तितं सत्, श्वेतलोहितकं भवति श्वेतलोहितात्मकवर्णद्वयसम्भिन्नं भवति। ताम्रं कर्तृ, पीतकं पीतवर्णं करोति, अर्थात् तदेव सामान्यस्वर्णं कर्म। इहापि पूर्ववत् 'त्रयोंऽशा' इत्यादि योजनीयम्, श्वेततारस्थाने च ताम्रम्। तथा च तत् स्वर्णं द्वात्रिंशद्भागिकताम्रेण सहावर्तितं सत् पीतवर्णं जायत इत्युक्तं भवति। भाषाटीका त्वन्यथा व्याचष्टे—द्वात्रिंश तिभागेषु त्रयोंऽशास्तपनीयस्य, शेषास्तु रजतस्येत्येवं मिश्रयित्वावर्तने कृते तच्छ्वेतलोहितवर्णं भवति। एवं द्वात्रिंशद्भागात्मके ताम्रे शुद्धसुवर्णस्य त्रीन् भागान् योजयित्वावर्तने कृते तत् पीतरागं भवतीति।

तपनीयमुज्ज्वाल्येति। तपनीयं सामान्यस्वर्णम्, सैन्धविकयोज्ज्वाल्य, रागत्रिभागं शोधितस्वर्णत्रिभागम्, दद्यात्। पीतरागं भवति। तथाकरणे तत् सामान्यस्वर्णं पीतरागं पीतरक्तं भवति। अपरा व्याख्या—तपनीयं शोधितसुवर्णं सैन्धविकयोज्ज्वाल्य तत्र रागत्रिभागं ताम्रत्रिभागं दद्यात्। तत् पीतरागं भवतीति।

चाणक्यटीका

एतस्माच्च काकण्युत्तरम् आ द्विमाषाद् अष्टाभ्यः काकणीभ्य इत्यर्थः। ज्येष्ठसुवर्णस्य कर्षे देयम्। अष्टौ यथोत्तरं शुक्लतारास्तपनीयभेदा भवन्ति। एवमष्टप्रमाणं तपनीयं कृत्वा पश्चाद् रागार्थं युज्यते श्वेततारमिति।

अपरे त्वाहुः—पूर्वं श्रेष्ठं सुवर्णं रूप्यं च परिशुद्धं कृत्वा पश्चाद् रागयोगः श्वेततारम् अ (भि ?) त्रयोग इति।

तपनीयस्य अष्टप्रकारस्य प्रयोगाः। तत्र भागमेकं पृथक् कृत्वा तद् द्वात्रिंशद्भागेन पुनः शुद्धरूप्येण संयूहितम् अपराभ्यां भागाभ्यां सम्पृक्तं श्वेताधिकं लोहितं भवति। तदपि अर्थादष्टविधमेव। अंशत्रयग्रहणानुकर्षस्य द्वात्रिंशद्भागं श्वेततारं मूर्च्छितं सुवर्णमिति वाच्यं स्यात्। अपरस्मिन् प्रकारे तपनीयार्थस्य ज्येष्ठसुवर्णस्य त्रयोंऽशाः। तत्रैकोंऽशः तद्द्वात्रिंशद्भागेन श्वेततारमूर्च्छितो द्वाभ्यां संसृष्ट इति। तथा वाल्पत्वाच्छ्वेततारस्य किञ्चिच्छ्वेतलोहितमेतैर्नवमः पूर्वे त्वष्टौ श्वेतविशेषा इति॥

ताम्रं पीतमिति। ताम्रं परिशुद्धमेव विमिश्रं पीतं करोति। कथमितिचेत्तदाह—तपनीयम्, अष्टप्रकारं सैन्धविकया उज्ज्वाल्य ताम्रत्रिभागं दद्यात्। एवमष्टौ पीतभेदाः तपनीयार्थस्य चेत् सुवर्णस्यैकविधमेव।

प्रतिपदपञ्चिका

पश्चाद्रागयोग इति। शुद्धाशुद्धरूप्यं पूर्वमावर्त्य पश्चाद्यथोक्ततीक्ष्णकाकणिको रागयोगार्थं देय इत्येवं श्वेततारमलक्षितविशेषं सनवधा भवति। हरणोपायश्चायमवगन्तव्य इति केचित्।

अपरे त्वस्मच्छोधितरूप्यात्तपनीये काकणीकाकणीं प्रक्षिप्य उत्तरामुत्तरां चापनीय एवं रूप्ययुक्तं सुवर्णमष्टधा विभिद्यते। पश्चाद्रागयोग इति पूर्वं सरूप्यं

श्वेततारभागौ द्वावेकस्तपनीयस्य मुद्गवर्णं करोति। कालायसस्यार्धभागाभ्यक्तं कृष्णं भवति। प्रतिलेपिना रसेन द्विगुणाभ्यक्तं तपनीयं शुकपत्रवर्णं भवति। तस्यारम्भे रागविशेषे प्रतिवर्णिकां गृह्णीयात्।

प्रतिपदपञ्चिका

सुवर्णमावर्त्य ततस्तीक्ष्णकाकणी रागयोगार्थं देय इति श्वेतताराभं कनकं भवति।

त्रयोंऽशास्तपनीयस्येति। सामान्यसुवर्णं द्वात्रिंशद्विधाभिः विभज्य ततोंऽशत्रयमपनीय पूर्वोक्तशोधिततपनीयस्य त्रयोंऽशाः प्रक्षिप्यन्ते। ततस्तद्द्वात्रिंशद्भागिकश्वेततारमूर्छितद्वात्रिंशद्भागिकेन श्वेततारेण सह मूर्छितमावर्तितं सद् वर्णद्वयेन श्वेतेन लोहितेन च सम्भिन्नं भवतीति केचित्। अपरे तु त्रयोंऽशास्तपनीयस्य शुद्धसुवर्णस्य, तद् यथा द्वात्रिंशतां सुवर्णानां तृतीयांशेन सुवर्णत्रिभागं न्यूनांशका दश भवन्ति। ततस्सुवर्णमपनीय त्रयाणामप्यंशानां द्वात्रिंशद्भागेन श्वेततारस्य सुवर्णेन सह मूर्छितं सत् श्वेतलोहितकं भवति। तस्मात् पुनरेकैकांशेन न त्रिभिरपीति व्याख्यायते। त्रयोंऽशग्रहणात् यदि त्रिभिरप्यंशैः सह वर्तमानं अभिप्रेतम्, तदा त्रयोंऽशग्रहणं न कुर्यात्। द्वात्रिंशद्भागश्वेततारमूर्छितमिति ब्रूयात्। ताम्रं पीतं करोतीति पूर्ववत् त्रयोंऽशास्तपनीयस्य श्वेततारस्थाने च ताम्रं योजनीयम्। इत्येवं पीतकं रागं सुवर्णं करोतीति, तपनीयमुज्वाल्येति, तपनीयं सामान्यसुवर्णं पूर्ववत् सैन्धविकयोज्ज्वाल्य रागत्रिभागांशं दद्यात्। तदेव रक्तपीतं पीतरक्तं पीतरागं भवति। यद्वा तपनीयं शोधितसुवर्णं सैन्धविकयोज्ज्वाल्य रागत्रिभागमिति तीक्ष्णलोहस्य सुवर्णे काकणिको रागार्थं प्रक्षेपो विहितः। स एव माषत्रद्वादशभागसुवर्णं देय इत्येव। पीतमपि तत् कडाराभं भवति।

श्रीमूला

द्विगुणशुद्धरूप्ययुक्तं शुद्धसुवर्णमावर्तितं मुद्गवर्णं भवतीत्याह—श्वेततारभागावित्यादि। पश्चाद् रागयोग इति सर्वशेषो द्रष्टव्यः। कालायसस्येति। कालायसस्य तीक्ष्णस्य, अर्धभागाभ्यक्तम् अर्धभागेन रागार्थस्य तीक्ष्णस्य प्रमाणं तृतीयांश उक्तः तदर्धभागेन अर्थात् षड्भागेन अभ्यक्तमनुलिप्तं न त्वावर्तितम्, तपनीयं, कृष्णम् अञ्जनवर्णम्, भवति। प्रतिलेपिना द्रवीकृतेन कालायसेन, रसेन पारदयुक्तेन, द्विगुणाभ्यक्तं द्विगुणमनुलिप्तं, तपनीयं, शुकपत्रवर्णं भवति। तस्येति। तस्य नीलादेरुक्तस्य, आरम्भे, रागविशेषेषु शुद्धाशुद्धस्वर्णरजतरूपेषु रञ्जकभेदेषु विषये, प्रतिवर्णिकां तारतम्यपरिच्छेदार्थम्, गृह्णीयात्।

चाणक्यटीका

तथा कालायसस्य तपनीयप्रकृतेः अर्धभागेन अभ्यक्तं तपनीयम् अष्टविधं कृष्णं भवति। तपनीयार्थं चेत् सुवर्णमेकविधमेव। तथा प्रतिलेपनशीलेन रसेन धातुवाद-

तीक्ष्णताम्रसंस्कारं च बुद्ध्येत, तस्माद् वज्रमणिमुक्ताप्रवालरूपाणामपनेयिमानं च रूप्यसुवर्णभाण्डवन्धप्रमाणानि चेति ॥

चाणक्यटीका

शास्त्रविहितेन द्विगुणेन अभ्यक्तम् एतद्द्विगुणं तपनीयम् अष्टविधं शुकपत्रसुवर्णं भवति। तपनीयार्थं चेत् सुवर्णमेकविधं भवति। प्रति (लिखितं ? लेपनं) चात्र लक्षणानभिधानाज्ज्ञापयति। धातुवादशास्त्रज्ञसखः सुवर्णाध्यक्षः ख्यातः (या ? तथा) अध्यक्षयति। एवं नीलमेकमष्टौ तपनीयस्य भेदाः। तपनीये च रज्यमाने श्वेतलोहितस्य पीतस्य मुद्गवर्णस्य कृष्णस्य शुकवर्णस्य प्रत्येकम् अष्टसत्त्वमिति एकोनपञ्चाशत् तपनीयस्य भेदाः। नीलमेकमष्टविधं तपनीयम्। ज्येष्ठसुवर्णे च रज्यमाने श्वेतलोहितपीतमुद्गवर्णकृष्णशुकपत्रवर्णानां पञ्चानामेकविधत्वे चतुर्दशविधास्तपनीया इति व्याख्यातं भवति।

तस्य तपनीयस्य आरम्भे (प्राक्षिश्रयं आपातविशेषेपु ?) नीलादिप्रतिवर्णिकां प्रतिरागं प्रकृतीनां सुवर्णतीक्ष्णतारताम्राणां गृह्णीयात्। उत्तरकालमनुस्मरणार्थं शोधनार्थं चेति ॥

प्रतिपदपञ्चिका

श्वेततारभागौ द्वावेकस्तपनीयस्येति, एवं द्विगुणशुद्धरूप्यं सुवर्णमावर्तितं मुद्गवर्णं भवति। पश्चाद् रागायोग इति सर्वत्रानुवर्तते।

कालायसस्य अर्धभागाभ्यक्तमिति। तृतीयांशस्तपनीयस्योक्तस्तदर्थं षड्भागः कालायसस्य भवति। तेनाभ्यक्तमनुलिप्तम्, अभ्यक्तग्रहणमावर्तनप्रतिषेधार्थं तपनीयं कृष्णमञ्जनाभं भवति। प्रातिलेपिना द्रवीकृतभालनकृष्णायसेनेति केचित्। तेनैव हिङ्गुलकसहिते(ने)त्यपरे। रसेन पारदेन च द्विगुणाभ्यक्तं बहुलतराभ्यक्तं द्विगुणं वा तपनीयमभ्यक्तं द्विगुणाभ्यक्तं शुकपत्रवर्णाभम्। तस्यारम्भ इत्यादि। तस्य नीलादेरारम्भे सुवर्णस्य च रूप्यस्य शुद्धस्याशुद्धस्य हरणप्रतिषेधार्थं प्रतिवर्णिकां गृह्णीयात्। इतरेतरान्तरपरिच्छेदार्थं तीक्ष्णताम्रसंस्कारं तच्छोधनमनुक्तमपि धातुशोधनशास्त्रतः तद्वद्भ्यो वा बुद्ध्येत। तथा च—

"निर्दिष्टं तत्क्रियाभिज्ञैः धातुशास्त्रविशारदैः।
औषधैः प्रतिवापैश्च शोधनं ताम्रतीक्ष्णयोः ॥" इति।

अन्ये तु ताम्रसंस्कारमिति तारं पठन्ति। तच्चासत्कारसंस्कारस्यात्रैवाभिहितत्वात्। उक्तं हि अस्थितुल्ये चतुरित्यादि।

श्रीमूला

रञ्जनार्थंतीक्ष्णताम्रयोः शुद्धिपरिज्ञानापेक्षायामाह—तीक्ष्णेत्यादि। तीक्ष्णताम्रयोः संस्कारं शोधनम्, बुध्येत धातुशोधनशास्त्राज्जानीयात्। तस्मात् सुवर्ण-

[चतुर्दशानां कनकगुणानां निर्देशः]

समरागं समद्वन्द्वम् असक्तपृपतं स्थिरम् ।
सुविमृष्टमसंपीतं विभक्तं धारणे सुखम् ॥८६॥

श्रीमूला

रजतादिशुद्धिप्रकारज्ञानस्य यो हेतुः कारुहरणशङ्कारूपस्तेनैव हेतुनेत्यर्थः, वज्रमणिमुक्ताप्रवालरूपाणाम्, अपनेयिमानं च असारहीरमाणिक्यादिप्रक्षेपेण सारहीरमणिक्यादिपरिवर्तनादिकं हरण प्रकारं च रूप्यसुवर्णभाण्डवन्धप्रमाणानि च रूप्यसुवर्णाभरणादीनां संव्यूहनादीनि च 'शुल्वभाण्डं समसुवर्णेन संयूहयेत्' इत्यादिनोक्तानि, वुध्येतेति सम्वध्यते । इतिशव्दः प्रकारे ।

चाणक्यटीका

तीक्ष्णताम्रसंस्कारश्च अनुक्तमपि तपनीयाङ्गभूतं धातुवादशास्त्रं विद्यात् । तस्मादिति, तस्मादेव च कारुभ्योऽवप्रमादात् वज्रमणिमुक्ताप्रवालरूपाणां नानावन्धानाम् आश्रयस्य कटकादेः । अपनेयिनो मण्यादिभिः सह पृथक्त्वमानं वुध्येत । रूप्यसुवर्णभाण्डेन सह वन्धानां भृङ्गारादौ प्रमाणं मण्यादीनां पृथक् सह च विद्यात् ॥

प्रतिपदपञ्चिका

तीक्ष्णसंस्कारस्य चानुक्तत्वात् । तत्सहचरितानुक्तसंस्कारताम्रपायुक्तिमानिति । तस्माद् वज्रेति । तस्मात् सवर्णोदाहरणात् वज्रादिरूपाणामपनेयमानमपनीतत्वमसारमणिप्रक्षेपेण सारमणिपरिवर्तनादिकं हरणप्रकारं वुद्धयेतेति वर्तते । यद्वा वज्रादिसमेतं रूपं वज्रमणिमुक्ताप्रवालसंयोजितमाभरणं तस्मादपनेयिमानम्, तद् यथा, दश सौवर्णके विंशतिः लिकादि पञ्च वज्राण्यायोज्यन्ते । पञ्च माषिकाणि पञ्च मौक्तिकानि दश माषकाणि पञ्च मौक्तिकानि । तदा तैः सह यावत्प्रमाणं कटकं भवति मूपोपनिषदि पादिना, अपि च एकस्मिन् मणौ द्वित्रेपु वापनीतेपु यावत्प्रमाणं तद् भवति, ततः अपनेयिमानं वुद्धयेत । केचिन्मध्यमानप्रमाणमपनेयिमानमाह—अपनेयिमानमिति । तथा रूप्यसुवर्णभाण्डादि निरूप्य सुघर्णाभरणादीनि तेषां वन्धप्रमाणानि संयूहनादिप्रविभागात् । तद् यथा—शुल्वभाण्डं समसुवर्णेन संयूहयेत् इत्यादि, इतिशब्दश्चार्थे प्रकारे वा ।

श्रीमूला

अध्यायान्ते श्लोकद्वयं तपनीयगुणचतुर्दशकप्रतिपादकमाह—समरागमित्यादि । समरागं समवर्णिकम्, समद्वन्द्वं तोलनतो वर्णतश्च स्वसमानद्वितीयम्, असक्तपृषतम् असंसक्तगुटिकम्, स्थिरम् अविसंवादि, सुप्रमृष्टं पूर्वोक्तविधिना सैन्धविकया सम्यगुज्ज्वालितम्, अप्रमृष्टमिति पाठे अकृत्रिमच्छायम्, असम्पीतं छायोत्कर्षार्थं पायितं न भवति, विभक्तं सुविभक्तावयवम्, धारणे सुखम् आमुञ्चताम् अदुःखकरम्, अभिनीतम् अनुद्वर्णं,

अभिनीतं प्रभायुक्तं संस्थानमधुरं समम् ।
मनोनेत्राभिरामं च तपनीयगुणाः स्मृता ॥८७॥

[इत्यध्यक्षप्रचारे अक्षशालायां सुवर्णाध्यक्षस्त्रयोदशोऽध्यायः ।
आदितश्चतुस्त्रिंशः]

श्रीमूला

प्रभायुक्तं द्युतिमत्, संस्थानमधुरम् आकृतिरमणीयम्, समम् अनिम्नोन्नतप्रदेशम्, मनोनेत्राभिरामं मनोहरं दृष्टिसुखं च, तपनीयगुणाः स्वर्णाभरणगुणाः ॥

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोदशोऽध्यायः, अक्षशालायां सुवर्णाध्यक्षः,
आदितः चतुस्त्रिंशः ॥

चाणक्यटीका

सम्प्रति तपनीयस्य समाप्तकर्मणो गुणानाह—समरागं तप्तमतप्तं वा अन्तर्बहिश्च समरागम् । समद्वन्द्वं कटकादियुग्ममितरैरभिन्नप्रमाणान्तरम् । असक्तपृषतम् असमविहितपृषतम् । स्थिरम् अविशरणम् । सुप्रमृष्टं सम्यक्कृतप्रमार्ष्टिकम् । असंवीतम् अन्यैः क्षणशोभाकारिभिरनुपहतरागम् । विभक्तं यथाभागावस्थितरूपम् । धारणे सुखम्, अर्तकितत्वादनतिश्लिष्टगाढत्वाच्च ।

स्वभि (वि ?) नीतम् अ (ष्ट ? न) तिस्पष्टरूपम्, अनुल्बणस्तिमि (तमित) मित्येतत् । प्रभायुक्तं भास्वरम् । संस्थानमधुरं कर्त्रा यथेष्टं स्थापयितुं शक्यम् । कर्मण्यमित्यर्थः । समम् आदिमध्यावसानेष्वेकरूपमिति ॥

॥ सुवर्णाध्यक्षस्त्रयोदशं प्रकरणम् ॥

॥ त्रयोदशश्चाध्यायः ॥

प्रतिपदपञ्चिका

सम्प्रति चतुर्दश तपनीयगुणानाह श्लोकद्वयेन—समरागमित्यादि । समरागं समवर्णिकं समद्वन्द्वं स्वसमानद्वितीयं तोलयतो वर्णतश्च असक्तपृषितम् असंसक्तगुणिकासन्निवेशं स्थिरमपि संवादि सुप्रमृष्टं पूर्वोक्तविधिना सैन्धविकयाऽतिशयोज्ज्वालितम् । केचिदप्रमृष्टमिति पठन्तो(न्तः)कृत्रिमच्छायमाचक्षते । असम्वीतमपायितम् अनुत्कर्पितमित्यपरे । विभक्तं सुविभक्तावयवम्, धारणे सुखम् आमुञ्चताम् अदुःखकरं अभिनीतमनुल्बणं प्रभायुक्तं दीप्तिमत् । संस्थानमधुरमाकृतिरमणीयं सम मनिम्नोन्नतप्रदेशं सन्मनोभिरामम् अवाच्यत्वान्मनोहरं नेत्राभिरामं दृष्टिसुलभसुखं चकाराद् रक्षोघ्नपत्रपुष्पादिफलगुणं तपनीयगुणा आभरणगुणास्तज्ज्ञैः स्मृत इति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायाम् अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे त्रयोदशोऽध्यायः परिसमाप्तः । श्रीरस्तु ।
आदितः चतुस्त्रिंशोऽध्यायः अतीतः ॥

द्वात्रिंशं प्रकरणम्

चतुर्दशोऽध्यायः ।

विशिखायां सौवर्णिकप्रचारः

[निर्दिष्टकालाद्यतिक्रमे दण्डविधानेन रजत-
स्वर्णसम्बन्धिशिल्पप्रवर्तनविधिः]

सौवर्णिकः पौरजानपदानां रूप्यसुवर्णमावेशनी(नि)भिः कारयेत् । निर्दिष्टकालकार्यं च कर्म कुर्युः अनिर्दिष्टकालं कार्यापदेशम् । कालातिपातने पादहीनं वेतनं तद् द्विगुणश्च दण्डः; कार्यस्यान्यथाकरणे वेतननाशः तद्द्विगुणश्च दण्डः ॥

श्रीमूला

विशिखायां सौवर्णिकप्रचार इति सूत्रम् । विशिखायां विशिखेह सौवर्णिक विपणिः तस्याम्, सौवर्णिकप्रचारः सौवर्णिकस्य सुवर्णे नियुक्तस्य प्रचारो व्यापारः, सोऽभिधीयत इत्यर्थः । पूर्वाध्याये शिल्पवत्त्वाभिजात्यप्रात्यायिकत्वादिगुणयुक्तं विशिखायां सौर्वाणिकं कुर्यादित्युक्तम् । तस्य व्यापारस्तु नोक्तः । स इहोच्यत इति सम्बन्धः ।

सौर्वाणिक इति । सौर्वाणिकः, पौरजानपदानां पुरवासिनां बहिर्विषयवासिनां च, रूप्यसुवर्णं रूप्यशिल्पं सुवर्णशिल्पं च, आवेशनिभिः शिल्पिशालीयैः सुवर्णकारादिभिः, कारयेत् । निर्दिष्टकालकार्यं च कर्म कुर्युः इयता कालेनेदृशं कटकाङ्गदादि निर्माय्यार्पणीयम् एतावच्च वेतनमिति परिभाषणपूर्वं शिल्पं कुर्युः, अर्थादावेशनिनः । कार्यापदेशम् अनिर्दिष्टकालमिति निर्मातव्यवस्तुगौरवनिमित्तं तु अपरिभाषितकालमपि कर्म कुर्युः ।

चाणक्यटीका

अयञ्च सुवर्णाध्यक्षः यं स्थापितवान् "शिल्पवन्तमभिजातम्" इति तस्य जातावसरो व्यापारः प्रचार इति प्रकरणमारभ्यते ॥

सौवर्णिक इति सुवर्णकर्मणि नियुक्तः कुशलश्च । पौरजानपदानां न राजकीय-कुप्यसुवर्णभाण्डम् । आवेशनिभिः आपणवद्भिस्तथैव सुवर्णकारैः । आवेशनं हि सुवर्ण-कारकर्मस्थानम् । निर्दिष्टकालकार्यञ्चेति । सौवर्णिकसुवर्णस्वामिभ्याम् । निर्दिष्टकालम् एतावद्भिरिति । निर्दिष्टकार्यं कटकः कर्णिका वेति कर्म कारयेत् । अपरेतु देशशब्दं पठन्ति । तत्रापि निर्दिष्टदेशमावेशनं गृहं वेति । यत्र पुनः कार्यमात्रमेवापदिष्टं तद् यत्र तत्र वा कृत्वा यदा तदा (वा) न दण्डयाः कारवः ॥

श्रीमूला

कालातिपातन इति । परिभाषितकालातिक्रमे, पादहीनं परिभाषितचतुर्भाग-हीनम् वेतनं भवति, तद्द्विगुणः गृह्यमाणवेतनद्विगुणः दण्डश्च भवति । कार्यस्याऽन्यथा-करणे कटकं परिभाष्य केयूरादिकरणे, वेतननाशः, तद्द्विगुणः नष्टवेतनद्विगुणः, दण्डश्च भवति । कण्टकशोधने कारुकरक्षणे कारूणां सर्वेषां दण्ड उक्तः, सुवर्णकारूणां त्विह दण्डकथनं विशेषज्ञापनार्थम् । कार्वन्तरदण्डवत् सुवर्णकारुदण्डं प्रशास्तारः केवल न कुर्युः, किन्तु सौवर्णिकसहिता एव कुर्युरिति ।

चाणक्यटीका

(कालातिपातन इति) अत्रापि देशशब्दं पठन्ति । व्याख्यातञ्च । कार्यस्यान्य-थाकरण इति । कार्यस्य स्वस्य अनभिप्रेतसंस्थानकरणाद् यथोचितो वेतननाशः तद्द्वि-गुणश्च अस्य दण्डः । निर्दिष्टकालात्तिपातेन वापि पादहीनं वेतनं लभेत कर्त्तेति विशेषः । यथोचितवेतनाद् द्विगुणश्चास्य दण्डः । देशव्यत्ययेऽप्ययं योज्यः ॥

प्रतिपदपञ्जिका

विशिखायां सौवर्णिकप्रचार इति सूत्रम् ।

विशिखा रथ्या च सामान्याभिधानेऽपि सौवर्णि(क)विपटि(णि)मार्गः परिगृह्यते । तस्यां विशिखायां सुवर्णे नियुक्तः सौवर्णिकः, तस्य प्रचारो व्यापारो विशिखायां सौवर्णि-कप्रचारः यस्य स इहाभिधीयते इति सूत्रार्थः । सम्बन्धस्तु कोशप्रकृतिः प्रकान्ता, तस्य राज(की)क्रि(क्रे)यसुवर्णरूप्यघटनाद्युपदेशप्रकारै रक्षणमुक्तम् । इदानीं पौरजानपदानां पौराणां बहिर्विषय वासिनां च रूप्यमयं सुवर्णमयं वा भाण्डमाकर्षणादिकमावेशिनी भिरिति । आवेशनं शिल्पिनां शाला, तन्निवासं सुवर्णकारादिभिः कारयेत् ।

निर्दिष्टकालकार्यमिति, निर्दिष्टः परिभाषितः कालः पञ्चरात्रादिकः कार्यं कटककेयूरादि चकरात् परिभाषितवेतनादिकं च कर्म कुर्युरिति । अयमावेशनानामु-पदेशः, किमयमेकान्त एव, नेत्याह—अनिर्दिष्टकालमपरिभाषितकालं कार्यापदेशं कर्त्तव्यातिशयमतिसूक्ष्मपरिकर्म, अथ कालातिपातने को दोषः इत्याह—कालातिपातन इति । यथा परिभाषितं चतुर्भागहीनं वेतनं तद्द्विगुणश्च दण्डः । कार्यस्यान्यथाकरणे विहिते । केयूरकरणेऽभिहिते कटकादिकरणे वेतनाशो मूल्यनाशः । चकरान्नष्टवेतनो द्विगुणश्च दण्ड इति । ननु कण्टकशोधने कारुकरक्षणे समस्तकारुकाणामुक्त एव दण्डः पुनः सुवर्णकारुकाणामिह दण्डाभिधानं कर्तृभेदज्ञापनार्थं, सर्वानेव कण्टकशोधनोक्त दण्डान्प्रश्र(ा)स्तारः केवलाः कुर्वन्ति ।

[संस्कारार्थमर्पितसुवर्णादेः प्रतिग्रहकाले
वर्णादिपरीक्षावश्यकता]

यथावर्णप्रमाणं निक्षेपं गृह्णीयुः तथाविधमेवार्पयेयुः। कालान्तरादपि च तथाविधमेव प्रतिगृह्णीयुः अन्यत्र क्षीणपरिशीर्णाभ्याम्। आवेशनीभिः सुवर्णपुद्गललक्षणप्रयोगेषु तत्तज्जानीयात्।

श्रीमूला

यथावर्णेत्यादि। निक्षेपं घटनीयरूप्यसुवर्णादि, यथावर्णप्रमाणं यद्वर्णिकं यत्प्रमाणं च, गृह्णीयुः, तथविधमेव तत्प्रकारमेव न तु लेशतोऽपि वर्णप्रमाणयोर्हीनम्, अर्पयेयुः कारवः। कालान्तरादपि चेति। ग्रहीतुः कारुकस्य दीर्घप्रवासादिना मरणादिना वा निमित्तेन तत्पुत्रादिहस्तादपि च, तथाविधमेव प्रतिगृह्णीयुः स्वार्पितवर्णप्रमाणकमेव निक्षेपं प्रतिगृह्णीयुः, न तु तदभ्यधिकवर्णप्रमाणकं कालातिपातदोषापदेशेन प्रार्थयेयुः, न वा पुत्रादीनां वेतनहानिर्दण्डो वेत्यभिप्रायः। अपरा व्याख्या— कालान्तरादपि देशविभ्रमादिनिमित्ते कालातिपाते जातेऽपि, तथाविधमेव यथानिक्षिप्तमघटित्तमेव, अर्पयेयुः कारवः, निक्षेपकाश्च प्रतिगृह्णीयुरिति! तत्रापवादमाह— क्षीणपरिशीर्णाभ्यामन्यत्र उपभोगघृष्टं प्रच्युतावयवं च निक्षेपमपहाय। क्षीणपरिशीर्णयोस्तु दण्डो दाप्य एव।

आवेशनिभिरिति। सुवर्णपुद्गललक्षणप्रयोगेषु सुवर्णः किञ्जल्कवर्णादिः, पुद्गलम् आभारणभृङ्गारादि, लक्षणं मुद्रा एतेषां स्वर्णादिसम्बन्धिनां प्रयोगेषु व्यवहारेषु हरणोपायानुष्ठानेषु वा, तत्तत् छलमच्छलं च ज्ञेयं सर्वं वस्तुतत्त्वम्, आवेशनिभिर्जानीयात् शिल्पिद्वारेण विद्यात्, सौवर्णिकः।

चाणक्यटीका

यथावर्णमिति यद्वर्णकं यत्प्रमाणकं च कर्त्तव्यतया निक्षेपं रूप्पं सुवर्णं वा गृह्णीयुः कर्त्तारः तत्कृत्वा तद्वर्णकं तत्प्रमाणं च सौवर्णिकेन परिज्ञातं स्वामि(ने)नोऽर्पयेयुः॥

किञ्च कालान्तरादपि च पुनः संस्कारार्थञ्च तथाविधमेव प्रतिगृह्णीयुः कर्तारः। अन्यत्र क्षीणपरिशीर्णाभ्याम्। तत्र हि कर्मणा क्षयं परिशीर्णं वा द्रव्यं कर्तारो न दाप्याः॥

एवमर्थञ्चाह—आवेशनिभिः सह सौवर्णिकः सुवर्णे सविशेषे जातरूपादौ। पुद्गले संस्थानविशेषे कटकादौ। लक्षणे करमुखादौ। प्रमाणे कर्षादौ। प्रयोगे संयूह्यादिके च। तत्तद् यथोक्तं सविशेषं जानीयात्। तदेतेन जातरूपं गृहीत्वा सपारत(द)मुपसंयूह्य कटकः वलयेन कृत इति॥

प्रतिपदपञ्चिका

सुवर्णकारदण्डं तु सौवर्णिकसहिता इति, यथावर्णप्रमाणमिति, यद्वर्णिकं च याप्रतिमानं च निक्षेपं घटनीयद्रव्यं कारवो गृह्णीयुः तथाविधमेवार्पयेयुरिति। तथाविध-

[संस्कारमये न्यूनीभावार्हाः भागाः]

तप्तकलधौतकयोः काकणिकः सुवर्णे क्षयो देयः। तीक्ष्णकाकणी रूप्यद्विगुणा रागप्रक्षेपः तस्य षड्भागः क्षयः ॥

प्रतिपदपञ्चिका

ग्रहणं काकणीशतांशेनापि वर्णप्रमाणयोर्विहीनत्वप्रतिषेधार्थं ।

कालान्तरादपि इति । सुवर्णकारस्य व्याध्यादिव्यसनात् मरणाद्वा तत्पुत्रादिहस्तादपि तथाविधमेव गृह्णीयुः अर्पयितारं न हीनवर्णं निक्षिप्योत्तमवर्णिकं प्रार्थयेयुः न वा एषां वेतनहानिर्दण्डो वा भवेत्, कालातिपातनस्य व्यसननिमित्तत्वात् । यद्वा निक्षिप्तमात्र एव देशविभ्रमादिकृतत्वात् कालातिपातात् तथाविधमेवाधितमेव अर्पयेयुः । शिल्पिनमनिक्षेप्तारो वा प्रतिगृह्णीयुरिति । तस्यापवादमाह— अन्यत्र क्षीणपरिशीर्णाभ्यामिति ।

क्षीणमुपभोगादीनां(ना)घृष्टं परिशीर्णं भग्नं प्रच्युतावयवं वा तत्र सहत्रं दाप्य एव । आवेशिनीभिरिति । कालान्तरान्नक्षेप्ता हीनवर्णिकजत्वोत्तमर्णिकं प्रार्थयते । शिल्पवेकातवर्णिका ? गृहीत्वा हीनवर्णमर्पयति । तदेवमादिषु सुवर्णादिप्रयोगेषु तद्विषयेषु विवादेषु तत्तत्सत्यासत्यादिसर्वमावेशिनीभिस्साक्षिभूतैः सुवर्णाध्यक्षो- जानीयात् ।

अथवा ऽऽवेशिनीभिः सुवर्णकारादिभिः सुवर्णादिप्रयोगेषु तुलाविषमादिहरणोपायेषु क्रियमाणेषु तत्तत्सर्वं सौवर्णिको जानीयात् । सुवर्णः किञ्जल्कवर्णादि । पुद्गलमाभरणादि । लक्षणं चिह्नितं । प्रयोगः परिवर्तनमिति ।

श्रीमूला

'अन्यत्र क्षीणपरिशीर्णाभ्यामि' त्युक्तस्य प्रतिप्रसवमाह—तप्तेत्यादि । तप्तकलधौतकयोः अशुद्धस्वर्णरजतयोर्विषये, सुवर्णे काकणिकः षोडशमाषके माषचतुर्भागप्रमाणः, क्षयो देयः निक्षेपं घटितं तावन्मात्रन्यूनमेव निक्षेपकः प्रतिगृह्णीयात् । तीक्ष्णकाकणी कालायसकाकणी, रूप्यद्विगुणा रजतकाकणीद्वययुक्ता, रागप्रक्षेपः रागार्थं षोडशमाषकस्वर्णे प्रक्षेप्तव्येत्यर्थः । तस्य षड्भागः प्रक्षिप्तकाकणीत्रयस्य षड्भागः अर्धादर्धकाकणिकः, क्षयः देयो भवति ।

चाणक्यटीका

तप्तकलधौतयोरिति । तापनं तप्तं, मृजार्थं धौतं कलधौतम् । अनयोः कर्मणोः एककाकणीप्रमाणः सुवर्णकर्षे क्षय इति । यच्चात्र अपक्षीयते तच्च कठिने परिश्रीयतेऽनयोः । क्षयो देय इति । सामान्यग्रहणेऽपि कर्तुरपेक्षातः प्रतिपादनीय इत्यर्थः । तीक्ष्णकाकणी इति । तीक्ष्णस्योक्तस्य काकणीरूप्यस्य काकणीद्वयेन सह रागार्थं तपनीये प्रक्षेपः । ततः किमितिचेत्, तस्य प्रक्षिप्तस्य षड्भागः क्षयः तप्तकलधौतयोः न प्रतिपादनीयः ॥

[वर्णादिह्रापकानां अमार्गव्यवहारिणां च दण्डाः]

वर्णहीने माषावरे पूर्वस्साहसदण्डः, प्रमाणहीने मध्यमः, तुलाप्रतिमानोपधावुत्तमः, कृतभाण्डोपधौ च। सौवर्णिकेनादृष्टमन्यत्र वा प्रयोगं कारयतो द्वादशपणो दण्डः; कर्तुर्द्विगुणः, सापसारश्चेत्। अनपसारः कण्टकशोधनाय नीयेत। कर्तुश्च द्विशतो दण्डः पणच्छेदनं वा। तुलाप्रतिमानभाण्डं पौतवहस्तात्क्रीणीयुः, अन्यथा द्वादशपणो दण्डः ॥

प्रतिपदपञ्चिका

इत्युक्तम् तदपवादमाह-तप्तकलधौतयोरित्यादि, तप्तमशुद्धं सुवर्णं कलधौतम्। रूप्यं तयोः काकणिकः काकणिप्रमाणकः सुवर्णे षोडशमापके क्षयो देयः। निक्षेपकाले तावन्मात्रमधिकं देयम्। घटित्तं वा न्यूनप्रार्थनीयं तीक्ष्णकाकणी संस्कृतलोहकाकणी रूप्यद्विगुणा रूप्यकाकणीद्वययुक्ता, रागार्थं सुवर्णे प्रक्षेपः, प्रक्षेप्तव्यः। तस्य त्रयस्य षड्भागो धंकाकणिकः क्षयः तावन्मात्रं घटनसमये क्षीयते। तं जानीयादिति वर्तते।

श्रीमूला

अथ दण्डमाह—वर्णेत्यादि। माषावरे वर्णहीने माषप्रमाणे सुवर्णे उत्कृष्टवर्णहानिम् नीते सति, पूर्वः साहसदण्डः। माषावरे प्रमाणहीने प्रतिमानहानिम् नीते सति, मध्यमः साहसदण्डः। तुलाप्रतिमानोपधौ न केवलं मापमात्रप्रतिमानहानिः, किन्तु हापितप्रतिमानस्य पूरणकैतवमपि यत्र प्रयुज्यते तादृशे विषय इत्यर्थः, उत्तमः साहसदण्डः कृतभाण्डोपधौ च माषावरविषये घटितरूपपरिवर्तनादिकैतवे च, उत्तमः साहसदण्डः। अनया दिशा द्विमाषत्रिमाषादिविषयहान्यादौ तत्तद्दण्डद्वैगुण्यत्रैगुण्यादिकमूह्यम्।

सौवर्णिकेनाननुमतं विशिखायाम्, अनुमतमपि वा विशिखातोऽन्यत्रालंकारादिनिर्माणम् कारयतः कर्तुश्च दण्डमाह—सौवर्णिकेनेत्यादि। सापसारश्चेदिति। कारयिता यदि सापसारस्तदायं दण्ड इत्यर्थः अपसारोऽपसरणं तच्च स्वर्णादिः स्वामिशुद्धागमप्रतिपादनेन चोरशङ्काकलङ्कादात्मव्यावृत्तिः, तद्वान् सापसारः। अनपसारविषये त्वाह—अनपसार इति। अनपसारश्चेत् कारयिता, कण्टकशोधनाय वाक्यकर्मानुयोगादिना शुद्धाशुद्धत्वनिर्णयाय, नीयेत प्रदेष्टृसन्निधिम्। कर्तुश्च स्वर्णकारादेरनपसारस्य, द्विशतो दण्डो भवति। तस्य द्विशतपणदण्डदानासामर्थ्ये त्वाह—पणच्छेदनं वेति। पणच्छेदनं पणनसाधनपञ्चाङ्गुलिच्छेदनम्।

तुलाप्रतिमानेत्यादि। तुलाप्रतिमानभाण्डं तुलाप्रतिमानसाधनं माषद्विमाषादिकम्, उपलक्षणात् प्रस्थद्रोणादिकं मानसाधनं च, पौतवहस्तात् वक्ष्यमाणपौतवाध्यक्षसकाशात्, क्रीणीयुः क्रीत्वा तेन व्यवहरेयुः सुवर्णकारादयः। तुलामानभाण्ड-

श्रीमूला

मिति पाठे तुलाभाण्डं माषद्विमाषादिकं मानभाण्डं प्रस्थद्रोणादिकं चेति व्याख्येयम्। अन्यथा स्वयं निर्माणेऽन्यतः क्रयणे वा, द्वादशपणो दण्डः।

चाणक्यटीका

यदि पुनः कर्त्ता वर्णान्तरमपहरेदित्याह—वर्णहीन इति यथा (क्ष ?) वर्णहीनन्तु प्रमाणान्तराहीनेऽपि पूर्वः साहसदण्डः। माषावर इति। ध्रुवतोऽर्धमापादिहानात् तच्च दाप्यः तद्द्विगुणश्च दण्ड इत्यभिप्रायः। नोपेक्ष्य इति प्रसङ्गनिवृत्त्यर्थम्। प्रमाणहीने मध्यमः माषावर इत्येव। तथातुलाप्रतिमाने वा प्रत्यर्पणकाले अन्यथा दधतः उत्तमः। कृतभाण्डं वा प्रतिसंस्कारार्थं गृहीत्वा तत्सदृशमुपदधतः (मधुप ?)॥

सौवर्णिकेनादृष्टम् आवेशनाद् अन्यत्र रहसि प्रयोगं कारयतो द्वादशपणो दण्डः। कर्तुस्तु समयं ज्ञात्वा द्विगुणः। सापसारश्चेदिति। सापदेशः कुतस्ते सुवर्णमिति पृष्टो यदि सुवर्णस्य आगमशुद्धिम् अमुष्माल्लब्धं क्रीतं वेति वक्तुं समर्थः कारयिता तदायं विधिः। अनपसारः कण्टकशोधनव्यवहारः सुवर्णस्तेयदण्ड एव दापयितुं प्राप्येत। गत्यर्थकर्मणि चेयं चतुर्थी। कर्तुश्च द्विशतो दण्डः। द्विशताभावे प (ल ? ण) स्य अग्रहस्तस्य च्छेदनं स्तेयद्रव्य······॥

तुलाप्रतिमान भाण्डमिति तुलाप्रतिमानं च कर्त्तारः कारयितारश्च पौतवहस्तादिति मानाध्यक्षाद् उपधिपरिहारार्थं क्रीणीयुः। (अन्यथा) तुलाप्रतिमानाभ्यां व्यवहरतो द्वादशपणो दण्डः।

प्रतिपदपञ्चिका

दण्डमाह—वर्णहीनमिति, वर्णिकाहीने माषावरे माषकप्रमाणानिकृष्टके ज्येष्ठवर्णिकमाषमात्रमपि यदा हीनवर्णिकं करोति, तदा तस्य पूर्वस्साहसदण्डः। प्रमाणहीन इति, प्रमाणमङ्गुलवितस्त्यादि तद्धीने मध्यमस्साहसदण्डः। अथवा प्रमाणं प्रतिमानं तद्धीने मध्यमस्साहसदण्डः। तदेवमस्य वक्ष्यमाणस्य तुलाप्रतिमानोपधेश्चायं विशेषः।

अत्र हानिरेव शुद्धा, न तुलाप्रतिमानोवधानं हानिश्च। अत एवोत्तमो दण्डः। तदाह—तुलाप्रतिमानोपधाविति, तुलाप्रतिमानपरिवर्तनादौ उत्तमस्साहसदण्डः इति। कृतभाण्डोपधौ च घटितरूपपरिवर्तनादौ चोत्तम एव दण्डः।सर्वत्र माषकावर इति योज्यम्। ततश्च हानिवृद्धौ दण्डवृद्धिर्व्याख्येया।

सौवर्णिकेनादृष्टमननुज्ञातं विशाखायामेवानुज्ञातमेव। विशिखातोन्यत्र वा प्रयोगमलङ्कारादिकं कारयतो घटयतो द्वादशपणो दण्डः। कर्तुश्च सुवर्णकारादेः द्विगुणश्चतुर्विंशतिपणः। सापसारश्चेत्कारयिता, कस्येदं कुतो वा लब्धमित्यादि पृष्टस्तत्स्वामिनं शुद्धागमं वा यदा प्रतिपादयेत्। तदा यथोक्तदण्डः।

अथ पुनरपसारः पूर्वोक्तविपरीतस्तदा कण्टकशोधनाय नियते वाक्यकर्मदिरनु योगार्थः। प्रशास्तृपुरुषाणामप्येतत्कर्तुश्च सुवर्णकारादेस्तथाविधस्य कुर्वतो द्विशतो दण्डः।

[षड्विधानि शिल्पिकर्माणि, पञ्चापहरणोपायाश्च]

घनं घनसुषिरं संयूह्यं अवलेप्यं सङ्घात्यं वासितकं च कारुकर्म। तुलाविषमं अपसारणं विस्रावणं पेटको पिङ्कश्चेति हरणोपायाः।

[तत्र तुलाविषमम्]

सन्नामिनी उत्कीर्णिका भिन्नमस्तका उपकण्ठी कुशिक्या सकटुकक्ष्या पारिवेल्ली अयस्कान्ता च दुष्टतुलाः ॥

प्रतिपदपञ्चिका

पणच्छेदनं वा, पञ्चाङ्गुलिच्छेदनं हिरण्यभावेनापसारस्यैव। तुला, मानं, भाण्डमिति। भण्डशब्दः प्रत्येकः तत्र तुला वेलकं प्रतिमानानि च माषद्विमाषकादीनि तुलाभाण्डं मानभाण्डं द्रोणादिमानसाधनं, तस्य चेह प्रासङ्गिकमभिधानं सर्वेऽपि न तद्व्यवहारिणः पौतवहस्ताद्वक्ष्यमाणपौतवाध्यक्षहस्तात् क्रीणीयुः। अन्यथेति, स्वयंकरणेऽन्यत्र क्रये वा द्वादशपणो दण्डः।

श्रीमूला

अथ हरणोपायद्वारभूतं कारोः कर्म षट्प्रकारमाह—घनमित्यादि। घनम् ङ्गुलीयकादि, घनसुषिरं भृङ्गारादि, संयूह्यं स्थूलपत्रयोजनम्, अवलेप्यं लघुपत्रयोजनं, संघात्यम् कटिसूत्रादि, वासितकं रसादिना वासितम्।

तेषु कर्मसु प्रयोज्यान् पञ्चहरणोपायान् नामत उद्दिशति—तुलेत्यादि।

तत्रतुलाविषममाह—सन्नामिनीत्यादि। सन्नमिनी मृदुलोहनिर्मिता यथाकामसंनाम्या, उत्कीर्णिका तीक्ष्णचूर्णेन पारते(द)न वा पूरिताभ्यन्तरसुषिरा, भिन्नमस्तका सरन्ध्राग्रा सा हि वाताभिमुखं धृता वातेन नामिता भवतीति, उपकण्ठी ग्रन्थिबहुला, कुशिक्या शिक्यं तोल्यवस्तुनिवेशाधारः तत् कुत्सितं यस्याः सा, सकटुकक्ष्या अप्रवणसूत्रा, पारिवेल्ली परिवेल्लः परिचलनं तद्वती, अयस्कान्ता अयस्कान्ताख्यलोहनिर्मिता, सा हि यतः स्वर्णं ततो याति। चः समुच्चये। अष्टावेता दुष्टतुलाः। इत्थं सम्भविताष्टविधदुष्टतुलं तुलविषमम्।

चाणक्यटीका

कर्माण्युच्यन्ते घनमिति। घनम् अच्छिद्रम् असे (क्य ? च्य) मित्यर्थः। घनसुषिरमु··व। संयूह्यम् अवच्छाद्यम्। अवलेप्यं पार(द)तसुवर्णद्रव्याभ्याम् अन्यवास्तुकमवलिप्तम्। सङ्घात्यं संश्लेषणीयं यदा खण्डशः कृतं पश्चाद् बध्यते। वासितकं वालुकाहिङ्गुलपरिभावितम्। एवं षड्विधं कारूणां कर्म ॥

यत्तेषामेते हरणोपायाः तुलाविषमादयः। हरणोपायपरिज्ञानाद्धि रक्षणं भवतीति ॥

[असारद्रव्यप्रक्षेपेण अपसारितसारद्रव्याणि
चतुर्विधानि, सारद्रव्यापहरणमार्गश्च]

रूप्यस्य द्वौ भागावेकः शुल्वस्य त्रिपुटकं। तेनाकरोद्गतमपसार्यते तत्त्रिपुटकापसारितं; शुल्वेन शुल्वापसारितं; वेल्लकेन वेल्लकापसारितं; शुल्वार्धसारेण हेम्ना हेमापसारितम्।

चाणक्यटीका

सन्नामनी सन्नमनशीला मृदुलोहत्वाद् अल्पेनापि नमति ॥
उत्कीर्णिका सुषिरान्तर्गतलोहादिचूर्णसञ्चाराद् यथेष्टं विषमीक्रियते ॥

भिन्नमस्तका ऊर्ध्वम् अधो वा शीर्षगतगर्ता वायुप्रवेशाद् उन्नतेव अवनतेवालक्ष्यते। गर्तन्यस्तप्रस्तरा वा नमति उपकण्ठी अन्तिकादपनीय कण्ठोपगतयथेष्टसञ्चाराधिक्या ॥ कुशिक्या अशोभनशिक्या। शिक्यमेव विषमं दधता पुनः पुनः विषमीक्रियते। यदि वा···र्णमलिनसिक्थकमिश्रः प्रक्षिप्य विषमयति ॥

कटुकक्ष्या सुवर्तितस्रस्ता वा बद्धस्तब्धकक्ष्या सा ह्यस्तब्धत्वयोगात् कक्ष्यास्य··· विषमीक्रियते ॥

परिवेल्लने जाते पारिवेल्ली वलयवक्रवरिवर्त्तनखच्छेदतारा वृश्चिकविष्ठाकारा वा यथेष्टावस्था·····। (अ) परे समन्तात् परिभ्रमणविशाला यथेष्टं विषमीक्रियत इति वर्णयन्ति। अयस्कान्तसंयोगाद्—अयस्कान्ता ऊर्ध्वं···अयस्कान्ता ऊर्ध्वमधो वा मुद्रिकादिगतम् अयोऽनुगच्छन्ती, विषमोभव (ति ? इ) त्यष्टधा तुलाविषमः ॥

प्रतिपदपञ्चिका

साम्प्रतं हरणोपायभूतं षड्विधं सुवर्णकारस्य कर्माह—

घनमित्यादि, तत्र घनं लोलप्रभृति। घनसुषिरं भृङ्गारादि, संयूह्यं दृढपत्रयोजनं अवलेप्यं तनुपत्रयोजनं सङ्घात्यं कटिसूत्रादि, वासितं, पारता(दा)दिना वासितंचस्समुच्चये, एवं षड्विधे कर्मणि, तुलाविषमादीन् पञ्चहरणोपाया—(नभिधाय) व्याचष्टे, तत्र तुलादिविषमं तावदाह—सन्नामिनीत्यादि,

मृदुलोभ(ह)घटिता, स्वेच्छासन्नाम्या सन्नामिनी, उत्कर्णिका पार(त)पूरितान्तस्सुषिरा, भिन्नमस्तका, विदारितमस्तका, सुषिरा ग्रासाभिप्रतिघातमत्वेद्वितोल्येवा अनानाम्येतोपकर्णिग्रन्थिबहुला कुशिक्या संप्रयोगचेलका, सकटुकक्ष्या परिवेल्यत्यस्कान्ततल्लोहमयो, सा हि यतस्सुवर्णं ततो याति,

श्रीमूला

अथ अपसारणमुच्यते। तत्र यदसारद्रव्यं प्रक्षिप्य सारद्रव्यमपसार्यतेऽपह्रियते तदपद्रव्यं चतुर्विधमादावाह—रूप्यस्येति। द्वौ रूप्यस्य भागौ एकः शुल्वस्य भाग

मूकमूषा पूतिकिट्टः करटकमुखं नाली सन्दंशो जोङ्गनी सुवर्चिका लवणं तदेव सुवर्णमित्यपसारणमार्गाः ।

पूर्वप्रणिहिता वा पिण्डवालुका मूषाभेदादग्निष्ठा उद्ध्रियन्ते ।

श्रीमूला

इति भागत्रयमिदं मेलायित्वावर्तितं, त्रिपुटकं तत्संज्ञम् । तेन त्रिपुटकेन प्रक्षिप्तेन, आकरोद्गतम् शुद्धम् अपसार्यते आकर एवाशुद्धमिदमुत्पन्नमिति व्यपदिश्यापह्रियते, तत् तथाविधमपसारणसाधनं, त्रिपुटकापसारितं तदाख्यमपद्रव्यमेकम् । शुल्वेन ताम्रप्रक्षेपेण अपसार्यते तथापह्रियते, तत् शुल्वापसारितं तदाख्यम् अपसारणसाधनं द्वितीयम् । वेल्लकेन तीक्ष्णलोहं रूप्यं च समभागमावर्तितं वेल्लकमिति प्रसिद्धं तेन साधनेन प्राक्षिप्तेन, अपसार्यते, तद् वेल्लकापासरितं तृतीयम् । शुल्वार्धसारेण ताम्रसमभागयोगावर्तितेन, हेम्ना साधनेन, अपसार्यते तथापह्रियते, तत् तथाविधं साधनं, हेमापसारितं तत्संज्ञं चतुर्थम् ।

चाणक्यटीका

अपसारणमाह—रूप्यस्य द्विभागः (एकः) शुल्वस्य मिश्रितः त्रिपुटकाख्यः । तेनाकरोद्गतम् अवर्णितत्वाद् रसानुग्रहत्वाच्च संमूर्च्छनयोग्यम् अपसार्यते त्रिपुटकापसारितम् । शुल्वेन शुल्वापसारितम् । तदेव वा आकरोद्गतं वेल्लकेन अपसारितं रूप्यावयवादिकमित्यर्थः । शुल्वार्धसारेण हेम्ना क्रियावादसुवर्णेन हेमापसारितमिति चतुर्विधमपसारणम् ॥

प्रतिपदपञ्चिका

एवमष्टदुष्टतुलासम्भवं तुलाविषममभिधायापसरणमाह—तत्रापि यत्प्रक्षिप्य सारद्रव्यमयसार्यते, अपह्रियते, तच्चतुर्विधमपद्रव्यं तावदाचष्टे—रूप्यस्येत्यादि,

रूप्यसय द्वौ भागवेकं शुल्वस्य तदावर्तितं त्रिपाकमिति, तद्वत्संज्ञा तेनेति, तं प्रक्षिप्याकरोत्गतमिति, शद्धमप्याकर एव मलिनमेतत् । उत्पन्नामतिव्यपदेशेनापसार्यते । अपह्रिते, तत्त्रिपुटकापसारितमिति । तद्विदां संज्ञा ।

एवं शुल्वेन ताम्रेण शुल्वापसारितं तीक्ष्णलोहं रूप्यं च समभागमावर्तितं । वेल्लकमिति प्रतीतं । तेन वेल्लकापसारितं शुल्वार्धसारेण ताम्रसमभागेन हेम्ना-हेमापसारितम् ।

श्रीमूला

अथापद्रव्यप्रक्षेपेण सारद्रव्यापहरणस्य मार्गानाह—मूकमूषेत्यादि । मूकमूषा ससम्पुटार्धमूषा, पूतिकिट्टो लोहमलं,करटकमुखं काकमुखं कर्तरीमुखं वा, नाली प्रसिद्धा, सन्दंशः कङ्कमुखं, जोङ्गनी लोहकटिका सुवर्चिका क्षारविशेषः, लवणं प्रसिद्धम् । तदेव सुवर्णमिति तादृशं हीनवर्णकमेवाकरोद्गतं सुवर्णमिति मिथ्यावादः, अपसारणमार्गाः त एते सुवर्णापहरणोपायाः । अयमर्थः—आकरोद्गते मूकमूषायामावर्त्यमाने शुद्धसुवर्णे

[विस्रावणम्]

पश्चाद्बन्धने आचितकपत्रपरीक्षायां वा रूप्यरूप्येण परिवर्तनं विस्रावणम्, पिण्डवालुकानां लोहपिण्डवालुकाभिर्वा ।

श्रीमूला

लोहमलहरणव्याजेन सुवर्चिकालवणक्षेपव्याजेन च त्रिपुटकादिकमपद्रव्यं प्रक्षिप्य करटमुखादिना साधनेन शुद्धसुवर्णमपहरन्ति सुवर्णकाराः कृतकच्छायमीदृशमेव सुवर्णमाकरादुद्गतमिति वदन्त इति । हरणोपायविकल्पमाह—पूर्वप्रणिहिता वेति । पूर्वप्रणिहिताः पूर्वमेवाग्नौ प्रक्षिप्ताः पिण्डवालुका वा अपसारणमार्गा इति सम्बध्यते । द्रव्यधात्वनुगमपरिगृहीततच्छायाः सूक्ष्मवालुकाः । द्रवीभूतेन रूप्येण सुवर्णेन वा सम्पर्कात् पिण्डतां प्रतिपन्नाः पिण्डवालुकाः । उपायीभावप्रकारमाह—मूषाभेदादग्निष्ठा उद्ध्रियन्त इति । पूर्वमेवाग्निप्रक्षिप्तपिण्डवालुकाप्रमाणं सारद्रव्यमपहृत्य मूषा भिन्नेत्यपदेशेन तत्सम्पृक्तास्ता एव पिण्डवालुकास्तत्स्वामिसमक्षमग्नेरुद्ध्रियन्त इत्यर्थः ।

चाणक्यटीका

अपसारणमार्गानाह—मूकमूषा अल्पमूषी मूषा, यस्यां कियत् किंवा प्रक्षिप्तमिति न ज्ञायते । पूतिकिट्टः लोहकिट्टापनयनव्याजेन अन्यत् प्रक्षिप्यते । करटक' 'ल्पीमुखम् । तत्र पूर्वप्रक्षिप्तेन त्रिपुटकादिनापसार्यते । अन्यस्त्वाह—ध्मायमानभस्त्रावायुनिर्गमं करटमुखम् । तत्र क्षिप्तेन वायुप्रेर्यमाणो' 'सार्यते । नाल्या मुखगतः तुत्थ्यादिः सञ्चार्यते । सन्दंशेन अङ्गारादिभिः सह प्रक्षिप्यते । जोङ्गनी कुञ्चिकावृत्तं मर्यारिषणा (ग्रालोहितया ?) रूप्यादि प्रक्षिप्य अङ्गारादिनाकृष्यते । सुवर्चिका लवणं लवणमृत्तिकायां विड (ह ?) रूप्याद्यवक्षिप्यते तद्द्वारेण अपसार्यते । तदेव सुवर्णमिति सदृशमन्यत् कृतं लाधवेन परिवर्त्यते । अपरेत्वाहुः—तदेवाकरोद्गतसुवर्णक्लृप्तमेव सुवर्णमिति ब्रुवन्नव (तूद ? गूह) ते इत्यष्टापसारणमार्गाः ॥

प्रतिपदपञ्चिका

एवमेतान्यपद्रव्याणि, उक्त्वा तानि कथं वा सारद्रव्यमपसार्यंत इत्येतत्प्रतिपादनायाह-मूकमूषेत्यादि, मूकमूषा ससंपुटा अर्धमूषा, पूतिकिट्टो लोहमलं करटकमुखं, थुल्लमुखं कर्तरिमुखमत्यपरे । नालीसन्दंशौ प्रतीतौ, जोङ्गनी लोहकुटिका वेणुशलाकेत्यपरः सुवर्चका लवणं टङ्कणक्षार इति केचित् । सुवर्चिका सुवर्चिकाख्यः क्षारो लवणं प्रतीतमित्यपरे ।

तदेव सुवर्णमिति श्रेष्ठं त्रिपुटकादिना परिवर्त्य कृतककच्छायं तदेवेदं सुवर्णमिति वदन्नपहरति । इतिशब्दः प्रकारे इत्येवं प्रकारा अपसारणमार्गाः हृतणोपायाः ।

श्रीमूला

विस्रावणमाह—पश्चादित्यादि । पश्चाद्बन्धने पूर्वं निर्मितस्य उत्तरकालसन्धानप्रसङ्गे, आचितकपत्रपरीक्षायां वा प्रचुरघटितपत्रपरीक्षाप्रसक्तौ वा, रूप्यरूपेण

[पेटकः, तत्परीक्षाश्च]

गाढश्चाभ्युद्धार्यश्च पेटकः संयूह्यावलेप्यसङ्घात्येषु क्रियते। सीसरूपं सुवर्णपत्रेणावलिप्तमभ्यन्तरमष्टकेन बद्धं गाढपेटकः। स एव पटलसम्पुटेष्व-भ्युद्धार्यः। पत्रमाश्लिष्टं यमकपत्रं वावलेप्येषु क्रियते। शुल्वं तारं वा

श्रीमूला

परिवर्तनं रजतभाण्डप्रक्षेपेण सुवर्णमयस्य विनिमानं, विस्रावणम्। इत्येको विस्रावण-प्रकारः। अपरमाह—पिण्डेत्यादि। पिण्डवालुकानां सुवर्णाकरसम्भूतानां, लोहपिण्ड-वालुकाभिः लोहाकरसम्भूताभिर्वालुकाभिः परिवर्तनं वा विस्रावणम्।

चाणक्यटीका

विस्रावणमाह—पूर्वप्रणिहिता इति। अग्निष्ठलोपार्थं पूर्वमेव प्रणिहिताः प्रक्षिप्ताः ताम्रगुलिकामिश्राः, पिण्डवालुका इति। पिण्डार्थं वालुकाः, अग्निष्ठमूषायां च लेखादृढीकरणार्था उप्यन्ते। ता मूषाद्रुतसुवर्णव्याजेन (हि ? गृही) त्वा पश्चाद् द्रुतेन सुवर्णेन मिश्राः। पश्चाद्बन्ध इति। पुनः निबन्धनिमित्तम (नुष्टुप् ? ग्निष्ठ) शुद्धया (उ) दुध्रियन्ते। ताभिः सुवर्णमपहृतं पूर्यते। वक्ष्यमाणप्रकारान्तरापेक्षो वाशब्दः॥

उपर्युपरि आचितकानां वा सुवर्णपत्राणां परीक्षार्थमानीतानाम्। रूप्यस्य रूपेणेति। रूपविकारं प्रासमन्तः प्रक्षिप्य परिवर्तनं विस्रावणम्॥

प्रतिपदपञ्चिका

तथा पूर्वप्रणिहिताः प्रक्षिप्ताः वा विकल्पे। पिण्डवालुका भरणोपायं द्रव्यधात्वनु-गमात्तच्छाया सूक्ष्मवालुका द्रवीभूतेन रूप्येण सुवर्णेन वा संपृक्ताः पिण्डीभवन्ति।

यथा मधुविन्दुना सक्तपिस्ताः पिण्डवालुका मूषाभेदादिति पूर्वमेव न वालुका-प्रमाणं सारमपहृत्य ततो मूषा भिन्नेति। तत्संपृक्ता वालुका तत्स्वामिप्रत्यक्षमग्निष्ठादु-दुध्रियन्ते।

विस्रावणमाह—पश्चाद्बन्धनमित्यादि।

पूर्वं घटितस्य यदा सन्धेयता तदा(ऽचित)स्योत्तरकालं सम्बन्धने संयोजनकाले न तथा आचितकपत्रपरीक्षायां प्रभूतघटितपत्रपरीक्षायां कृतायामिति वाक्यशेषः। रूप्यरूपेण रूप्यमयेन भाण्डेन परिवर्तनं विनिमयः सुवर्णमयस्येत्यर्थादापन्नमिति, एतद्विस्रावणमिति। हरणप्रकारः। पिण्डवालुकानां सुवर्णाकरसम्भूतानां लोहवालुका-भिः ताम्रादिलोहकारणभूताभिः परिवर्तनं विस्रावणम्। अयं चारविषयोऽपहारः। प्रसङ्गादिहास्याभिधानमिति।

श्रीमूला

पेटकमाह—गाढश्चेति। पेटकः संश्लेषः, पिटधातोः संश्लेषणार्थत्वात्। स गाढश्च अभ्युद्धार्यश्चेति द्विविधः, संयूह्यावलेप्यसङ्घात्येषु संयूह्यादिषु त्रिषु पूर्वोक्तेषु कर्मसु विषये, क्रियते अनुष्ठीयते। सीसरूपं सीसपत्रं सुवर्णपत्रेण, अवलिप्तम्

गर्भः पत्राणाम् । सङ्घात्येषु क्रियते शुल्वरूपं सुवर्णपत्रसंहतं प्रमृष्टं सुपार्श्वम् । तदेव यमकपत्रसंहतं प्रमृष्टम् । ताम्रताररूपं चोत्तरवर्णकः ।

तदुभयं तापनिकषाभ्यां निश्शब्दोल्लेखनाभ्यां वा विद्यात् । अभ्युद्धार्यं बदराम्ले लवणोदके वा सादयन्ति—इति पेटकः ।

———————

श्रीमूला

आच्छादितम् । अभ्यन्तरम् आच्छादिताच्छादकयोरन्तरालम्, अष्टकेन बद्धं जतुसर्जरसादिना पटलसम्पुटेषु दृढसंश्लेषणार्थं बद्धं, यदि भवतीति शेषः गाढपेटकः अर्थात् स एष बन्धो गाढपेटकाख्यः। स एवेति। स एव पेटकः, पटलसम्पुटेषु अभ्युद्धार्यः अष्टकबन्धरहितत्वादभ्युद्धर्तुं शक्य इति सोऽभ्युद्धार्यपेटकः। स एष द्रव्यापद्रव्ययोः समप्राविभागिके संयूहने हरणप्रकारः। अथ सारार्धभागेषु लेप्येषु हरणप्रकारमाह—पत्रमिति। पत्रं सुवर्णपत्रम्, आश्लिष्टम् एकपार्श्वयोजितं यमकपत्रं वा उभयपार्श्वयोजितं वा अवलेप्येषु क्रियते। बहिः पत्रमुक्त्वा गर्भपत्रमाह—शुल्वं तारं वा, पत्राणां सुवर्णपत्राणां, गर्भः क्रियते। सङ्घात्यविषयं विधिमाह—सङ्घात्येष्विति। सङ्घात्येषु विषये, शुल्वरूपं ताम्रभाण्डं, सुवर्णपत्रसंहतम् एकपार्श्वे सुवर्णपत्रच्छादितं, प्रमृष्टं प्रकर्षेणोज्ज्वलितं, सुपार्श्वं शोभनैकपार्श्वम् क्रियते। तदेव शुल्वरूपं, यमकपत्रसंहतम् उभयपार्श्वयोः सुवर्णपत्रावच्छादितं, प्रमृष्टं क्रियते। पूर्वस्य सुपार्श्वमिति संज्ञा समनन्तरस्य प्रमृष्टमिति संज्ञेत्येके। ताम्रताररूपं च उत्तरवर्णक इति। न केवलं सुवर्णपत्रं यथोक्तमवच्छादनार्थमुपयुज्यते, किन्तु ताम्रभाण्डरजतभाण्डे अपीत्यर्थः। ताभ्यां पुनरौचित्यात् कृष्णायसादिभाण्डमवच्छाद्यं भवतीत्यवगन्तव्यम्।

पेटकस्य परीक्षामाह—तदुभयमिति। तदुभयं गाढपेटकम् अभ्युद्धार्यपेटकं च, तापनिकषाभ्याम् अग्नितापननिकषघर्षणाभ्यां, निश्शब्दोल्लेखनाभ्यां वा निश्शब्दं शब्दहीनं छेदनम्, उल्लेखनं तीक्ष्णमुखलेखनं ताभ्यां वा, विद्यात्। अभ्युद्धार्ये विशेषमाह—अभ्युद्धार्यं, बदराम्ले कर्कन्धूफलरसे, लवणोदके वा, सादयन्ति निवेशयन्ति। तथाकरणे लोहितवर्णः सञ्जायत इति भाषाटीका। इति पेटकः व्याख्यात इति शेषः।

चाणक्यटीका

पेटकमाह—पिण्डवालुकानामिति। पिण्डवालुकानामग्निष्ठे लोहमयैस्तत्सदृशैः पिण्डवालुकैः सह (भू ? द्रु) तानां प्रद्रुतसुवर्णेन सह मिश्रणाद् गाढ''किट्टापदेशेन पश्चाद्वाप्युद्धार्यः। कर्तुर्लोहमिश्रणात् पेटक उच्यते। अथवा, गाढश्चायं हरणोपाय इति ज्ञात्वा चैव''(पुनरुद्धा) र्यश्च परीक्षकेणेति। एवमपि मन्त्रीकृत्य हरणे कथं पुन (र्वं ? द्र) क्ष्यत इति चेद्, यस्मात् संयूह्यावलेप्यसङ्घात्येषु क्रियते तत्र पुनरुद्धार्यत इति।

चाणक्यटीका

सीसरूपमिति । सीसमयं रूप्यं सुवर्णपत्रेण अवलिप्तम् अवच्छादितम् । अभ्यन्तरमिति अन्तर्गतम् । अष्टकेन संश्लेषकेण जतुप्रकारेण एकपत्रमिव नीतं गाढोऽपरः पेटकः । तत्र सीसप्रमाणं सुवर्णमपह्रियते । अयमप्येवं ज्ञात्वा पटलसंपुटेष्वप्युद्धार्यः परीक्षकेणेति ॥

तत्र हि रूप्यादिपत्रम् आभिमुख्येन श्लिष्टं यमकपत्रं सौवर्णं वा तन्मध्ये रौप्यादिपत्रप्रक्षेपादवलेप्येषु क्रियते तद् दुर्विज्ञानम् ॥

शुल्वं तारं वा अशब्दो मध्यभागः सुवर्णपत्राणाम् अष्टक (म ?) श्लिष्टं सङ्घात्येषु न ज्ञायत इति कर्तृभिः क्रियते । तद्विज्ञेयम् । सङ्घात्यं हि कल्पवृक्षप्रदीपादिकर्म । तयोर्यच्छुल्वरूपं सुवर्णपत्रेणैकेन सङ्घातः प्रमृष्टमुज्ज्वलितं तत् सुपार्श्वमिति प्रसिद्धम् । तदेव शुल्वरूपमेकं सुवर्णपत्रावच्छन्नोभयपार्श्वप्रविष्टं ताम्रतारमिश्रीकृतरूपं चावच्छादितम् उत्तरवर्णकम् ॥

तदुभयं सुपार्श्वम् उत्तरवर्णकञ्च तापेनाष्टकं विलाप्य निकष्य वा सुवर्णपत्रक्षयान्निश्शब्दतया, अशुद्धं हि निश्शब्दं भवति, छुर्यादिभिश्चोल्लिख्य विद्यात् परीक्षकः । ततोऽनेन द्रव्यम् उद्धार्यम् । अथवा विद्यादुद्धार्यमस्तीति । बदराम्ले लवणोदके वा सादयन्ति परीक्षका इति । तत्र विक्वथितानां साधनमद्रव्याणां विशरणमिति ॥

प्रतिपदपञ्चिका

साम्प्रतं द्विविधं संयूह्यादित्रिकर्मकविषयं पेटकमाह—गाढश्चेत्यादि । पीठसंश्लेषण इति पेटकः । तत्र गाढोष्टकोवबन्धः । अभ्युत्द्धार्योऽष्टकावबन्धरहितं । स द्विविधोपि संयुह्यादिषु त्रिषु क्रियते । तत्र संयुह्यवलेप्यसङ्घात्यानि कृतव्याख्यानानि । स कथं क्रियत इत्याह—सीसरूपमिति ।

सोसंरूपं सीसपत्रं सुवर्णपत्रेणावलिप्तं, आच्छादितं, तयोराच्छादनाच्छादितयोरभ्यन्तरं पटलसंपुटेषु दृढसंश्लेषणार्थमष्टकेन जतुसर्जरसादिना बन्धः । स गाढपेटकः । सीसरूपग्रहणं यावन्मात्रं सीसरूपं, तावन्मात्रस्य सुवर्णस्यापहार इति ज्ञापनार्थं । स एवेति, सीससुवर्णपत्रयोगेष्टकरहितः पटलसंपुटेष्वभ्युद्धार्यः । पेटकःअष्टकरहितत्वात् सुखं विश्लेष्यत इति ।

एवं द्रव्यापद्रव्ययोः समप्रतिभागिके सुंयूहने भरणप्रकारमभिधाय सारार्थंभागिष्वेव लेप्येषु हरणप्रकारमाह—पत्रमाश्लिष्टमिति । सुवर्णपत्रमाश्लिष्टमिति सुवर्णपत्रमाश्लिष्टमेकापश्वेंन यमकपत्रं वोभयतोऽवलेप्येषु क्रियते एवं बहिःपत्राण्यभिधाय गर्भमाह—शुल्वं तारं वा गर्भः पत्राणां सुवर्णपत्राणां सङ्घात्येषु क्रियते ।

सङ्घात्यस्यैव विशेषविधिमाह—शुल्वरूप्यमिति ।

शुल्वरूपं ताम्रभाण्डं सुवर्णपत्रसंहतं बहिः सुवर्णपत्रवेष्टितं । बहिर्ग्रहणं च वक्ष्यमाणयमकशब्दादवगन्तव्यम् । प्रमृष्टं प्रकर्षेणोज्वलितं । सुपार्श्वमिति शोभनमेकमेव

[पिङ्कः तत्परीक्षाश्च]

घनसुषिरे वा रूपे सुवर्णमृन्मा(वा)लुकाहिङ्गुलुककल्को वा तप्तोऽवतिष्ठते, दृढवास्तुके वा रूपे वालुकामिश्रजतुगान्धारपङ्को वा तप्तोऽवतिष्ठते। तयोस्तापनमवध्वंसनं वा शुद्धिः। सपरिभाण्डे वा रूपे लवणमुल्कया कटुशर्करया तप्तमवतिष्ठते। तस्य क्वाथनं शुद्धिः। अभ्रपटलमष्टकेन द्विगुणवास्तुके वा रूपे बध्यते। तस्यापिहितकाचकस्योदके निमज्जत एकदेशः सीदति, पटलान्तरेषु वा सूच्या भिद्यते। मणयो रूप्यं सुवर्णं वा घनसुषिराणां पिङ्कः। तस्य तापनमवध्वंसनं वा शुद्धिः—इति पिङ्कः॥

प्रतिपदपञ्चिका

बहिः पार्श्वं यस्य, तदेव शुल्बभाण्डं यमकपत्रसंहतमन्तर्बहिश्च सुवर्णपत्रावच्छादितं प्रमृष्टमिति। द्विप्रमृष्टग्रहणं बहिरन्तश्च प्रमार्जनार्थमिति केचित्।

अपरे त्वेकपार्श्वविलिप्तस्य सुपार्श्वमिति संज्ञा। उभयपार्श्वविलिप्तस्य प्रमृष्टमिति। प्रथमस्तु प्रमृष्टशब्दो द्वयोरपि संशुद्धिवचनः। ताम्रतारूपं चोत्तरवर्णक इत्यनेन न केवलं शुल्वं तारं वा गर्भसुवर्णपत्राण्येवाच्छादनं कर्तव्यमपि तु कार्ष्णायसभाण्डस्यापि ताम्रतारूपं ताम्रपत्रं रूप्यपत्रं चोत्तरावर्णकस्तदाच्छादनं उक्तमिति। अथवा शुल्वरूपं सुवर्णपत्रसंहतमित्युक्तम्।

तत्किमेकान्ततस्ताम्ररूपं जात्यं सुवर्णपत्राच्छादितमेव कर्तव्यं नेत्याह—
ताम्रताररूपं च ताम्रभाण्डस्य रूप्यपत्रमुत्तमवर्णकस्तदाच्छादिवदनरूपं कर्तव्यमिति वाक्ययोजना।

तस्य परीक्षामाह—तदुभयमिति, गाढमभ्युद्धार्यं च पेटकद्वयं तापनिकर्षेण। तथा निश्शब्देन शब्दरहितेन। छेदनेनेति केचित्। निश्शब्देनोल्लेखनेनेत्यपरे।

उल्लेखनं तीक्ष्णमुखलेखं तेन विद्याज् जानीयात्। अभ्यु(द्धा)स्थार्यस्य विशेषेण परीक्षामाह—अभ्युद्धार्यमष्टकबन्धरहितं बदराम्ललवणोदकानि प्रतीतानि। साधयन्ति केचित् सादयन्तीति पठन्तः शुक्तिकोपरि कुट्टयन्तीति व्याचक्षते। इत्ययं पेटकोऽभिहितम्(:)।

श्रीमूला

पञ्चविधं पिङ्कं तत्परीक्षणं चाह—घनेत्यादि। घनसुषिरे रूपे घने सुषिरवति च भाण्डे कटकाद्यलङ्कारे, सुवर्णमृन्मालुकाहिङ्गुलुककल्को वा सुवर्णमृत् सुवर्णमालुका च धातुविशेषो, हिङ्गुलुको जातिहिङ्गुलकः एतेषां मिलितानां कल्कः, तप्तः तापयित्वा

श्रीमूला

प्रक्षिप्तः, अवतिष्ठते अवस्थितो भवति। अतस्तद्योजनेन तावत् स्वर्णमपह्रियत इत्यर्थः। अन्यदपद्रव्यमाह—दृढवास्तुके रूपे वा दृढपीठबन्धे अलङ्कारे वा, वालुकामिश्रः पिण्डवालुकायुक्तः जतुगान्धारपङ्कः लाक्षासिन्दूरपङ्कः, तप्तोऽवतिष्ठते। तत्र शुद्धिमाह—तयोः घनसुषिर-दृढवास्तुकयोर्विषये, तापनं दाहः, अवध्वंसनं वा ताडनं वा, शुद्धिः शोधनोपायः। सपरिभाण्डे रूपे पृषतमणिबन्धे, लवणम्, उल्कया ज्वालया, कटुशर्करया तप्तं मृदुपाषाणविशेषेण सह तप्तम्, अवतिष्ठते। तस्य, क्वाथनम् अर्थाद् बदराम्लोदके, शुद्धिः शुद्धिहेतुः। पिङ्कस्य प्रकारान्तरमाह—अभ्रेत्यादि। अभ्रपटलं काचमणिः, अष्टकेन द्विगुणवास्तुके लाक्षादिना द्विगुणावगाढबन्धे, रूपे, बध्यते सम्बध्यते अवतिष्ठत इत्यर्थः। तत्परीक्षामाह—तस्येति। तस्य प्रत्युप्तमणेरन्तरवच्छादितकाचस्य सुवर्णाभरणस्य, उदके निमज्जतः परीक्षार्थं बदराम्लोदके प्रक्षिप्तस्य, एकदेशः सीदति अभ्रपटलरहितोऽवयवो गुरुत्वादधो गच्छति। अर्थादिकदेशान्तरमभ्रपटलयुक्तं लघुत्वादधो न गच्छति। अभ्रपटलातिरिक्तताम्रपटलादिविषये तु सूच्या भेदनमेव शुद्धिज्ञानोपाय इत्याह—पटलान्तरेष्विति। पुनः पिङ्कस्य घनसुषिराभरणविषये त्रीन् प्रकारानाह मणय इति। घनसुषिराणां घनसुषिराभरणविषये, मणयः पिङ्कः, काचमणयो जात्यमणिहरणोपायः। रूप्यं पिङ्कः रजतं सुवर्णहरणोपायः, सुवर्णं पिङ्कः अशुद्धं स्वर्णं शुद्धस्वर्णहरणोपायः, तत्र शोधनप्रकारमाह—तस्येत्यादि। इति पिङ्कः व्याख्यात इति शेषः।

चाणक्यटीका

विङ्कमिदानीमाह—घने निश्छिद्रे शूर्पे सुषिरे वा घटादौ सुवर्णमृत्को गैरिककल्कः [1]वालुकाहिङ्गुलकल्को वा तप्तत्वात् संश्लिष्टोऽवतिष्ठते। तत्र यावन्तं कल्कं प्रक्षिपति तावत् सुवर्णम् अपहरति। दृढवास्तुके वा रूपे कटकादौ बालुकामेव जतुगान्धारपङ्को वा सिन्दूरकल्कः तप्तोवतिष्ठते। तत्र यावन्त कल्कं तावत् सुवर्णमपहरति। तत्रावस्थाने क्काचोंदरा निवध्यन्ते तद्वास्तुकं दृढं चेत् तद्रूपं भवति। तयोरुभयोस्तापेन अन्तर्विलनाद् अवध्वंसनमेव वा चूर्णनं शुचि ॥

सपरिभाण्डे वा कटकादिरूपे लवणमुदकमिश्रं उल्कातप्तं निर्ज्ञातत्वाद् अग्निनेत्यर्थः। तप्तकटशर्करया वा तप्तं परिभाण्डनिहितमवतिष्ठते। परिभाण्डं हि तत्रादिकर्म। तस्य क्वाथनं शुद्धिः। क्वाथ्यमानं हि द्रवीभूतं भवति ॥

अभ्रपटलमिति। द्विगुणवास्तुके संयूह्यक (शा ? ट) कादिरूपे तदन्तरेऽभ्रपटलं तत्प्रमाणम्, यत्प्रमाणमपहर्तुमिष्टं द्रव्यम् अष्टकेन बध्यते तस्य अपिहितकाचस्य प्रच्छन्नमायस्य रूपस्य उदके निमज्जतः एकदेशः यत्राभ्रमपटलं नास्ति स सीदति, अपरः प्लवत इत्यर्थः। इयं तावदेका परीक्षा। पटलान्तेषु वा तीक्ष्णया सूच्या भिद्यते, तत्र रूपमिति शेषः। यत्राभ्रपटलं तद् भिद्यमानं शब्दायत इति ॥

---

१. वालुकास्थाने मालुकेति मुद्रितकोशेषु पाठः प्रामादिको भाति।

[अपहरणावकाशनिरोधाय जात्यादिज्ञानस्यावश्यकता]

तस्माद्वज्रमणिमुक्ताप्रवालरूपाणां जातिरूपवर्णप्रमाणपुद्गललक्षणान्युपलभेत ॥

चाणक्यटीका

मणय इति। मणयो बध्यन्ते यत्र स्थाने, रूप्यं वा यदवलिप्यते, सुवर्णं वा रुचकादि तपनीयं वा घनसुषिराणां पिङ्कस्य विषयत्वात् पिङ्कः। तस्य तापनमित्यादि गतार्थम् ॥

प्रतिपदपञ्चिका

साम्प्रतं पञ्चप्रकारपिटकं तच्छोधनं चाह घनसुषिर इति, घनसुषिरे घनं च तत्सुषिरं च घनसुषिरं तस्मिन्रूप्ये कटकाद्याभरणे सुवर्णवा(मा)लुका सुवर्णमृत् च धातुविशेषः। हिङ्गुलककल्कः जातिहिङ्गुलककल्पः तप्तः प्रताप्य प्रक्षिप्तमन्मध्येवतिष्ठते। गाढवास्तुके धनघटितपीठबन्धे रूपेऽलङ्करणे वालुकामिश्रं पूर्वोक्तसुवर्णवालुकासहितं जतुगान्धारपङ्कस्सितपदकस्तप्तोऽवतिष्ठते इति। शोधनमाह—तयोरिति।

तयोः घनसुषिरवास्तुकविषययोः तावद्वाहः अपध्वंसनं ताडनं वा शुद्धिः शोधनोपायः सपरिमाण्डे वा रूपे स वेष्टितमणिबन्धे। लवणं प्रतीतमुल्कयाज्वालया कटकशर्करोपेतस्तं कटकशर्करया मृदु पाषाणजात्या सह तप्तमवतिष्ठते। तस्य शुद्धिर्बदराम्लोदकेन सह क्वाथनम्। विकारान्तरमाह—अभ्रपटलमिति।

काचमणिः अष्टकेन लाक्षादिना द्विगुणवास्तुके द्विगुणावगाढ(सं)पीठबन्धे रूपे बध्यत इति। तत्परीक्षामाह—तस्यापिहितकाचस्येति।

तस्य मणिप्रत्युप्तस्य सुवर्णाभरणादेरर्पितकाचमण्यादिमतः परिज्ञानमुदके बदराम्लोदके निमज्जतः प्रक्षिप्तस्यैकदेशः सीदति। अभ्रपलरहिता गुरवोऽवयवा अधोगच्छन्ति न सर्वोऽवयवीति पटलान्तरेषु व्यवधायकेषु सत्सु तदन्तर्गतताभ्रपलपरिज्ञानार्थं तदाभरणं सूच्या भिद्यते। मणयो रूप्यं सुवर्णं च त्रयं त्रिविधो घनसुषिराभरणानां पिटकः (ङ्कः) अपहरणावकाशमणयो काचमणयः जात्यमणीनां सुवर्णं चाशुद्धं शुद्धस्य द्वितीयपिट(ङ्क) शब्द उपसंहारार्थः।

श्रीमूला

तस्मादिति। उच्चावचहरणोपायसम्भवात्, वज्रमणिमुक्ताप्रवालरूपाणां वज्रादिरूपाणां चतुर्णां, जातिरूपवर्णप्रमाणपुद्गललक्षणानि जातिरुत्पत्तिः रूपमाकारः वर्णो रागः प्रमाणं माषकादिपरिमाणं पुद्गलमाभरणं लक्षणं लक्ष्म, एतानि उपलभेत विद्यात्।

चाणक्यटीका

तस्मादिति। यस्मादेते हरणमार्गाः तस्मादप्रमादार्थं वज्रादीनां जातिरूपप्रमाणपुद्गलानां प्रयोजनोपलब्धिः कार्या ॥

[भूषणादिपरीक्षासमये नवीकरणसमये च
संभाविताः अपहरणोपायाः चत्वारः]

कृतभाण्डपरीक्षायां पुराणभाण्डप्रतिसंस्कारे वा चत्वारो हरणोपायाः—परिकुट्टनम् अवच्छेदनमुल्लेखनं परिमर्दनं वा ।

पेटकापदेशेन पृषतं गुणं पिटकां वा यत् 'परिशातयन्ति तत्परिकुट्टनम् । यद्द्विगुणं वास्तुकानां वा रूपे सीसरूपं प्रक्षिप्य अभ्यन्तरमवच्छिन्दन्ति तदवच्छेदनम् । यद् घनानां तीक्ष्णेनोल्लिखन्ति तदुल्लेखनम् । हरितालमनश्शिलाहिङ्गुलकचूर्णानामन्यतमेन कुरुविन्दचूर्णेन वा वस्त्रं संयूह्य यत् परिमृद्गन्ति तत् परिमर्दनम् । तेन सौवर्णराजतानि भाण्डानि क्षीयन्ते । न चैषां किञ्चिदवरुग्णं भवति ॥

प्रतिपदपञ्चिका

तस्मादिति । पूर्वोक्तहरणमार्गदर्शनात् कारणाच्चतुर्णां वज्रादिरूपाणां षड्जात्यादीन्युपलाभेऽववुद्ध्येत । तत्त जातिरुत्पत्तिः, वर्णो रागः, रूपमाकारः, प्रमाणं माषकादिपरिमाणं पुद्गलमाभरणं लक्षणं चिह्नम् ।

श्रीमूला

इदानीं कृतभाण्डपरीक्षणविषयं परिकुट्टनादिकम्, हरणोपायचतुष्टयमाह—कृतेत्यादि । पुराणभाण्डप्रतिसंस्कारे वा जीर्णभाण्डनवीकरणे वा परिकुट्टनादिकं लक्षयति—पेटकेत्यादि । पेटकापदेशेन पूर्वोक्तपेटकपरीक्षणव्याजेन, पृषतं क्षुद्रगुटिकां, गुणं कटकाद्यंशमल्पं, पिटकां वा बृहदंशं वा, यत् परिशातयन्ति, पातयन्ति तत् परिकुट्टनं तदाख्यम् । द्विगुणवास्तुकानां बहुपत्रपुटघटितानां, रूपे भाण्डे, सीसरूपं सीसपत्रं सुवर्णनुलिप्तं, प्रक्षिप्य अभ्यन्तरं सुवर्णपत्रं, यदवच्छिन्दन्ति अवछिद्यापहरन्ति, तदवच्छेदनं नाम । घनानां घननिर्मितानां, रूप इति वर्तते, तीक्ष्णेन निशितशस्त्रेण, यदुल्लिखन्ति तद् उल्लेखनम् । हरितालमनश्शिलाहिङ्गुलकानाम् अन्यतमचूर्णेन वा, कुरुविन्दाख्यपाषाणविशेषचूर्णेन च, वस्त्रं संयूह्य मिश्रयित्वा, यत् परिमृद्गन्ति यत् परिघर्षयन्ति, तत् परिमर्दनं तदाख्यम् । तेन परिमर्दनेन, सौवर्णराजतानि भाण्डानि, क्षीयन्ते प्रमाणहानिं प्राप्नुवन्ति । एषां भाण्डानाम्, अवरुग्णं भङ्गः, किञ्चिन् न च भवति, मनागपि न भवति च । सोऽयं विनैव भाण्डभङ्गमपहरणोपायः ।

चाणक्यटीका

कृतभाण्डपरीक्षायां परीक्षकस्य, पुराणप्रतिसंस्कारे वा प्रतिसंस्कर्तुः, चत्वारः परिकर्तनादयो हरणोपायाः । पेटकापदेशेनेति । पेटकोक्त कृत इत्यर्थः । पृषतं

[परिकुट्टनादिसमयपातितद्रव्यपरिमाणेयत्तनिर्णयोपायः]

भग्नखण्डघृष्टानां संयूह्यानां सदृशेनानुमानं कुर्यात् । अवलेप्यानां यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात् । विरूपाणां वा तापनमुदकपेषणं च बहुशः कुर्यात् ॥

चाणक्यटीका

गुटिकाम् । गुणं सूत्रम् । पिटकाम् पिप्पलीफलाकारां चन्द्रिकां वा शुद्ध्यर्थं किल परि-(श्रप ? शात) यन्ति अपकर्षन्ति तत् परिकर्त्तनम् ॥

यद् द्विगुणवास्तुकानां रूपे सीसेन परिक्षिप्येतेति अन्तरे प्रक्षिप्य इदमुन्नतम्, इदमवनतम् इत्यवच्छिन्दन्ति सुवर्णं तदवच्छेदनम् ॥

.........यत् परिमृशन्ति तत् परिमर्दनम् । तेन वा परिमर्देन भाण्डानि परिक्षीयन्ते । न चैषामिति भाण्डानां रूपं क्षतं भवति, यद्दर्शनादपहृतमिति ज्ञायेत ॥

प्रतिपदपञ्चिका

सम्प्रति कृतभाण्डपरीक्षाविषयांश्चतुरः परिकुट्टनादीन् हरणोपायानभिधाय व्याचष्टे । कृतभाण्डपरीक्षायामिति । न घटितालङ्कारादिपरीक्षणे पुराणभाण्डप्रतिसंस्कारे जीर्णस्य पुनः नवत्वापादनेन च चत्वारः परिकुट्टनादयो हरणोपायास्तत्र परिकुट्टनमाह—पेटकापदेशेनेति ।

पूर्वोक्तपेटकसदसद्भावपरीक्षणव्याजेन पृषितं क्षुद्रकुटिकां गुणं शकटावयवं पिटकां वृहद्गुलिकां परिशातयन्ति । समन्ततस्ताडनेन परिपातयन्ति तत्परिकुट्टनं नाम । द्विगुणं वास्तुकानां पत्रपुटघटितानां रूपे भाण्डविशेषे सीसरूपं सुवर्णाच्छादितं प्रक्षिप्याभ्यन्तरं सुवर्णपत्रमवच्छिन्दन्ति तदवच्छेदनं,

घनानां घनपटितानां तीक्ष्णेन तीक्ष्णशस्त्रेण यदुल्लिखन्ति तदुल्लेखनम् हरितालादित्रयान्यतमचूर्णेन कुरुविन्दं पाषाणविशेषः । तस्य चूर्णेन वाशब्दश्चार्थे । वस्त्रं संयूह्य व्यामिश्रीकृत्य यत्परि(मु)म्लाति परिघर्षयति । तत्परिमर्दनं नाम । तेन सौवर्णराजतानि भाण्डानि क्षीयन्ते । प्रमाणाद्धीयन्ते । न चैषां रूपं भग्नं किञ्चिदपि भवति ।

श्रीमूला

परिकुट्टनादिकृतं वर्णकणिकादिपातनम् एतावदिति कथं निर्णेतव्यम् ? तत्राह—भग्नेत्यादि । संयूह्यानां दृढपत्रघटितभाण्डानां, भग्नखण्डघृष्टानां भग्नं परिकुट्टनशातितं खण्डमवच्छेदनहृतं घृष्टमुल्लेखनपरिमर्दनकर्मापहृतम् एषां भग्नादीनां, सदृशेनानुमानं कुर्यात् सजातीयावयवप्रमाणेन लिङ्गेनानुमितिं कुर्यात्, भग्नस्यावयवस्याभग्नावयवप्रमाणेन खण्डस्याखण्डावयवप्रमाणेन घृष्टस्याघृष्टावयवप्रमाणेन चेयत्तां निश्चिनुया-

श्रीमूला

दित्यर्थः। अवलेप्यानामिति। अवलेप्यानां तनुपत्रघटितभाण्डानां, यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात्, यावानंशोऽवच्छिद्य गृहीतस्तावन्तमपरमंशमवच्छिद्य तत्प्रतिमानेनापहृतांशमानं निश्चिनुयात्। विरूपाणामिति। विरूपाणां वा प्रचुराप-द्रव्यमिश्रणेन हीनवर्णकतामापादितानां सुवर्णभाण्डानां च, सदृशेनानुमानं कुर्यादित्य-नुवर्तते। प्रतिमिततदीयैकांशस्य शुद्धीकरणेन वर्णहानीयत्तां विज्ञाय तत्सादृश्येन शेषांशानां वर्णहानीयत्तामभ्यूहेदित्यर्थः। शोधनप्रकारमाह—तापनमिति। तापनं पत्रीकृत्याग्नौ दहनम्, उदकपेषणं च तत्समुदके प्रक्षिप्य चुक्रिकायोजनेन कुट्टनं च। बहुशो बहुकृत्वः, कुर्याद् यावद् वैवर्ण्यमपैति तावदित्यार्थम्। इयत्तानिर्णयफलं तु 'वर्णहीने माषकावरे पूर्वः साहसदण्ड' इत्यादि पूर्वोक्तदण्डविधानम्।

चाणक्यटीका

भग्नेति। रुग्णाश्चूर्णिताः। खण्डाः एकांशविकलाः। घृष्टाः परिक्षीणाः। संयूह्याः परिवेष्टिताः। तेषां रूपाणां सदृशेन अपरेण अनुमानं कुर्यादिति। यद् अत्र अने-नापहृतम् इति प्रतिपादनार्थं दण्डनार्थं च ॥

अवलेप्यादीनां छत्रदण्डादीनां यावदुत्पाट्यापहृतं तत्प्रमाणं प्रदेशान्तरम् उत्पाट्यानुमातव्यम् ॥

विरूपाणामपि द्रव्यान्तरसंसर्गाद् उपभोगाद्वा कालान्तरेण सुवर्णस्य विरूपतायां जातायां तापनं पाकपत्राणि कृत्वा उदकेन पेषणं कुट्टनं बहुशो वर्णप्रत्यापत्त्यर्थं कुर्यात् ॥

प्रतिपदपञ्चिका

तेषु परिकुट्टनादिषु वर्णकर्णिकापातस्य उपलक्षणार्थमनुमानमाह—भग्नेत्यादि।

सदृशेनानुमानं, भग्नस्याभग्नेन, खण्डस्याखण्डेन, घृष्टस्याघृष्टेन, अवयवान्तरेण एतावदेव हृतमित्यनुमानम्। भग्नं पेटकापदेशेन शातितपृषतादिकर्मखण्डसीसरूप-प्रक्षेपणावच्छिन्नसुवर्णपत्रावयवं घृष्टम्। तीक्ष्णमुखोल्लेखनेन वस्त्रसंयूहितकुरुविन्देन वा घर्षितावयवं अवलेप्यानामच्छपत्रावच्छेदितानां यावन्मात्रं यावत्प्रमाणमुत्पाटित-मुच्छेदितं तावन्मात्रमन्यदुत्पाद्य तत्प्रमाणेनाद्यानुमानं कुर्यादिति वर्तते। विरूपाणां वाशब्दश्चार्थे विरूपाणां च प्रभूतप्रक्षिप्तापद्रव्याणां रूप्यसुवर्णभाण्डानां सदृशेनानुमानं कुर्यादिति वर्तते। तद्यथा निष्पन्नेककटिसूत्रादौ प्रभूतापद्रव्यप्रक्षेपणा(सं)पहारशङ्कायां एकां कटिकामादाय तापनंन्तनुपत्रीकृत्य आदौ दहनमुदकपेषणं तत्समुदके प्रक्षिप्य चुन्तिकयोजकुट्टनं बहुशः कुर्यादिति। आवैवर्ण्यीभ्रमपगमात् (आवैवर्ण्यापगमात्) अनुमाने प्रयोजनं दण्डविधानम् उक्तं हि। वर्णहीने, माषकावरे पूर्वः साहसदण्ड इत्यादि। मूकमूषेत्येवमादयोऽपसारणमार्गा आकरोद्धवस्याभिहिताः।

[अन्ये सप्तदश हरणोपायाः]

अवक्षेपः प्रतिमानमग्निर्गण्डिका भण्डिकाधिकरणी पिच्छः सूत्रं चेल्लं बोल्लनं शिर उत्सङ्गो मक्षिका स्वकायेक्षा दृतिरुदकशरावमग्निष्ठमिति काचं विद्यात् ॥

श्रीमूला

पूर्वोक्ताकरोद्भवापसारणमार्गातिरेकिणोऽवक्षेपादीन् सप्तदश हरणोपायानाह—अवक्षेप इति। अवक्षेपः हस्तलाघवेन सारमपहृत्यायद्रव्यप्रक्षेपः, प्रतिमानं तद्विनिमयादि, अग्निः अग्निमध्ये हरणप्रयोगः, गण्डिका काष्ठाधिकरणी रत्नप्रतिवापाधारकाष्ठं, भण्डिका उपस्काराधारः स्वर्णद्रवनिषेकसाधनम्, अधिकरणी अयस्पात्रविशेषः, पिच्छः मयूरबर्हः, सूत्रं सुवर्णतुलातन्तुः, चेल्लं वस्त्रं, बोल्लनं कथाव्याजेन द्रष्टृचित्तव्याक्षेपकरणं, चेल्लबोल्लनमिति समस्तपाठे वस्त्रपटलिका, शिरः शीर्षकण्डूयनादि, उत्सङ्गः अङ्कः उपलक्षणाद् गुह्यप्रदेशश्च, मक्षिका मक्षिकानिवारणव्याजेन निर्यासद्रवलिप्तस्वाङ्गसंश्लेषणं, स्वकायेक्षा स्वेदादिदर्शनव्याजः, दृतिः ध्मानभस्त्रा, उदकशरावं जलपात्रम् अग्निष्ठम् अग्निप्रक्षिप्तमपद्रव्यम्, इति एवम्प्रकारं, काचम् अपहरणोपायं, विद्यात्।

चाणक्यटीका

काचमिदानीमाह—अवक्षेपो लाघवेन सञ्चारणम्। प्रतिमानं वा परिवर्तयति। अग्नौ प्रक्षिपति। (गुटि ? गण्डि)कायां वा सुषिरायाम्। अधिकरिण्यां लोह्यां सव्रणायां श्लेषयति। पिञ्छः पिचुदलम्। बालकूर्चिकेत्यन्ये। तत्र मध्ये क्षिपति। सूत्रस्य वा मध्ये न्यस्य (त्रि ?) चेलेन वा वस्त्रखण्डेन संयूह्यते। (चो ? चे)ल्लनं नीवीबन्धनं तत्र वा प्रक्षिपति। अपरे चोल्लनमिति वर्णयन्ति, कथाप्रस्तावं कृत्वा तद्व्यासक्तचित्तस्यापहरन्ति। शिरः कण्डूयनवशेन। उत्सङ्ग इति। शिरः कण्डूयनापदेशेन। मक्षिकावारणव्याजेन वा सञ्चारणम्। पौनःपुन्येन स्वकायेक्षाकौतूहलाद् रक्षितापि यावदीक्षते तावत् सञ्चारयति। ध्मापनार्थो दृतिः।.........न मृदा कलुषीकृतस्योदकस्य शरावः। अग्निष्ठम् अग्न्यगारः। काचाश्रयत्वात् काचं छलं विद्यात् ॥

प्रतिपदपञ्चिका

तद्व्यतिरेकेणात्र अवक्षेप इत्येवमादिकं सप्तदशप्रकारं काचमाह—तत्रापक्षेपो हस्तलाघवेन कथमप्यपहृतस्य तत् द्रव्यप्रक्षेपः। प्रतिमानं तत्परिवर्तनादि। अग्निरिति तन्मध्ये हरणप्रयोगः गण्डिका काष्ठाधिकरिणी। भाण्डिका उपस्कराधिकारः। अधिकरणीविच्चः सूत्रं, नाराचकक्ष्याचेल्कं चेलकं चोलनं कथाव्याजेनानुष्ठायिनां चित्तापहरणमिति केचित्।

[राजतेषु दुष्टानि]

राजतानां विस्रं मलग्राहि परुषं प्रस्तीनं (प्रस्तीतं) विवर्णं वा दुष्टमिति विद्यात् ॥

[निगमनम्]

एवं नवं च जीर्णं च विरूपं चापि भाण्डकम् ।
परीक्षेतात्ययं चैषां यथोद्दिष्टं प्रकल्पयेत् ॥८८॥

इत्यध्यक्षप्रचारे विशिखायां सौवर्णिकप्रचारः चतुर्दशोऽध्यायः
आदितः पञ्चत्रिंशः ॥

प्रतिपदपञ्चिका

अपरे तु चेल्लं बोल्लनमित्येकमेव पठन्तो वक्षपेट्टलिकामाचक्षते । तेषां षोडशविधा काचः शिरः केशसंयमनकण्डूयनादि । उत्सङ्गो गुह्यप्रदेशः । मक्षिका तन्निवारणव्याजेन साकं धकोपदिग्धदेहावयवसंश्लेषणं स्वकायेक्षास्वेदापमार्जनपुलकादिनिरूपणं दृतिर्ध्मानभस्त्रोदकशरावं जलभाजनं अग्निष्ठमग्निस्थानं काचोपहरणोपायाः ।

श्रीमूला

राजतानां पञ्च दु(ष्ट)ष्टिचिह्नान्याह—राजतानामित्यादि । राजतोक्त्या पूर्वोक्तस्य स्वर्णविषयत्वं सूचितम् । विस्रं सीसादिसंसर्गदुर्गन्धि । मलग्राहि मलिनम् । परुषं खरस्पर्शम् । प्रस्तीतं कठिनम् । विवर्णम् अपद्रव्यमिश्रणोपहतनिजप्रभम् । एतच्छोधनप्रकारस्तु 'अस्थितुल्ये चतुः समसीसे चतुः' इत्यादिना पूर्वाध्याये दर्शित एव ।

चाणक्यटीका

राजतानां भाण्डानां यद् विस्रं मत्स्यगन्धि । मलग्राहि । परुषं रूक्षम् । प्रस्तीतमिति स्तब्धम् जडमित्यन्ये । विवर्णं व''''''विद्यात् । तस्य च सीसेन शोधनमुक्तम् ॥

प्रतिपदपञ्चिका

राज्ञामाविस्रादीनि पञ्च दृष्टलिङ्गानाह—राजतानामिति,

अत्र राजतग्रहणात् पूर्वं सुवर्णस्येति मन्तव्यम् । विस्रं सीसादिसंसर्गसङ्क्रान्तदुर्गन्धं, मलग्राहि मलयुक्तं, परुषमश्लिक्ष्णं प्रस्तिनं कठिनं विवर्णं अपद्रव्ययोगात् उपहतच्छायं दुष्टमिति जानीयात् । तत्प्रतिकारश्च उक्त एव अस्ति चतुरित्यादि ।

श्रीमूला

अध्यायान्ते श्लोकमाह—एवमित्यादि । विरूपम् अपद्रव्यमिश्रणदूषितम् । अत्ययं दण्डम् । यथोद्दिष्टं 'वर्णहीने माषकावरे' इत्यादिना विहितप्रकारम् । प्रकल्पयेत्

श्रीमूला

प्रकर्षेण कल्पयेत् अवश्यं प्रयुञ्जीतेत्यर्थः। उदाहृतौ चात्र भट्टस्वामिना बार्हस्पत्यौ श्लोकौ—

"अचोराश्चोरधर्माणो वणिजः कारवस्तथा।
तस्मात् तेषु न विश्वासः कर्तव्यो भूतिमिच्छता॥
प्रकाशतस्करानेतान् परद्रव्यापहारिणः।
शिल्पिनो वणिजश्चैव राजा दण्डेन वारयेत्॥" इति॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्दशोऽध्यायः, विशिखायां सौवर्णिकप्रचारः,
आदितः पञ्चत्रिंशः॥

चाणक्यटीका

एवमिति। एवं यथोक्तेन प्रकारेण। नवं क्रियमाणम् जीर्णं च प्रतिसंस्क्रियमाणम्। विरूपं च अन्यथाभूतसंस्थानम्। भाण्डकं परीक्षेत प्रकृतत्वात् सौवर्णिक एव। अत्ययञ्चैषां यथोद्दिष्टम्। अनया दिशा अनुद्दिष्टमपि कल्पयेत्। कण्टकशोधनानुवृत्त्या महास्तेनत्वादेषां पुनराहत्याभिधानमिति। यथोच्यते—

सुवर्णस्यापहर्तारं तत्कर्मणि विचक्षणम्।
रक्षेद् विचक्षणतरो येन नापहरेत् (पुनः)॥

इति विशिखायां सौवर्णिकप्रचारः। चतुर्दशं प्रकरणम्॥
॥ चतुर्दशश्चाध्यायः॥

प्रतिपदपञ्चिका

अध्यायप्रान्ते श्लोकमाह—एवमित्यदि, एवमित्युक्तोपसंहारः नवां प्रत्यग्रघटितंजीर्णमिति, चिरन्तनं विरूपं प्रभूतापद्रव्यदूपितं परीक्षेत। यथोक्तैः परीक्षणप्रकारैस्सम्यगवेक्षेत। अत्ययं च दण्डमेषां शिल्पानां यथोद्दिष्टं यथाभिहितवर्णहीने माषकारे पूर्वः साहसदण्ड इत्येवमादिकं प्रकल्पयेत्। प्रकर्षेण कल्पयेत्। अवश्यं कुर्यादित्यर्थः। यस्मात् सम्यगधिष्ठाता अपि कारवो पश्यमपहरन्तीति बार्हस्पत्यौ चात्र श्लोकौ भवतः—

"आचोरश्चोरधर्माणो वणिजः कारवस्तथा।
तस्मात्तेपु न विश्वासः कर्तव्यो भूतिमिच्छता॥
प्रकाशतस्करानेतान् परद्रव्यापहारिणः।
शिल्पिनो वणिजश्चैव राजा दण्डेन वारयेत्॥" इति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायां अर्थशास्त्रटीकायां
द्वितीयेऽधिकरणे चतुर्दशोऽध्यायस्समाप्तः।
आदितः पञ्चत्रिंशोऽध्यायः॥

त्रयस्त्रिंशत् प्रकरणम्

पञ्चदशोऽध्यायः

कोष्ठागाराध्यक्षः

[धान्याद्यध्यक्षचिन्तनीयाः दशांशाः]

कोष्ठागाराध्यक्षः सीताराष्ट्रक्रयिमपरिवर्तकप्रामित्यकापमित्यकसिंहनिकाऽन्यजातव्ययप्रत्यायोपस्थानान्युपलभेत ।

श्रीमूला

कोष्ठागाराध्यक्ष इति सूत्रम् । कोष्ठमुदरं तेन तदर्थानि धान्यस्नेहक्षारलवणादीन्यभ्यवहार्यद्रव्याणि लक्ष्यन्ते, तेषामगारं संग्रहसंगोपनस्थानं तस्य अध्यक्षः कोष्ठागाराध्यक्षः अर्थात् तद्व्यापारः स इहाभिधीयत इति सूत्रार्थः ।

प्रकान्तायाः कोशप्रकृतेराकरकर्मान्तप्रवर्तनादिनोत्पादनरक्षणादिकमुक्तम् । शरीरस्थितहेतुतया प्रधानस्य धान्यादेरुत्पादनरक्षणव्ययप्रकारादिकं तु नोक्तम् । तदिहोपदिश्यत इति सम्बन्धः । यद्वा 'सन्निधाता कोशगृहं कोष्ठागारं पण्यगृहं कुप्यगृहमायुधागारं बन्धनागारं च कारयेद्' इति कोष्ठागारकरणं पूर्वमुक्तम् । तदध्यक्षव्यापारस्त्वनभिहित इदानीमभिधीयत इति सङ्गतिः ।

तमाह—कोष्ठागारेत्यादि । कोष्ठागाराध्यक्षः, सीतादीनि सीता राष्ट्रं क्रयिमं परिवर्तकः प्रामित्यकम् आपमित्यकं सिंहनिका अन्यजातः व्ययप्रत्यायः उपस्थानमित्येतान् दश पदार्थान् उपलभेत चिन्तयेत् ।

चाणक्यटीका

"सन्निधाता कोशगृहं कोष्ठागारं पण्यगृहम् आयुधागारं बन्धनागारं च कारयेत्" (अधि० २ अध्या० ५) इत्युक्तम् । तत्र कोषागारसम्बद्धकर्मानन्तरं कोष्ठागारसम्बद्धान्युच्यन्ते । अथवा गुरुत्वादेव कोशसम्बन्धिकर्माभिधानं प्राक्, तदनन्तरं कोष्ठागारसम्बन्धीनि फल्गु (कुप्य) द्रव्यकर्माण्युच्यन्ते कोष्ठागाराध्यक्ष इति ॥

सन्निधातृकृताधिकारः कोष्ठागाराध्यक्षः सीतादीनि कोष्ठागारविषयाण्युपलभेत ।

प्रतिपदपञ्चिका

कोष्ठागाराध्यक्ष इति सूत्रम् ।

कोष्ठमुदरं तद्ग्रहणेन तदर्थानि सर्वस्नेहधान्यक्षारलवणादीन्याहारद्रव्याणि गृह्यन्ते । तेषामगारं सङ्ग्रहं संङ्गोपायनस्थानं कोष्ठागारं तत्र नियुक्तः कोष्ठागाराध्यक्षं तद्ग्रहणेन च लक्षणया तद्व्यापाराभिधानं तमिहाभिधीयत इति सूत्रार्थः ।

[तेषां यथोद्देशं विवरणम्]

सीताध्यक्षोपनीतः सस्यवर्णकस्सीता । पिण्डकरः, षड्भागः, सेनाभक्तं, बलिः, करः, उत्सङ्गः, पार्श्वं, पारिहीणिकम्, औपायनिकं, कौष्ठेयकं च राष्ट्रम् । धान्यमूल्यं, कोशनिर्हारः प्रयोगप्रत्यादानं च क्रयिमम् । सस्यवर्णानामर्घान्तरेण विनिमयः परिवर्तकः । सस्ययाचनमन्यतः प्रामित्यकम् ।

प्रतिपदपञ्चिका

सम्बन्धस्तु कोशप्रकृतिः प्रक्रान्ता, तस्याकरकर्मान्तप्रवर्तनादिभिरुत्पादनरक्षणादिकमुक्तम् । इदानीं शरीरस्थितिसाधनत्वेन प्रधानभूतस्य धान्यादेरुपादानरक्षणोचितव्ययोपदेशादिकमभिधीयत इति ।

अथवा सन्निधाता कोशगृहं कोष्ठागारं पण्यगृहं कुप्यगृहमायुधागारं बन्धनागारं च कारयेदिति कोष्ठागारकरणमुक्तम् । तदध्यक्षस्तद्व्यापारो वा नाभिहितः । सोऽभिधीयत इति सम्बन्धः । तदाह—

श्रीमूला

तान् यथोद्देशं विवृणोति—सीताध्यक्षोपनीत इत्यादि । सीताध्यक्षेण धान्यकरग्रहणकर्माधिकृतेन उपनीतः कोष्ठागारे प्रवेशितः सस्यवर्णकः धान्यजातिः, सीता तदाख्या । कोष्ठागाराध्यक्षस्तां शुद्धामन्यूनां च गृह्णीयात् ।

राष्ट्रमाह—पिण्डेत्यादि । पिण्डकरः तत्तद्ग्रामदेयतया क्लृप्तः करसमुदायः, षड्भागः षडिति चतुर्थादिभागस्याप्युपलक्षणं तेन षड्भागचतुर्भागादिरूपस्तत्तद्देशसिद्धो राजभाग इत्यर्थः, सेनाभक्तं सेनासन्नाहनकाले यथादेशसिद्धं स्नेहतण्डुललवणादि राजदेयमिति स्वामी, सैनिकानां तण्डुलहिरण्यादिदानसमये राजार्थे तैर्दीयमानः स्नेहतण्डुलाद्यंश इति भाषाटीका । बलिः षड्भागातिरिक्तः यथादेशप्रसिद्धो दशविंशतिबन्धादिकः यं भिक्षाभक्तं वदन्ति, करः फलवृक्षादिसम्बद्धं राजदेयम्, उत्सङ्गो राज्ञे पुत्रजन्माद्युत्सवावसरेषु पौरजानपदैर्दत्तं शालाकमध्वादि, पार्श्वम् उचितकरादधिकग्रहणं योगवृत्ताधिकरणे द्वितीये कोशाभिसंहारणाध्याये वक्ष्यमाणम्, पारिहीणिकं चतुष्पदविनाशितसस्यदण्डलभ्यम्, औपायनिकम् उपायनार्थं कौशेयादिकम्, कौष्ठेयकं च, राजस्थापिततटाकारामाद्युत्पन्नं च, इत्येवं दशप्रकारं राष्ट्रम् । पूर्वं समाहर्तृसमुदयप्रस्थापनाध्याये राष्ट्रान्तर्गतो बलिरुक्तः, पार्श्वपारिहीणिकानि चान्यजातान्तर्गतान्युक्तानि । तेषामिह पुनः पाठः समाहर्त्रुत्पादितानामपि कोष्ठागारप्रवेश्यतां ज्ञापयितुम् ।

धान्यमूल्यमिति । धान्यमूल्यं धान्यविक्रयहिरण्यं, कोशनिर्हारः हिरण्येन धान्यक्रयः, प्रयोगप्रत्यादानं वृद्धिप्रयुक्तधान्यप्रवेशनम्, इत्येवं त्रिप्रकारं क्रयिमम् ।

परिवर्तकमाह—सस्येत्यादि । सस्यवर्णानां सस्यजातीयानाम्, अर्घान्तरेण

श्रीमूला

विनिमयः एकेन शालिप्रस्थेन चतुःप्रस्थकोद्रवग्रहणमित्येवञ्जातीयो विनिमयः, परिवर्तकः तदाख्यः।

प्रामित्यकमाह—सस्येत्यादि। अन्यतः मित्रादेः, सस्ययाचनम् अप्रतिदानार्थम् प्रामित्यकं तत्संज्ञम्।

चाणक्यटीका

सीता (न्ते ?) ध्यक्षेण स्वकर्मान्ते तदुपनीतः सस्यवर्णः सस्यविशेषः शूकधान्यं शिम्बिधान्यं कोशधान्यादिः तत्पूर्वकत्वात् सीतेत्युच्यते॥

पिण्डकरः क्लृप्तकरः तत्र यद्धान्यमुत्पन्नम्। षड्भागः कुटुम्बिभ्यो धान्यमयं जातम्। सेनाभक्तं (स्व) स्थानेस्कन्धावारे वा भुक्तिका। बलिः जनपदेषु प्रार्थना। करः हिरण्यप्रत्यायः। उत्सङ्गः आयुक्तवृत्तिः। (भृतो युक्तोष्टकोष्ठागारं प्रवेश्यते अवस्ताहराच्छ ?) भागे षष्ठे समुत्पन्ने पुनरप्युत्सङ्गेन यद्धान्यं स्तोकं प्रयच्छन्ति कुटुम्बिनः। (खणव्रणिकेत्यर्थः ?)। पार्श्वम् उत्कोचः। पारिहीणिकं पूर्वप्रचारपरिहीणं वर्तमानकालोद्भावितम्। अन्यस्त्वाह—स्वविषयाच्युतः परिहीणः। तस्य यद् द्रव्यं भुक्तग्रामेष्विति। औपायनिकम् उपायनभवं प्राभृतम्। कौष्ठेयकं कोष्ठागार एव व्यवहारेणोत्पन्नम्। एतद्राष्ट्रम्॥

धान्यमूल्यमिति। धान्यस्य विक्रीतस्य मूल्यम्। क्षीणे कोष्ठागारधान्ये यत्क्रयार्थं यत् कोशगृहान्निर्हृतं द्रव्यं स कोशनिर्हारः। प्रयोगेण धान्यं दत्तं तत् पूर्णकाले यत् सवृद्धिकं प्रत्यादीयते, तत् प्रयोगप्रत्यादानम्, एतत् क्रयिमसङ्घातः॥

सस्यवर्णानां शाल्यादीनाम् अर्घान्तरेण कोद्रवादीनां विनिमयः परिवर्तकः॥

सस्ययाचनम् अन्यतो जनपदादेः। [1]कतिपयैर्दिवसैः प्रदास्यामिति प्रामित्यकम्॥

प्रतिपदपञ्चिका

कोष्ठागाराध्यक्ष इति। स सीतदीन् दशपदार्थानुपलभेत, जानीयात्, तांश्चोद्दिश्य स्वयमेव व्याचष्टे सीतध्यक्षोपनीत इत्यादि, सीताध्यक्षेण राजकीयकृषिकर्माध्यक्षेणाधिकृतेन, उपनीतः कोष्ठागारं प्रवेशितः सस्यवर्णको व्रीह्याद्दिधान्यजातिः सीता, सा कोष्ठागाराध्यक्षेण शुद्धाऽभिनवा च पूर्णा च ग्राह्या पिण्डकरः क्लृप्तः। तद्यथा-अमुना ग्रामेणैतावद्धान्यादिकं प्रतिवर्षदेयमिति, षड्भागो राजभागः, षड्ग्रहणं प्रायिकत्वादन्येषामपि, यथादेशप्रसिद्धानां तृतीयचतुर्थादि भागानामुपलक्षणार्थम्।

केचित्तु-षड्भागमधिकदेयभागमाचक्षते तच्चासत्। या सीतायामेव तस्यान्तर्भावात् इत्यपरे। सेनाभक्तं सेनासमुद्योगकाले यथादेशप्रसिद्धं स्नेहतण्डुललवणादि-राजदेयबलिषड्भागादन्यो यथादेशप्रसिद्धो दशविंशतिबन्धादिकः करः प्रतिवर्षदेयः!

---

१. अत्रकियानपि ग्रन्थांशो लुप्तो भाति।

तदेव प्रतिदानार्थमापमित्यकम् । कुट्टकरोचकसक्तुशुक्तपिष्टकर्म तज्जीवनेषु तैलपीडनमौरभ्रचाक्रिकेष्विक्षूणां च क्षारकर्म सिंहनिका । नष्टप्रस्मृतादिरन्यजातः । विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः । तुलामानान्तरं हस्तपूरणमुत्करो व्याजी । पर्युषितं प्रार्जितं चोपस्थानमिति ॥

प्रतिपदपञ्चिका

भाद्रपदिक वासन्तिकाद्युपादानम् । उत्सङ्गो राज्ञः पुत्रजन्मादौ पौरजानपददत्तमिति केचित् । शालाकादिकमित्यपरे । पार्श्वमुचितकरादधिकग्रहणम् । कोशाभिसंहरणोक्तं प्रभुत्वादिच्छागम्यमिति केचित् । पारिहीणिकमकृष्टपच्यसस्यं चतुष्पदैर्विनाशितसस्यदण्डाधिगम्यमित्यपरे ।

औपायनिकं तदुपयोगिकौशलिकं कोष्ठेयकं राजस्थापिततटाकारामाद्युत्पन्नम् । अपरे तु कोष्ठेयं ग्रामोत्पन्नमाचक्षते । तदयुक्तम् । षड्भागग्रहणेन तस्य सिद्धत्वादेव दशविधं चैतद्राष्ट्रसंज्ञम् ।

ननु समाहर्तृसमुदप्रयस्थापनाध्याये राष्ट्रान्तर्गत एव बलिरभिहितः । तथा पार्श्वपारिहीणिकौपयनिकानि अन्यजातय एव विशेषे परिपठितानि । तेषां पुनरिह पाठस्तदुत्पादितानामपि कोष्ठागारप्रवेश्यत्वज्ञापनार्थम् । धान्यमूल्यं धान्यविक्रयहिरण्यं कोशनिर्हारः हिरण्येनधान्यक्रयः प्रयोगप्रत्यादानं वृद्धिप्रयुक्तधान्यप्रवेश इत्येवं त्रिविधं क्रयिमम् । सस्यवर्णानां सस्यजातीयानां अर्घान्तरेणार्घविशेषेण यथाशालिभिश्चतुर्गुणकोद्रवग्रहणमित्ययं विनिमयः । स एवम्प्रकार एव परिवर्तकः सस्ययाचनं धान्यप्रार्थनमन्यतो मित्रादेर्यांचितकं ।

श्रीमूला

आपमित्यकमाह—तदेवेति । अन्यतः सस्ययाचनमेव, प्रतिदानार्थं सवृद्धिकप्रत्यर्पणार्थम्, आपमित्यकं तत्संज्ञम् ।

कुट्टककर्मादिपञ्चकजीविभ्यस्तैलपीडनजीविभ्य इक्षुक्षारकर्मजीविभ्यश्च यदुपादीयते तत् सिंहनिकाख्यमित्याह—कुट्टकेत्यादि । कुट्टकादीनां पञ्चानां द्वन्द्वः । कर्मशब्दश्च तेषु प्रत्येकमभिसम्बध्यते । कुट्टककर्म अवघातः, रोचककर्म मुद्गमाषादिविदलनम्, सक्तुकर्म घरट्टादिना यवादिचूर्णीकरणम्, शुक्तकर्म इक्षुरसादिसन्धानम्, पिष्टकर्म गोधूमपेषणादि । कुट्टकादिकर्म, तज्जीवनेषु कुट्टकादिकर्मोपजीविषु विषये तत्कर्मोपजीवनार्थं तेभ्यः शुल्कं यद् गृह्यते तदित्यर्थः, तैलपीडनं तिलेभ्यो यन्त्रनिष्पीडितेभ्यस्तैलोत्पादनकर्म, औरभ्रचाक्रिकेषु औरभ्रेषु यज्ञियोरभ्रसंज्ञपनकर्मकरेषु तैलिषु विषये तदुपजीवनेष्वित्यनुवर्तनात् तैलपीडनकर्मोपजीवनार्थं तेभ्यो यद् गृह्यते तदित्यर्थः, इक्षूणां क्षारकर्म च फाणितगुडखण्डादिकर्म च तत्कर्मोपजीविभ्यो यदुपादीयते तच्चेत्यर्थः । संहनिकेति तु व्याख्यापाठः सुष्ठु ।

श्रीमूला

अन्यजातमाह—नष्टेत्यादि। नष्टप्रस्मृतादिः नष्टमपगतं प्रस्मृतं विस्मृतं चेति द्वयम्। आदिपदादायुक्तदण्डादिर्ग्राह्यः।

व्ययप्रत्यायमाह—विक्षेपेत्यादि। विक्षेपशेषं किञ्चित्कार्यसाधनाय प्रेषितस्य सैन्यस्यार्थे व्ययिताद् घनादवशिष्टं व्याधितशेषं भेषजशालाव्ययितावशिष्टम्, अन्तरारम्भशेषं दुर्गप्रासादादिपरिकर्मार्थे निर्गतस्य धनस्य लघुपरिव्ययकरणाच्छेषम्।

उपस्थानमाह—तुलेत्यादि। तुलामानान्तरं तुलामानभेदः तुलामानाभ्यामधिकाभ्यां गृहीत्वा हीनाभ्यां दानादुत्पन्नम्, हस्तपूरणं कराभ्यां प्रस्थादौ धान्यस्य यत्नप्रवेशनं प्रस्थाग्रे कराभ्यां धान्यधारणं वा, हस्तप्रपूरणमिति पाठे हस्तश्लथीकाराङ्गुलिविरलीकरणादिना व्रीह्यादिमेयधान्यानां पूगीफलादिगण्यपण्यानां च प्रच्यावनम्, उत्करः धान्यादिराशिः शालाकादिर्वा, गणनमानप्रदेशयोर्गण्यमेयवस्तुविक्षेपणं वा, व्याजी षोडशभागादि पुनर्मानन्यूनतापरिहारायाधिकतया गृह्यमाणम्, पर्युषितं गतवत्सरशेषम्, प्राजितं च पुष्पताम्बूलादिकं च स्वनैपुण्योत्पादितम्, उपस्थानं तदाख्यम्। इतिशब्द उद्दिष्टसीतादिपदार्थविवरणोपसंहारार्थः।

चाणक्यटीका

कुट्टकेति। कुट्टकानाम् अवघातकानाम् कर्म। रोचकानां शिलापट्टकादिपेषकाणां कर्म। तथा सक्तुशुक्तपिष्टकानां कर्म राजकीयम्। तज्जीवनेष्विति कुट्टकादिजीवनेषु कतिपयैर्दिवसैरध्यक्षेण कर्तुं दातव्यम्। तथा तैलार्थं तिलादिपीडनम् औद्रेषु चाक्रिकेषु च तैलकेषु। औद्रा हि पुटिकायन्त्रेण पीडयन्ति। चाक्रिकास्तु चतुर्षु पार्श्वेषु चाल्यमानेन चक्रेणेति। इक्षूणां च रसः। फाणितादि क्षारकर्म। तज्जीवनेषु का (र) यितव्यम्। एषा सिंहनिकेति प्रथिता।

नष्टप्रस्मृतादिरिति। यदुक्तम्—"नष्टप्रस्मृतम् आयुक्तदण्डः" इत्यादि राष्ट्रे, तदन्यजातमित्युच्यते॥

विक्षेपव्याधितान्तरालशेषं वेति। संवत्सरदत्तमुक्तेऽन्तराले कतिभिश्चिन्मासैः परिहृस्त्यादौ विक्षिप्ते यो लाभविशेषः, सः विक्षेपान्तरशेषः। ए (वं व्या) धिकाले उपयुक्तस्य शेषः। अथवा विक्षेपकाले यद् भक्तं दत्तं व्याधिप्रतीकाराय वा हिरण्यं तस्य अर्धेनावसिते प्रयोजने यदवशिष्टं तदुभयशेषम्। दुर्गस्यारम्भे वा हिरण्यादौ निष्क्रान्ते यदवशिष्टं तदारम्भशेषम्। द्वितीये तु प्रकारे अन्तराल (म ?) शेषा इति परकृतमेव दुर्गाद्यल्पेन संस्कृत्य अन्तरा यदवशिष्यत इति व्याख्येयम्। अयं व्ययप्रत्यायः॥

तुलामानान्तरमिति। अल्पया तुलया मानेन वा (च्यं ? दाय) विक्रीयमाणे यदतिरिच्यते। ग्रहणकाले मात्रा कौशलाद् यदधिकं हस्ताभ्यां पूर्यते। यश्चोत्करः शलाका शूर्पम्। याच व्याजी वक्ष्यमाणा षोडशभागो मानव्याजी। (सर्पिः इति) पूर्वसम्वत्सरभागशेषं पर्युषितम्। व्यवहार्यं यदार्जितं प्राजितम्। एतदुपस्थानम्॥

[धान्यादिवर्गाणां विवरणम्]

धान्यस्नेहक्षारलवणानां धान्यकल्पं सीताध्यक्षे वक्ष्यामः। सर्पिस्तैलवसामज्जानः स्नेहाः। फाणितगुडमत्स्यण्डिकाखण्डशर्कराः क्षारवर्गः। सैन्धवसामुद्रबिडयवक्षारसौवर्चलोद्भेदजाः लवणवर्गः। क्षौद्रं मार्द्वीकं च मधु।

प्रतिपदपञ्चिका

तदेवेति। अन्यतः सस्ययाचनमेव वैदेहकादेर्वृद्ध्यादिना प्रतिदानार्थमापमित्यकं भवति। कुट्टकादिभिः पञ्चभिः प्रत्येकं कर्मशब्दः। तत्र कुट्टककर्म तण्डुलम्। रोचककर्म मुद्गभाषादिदलनम् सक्तुकर्म यवक्षोदभर्जनकादिकम्, शुक्तकर्म इक्षुरसादिसन्धानम्, पिष्टकर्म गोधूमादिपेषणम् कुट्टादिकर्म तज्जीवनेषु कुट्टकादिकर्मोपजीवनेषु यदुपादेयं द्विविधं तैलपीडनम्, ओष्ठेषु दुर्दिसंज्ञां मनुष्ययज्ञकरेषु च क्रियासु च प्रसिद्धेषु, तथेक्षूणां च द्विप्रकारमेव क्षारकर्म फाणितगुडसङ्घादिक्रिया तज्जीवनेष्विति सर्वत्रानुवर्तते। तस्माद् गोष्ठागाराध्यक्षकर्तृकाणाम् एतेषां तत्तज्जीव्युपादोनस्य सिंहनिकेति संज्ञा, नष्टप्रस्मृतादिरिति, नष्टम् अनवगतम्, प्रस्मृतम्, विस्मृतं तदुभयमप्युपलभ्यते। नष्टप्रस्मृतमादिशब्दादायुक्तदण्डादयः परिगृह्यन्ते, सोयमन्यजातः।

व्ययप्रत्यायमाह-विक्षेपेत्यादि, शेषशब्दः प्रत्येकं निक्षेपशेषं प्रेषितदण्डोपयुक्तशेषश्चिकित्सोवयोगशेषम् अन्तरारम्भशेषं परिकर्मण्यभिप्रेतदर्थं निर्गतस्य लघुपरिव्ययकरणाच्छेपमित्ययं व्ययप्रत्यायः। तुलामानान्तरं तुलामानायामधिकाभ्यां ग्राहित्वा हीनाभ्यां दत्ते यदुत्पन्नं हस्तपूरणमिति पूगफलादिगण्यानां व्रीह्यादिमेयधान्यानां च गणने माने च हस्तश्लथान्तर उत्करः शालाकादिः, इत्येषां व्याजीः। पर्युषितमतीतसंवत्सरशेषं प्राजितं पुष्पताम्बूलादिदानेन नैपुण्योत्पादितम्, अपरेतु पर्युषितं प्राजितस्यैकमेव पठन्तोऽतीतसंवत्सरोत्पन्नमनुग्राहितमिदानीम् उदग्राहितमाचक्षते। तदुपस्थानमिति।

श्रीमूला

धान्येत्यादि। धान्यस्नेहक्षारलवणानामित्यधिकार आध्यायपरिसमाप्तेः।

तत्र धान्यकल्पः सीताध्याये वक्ष्यत इत्याह—धान्यकल्पमित्यादि। इयमनागतावेक्षणलक्षणा तन्त्रयुक्तिः। सर्पिरित्यादि। सर्पिस्तैलं वसा मज्जेत्येते चत्वारः स्नेहाः।

इक्षुविकारभेदाः फाणितादयः क्षारवर्ग इत्याह—फाणितेत्यादि। गुडखण्डशर्करयोर्मध्यमावस्था मत्स्यण्डिका।

सैन्धवादिषट्प्रकारं लवणवर्गमाह—सैन्धवेत्यादि। उद्भेदज ऊषरलवणमिति स्वामी।

क्षौद्रमिति। क्षौद्रं क्षुद्राभिः सञ्चितम्। मार्द्वीकं मृद्वीकानां रसः इति द्विविधं मधु।

इक्षुरसगुलमधुफाणितजाम्बवपनसानामन्यतमो मेपशृङ्गीपिप्पलीक्वाथाभिषुतो मासिकष्षाण्मासिकस्सांवत्सरिको वा चिङ्किटोर्वारुकेक्षुकाण्डाम्रफलामलकावसुतः शुद्धो वा शुक्तवर्गः। वृक्षाम्लकरमर्दाम्रविदलामलकमातुलुङ्गकोलबदरसौवीरकपरूपकादिः फलाम्लवर्गः। दधिधान्याम्लादिः द्रवाम्लवर्गः। पिप्पलीमरिचशृङ्गिबेराजाजीकिराततिक्तगौरसर्षपकुस्तुम्बुरुचोरकदमनकमरुवकशिग्रुकाण्डादिः कटुकवर्गः। शुष्कमत्स्यमांसकन्दमूलफलशाकादि च शाकवर्गः।

चाणक्यटीका

इदानीं वर्गभेदानाह—धान्यादीनां वर्गाः। उच्यन्त इति शेषः। धान्यकल्पं सीताध्यक्षे वक्ष्यामः। तद्भूवत्वात् सर्पिरादयः स्नेहाः स्वभेदभिन्नाः प्रपञ्चनीयाः। फाणितं कल्कः। मत्स्यण्डिका खण्डः। (उद्भेदजमादित्यभागम् ?)। क्षौद्रं माक्षिकम्। मार्द्वीकं मृद्वीकाविकारः।

प्रतिपदपञ्चिका

धान्यस्नेहक्षारलवणनामिति अधिकारः। एतेषां मध्ये धान्यकल्पं सीताध्यक्षे वक्ष्याम इति अनागतावेषणम्, तन्त्रयुक्तिरिति। सर्पिरादयश्चत्वारः स्नेहाः फाणितादि पंचविधः क्षारवर्गः। तत्र गुडखण्डशर्करादयोर्मध्यमावस्था, मत्स्यण्डिकाशेषं प्रतीतम्। सैन्धवादि षड्विधो लवणवर्गः। तत्र उद्भेदजमूषलवणम् शेषाणि प्रतीतानि। मधु द्विविधम्, क्षुद्राभिस्संचितं क्षौद्रम् मृद्वीकानां द्राक्षाणां रसो मार्द्वीकम्।

श्रीमूला

शुक्तवर्गमाह—इक्षुरसेत्यादि। इक्षुरसो, गुलः, मधु, फाणितं च प्रसिद्धं जाम्बवपनसौ जम्बूफलरसः पनसफलरसश्च, एषां षण्णाम्, अन्यतमः, मेषशृङ्गीपिप्पलीक्वाथाभिषुतः मेषविषाणाख्याया मागधाख्यायाश्चौषधेः कषायेण मिश्रः, मासिकः षाण्मासिकः सांवत्सरिको वा मासषण्मासादिकालपरिवासेन क्रमादधममध्यमोत्तमभेदं प्रतिपन्नः, चिङ्किटादिपञ्चकरसैर्व्यस्तैः समस्तैर्मिश्रितः, शुद्धो वा चिङ्किटाद्यमिश्रितो वा, शुक्तवर्गः आसववर्गः। चिङ्किटं वल्लीफलविशेषः, तदेव कटुकमुर्वारुकम्।

फलाम्लवर्गमाह—वृक्षाम्लेत्यादि। वृक्षाम्लं तिन्तिडीकम्, करमर्दः वंशपर्यायः, आम्रामलके प्रसिद्धे, विदलं दाडिमम्, मातुलुंङ्गं दाडिमभेदः, कोलं क्षुद्रबदरम्, बदरं स्थूलबदरम्, सौवीरकं स्वादुबदरम्, परूषकं मध्यदेशादिप्रसिद्धं मधुराम्लफलम्, आदिग्रहणं जम्बीराद्यर्थम्। यथोक्तप्रकारः फलाम्लवर्गः।

श्रीमूला

दधीत्यादि । दधि प्रसिद्धं, धान्याम्लं काञ्जिकम् । आदिपदात् तक्रादिग्रहणम् । इत्ययं द्रवाम्लवर्गः ।

पिप्पलीत्यादि । पिप्पल्यादित्रिकं प्रसिद्धम्, अजाजी जीरकः, किराततिक्तः भूनिम्बाख्य ओषधिविशेषः, गौरसर्षपः सिद्धार्थः, कुस्तुम्बुरु धान्याख्यम्, चोरकः शतपुष्पानुकारी गुच्छ इति स्वामी, दमनकं कान्ताख्यम्, मरुवकः पिण्डीतकः, शिग्रुकाण्डः शोभाञ्जनकाण्डः, आदिग्रहणं राजसर्षपाद्यर्थम् । इत्येवञ्जातीयः कटुकवर्गः ।

शुष्केत्यादि । शुष्कशब्दो मत्स्यमांसयोः प्रत्येकं सम्बध्यते । शुष्कमत्स्यः शुष्कमीनः, शुष्कमांसं वल्लूरम्, कन्दः सूरणादिः, मूलं शतमूलीप्रभृति, फलं वार्ताकादि, शाकं वास्तुकादि, आदिग्रहणान्माषविकारादिपरिग्रहः । इत्ययं शाकवर्गः ।

चाणक्यटीका

इक्षुरसादीनामन्यतम इति । अर्थाद् व्यस्तसमस्तानाम् । मेषशृङ्गीपिप्पलीमूलक्वाथेन अभिषुतः मासिकः (षाण्मासिकः) सांवत्सरिको वा यथोत्तरं प्रधानः । तत्र जाम्बवो जम्बूफलरसः । तथा पनसफलरसश्च । मेषशृङ्गी वृक्षविशेषः । (विपदा शोद्रुवहिस्वाग्रः ? चिद्भटा स्वादुरुर्वारुह्रस्वः) कर्कटिका[1] शुद्धो वेति विनापि (हृदादिभिः[2]) पूर्वोक्तेनैव विधिना यः क्रियते, शुद्धं [3]चुक्रमित्यर्थः ॥

(वल्लूरमाम्रमाम्लम्[4] ?) विदलं कोलं गुल्मजम्बीरं वृक्षजं सौवीरं फलविशेषः । आदिग्रहणान्मातुलुङ्गादीनां ग्रहणम् ॥

धान्याम्लं काञ्जिकम् । आदिग्रहणात् (भूविककुलाट ? सौवीरकुल्माष) शिम्बिक्यादीनां ग्रहणम् ॥

अजा (विकं ? जिः) चव्यं कृष्णं श्वेतं च रक्तसर्षपो राजिका । कुस्तुम्बुरुः धान्याकम् । शिग्रुः धान्यकाकारं मधुशिग्रुः । काण्डं शोभाञ्जनमूलम् ॥

शुष्ककन्दम् आर्द्रकादि । मूलं मूलकादि । फलं वार्ताकादि । पुष्पमगस्त्यादि । शाकं वा (लु ? स्तु) क्यादि[5] आदिग्रहणात् पत्रादिग्रहणम् । एतत्सर्वं जनपदात् सातत्येन साध्यमित्येतदनुमेयम् ॥

---

१. "उर्वारुः कर्कटी" इत्यमरं व्याचक्षाणः क्षीरस्वामी, "उर्वारुः, स्वादुर्चिद्भिटीमाहुः, ह्रस्वः कर्कः कर्कटी ।" इत्याह ।

२. "चिद्भटादिभिः इति पठनीयं भाति ।

३. चुक्रम् अम्लव्यञ्जनम् इति क्षीरस्वामी ।

४. वृक्षाम्लम्, आम्राम्लम् इति पाठ्यं स्यात् ।

५. "वातुस्कं शाकभेदाः स्युः" इत्यमरः ।

[स्नेहादिवर्गोपयोगव्यवस्थाः]

ततोऽर्धमापदर्थं जानपदानां स्थापयेत्, अर्धमुपयुञ्जीत। नवेन चानवं शोधयेत्।

प्रतिपदपञ्चिका

शुक्तवर्गमाह इक्षुरसेत्यादि। तत्रेक्षुरसगुडमधुफाणितानि प्रतीतानि। जम्बूपनसानां फलरसं मेषशृङ्गोपिप्पलीमूलं च प्रतीतम्। क्वाथाभिघातस्तेषां मिश्रितो क्वाथेन मासिकः। पाण्मासिकस्सांवत्सरिको वेतिकालभेदेन निकृष्टमध्यमोत्तमत्वं भवति। चिद्भिदं वल्लीफलं प्रतीतम्। उर्वारुकं तदेव कटुकं इक्षुकाण्डादीनि प्रतीतानि। तैरभिष्टुतो मिश्रितः शुद्धो वा चिद्भिटादिभिहित शुक्तवर्गं इति। इक्षुरसादीनां षण्णां चिद्भिटादीनां च पञ्चानां व्यस्तसमस्तानां प्रयोगवर्गग्रहणम्, फलाम्लवर्गमाह वृक्षाम्लो वृक्ष इति गोलटादोनां प्रतीतः। विदलं दाडिमम्, अम्लं चिञ्चाफलं करमर्दाम्लामलकमातुलुङ्गानि प्रतीतानि। कोलं क्षुद्रवदरं प्रतीतम्। सोवीरकम् उदक्षु स्वादुवदरम् परुषकमन्यदेशादिप्रतीतं मधुराम्लफलम्, आदिग्रहणात् नीपाम्लकादिप्रदर्शनार्थम्, इत्ययं फलाम्लवर्गः। दधि प्रतीतम्, धान्याम्लकांचिकमादिग्रहणमस्तुकतक्रादिपरिग्रहार्थमित्ययं द्रवाम्लवर्गः।

कटुवर्गमाह पिप्पलीत्यादि, पिप्पली मरीचिशृङ्गिबेराणि प्रतीतानि। अजाजीरकम् तिक्तकं चिकित्सकप्रसिद्धम् गौरसर्षपास्सिद्धार्थकाः। कुस्तुम्वुरुणि धान्यकम् चोरकः शतपुष्पानुकारी गुच्छः दमनकमरुवकौ मारप्रतीतौ। शिग्रुस्सोहंजनकः मधुशिग्रुस्तत्भेद एव मधुरः काण्डग्रहणं तन्मूलग्रहणार्थम् आदिग्रहणं राजसर्षपलोहीकाद्युपसङ्ग्रहार्थमित्ययं कटुकवर्गः।

शाकानाह—शुष्कं मत्स्येति, शुष्कशब्दः प्रत्येकम्। मत्स्यमांसानि प्रतीतानि। कन्दाः पिण्डालुकसूरणादयः, मूलान्यालुकश्शतावरी प्रभृतीनि। फलानि वार्ताककूष्माण्डादीनि, शाकानि वास्तुकजीरकादीनि। आदिग्रहणाद्सर्षपमाषविकादिपरिग्रहणार्थमित्ययं शाकवर्गः।

श्रीमूला

तत इति। ततोऽर्धं स्नेहादिवर्गेभ्यः पूर्वोक्तेभ्योऽर्धम्, जानपदानाम्, आपदर्थं दुर्भिक्षाद्यापत्समयोगार्थम्, स्थापयेत्। अर्धम्, उपयुञ्जीत राजमहानसाद्यर्थे विनियुञ्जीत। नवेन चानवं शोधयेत् नवं प्रक्षिप्य पुराणं कालाक्षमं निचितमुपयुञ्जीत।

चाणक्यटीका

ततोऽर्धमिति। ततो नवस्नेहादिनिचयादर्धम्। आपदर्थमिति आपन्निवृत्त्यर्थम्, यथा मशकार्थो धूम इति। जानपदानामिति अस्त्यसाववस्था यत्र जानपदा अपि राज्ञा भर्त्तव्याः। अर्धं यथायोगमुपयुञ्जीत। उपयुञ्जानश्चानवनीयं नवप्रक्षेपेण पूरयेत्॥

[द्रव्याणां क्षोदघर्षणादिसंस्कारसमये वृद्धि-क्षयार्हभागानामियत्तानिर्देशः]

क्षुण्णघृष्टपिष्टभृष्टानामार्द्रशुष्कसिद्धानां च धान्यानां वृद्धिक्षयप्रमाणानि प्रत्यक्षीकुर्वीत । कोद्रवव्रीहीणामर्धं सारः । शालीनामष्टभागोनः । त्रिभागोनो वरकाणाम् । प्रियङ्गूणामर्धं सारः नवभागवृद्धिश्च । उदारकस्तुल्यः । यवा गोधूमाश्च क्षुण्णाः । तिला यवा मुद्गमाषाश्च घृष्टाः । पञ्चभागवृद्धिर्गोधूमः सक्तवश्च । पादोना कलायचमसी । मुद्गमाषाणामर्धपादोनः ।

प्रतिपदपञ्चिका

ततोऽर्धं पूर्वोक्तस्नेहादिनिचयवर्गादिर्धमापदर्थदुर्भिक्षाद्युपयोगाय क्षेत्रं हारजानपदनामार्थे स्थापयेत् । अर्धमुपयुञ्जीत राज्ञो महानसादिव्ययेपूपयोजयेत् ।

निचितस्य कालासहिष्णोः प्रतीकारमाह-नवेन चानवं विशोधयेदिति । नवं

श्रीमूला

धान्यानां क्षोदघर्षणाद्यवस्थासु सप्तसु वृद्धिक्षयाववश्यम्भाविनौ तत्तत्कर्मकरेभ्योऽनुमन्तव्यौ । अतस्तयोरियत्तानिश्चयं सकृत्प्रत्यक्षीकरणेन कोष्ठागाराध्यक्षोऽधिगच्छेदित्याह—क्षुण्णेत्यादि । क्षुण्णं सकृदवहतम्, घृष्टं फलीकृतम्, पिष्टं श्लक्ष्णचूर्णितम्, भृष्टं भ्राष्ट्रपक्वम्, आर्द्रं तिमितम्, शुष्कं कृतशोपणम्, सिद्धं राद्धम् । सोऽयं धान्यानां सारमात्राया अल्पत्वानल्पत्वतारतम्ये क्षयवृद्धीयत्तापरिज्ञानार्थो विशेषविधिरुक्तः ।

सामान्यतस्तु तदियत्ताविषयं विधिमुपदेष्टुमाह—कोद्रवेत्यादि । कोद्रवव्रीहीणामर्धं सारः कोद्रवाणां व्रीहीणां च तत्प्रस्थद्वयस्यैकस्तण्डुलप्रस्थः सारः फलति, शेषस्तु क्षय इत्यर्थः । शालीनां कलमाख्यव्रीहिभेदानाम्, अष्टभागोनः प्रकृत्यष्टमांशन्यूनः, अर्धं सार इति वर्तते । तेन शालीनां प्रस्थाष्टकस्य प्रस्थत्रयं सारो भवति । वरकाणां धान्यभेदानाम्, त्रिभागोनः प्रस्थत्रये प्रस्थद्वयं सारो भवति । प्रियङ्गूणां कङ्गूनाम्, अर्धं सारः नवभागवृद्धिश्च अष्टसु प्रस्थेषु प्रस्थपञ्चकं तण्डुलानां भवति । उदारकः तृणकोलकः, तुल्यः प्रियङ्गुतुल्यसारः अनवहतावस्थाप्रमाणतुल्यसारो वा भवति । तत्राद्यः शुष्कावघाते, सजलावघाते पर इति विवेकः । यवाः, गोधूमाश्च, क्षुण्णाः सजलावहताः, तुल्याः अनवहतावस्थाप्रमाण तुल्यसाराः ।

क्षुण्णानुक्त्वा घृष्टानाह—तिला इत्यादि । घृष्टाः दलिताः, तिलाः, यवाः मुद्गमाषाश्च, तुल्या इति वर्तते, अघृष्टावस्थातुल्यप्रमाणाः । गोधूमः, पञ्चभागवृद्धिः पञ्चभागेन वर्धते । सक्तवश्च भृष्टयवजाः, पञ्चभागवृद्धयः । कलायचमसी कलायश्चणभेदः तस्य चमसी श्लक्ष्णचूर्णम्, पादोना कलायप्रस्थचतुष्टयस्य तच्चूर्णं प्रस्थत्रयप्रमाणं भवति । मुद्गमाषाणाम् मुद्गानां माषाणां च चमसी, अर्धपादोनाष्टभागेन ऊना भवति ।

चाणक्यटीका

पू (रणं ? रितं) वा विनश्यदुपयुज्य नवप्रक्षेपाच्छुद्धमिति प्रकृत्य वृद्धिक्षय-निरूपणार्थमाह—क्षुण्णा यवगोधूमाः, घृष्टाः तिलमुद्गादयः, पिष्टाः सक्त्वादयः, तेषाम्। आर्द्रशुष्कादीनां च धान्यादीनां वृद्धिप्रमाणं क्षयप्रमाणं च प्रत्यक्षं कुर्वीत। अनपहारार्थम् अभुक्तपरिज्ञानार्थं चेति दिङ्मात्रं ब्रूमः ॥

कोद्रवव्रीहीणां क्षुण्णानाम् अर्धं सारः प्रस्थद्वये तण्डुलप्रस्थः। अष्टभागोन इति प्रस्थद्वये प्रस्थाष्टभाग इति। त्रिभागोनो वराकाणां क्षुण्णानाम्। तेन षण्णां (चो ? व) रकप्रस्थानामर्धं त्रयः। त्रिभागोनत्वाद् द्वौ भवतः। नवभागवृद्धिश्चेति कङ्गूनां नवभिः प्रस्थैः पञ्चप्रस्था इत्यर्थः। [1]उदारवृद्धिकस्तुल्यः कङ्गुभिर्नवभागवृद्ध्या। यवा गोधूमाश्च क्षुण्णाः। योगविभागाद् अर्धसारत्वं नवभागवृद्धिश्च ॥

तिलयवमुद्गाश्च घृष्टाः पञ्चभागवृद्धिः एते घृष्टाः। तेषामर्धं सारः पञ्चभाग-वृद्धिश्च। तत्र तिलानां घर्षणं तुषैः शोधनम् यवमुद्गानां तुषैर्घूर्णनम्। गोधूमाः सक्तवश्चेति। एतेषामर्धं पञ्चभागवृद्धिश्च। पादोनेति। चतुर्णां कलायप्रस्थानां चमसी[2] विदलं[3]। प्रस्थत्रयम्। मुद्गमाषाणां चमसी अध्यर्धपादोना अष्टासु प्रस्थेषु पञ्चप्रस्थाः।

प्रतिपदपञ्चिका

प्रक्षिप्य पुराणस्योपयोगं कुर्यात्। किञ्च क्षुण्णादिसप्तावस्थाभेदानां धान्यानां कियती वृद्धिः कियद् वा क्षय इत्येवमेतत्। कोष्ठागाराध्यक्षः प्रत्यक्षं कुर्वीत। ततोऽन्वयव्यति-रेकाभ्यां अनुमतिः। तत्र क्षुण्णं सकृदवपतं घृष्टं फलीकृतं पिष्टंश्लक्ष्णं चूर्णीकृतम्। भृष्टं कपालपक्षम् आर्द्रं तिमितं सक्तुपिष्टादिकं सिद्धं राद्धं च समर्चये वृद्धिरुपचयः, क्षयो हानिः। प्रमाणमियत्ता एवं वृद्धिक्षयप्रमाणानि स्वयं सकृत् प्रत्यक्षीकृत्य तदनुरुपाणि तत्कर्तृभिः कर्माणि कारयेदिति।

यद्येवं [4]कोद्रवव्रीहीणाम् अर्धं सारः इत्यादि वचनमनर्थकं प्रत्याक्षादेव तस्य गतत्वात्। तत् कियते यथास्थितस्वभाववेदनाय ततोऽन्यथा हितान्यथाभावे हरण-प्रयोगाज्जानीयात् इति ज्ञापनार्थम्।

तदाह—कोद्रवव्रीहीणामर्धं सार इति। तत्पक्षद्वयेन तण्डुलप्रस्थः सर्व-जनसामान्योऽयं विधिः, राजपुत्री(त्रा)णां मुत्तरत्र वक्ष्यमाणत्वात्। शालीनां कलमानां अष्टभागोनः अर्धं सार इति वर्तते। अष्टभागश्च प्रकृतेरेव ग्राह्यः, ततःशालीनां अष्टसु

---

१. 'उदारस्तुल्यवृद्धिकः' इतिः पाठः स्यात्। "उदारः काककङ्गीस्यात्" इति केशव-स्वामी।

२. "स्त्रियां तु चमसी भित्ते मुद्गादीनाम्" इति केशवस्वामी। श्लक्ष्णचूर्णमिति भट्टस्वामी।

३. "विदलं द्विधाकृतं कलायादिकम्" इति अमरव्याख्याने सर्वानन्दः। ३.५.३२

४. कोद्रव व्रीह्यादीनाम्—पा०

शैम्बानामर्धं सारः। त्रिभागोनः मसूराणाम्। पिष्टमामं कुल्माषाश्चाध्यर्धगुणः। द्विगुणो यावकः। पुलाकः पिष्टं च सिद्धम्। कोद्रववरकोदारकप्रियङ्गूणां त्रिगुणमन्नं, चतुर्गुणं व्रीहीणाम्, पञ्चगुणं शालीनाम्। तिमितम् अपरान्नं द्विगुणमर्धाधिकं विरूढानाम्। पञ्चभागवृद्धिः भृष्टानाम्। कलायो द्विगुणः, लाजा भरुजाश्च। षट्कं तैलमतसीनाम्। निम्बकुशाम्रकपित्थादीनां पञ्चभागः। चतुर्भागिकास्तिलकुसुम्भमधूकेङ्गुदीस्नेहाः। कार्पासक्षौमाणां पञ्चपले पलसूत्रम्।

प्रतिपदपञ्चिका

कुटुम्बेषु, कुटुम्बत्रयं तण्डुलानां त्रिभागोना, वरकाणां वरत्राणां कुटुम्बत्रये कुटुम्बद्वयं तण्डुलानामिति केचित्।

अपरे तु वरकाणां वरपट्टानां त्रिभागोनः प्रकृतितृतीयांशन्यनः ततश्च षट्सवरकप्रस्थेषु प्रस्थत्रयमर्धेन भवति। ततः प्रकृतितृतीयांशप्रस्थद्वयाचमातीसारः प्रस्थो भवति। प्रियङ्गूणां अर्धं सार इति। अर्धग्रहणेऽनुवर्तमाने पुनरर्धग्रहणं विस्पष्टार्थम्। नवभागवृद्धिश्चेति, अष्टसु प्रस्थेषु पञ्चप्रस्थं तण्डुलानामिति उदाकरस्तुल्य इति, उदारको यवनाविकाविशेषः। स शुष्कोपहतः प्रियङ्गुतुल्यसारः क्षुण्णस्तु सजलात्वचहतः प्रागवस्थाप्रमाणतुल्यसारः। न किञ्चिद्धीयते। यवा गोधूमाश्च क्षुण्णाः सजलावहताः प्रागवस्थाप्रमाणतुल्याः चकारादुदाहरकश्च क्षुण्णा इति। तथा तिला यवा मुद्गमाषाश्च घृष्टादलितास्तुल्या इति वर्तते। पञ्चभागवृद्धिगोधूम इति गोधूमः पञ्चभागेन वर्धते। सक्तवश्च पञ्चभागवृद्धयो धानाभ्यः पादोना कलाय चक्रसीति। कलायप्रस्थोनतश्लक्ष्णचूर्णस्य कुटुम्बत्रयमुद्गमाषाणाम् अर्धपादोना अष्टभागोना

श्रीमूला

शैम्बानां कुलत्थादिकोशीधान्यानाम्, अर्धं, सारः वितुषांशो भवति। मसूराणां चणविशेषाणाम्, त्रिभागोनः सारः प्रस्थत्रयदलने प्रस्थद्वयं सारो भवति।

पिष्टमाह—पिष्टमिति। आमं पिष्टम्, अपक्वं गोधूमादि, कुल्माषश्च मुद्गमाषादिश्च, अध्यर्धगुणः कुडुवचतुष्टये कुडुवषट्कं भवति। यावकः वितुषीकृतो यवः, द्विगुणः चूर्णीकृतो द्वैगुण्यं प्राप्नोति। पुलाकः अर्धसिद्धस्तण्डुलः, पिष्टं च गोधूमादितण्डुलचूर्णं च, सिद्धं राद्धं सत्, द्विगुणं भवति।

सिद्धमाह—कोद्रववरकेत्यादि। कोद्रवादिचतुष्टयान्नं तत्तत्तण्डुलात् त्रिगुणम्, व्रीह्यन्नं चतुर्गुणम्, शाल्यन्नं पञ्चगुणं च वर्धते इत्यर्थः। अष्टगुणं शालीनामिति भापाटीकायां पाठो भाति। तिमितमिति। तिमितं लवनाद्यवसरे केदारादावार्द्रीकृत-

श्रीमूला

व्रीह्याद्यन्नम्, अपरान्नम् अपरिणतव्रीह्याद्यन्नं च, द्विगुणं भवति। विरूढानाम् अङ्कुरितानां व्रीह्यादीनाम् अर्धादन्नम् अर्धाधिकम् अर्धाधिकद्विगुणं भवति। अपरा व्याख्या—तिमितम् आर्द्रीकृतम्, अपरान्नं फलाढकीचणकादि, द्विगुणं भवति। चणकादीनामेव विरूढानाम् अङ्कुरितानाम्, अर्धाधिकम् अर्धमधिकमार्द्रीकृताद् भवति इति।

भृष्टमाह—पञ्चभागेत्यादि। भृष्टानां कृतभर्जनानां तेषामेवाऽवरान्नानां, पञ्चभागवृद्धिः प्रस्थपञ्चकं भृष्टं प्रस्थषट्कं भवति। कलायश्चणभेदो भृष्टः द्विगुणः। लाजाः व्रीह्यादयो, भरुजा यवाश्च, भृष्टाः द्विगुणाः।

तैलमाह—षट्कं तैलमतसीनामिति। षट्सु अतसीवीजप्रस्थेषु एकस्तैलप्रस्थो भवति। निम्बकुशाम्रकपित्थादीनां पञ्चभागः निम्बवीजादीनां प्रस्थपञ्चके एकप्रस्थः स्नेहो भवति। आदिग्रहणमेरण्डादिपरिग्रहार्थम्। तिलकुसुम्भमधूकेङ्गुदीस्नेहाः चतुर्भागिकाः तिलकुसुम्भवीजादीनां प्रस्थचतुष्टये एकः स्नेहप्रस्थो भवति।

सूत्रमाह—कार्पासेत्यादि। क्षौमो वल्कविशेषः। कार्पासपलपञ्चकस्य क्षौमपल-पञ्चकस्य च एकपलं सूत्रं भवति।

चाणक्यटीका

शैब्यानामर्धं सारः। शेषाणां निष्पावादीनां द्विधाकृतानामर्धं सारः। त्रिभागोनो मसूराणाम्। अर्धं सार इति वर्तते॥

(अष्ट ? पिष्टा) मांशाः (सा) मान्येन व्रीहीणाम् अपक्वस्या (अमेयया ? आमा ये) कुल्माषाश्च (अध्यर्ध) गुणाः अध्यर्धहीनाः प्रस्थेनाध्यर्धं इत्यर्थः। यावकः पुलाक इति। स्विन्नः पुलाक उच्यते। यावक इत्यन्यस्मिन् स्विन्नव्रीहिनिवृत्त्यर्थम्। स्विन्नो यवो द्विगुणो भवतीत्यर्थः। पिष्टं च यवस्य द्विगुणं सिद्धम्॥

कोद्रवादीनां त्रिगुणमन्नं बोद्धव्यम्। चतुर्गुणं व्रीहीणां सामान्येन। पञ्चगुणं शालीनाम् अन्नमित्येव। तिमितम् आर्द्रीकृतम्। अपरान्नं मुद्गादि अपरकालोत्पन्नत्वात् द्विगुणम् अध्यर्धिकं विरूढकं[1] प्रादुर्भूताङ्कुरम्। प्रस्थद्वयेन पञ्चमप्रस्थाः॥

पञ्चभागवृद्धिर्भृष्टानाम् अपरान्नानामित्येव। कलायो द्विगुणो भृष्ट इत्येव। भरुजका[2] लाजविशेषाः एकान्तविदितावयवा यवगोधूमानां धाना इत्येव॥

षड्गुण इति। षण्मूलं दीयते यस्याम् अतस्यां तत् षड्गुणं तैलं षण्णामाढका-

---

१. विरूढकं तालास्थिमज्जेति गौडाः, वयन्तु क्षेत्रोद्धृतस्य फलमूलादेः स्वेदस्रवान्न-नोद्भिन्नानङ्कुरान् विरुढाख्यान् बुध्यामहे" इत्यमरव्याख्याने। २.४.१३६। क्षीरस्वामी।

२. 'भरुजस्तु.......भक्षभेदे स्नेहभृष्टतण्डुले' इति केशवस्वामी। 'भरुजा भृष्टयवाः' इति आपस्तम्ब धर्मोज्ज्वलायां हरदत्तः।

[कक्ष्यानुगुण्येन तत्तदभ्यवहार्याः तण्डुलादिभेदाः]

पञ्चद्रोणे शालीनां च द्वादशाढकं तण्डुलानां कलभभोजनम्, एकादशकं व्यालानाम्, दशकम् औपवाह्यानां, नवकं सान्नाह्यानाम्, अष्टकं पत्तीनाम्, सप्तकं मुख्यानाम्, षट्कं देवीकुमाराणाम्, पञ्चकं राज्ञाम्। अखण्डपरिशुद्धानां वा तण्डुलानां प्रस्थः। चतुर्भागस्सूपः, सूपषोडशो लवणस्यांशः, चतुर्भागस्सर्पिषस्तैलस्य वा, एकं आर्यभक्तम्। प्रस्थषड्भागस्सूपः अर्धस्नेहमवराणाम्, पादोनं स्त्रीणाम्। अर्धं बालानाम् ॥

चाणक्यटीका

नाम्। आढकं तैलम्। चतुर्भागिका इति चत्वारो भागा मूलं येषां ते चतुर्भागिकाः। चतुर्थस्नेहा इत्यर्थः। चतुर्ष्वाढकेषु आढकं तैलस्य। निम्बादीनां पञ्चभागा मूलं यस्येत्यर्थः। आदिग्रहणाद् एरण्डाद्युपग्रहः ॥

पञ्चपले पलमिति सूत्रस्य ॥

प्रतिपदपञ्चिका

चमसीशैम्ब्यानां वल्कलस्थकादिकोशिधान्यानामर्धं सारस्तुषरहितो भवति। त्रिभागोनमसुराणां कुटुम्बत्रये दलितेन तुषीकृतसारस्य कुटुम्बद्वयं भवति। पिष्टभावं गोधूमादिकुटुम्बद्वयस्य पिष्टस्य कुटुम्बत्रयं भवति। गुल्माश्च मुद्गमाषादेरर्धम् अर्धं(दि)धिकगुणः। प्रस्थे षट्कुटुम्ब इति, द्विगुणो यावको यवौदनम् पुलकोर्धसिद्धास्तण्डुलाः पिष्टं च गोधूमादितण्डुलचूर्णं सिद्धम्। द्विगुणमेव कोद्रवाद्यन्नम्। त्रिगुणमिति, सुबोधमिति। तिमितमार्द्रीकृतम्। अपरान्नं फलाढकी, चणकादि गुणं भवति। तेषामेव विरूढानाम् अङ्कुरितानामर्धम् अधिकमार्द्रीकृतात् भवति। पञ्चभागवृद्धिस्तेषामेव अपरान्नानां भृष्टानां पञ्चभागो वर्धते।

कलायस्तु भृष्टो द्विगुणो भवति। लाजा व्रीह्यादयो, भरुजा यवाश्च भृष्टा द्विगुणा एव भवन्ति।

तैलमाह-षट्कं तैलमतसीनामिति, षट्स्वतसीकुटुम्बेष्वेकस्तैलकुटुम्ब इति; शेषं सुबोधम्। निम्बकुशाम्रकपित्थादयः पञ्चभागिका एव, आदिग्रहणात् एरण्डहिंतकादयः पाहगृह्यन्ते। सर्षपाणां प्राधान्यात् पृथक् पाठः।

सूत्रमाह-कार्पासक्षौमाणामिति, क्षौमः वल्कविशेषः, पञ्चपले सूत्रपलं भवति, सूत्रप्रमाणं प्रत्यक्षतोऽवगन्तव्यमिति।

श्रीमूला

अथ भक्तोपयोगाय तण्डुलादीनां व्यवस्थाविशेषानाह—पञ्चद्रोण इत्यादि। शालीनां विंशत्याढकात्मके पञ्चद्रोणे तण्डुलानां द्वादशाढकं यथा निष्पद्येत, तथावहन-

श्रीमूला

ननिष्पादितास्तत्तण्डुलाः, कलभभोजनं कलभानां बालगजानां भोजनार्थे विनियोज्याः। व्यालानाम् दुष्टगजानाम्, एकादशकं शाल्याढकविंशतावेकादशाढकक्रमेण निष्पन्नास्तण्डुलाः, भोजनार्थे विनियोज्या इत्यार्थम्। एवमुत्तरेष्वपि। औपवाह्यानां राजवाह्यानाम्, दशकं दशाढकं विंशतैर्दशाढकक्रमेण साधितास्तण्डुलाः, विनियोज्याः। सान्नाह्यानां समरोचितानाम्, नवकं नवाढकं विंशतौ नवाढकक्रमनिष्पन्नास्तण्डुलाः। पत्तीनां पदातीनाम्, अष्टकम् अष्टाढकम् अष्टाढकक्रमनिष्पन्नास्तण्डुलाः। मुख्यानां भटप्रधानानाम्, सप्तकं सप्ताढकं सप्ताढकक्रमनिष्पन्नास्तण्डुलाः। देवीकुमाराणां राजपत्नीनां राजपुत्राणां च, षट्कं षडाढकं षडाढकक्रमनिष्पन्नास्तण्डुलाः। सेयं पूर्वाभ्यः प्रतिपत्तिभ्य उत्तमा प्रतिपत्तिः। राज्ञां पुनरितोऽप्युत्तमामाह—राज्ञामिति। राज्ञाम्, पञ्चकं पञ्चाढकं शालिविंशत्याढके पञ्चाढकक्रमनिष्पन्नास्तण्डुलाः भोजनार्थे विनियोज्याः। तदेवमष्टौ वर्णिकास्तण्डुलानां भक्तोपयोगिन्य उक्ताः। राजभोजने पक्षान्तरमाह—अखण्डेत्यादि। वाशब्दः पक्षान्तरे। अखण्डपरिशुद्धानाम् अक्षतावयवानां फलीकरणविवेचनसंशोधितानां च, तण्डुलानाम्, प्रस्थः आढकचतुर्भागः शाल्यशीतिप्रस्थादवहननादिसंस्कृताद् यथोक्तगुणैकतण्डुलप्रस्थग्रहणक्रमेण सम्पन्नस्तण्डुल इत्यर्थः।

चतुर्भाग इति। सूपः चतुर्भागः प्रस्थस्य प्रकृतत्वात् तच्चतुर्थांशः। सूपषोडशः सूपस्य षोडशांशप्रमाणः, लवणस्यांशः। सर्पिषःस्तैलस्य वा, चतुर्भागः सूपचतुर्थभागः। एकमार्यभक्तमिति। तदिदमेकं मध्यमप्रतिपत्तिकस्य पुरुषस्य भोजनं भवति। अवरभोजनमाह—प्रस्थेत्यादि। अवराणां निकृष्टानाम्, प्रस्थषड्भागः सूपः। अर्धस्नेहं अर्धं सूपार्धभागः स्नेहस्तैलादिः यस्य तत्। लवणं तु समानमेव। भोजनस्यान्यपदार्थतामभिप्रेत्य नपुंसकनिर्देशः। पादोनं स्त्रीणामिति। पादन्यूनमार्यपुरुषभक्तमार्यस्त्रीणाम्, अवरपुरुषभक्तमवरस्त्रीणां च यथायथं बोध्यम्। अर्धं बालानामिति। पूर्ववद् यथायथमार्यबालानामवरबालानां च।

चाणक्यटीका

पञ्चद्रोण इत्यादिना भक्तमाह—पञ्चद्रोणे (राशी ? शाली) नां क्षुण्णे यद् द्वादशा (नां षण्णां ? ढकं) तण्डुलानां (सार्धकुपाणा ?) त्रिद्रोणमित्यर्थः। तद् द्वितीयदशास्थानम्। कलभो दशवर्षादारभ्य आविंशतिवर्षादिति। एकादशमिति। एकादशं पूर्वस्मात् किञ्चिच्छुद्धम्। व्याला दुष्टाः। औपवाह्याः सान्नाह्याश्च हस्त्यध्यक्षे वक्ष्यमाणाः॥

पत्तयः पदातयः मुख्याः पत्तिमुख्याः। (कार्वतिकादयः ?) राज्ञामिति बहुवचनाद् राजसदृशानां युवराजदण्डोपनतादीनां ग्रहणम्। पञ्चद्रोण इति सर्वत्र वर्त्तते। अथवा अयं स्वामिनो विशेषः॥

खण्डपरिशुद्धानामिति। एकावचितानां प्रस्थ इत्यर्थः। चतुष्कर्षः पलम्, चतुष्पलं

[मांससंस्कारे संयोजनीयस्नेहादिव्यवस्था:]

मांसपलविंशत्या स्नेहार्धकुडुबः, पलिको लवणस्यांशः, क्षारपलयोगः, द्विधरणिकः कटुकयोगः, दध्नश्चार्धप्रस्थः। तेनोत्तरं व्याख्यातम्। शाकानामध्यर्धगुणः, शुष्काणां द्विगुणः स चैव योगः॥

चाणक्यटीका

कुडुव इति चतुर्भागः। सर्पिषः (स्तुवरा ? सूपा) पेक्षयैव ज्ञेयम्। एकम् आर्यस्य पुंसो भक्तम्। द्वितयमनया दिशा कल्प्यम्। अवराणामिति। दासकर्मकराणां कुडुवास्तावन्त एव सूपस्नेहयोस्त्वपकर्षः। पादोनं स्त्रीणाम् आर्याणाम् अनार्याणां च सूपस्नेहम्। एवम् आर्याणाम् आर्यसूपस्नेहपादोनमित्यर्थः। अर्धं बालानां भक्तम्। सूपस्नेहं वराणामवराणां च पूर्ववत्॥

प्रतिपदपञ्चिका

साम्प्रतं यथार्हभक्तोपयोगाय चतस्रो हस्तिनां चतस्रो मनुष्याणामेवमष्टौ भागा यदा क्षीयन्ते द्वादश विशिष्यन्ते तादृशास्तण्डुलाः, कलभानां बालहस्तिनां भोजनार्थाः। एवं सप्तानां व्याला(णा)दीनाम् एकैकावघट्टनक्रमेण एकादशकादीनि वर्णिकान्तराणि भवन्ति। व्यालः आरोहघातकः। औपवाह्यःयानकोपयोगिनाम् सान्नाह्यः युद्धयोग्यः।

अष्टकं पत्तीनामिति। पत्तयः पदातयो हि न हिप्रतिपत्तकाः देवाकुमारा राजपत्न्यः राजपुत्राश्च उत्तमप्रतिपत्तिकाः। राज्ञस्तु स्वयमुत्तमोत्तमप्रतिपत्तिकस्य पञ्चसु द्रोणेषु पञ्चाढकनिष्पत्तेश्चतुर्भागग्रहणम्। कुण्डपरिशुद्धानां वेति। पक्षान्तरमवघातपरावफलीकरणविवेचनपरिशुद्धानां तण्डुलानां वा प्रस्थः। चतुः प्रसृतिर्मगधप्रसिद्धः। तच्चतुर्भागः सूपः प्रसृतिप्रमाणः, सूपस्य षोडशभागिकं लवणम्, चतुर्भागः सर्पिषस्तैलस्य वा सूपस्यैव। एवमेतदेकमार्यभक्तं मध्यमप्रतिपत्तिकसाधुपुरुषभोजनम्। अवराणां निकृष्टानां तु प्रस्थः षड्भागः सूपः सूपार्धभागः स्नेहः तैलादिलवणं तुल्यम्।

पादोनं स्त्रीणामिति । सूर्यं(पादोन)भक्तमार्यस्त्रीणांमपरभक्तमपरस्त्रीणां च यथास्वं पादोनम् अर्धं बालानामिति। आर्यबालानामपरबालानां च स्वमर्धं द्रष्टव्यम्।

श्रीमूला

मांससंस्कारे योजनीयानां स्नेहादीनां परिमाणव्यवस्थामाह—मांसपलेत्यादि। मांसपलविंशत्या सह, स्नेहार्धकुडुबः स्नेहस्य अर्धकुडुबः प्रस्थाष्टभागः, योज्यः। लवणस्यांश, पलिकः पलमितः। क्षारपलयोगः क्षारस्य सुवर्चिकायवक्षारादेः पलयोगः लवणाभावे। कटुकयोगः कटुकानां पिप्पलीमरिचशृङ्गबेराणां योगः, द्विधरणिकः धरणद्वयमानः। धरणप्रमाणं तु 'अष्टाशीतिगौरसर्षपा रूप्यमाषकः, ते षोडश धरणमि'ति पौतवाध्यक्षे वक्ष्यते। दध्नश्च, अर्धप्रस्थः प्रस्थस्यार्धं कुडुबद्वयं भवति।

[हस्त्याद्याहारपरिमाणव्यवस्थाः]

हस्त्यश्वयोस्तदध्यक्षे विधाप्रमाणं वक्ष्यामः। बलीवर्दानां माषद्रोणं यवानां वा पुलाकः, शेषमश्वविधानम् । विशेषो घाणपिण्याकतुला

———— —

श्रीमूला

तेनेति । तेन उक्तयोगमानेन, उत्तरम् अधिकम् मांसपलत्रिंशच्चत्वारिंशदादीनां स्नेहादियोगमानमर्धगुणद्वैगुण्यादिरूपम्, व्याख्यातं विवृतप्रायम् उन्नेतुं शक्यमित्यर्थः । शाकानां वास्तुकादीनां, स चैव मांसोक्त एव, अध्यर्धगुणः सार्धगुणो, योगः । यथा—शाकपलविंशत्या पादानकुडुवः स्नेहः अध्यर्धपलिकं लवणम् अध्यर्धपलिकं क्षारमित्यादि । शुष्काणां मांसानां शाकानां च, द्विगुणः स्नेहः मांसविषये कुडुवपरिमाणः शाकविषयेऽध्यर्धकुडुवपरिमाण इत्यादिः ।

चाणक्यटीका

मांसपलविंशत्या इति । पले मांसे स्नेहस्य अर्धकुडुवः पाकार्थः । पलिकमिति । पलं परिमाणं यस्य लवणस्य । क्षारपलयोगः क्षारस्य गुडादेः पलिको योगः, यदा गान्धिकः क्रियते । द्विधरणिक इति द्विधरणात् कटुयोगः पिप्पल्यादिभिः । दध्नश्चार्ध (प्र) स्थः ओदनादर्धम् ॥

तेनोत्तरमिति तेनोक्तेन मांसवृद्ध्यनुरूपा स्नेहादिवृद्धिर्व्याख्याता । तद्यथा—मांसचत्वारिंशत्पले द्विगुणः स्नेहादियोगः । त्रिगुणे त्रिगुणो (ह्रासे) ह्रास इति । शाकानामध्यर्धगुण इति । शाकपलविंशत्या स्नेहपलम् । शुष्काणां तु स्नेहकुडुव इत्यादि । (संयोगकल्के ? स चैव योगः उक्ते) नोत्तरं व्याख्यातमिति ॥

प्रतिपदपञ्चिका

सम्प्रति मांससंस्कारस्नेहादीनां मात्रानियममाह-मांसपलविंशत्या स्नेहार्धकुटुम्बश्चत्वारि पलानि, लवणस्य पलम् । लवण(ा)भावे सुवर्चिका यवक्षारादेः पलमेव द्विधरणिक इति । धरणद्वयं कन्दूनां पिप्पलीमरीचशृङ्गिवेराणां । धरणप्रमाणं वक्ष्यति, "अष्टाशीतिसर्षपः रूप्यमाषकस्ते षोडश धरण"मिति । दध्नश्चात्रार्धप्रस्थः षोडश पलानीत्येयं विंशतिमांसपलानामयं योगः । तेनेति, यथोक्तयोगेन उत्तर त्रिंशच्चत्वारिंशदादिनामर्धगुणद्वैगुण्यादिना व्याख्यातम् । उत्तरग्रहणं भिन्नस्याप्युपलक्षणार्थम् । शाकानां वास्तुकप्रभृतीनामयमेव अध्यर्धगुणयोगः । तद् यथा—शाकपलविंशत्या स्नेहः, पादोनकुडुम्बोऽध्यर्धपलिकं लवणमित्यादि । शुष्काणां द्विगुणमुभयेषां मांसानां शाकानां च यथास्वमेकत्र स्नेहस्य कुटुम्बोऽन्यत्र अध्यर्धकुटुम्बोऽन्य(ा)

श्रीमूला

हस्त्यश्वयोरिति । हस्त्यश्वयोः, विधाप्रमाणं तण्डुलादिमानम्, तदध्यक्षे तयोरध्यक्षे हस्त्यध्यक्षे अश्वाध्यक्षे च, वक्ष्यामः । इतीयमनागतावेक्षणरूपा तन्त्रयुक्तिः ।

कणकुण्डकं दशाढकं वा । द्विगुणं महिषोष्ट्राणाम् । अर्धद्रोणं खरपृषतरोहिता-नाम् । आढकमेणकुरङ्गाणाम् । अर्धाढकमजैलकवराहाणां द्विगुणं वा कणकुण्डकम् । प्रस्थौदनश्शुनाम् । हंसक्रौञ्चमयूराणामर्धप्रस्थः । शेषा-णामतो मृगपशुपक्षिव्यालानाम् एकभक्तादनुमानं ग्राहयेत् ॥

श्रीमूला

बलीवर्दानाम् उक्ष्णाम्, माषद्रोणम् यवानां वा पुलाकः अर्धसिद्धस्तण्डुलः, अर्थाद् द्रोणपरिमाणिः । शेषम्, अश्वविधानम् अश्वस्योक्तं विधानं ग्राह्यम् । विशेष इति । विशेषः अश्वापेक्षया विशेष एषामुच्यत इत्यर्थः । घाणपिण्याकतुला—

चाणक्यटीका

हस्त्यश्वयोर्विधाभेदं तदध्यक्षे वक्ष्यामः । कर्मकरबलीवर्दानामिति । वृषस्कन्ध-कर्मकारिणामित्यर्थः । यवानां वा (पुलाकः) द्रोण इत्येव । शेषविधानं तैलादि अश्वविधा (न ?) सदृशमेव द्रष्टव्यम् । विशेषस्तु तेषां (या) घाणजपिण्या(ण्डा)कतुला

प्रतिपदपञ्चिका

हस्त्यश्वयोस्तयोरध्यक्ष इति । यथास्वं हस्त्यध्यक्षेऽश्वाध्यक्षे च विधाप्रमाणं स्नेहतण्डु-लादि प्रमाणं वक्ष्याम इत्यानागतावेक्षणम् तन्त्रयुक्तिः । बलीवर्दानां वाह्यानां अपुङ्ग-वानां माषद्रोणमाढकचतुष्टयं यवानां च पुलाकः अर्धसिद्धास्तण्डुलास्तावानेव शेषमश्व-विधानमिहाऽनुक्तम् यवसाद्यश्वविधानं तदुक्तं ग्राह्यम् । तत्र विकल्पः घाणपिण्याक-

श्रीमूला

शुष्कस्य तिलकल्कस्य पलशतम्, दशाढकम्, कणकुण्डकं वा तण्डुलानां सूक्ष्मांश-मिश्रमलं वा ।

द्विगुणमित्यादि । उक्तं बलीवर्दविधानं द्विगुणं माषद्विद्रोणं यवपुलाकद्विद्रोणं वा महिषाणामुष्ट्राणां च भवति । अर्धद्रोणं माषाणां यवपुलाकानां वा आढकद्वयं खरपृषतरोहितानां गर्दभानां बिन्दुचित्रमृगाणां रोहितमृगाणां च । आढकं प्रस्थच-तुष्टयम्, एणकुरङ्गाणाम् एणानां कुरङ्गाणां च मृगभेदानाम् । अर्धाढकं प्रस्थद्वयम्, अजैलकवराहाणाम् । अत्र पक्षान्तरमाह—द्विगुणम् उक्तार्धाढकाद् द्विगुणमेकाढकम्, कणकुण्डकं वा । प्रस्थौदनः प्रस्थपरिमितमन्नं शुनाम् । हंसक्रौञ्चमयूराणाम्, अर्धप्रस्थः द्विकुडुबमन्नम् । शेषाणामिति । अतः उक्तेभ्यः, शेषाणां मृगपशुपक्षिव्यालानाम्, एकभक्ताद् एकदिवसभुक्तपरीक्षणाद् अनुमानं शेषदिवसभक्तेयत्तानिश्चयम्, ग्राहयेत् कारयेत् ।

चाणक्यटीका

निष्पीडितपिण्याककुल्माषयवयोरभावे घानपिण्याकाभावे च षोडशकं कणकु (ण्ड ? ट्ट) कस्य दशाढकं वा कणाः क्षुद्रतण्डुलाः कु (ण्डकुद्दू ? ट्टकोद्घू) लिताः तदुभयं मिश्रीकृत्य देयम् ।

[अङ्गारतुषकणानां विनियोगः]

अङ्गारांस्तुषान् लोहकर्मान्तभित्तिलेप्यानां हारयेत् ।

कणिकाः दासकर्मकरसूपकाराणाम्, अतोऽन्यदौदनिकापूपिकेभ्यः प्रयच्छेत् ।

चाणक्यटीका

द्विगुणं महिषोष्ट्राणां माषद्रोणं यवद्रोणं वा द्विगुणभोजनम् । पृषतश्चित्रमृगः । रोहितो वातहरिणः । अश्वमृग[1] इत्यन्ये । एणः स्वल्पमृगः[2] । कुरङ्गो मृग एव । तस्मात् किञ्चिदधिकः । एते यज्ञार्थं क्रीडार्थं सर्पादिरक्षार्थं च सङ्ग्राह्याः । द्विगुणं वा कणकुण्डकं सर्वत्रैतद् योज्यम् । शेषाणामत इति । अतोऽभिहितेभ्यः शेषाणां मृगादीनामिति । व्यालाः सिंहव्याघ्रादयः । एकभक्तादनुमानं ग्राहयेदिति । आतृप्तेरेकं भक्तं दत्त्वा तदनुमानं प्रतिदिवसं भक्तस्येति ।

प्रतिपदपञ्चिका

तुलाचक्र· ·डितं शम्वलपलशतं दशाढकं कणकुट्टनकानां । द्विगुणमिदं बलीवर्दविधानं महिषाणामुष्ट्राणं च अर्धद्रोणमाढकद्वयद्वयंमाषयवानाम् एकैकद्वयस्य खराणां गर्दभानां पृषतानां बिन्दुचित्रमृगाणां रोहितानां वाह्यमृगाणामाढकं प्रस्थचतुष्टयम् । एणानां कुरङ्गाणां च प्रतीतानामर्धढकमजानां व्याघ्रसिंहादीनां एकभक्तादेकदिवसभक्त परीक्षणाच्छेपानुमानं मात्रादि नियमानुमानं कारयेत् ।

श्रीमूला

पाककर्मणि निष्पन्नानामङ्गाराणाम् अवघातनिष्पतितानां तुषाणां च विनियोगमाह—अङ्गारानित्यादि । अङ्गारान् तुषांश्च, लोहकर्मान्तभित्तिलेप्यानां हारयेत् लोहकर्मान्तार्थे भित्तिलेप्यकर्मार्थे च सञ्चिनुयात् । भस्मादिसङ्ग्रहस्याप्येतदुपलक्षणम् । भस्माद्यपि हि केदारादौ दोहदाद्यर्थे विनियुज्यते । कणिकाः तण्डुलकणान्, दासकर्मकरसूपकाराणाम्, प्रयच्छेद् भक्तार्थे । अतोऽन्यद् दासदिदत्तशेषम्, औदनिकापूपिकेभ्यः सामान्यान्नपाचकेभ्यः अपूपकर्मकरेभ्यश्च, प्रयच्छेत् तत्कर्मविनियोगार्थे ।

चाणक्यटीका

शेषोपयोगमाह—अङ्गारतुषान् लोहकर्मान्तस्य भित्तिलेप्यस्य च कृते यथासङ्ख्येन रन्धनकुट्टनाभ्यां सङ्ग्राहयेत् । तथा कणिकादीनां यथोपभोगशेषं दद्यात् । अतोऽन्यद् अल्पमवशिष्टम् ओदनापूपविक्रेतृभ्यः प्रयच्छेत् ॥

---

१. रोहितोऽश्वमृग इति कोषाध्यक्षप्र (धान ? चार) टीका" इति अमरव्याख्याने (२.५.१०) सर्वानन्दः ।

२. "एणः सुनयनः स्वल्पमृगः" ।

[पाकशालोपयोगीन्युपकरणानि]

तुलामानभाण्डं रोचनीदृषन्मुसलोलूखलकुट्टकरोचकयन्त्रपत्रकशूर्पचालनिकाकण्डोलीपिटकसंमार्जन्यश्चोपकरणानि ।

[विष्टिसंज्ञकाः केचन कर्मकराः]

मार्जकारक्षकधारकमायकमापकदायकदापकशलाकाप्रतिग्राहकदासकर्मकरवर्गश्च विष्टिः ॥

प्रतिपदपञ्चिका

अ(नु)निष्पतितानां अङ्गारादीनां फलवत्त्वापादनेन प्रतिपत्तिमाह—अङ्गारान् तुषानित्यादि, पाककर्मणि समुत्पन्नानङ्गारान् लोहकर्मान्तनिमित्तम् । तुषांश्च कुट्टनोत्पन्नानां भित्तिलेप्यानां हारयेत् । तत्कर्मनिमित्तं सङ्गृह्णीयात् । अनेन चैतत्स्थाप्यते । यच्च किञ्चिद्भस्मावस्करादिकमपि तत्र तत्र फलवत्तामापादयेत् । अल्पमपि प्रयोजनमनुपेक्षणीयमिति । कणिका श्लक्ष्णतण्डुलानां कणं । दासानां कर्मकराणां च भक्तनिमित्तं प्रयच्छेत् । अतोऽन्यं दासादिदत्तकणिकाशेषमौदनिकेभ्यो लौकिकोनपाचकेभ्यः आपूपिकेभ्यः तत्कर्मकरेभ्यः प्रयच्छेत् ।

श्रीमूला

उपकरणान्याह—तुलेत्यादि । तुलामानभाण्डं तुलाभाण्डं मानभाण्डं च पौतवाध्यक्षे वक्ष्यमाणं, रोचन्यादिद्वादशकं च उपकरणानि । तत्र रोचनी दलनयन्त्रम्, दृषत् पेषणी, मुसलोलूखले प्रतीते, कुट्टकरोचकयन्त्रे कुट्टकयन्त्रम्, रोचकयन्त्रं च आद्यमुष्ट्रग्रीवाकारं तण्डुलादिकुट्टनसाधनम्, द्वितीयं तु पेषणयन्त्रम्, 'तच्च त्रिविधं मनुष्यप्रावर्तितं बलीवर्दप्रावर्तितं सलिलप्रावर्तितं चेति' इति भट्टस्वामी । पत्रकं दारुमयं आवपनभेदः शूर्पं प्रस्फोटनम् चालनिका तितउः, कण्डोली वंशदलादिनिर्मितं भाण्डम्, पिटकः पेटारिको, संमार्जनी शोधनी ।

कर्मकरानाह—मार्जकेत्यादि । मार्जकः भूमिसंस्कारकः, आरक्षकः कोष्ठागाररक्षी, धारकस्तुलोन्माता, मायको धान्यमाता मापकस्तदधिष्ठाता, दायको दाता, दापकस्तदधिष्ठाता, शलाकाप्रतिग्राहको भारयष्ट्यादिप्रतिग्राही, दासः क्रीतः, कर्मकरस्तादात्विकभृतिभुक्, वर्गं उच्चजातीयगण आहितकादिः, विष्टिरिति त एते मार्जकादयो विष्टिसंज्ञिताः ।

चाणक्यटीका

उपकरणान्याह—तुलेति । रोचनी दृषत् । पेषणी शिला । (पेषणपूतत्त्वः ?) कुट्टकयन्त्रं पादक्रमणीयमुष्ट्रग्रीवाकारकम् । रोचकयन्त्रं हस्तभ्रमणीयम् । पात्रकं[1]

---

१. 'पात्रकस्तु कुशी त्रि स्यात् कर्परे तु पुमानयम्' इति केशवस्वामी, (प ? पा) त्रकं चाङ्गेरिका' इति भट्टस्वामी ।

[धान्याद्यानुगुण्येन तत्तन्निवेशस्थाननिर्देशः]

उच्चैर्धान्यस्य निक्षेपः, मूताः क्षारस्य संहताः ।
मृत्काष्ठकोष्ठाः स्नेहस्य, पृथिवी लवणस्य च ॥८९॥

[इत्यध्यक्षप्रचारे कोष्ठागाराध्यक्षः पञ्चदशोऽध्यायः आदितषट्त्रिंशः]

चाणक्यटीका

काष्ठविदलादिपात्रम् । चालनी परिपवनम् । कण्डोली स्वल्पा, पिटको महानिति विशेषः । शेषशब्दाद् अन्यदप्येवं जातीयक (जात्यङ्कुरादि ?) उपकरणमूह्यम् ॥

मार्जको भूमिमार्जकः । आरक्षकः स्थानपालः । धरकः तोलयिता । मायकादयः स्वयं ज्ञेयाः प्रतीतार्थाः । शलाकाप्रतिग्राहकः कालयिता । दासकर्मकरववर्गश्वान्यो विष्टिरुच्यते ॥

प्रतिपदपञ्चिका

उपकरणान्याह—तुलामानभाण्डमिति, तुलाभाण्डं मानभाण्डं च वक्ष्यमाणं, रोचनं दलनयन्त्रं, दृषत्पेषणिमुसलोलूखलैः कुट्टकरोचकयन्त्राणि यन्त्रशब्दः प्रत्येकं, कुट्टकयन्त्रं उष्ट्रग्रीवाकारं प्रतीतढङ्काराख्यम् रोचकयन्त्रं पेषणयन्त्रं च तच्च त्रिविधम् मनुष्यप्रावर्तितं बलीवर्दप्रावर्तितं सलिलप्रावर्तितं चेति । पत्रकं [1]चङ्गोरिका शूर्पम्, चालनिका कण्डोली ग्रीवडोरिका मृद्भाण्डविशेष इत्यपरे । पिटकं प्रतीतं । सम्मार्जनी बहुकारिका चशब्दादन्यान्यपि यथोपयोगं कर्तव्यानीति वाक्यशेषः ।

एवमुपकरणान्यभिधाय कर्मकरानह—मार्जक इत्यादि, मार्जको भूमिसंस्कारकः आ(रक्षको)रक्षकः रक्षिताःधारकस्तोलको, मायको धान्यमानकृत् । मापकस्तदधिष्ठाता, दायको दाता, दापकस्तदधिष्ठाता, शलाकाप्रतिग्राहकः दासकर्मकरवृत्तौ वर्गग्रहणमाहितकादिग्रहणार्थम् । विष्टिरिति मार्जनादिकर्मकृतां संज्ञा ।

श्रीमूला

अध्यायान्ते श्लोकमाह—उच्चैरित्यादि । धान्यस्य, उच्चैरुपरि, निक्षेपः भूमिस्पर्शो यथा न भवेत् तथा निक्षेपस्थानम् । क्षारस्य गुडफाणितादेः, संहताः सान्द्रघटिताः, मूताः तृणादिबन्धाः, निक्षेपः गोपनस्थानम् । स्नेहस्य घृततैलादेः, मृत्काष्ठकोष्ठाः मृत्कोष्ठाः कुम्भादयः काष्ठकोष्ठाः दारुकोष्ठाश्च मधूच्छिष्टजतुरसाद्यनुलिप्ताः, निक्षेपः लवणस्य, पृथिवी भूमिः पार्थिवो घटादिर्वा, निक्षेपः । चकाराद्

---

१. 'शूर्पं जालानिवालनि कण्डोग्रीवं' इति पाठोऽशुद्धः प्रतिभाति ।

श्रीमूला

अनुक्तमन्यदपि निक्षेपस्थानमुक्तानाम्, अनुक्तानां शाकशुक्तादीनां निवेशस्थानं च यथार्हं कार्यमिति सूचयति ।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चदशोऽध्यायः । कोष्ठागाराध्यक्षः । आदितः षट्त्रिंशः ।

चाणक्यटीका

मूषिकादिषु प्रतीकारार्थमाह—उच्चैर्धान्यस्यावस्थानम् । मूताः क्षारस्येति । उदाहरणत्वात् कटुकभाण्डादीनामपि । संहता सुदृढाः । मृन्मयाः काष्ठमया वा जतुमधुच्छिष्टाभ्यामासारिताः कोष्ठका भाण्डानि स्नेहस्य । पृथिवी लवणस्य । तस्यां शैलत्वान्नक्षीयत इति ॥

॥ इति कोष्ठागाराध्यक्षः पञ्चदशं प्रकरणम् ॥
॥ पञ्चदशश्चाध्यायः ॥

प्रतिपदपञ्चिका

सङ्गोपायनविधिं श्लोकेनाह—उच्चैरित्यादि । उच्चैः उपरिधान्यस्य व्रीह्यादेः । कटकबन्धादौ भूमिमस्पृशतो निक्षेपस्थानं, क्षारस्य गुडममत्स्मण्डिकादेः मूता मूतकाः ते संहताः घटना स्नेहस्य सर्पिरादेः मृत्काष्ठाःकुम्भ्यादयः । काष्ठकोष्ठाः सारदारुफलकमयास्थितकथकसम्जरसकादिनापिहितानुपलेपनः पृथिवी भूमिः । लवणस्य सैन्धवादेः निक्षेपः, चकारादन्येषां च शाकशुक्ताम्लदिवर्गाणां तत्तदाधानयोग्यानि निक्षेपस्थानानि कर्तव्यानीति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम्, अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे पञ्चदशोऽध्यायः परिसमाप्तः ।
कोष्ठागाराध्यक्षः आदितः षट्त्रिंशोऽध्यायः ।

चतुस्त्रिंश प्रकरणम्

षोडशोऽध्यायः ।

पण्याध्यक्षः ।

[विक्रेयद्रव्यवैलक्षण्यतदुपयोगकालयोरवश्यज्ञेयता]

पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां स्थलपथवारिपथोपयातानां सारफल्ग्वर्घान्तरं प्रियाप्रियतां च विद्यात्, तथा विक्षेपसंक्षेपक्रयविक्रयप्रयोगकालान् ।

श्रीमूला

पण्याध्यक्ष इति सूत्रम् । पण्यं विक्रेयं राजद्रव्यं तस्य विक्रये क्रये च नियुक्तः पण्याध्यक्ष इति सूत्रार्थः । सन्निधातृनिचयकर्माभिहितम् । निचितस्य राजपण्यस्य क्रयविक्रयव्यवहार इदानीमुच्यत इति सम्बन्धः । अथवा 'सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारमि' त्यादिना पण्यगृहकरणमुक्तम् । तदध्यक्षस्तदध्यक्षव्यापारो वा नोक्तः । स इहोच्यत इति सम्बन्धः । ननु च पण्याध्यक्षकर्म नाम वाणिज्यम् । तच्चा कृषिपाशुपाल्यसहपाठात् सीताध्यक्षगोऽध्यक्षाभ्यामनन्तरं वक्तुमुचितम् । सत्यम् । किन्तु तस्येह कोष्ठागाराध्यक्षानन्तर्येण वचनं कोष्ठागाराध्यक्षस्यापि स्वव्यापाराः क्रयिमपरिवर्तकप्रामित्यकादयः पण्याध्यक्षापेक्षयानुष्ठेया इति ज्ञापनार्थम् ।

पण्याध्यक्ष इति । पण्याध्यक्षः, स्थलजलजानां स्थलजानां कुङ्कुमादीनां जलजानां मुक्ताप्रवालादीनां च, नानाविधानां पृथग् बहुप्रकाराणाम्, स्थलपथवारिपथोपयातानाम्, पण्यानां सारफल्ग्वर्घान्तरं सारस्य बहुमूल्यस्य फल्गुनोऽल्पमूल्यस्य च अर्घान्तरं मूल्यतारतम्यम्, प्रियाप्रियतां च प्रियतां शीघ्रविक्रयताम् अप्रियतां मन्दविक्रयतां च, विद्यात् । तथा, विक्षेपादिप्रयोगकालान् विक्षेपः सङ्क्षिप्तद्रव्यविस्तारः संङ्क्षेपः विक्षिप्तद्रव्यसङ्क्षेपः क्रयः पण्यसङ्ग्रहः विक्रयः संगृहीतपण्यव्ययः इत्येतेषां प्रयोगकालान् अनुष्ठानाननुष्ठान् कालान्, विद्यादिति सम्बध्यते ।

चाणक्यटीका

पूर्ववदेव सन्निधातुः कोशगृहकोष्ठागारविषयव्यापारानन्तर्येण पण्यगृहविषयो व्यापारो वाच्य इति पण्याध्यक्षप्रकरणमुच्यते पण्याध्यक्ष इति । पणितव्येष्वधिकृतः सन्निधातृ (कृताधिकारः) । स्थलजलजानां चन्दनोशीरादिनानाविधानां कोशप्रवेश्यानाम् अन्येषां वा रत्नसारफल्गुकुप्यादीनां पण्यानाम् । स्थलपथवारिपथोपया-

[विक्रेयद्रव्यमूल्यविक्रयस्थानलाभादिव्यवस्थाः]

यच्च पण्यं प्रचुरं स्यात्तदेकीकृत्यार्घमारोपयेत् । प्राप्तेऽर्घे वाऽर्घान्तरं कारयेत् । स्वभूमिजानां राजपण्यानामेकमुखं व्यवहारं स्थापयेत्,

---

चाणक्यटीका

तानामिति आगमप्रदर्शनम् । सारफल्ववर्घान्तरमिति । सारफल्गुशब्दौ महाल्पवाचकौ, इदं महार्घमिदमल्पमूल्यमिति । प्रियाप्रियतामिति महार्घमल्पार्घं वा अस्मिन् देशे प्रियम् इदमप्रियमिति । तथा इदमल्पविषयविक्रयम्, इदं महाविषयविक्रयम्, इदं विक्षिप्तम्, इदम् अनेकमुखीकृतम्, इदमत्र क्रेतव्यम्, इदं विक्रेतव्यम् इति, इदमत्र विध्यादिप्रयोगे[1] वर्षेण वर्तत इति विद्यात् ॥

प्रतिपदपञ्चिका

पण्याध्यक्ष इति सूत्रम् ।

पण्यं पणनीयं विक्रेयं राजद्रव्यम् । तस्य विक्रयादौ नियुक्तः पण्याध्यक्ष इति सूत्रार्थः । सम्बन्धस्तु कोशप्रकृतिः प्रक्रान्ता, सन्निधातृनिचयकर्मादिभिः कोष्ठागाराध्यक्षान्तैरनेकशोऽभिहिता । अधुना राजद्रव्यस्यपण्यस्य क्रयविक्रयदिना वार्तानुष्ठानेनाऽभिधीयत इति । यद् वा सन्निधाता कोशग्रहणादीनि कारयेदित्यत्र पण्यग्रहणमुक्तम् । तदध्यक्षस्तद्व्यापारो वा नोक्तः, सोऽभिधीयत इति । एवमपि कृषिपाशुपाल्ये वणिज्या च प्राप्तेति सहपठितायाः सीतागोऽध्यक्षाभ्यां सहानन्तर्येण पाठे प्राप्ते कोष्ठागाराध्यक्षानन्तरं पाठः कोष्ठागाराध्यक्षव्यापाराणां क्रयिमपरिवर्तकादीनां पण्याध्यक्षापेक्षया तस्यापि तत्र कर्तृत्वज्ञापनार्थम् तदाह—पण्याध्यक्ष इति । स्थलजानां कुङ्कुमचन्दनादीनां, जलजानां मुक्ताप्रवालशङ्खादीनां च नानाविधानामुभयेषामपि अनेकप्रकाराणां स्थलपथेन वारिपथेन च उपयातानाम् आगतानां सारस्यमाह—मा(महामू) ल्यस्य फल्गुनोऽल्पमूल्यस्य अर्घान्तरम् अर्घविशेषम्, प्रियाप्रियतां च शीघ्रमन्दविक्रयतां वा विद्यात् । तथा सङ्क्षेपादिप्रयोग-कालांश्च । सङ्क्षेपो विक्षि(प्ता)प्यार्थसंहारः, विक्षेपः संक्षिप्तद्रव्यविस्तारः, क्रयः पण्यसङ्ग्रहः विक्रयः सङ्गृहीतदानम्, योगकालाननुष्ठानकालं विद्यादिति वर्तते ।

श्रीमूला

यच्चेति । यत् पण्यं कुङ्कुमादि, प्रचुरं प्राज्यं, स्यात्, तद् एकीकृत्य तत् सर्वमेकत्रगतं कृत्वा, अर्घम्, आरोपयेत् आरूढमधिकं स्थापयेत् । प्राप्तेऽर्घे वा न्यायलभ्येऽर्घेऽधिगते वा सति, अर्घान्तरम् अर्घभेदमारोपिताल्लघुं, कारयेत् । स्वभूमीत्यादि । स्वभूमिजानां स्वविषयोद्भवानां, राजपण्यानाम्, एकमुखम् एकस्थानम्, व्यवहारं विक्रयं, स्थापयेद्, राजा ।

---

१. कृष्यादिप्रयोगे वर्षेण वर्धते इति पाठो भवेत् ।

परभूमिजानानामनेकमुखम् । उभयं च प्रजानामनुग्रहेण विक्रापयेत्, स्थूलमपि च लाभं प्रजानामौपघातिकं वारयेत् । अजस्रपण्यानां कालोपरोधं सङ्कुलदोषं वा नोत्पादयेत् बहुमुखं वा राजपण्यं वैदेहकाः कृतार्घं विक्रीणीरन् । छेदानुरूपं च वैधरणं दद्युः ।

श्रीमूला

परभूमिजानां परविषयोपनीतानाम्, अनेकमुखम्, स्थापयेत् । उभयं च स्वभूमिजं परभूमिजञ्च, जानाम्, अनुग्रहेण अनुपपीडया, विक्रापयेत्, अर्थात् पण्याध्यक्षः । स्थूलं प्रभूतमपि, लाभं प्रजानाम्, औपघातिकम् उपघातः पीडा तत्पर्यवसायिनम्, वारयेत् । अजस्रपण्यानां क्षीरशाकादीनाम्, कालोपरोधं कालविक्रयप्रतिषेधं संकुलदोषंवा शाकादिषु कौश्चिदानीतचरेष्वविक्रीतेष्वन्यैः शाकाद्यानयनं वा, नोत्पादयेत् ।

चाणक्यटीका

यच्च पण्यं प्रचुरं स्याद् अन्यतोऽपिलभमानैः न क्रीयत इति मते, तत् स्वयं क्रयेण एकीकृत्य यथाक्रीतं ततः किञ्चिद् अर्घमारोपयेत् । प्राप्तार्घे चेति प्रसिद्धार्घे च तस्मिन् जाते पुनः स्तोकस्तोकारोपणेन अर्घान्तरं कारयेत् तत् पण्यमन्यत्र नास्तीति कृत्वा ॥

स्वभूमिजानामनेकराजपण्यानाम् एकमुखं व्यवहारं स्थापयेत् । यथान्यस्यापि

प्रतिपदपञ्चिका

यच्च पण्यं कुङ्कुमचन्दनादिकं प्रचुरमतिप्रभूतं स्यात्, तदेकीकृत्य संवाह्य एकरूपं कृत्वा अर्घमारोपयेत् महार्घं कुर्यात् ।

प्राप्तेऽर्घे वेति तस्मिन् प्रसिद्धेऽर्घान्तरमिति भूयोऽप्यारोपयेत् । स्वभूमिजातानां स्वविषयोत्पन्नानां राजपण्यानामेकमुखमेकपणं व्यवहारं विक्रयं कारयेत् । परभूमिजानां

श्रीमूला

बह्वित्यादि । वैदेहकाः वणिजः, कृतार्घं व्यवस्थापितमूल्यम्, राजपण्यम्, बहुमुखं वा बहुषु स्थलेषु वा, विक्रीणीरन् । छेदानुरूपं च वैधरणमिति । यदि विक्रये काश्चिच्छेदोऽर्घहानिर्भवेत् तदनुरूपं छेदतुल्यमानं वैधरणं दद्युः । छेदप्रतिनिधेर्वैधरणमिति संज्ञा ।

चाणक्यटीका

जनपदस्य न विक्रयदानं त (पो ? तो) वा वणिजः (कत्यु ? क्रव्यो) द्देशात् क्रेतुं (वा ? प्राप्) स्यन्तीति । अराजभूमिजानामनेकमुखम् आशु विक्रयार्थं स्थापयेत् । उभयं वेति राजपण्यं जानपदं च प्रजानामनुपजापेन विक्रापयेत् ॥

[वणिग्भ्यः आदेयाः राजोपदाः, पर-
देशीयद्रव्यानयनक्रमाश्च]

षोडशभागो मानव्याजी, विंशतिभागस्तुलामानम्, गण्यपण्यानामेकादशभागः। परभूमिजं पण्यमनुग्रहेणावाहयेत्। नाविकसार्थवाहेभ्यश्च परिहारं आयतिक्षमं दद्यात्। अनभियोगश्चार्थेष्वागन्तूनामन्यत्र सभ्योपकारिभ्यः।

चाणक्यटीका

एवमेवार्थं द्रढीकर्तुंकाम आह—स्थूलमपि च (भाति ? ला) भं किं पुनरल्पं प्रजौपघातिकं वारयेत्। विक्रेतॄनिवारणेन लाभो वारितो भवति। प्रजानुपघाते च अजस्रपण्यानां कालोपरोधं सङ्कुलदोषं वा नोत्पादयेत्। यत्र यदुत्पन्नं तत् तत्रैव विक्रापयेत्, विक्रेतारश्चेत् सर्वत्र न स्युः॥

बहुमुखं वा राजपण्यं तत्र तत्र एकत्र वा नगरे वणिजः पण्याध्यक्षेण कृतार्घमापादितं क्रीणीरन्। छेदानुकूलं वैधरणं दद्युः वाणिजकाः। ऊनमेव पूरयेयुः, नावरं दण्डनीया इत्यर्थः॥

प्रतिपदपञ्चिका

अन्यदेशागतानां अनेकमुखमुभयं चैतत् स्वभूमिजं परविषयागतं च प्रजानां पौरजानपदानाम् अनुग्रहेण अपडीया विक्रापयेत्। पण्याध्यक्षः स्थूलमपि च महान्तमपि लाभं प्रजानामौपघातिकं पीडाकरं निवारयेत् निषेधयेत्। अजस्रपण्यानां क्षीरशाकपुष्पादीनां प(पा)त्रादीनां च कालोपरोधं विक्रयनिषेधं सङ्कुलदोषं च पूर्वप्रविष्टेष्वपि कृतेषु पुनरप्येषाम् उपर्युपरि प्रवेशनं नोत्पादयेत् न कुर्यात्। बहुमुखमनेकापणं वा राजपण्यं वैदेहकाः कृतार्घं निबद्धार्घं विक्रीणीरन् यदि वाऽर्घादिवशात् किञ्चिद्भिद्येत, तदनुरूपं यावन्मात्रं हापितं तावन्मात्रकमेव दद्युः। तस्य वैधरणमिति संज्ञा।

श्रीमूला

वणिग्भ्य उपादेयां राजोपदामाह—षोडशेत्यादि। षोडशभागो मानव्याजी मेयद्रव्यषोडशांशो मानव्याजीसंज्ञः। स राज्ञे देयः। तुलामानं विंशतिभागः तोल्नीयद्रव्यं पलशते पञ्चपलमितम्, राज्ञे देयम्। गण्यपण्यानां क्रमुकफलादीनाम्, एकादशभागः, राज्ञे देयः। सर्वेयं व्याजी क्रेतृग्राह्येति केचित्।

परेत्यादि। परभूमिजं पण्यम्, अनुग्रहेण अन्तपालाटविकराजवल्लभाद्युपद्रववारणेन व्याजीमोक्षेण, च आवाहयेत् आनाययेत्। नाविकसार्थवाहेभ्यश्च जलपथवाहकवणिग्भ्यश्च, परिहारम् आदेयमोक्षम्, आयतिक्षमम् उत्तरकालबाधकम्, दद्यात्। अनभियोगश्च उत्तमर्णकर्तृकाभियोगप्रतिषेधश्च, अर्थेषु ऋणादिषु विषये,

[विक्रयलब्धधनरक्षणनिवेदनादयः]

पण्याधिष्ठातारः पण्यमूल्यमेकमुखं काष्ठद्रोण्यामेकच्छिद्रापिधानायां निदध्युः। अह्नश्चाष्टमे भागे पण्याध्यक्षस्यार्पयेयुः—'इदं विक्रीतमिदं शेषम्' इति। तुलामानभाण्डं चार्पयेयुः। इति स्वविषये व्याख्यातम्।

श्रीमूला

आगन्तूनां देशान्तरागतानाम्, तद्विषये अभियोगं विनैव ऋणदानं व्यवस्थाप्यमिति-भावः। अत्रापवादमाह—अन्यत्र सभ्योपकारिभ्यः तदुपकारिकर्मकरानपहाय। तेषां तु परस्पराभियोगोभवत्येव।

चाणक्यटीका

षोडशभागो मानव्याजो राजपण्यानां षोडशप्रस्थान् विक्रीणानः एकं निवर्त्तयेत्। क्रीणानः सप्तदशकमधिकं गृह्णीयात्। तथातुलनीयानां विंशतिभागः पलविंशत्या एकपलं निर्वर्तयेत्, अधिकं वा गृह्णीयात् तथा गण्यानां मूलफलादीनाम् एकादशभाग इति योज्यम्॥

परभूमिजं पण्यं (सं ? अनु) ग्रहेण चोरनिषेधादिना (पूजा ? व्याज्या) ह्यनुग्रहेण स्वदेशं प्रवेशयेत्। नाविकसार्थवाहेभ्यश्च परिहारम् आयतिक्षमंदद्यात्। तत्पण्यम् अशुल्कम् अर्धशुल्कं वा कुर्यात्। यथा कालान्तरेण नानुतप्येत कृतोपकार इव करिष्यतीति। अनभियोगं चेति वास्तव्यैर्वणिग्भिरागन्तूनां पण्यादिनासाध्यम्। अभियुक्ता हि विक्रयार्थं नागच्छेयुः कामवृत्ताः स्वदेश एव साध्या इति। अन्यत्र साध्योपकारिभ्य इति साध्योपकारिणस्तु साध्या इत्यर्थः॥

प्रतिपदपञ्चिका

राजपण्यप्रसङ्गेन वणिग्भ्यो राजादेयं सामान्यमुपादानविशेषमाह—षोडशभागो मानव्याजीति। समस्तमेयद्रव्यस्य षोडशभागं तस्य मानव्याजीति संज्ञा। विंशतिभागस्तुलायाः तौल्यद्रव्याणम्। पलशते पञ्चपलं गण्यपण्यानां। पूगफलादीनामेकादशभागम्। केचिदेतत् क्रेतृग्राह्यमित्याचक्षते। परभूमिजं पण्यमनुग्रहेण अन्तपालाटविकवल्लभाद्युपद्रवप्रतिषेधेन षोडशभागमोक्षेण च अनुगृह्याऽऽवाहयेत् आनाययेत्। नाविकेभ्यः जलपथवाहकेभ्यः सार्थवाहेभ्यः सार्थातिवाहिकेभ्यः परिहारमादेयमोक्षमायतिक्षमभागमादि 'कालमहोदयं दद्यात्। अनभियोगश्चोत्तमर्णैभिरर्थेष्वृणादिषु विषयभूतेषु आगन्तूनामन्यदेशागतानां दद्यात् इत्येवं स्थापयेत्।

किं सर्वत्रैव नेत्याह—अन्यत्र सभ्योपकारिभ्य इति, तत्सेवककर्मकरादिभ्योऽन्यत्र, तेषां तु परस्परमभियोगाप्रतिषेधः।

श्रीमूला

पण्याधिष्ठातार इति। राजपण्यविक्रेतारः, पण्यमूल्यं पण्यविक्रयागतं धनम्, एकमुखम् एकस्थानागतम्, काष्ठद्रोण्यां दारुपेटिकायाम् एकच्छिद्रापिधानायाम् एक-

[परदेशीयद्रव्यविषये लाभव्यवस्थाः,
स्थलजलमार्गव्यवहाररीतयश्च]

परविषये तु—पण्यप्रतिपण्ययोरर्घं मूल्यं च आगमय्य शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभक्तभाटकव्ययशुद्धमुदयं पश्येत् । असत्युदये भाण्डनिर्वहणेन पण्यप्रतिपण्यार्घेण वा लाभं पश्येत् । ततः सारपादेन स्थलव्यवहारमध्वना क्षेमेण प्रयोजयेत् । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेदनुग्रहार्थम् ।

श्रीमूला

द्वाराच्छादनायाम्, निदध्युः निक्षिपेयुः । अह्नश्च, अष्टमे चरमे, भागे, उपलक्षणात् क्रयसमयावसाने वा, पण्याध्यक्षस्य, अर्पयेयुः । किं कृत्वा, इदं विक्रीतम् इदंशेषमिति एतावद् विक्रीतम् एतावद् विक्रेयमवशिष्यत इति बोधयित्वा । तुलामानभाण्डकं तुलाप्रस्थकुडुबादिकं च, अर्पयेयुः, पण्याध्यक्षस्य । इति स्वविषये व्याख्यातमिति । एवं स्वदेशे पण्यपणनविधिर्विवृतः ।

चाणक्यटीका

पण्याधिष्ठातार इति । पण्यानामधिष्ठातारोऽध्यक्षपुरुषाः पण्यानां नानाजातीयानां मूल्यानाम् अप्येकमुखम् एकाधारम् उप (स्तु ? स्थि) तकाष्ठद्रोण्याम् एकच्छिद्रापिधानायां स्वरक्षमुत्पन्नं दद्युः । अष्टमे भागे अपराह्ले । तदानीं क्रेत्रभावादर्पयेयुः—इदं विक्रीतम्, इदं शेषमिति परिबोधयन्तः । इमानि च तुलामानभाण्डानि (इति) तेषामाशङ्कापरिहारार्थम् । व्याख्यातं पण्यव्यवहरणं (स्वविषयइति) ।।

प्रतिपदपञ्चिका

पण्याधिष्ठातार इति, राजपण्यविक्रेतारः पण्यमूल्यं तद्विक्रयद्रव्यमेकमुखम् एकावस्थानं । काष्ठद्रोण्यां मंजूषायामभेद्यपरिकरायामेकद्वारसापिधानायां निदध्युः स्थापयेयुः । अह्नश्चाष्टमे भागे अर्धप्रहरावशेषेऽह्नि क्रेतृवेलापगमे पण्याध्यक्षस्यार्पयेयुः । कथमित्याह—इदं क्रीतम् इदं पण्यमूलम् इदं शेषमिति, पण्यं स्वरूपतो विविच्य उपनयेयुः । तुलामानभाण्डं च अर्पयेयुरिति द्विरर्पयेयुरिति ग्रहणम् । तत्र भाण्डं सर्वव्यवहरणोपसंहरणार्थम् एवं स्वविषये पण्यविधानं व्याख्यातम् ।

श्रीमूला

परविषये त्विति । व्याख्यायत इति शेषः । पण्येत्यादि । पण्यप्रतिपण्ययोः स्वपण्यपरविषयपण्ययोः, अर्घं समन्यूनाधिकम्, मूल्यं च भाण्डोपस्कारादिमूल्यं च, आगमय्य विज्ञाय, शुल्कादिव्ययशुद्धं शुल्कादिव्ययशोधितावशेषम्, उदयं लाभम्, पश्येत् समीक्षेत, सति लाभदर्शने स्वपण्यं परविषये प्रेषयेदित्यभिप्रायः । तत्र शुल्कं शुल्काध्यक्षोक्तम्, देयशब्दस्य वर्तन्यादिभिः प्रत्येकमभिसम्बन्धः । वर्तनीदेयम् अन्त-

श्रीमूला

पालदेयम्, आतिवाहिकदेयं मार्गातिवाहनसहायभूतायुधीयदेयम्, गुल्मदेयं वनस्थानिकदेयम्, तरदेयं नद्याद्युत्तारकनाविकादिदेयम्, भक्तं भोजनं कर्मकरबलीवर्दादिभृतिश्च, भाटकः प्रसेवकादिग्रहणार्थः प्रक्रयः। भागेति त्वपपाठ इति भाति। असतीति। असत्युदये लाभदर्शने भाण्डनिर्वहणेन स्वपण्यस्य परदेशनयनेन लाभकालप्रतीक्षापूर्वकविक्रयद्वारेण लाभं पश्येत् । वा अथवा, पण्यप्रतिपण्यार्घेण स्वपण्यस्य प्रतिपण्यार्घकरणेन स्वपण्यदानपूर्वकप्रियपण्यान्तरग्रहणेनेत्यर्थः, लाभं पश्येत्। तत इति। ततः लाभदर्शनानन्तरम्, सारपादेन समीक्षितलाभचतुर्थांशव्ययेन, स्थलव्यवहारं सुलभापायो जलपथ इति कृत्वा स्थलपथव्यवहारम्. क्षेमेणाध्वना स्थलपथेनापि चोराद्युपद्रवरहितेन, प्रयोजयेत्। अटव्यन्तपालपुरराष्ट्रमुख्यैश्च, अटवीपालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च सह, प्रतिसंसर्गं सोपदानं सङ्गतम्, गच्छेद्, अनुग्रहार्थं तदानूकूल्यार्थम्।

चाणक्यटीका

परविषये त्विति। अस्य तु पण्यस्य तत्र महानर्घ इति, पण्यस्य तस्यात्र महानर्घ इति आकलय्यालोचयेत्, इदमत्र शुल्कमियन्तः पलाः[1] ग्राह्याः, सपाद (चतुष्पणो ? पणिका[2]) वर्त्तनी, (य इति वाहनमिते ? इयदातिवाहिके) भ्यो देयम्, इयत् (शौल्के ? गौल्मे) भ्यः, इदं नदीतीरे देयम्, इयती भृतिः, इयद् विष्टिभ्यो भ (क्त) म्, व्ययोऽपि इयान्, इत्येतैर्विशुद्धं व्ययविशुद्धं च उदयं लाभं पश्येत्, ततोयायादित्यर्थः। असत्युदय इति (षड् ?) भाण्डमिह नश्यति, शुल्काभिधेयं समभाण्डं चैतत् समवृद्धिकमिति निर्व्यूढं भवतीति मन्यमानः, प्रतिपण्यमेवाल्पमप्यानीतम् इदं मे लाभं करिष्यतीत्याकलयेत्। तत इति सत्युदये प्रतिविधानं विचित्य पश्चादसारं बह्वनवेक्ष्य सारस्य पण्यस्य पादेनैव नाधिकेन स्थलव्यवहारम् असंचक्रपथादिकम् अध्वना क्षेमेण नाविकेन सं (गमिते ? यानेन) प्रयोजयेत्। गच्छंश्च परकीयैरप्याटविकादिभिः रक्षाति (श) या (त्रा) द्यनुग्रहार्थं सख्यं कुर्यात्॥

प्रतिपदपञ्चिका

परविषयेत्विति, अभिधीयत इति वाक्यशेषः। पण्यं स्वकीयं प्रतिपण्यं परकीयं ग्राह्यम्। तयोरर्घं समर्थाधिकंमूल्यं च (परादा)वराटादिकम्। भाण्डोपस्करादिमूल्यं च आगमय्योपलभ्य, तं शुल्कादिव्ययविशुद्धं तेभ्योऽधिकविशेषमुदयं लाभं पश्येन्निरूपयेत्। तत्र शुल्कं शुल्काध्यक्षोक्तं देयशब्दो वर्तन्यादिभिः प्रत्येकं वर्तनीदेयम्।

ते पालदेयम् आतिवाहिक देयम्, आयुधीयसहायवेतनं, गुल्मदेयमाटविकादि स्थानिकदेयं तरदेयं, नावाद्युत्तारकनाविकादिदेयं। भागकं प्रवर्णग्रहणाभ्यवद्यक्रयो भक्तं

---

१. पुल्लिङ्ग पलशब्द उन्मानवाचकः प्रामादिको माति।

२. "अन्तपालः सपादपणिकां वर्तनी गृह्णीयात् पण्यवहनस्य" इति शुल्काध्यक्षे कौटल्यः। (२.२१)।

आपदि सारमात्मानं वा मोक्षयेत्। आत्मनो वा भूमिमप्राप्तः सर्वदेयविशुद्धं व्यवहरेत्।

प्रतिपदपञ्चिका

कर्मंकरबलीवर्दाद्युपक्षयः असत्युदय इति, लाभाभावे भाण्डनिर्वहणेन स्वकीयभाण्डाविक्रापणेन प्रतिपण्यस्य आनयनेन तत्कालप्रतिपण्यविनिमयेन वा लाभं पश्येत्। तत इति। पूर्वोक्तलाभनिश्चयोत्तरकालं सारपदेन लाभचतुर्भागेन(ब)ह्वपायत्वाद् वारिपथस्य स्थलपथव्यवहारमध्वनाक्षेमेण निराबाधेन प्रयोजयेत्। सर्वनाशपरिहारार्थमटव्यादिभिश्च सह प्रतिसंसर्गं एकैकेन सह उपचारपूर्वं मैत्रीं कुर्यात्।

अनुग्रहार्थं तत्कृतपाथेयसहायाद्यर्थं च आटविकादयश्च प्रतीताः।

श्रीमूला

आपदीति। आपदि चोरोपरोधे, सारं रत्नादिद्रव्यम्, आत्मानं वा स्वशरीरं च, मोक्षयेत् रक्षयेत्। इदं च सति सम्भवे। उभयमोक्षणासौकर्ये तु सारपरित्यागेनात्मैव मोक्षणीयः। यदाहुः—

"शरीरमर्थाद् गोप्तव्यं राजगुह्यभयादितम्।
वित्तहीनोऽल्पवित्तो वा जीवन् भद्राणि पश्यति॥"

इति। आत्मनो वेति। आत्मनो वा भूमिमप्राप्तः स्वपण्यविक्रयभूमिभूतात् परविषयात् स्वविषयमप्रत्यागतः, परविषयवासकाले कृत्स्नेऽपीत्यर्थः, सर्वदेयविशुद्धं व्यवहरेत् शुल्कादिनिखिलदेयाप्रदानापराधविधुरं विक्रयव्यवहारं कुर्यात्, स्वल्पप्रत्याशया सर्वनाशो मा भूदिति।

चाणक्यटीका

आपदि चोरादिसमुत्थायां सारं न मोक्षयेत्, नान्यदाद्रियेत। तदशक्तोवा आत्मानं सर्वस्य भाजनम् 'जीवन् भद्राणि पश्यति' इति। (सपत्नस्त्वर्तिधेन ?) आत्मनो भूमिं प्राप्तः स्वदेशस्थः सर्वदेयविशुद्धं व्यवहरेत्। शुल्काध्यक्षो (हैमनं नाघयेत् (दित्यर्थः ?) वंसपथ उक्तः॥

प्रतिपदपञ्चिका

आपदि तत्करग्रहणादौपस्करसारं सुवर्णादिहस्तसारम् आत्मानं वा शरीरं मोक्षयेत् रक्षेत्। वाशब्दश्चार्थे, उभयमोक्षसंभवे सति अन्यथा सारं परित्यज्यात्मानमेव मोक्षयेत् शरीरमूलत्वाद्वित्तादेः। उक्तं हि:—

शरीरमेव भोक्तव्यं राजगुह्यभयादितम्।
वित्तैर्हीनाल्पवित्तो वा जीवन् भद्राणि पश्यति॥

आत्मनो वा भूमिमिति। आत्मनोऽभिप्रेतां वा स्वपण्यस्य विक्रयभूमिं परविषयं प्राप्तश्शुल्कादिसर्वदेयविशुद्धं व्यवहरेत्। अल्पतृष्णया सर्वनाशभयात् अथवा स्वमित्रविषयं प्राप्तः। सर्वदेयविशुद्धमिति राजपण्यापदेशेन शुल्कादिरहितं व्यवहरेत्।

वारिपथे च यानभाटकपथ्यदनपण्यप्रतिपण्यर्घप्रमाणयात्राकालभय-प्रतीकारपण्यपत्तनचारित्राण्युपलभेत ॥

नदीपथे च विज्ञाय व्यवहारं चरित्रतः ।
यतो लाभस्ततो गच्छेत् अलाभं परिवर्जयेत् ॥९०॥

इत्यध्यक्षप्रचारे पण्याध्यक्षष्षोड्शोऽध्यायः,
आदितस्सप्तत्रिंशः ।

श्रीमूला

वारिपथे चेति । जलपथे च, यानभाटकादीनि, उपलभेत ज्ञात्वा तदनुरोधेन व्यवहरेत् । तत्र यानभाटकः नाविकभृतिः, पथ्यदनं मार्गभक्तं, पण्यप्रतिपण्यार्घप्रमाणं पण्यप्रतिपण्ययोरर्घतारतम्यम्, यात्राकालः यात्रार्हऋतुविशेषलक्षणो गतागतापेक्षित-कालेयत्ता वा, भयप्रतीकारः सम्भावितस्करादिभयप्रतिविधिः, पण्यपत्तनचारित्रं स्वपण्यविक्रयस्थानभूतपरकीयपत्तनसमुदाचारः ।

अध्यायान्ते श्लोकमाह—नदीपथे चेति । नदीपथे च न केवलं समुद्रमार्गे किन्तु नदीमार्गेऽपि, व्यवहारं वाणिज्यम्, चरित्रतः तत्तद्देशाचारानुरोधेन, विज्ञाय, यतो येन पथा, लाभः, ततो गच्छेत् । अलाभम् अल्पलाभं क्षयव्ययप्रवासादिमहाक्लेशाननुरू-पलाभं जलपथम्, परिवर्जयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः, आदितः सप्तत्रिंशः ॥

चाणक्यटीका

वारिपथे च, अस्य नौयानस्य अयं विपह्योभारः, एतावत्कालस्य इदं पथ्यदानम् इदं पण्यप्रतिपण्ययोरर्घप्रमाणम्, अयमनुलोमवातो यात्राकालः, अयं चोरोत्पात-वातादिभयप्रतीकारः, अत्रेदं पण्यं प्रियादानम्, अत्र पत्तने चरित्रमेतद् इत्युपलभेत । सति लाभे यायादित्यर्थः ॥

तद्दर्शयति—नदीपथे चेति । संयानपथस्य महादोपत्वाद् विशेषेण ज्ञात्वा व्यवहारान्, चरित्रतः स्थितिवशाद् अलाभं स्थलपथं परिवर्जयेदिति नियमः ॥

॥ इति पण्याध्यक्षः षोडशं प्रकरणं समाप्तम् ॥
॥ षोडशश्चाध्यायः ॥

प्रतिपदपञ्चिका

वारिपथे चेति, न केवलं पूर्वोक्तस्थलपथे यानभागको नौभागकः पथ्यदनं प्रतीतम् । पण्य प्रतिपण्ययोरर्घप्रमाणं महत्वं लघुत्वम् यद् वा प्रमाणमथनो नौप्रभृतीनां

प्रतिपदपञ्चिका

योजनादिकं यात्राकालं शरद्वसन्तकादिकं गत्यागमनकालख्यातं वा भयप्रतीकारं तस्करादेः प्रतीकारं वहनसंस्कारं च पण्यपत्तनचरित्रं परविषयकपण्यपत्तनाचारमुपलभेत। उपलभ्य च तथैवानुतिष्ठेत्।

अध्यायप्रान्ते श्लोकमाह—नदीपथे चेति, न केवलं समुद्रपथे विज्ञाय व्यवहारं वाणिज्यं चरित्रतः चरित्रेण परपरिकल्पितस्थित्यनतिक्रमेण यतो गतस्य लाभस्ततो गच्छेत्। तेन पथा गच्छेत्। अलाभमविद्यमानलाभं वारिपथं वर्जयेत्। ननु यतो लाभः ततो गच्छेदित्यनेनैव अर्थापत्तेरलाभवर्जनस्य सिद्धत्वान् तदग्रहणम्। क्षयव्ययप्रयासार्थबहुलस्य महतोऽपि लाभस्य वर्जनार्थमिति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायाम्
अध्यक्षप्रचारिके द्वितीयेऽधिकरणे षोडशोऽध्यायः।

आदितः सप्तत्रिंशोऽध्यायः ॥

प्रतिपदपञ्चिका

पञ्चत्रिंशं प्रकरणम्

सप्तदशोऽध्यायः ।

कुप्याध्यक्षः ।

[आरण्यकद्रव्याध्यक्षकर्तव्यसंग्रहः]

कुप्याध्यक्षो द्रव्यवनपालैः कुप्यमानाययेत् । द्रव्यवनकर्मान्तांश्च प्रयोजयेत् । द्रव्यवनच्छिदां च देयमत्ययं च स्थापयेदन्यत्रापद्भ्यः ॥

श्रीमूला

कुप्याध्यक्ष इति सूत्रम् । कुप्यं सारदारूवेणुवल्लिवल्कादि, तत्र नियुक्तः कुप्याध्यक्षः, अर्थात् तस्य व्यापारः कुप्यविषय इहोच्यत इति सूत्रार्थः । कोशप्रवेश्यरत्नपरीक्षायां रत्नसारफल्गुकुप्यान्युपक्रम्य रत्नसारफल्गुप्रतिग्रहणमुक्तम्, कुप्यस्य त्वनुक्तमिहोच्यत इति सम्बन्धः । अथवा 'सन्निधाता कोशगृहमित्यदिना कुप्यगृहविधानं पूर्वमुक्तम्, तदध्यक्षव्यापारस्त्वधुनोच्यत इति ।

कुप्याध्यक्ष इत्यादि । कुप्याध्यक्षः, द्रव्यवनपालैः वार्क्षवनरक्षिभिः, कुप्यं सारदार्वादि, आनाययेद् आवाहयेत् । द्रव्यवनकर्मान्तांश्च दारुनिर्मेयान् गृहशकटादिकान्, प्रयोजयेत् कारयेत् । द्रव्यवनच्छिदां च द्रव्यवनच्छेदोपजीविनां च वृक्षममंज्ञानाम्, देयं छेदनीयशिरश्शाखास्कन्धमूलभागभेदेन छेदनदुर्गतारणाद्यर्थे प्रदेयं वेतनं, स्थापयेद् एतावदिति व्यवस्थापयेत् । अत्ययं च दण्डं चाननुज्ञातच्छेदने, स्थापयेत् । किं सर्वदा, नेत्याह—अन्यत्रापद्भ्य इति । शकटयुगभङ्गादिविपत्प्राप्तौ तु कालविलम्बासहयुगयोजनाद्यर्थे अननुज्ञातच्छेदनं नापराधः ।

चाणक्यटीका

पूर्ववदेव पण्यगृहविषयव्यापारानन्तर्येण कुप्याध्यक्ष इति प्रकरणमुच्यते—कुप्याध्यक्ष इति । सन्निधात्राधिकृतः कुप्याध्यक्षः । द्रव्यवनपालैरिति 'द्रव्यवनम्' 'अटव्याश्रयम्' इति वचनाद् आटविकैरित्यर्थः । कुप्यम् असारं द्रव्यं वक्ष्यमाणप्रपञ्चम् आनाययेत् । (हो ? रथा) द्युपकरणार्थम् । द्रव्य (वन)कर्मान्तानिति द्रव्यवन एव छेदकतक्षकादिभिः, नावाद्यर्थान् उदकाश्रयेण, कर्मान्तान् स्वपुरुषैरधिष्ठाप्य कारयेत् । द्रव्यवनच्छिदामिति द्रव्यवनं छिन्दन्ति इति द्रव्यवनच्छिदः विनाज्ञया अन्येषां देयम् छिन्नद्रव्यमूल्यम्, अत्ययं च "मृगद्रव्यवनान्मृगद्रव्यापहारे शत्योदण्डः" (अधि० ४ अध्या० १०) इति । अस्मादन्यदनुक्तमपि स्थापयेत् । अन्यत्रापद्भ्य इति अग्निचोराद्युपद्रवे स्तम्भशाखाद्यर्थं गृह्णन्तो न दण्ड्या इत्यर्थः ॥

[एतत्प्रकरणप्रतिपाद्येषु कुप्यवर्गेषु
सारदार्वादिवर्गपञ्चकव्युत्पादनं]

कुप्यवर्गः—शाकतिनिशधन्वनार्जुनमधूकतिलकसालशिंशपाऽरिमेदराजादनशिरीषखदिरसरलतालसर्जाश्वकर्णसोमवल्ककशाम्रप्रियकधवादिः सारदारुवर्गः ।

प्रतिपदपञ्चिका

कुप्याध्यक्ष इति सूत्रम् । कुप्यं सारदारवेणवल्लिवल्कादिः, तत्र नियुक्तः कुप्याध्यक्षः तस्य कुप्यद्रव्य विषयो व्यापारस्स इहाभिधीयत इति सूत्रार्थः । सम्बन्धस्तु कोशप्रवेश्यरत्नपरीक्षायां रत्नसारफल्गुकुप्यानां प्रतिग्रहणमुक्त्वा तत्र रत्नसारफल्गूनां प्रतिग्रहणमभिहितम् । कुप्यस्य तु नोक्तम् । तदभिधीयत इति, अथवा, सन्निधाता कोशग्रहणादीनि कारयेदिति, तत्र कुप्यग्रहणस्यविधानमुक्तम् । तत्राध्यक्षस्तद्व्यापारो वा नोक्तः, सोऽभिधीयत ।

तदाह—कुप्याध्यक्ष इति, सद्रव्यवनपालैः सारदार्वादिद्रव्यनारक्षैः कुप्यं वक्ष्यमाणं[1] सारदार्वादि आवाहयेदानाययेत् । द्रव्यवनकर्मान्तांश्च ग्रहशाकटपर्याणकल्पनादिकान् प्रयोजयेत् । कारयेद् द्रव्यवनच्छिदांश्च द्रव्यवनोपजीविनां कार्पटिकानां देयम् । शिरस्कन्धशकटादि भारभेदेन प्रदेयम् । यस्य यावत् प्रमाणमित्येतस्मिन् द्रव्ये छिन्ने दुर्गे वा प्रवेशिते एतावद्वेतनमिति तथा अत्ययं च दण्डमननुज्ञातस्यच्छेदे स्थापयेत् । तस्यापवादोऽन्यत्रापद्भ्य इति, अक्षभङ्गादिकेभ्यः शकटिकादीनामक्षभङ्गादौ तदुपयोगिमात्रभेदनं[2] न दोषः ।

श्रीमूला

कुप्यवर्ग इति । वक्ष्यत इति शेषः । अयं चाधिकारः । तत्र शाकाद्येकविंशतिः सारदारुवर्ग इत्याह—शाकतिनिशेत्यादि । शाकः पृथुच्छदाख्यो वृक्षः, तिनिशो नेमी, धन्वनः धनुर्वृक्षः, अर्जुनः ककुभः, मधूकः मधुद्रुमः, तिलकः क्षुरकः, सालः कार्ष्यकाख्यः, शिंशपा तीक्ष्णधूमाख्या, अरिमेदः विट्खदिरः पूतिखदिराख्यः, राजादनः फलाध्यक्षाख्यः, शिरीषः कपीतनः खदिरस्तिक्तसाराख्यः, सरलः पूतिकाष्ठाख्यः तालः तृणद्रुमः, सर्जः पीतसालकः, अश्वकर्णः सर्जभेदः, सोमवल्कः सितखदिरः, कशः लोमशपुच्छको नकुलवृक्षभेदः, आम्रश्चूतः, प्रियकः गौरसर्जः, धवः धुरन्धराख्यः, आदिग्रहणमनुक्तसङ्ग्रहार्थम् ।

---

१. मात्रच्छेदनमिति पा० ।

२. अन्यत्र पाठो न दृश्यते ।

उटजचिमियचापवेणुवंशसातीनकण्टकभाल्लूकादिः वेणुवर्गः। वेत्र-शीकवल्लीवाशीश्यामलतानागलतादिर्वल्लीवर्गः। मालतीमूर्वार्कशणगवेधुकातस्यादिः वल्कवर्गः ॥

चाणक्यटीका

कुप्यवर्गः कथ्यत इति शेषः। शाकः अनेनैव नाम्ना (वृतको ? विदितो) वृक्षः तिनिशः स्पन्दनः। अरिमेदः सुवर्णः। शेफालिका। राजादनः क्षीरिका। सोमवल्को रोहिणीवृक्षः अरिष्ट इत्यन्ये। प्रियकः प्रियाल इत्यन्ये। आदिग्रहणात् तिन्दुकादिपरिग्रहः। अयं सारदारुवर्गः तथा असारोऽपि पलाशोदुम्बरादिदारुवर्गोऽनुक्तोपि ग्राह्यः ॥

उटजः त्वचिसार एव नलकल्पः येन विदलानि क्रियन्ते। निर्दुष्टः (चिमियः) असुषिरः। स च स्थिरः, चापः सुषिरो विघनो धनुष्युपयुज्यते।

प्रतिपदपञ्चिका

कुप्यवर्ग इत्यधिकारः। वक्ष्यय इति वाक्यशेषः।

शाकादिर्विंशतिविधं सारदारुवर्गमाह—शाकेत्यादि। तत्र सोमवल्को रोहणः अभिच्छत्रको वनंवह इति तद्देशप्रसिद्धं प्रियकोसनः शेषाः शाकादयो यथा देशप्रतीताः आदिग्रहणमर्जुनरक्तचन्दनादि परिग्रहार्थम्।

श्रीमूला

वेणुवर्गमाह—उटजेत्यादि। उटजो महासुषिरस्तनुकण्टकः कर्कशपृष्ठः, चिमियो निस्सुषिरो मृदुत्वक्कः, चापः स्वल्पसुषिरोऽतिखरश्च, वेणुर्निष्कण्टकश्चापयोग्यः, वंशो दीर्घपर्वकः, सरन्ध्रः सकण्टकश्च, सातीनकण्टकौ वेणुभेदौ, भाल्लूकः स्थूलदीर्घो महाप्रमाणो निष्कण्टकः।

वल्लीवर्गमाह—वेत्रेत्यादि। वेत्रं प्रसिद्धम्, शीकवल्ली हंसवल्लीति देशविशेषप्रसिद्धा, वाशी अर्जुनपुष्पसमानपुष्पा, श्यामलता त्रिपुटीसदृशी, नागलता नागजिह्वा।

वल्कवर्गमाह—मालतीत्यादि। मालती माहूलानीति देशविशेषप्रसिद्धा, मूर्वा मरुलिति द्रविडप्रसिद्धा, अर्कः शणोऽतसी च प्रतीताः, गवेधुका नागवला।

चाणक्यटीका

वेणुः कण्टकमयो वृतिपूपयुज्यते। वंशः सुषिरो दीर्घपर्वा गन्धर्ववीणादिषु उपयुज्यते। सा(ती)नः पिटक (वञ्छि ? मश्चि) काद्युपकरणोपयोगी। कण्टकः शरस्थापनार्थः कोटक इत्यन्ये पठन्ति। भल्लको महापरिणाहः। नेपालेपूत्पद्यते। क्षीरादिभाजनार्थः। आदिशब्दाद् देशभेदेन अनुक्तोऽपि भेदो ज्ञेयो वेणुवर्गः वेणुशब्दस्य सामान्यवाचित्वात्।

[रज्जुनिर्माणलेखनरञ्जनानां साधनानि]

मुञ्जवल्वजादि रज्जुभाण्डम् ॥

तालीतालभूर्जानां पत्रम् । किंशुककुसुम्भकुङ्कुमानां पुष्पम् ॥

[औषधवर्गः विषवर्गश्च]

कन्दमूलफलादिरौषधवर्गः ॥

चाणक्यटीका

वेत्रं वेत्रमेव शिकवल्ली कालवेत्रवल्ली वाशी पाठिकाकारा पत्रावृत्तिपूपयुज्यते। श्यामलता प्रसिद्धा। नागलता नागवल्ली वातिकोपयोगिनी। आदिशब्दाद् अन्या अपि ग्राह्याः। अयं वल्लीवर्गः॥

मालती मालका। (लुता दुर्यो ?) द्विविधा लता (पत्रगुच्छत्वक् ?) गवेधुका चञ्चुः। आदिग्रहणादन्येऽप्येवंजातीयका ग्राह्याः॥

प्रतिपदपञ्चिका

वेणुवर्गमाह—उटजेत्यादि, उटजौ महासुषिरस्तनुकण्टकः—कर्कशपृष्ठः चिमयो निस्सुषिरो मृदुत्वचो निष्कण्टक चापयोग्यो वेणुः चापः स्वल्पसुषिरोऽतिखरश्च वंशयोग्यो वंशो दीर्घपर्वकः सारन्ध्र सकण्टकश्च सातिनोवंशाष्टदर्पातरं कुणट्टादि स्वकटको महाप्रमाणो गोधूमसदृशफलः हाल्लकस्थूलदीर्घपर्वा महाप्रमाणो निष्कण्टक इति, आदिग्रहणात् अन्येषामपि कर्मण्यानां कीचकादीनां ग्रहणं भवतीत्ययं वेणुवर्गंपरिवर्जमाह—वेत्रादि वेत्रः प्रतीतः शोकवल्ली हिंसावल्लीति तद्देशीयानां प्रतीतावाशी, अर्जुनपुष्पसमानपुष्पश्यामलता त्रिवृत्सदृशा नागलता नागजिह्वेति वै ते प्रतियो ? आदिशब्दादन्यासामपि बन्धनादियोग्यानां वल्लीनां ग्रहणमिति वल्लिवर्गः।

वल्कवर्गमाह—मालत्यादि, मालतीमाहुलानीति तद्देशप्रसिद्धा, मूर्वा, मालीति द्रविडेषु प्रतीता, अर्कशणावेतसी च प्रतीताः। गवेधुका नागवला आदिग्रहणं कुहकूष्माण्डादिवल्कपरिग्रहार्थमिति वल्कवर्गम्।

श्रीमूला

रज्जुभाण्डादिकमाह—मुञ्जेत्यादि। मुञ्जवल्वजादि मुञ्जः शरः, बल्वजास्तृणविशेषः इत्येवमादि, रज्जुनिर्माणसाधनम्। तालीत्यादि। तालीतालभूर्जाः प्रसिद्धाः, तेषां पत्रं लेख्योपयोगि। किंशुककुसुम्भकुङ्कुमानाम्, पुष्पं वस्त्रादिरञ्जनसाधनम्।

ओषधिवर्गमाह—कन्दमूलेत्यादि। कन्दाः सूरणादयः, मूलान्युशीरादीनि फलानि आमलकहरीतक्यादीनि, एतदादिः ओषधिवर्गः।

चाणक्यटीका

मुञ्जवल्वजादीति, आदिग्रहणात् कुशकाशाद्युपग्रहः। तालीतालभूर्जानां पत्रं शासनोपयोगि। किंशुकादीनां पुष्पम्। आदिग्रहणात् केसराद्यपि।

कालकूटवत्सनाभहालाहलमेषशृङ्गमुस्ताकुष्ठमहाविषवेल्लितकगौरार्द्र-बालकमार्कटहैमवतकालिङ्गकदारदकाङ्कोलसारकोष्ट्रकादीनि विषाणि । सर्पाः कीटाश्च । त एव कुम्भगताः—विषवर्गः ॥

चाणक्यटीका

वज्रकन्दादिः, शृङ्गिबेरमूलादिः, हरीतकीफलादिः, आदिग्रहणाल्लोध्रत्वगादिः, पटोलपत्रादिः, सालनिर्यासादिः, स्नुहीक्षीरादिरूह्यः ॥

प्रतिपदपञ्चिका

रज्जुभाण्डादीन्याह—मुञ्जबल्वजेत्यादि, मुञ्जवल्वजाः काशाशाः आदिग्रहण-मेरकादर्दादिपरिग्रहार्थमिति, रज्जुभाण्डान्तसाधनं ताल्यादयः प्रतीताः तेषां पत्रं लेख्यनुपयोगि, किंशुकादयश्च प्रतीताः । तेषां पुष्पं वस्त्रादिरागोपयोगि ।

औषधवर्गमाह—कन्दमूलफलादिरौषधवर्ग इति, कन्दास्सूरणादयः मूला-घुशीरवृहत्यादीनि, फलान्यामलकहरीतक्यादीनि, आदिग्रहणं त्वक्पत्रादिपरिग्रहार्थ-मित्ययमौषधवर्गः ।

श्रीमूला

विषवर्गमाह—कालकूटेत्यादि । कालकूटोऽश्वत्थपत्राकृतिपत्रो वृक्षः पर्वान्त-राच्छुष्कमार्द्रं च निर्यासमुद्गिरति । वत्सस्येव नाभिरस्य वत्सनाभः, निर्गुण्डीसदृशपत्रं सूचीपत्रं नीलपल्लवं गोस्तनाकृतिफलं हालाहलम्, मेषशृङ्गमुत्पलमुकुलाकारम्, मुस्ता द्विविधा मुस्ताकारा खण्डशर्करोपमा च, शङ्खपाण्डरा चेति स्वामी, कुष्ठं कुष्ठसमान-कन्दम्, महाविषं मांसवर्णं स्तनचूचुकाकारम्, वेल्लितकं मूलजं कृष्णरक्तम्, गौरार्द्रं कन्दजं कृष्णम्, बालकं पिप्पल्याकारम्, मार्कटं कप्याकारम्, हैमवतं हिमवदुत्पन्नं दीर्घपत्रम् कालिङ्गकं कलिङ्गभवं यवाकृति, दारदकं दरदप्रभवं पत्रविषम्, अङ्कोल-सारकम् अङ्कोलवृक्षजं विषम्, उष्ट्रकम् उष्ट्रमेढ्राकारम्, इत्येवं षोडश, आदिग्रहणाद-नुक्तानामेकोनसप्ततिप्रकाराणां ग्रहणम् । तदेवं स्थावराणि विषाणि पञ्चाशीतिर्भवन्ति दशाश्रयाणि । तथा च भट्टस्वामिनः श्लोकः—

"त्वक्कन्दपत्रपुष्पाणि फलं निर्यास एव च ।
मूलं सारस्तथा धातुर्बीजं चेति दशाश्रयाः ॥
अव्यक्तरसगन्धानि तीक्ष्णान्येकरसानि च ।
पञ्चाशीतिर्विषाण्येवमुपदिष्टानि तत्त्वतः ॥" इति ।

जङ्गमविषाणि द्विविधान्याह—सर्पाः कीटाश्चेति । सर्पाः कृष्णसर्पादयः, कीटाः चित्रभेककौण्डिन्यकादयः । उभये चैते प्रत्येकं द्विविधाः संस्कृतासंस्कृतभेदेन । तत्रासंस्कृताः स्वभावस्थिताः । संस्कृतांस्त्वाह—त एवेति । त एव सर्पाः कीटाश्च, कुम्भगताः औपनिषदोक्तविधानेन संस्कृत्य कुम्भे त्रपुघटे संयोजिताः । स एष विषवर्गः ।

चाणक्यटीका

कालकूटनामा असुरः तस्य शोणिताद् देवासुरयुद्धे समुत्पन्नस्य अश्वत्थसदृश-वृक्षस्य कृष्णो निर्यासः कालकूटविषवीर्यः, अहिच्छत्रमलयकोङ्कशृङ्गिबेरपर्वतादिपूत्पद्यते।

वत्सनाभः वत्सनाभ्याकारः सिन्दुवारसदृशपत्रः, तत्समीपे वृक्षो न वर्धते, संसृष्टो वायुर्ज्वरयति, विन्ध्ये किष्किन्धायां चोत्पद्यते।

हालाहलः तालपत्रसंस्थानः, नीलपत्रः गोस्तनाकृतिफलो गुच्छः, तत्समीपे वृक्षादयो दह्यन्ते, हिमवति किष्किन्धायां कोङ्कणे च दक्षिणसमुद्रे जायते। मेष-शृङ्गाकृतिकन्दं मेषशृङ्गं (नन्दनम् ?) उत्पलनालसदृशं प्रावृषिजम् अ (वन्दैन्द ? दैनन्दि) नमिति विषान्तरं न पठन्ति। किन्तु मेषशृङ्गमेव उत्पलनालसदृशं मेषवत् प्रावृषिजं परिवर्तते, कामरूपगान्धारविषयादि (षु जायते)।

(मुस्ता) मुस्ताकृतिः, मलयकोङ्कणादिपूत्पद्यते। कुष्ठं कुष्ठसदृशम् उग्रगन्धम्।

महाविषमिति अतिक्रान्त (विष) विशेष (ण ?) म्, अन्यान्यपि विषाणि। अपरे महाविषमिति सूचीपत्रसदृशपल्लवं विषान्तरं वर्णयन्ति, तस्याधस्तात् क्षुद्रजन्तवो (दह्यन्ते)। अन्ये तु महाविषाणि त्रीणि (पैल्वी ? वेल्लि) तक-गौरार्द्रक-पालकानि। तत्र (पे ? वे) ल्लितकं परिवेष्टिताकारकन्दम् गौरार्द्रकं श्वेतम् आर्द्रकाकारम् यद् ब्रह्मघोषमाहुः[1] सिन्धुनेपालकिष्किन्धादिपूत्पद्यते। पालकं पालकाकारं श्वेतकन्दम्। यत् पुण्डरीकमाहुः[2] गान्धारबाह्लीकेपूत्पद्यते।

मर्कटकं तदाकारमेव।

सक्तुकं[3] सक्तुवच्चुर्णीभवत्काण्डम्। हैमवतकालिङ्गकदारदकादिस्वप्रभवनामानि तद्देशप्रसिद्धानि। अङ्कोलसारं नाम अङ्कोलपल्लवसदृशं हिमवत्युत्पद्यते। आदिग्रहणाद् विषतन्त्रोक्तानाम् अन्येषामपिप्युपसंग्रहः। यथोक्तमालम्बायनेन—

"त्वक्किट्टपुष्पपत्राणि फलं निर्यास एव च।
मूलं सारस्तथा बीजं धातुश्चेति दशाश्रयाः॥
अव्यक्तरसगन्धानि तीक्ष्णान्येकरसानि च।
पञ्चाशीतिर्विषाण्येवमुपदिष्टानि तत्त्वतः॥
किष्किन्धसह्यकोशलाः सकामवर्याः·····।
नेपालसिन्धुगान्धारबाह्लिकाः साहिच्छत्रकाः॥
भूयिष्ठप्रभवाश्चैव तथान्य·····तादयः।
स्थावराणां विषाणां हि तानि तानि वनानि च॥" इति॥

———

१. ब्रह्मघोषस्तु गरलविशेष इति केशवस्वामी।

२. पुण्डरीकं वालुकाख्य विषान्तरं।

३. विषविशेषवाचकोऽयं शब्दः मुद्रितकौटलीयेषु न दृश्यते।

[संग्राह्यचर्मादिवर्गः]

गोधासेरकद्वीपिशिंशुमारसिंहव्याघ्रहस्तिमहिषचमरसृमरखड्गगोमृगगवयानां चर्मास्थिपित्तस्नाय्वस्थिदन्तशृङ्गखुरपुच्छानि, अन्येषां वाऽपि मृगपशुपक्षिव्यालानाम् ॥

चाणक्यटीका

जङ्गमान्याह—सर्पा दर्वीकरा मण्डलिनो राजीवन्तो वा। कीटाश्च चित्रभेकादयः (शे ? शो) षणाश्रं कुम्भगताः।

प्रतिपदपञ्चिका

विषवर्गमाह—कालकूटेत्यादि, कालकूटोऽश्वत्थपत्राकृतिः पत्रो वृक्षपर्णान्तरान्निर्यासं मुञ्चन्ति(ट)वत्सनाहं(भं) द्विविधं, शुष्कंमार्द्रं च निर्गुण्डीसदृशपत्रं च हालाहलं सूचीपत्रं नीलवल्लवं गोस्तनाकृतिफलं मेषशृङ्गमुत्पलमुकुलाकारं मुस्ता द्विविधम्। मुस्ताकारा शङ्खपाण्डरा च (कुष्ठं) कुष्ठसमानकन्दम्, महाविषं मांसवर्णं स्तनचूचुकाकारं वेल्लितकं मूलजं कृष्णरक्तं गौरार्द्रं वालकन्दजं कृष्णं पलागं पिप्पली संस्थानं कटकम्, (मार्कटं)र्कय मेढ्राकृति हैमवतं दीर्घपत्रं हिमवत्प्रभवं कालिङ्गकं कलिङ्गप्रभवं यवाकृति, दारदरं दरदप्रभवं पत्रविषमम् अङ्कोलसारकं जम्बूफलम्, उष्ट्रकं उष्ट्रमेढ्राकृति, आदिग्रहणात् शेषाणामप्येकोनसप्ततीनांग्रहणम्, एवं एतान्यनुवर्तैस्सह पंचाशीति स्थावराणि विषाणि दशाश्रयणानि, तथा च—

"त्वक्कन्दपत्रपुष्पाणि फलं निर्यासमेव च।
मूलं सारस्तथा धातुर्बीजं चेति दशाश्रयाः॥
अव्यक्तरसनान्यन्त्यानीतितीक्ष्णान्येकरसानि[1] च।
पञ्चाशीतिर्विषाण्येवमुपदिष्टानि तत्वतः॥ इति।

विषाणिस्थावराण्यभिधाय जङ्गमान्याह—तानि च द्विविधानि संस्कृतान्यसंस्कृतानि च, सर्पा इत्यादि, तत्र सर्पाः कृष्णसर्पा इत्यादि, कीटाश्चित्रभेककौण्डिन्यादयः, संस्कृतान्याह, त एवेति, त एव कृष्णसर्पादयः कुम्भगताः उपनिषद्विधानेन त्रापुषे कुम्भे संयोजिताः इत्ययमुभयप्रकारो विषवर्गः।

श्रीमूला

अथ चर्मादिवर्गानाह—गोधासेरकेत्यादि। सेरकः गौरत्वग् गोधाभेदः, द्वीपी चित्रकायः, सृमरः शरभः, अन्ये प्रसिद्धाः, एषां चर्मादीनि कुप्याधिकारात् कुप्यसंज्ञानि सङ्ग्राह्याणि च भवन्ति। अन्येषां वापि अनुक्तानामपि मृगपशुपक्षिव्यालानाम्, चर्मादीनि यथोपयोगं सङ्ग्राह्याणि।

---

१. अव्यक्तरस गन्धानि इति श्रीमूलायाम्।

[लोहवर्गः भाण्डद्वैविध्यं अङ्गारादेः कुप्यता च]

कालायसताम्रवृत्तकांस्यसीसत्रपुवैकृन्तकारकूटानि लोहानि। विदलमृत्तिकामयं भाण्डम्। अङ्गारतुषभस्मानि मृगपशुपक्षिव्यालवाटाः। काष्ठतृणवाटाश्चेति।

चाणक्यटीका

गोधा प्रतीत। शेरकः शाहिका। ऋक्षो भल्लूकः। द्वीपिव्याघ्रयोरल्पमहत्तया भेदः। (.......लमरोपप्र? वालरोमोपल) क्षिताश्चमर्यः। तथा खड्गिनः सृमरो मृगः। गोमृगो गवाकृतिः। एषां यथायोगं चर्मादि गृह्णीयात्। पुच्छग्रहणेन वालाः परिगृह्यन्ते। मूषिकादयस्त्वकुप्याः प्रागुक्ताः। अन्येषां चानुक्तानां मृगादीनां (यथानि?) आहरेत्॥

प्रतिपदपञ्चिका

चर्मादिवर्गानाह—गोधेत्यादि, सेरको गोरत्वक् द्वीपी चित्रकादयः सृमरः शरभः शेषाः प्रतीताः तेषां चर्मादीनि यथासम्भवं सङ्ग्राह्याणि कुप्यसंज्ञकानि च भवन्ति। अन्येषामप्युक्तव्यतिरेकेण पशुमृगपक्षिव्यालानां यथोपयोगं चर्मादयः संग्राह्या इति।

श्रीमूला

लोहान्याह—कालायसेत्यादि। आकारकर्मान्तप्रवर्तनप्रकरणे पूर्वमुक्तानामपि लोहानामिह पुनः पाठः कुप्यसंज्ञार्थः।

भाण्डमाह—विदलेत्यादि। भाण्डं, विदलमृत्तिकामयं विदलमयं वंशवेत्रादिमयं पिटकफेलकादि मृत्तिकामयं कुलालभाण्डं घटशरावादि। अङ्गारेत्यादि। अङ्गारतुषभस्मानि, मृगपशुपक्षिव्यालवाटाः मृगादीनां वाटाः स्थानानि, काष्ठतृणवाटाश्च-काष्ठतृणानां समूहाश्च कुप्यसंज्ञास्तेऽपि सङ्ग्राह्याः।

चाणक्यटीका

कालायसादिः सप्तावयवो लोहवर्गः सुवर्णरूप्ययोश्चानुरूप्य (त्व?) त्।

विदलमयं भाण्डं पि (ट) क आटविकः शूर्पादिः। मृत्तिकामयं घटपिठरादिः।

तथा अङ्गारादीनि कुप्यानि। एवं (वट? पश) वो गोमहिषाजाविकादयः। मृगा राज्ञः क्रीडार्थं संरुद्धाः। पक्षिणो मयूरशारिकादयः। व्याला व्याघ्रादयः। एषां (अकट?) वेष्टितानि दारूणि वाटाः तदर्था वा वृतयः सारदारुभिः कार्याः। काष्ठतृणानां च वाटाः प्रजारक्षिताः कार्याः। तदर्था वा वृतयः॥

प्रतिपदपञ्चिका

लोहवर्गमाह—कालायसेत्यादि, कालायसादीनि कृतव्याख्यानानि तेषां कुप्यासंज्ञार्थमिह पाठः। भाण्डमाह—विदलं मृत्तिकामयं भाण्डमिति, भाण्डमिति भाण्डशब्दः प्रत्येकं विदलमयं वंशवेत्रादिमयं विटकफेलकादिभाण्डं मृत्तिकामयं

[द्रव्यवनोपकरणावश्यकता]

बहिरन्तश्च कर्मान्ताः विभक्तास्सर्वभाण्डिकाः ।
आजीवपुररक्षार्थाः कार्याः कुप्योपजीविना ॥९१॥

इत्यध्यक्षप्रचारे कुप्याध्यक्षः सप्तदशोऽध्यायः
आदितोऽष्टात्रिंशः

प्रतिपदपञ्चिका

स्थालीपिटकादिकुलालभाण्डमङ्गारादीनि कुप्यद्रव्याण्याह—अङ्गारेत्यादि, अङ्गार तुषभस्मानि प्रतीतानि, पशुमृगपक्षिव्यालास्सहतास्तदवस्थानानि वा पाटाः काष्ठ-तृणवटाः तत्समूहास्सर्व एवैते कुप्याध्यक्षेण संग्राह्याः कुप्यसंज्ञका भवन्तीति ।

श्रीमूला

अध्यायान्ते श्लोकमाह—बहिरिति । बहिः द्रव्यवननिकटप्रदेशे जनपदे च, अन्तश्च दुर्गाभ्यन्तरे च, कर्मान्ताः शकटादिघटनरूपाः, विभक्ताः असंकीर्णाः पृथगवस्थानाः, सर्वभाण्डिकाः सर्वविधभाण्डसम्बद्धाः, आजीवपुररक्षार्थाः आजीवार्थाः जीविकाप्रयोजनाः हलमुसलशकटादयः पुररक्षार्था यन्त्रायुधादयश्च, कार्याः कारयितव्याः, कुप्योपजोविना तत्तत्कुप्यशिल्पाजीवेन प्रयोज्यकर्त्रा कुप्याध्यक्षेण प्रयोजकेन ॥

इति कौटिलीयार्थशास्त्रव्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तदशोऽध्यायः कुप्याध्यक्षः, आदितोऽष्टात्रिंशः ॥

चाणक्यटीका

बहिरन्तश्चेति बहिः राष्ट्रे, अन्तश्चनगरे । कर्मान्ताः कुप्यानाम् । विभक्ताः अन्यत्र सारदारुभिः अन्यत्र वेणुभिरित्यादिना । सर्वभाण्डिकाः उपकरणभाण्डयुक्ताः । आजीवकर्मान्ताः.....लशकटाद्यर्थाः । पुरकर्मान्ताः कवाटगोपुराद्यर्थाः । कुप्योपजीविनेति । तत्र नियुक्तेनाध्यक्षेणेति ॥

॥ इति कुप्याध्यक्षः सप्तदशं प्रकरणं समाप्तम् ॥
॥ सप्तदशश्चाध्यायः ॥

प्रतिपदपञ्चिका

अध्यायप्रान्ते श्लोकमाह—बहिरित्यादि, बहिर्द्रव्यवनसमीपे जनपदे च तथान्तश्च दुर्गाभ्यन्तरे कर्मान्तरश्शकटादिघटनारम्भः विभक्ताः द्विविधा आजीवपुर-रक्षाभेदेन सर्वभाण्डिकाः सर्वकर्मोपयोगिनः आजीवार्था जीविकासाधनभूताः फालश-कटादयः पुररक्षार्थाः यन्त्रायुधाद्यावकार्याः कर्तव्याः । संग्राह्याश्च कुप्योपजीविना कुप्याध्यक्षेणेति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायां अर्थशास्त्रटीकायां
अध्यक्षप्रचारिके द्वितीयेऽधिकरणे सप्तदशोध्यायः ।
आदितः कुप्याध्यक्षकाष्टात्रिंशोऽध्यायः ॥

षट्त्रिंशं प्रकरणम्

अष्टादशोऽध्यायः ।

आयुधागाराध्यक्षः ।

[योगक्षेमोपकरणयन्त्रायुधादिसम्पादनं
तद्रक्षणादिक्रमश्च]

आयुधागाराध्यक्षः साङ्ग्रामिकं दौर्गकर्मिकं परपुराभिघातिकं चक्रयन्त्रमायुधमावरणमुपकरणं च तज्जातकारुशिल्पिभिः कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारयेत् । स्वभूमौ च स्थापयेत् । स्थानपरिवर्तनमातपप्रवातप्रदानं च बहुशः कुर्यात् । ऊष्मोपस्नेहक्रिमिभिरुपहन्यमानमन्यथा स्थापयेत् । जातिरूपलक्षणप्रमाणागममूल्यनिक्षेपैश्चोपलभेत ॥

श्रीमूला

आयुधागाराध्यक्ष इति सूत्रम् । आयुधशालाध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः । कुप्यप्रसङ्गात् तदन्तर्गतायुधप्रस्तावसङ्गतिः । अथवा सन्निधातुरायुधागारकरणं पूर्वमुक्तम्, तदध्यक्षस्त्वनुक्त इहाभिधीयत इति सङ्गतिः ।

आयुधागारेत्यादि । आयुधागाराध्यक्षः, साङ्ग्रामिकं सङ्ग्रामप्रयोजनकम्, दौर्गकर्मिकं दुर्गकर्म स्वदुर्गरक्षणं तत्साधकं परपुराभिघातिकं शत्रुदुर्गविध्वंसनानुकूलम्, यन्त्रं सर्वतोभद्रजामदग्न्यादि, चक्रयन्त्रमिति मूलपाठश्चिन्त्यः । आयुधं शक्तिचापादि, आवरणं लोहजालादि, उपकरणं च युग्यादि च, तज्जातकारुशिल्पिभिः तज्जातैस्तत्कर्मसमर्थैः कारुभिः स्थूलकर्मकारिभिः शिल्पिभिः सूक्ष्मकर्मकारिभिश्च, तैः कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृतकर्मप्रमाणकालवेतना कर्मप्रमाणं कर्तव्ययन्त्रायुधादीनां सङ्ख्यासंस्थानादिमानं कालोऽवधिः वेतनं भृतिरित्येतानि कृतानि परिभाषितानि यस्यां सा तथाभूता फलनिष्पत्तिर्यन्त्रादिनिष्पत्तिर्येषां तैस्तथाभूतैः, कारयेत् । स्वभूमौ च स्थापयेदिति । कारितानि च तानि स्वायत्ते स्थाने निवेश्य रक्षेत् । स्थानपरिवर्तनं स्थानात् स्थानान्तरनिवेशनम्, आतपप्रवातप्रदानम् आतपवातविसारणं च, तेषां बहुशः असकृत् त्रिचतुर्दिवसात्यासं, कुर्यात् । ऊष्मोपस्नेहक्रिमिभिः घर्मप्रस्वेदघुणकादिभिः, उपहन्यमानम्, अन्यथा प्रकारान्तरेणानुपघातहेतुना, स्थापयेत् । जातीत्यादि । जात्यादिभिश्च उपलभेत तानि विजानीयात् । तत्र जातिः स्वभावः पाटनादिः, रूपमृजुवक्रतादि, लक्षणं शास्त्रोक्तमुत्तमादिचिह्नं,

श्रीमूला

प्रमाणं मानोन्मानतो दैर्ध्यविस्तारादिपरिच्छेदः, आगमः यतो लब्धं सः, मूल्यम् अर्घः, निक्षेपः कोशभस्त्रादिः ।

चाणक्यटीका

उक्तविशेषण एव आयुधागाराध्यक्षोऽभिधीयते । 'कुप्यानामायुधेश्वरः' इत्यत्र एकप्रकरणत्वं वक्ष्यामः[1] । सन्निधातृप्रयुक्त एव वा आयुधागाराध्यक्षः साङ्ग्रामिकं सङ्ग्रामयोग्यम् । दौर्गकर्मिकं दुर्गकर्मणे प्रभवम् । परपुराभिघातिकं च परदुर्गाभिघाते यत् प्रभवति । यन्त्रादिचतुष्टयं तज्जातैः कारुभिः शिल्पकैस्तद्वित्तकैः । इदं कर्म नवम्, (एतत्) प्रमाणम्, एतावता कालेन भवद्भिः कर्त्तव्यम्, इयद् वेतनम्, इदृशी च फलनिष्पत्तिः इति कृतव्यवस्थैः कारयेत् ।

तानि च स्वभूमिषु स्वयोग्यासु स्थापयेत् । यद्यपि स्वस्थानस्थितानि तथापि तेषां स्थानपरिवर्तनम् आतपप्रवातप्रदानं च विनाशपरिहारार्थं बहुशः कुर्यात् । तथा उष्मणा सङ्घर्षजेन उपस्नेहेन भूमेः, क्रिमिभिश्च उपहन्यमानम् । अन्यथा प्रवातेऽन्यत्र वा स्थापयेत् । एवं जातिभेदेन शक्तिरसिरिति । देशभेदेन विना शास्त्रं दाक्षिणात्यमिति । रूपेण मण्डलाग्रमन्तरिति (?) । लक्षणेन (अर्धवा ?) अर्धवंशो निर्वंश इति । प्रमाणेन उत्तमो मध्यमोऽधम इति । आगमेन (कृतमाहितो मध्यमामुदासीनमल्पेन शक्त्या साहस्र इति ?) । निक्षेपेण वैयाघ्रकोश (पो ? रौ) रथकोश इति । विद्याद् असंमोहनार्थम् ।

प्रतिपदपञ्चिका

आयुधागाराध्यक्ष इति सूत्रम् ।

सूत्रार्थः । सम्बन्धस्तु कुप्याध्यक्षोऽभिहित एव । आयुधादीनां कुप्यान्तर्गतत्वादथवा सन्निधाता कोशगृहादीनि कारयेदित्यत्र पृथगायुधागारकरणमुक्तम् । तदध्यक्षः तद्व्यापारो वा नाभिहितः सोऽभिधीयत इति सम्बन्धः । तदाह— आयुधागाराध्यक्ष इत्यादि, स सङ्ग्रामादिति प्रयोजनम् । यन्त्रादिचतुर्विधं द्रव्यजातं वक्ष्यमाणलक्षणैः कारुशिल्पिभिः कारयेत् । तत्र साङ्ग्रामिकं युद्धप्रयोजनं दौर्गकर्मिकं स्वदुर्गरक्षणसमर्थं परपुराभिघातकं परदुर्गलङ्घननिमित्तं यन्त्रं जामदग्न्यादि उपकरणं युग्यभाण्डादि । चस्समुच्चये तद्ज्ञातास्तत्कर्मनिपुणाः कारवः स्थूलकर्मकृतः शिल्पिनः सूक्ष्मकर्मकृतः कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिरिति कृतशब्दः प्रत्येकं, कर्मप्रमाणं स्थपतिप्रामाण्यादिष्टकादिकर्मरचना कालोवधिवेतनं मूल्यं फलनिष्पत्तिर्यन्त्रादिनिष्पत्तिः एवं कृताः परिकर्मप्रमाणादयो येषां तैः कारयेदिति केचित् । अथवा कृतकर्मप्रमाणैः परिभाषितकर्तव्ययन्त्रायुधादि सङ्ख्यैः एवंकृतकालैः कृतावधिभिः कृतवेतनैः परिभाषितमूल्यैः कृतफलनिष्पत्तिभिः बहुशो दृष्टकर्मभिः कारयेदिति ।

---

१. प्रस्तुताध्यायान्ते ।

[स्थितचलयन्त्राणां आयुधानां च निर्देशः]

सर्वतोभद्रजामदग्न्यबहुमुखविश्वासघातिसङ्घाटियानकपर्जन्यकबाहूर्ध्वबाह्वर्धबाहूनि स्थितयन्त्राणि। पञ्चालिकदेवदण्डसूकरिकामुसलयष्टिहस्तिवारकतालवृन्तमुद्गरद्रुघणगदास्पृक्तलाकुद्दालास्फोटिमोद्घाटिमोत्पाटिमशतघ्नीत्रिशूलचक्राणि चलयन्त्राणि शक्तिप्रासकुन्तहाटकभिण्डिपालशूलतोमरवराहकर्णकणयकर्पणत्रासिकादीनि च हलमुखानि।

प्रतिपदपञ्चिका

तानि च कृतानि स्वभूमिष्वनुपघातिषु स्थापयेत्। स्थानपरिवर्तनं स्थानान्तरसन्तरणं आतपप्रवातदानं विसारणं बहुशस्त्रि चतुर्दिनानन्तरं कुर्यात्। ऊष्मणा घर्मेण उपस्नेहेन प्रस्वेदेन कृमिभिः घुणकसारिकादिभिः उपहन्यमानं विदूष्यमाणं अन्यथेति। यथा नोपहन्यते तथा स्थापयेत्। तानि जात्यादिभिश्च सप्तभिरुपलभेत। तत्र जातिः पाटनादिः रूपमृजुपत्रादि प्रमाणविस्तारतः पृथुत्वमायामतश्च लक्षणामागमोक्तम् प्रशस्तादिलिङ्गम् आगमो यतो लभ्यं मूल्यं शतादि निक्षेपः कोशभस्त्रादिः चस्समुच्चये।

श्रीमूला

यन्त्राण्याह—सर्वतोभद्रेत्यादि। अत्र स्वामी व्याचष्टे—"तत्र सर्वतोभद्रं शकटचक्रप्रमाणं तीक्ष्णनेमि कुड्यास्थितगन्धर्वहस्तथं भ्रमणात् सर्वतः पाषाणान् क्षिपति। अपरे तु सिद्धभूमिकायन्त्राख्यं लघुतरपाषाणक्षेपणमाचक्षते। जामदग्न्यंमध्यरन्ध्रविनिहितमहाशरं यन्त्रम्। बहुमुखं प्राकारोत्सेधाधिगतश्चक्रसन्निविष्टचर्मावृतस्त्रिचतुस्तलो धानुष्काधिष्ठानश्च अट्टालको भवति। तत्र स्थिता धन्विनो नराः सर्वतः शरान् क्षिपन्ति। विश्वासघाति तिर्यगवस्थितो नगरस्य बहिः परिघो यन्त्रविश्लेपणेन हन्ति। सङ्घाटि दीर्घकाष्ठसंघटितमट्टालकादिप्रदीपनार्थमग्नियन्त्रम्। यानकं चक्रारूढं दण्डायतं फलककोष्ठि। पर्जन्यकमग्निप्रशमनार्थमुदकयन्त्रम्, अन्ये तु पञ्चाशद्धस्तायतं बहिः प्राकारस्य सन्ततं यन्त्रविश्लेपणेन समीपगतं व्यापादयतीत्याचक्षते। विश्वासघातिनोऽस्य च विशेषः—तत् प्रच्छन्नं लघुतरं च भवति, एतत्तु तद्विपरीतमिति। बाहुयन्त्रं पर्जन्यकार्धप्रमाणं स्तम्भद्वयं परस्पराभिमुखं यन्त्रविश्लेपणेन मारयति। ऊर्ध्वबाहु ऊर्ध्वस्थितः पर्जन्यकप्रमाणो महास्तम्भः समीपगतान् विश्लेपणेन मारयति। अर्धबाहु पूर्वस्यैवार्धप्रमाणम्। इत्येवमेतानि दश यन्त्रविश्लेपणेन हन्ति। स्थितयन्त्राणि" इति।

चलयन्त्राण्याह—पञ्चालिकेत्यादि। पञ्चालिकं तीक्ष्णमुखनिरन्तरसारदारुफलकं प्राकाराद् बहिरुदकमध्ये शत्रुमार्गनिरोधार्थं क्रियते। देवदण्डः कीलरहितः महास्तम्भः

श्रीमूला

प्रतीतरोचाभिधान इति स्वामी। स प्राकारस्योपरि स्थाप्यते। सूकरिका सूत्रचर्ममयी कार्पासोर्णादिपूर्णमध्या महाभस्त्रा प्रमाणतो गोपुराट्टालकदेवपथादीनां प्रच्छादनो बाह्यपाषाणनिवारणाय क्रियत इति केचित्। 'वेणुमयी चर्मावृता सूकराकारा प्राकारग्रहणनिवारणाय क्रियत इत्यन्ये' इति स्वामी। मुसलयष्टिः खादिरः शूलः। हस्तिवारको 'द्विमुखस्त्रिमुखो वेति केचित्। हस्त्याघाताय हस्तिपरिघ इत्यपरे' इति स्वामी। तालवृन्तं वातचक्रम्। मुद्गरः प्रसिद्धः। द्रुघणो मुद्गराकारः। गदा लगुडी। स्पृक्तला गदैव कण्टकनिचिता। कुद्दालः खनित्रम्। आस्फोटिमं चर्मावृतं चतुःस्तम्भं मृत्पाषाणक्षेपणयन्त्रम्। उद्घाटिमं मुद्गराकृतिरेव यन्त्रभेदः। उत्पाटिमं स्तम्भाद्युत्पाटनं श्येनयन्त्रम्। शतघ्नी स्थूलदीर्घकीलाचितो महास्तम्भः पर्यन्ताहितशकटचक्रः प्राकारोपरि क्रियते। त्रिशूलचक्रे प्रसिद्धे। इत्येतानि सप्तदशचलयन्त्राणि। श्लोकश्चात्र भट्टस्वामिनः—

"व्यधितं भ्रामितं चैव भारयुक्तं च कारयेत्।
पीडनाद् भ्रमणाद् भारात् त्रिधा यन्त्रं प्रवर्तते॥" इति।

आयुधान्याह—शक्तिप्रासेत्यादि। शक्तिः सर्वलोहमयङ्करवीरपत्राकृतिमुखम् अधस्ताद् गोस्तनाकारं चतुर्हस्तदीर्घमायुधं, प्रासश्चतुर्विंशत्यङ्गुलो द्विपीठः सर्वलोहमयः काष्ठगर्भश्च, कुन्तः—

"हस्ताः सप्तोत्तमः कुन्तः षड्ढस्तैश्चैव मध्यमः।
कनिष्ठः पञ्चहस्तैस्तु कुन्तमानं प्रकीर्तितम्॥"

इत्युक्तलक्षणः, हाटकं त्रिकण्टकं कुन्ततुल्यप्रमाणं, भिण्डिपालः कुन्त एव पृथुफलः, शूलम् एकमुखमनियतहस्तप्रमाणं, तोमरः शराकृतिशिखः—

"चतुर्हस्तः कनिष्ठस्तु चत्वारोऽर्धं च मध्यमः।
उत्तमः पञ्चहस्तस्तु प्रमाणात् तोमरो भवेत्॥"

इत्यभिहितत्रिभेदः, वराहकर्णः प्रास एव वराहकर्णाकृतिमुखः, कणयः सर्वलोहमय उभयतस्त्रिकण्टकाकारमुखो मध्यमुष्टिः,

"कनिष्ठो विंशतिः स्यात् तदङ्गुलानां प्रमाणतः।
द्वाविंशतिर्मध्यमः स्याच्चतुर्विंशतिरुत्तमः॥"

इत्युक्तप्रकारत्रयः, कर्पणः तोमरतुल्यमानो हस्तक्षेप्यः पक्षयुक्तः शरः—

"कनीयः सप्तकर्षं तु द्विपलं मध्यमं भवेत्।
उत्तमं नवकर्षं तु कर्पणस्य पलं भवेत॥"

इत्युक्तत्रिप्रकारपलप्रमाणः, त्रासिका सर्वलोहमयी प्रासप्रमाणा चूडोपेता, इत्येवञ्जातीयान्यायुधानि, हलमुखानि तीक्ष्णाग्रत्वात्।

चाणक्यटीका

यन्त्राण्याह—सर्वतोभद्रं चक्रयुक्तत्वात् सर्वतो यथेष्टमवस्थापितं बाणान् मुञ्चति। अपरेत्वाहुः—सर्वतोभद्रं जा (न ? नु) मुदस्य धनुर्यन्त्रस्योर्ध्वमधस्तिर्यग्वा मुष्टिदेशसञ्चारणाद् यच्छरान् मुञ्चति। अपरः प्रकारः शिलायन्त्रं धनुर्यदेवंविधं तत् सर्वतोभद्रमेव। जामदग्न्यंतु सर्वायुधविसर्गम् अनेकप्रकारमिति।

बहुमुखं बहुच्छिद्रम् अट्टालकादिधानुष्कस्थानम्। विश्वासघातीति अन्तः कीलमोक्षणेन निब (त्त ? द्धत) लवद्धपरिघादिमद् विश्वस्तान् हन्ति।

सङ्घाटि (युग्मकवटे ?) भित्तिप्रकारादि यानकं चर्मोतं प्राकारदीर्घशालाकारम्, येनावृता युध्यन्ते वृक्षकवाट प्राकारादि वा नाशयन्ति।

पर्जन्यः लोहमुसलः (येन) अधोगता हत्वा शृङ्खलाप्रतिघादूर्ध्वं कृष्यन्ते।

बाहुरिव बाहुः यन्त्रसञ्चारितमूलो महार्गलः तिर्य(ग)न्तराद् घातयति।

ऊर्ध्वबाहुः (त्रिदश एव ?) उच्चताग्रः पञ्चाशद्धस्तायामः इन्द्र (द्व ? य) ष्टयाकृतिः रज्जुकीलसञ्चारादधः स्थितेषु पात्यते।

(स ?) एतस्यार्धम् अर्धबाहुरिति। एतानि महाप्रमाणत्वादेकदेशस्थितान्येव असञ्चारीणि यन्त्राणि।

पाञ्चालिका मनुष्यादिप्रतिकृतिः, या कुतूहलादपि स्पृष्टमङ्गं गृह्णाति विकलीकरोति वा।

देवदण्डो यन्त्रक्षेप्योऽरत्निमात्रो लकुटः[1]।

सुकरिका या बाह्यपाषाणनिवारणार्था चर्मभस्त्रा तूलकार्पासोर्णा (दिपूर्णा) गोपुरादिषु स्थाप्यते[2]।

मुसलयष्टिः क्षेप्यैव।

हस्तिवारकः अष्टहस्तप्रमाणः शरभाकृतिपादोऽर्गलाकारो (ऽन्वि)तार्थः[3]।

तालवृन्ताकृतिश्चर्ममयस्तालवृन्तोऽपि शस्त्रनिवारणार्थः।

मुद्गरगदे, यन्त्रक्षेप्ये।

स्पृक्कुला अश्मतुला अन्तर्गता (शा ? श्मा)वतरणाद् बहिरश्मनो मुञ्चति।

कुद्दालं तदाकृति, उत्पाटनार्थम्[4]।

---

१. "देवदण्डोऽरत्निमात्रदीर्घो मुसलयष्टिकः," इति वैजयन्ति।

२. "शूकरिका सूत्रचर्ममयी कार्पासोर्णादिपूर्णमध्या महाभस्त्रा प्रमाणतः गोपुराट्टालकादेव पथादीनां प्रच्छादिनी बाह्यपाषाणादिनिवारणाय क्रियत इति केचित्। वेणुमयी चर्मावृता सूकरा(कारा)प्राकारग्रहणनिवारणाय क्रियत इत्यन्ये" इति भट्टस्वामी।

३. हस्तिवारो गजत्रासहेतुः शरभसन्निभः" इति वैजयन्ती "हस्तिचारो गजत्रासहेतोः शरसन्निभे, हस्तिनश्च चारे" इति केशवस्वामी 'वार' स्थाने 'चार' पठति।

४. "कुद्दालस्तु पुमान् गोदारणाख्ये खनिसाधने। क्लीबंतु वैजयन्त्याह" इति केशवस्वामी।

चाणक्यटीका

आस्फोटिमम् आस्फोटेन निर्वृत्तं यन्त्रपाषाणम् ।

उत्पाटिमं शूलाकारं कवाटभञ्जनार्थम् ।

उद्घाटिमम् ऊर्ध्वोत्पाटनसमर्थं श्येन (यन्त्रम्) । सर्वत्र भावप्रत्ययान्ताद् इमनिच् ।

शतघ्नी कीलशतप्रचिता कपाटाकारा ऊर्ध्वमुक्ता हस्त्यादीन् मारयति ॥

तथा त्रिशूलं त्रिमुखम् ॥

चक्रयन्त्रं भ्रमणेन मारयति विकलीकरोतिवा । क्षिप्यमायत्वाच्चैतानि चलयन्त्राणि ॥

आयुधान्याह—शक्तिः चतुर्हस्ता (त् ?) काष्ठचतुर्भागा करवीरपत्रा मुखहला ॥ प्रासो लोहमयदण्डो वा उभयतोलोहः ॥

कुन्तम् अश्वसाद्यायुधञ्च (षट् ?) ।

"सप्तहस्तं भवेत् कुन्तं षड्ढस्तं चैव मध्यमम् ।
कन्यसं पञ्चहस्तञ्च (दण्ड ? कुन्त) मानं प्रकीर्तितम् ॥" इति

हाटकं तदेव त्रिकण्टकमुखम्[१] । भिण्डिपालः क्षेपणीयो दण्डभूयिष्ठः । शूलमायसं पट्टसाग्रम् । तोमरः कणयमुखो लोहशिरस्को दण्डः चतुष्पञ्चहस्तप्रमाणः भेदनमुखः ।

उक्तञ्च—"हस्ता हीनस्य चत्वारश्चतुरर्धं च मध्यमम् ।
पञ्चहस्तं तु ज्येष्ठं स्यात् प्रमाणात्तोमरं स्मृतम् ॥" इति ॥

वराहकर्णाकृतिमुखस्तोमर एव वराहकर्णः ॥

कणयोऽप्यायसोऽधममध्यमोत्तमः ।

उक्तञ्च—"कन्यसो विंशतिर्ज्ञेयः अङ्गुलानां प्रमाणतः ।
द्वाविंशतिर्मध्यमः स्याच्चतुर्विंशतिरुत्तमः ॥" इति ॥

कम्पनोऽप्येकमुखः सप्ताष्टनवकलोहः कणयः ॥

उक्तञ्च—"कनीयान् सप्तकर्षस्तु द्विपलो मध्यमो भवेत् ।
तृतीयो नवकर्षस्तु कम्पनस्तूत्तमो भवेत् ॥" इति ॥

प्रासिका[२] (इति) प्रासार्धशक्तिमाहुः । आदिशब्दादन्यान्यपि ग्राह्याण्येवं-जातीयकानि । एतानि हलमुखानि[३] भेद(न)मुखानीत्यर्थः ॥

---

१. "हाटकस्तु स त्रिकण्टक संस्थित" इति वैजयन्ती ।

२. प्रासिकेति मुद्रितकोश पाठः । प्रासः प्रहरणमस्य प्रासिक इति काशिका । (४.४.५७)

३. मूलकोशेषु हलमुखानीत्येव पाठो दृश्यते । "फलंतु मुनिना खड्गाद्यग्रे दृष्टम्" इति क्षीरस्वामी, (२.८९१) "धारा शस्त्रमुखं फलम्" इति वैजयन्ती, "फलं शस्त्राणां मुखे" "इति केशवस्वामी च । एवं खड्गाद्यायुधमुखवाचिनः फल शब्दस्य बहुत्र दर्शनात् फलमुखानीति पाठः संभाव्यते ।

प्रतिपदपञ्चिका

यन्त्राण्याह-सर्वतोभद्रमित्यादि, तत्र सर्वतोभद्रं शकटचक्रप्रमाणं तीक्ष्णनेमिकुड्यस्थितगन्धर्वहस्तस्थं भ्रमणात् सर्वतः पाषाणान् क्षिपति। अपरे तु प्रसिद्धम् भ्रमरिकायन्त्राख्यं लघुतरं पाषाणक्षेपणमाचक्षते।

जामदग्न्यं हर्म्यं रन्ध्रविहितमहाशरयन्त्रम्। बहुमुखः प्राकारोत्सेधातिगश्चक्रसन्निविष्टः चर्मावृतः। त्रिचतुस्तालो धानुष्काधिष्ठानं च अट्टालको भवति। तत्रस्था धन्विनो नरास्सर्वतश्शरान् क्षिपन्ति। विश्वासघाती तिर्यगवस्थितो नगरस्य बहिः परिघो यन्त्रविशेषेण हन्ति। सङ्कटिदीर्घकाष्ठसङ्घटिकाट्टालकादि प्रदीपनार्थमग्नियन्त्रम्। यानिकं चक्रारुढादण्डोहितलकूटि। पर्जन्यकमग्निप्रशमनार्थमुदकयन्त्रम्। अन्येतु पञ्चाशद्धस्तायतं बहिः प्राकारस्य सन्नद्धं यन्त्रविश्लेषणेन समीपगतं व्यापादयतीत्याचक्षते। विश्वास्यघातिनोऽस्य च विशेषः तत्प्रच्छन्नलघुतरं च भवति। एवं तु तद्विपरीतं पर्जन्यकार्थप्रमाणं स्तम्भद्वयं परस्पराभिमुखं यन्त्रविश्लेषणेन मारयति। ऊर्ध्वबाहुः उर्ध्वस्थितः पर्जन्यकप्रमाणोपहास्तम्भः समीपगतान्यन्त्रविश्लेषणेन हन्ति। अर्धबाहुः पूर्वस्यैवार्धप्रमाण इति, एवमेतानि दश स्थितयन्त्राणि। वंचालका तीक्ष्णमुखनिरन्तरता सारदारुफलका प्राकाराद् बहिरुदकं मध्ये कर्दमदण्डद्यपरमार्गनिरोधार्थम् क्रियन्ते। देवदण्डः कीलाहितो महास्तम्भः प्रतीतरोचाभिधानः प्राकारस्योपरि स्थाप्यते।

सूकरिकासूत्रचर्ममयी कार्पासोर्णादिपूर्णमध्यामहाभस्त्राप्रमाणतो गोपुराट्टालकदेवपथादीनां प्रच्छादिनी बाह्यपाषाणनिवारणाय क्रियत इति केचित्। वेणुमयी चर्मावृता सूकरप्राकारग्रहणनिवारणाय क्रियत इत्यन्ये। मुसलयष्टिः खादिरः शूलः हस्तिवारको द्विमुखः त्रिमुखो वा महादण्ड इति केचित्। हस्त्याघाताय हस्तिपरिघ इत्यपरे। तालवृन्तं वातचक्रं मुद्गरो द्रुघणः मुद्गराकारलकुटी (गुडी) त्यपरे। गदालकुटी प्रतीता स्त्रकतुवा (?) सैव कण्टकनिचिताकार कुद्दालः खनित्रं आस्फोटिमं चर्मावृतं सगोष्पणयष्ट्यपेतमृत्पाषाणक्षेपणयन्त्रं उद्घाटिमं प्रतीतं मुद्गराभिधानं प्राकाराट्टालकोद्धारणाय क्रियते। उत्पाटिमं स्तम्भादीनां भूमिनिखातानां उत्पाटनयन्त्रं बाह्यहलादिग्रहणार्थं क्रियते। शतघ्नी व्यूढदीर्घः कीलाचितो महास्तम्भः पर्यन्ताहितशकटचक्राप्राकारो परिक्रियते त्रिशूलश्चक्रं च प्रतीतम्। एवमेतानि सप्तदश चलयन्त्राणि, तथा च—

"पीडितं भ्रामितं चैव भारयुक्तं च कारयेत्।
पीडनाद्भ्रामणात् भारात्त्रिधायन्त्रं प्रवर्तते॥" इति।

आयुधान्याह शक्तीत्यादि, सर्वलोहमयी चतुर्हस्ताकारवीरपत्राकृतिमुखास्तनाकृतिरधस्तात्प्रासः चतुर्विंशत्यङ्गुलः स च द्विपीठस्सर्वलोहमयः काष्ठदन्तश्च, कुन्तस्त्रिविधः। तथा च—"हस्तास्सप्तोत्तमः कुन्तः षड्भिस्तैश्चैव मध्यमः। कनिष्ठः पञ्चहस्तैस्तु कुन्तमानं प्रकीर्तितम्"। इति। हाटकं त्रिमुखं कुन्तप्रमाणं। भिण्डिपालः कुन्त एव पृथुफलः। शूलमेरुशिखमनियतदण्डप्रमाणम्। तोमरशराकारमुखः त्रिप्रमाणः। तथा च—

[धनुर्ज्यावाणाः बाणाग्रसन्निवेशभेदाश्च]

तालचापदारवशार्ङ्गाणि कार्मुककोदण्डद्रूणा धनूंषि मूर्वार्कशणगवेणुस्नायूनि ज्याः। वेणुशरशलाकादण्डासननाराचाश्च इषवः। तेषां मुखानि छेदनभेदनताडनानि आयसास्थिदारवाणि।

प्रतिपदपञ्चिका

चतुर्हस्तः कनिष्ठस्तु चत्वारोऽर्धं च मध्यमः।
उत्तमः पञ्चहस्तस्तु प्रमाणं तोमरो भवेत्॥ इति।

वराहकर्णः प्रास एव वराहकर्णाकारफलः। कणयः सर्वलोहमयः उभयत्र शृङ्गाटकाकारफलो मध्यमुष्टिः। स च त्रिप्रमाणः। तथाच :—

"कनिष्ठं विंशतिं दद्यादङ्गुलानां प्रमाणतः।
द्वाविंशतिर्मध्यमः स्यात् चतुर्विंशतिरुत्तमः॥"

इति। कर्पणस्तोमरतुल्यदण्डो हस्तक्षेप्यश्च त्रिविधं च। तस्य फलप्रमाणम्, तथा च :—

कनीयस्सप्तकर्षंतु द्विपलं मध्यमं भवेत्।
उत्तमं नवकर्षन्तु कर्पणस्य फलं भवेत्॥
हस्तमुक्तो गुरुतया क्षेप्तृशिक्षावशेन च।
धनुश्शतं व्रजेत्साग्र(र्ध)र्थंइत्याह भृगुनन्दनः॥ इति

त्रासिका प्रासप्रमाणा सर्वलोहमयी स शूला भवति। आदिग्रहणं तीक्ष्णो ग्रवेणु सशरादिपरिग्रहार्थम्। एवमेतानि वहुलमुखानीति।

श्रीमूला

धनूंष्याह—तालेत्यादि। तालचापदारवशार्ङ्गाणि तालं तालमयं चापं वेणुविशेषमयं दारवं धन्वनादिसारवृक्षदारुनिर्मितं शार्ङ्गं विषाणमयम् इत्येवं चतुष्प्रकृतीनि, धनूंषि भवन्ति। तानि च कार्मुककोदण्डद्रूणाः आकृतिक्रियादिभेदात् कार्मुकादिसंज्ञानि भवन्ति। तत्र कार्मुककोदण्डयोः प्रमाणलक्षणादिकं धनुर्वेदादवगन्तव्यम्, 'द्रूणस्तु लोकप्रतीत' इति स्वामी।

ज्या आह—मूर्वेत्यादि। स्नायुर्वायुवाहिनी नाडी। शेषं प्रतीतम्। तत्र वेणुविदलज्या कोदण्डस्यैव, अन्ययोस्त्वन्या इति स्वामी।

इषूनाह—वेण्वित्यादि। तत्र वेणुरूटजर्चिमियादिः, शरो जात्यशराख्यः स्तम्बः, शलाका सारदारुमयी, दण्डासनोऽर्धनाराचः, नाराचः सर्वलोहमयः। चकारो भ्रमरद्रोणमक्षिकादिसंग्रहार्थं इति स्वामी। इषुकर्माण्याह—तेषामिति। तेषाम् इषूणां, मुखानि अग्राणि, छेदनानि कर्तनानि, भेदनानि सशोणिताभिघातदायकानि, ताडनानि अशोणितप्रहारदायकानि च भवन्ति। मुखानां प्रकृतिमाह—आयसास्थिदारवाणीति। आयसानि अस्थिमयानि दारवाणि सारदारुमयानि च।

[खड्गतन्मुष्टीनां आयुधविशेषाणां च भेदाः]

निस्त्रिंशमण्डलाग्रासियष्टयः खड्गाः। खड्गमहिषवारणविषाणदारुवेणुमूलानि त्सरवः। परशुकुठारपट्टसखनित्रकुद्दालक्रकचकाण्डच्छेदनाः क्षुरकल्पाः। यन्त्रगोष्पणमुष्टिपाषाणरोचनीदृपदश्च आयुधानि।

चाणक्यटीका

तालसारात् कृतं तालम्[1]। वंशात् कृतं चापम् दारुभ्यो निष्पादितं दारवम्, शृङ्गान्निष्पन्नं शार्ङ्गम्, तेषां नामानि (कर्मा ? कार्मुका) दीनि(प्र)त्येकं चतुररत्नित्तो ह्रस्वः। कोदण्डो वैणव (ज्या ? ज्यः)। द्रूणो[2] वाह्यसन्धानः यमाग्ने(या)स्त्रमित्याहुः।

मूर्वाविणुस्नायूनि ज्याः। अत्रकारणे कार्योपचारः। वेणुशरौ प्रतीतौ। शलाका दारवो दण्डासनो वेण्वादिदण्ड एव, त्रिभागशल्योऽर्धनाराचः पत्रदण्डो वा। नाराचस्त्वायस एव। (इति) शराः पञ्चविधाः। चशब्दाद् (विधिस्तिकान् ?) अन्ये परिगृह्णन्ति, (तेषां) मुखानि छेदनानि अर्धचन्द्राकृतीनि। भेदनानि रू(प्या ? क्षा)प्राणि। आयसानि छेदनभेदनार्थानि। (भेदनादन्ये ? ताडनान्येव) तु अस्थिमयानि सारदारुमयानि वा।

प्रतिपदपञ्चिका

धनूंष्याह-तालचापदारवशांगा(र्ङ्गा)णीति।

तालं तालमयं, चापं वेणुविशेषमयं, दारवं धान्वनसारदारुमयं, शार्ङ्गं शृङ्गमयं, इत्येवं चतुर्योनिधनुर्द्रष्टव्यम्। तेषां क्रियासंस्थानादि भेदात्तिस्रः कार्मुकादि संज्ञा भवति। तत्र कार्मुककोदण्डयोः प्रमाणलक्षणादीनि धनुर्वेदोपदेशादवगन्तव्यानि। द्रूणं लोकप्रतीतो अशास्त्रोपदेश्यं प्रायशस्तु दार्कपिकणाधातां द्रूणमेवास्त्रं इत्येतानि धनूंषि तेषां मूर्वादि चतुर्विधा ज्यामूर्वादयश्च कुप्याध्यायोक्ताः। कोदण्डस्यैव वेणुविदल ज्याशेषास्त्वितरयोस्तस्याविपूनाह-वेणुशरशलाकाः दण्डासननाराचाश्चेति। तत्र वेणुः उटजचिमियादिः शरो जात्या शराख्यस्तम्बविशेषः। शलाका चूगभेदादि सारकाष्ठमयी दण्डासनोर्धनाराचाः नाराचस्सर्वादयः चकारो भ्रमर द्रोण मक्षिकाद्यसङ्ग्रहार्थः। इत्येवमेत इषवः, तेषामिषूणां मुखान्यप्राणिच्छेदनानि अर्धचन्द्रफलादीनि ताडनान्यशोणितप्रहारकराणि स्थूलमुखानि तानि च मुखान्यायसानि अस्थिमयानि सारदारुमयानि च भवन्ति। व्यूहनस्य भेदनस्य च भेद एवान्तर्भावादनुपादानं यतश्चतु र्विधं हि बाणकर्माभिहितम्। "बाणमोक्षो धनुष्कर्म बाणकर्म च वेधनम्। छेदनम् भेदनं चैव व्यूहनं ताडनं तथा।" इति।

श्रीमूला

खड्गानाह—निस्त्रिंशेत्यादि। तत्र निस्त्रिंशो वक्राग्रः, मण्डलाग्रः ऋजुवृत्ता-

---

१. 'तालादिभ्योऽण्' (४.३.१५२)। 'तालाद्धनुषि' तालम्, इति काशिका।

२. 'द्रुणं धनुषि' इति ह्रस्वोपकारादिमाह केशवस्वामी।

श्रीमूला

काराग्रः, असियष्टिस्तनुदीर्घाकृतिः। त्सरुप्रकृतीराह—खड्गेत्यादि। खड्गो गण्डकमृगः, महिषः सैरिभः, वारणो गजः इत्येतेषां विषाणानि शृङ्गाणि दारूणि सारदारूणि वेणुमूलानि वंशमूलानि च, त्सरवः खड्गमुष्टयः।

क्षुरकल्पानाह—परशुकुठारेत्यादि। तत्र परशुः सर्वलोहमयश्चतुर्विंशत्यङ्गुलः, पट्टस उभयान्तत्रिशूलः, क्रकचः करपत्रम्, काण्डच्छेदनः काण्डासिकः, शेषं प्रतीतम्।

यन्त्रेत्यादि। पाषाणशब्दस्य यन्त्रादिषु प्रत्येकं सम्बन्धः, यन्त्रपाषाणो यन्त्रक्षेप्यपाषाणः, गोष्पणपाषाणो गोष्पणाख्ययष्टिविशेषक्षेप्यः पाषाणः, गावणेति भाषापाठः साधुतरः। मुष्टिपाषाणो मुष्टिक्षेप्यः पाषाणः, रोचनी दलनयन्त्रशिला, दृषद् महाशिला। चकारः समुच्चयार्थः। इत्येतानि आयुधानि।

चाणक्यटीका

निस्त्रिंशस्त्रिंशदङ्गुलायामोन्नतवंशः। मण्डलाग्रोऽन्वर्थनामा निर्वंशो ह्रस्वश्च। असियष्टिस्तु दीर्घा (नवृश्चियाम् ? व्रश्चना)। उदीच्यास्तरवारिमाहुः[1]। एषां त्सरवो मुष्टयः खड्गादीनि।

परशुः सर्वलोहः(का)ष्ठदण्डोवा।

पट्टिसो[2] लोहदण्डः (कूरायुक ?) खनित्रकुद्दालक्रकचाः प्रसिद्धाः। कण्टकच्छेदनो द्विमुखः। एते तीक्ष्णधारत्वात् क्षुरप्राः।

यन्त्रगोष्पणो यन्त्रक्षेप्यबृहच्छैलगुडकः। मुष्टिपाषाणो हस्तक्षेप्यः। रोचनीदृषदिति शिलापट्टिका (इति ?) बृहती मुक्ता सती हस्त्यश्वादीन् हन्ति। पूर्वैःसह एतान्यायुधानि।

प्रतिपदपञ्चिका

निस्त्रिंशमण्डलाग्रासियष्टयः खड्गा इति तत्र निस्त्रिंशो वक्राग्रः ऋजुवृत्ताग्रो मण्डलाग्रः पृथुफलश्च असियष्टिः तनुदीर्घान् त्सरूनाह-खड्गेत्यादि, खड्गो गण्डकः महिषः प्रतीतः वारणो हस्ती तेषां विषाणानि, दारूणि सारदारूणि वेणु मुलानि च वंशमूलानि च त्स (सं) रवो मुष्टयः खड्गानां भवन्ति। क्षुरकल्पानाह—

परशुकुठारे इत्यादि, परशुः सर्वलोहमयः चतुर्विंशत्यङ्गुलोऽर्धचन्द्राकारफलः, कुठारोक्तं सारिणीति प्रतीता।

पट्टस उभयान्तं त्रिशूलः लोहदण्डः परशुरेव त्रिशूलइत्यपरे। खनित्रं कुद्दालं च प्रतीतं, क्रकचः करपत्रं काण्डच्छेदनं कुण्डासिका क्षुरकल्पाः छेदन-

---

१. तरवारिः "स्त्रियां यष्टिनामधेयायुधान्तरे" इति केशवस्वामी "करवालाद् अल्पे कन् करवालिका, तरवारिकेत्येके", इति क्षीरस्वामी। (२.८.९१)।

२. "पट्टसो लोहदण्डोऽयस्तीक्ष्णधारः क्षुरोपमः कण्टकच्छेदनोऽप्येवं द्विमुखश्च" इति वैजयन्ती।

[कवचभेदाः उपकरणभेदाश्च]

लोहजालजालिकापट्टकवचसूत्रकङ्कटशिंशुमारकखड्गिधेनुकहस्तिगोचर्मखुरशृङ्गसङ्घातं वर्माणि, शिरस्त्राणकण्ठत्राणकूर्पासकञ्चुकवारवाणपट्टनागोदारिकाः, पेटीचर्महस्तिकर्णतालमूलधमनिकाकवाटकिटिकाप्रतिहतवलाहकान्ताश्च आवरणानि । हस्तिरथवाजिनां योग्याभाण्डमालङ्कारिकं सन्नाहकल्पनाश्चोपकरणानि । ऐन्द्रजालिकमौपनिषदिकं च कर्म ॥

प्रतिपदपञ्चिका

प्रकाराः । यन्त्रेत्यादि, यन्त्रादीनां त्रयाणां पाषाणशब्दः प्रत्येकं यन्त्रक्षेप्यायन्त्रपाषाणाख्यः यष्टिविशेषक्षेप्या गोष्पणपाषाणाः हस्तक्षेप्या मुष्टिपाषाणाः रोचनी वृहत्काष्ठं वृहन्महाशिला, चस्समुच्चये । एवमेतान्यायुधानि प्रहरणानिच ।

श्रीमूला

वर्माण्याह—लोहजालेत्यादि । लोहशब्दो जालादिषु चतुर्षु प्रत्येकं सम्बद्ध्यते । लोहजालं सशिरस्त्राणा प्रावरणी, लोहजालिका मुण्डसन्नाहः लोहपट्टो विबाहुसन्नाहः, लोहकवचं बाहुरहितं वक्षःपृष्ठमात्रावरणं, सूत्रकंकटः कार्पासादिसूत्रमयः सन्नाहः, शिंशुमारकादीनां पञ्चानां चर्मखुरशृङ्गसंघातश्च चतुरशिल्पिघटितानि त्वक्शफाविषाणानि च, वर्माणि भवन्ति । तत्र शिंशुमारकः अम्बुकपिनामा जलचरः, खड्गी खड्गमृगः, धेनुको गोसदृश गवय इति व्याख्येयं, सेरकपाठस्तु धेनुकस्थाने भाषाटीकायामुपलभ्यते । हस्ती गजः, गौर्वृषभः । शिरस्त्राणेत्यादि । शिरस्त्राणादयः सप्त च वर्माणि । तत्र शिरस्त्राणं शिरोमात्रावरणं, कण्ठत्राणं कण्ठमात्रावरणं, कूर्पासः अर्धबाहुकः, कञ्चुको जानुपर्यन्त,ः वारवाणो गुल्फपर्यन्तः, पट्टो विबाहुरलोहमयः, नागोदरिका करांगुलित्राणम्, इत्येतानि देहधार्याणि । करधार्याण्यावरणान्याह—पेटीत्यादि । पेटयादयो नव । तत्र पेटी काष्ठवल्लीमयं खेटकं, चर्म चर्मफलकं, हस्तिकर्णः अवगुण्ठनफलकं, तालमूलं काष्ठनिर्मितं खेटकम्, धमनिका सूत्रमयी, कवाटं काष्ठमयफलकभेदः, किटिका चर्मवेणुविदलमयी, अप्रतिहतः हस्तवारकाख्यः, वलाहकान्तः अप्रतिहत एव पर्यन्तबद्धलोहपट्टः, चः समुच्चये ।

उपकरणान्याह—हस्तीत्यादि । हस्तिरथवाजिनां, योग्याभाण्डं शिक्षापरिकरभूतं कशांकुशादिकम् आलङ्कारिकम् अलङ्कारप्रयोजनकं पताकाक्षुरप्रमालादिकं, सन्नाहकल्पनाश्च वर्मतोमरशरीरावारकादयश्च, उपकरणानि । उपकरणान्तरमाह—ऐन्द्रेत्यादि । ऐन्द्रजालिके कर्म अल्पसैन्यस्य बहुसैन्यत्वप्रदर्शनमनग्नावग्निप्रदर्शनमित्येवज्जातीयं मायिकम्, औपनिषदिकं च औपनिषदकाधिकरणोक्तं विषधूमाम्बुदूषणप्रलम्भनादिप्रयोगतत्प्रतिक्रियालक्षणं, चकारादनुक्तमन्यच्च, कर्म, उपकरणपदानुवर्तनादुपकरणसंज्ञम् ।

चाणक्यटीका

(वर्माण्यभिधो) यन्ते। तत्र लोहमयी जालिका[1]। पट्टः लोहमयः प्रकोष्ठादिरक्षार्थः। कवचो (लिपि? रिपु) सन्नाहः सूत्रमय उरश्छदः सूत्रकङ्कटः। शिशुमारादीनां यथासम्भवं चर्मादिसङ्घातः शिरोरःकण्ठत्राणार्थाः सन्निवेशविशेषादेते कार्याः, एतानि वर्माणि।

शिरःकण्ठत्राणं चर्मलोहमयम्। कूर्पासादि चर्ममयम्। तत्र (सोर्धवेपकः?) कञ्चुकश्चोलकः। स एवाप्रपदीनो वारवाणः शिरोवेष्टनमुष्णीपपट्टः। उदरबन्धो नागः। उदरिका जङ्घात्राणम्। एतान्य (ङ्ग) लग्नानि।

धार्याणि तु—(वेदोरव? पेटकं) फलकं चर्मेति वरकस्याख्याः। हस्तिकर्णः[2] तालमूलः धमनिका (वृतपरः?) अपरे कू (र्छं? र्म) पृष्ठां चर्ममयीमाहुः। कवाटः शाल्मल्यो याष्टीकवारणो मुष्टिकः। किटिकाशलाका सूत्रप्रोता। चर्मविदलस्यूतकम् अप्रतिहतम्। बलाहकान्तः किटिकैव चर्मावृता। आदिग्रहणात् स्वविकल्पनिर्मितानि अन्यान्यप्यावरणानि।

उपकरणान्याह—कल्पना वैजयन्तीकङ्क (टेपु? ट) प्रभृतिः। तथा ऐन्द्रजालम् इन्द्रजालशास्त्रभवम् आशु प्रयोज्यम्, स्वापनमोहनाद्भुतोत्पादनम्। औपनिषदिकं वा शिल्पजातं प्रयोज्यं शस्त्राग्निरसादि, उपकरणार्थत्वात् कर्मेत्युच्यते।

प्रतिपदपञ्चिका

लोहजातेत्यादि। लोहशब्दश्चतुर्णां प्रत्येकं लोहजालं प्रावरणी सशिरस्त्राणाजालिकामुण्डसन्नाहः पाटोविबाहुस्सन्नाहः। लोहभट्टघटित इत्यपरे। कव (क) वचमनेकपुटवध्यकं वक्षः पृष्ठमात्रावरणं सूत्रकं कटसूत्रसन्नहनं शिशुमारादीनां च पञ्चानां चर्मादिसङ्घातान्निर्व्रणशिल्पिघटिता चर्माणि शरीरावरणं भवन्ति।

शिशुमारादयः तरव्याख्याः शिरस्त्राणं शिरोमात्रावरणं, वा कूर्पासोर्धबाहुकः कंचुको जानुप्रमाणः वारवाणो गुल्फप्रमाणः पट्टो विबाहुः पूर्वस्यास्य च लोहमयत्वमूर्णादिमयत्वं च विशेष इति। नागोदरिका कराङ्गुलित्राणं, इत्येवं शरीरधार्याणि, वर्माण्यमिधाय हस्तधार्याभरणान्याह-पेटीत्यादि।

पेटीकाष्ठवल्लीमयं खेटकं बलतिटिकेत्यपरे। चर्मवसुनन्दकः हस्तिकर्णोवकुण्ठनफलकं तालमूलं काष्ठखेटकं धमनिका सूत्रमयी कवाटं वाकाष्ठफलकं किटिका चर्मवंशदलमयी अप्रतिहतोहस्तवारकः वलाहकान्तः स एव लोहपट्टवेष्टितपर्यन्तः। एवमावरणान्यभिधाय उपकरणान्याह-हस्तिरथवाजिनामिति, हस्त्यादीनां त्रयाणां योग्याभाण्डं शिक्षोपकरणं कशाङ्कुशचर्मपुरुषादिक अलङ्कारकं वैजयन्तीकुद्रमालीकुथादिकं

---

१. अयोमय कङ्कटे जालिका इति केशवस्वामी।

२. "हस्तिकर्णस्तु ना शस्त्रत्राणार्थफलकान्तरे। ज्ञेय कम्बलभेदे च रोचकाख्ये" इति केशवस्वामी।

[आयुधाध्यक्षपर्यालोचनीयार्थसंग्रहः]

कर्मान्तानां च—

इच्छामारम्भनिष्पत्तिं प्रयोगं व्याजमुद्दयम् ।
क्षयव्ययौ च जानीयात् कुप्यानामायुधेश्वरः ॥९२॥

इत्यध्यक्षप्रचारे आयुधागाराध्यक्षः अष्टादशोऽध्यायः
आदित एकोनचत्वारिंशः

प्रतिपदपञ्चिका

सन्नाहकल्पना चर्मतोमरशरीरावारकाः चस्समुच्चये ऐन्द्रजालिकं अल्पसैन्यस्य बहुसैन्यदर्शनम् । अनग्नावग्निदर्शनमित्यादि मायागतम् । औपनिषदिकं च गरधूमांबुदूषणप्रलङ्घनादिकं एतद्विप्रकारं च कर्म उपकरणसंज्ञं भवति । चकारादन्यच्च हस्त्यादीनां बन्धनान्युपकरणानि गृह्यन्ते ।

श्रीमूला

कर्मान्तानां चेति वक्ष्यमाणश्लोकान्वयि । श्लोकमाह—इच्छामिति । कुप्यानां कर्मान्तानां गतप्रकृताध्यायद्वयोक्तद्रव्यसम्बन्धिनां व्यापाराणाम् विषये, इच्छां राजरुचिम्, आरम्भनिष्पत्तिम् आरम्भसहितां निष्पत्तिं राजेच्छानुसारेणोपक्रममर्थसिद्धिं चेत्यर्थः । प्रयोगम् उपयोगं, व्याजं दोषं, व्याजिमिति पाठे राजपण्यविक्रयेऽन्तरग्राह्यम्, उद्दयं लाभम् । उन्नयमिति भापापाठश्च श्रेयान् । क्षयव्ययौ च क्षयं साधनच्छेदं व्ययं कर्मकरादिभक्तादिपरिव्ययं च, जानीयात् पर्यालोचयेत्, आयुधेश्वरः आयुधागाराध्यक्षः । इदं कुप्याध्यक्षस्याप्युपलक्षणम् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टादशोऽध्यायः आयुधागाराध्यक्षः, आदित
एकोनचत्वारिंशः ॥

चाणक्यटीका

कर्मान्तानां च किमपरम् इत्यत आह—इच्छां प्रयोजनापेक्षया चिकीर्षाम् । आरम्भमनुष्ठानम् । निष्पत्तिं परिसमाप्तिम् । योगं विनियोगम् । व्याजीम् अन्येपुकारयितृषु राजांशम् । समुद्दयं सहस्रमूलयस्य द्विसहस्रं मूल्यमिति । कालायसपिण्डस्य पञ्चभागः क्षय इति । व्ययं च वेतनादेः । जानीयात् । कुप्यानाम् आयुधप्रभृतीनाम् आयुधेश्वरस्तदध्यक्षः । यद्येवं कुप्यविकारप्रदर्शनात् प्राधान्यं तु (काल्य ? कुप्य) बृहत्वमस्येति ।

॥ इति आयुधागाराध्यक्षः अष्टादशं प्रकरणं समाप्तम् ॥
॥ अष्टादशश्चाध्यायः ॥

प्रतिपदपञ्चिका

साम्प्रतमध्यायद्वयस्यापि शेषमन्ते श्लोकमाह-इच्छामीत्यादि।

इच्छां प्रियां विक्रि (प्रि) यतां तदाजीविनां राज्ञो वा रुचितेष्वेव आरम्भ-निष्पत्तिं पुरुषार्थानां आरम्भणानां निष्पत्तिं प्रक्रान्तपरिसमाप्तिं वा प्रयोगमुपयोगं व्याजं दोषम्, अपरेतु व्याजीमिति पठन्तो राजपण्यविक्रयेऽन्तरग्रहणमाचक्षते। उद्दयं लाभं क्षयं लोहपिण्डपञ्चभागादिकं व्ययं शिल्पकर्मकरादि भक्तादिपरिव्ययं एत-दिच्छादिकं सर्वं जानीयात्। निरूपयेत् कुप्यानां अध्याद्वयाभिहितसमस्तद्रव्याणामा-युधेश्वरः आयुधागाराध्यक्षो वा राजा वा स्वयमिति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायां अध्यक्षप्रचारिके द्वितीयेधिकरणेऽष्टादशोऽध्यायः। आयुधागाराध्यक्षः। आदितः एकोनचत्वारिंशोऽध्यायः।

सप्तत्रिंशं प्रकरणम्

एकोनविंशोऽध्यायः ।

तुलामानपौतवम् ।

[सुवर्णरूप्ययोः प्रतिमानभेदाः]

पौतवाध्यक्षः पौतवकर्मान्तान् कारयेत् ।

श्रीमूला

तुलामानपौतवमितिसूत्रम् । तुलाया उन्मानसाधनस्य मानस्य प्रस्थकुडुबादेश्च पौतवम् पोतुर्मानभाण्डशोधकः तस्य कर्म अकृतकरणं कृतशोधनं चेहाभिधीयत इति सूत्रार्थः । तुलाप्रतिमानं 'पौतवाध्यक्षे वक्ष्याम' इत्युक्तं सुवर्णाध्यक्षे । तदेतत् कुप्याङ्गत्वात् कुप्यानन्तरमभिधीयत इति सङ्गतिः ।

पौतवेत्यादि । पौतवाध्यक्षः पौतवाधिकृतः, पौतवकर्मान्तान् तुलाकुडुवादि घटनकर्माणि, कारयेत् ।

चाणक्यटीका

वृद्धयुदयक्षयव्ययादिपरिज्ञानं सर्वद्रव्याणां तुलामानदेशकालमानैर्विना नास्तीति तुलामानपौतवं देश (काल) मानमिति प्रकरणद्वयमारभ्यते । अथवा सन्निधातुः प्रचारो व्याख्यातः समाहर्तुरुच्यते । समाहर्ता दुर्गाध्यक्ष इत्युक्तम् । तत्र दुर्गे पौतवं पठितमिति । पुनातेस्तुन् प्रत्ययः (कृत्वा ?) पूतिः पोतुः[1] शोधनमुच्यते । तत्र भवः, अध्यक्षस्य तुलामानशोधनार्थो व्यापारः पौतवमिति । तत्र अध्यक्षो मानपरिज्ञानेऽधिकृतः मानपरिशुद्धयर्थान् पौतवकर्मान्तान् शिल्पिभिः कारयेत् ॥

प्रतिपदपञ्जिका

तुलामानपौतवमितिसूत्रम् । तुला षडङ्गुलादिकाः मानानि कुटुम्बादीनि तेषां पौर (त) वमपूर्वकरणं कृतसंशोधनं च शोध्यशोधनयोरभेदोपचारात्तमिहाभिधीयते इति सूत्रार्थः । सम्बधस्तु पूर्वस्मिन्नध्याये क्षयव्ययौ च जानीयात् । कुप्यानामायुधेश्वर इत्युक्तम् । तत्परिज्ञानम्, तुलायामायत्तमतस्तदभिधानम्, अथवा, तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्याम इत्युक्तम् तस्य च कुप्यशेषत्वात्तदनन्तरमेतदभिधीयत इति तदाह—

पौतवाध्यक्ष इत्यादि, पौतवाध्यक्षस्समाहर्ता तदधिकृतो वा कश्चित्पौतवकर्मान्तात्तुलाघटनारम्भात् कारयेत् ।

---

१. "पुनाति वि पोतुःमानभाण्डशोधकः पोतवाध्यक्षाख्यः" इति क्षीरस्वामी (११.९.८५) ।

धान्यमाषा दश सुवर्णमाषकः, पञ्चवा गुञ्जाः । ते षोडश सुवर्णः कर्षो वा । चतुःकर्षं पलम् । अष्टाशीतिर्गौरसर्षपाः रूप्यमाषकः । ते षोडश धरणम्, शैम्ब्यानि वा विंशतिः । विंशतितण्डुलम् वज्रधरणम् । अर्धमाषकः, माषकः, द्वौ, चत्वारः, अष्टौ माषकाः; सुवर्णः, द्वौ, चत्वारः, अष्टौ सुवर्णाः; दश, विंशतिः, त्रिंशत्, चत्वारिंशत्, शतमिति तेन धरणानि व्याख्यातानि ।

श्रीमूला

अभ्यर्हितत्वात् प्रथमं सुवर्णस्य प्रतिमानमाह—धान्येत्यादि । धान्यमाषाः दश सुवर्णमाषकः धान्यमाषदशकप्रतिमानं सुवर्णं माषकसंज्ञम् । पञ्च वा गुञ्जाः गुञ्जापञ्चकं वा, माषक इत्यनुवर्तनान्माषकसंज्ञम् । ते षोडश सुवर्णः कर्षो वा माषषोडशकं सुवर्णसंज्ञम् भवति कर्षसंज्ञम् वा । चतुष्कर्षं पलमिति चत्वारः कर्षाः पलाख्याः ।

रूप्यस्य प्रतिमानमाह—अष्टाशीतिरिति । अष्टाशीतिः गौरसर्षपाः रूप्यमाषकः रूप्यस्यैको माषकः । ते रूप्यमाषकाः, षोडश, धरणं धरणाख्याः । शैम्ब्यानि विंशतिर्वा शिम्बिफलविंशतिर्वा धरणम् ।

वज्राख्यस्य रत्नस्य प्रतिमानमाह—विंशतीत्यादि । विंशतितण्डुलं मध्यमाखण्डव्रीहितण्डुलप्रमाणं वज्रधरणं भवति ।

प्रतिमानसंख्या आह—अर्धमाषक इति । अर्धमाषकः, माषकः, द्वौमाषकौ, चत्वारः माषकाः, अष्टौ माषकाः । सुवर्णः, द्वौ सुवर्णौ, चत्वारः सुवर्णाः, अष्टौ सुवर्णाः, दश विंशतिः त्रिंशत् चत्वारिंशत् शतम् इति चतुर्दश भवन्ति ।

सुवर्णोक्तं प्रतिमानविधिं रूप्येष्वतिदिशति—तेनेति । तेन सुवर्णप्रतिमानकथनेन, धरणानि व्याख्यातानि रूप्यधरणानामपि धरणं द्वे चत्वारि अष्टौ दश विंशतिः त्रिंशत् चत्वारिंशत् शतमित्येवं प्रतिमानसंख्या योज्या इत्यर्थः । एवं धरणग्रहणेन रूप्यमाषकाणामप्युपलक्षणाद् अर्धमाषको माषको द्वौ चत्वार इत्यादयः शतान्तसंख्यास्तत्राप्यूहनीयाः ।

चाणक्यटीका

धान्यमाषा इति धान्यान्येव माष (सङ्ख्या ? संज्ञा) नि (इति) धान्यग्रहणम् । ते धान्यमाषा दश उ (च्चाटे ? न्माने) न सुवर्णस्य माषकः तत्परिच्छेदहेतुत्वादभेदेनोच्यते । पञ्च वा गुञ्जाः कृष्णला माषकः । ते माषकाः षोडश सुवर्णः कर्षो वा पर्यायेण । चतुष्कर्षं पलं पुराकल्पे ।

रूप्यमानस्यान्यत्वात् तत्प्रसिद्धिमाह—अष्टाशीतिरिति अष्टाभिरधिकाः । षोडश माषका धरणम् । रूप्यस्य सुवर्णसङ्ख्याभावाद्धरणमित्युच्यते न सुवर्णम् । शैब्यानि विंशतिर्वा धरणम् । अद्यत्वे तु सुवर्णरूप्यादीनामेकमेव प्रातिमानम् ।

[प्रतिमाननिर्माणसाधनानि द्रव्याणि]

प्रतिमानानि अयोमयानि मागधमेकलशैलमयानि, यानि वा नोदकप्रदेहाभ्यां वृद्धिं गच्छेयुरुष्णेन वा ह्रासम् ।

चाणक्यटीका

विंशतितण्डुलं वज्रधरणं विंशतिव्रीहितण्डुलोन्मानमित्यर्थः । अष्टाभिः सर्षपैः गौरसर्षपैस्तण्डुलं कल्पयेदित्यन्ये । विंशतितण्डुलादूर्ध्वं न वज्रमिति यावत् ।

सुवर्णप्रतिमानमेतत्, रूप्यस्य पृथक् वचनात् । तदाह—तेन धरणानि व्याख्यातानि । अर्धमाषकांस्त्यक्त्वा धरणाद् द्वे चत्वारि इत्यादियोज्यम् ।

प्रतिपदपञ्चिका

तत्र सारत्वात् पूर्वं सुवर्णस्य प्रतिमानमाह—धान्यमाषा इति । मध्यमप्रमाणधान्यमाषा दशसुवर्णस्य माषक इति संज्ञा । पञ्च वा गुंजाः माषक इति वर्तते । गुंजापञ्चकप्रमाणो वा माषक इति एते षोडश सुवर्ण इति माषाः षोडशसुवर्णसंज्ञा भवन्ति । कर्षो वेति संज्ञान्तरं चतुष्कर्षं फलमिति सुबोधम् । रूप्यस्य प्रकारान्तरमाह-अष्टाशीतिः सर्षपा रूप्यमाषक इति । सुबोधम् । ते षोडशधरणमिति, ते षोडशमाषकप्रमाणस्य रूप्यस्य धरणमिति संज्ञा । शैब्यानि विंशतिर्वा मध्यमप्रमाणफलविंशतिर्वा मध्यमप्रमाणफलविंशतिर्वाधरणम्, रूप्यस्यैव विंशतितण्डुलं वज्रधरणमिति मध्यमाखण्डव्रीहितण्डुलविंशतिप्रमाणं वज्रसंज्ञस्य रत्नस्य धरणं भवति । प्रतिमानसङ्ख्यामाह-अर्धमाषक इत्यादि, अर्धमाषमाषकौ द्वौ चत्वारोऽष्टौ माषका इत्यादि व्यस्तसमस्तैरर्धमाषकं न्यूनसुवर्णोत्पत्तिरेवम् । सुवर्णो द्वौ चत्वारोऽष्टौ सुवर्णा दशविंशतिस्त्रिंशच्छतमित्येवमेतैश्चतुर्दशभिः प्रतिमानैस्सर्वसङ्ख्या निष्पत्तिरिति तेनेति, सुवर्णप्रतिमानकरणेन धरणानि व्याख्यानि तेषामपि धरणं द्वे चत्वार्यष्टौ दश विंशतिस्त्रिंशत् चत्वारिंशत् शतमिति सर्वं योजनीयम् ।

धरणग्रहणं च माषकाणामप्युपलक्षणार्थम् । तेषामप्यर्धमाषको माषक इत्याद्यपि योज्यम् ।

श्रीमूला

कीदृशानि प्रतिमानानीत्यत्राह—प्रतिमानानीति । प्रतिमानानि, अयोमयानि लोहमयानि, मागधमेकलशैलमयानि मगधदेशोत्पन्नशिलामयानि मेकलापरनामकाटवीराज्योद्भवशिलामयानि च भवन्ति । पक्षान्तरमाह—शङ्खशुक्तिप्रभृतीनि यानि, उदकप्रदेहाभ्यां जलार्द्रीकरणमललेपाभ्यां, वृद्धिम् आधिक्यम्, उष्णेन, ह्रासं वा न्यूनतां वा, न गच्छेयुः, तन्मयानि वा भवन्ति । तन्मयानीत्येतच्च यत्पदसामर्थ्यलभ्यम् ।

[तुलाभेदाः निर्माणविधानञ्च]

षडङ्गुलादूर्ध्वमष्टाङ्गुलोत्तराः दश तुलाः कारयेल्लोहपलादूर्ध्वमेकपलोत्तराः। यन्त्रमुभयतः शिक्यं वा। पञ्चत्रिंशत्पललोहां द्विसप्तत्यङ्गुलायामां समवृत्तां कारयेत्। तस्याः पञ्चपलिकं मण्डलं बद्ध्वा समकरणं कारयेत्। ततः कर्षोत्तरं पलं पलोत्तरं दशपलं द्वादश, पञ्चदश, विंशतिरिति पदानि कारयेत्। ततः आशतादृशोत्तरं कारयेत्, अक्षेषु नन्दीपिनद्धं कारयेत्। द्विगुणलोहां तुलाम् अतः षण्णवत्यङ्गुलायामां परिमाणीं कारयेत्। तस्याः शतपदादूर्ध्वं विंशतिः, पञ्चाशत्, शतमिति पदानि कारयेत्।

चाणक्यटीका

प्रतिमानपरिच्छेदार्थानि प्रतिमानानि अयोमयानि मागधमेकलपर्वत (शै) लमयानि वा शोभनतरत्वात्, यानि (वासीदासिमयान्यपि ?) नोदकेनोपस्निग्धायां वा भूमौ स्थितान्यपि प्रदेहेन वृद्धिं गच्छन्ति ह्लासं चोष्णेन, नीतानिस्युरितिवाक्यशेषः।

प्रतिपदपञ्चिका

ना नीचप्रतिमानाद्याह-अयोमयानीति, लोहानि मगधशैलो मगधेषु तदाह्वयो मेकलशैलाक वीश (रा) ज्ये तत्पाषाणमयानि यानि चान्यानि शङ्खमयादीनि नोदकेनादि भावेन प्रदेहेन वामलाङ्गेन वृद्धिमाधिक्यं गच्छेयुरुष्णेन वा तालेन ह्लासं न्यूनकत्वं तानिरक्तव्यानिति एवं प्रतिमानान्यभिधाय तुलादश व्याचष्टे। षडङ्गुलादूर्ध्वमित्यादि।

श्रीमूला

दशविधास्तुला आह—षडङ्गुलादिति। षडङ्गुलात् षडङ्गुलायामात् प्रभृति, ऊर्ध्वम्, अष्टाङ्गुलोत्तराः अष्टाङ्गुलाधिकायामाः, दशतुलाः दशप्रकारस्तुलाः, कारयेत्। कियल्लोहपरिमाणाः, लोहपलादूर्ध्वमेकपलोत्तराः एकलोहपलात् प्रभृति एकैकलोहपलाधिकाः। तत्र प्रथमा षडङ्गुलायामा लोहपलप्रमाणा, द्वितीया चतुर्दशाङ्गुलायामा लोहपलद्वयप्रमाणा, तृतीया द्वाविंशत्यङ्गुलायामा त्रिपललोहा च भवतीत्यनेन क्रमेणाष्टसप्तत्यङ्गुला दशपललोहा च दशमी तुला भवति। यन्त्रमुभयतः तुलायन्त्रस्योभयोः पार्श्वयोः, शिक्यं कारयेत् मेयमानयोर्युगपद्धारणार्थम्। वा—शब्दादेकतः शिक्यं वा, तयोः पर्यायधारणसम्भवात्। ता एताः सुवर्णरूप्यतुलाः।

तदन्यतुलामाह—पञ्चत्रिंशदित्यादि। पञ्चत्रिंशत्पललोहां पञ्चत्रिंशत्पलप्रमाणलोहनिर्मिताम्, द्विसप्तत्यङ्गुलायामां त्रिहस्तदीर्घाम्; समवृत्तां तदाख्यां वर्तुलतयान्वितार्थाम्, कारयेत्। तस्याः, पञ्चपलिकम्, मण्डलं चेलम्, बद्ध्वा, समकरणम् अनुन्नतानवनतोभयान्तचिह्नम्, कारयेत्। ततः समचिन्हात् परतः, कर्षोत्तरं पलं

श्रीमूला

कर्षोऽर्धपलं पादोनपलं पलमिति, कारयेत् । ततः पलोत्तरं दशपलम् एकं पलं द्वे त्रीणि चत्वारि पञ्च षट् सप्ताष्ट नव दशेति, ततः द्वादश पञ्चदश विंशतिरिति षोडश पदानि रेखाः, कारयेत् । ततइति ततः विंशतेरुपरि, आशतात् शतमभिव्याप्य, दशोत्तरं दशदशाधिकं त्रिंशच्चत्वारिंशत् पञ्चाशदित्यादिकम्, कारयेत् । अक्षेपु पञ्चमदशमपञ्चदशादिपु, नद्ध्रीपिनद्धं वरत्राबन्धं वरत्राकाररेखावन्धम्, कारयेद् विशेषार्थम् । स्वामिटीकादर्शे तु नान्दीपिनद्धं स्वस्तिकमिति दृश्यते ।

परिमाणीसंज्ञां तुलामाह—द्विगुणेत्यादि । अतः समवृत्तायाः, द्विगुणलोहां सप्ततिपललोहाम्, पण्णवत्यङ्गुलायामां चतुर्हस्तदीर्घाम्, परिमाणीम्, कारयेत् । तस्याः शतपदादूर्ध्वं समवृत्तादर्शितदिशा कर्षादिक्रमेण कृताच्छतपदात् परतः, विंशतिः, तदूर्ध्वं पञ्चाशत्, तदूर्ध्वं शतम्, अर्थाच्छतद्वयम् इति पदानि कारयेत् ।

चाणक्यटीका

तुलामाह—षडङ्गुलादूर्ध्वमष्टाङ्गुलोत्तरे त्रिपटशतुर्दशद्वाविंशतित्रिंशदष्टात्रिंशत् षट्चत्त्वारिंशच्चतुष्पञ्चाशद्द्वाषष्टिषष्ट्यष्टासप्तत्यङ्गुलान्यायता दश (तुलाः) । तासाम् आद्या एकपला, दशमी दशपलेति । यन्त्रमुभयतः शिक्यं वेति यन्त्रमुभयतो मध्ये कक्ष्यं यस्य द्रव्यप्रतिमान (योः ?) धरणयोर्युगपद्यम् । एकदेशेन वा शिक्यं यस्याः पर्यायेण द्रव्यस्य प्रतिमानस्य चोन्मानात् । इदमुक्तं भवति—या दीर्घा तुला तस्याः एकपार्श्वे शिक्यम्, या ह्रस्वा तामुभयतः शिक्यमिति ।

सुवर्णादन्यस्यापि द्रव्यस्योन्मानाद् अन्यास्तुला उच्यन्ते—पञ्चत्रिंशत्पललोहामिति । समवृत्ता (ज्जातः ? स्याम्) । तस्याः पञ्चपलिकं मण्डलमिति आमूलात् समां कृत्वा ततः पञ्च पलं मण्डलीकृत्य मूलाग्रे समकरणं रेखाविपुघ्नं कारयेत्, यत्र धार्यमाणं न पुरः न पश्चान्नमति । ततः समी (क) रणादग्रतः कर्षोत्तरमिति—कर्षः (द्विकर्षः) त्रिकर्षः पलमिति । ततोऽपि पलोत्तरं दशपलं द्वादशपलं पञ्चदश विंशतिरिति । ततोऽपि आशताद् दशोत्तरमिति—त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः शतमिति पदानि कारयेत् । अक्षेपु दशाद्यङ्कनस्थानेपु । नान्दीपिनद्धमिति काकपदाकारं चिह्नम्, असंमोहार्थं कारयेत् ।

द्विगुणलोहामिति पञ्चत्रिंशत् पलापेक्षया सप्ततिपललोहाम् । षण्णवत्यङ्गुलायामां पारिमाणिकीं नाम तुलां कारयेत् । तस्याः पूर्ववत् पञ्चपलिकं मण्डलं बद्ध्वा समकरणम् शतपदानि च कृत्वा, अत ऊर्ध्वं विंशतिः पञ्चाशत् शतमिति अपरं पदत्रयं द्विशतं तुलनार्थं कारयेत् ।

प्रतिपदपञ्चिका

प्रथमा षडङ्गुलायामा लोहपलप्रमाणद्वितीयाष्टाङ्गुलोक्ता, तथा चतुर्दशाङ्गुलाः द्विपललोहा च भवतीत्येवं दशमीतुलाष्टसप्तत्यङ्गुला दशलोहपलश्च भवति । यन्त्रमुभयतश्चिक्यं वेति सर्वासामुभयतश्चिक्यं मेयमानयोः युगपद्धारणार्थं वा

[मानविशेषाः, तेषां मेयद्रव्यभेदेन वैलक्षण्यञ्च]

विंशतितौलिको भारः । दशधरणिकं पलम् । तत्पलशतम् आयमानी । पञ्चपलावरा व्यावहारिकी भाजन्यन्तःपुरभाजनी च । तासामर्धधरणावरं पलम् । द्विपलावरमुत्तरलोहम् । षडङ्गुलावराश्चायामाः । पूर्वयोः पञ्च—पलिकः प्रयामो मांसलोहलवणमणिवर्जम् । काष्ठतुला अष्टहस्ता पदवती प्रतिमानवती मयूरपदाधि (ष्ठाना ।) ष्ठिता । काष्ठपञ्चविंशतिपलं तण्डुलप्रस्थसाधनम् एष प्रदेशो बह्वल्पयोः—इति तुलाप्रतिमानं व्याख्यातम् ॥

प्रतिपदपञ्चिका

शब्दादेकतः चिक्यं वा पर्यायेणाविधारणसम्भवप्रदर्शनार्थमित्येवं सुवर्णरूप्यतुलानिर्दिश्येतरं व्याचष्टे—पञ्चत्रिंशत्पललोहामिति । तावन्मात्रालोहघटितां द्विसप्तत्यायामां त्रिहस्तदीर्घां समवृत्तामित्यन्वर्थसंज्ञोपेतां कारयेत् । तस्या पञ्चवलितकमण्डलं चेतलकं च बध्वा समरकरणमुन्नतावनतोभयांतचिह्नं कारयेत् । तस्मात्समकरणपाठात् कर्षोत्तरं पलमिति कर्षोत्तरं यावत्पलमिति कृत्वा ततः पलोत्तरमेकपलं द्वे त्रीणोत्येवं यावद्दशपलं ततो द्वादशपलानि पञ्चदशविंशतिषोडशपदानि लेखाः कारयेत् ।

तत्तो विंशतेरूर्ध्वं मात (द) शत-शादिति शतं यावत् दशोत्तरमिति त्रिंशच्चत्वारिंशदित्येवमादि कारयेत् । अक्षेषु पञ्चमदशमादिषु नान्दीपिनध्दं स्वस्तिकं विशेषार्थं कारयेत् । परिमाणीमाह-द्विगुणलोहामत इति, अतस्समवृत्तायाः द्विगुणलोहां सप्ततिलोहमयीं षण्णवत्यङ्गुलायामां चतुर्हस्तदीर्घां परिमाणीं नाम तुलां कारयेत् । तस्माच्छतपदादूर्ध्वमिति पूर्वोक्तन्यायेन कर्षोत्तरपलं पलोत्तरं दशपलमित्येव शतपदं कृत्वा ततस्तस्माच्छतपदादूर्ध्वं विंशतिः पञ्चाशच्छतमिति पदानि कारयेत् । एवं चैषां शतद्वयपलधारिणी भवति ।

श्रीमूला

विंशतीत्यादि । विंशतितौलिकः तुला नाम पलशतं विंशतितुलाप्रमाणः, भारः तत्संज्ञः ।

अथ पूर्वोक्तात् सुवर्णपलादधिकं पलविशेषं सुवर्णरूप्यातिरिक्तद्रव्यपरिच्छेदोपयोगिनमाह—दशधरणिकमिति । दशधरणिकं पूर्वोक्तधरणदशरूपरिमाणम्, पलम् । तत्पलशतं तेषां दशधरणिकानां पलानां शतम्, आयमानी आय एव मीयते अनयेति व्युत्पत्तेरायमानीसंज्ञा तुला ।

अन्यास्तिस्रस्तुला आह—पञ्चपलावरेति । सप्तवर्णवदिह वीप्सालोपौ । पञ्चभिः पञ्चभिः पलैः अवरा पूर्वपूर्वापेक्षया यथोत्तरं न्यूनापञ्चपलावरा तुला, व्यावहारिकी तदाख्या क्रयविक्रयोपयोगिनी, भाजनी तदाख्या भृत्यदेयार्था, अन्तःपुरभाजनी तदाख्या

श्रीमूला

देवीकुमारादिदेयार्था च भवति । तत्र प्रथमा आयमानीतः पञ्चपलन्यूना पञ्चनवतिपला, द्वितीया व्यावहारिकीतस्तावन्न्यूना नवतिपला, तृतीया भाजनीतस्तावन्न्यूना पञ्चाशीतिपलेति विवेकः ।

व्यावहारिक्यादीनामपि पलादिमाने परस्परविशेषमाह—तासामित्यादि । तासां व्यावहारिक्यादीनाम् अर्धधरणावरम् अर्धेनार्धेन धरणेन पूर्वंपूर्वापेक्षया न्यूनम्, पलं भवति । तद्यथा—दशधरणिकादायमानीपलादर्धोनं सार्धनवधरणिकं पलं व्यावहारिक्याः, ततोऽर्धोनं नवधरणिकं भाजन्याः, ततोऽर्धोनं सार्धाष्टधरणिकमन्तः-पुरभाजन्या इति । द्विपलावरं द्वाभ्यां द्वाभ्यां पलाभ्यां पूर्वंपूर्वतो न्यूनम्, उत्तरलोहम् उत्तरासां लोहं भवति । षडङ्गुलावराश्च षट्षडङ्गुलन्यूनाश्च, आयामाः दैर्घ्याणि भवन्ति, अर्थादुत्तरासाम् । तद्यथा—पञ्चत्रिंशत्पललोहा द्विसप्तत्यङ्गुलायामा च यद्यायमानी, तदा त्रयस्त्रिंशत्पललोहा षट्षष्ट्यङ्गुलायामा च व्यावहारिकी भवति, एकत्रिंशत्पललोहा षष्ट्यङ्गुलायामा च भाजनी, एकोनत्रिंशत्पललोहा चतुष्पञ्चाशदङ्गुलायामा चान्तःपुरभाजनीति ।

प्रयाममाह—पूर्वयोरिति । पूर्वयोः परिमाण्यायमान्योः, पञ्चपलिकः प्रयामः पलशते पञ्चपलमधिकदेयं भवति । मांसलोहलवणवर्जं मांसलोहादीन् वर्जयित्वा, तेषां तु न प्रयामः ।

काष्ठतुलामाह—काष्ठेत्यादि । काष्ठतुला सारदारुप्रकृतिस्तुला, अष्टहस्ता, पदवती एकद्वित्र्यादिपदरेखोपेता, प्रतिमानवती प्रमाणपाषाणयुक्ता, मयूरपदाधिष्ठाना मयूरपदौ तदाकारस्तम्भौ अधिष्ठानमाधारो यस्यास्तादृशी, मयूरपदाधिष्ठितेति पाठे मयूरपदाश्रितेत्यर्थः । कर्तव्या ।

काष्ठपञ्चविंशतीत्यादि । काष्ठपञ्चविंशतिपलम् इन्धनपलपञ्चविंशतिः, तण्डुल-प्रस्थसाधनं प्रस्थमिततण्डुलपाकनिष्पादकं भवति । एषो प्रदेशो बह्वल्पयोरिति । प्रस्थाधिकतण्डुलस्य प्रस्थन्यूनतण्डुलस्य चायमेव पाकापेक्षितकाष्ठमानव्यवस्थापन-मार्गः । एतच्च कोष्ठागाराध्यक्षशेषम् असारस्याप्यमितो व्ययो न कर्तव्यः किमुत सारस्येति सामान्यज्ञापनद्वारेण प्राकरणिकेषु मानेष्ववधानोपदेशार्थं द्रष्टव्यम् ।

इति तुलेत्यादि । इति उक्तप्रकारेण, तुलाप्रतिमानं व्याख्यातं तुलाः षोडशविधाः प्रतिमानानि च चतुर्दशविधानि निरूपितानि ।

चाणक्यटीका

विंशतितौलिको भारः[1] विंशतितुलापरिमाणो भार इति । समवृत्त तुलापेक्षया हि शतं तुलेत्युच्यते पारिमाणिकीतुलापेक्षया तु दशतौलिको भारः स्यात् ।

दशधरणिकं पलम् । "अष्टाशीतिः सर्षपो माषकः, ते षोडश धरणम्" इत्युक्तम्,

१. "भारः स्याद् विंशतिस्तुला" इत्यमरः ।

चाणक्यटीका

तानि दशपलम्, तत्पलशतम् आय (त ?) मानी तत्पलशतप्रमाणा या सा आयग्रहणार्थत्वाद् आयमानीत्युच्यते तुला।

तदपेक्षया तु पञ्चपला (पला ? वरा, व्यावहारिकी भाजिनी अन्तःपुरभाजिनी च पञ्चनवतिपला (नवतिपला) पञ्चाशीतिपला च क्रमेण। व्यावहारिकी व्यवहारार्था। भृत्यादिविधार्था भाजिनी। अन्तःपुरप्रधानार्था अन्तःपुरभाजिनी पञ्च पञ्च पलन्यून (त्) कन्धा।

(कथं पलमिति पलानि ?) षडङ्गुलावराश्चायामाः द्विसप्तत्यङ्गुलापेक्षया आयमान्यादीनां षट्षष्टि (षष्टि) चतुःपञ्चाशदष्टचत्वारिंशदायामाः।

पूर्वयोः पञ्चपलिकः प्रयाम इति। आयमानीव्यवहारिक्योः शते पञ्च पलान्यारोप्यन्ते। तत्रापि मांसादिषु प्रयामो नादेयः।

अत्रकेचिद् व्यवस्थामाहुः—समवृत्तपरिमाण्यौ सर्वजनस्य तुले भवतः। आयमान्या (दय) श्चतस्रो राज्ञ इति।

काष्ठतुलामिति अष्टहस्तायामां पदवतीं प्रतिमानवतीं चेति पूर्वापेक्षम्। मयूरपदाकारस्तम्भद्वयेन विधृतलोहदण्डिकोपरि स्थितां कारयेदित्येव। हस्ताभ्यामुत्क्षेप्तुमपर्याः (णत्वा ? प्तव) त्तया।

काष्ठपञ्चविंशतिपलं तण्डुलप्रस्थसाधनं भवति। एष प्रदेशो बह्वल्पयोरपि योज्यः। (वा ?) शतमाढकसाधनं भवति, (स) कर्षाणि षट्पलानि कुडुवसाधनं इत्यनया दिशा योज्यम्।

प्रतिपदपञ्चिका

विंशति तौलिक इति, पलशतप्रमाणं तुला, विंशतिप्रमाणो भारसंज्ञो भवति। पूर्वस्मात्परिभाषितसुवर्णपलादधिकमपरद्रव्यान्तराणां परिच्छेदाय पलविशेषमाह-दशधरणिकं पलमिति, पूर्वोक्तं दशधरणपरिमाणं पलं ततश्च पूर्वोक्तपलात् कर्षाधिकमेतत्पलं भवति, दशधरणिकानां पलानां शतं यथाकृति आय एवानयो यस्मान्मीयते तस्मादायमानी संज्ञकेयं तुला भवति।

पञ्चपलावरेति वीप्सा लोपोऽत्र द्रष्टव्यः। पञ्चभिः पञ्चभिः पलैरवरा, निकृष्टा व्यावहारिक्यादयस्तिस्रस्तुला भवन्ति। आयमान्याः पञ्चभिः पलैः निकृष्टत्वात् पञ्चनवतिपलधारिणी व्यावहारिकी लोकविक्रयार्थं तु भवति। तस्या अपि पञ्चपलावरा नवति पलधारिणी भाजनीहृत्य देयोपयोगिनी तुला भवति। ततोपि पञ्चपलावरा पञ्चाशीति पलधारिणी। अन्तःपुरभाजिनी देवीकुमारादिदेयो पयोगिनी तुला भवति। तासामिति, व्यावहारीत्यादीनां अर्धधरणावरं पलमर्धधरणेन अवरं पलं भवति। तद्यथा, आयमान्यास्समवृत्तलक्षणाया दशधरणिकं पालं व्यावहारिक्या सार्धनवधरणिकं भाजन्यानवधरणिकं अन्तःपुरभाजन्यास्सार्धाष्टधरणिकम् इति द्विपलावरमुत्तरलोहमिति उत्तरस्याः पलद्वयाहीनं लोहं भर्वात। तद्यथा, आयमानी पञ्चत्रिंशत्पला षडङ्गुलायामा भाजनीहा व्यावहारिकीस्त्रयस्त्रिंशत्पललोहा अन्तःपुरभाजन्येकोनत्रिंशत्

[द्रोणाढकादिमानानि]

अथ धान्यमाषद्विपलशतं द्रोणम् आयमानम् । सप्ताशीतिपलशतमर्धपलं च व्यावहारिकम् । पञ्चसप्ततिपलशतं भाजनीयम् । द्विषष्टिपलशतमर्धपलं चान्तःपुरभाजनीयम् । तेषामाढकप्रस्थकुडुबाश्चतुर्भागावराः । षोडशद्रोणा खारी । विंशतिद्रोणिकः कुम्भः । कुम्भैर्दशभिर्वहः ।

प्रतिपदपञ्चिका

पललोहेति । षडङ्गुलावराश्चायामा इति षड्भिः षड्भिः अङ्गुलैः निकृष्टा आयामाः दीर्घत्वानि । तद्यथा आयमानी द्विसप्तत्यङ्गुलायामा व्यावहारिकीषण्ण्यङ्गुलायामा अन्तःपुरभाजिनी चतुष्पञ्चाशदङ्गुलायामा पूर्वयोरिति समवृत्तपरिमाण्योः परिमाण्याय मान्योर्वा पञ्चपलकप्रयाम इति पलशते तुलिते पञ्चपलमधिकं देयमांसलोह मणिवर्जमिति तेषां प्रयामो न भवति । काष्ठतुलामाह—काष्ठतुलेति, सारं दारुमयी प्रमाणतोष्टवहस्तापदवती कृतपलादिपदा प्रतिमानवती हारादिप्रमाणप्रतिमान-पाषाणोपेता मयूरपदाधिष्ठानस्तम्भद्वयतोरणोपनिबद्धा कर्तव्येतिवाक्यशेषः । काष्ठपञ्च-विंशतिपलमिति, तावतैन्धनेन तण्डुलप्रस्थापाकनिष्पत्तिरेषप्रदेश इति प्रदेशः प्रकारः प्रदर्शनमितियावत् ।

यथाकाष्ठपञ्चाशत्पलं प्रस्थद्वयसाधनमित्यादि प्रसङ्गाश्चाल्पमूल्यस्याप्यमितो-व्ययो न कार्यः किमङ्ग पुनरस्येति ज्ञापनार्थमत एव कोष्ठागाराध्यक्षवे(त)नामित्येवं षोडशतुलाश्चतुर्दशप्रतिमानानि च व्याख्यातानि ।

श्रीमूला

अथ द्रोणाढकादिनिरूपणमारभते—अथेत्यादि । धान्यमाषद्विपलशतं तुला-द्वयमितधान्यमाषपूरणीयम्) आयमानं नाम द्रोणम् । सप्ताशीतिपलशतमर्धपलं चेति । अर्थादायमानद्रोणादर्धत्रयोदशभिः पलैर्न्यूनम्, व्यावहारिकं नाम द्रोणं भवति । पञ्चसप्ततिपलशतमिति । अर्थाद् व्यावहारिकद्रोणादर्धत्रयोदशपलैर्न्यूनम्, भाजनीयं नाम द्रोणं भवति । द्विषष्टिपलशतमर्धपलं चेति । अर्थाद् भाजनीयद्रोणाद् अर्धत्रयोदशपलै-र्न्यूनम्, अन्तःपुरभाजनीयं नाम द्रोणं भवति । इति चतुर्विधं द्रोणम् ।

तेषामिति । तेषां चतुर्णां द्रोणानाम्, आढकप्रस्थकुडुबाः, चतुर्भागावराः क्रमेण चतुर्भागाः अवराः स्वस्वपूर्वचतुर्भागात्मका अत एव स्वस्वपूर्वतो निकृष्टाश्चेत्यर्थः । एतदुक्तं भवति—द्रोणचतुर्भाग आढक आढकचतुर्भागः प्रस्थः प्रस्थचतुर्भागः कुडुब इति ।

द्रोणादुत्कृष्टान् मानविशेषानाह—षोडशेत्यादि । षोडशद्रोणमिताखारी, विंशतिद्रोणमितः कुम्भः, दशकुम्भमितो वहः ।

[मानसाधनानि]

शुष्कसारदारुमयं समं चतुर्भागशिखं मानं कारयेत् । अन्तश्शिखं वा । रसस्य तु । सुरायाः पुष्पफलयोः तुषाङ्गाराणां सुधायाश्च शिखामानं द्विगुणोत्तरा वृद्धिः ॥

———

चाणक्यटीका

तुलाप्रतिमानमुक्त्वा सर्वद्रव्यविषयं मानमाह—पूर्ववद् धान्यमाषपलशतद्वयम् आयग्रहणार्थत्वाद् द्रोणं कारयेदित्यपेक्ष्य द्वितीया । तथासप्ताशीत्युत्तरं पलशतमर्धपलं च यन्मानं व्यावहारिकम् । भाजनीयमन्तःपुरभाजनीयं च पूर्वस्मादर्धत्रयोदशपलन्यून-मित्यर्थः ।

तेषां चतुर्णामपि द्रोणानाम् । चतुर्भागम् आढकम् । तच्चतुर्भागः प्रस्थः । प्रस्थचतुर्भागः कुडुबमिति ।

उत्तरमायमानमाह—षोडशद्रोणा खारीत्यादि । आयामादीनां यथास्वं प्रमाणं नेति बोद्धव्यम् ।

प्रतिपदपञ्चिका

मानधान्यादीनाह—अथेत्यधिकारान्तरे धान्यमाषाणां पलशतद्वयतुलितमाय-मानं नाम दोणं भवति । ततोऽर्धत्रयो दशपलावरा व्यावहारिकभाजनीयां तं पुरं भाजनीयसंज्ञकानि त्रीणि द्रोणमानानि भवन्ति । तद्यथा, द्विशतं पलं द्रोणमायमानं सप्ताशीतिपलशतं अर्धपलं च व्यावहारिकं पञ्चसप्ततिशतं भाजनीयम् । द्विषष्टिशतमर्ध-पलंच अन्तःपुरभाजनीयं तेषामिति, चतुर्णामायमानादिद्रोणानामाढकप्रस्थकुटुम्वा यथास्वं चतुर्भागावराः यथाक्रमं चतुर्भागाश्चतुर्भागावरा(प)रानिकृष्टाः तद् यथा, द्रोणस्य आढकश्चतुर्भागः आढकस्य प्रस्थः प्रस्थस्य कुडुव इति, षोडशद्रोणेत्यादिसु-बोधम् ।

श्रीमूला

मानसाधनान्याह—शुष्केत्यादि । शुष्कसारदारूमयम्, समं तुल्यमूलाग्रं चतुर्भाग-शिखं शिखा मुखोपरितनावकाशः आमुखाद् भागत्रयवतः शिखायां मेयचतुर्भागो यथा तिष्ठेत् तथा कृतशिखम्, मानम्, कारयेत् । अन्तश्शिखं वा अन्तर्गता आमूल-मुखान्तावकाशान्तःप्रविष्टा शिखा पूर्वोक्तश्चतुर्भागावकाशो यस्य तत् तथाभूत वा, मानं कारयेत् । धान्यादिमाने चायं विकल्पः । रसस्य त्विति । अन्तश्शिखमित्यनुवर्तते । तत्र तुशब्दोऽवधारणार्थः सम्वध्यते । तदयमर्थः—रसस्य घृततैलादेरन्तश्शिखमेव मानं भवतीति ।

सुरायाइत्यादि । सुरादीनां षण्णां शिखामानम् अस्ति । किन्तु द्विगुणोत्तरा वृद्धिः द्विगुणाधिका तस्य वृद्धिः । धान्यादिषु शिखामानं यदुक्तं चतुर्भागात्मकं

[तुलानां मानानां च मूल्यव्यवस्था]

सपादपणो द्रोणमूल्यम् । आढकस्य पादोनः । षण्माषकाः प्रस्थस्य । माषकः कुडुबस्य । द्विगुणं रसादीनां मानमूल्यम् । विंशतिपणाः प्रतिमानस्य तुलामूल्यं त्रिभागः ॥

श्रीमूला

तदिह द्वैगुण्यं यातीत्यर्थः । अतश्च सुरादीनां प्रस्थः पञ्चभिरेव कुडुवैः भवति, न तु धान्यानामिव चतुर्भिः । तत्रापि सुरायाः बहिश्शिखासम्भवाभावात् प्रस्थोऽन्तश्शिखोऽर्थादन्तः प्रविष्टपञ्चकुडुवः कार्यः ।

चाणक्यटीका

द्रोणादिमानं शुष्कसारदारु (मयम्) असङ्कोचस्फुटनम् । समम् ऊर्ध्वमधश्च । अतएव चतुर्थोभागः शिखा यस्य तन्मानं कारयेत् । भूयोऽभ्यन्तरचतुर्थः शिखेति अन्तःशिखं वेति लोहशलाकावच्छेद्यशिखं वेत्यर्थः ।

रसस्येति रसमानकरणाद् रसादीनां पञ्चानां शिखामानद्विगुणोत्तरा वृद्धिः शिखामानं तावच्चतुर्णां भागत्वाद् द्रोणस्य पलं तदेव द्विगुणं यस्येति बहुव्रीहिः । शिखामानद्विगुणं पञ्चविंशतिपलम्, तदुत्तरा यथाक्रमं वृद्धिः । तद्यथा—रसस्य घृतादेः पञ्चसप्ततिपलानि शिखामानम् । सुरायाः पलशतम् । पुष्पफलयोः पञ्चविंशत्यधिकम् । तुषाङ्गाराणां पलशतम् । सुधायाः पञ्चसप्ततिशतमिति । सुधामानस्य द्विगुणोत्तरे तु षष्ठीसमासे मानादपि शिखामानं (द्वि) गुणं सुधायाः स्यात् । शिखाभिश्च सार्धं रसादीनां द्रोणादिव्यवहारो नान्यथेत्यभिप्रायः । एवमाढकादिषु योज्यम् ।

प्रतिपदपञ्चिका

तेषां तुलापरिच्छिन्नानां द्रोणादीनां सुखव्यवहारार्थं मानान्याह—शुष्कसारदारुमिति, शुष्कदृढदारुघटितं समं सदृशमूलाग्रं चतुर्भागशिवं भागत्रयेण मुखसमं हृतस्य चतुर्भागेन यथाशिखा भवति तथा शिखां कारयेत् । अन्तरशिखां वा मुखसमं हृतशिखा चतुर्भागं वा धान्यानां देशान्तरप्रसिद्ध्या विकल्पोऽयं । रसस्यत्विति, अन्तःशिखमिति वर्तते तु शब्दोऽवधारणे रसस्य तैलघृतादेरन्तश्शिखमेव न तत्र वा शब्दस्सम्बद्ध्यते । सुरादीनां पणणां भागत्रयेण मुखसमं हृतस्य शिखायां भागद्वयं भवति । ततस्तेषां पञ्चभिः कुटुम्बैः प्रस्थो भवति, सुरायास्त्वन्तः प्रविष्ट पञ्चकुटुम्ब कर्तव्यम् । द्रव्याणां शिखाभावात् । पञ्चकुटु(डुप)म्बप्रस्थार्थं—पुष्पादिभिस्सहपाठः ।

श्रीमूला

तुलामानभाण्डस्य मूल्यमाह—सपादपण इत्यादि । माषकः कुडुबस्येत्येतदन्तमतिरोहितार्थम् ।

[तुलामानन्यूनाधिकभावपरीक्षाकालनियमः, अपरीक्षितव्यवहारे दण्डः, परीक्षकदेयांशाश्च]

चतुर्मासिकं प्रातिवेधनिकं कारयेत् । अप्रतिविद्धस्यात्ययः सपादः सप्तविंशतिपणः । प्रातिवेधनिकं काकणीकमहरहः पौतवाध्यक्षाय दद्युः ।

श्रीमूला

द्विगुणमिति । रसादीनां घृततैलादीनाम्, द्विगुणं सपादपणादिपूर्वोक्तद्विगुणमर्धतृतीयपणादिकम्, द्रोणादिमूल्यं भवति । धान्यमानापेक्षया रसादिमानानामन्तश्शिखत्वेन रूपपृथुत्वात् श्लक्ष्णतरदारुघटितत्वाच्च मूल्यद्वैगुण्योपपत्तिः ।

विंशतीत्यादि । प्रतिमानस्य चतुर्दशविधप्रतिमानसमुदायस्य, विंशतिपणाः, मूल्यम् । तुलामूल्यमित्यादि । तुलामूल्यम् अनन्तरोक्तस्य विंशतिपणात्मकस्य प्रतिमानमूल्यस्य त्रिभागः ।

चाणक्यटीका

"तुलामानभाण्डं पौतवहस्तात् क्रीणीयुः" (अधि० २, अध्या० १४) इत्युक्तम् । अतोमूल्यमाह—सपादः पण इति । पादोन इति द्वादशमाषका इत्यर्थः ।

द्विगुणं रसादीनां पञ्चानां मानमूल्यम् । विंशतिपणाः प्रतिमानस्य सर्वस्य । त्रिभागः विंशत्याः ।

प्रतिपदपञ्चिका

तुलामानभाण्डं पौतवहस्तात् क्रीणीयुरिति उक्तम् । तस्यमूल्यमाह—सपादपण-इत्यादि ।

प्रबोधम् । द्विगुणमित्येतदेव, अर्धतृतीयपणादिरसानां घृतादीनां द्रोणादिमानमूल्ये तेषामन्तःशिखत्वेन धान्यमानेभ्या रूपतः पृथुत्वात्श्लक्ष्णतरदारुघटनीयत्वाच्च, मूल्यवैगुण्यमिति विंशतिपणाः प्रतिमानस्येति चतुर्दशविधस्यापि समुदितस्य तुलामूल्यं त्रिभाग इति प्रथमायास्सुवर्णतुलायाः पणत्रिभागो मूल्यमेवं पलवृद्धौ मूल्यवृद्धया दशपललोहायास्त्रिभागाधिक, पणत्रयमूल्यम् एवं शेषाणामपि योज्यमिति केचित् । अपरे तुलामूल्यं त्रिभाग इति अनन्तरोक्तमूल्यप्रतिमानविंशतिपणस्त्रिभागस्तुला अप्रतिविद्धस्याशोधितस्य अत्ययो दण्डः पादस्सप्तविंशतिपणः न्यूनातिरिक्तातायां तु कण्टकशोधनोक्तदण्डाः ।

श्रीमूला

चतुरित्यादि । चतुर्मासिकं चतुर्षु चतुर्षु मासेषु भवम्, प्रतिवेधनमेव प्रातवेधनिकं परिशोधनम्, विनयादित्वाट्ठक् । कारयेत् । अप्रतिविद्धस्येति । अप्रतिविद्धस्य अपरिशोधितस्य तुलामानस्य, व्यवहारे, अत्ययो दण्डः, सपादः सप्तविंशतिपणः । प्राति-

[घृतादिष्वधिकतया ग्राह्या अंशाः
कुडुबादिमानचतुष्टयञ्च]

द्वात्रिंशद्भागः तप्तव्याजी सर्पिषः, चतुष्षष्टिभागस्तैलस्य । पञ्चाशद्भागो मानस्रावो द्रवाणाम् । कुडुबार्धचतुरष्टभागानि मानानि कारयेत् ॥

———————

श्रीमूला

वेधनिकमिति । प्रातिवेधनिकं परिशोधननिमित्तम्, काकणिकम्, अहरहः प्रतिदिनम्, पौतवाध्यक्षाय, दद्युः, दिवसस्यैकाकाकणीति क्रमेण मासचतुष्टयस्य सविंशति काकणीनां शतं शोधनकाले तुलामानव्यवहारिणोऽर्पयेयुरित्यर्थः ।

चाणक्यटीका

चातुर्मासिकमिति । चतुर्षु मासेषु अध्यक्षः तुलामानादिप्रतिवेधनार्थमुपसंहारं कारयेत्—किंक्षीणम, उतान्यथा कल्पनमिति । अप्रतिविद्धस्य अशोधितस्य मानादेः अर्थान्तरे (ण) व्यवहरतः अत्ययः सपादः सप्तविंशतिपणः । क्रमतश्च मानप्रतिमानानि प्रतिवेधयितारः, काकणी दीयते अस्मिन्नहनि तादृशं दद्युः पौतवाध्यक्षाय । स्वकैर्मानादिभिर्व्यवहरद्भिः प्रतिदिवसं काकणी देयेत्यन्ये ।

प्रतिपदपञ्चिका

प्रातिवेधनिकमिति । प्रतिवेधनानिमित्तंकाकणिकं अहरहरिति, अहन्यहनि माषचतुर्भागं प्रतिवेधनकाले मौनचतुष्टयस्य त्रिंशन्माषकं पौतवाध्यक्षाय वणिजो दद्युः ।

श्रीमूला

रसादिप्रसङ्गाद् घृतादिगतं किञ्चिदाह—द्वात्रिंशदित्यादि । सर्पिषः घृतस्य विलापितस्य क्रीयमाणस्य, द्वात्रिंशभागः अधिकतया ग्राह्य इति वाक्यशेषः । तप्तव्याजी स तप्तव्याजीसंज्ञः । तैलस्य चतुःषष्टिभागः ग्राह्यः । पञ्चाशद्भाग इति । पञ्चाशद्भागो मानस्रावः तदाख्यो, द्रवाणां ग्राह्यः । द्रवसामान्यविषयोऽयं मानस्रावः सर्पिस्तैलयोर्यथोक्तव्याज्या सह समुच्चीयत इत्याहुः ।

कुडुबादीनामल्पपरिमाणानां मानसाधनान्याह—कुडुबार्धेत्यादि । प्रस्थचतुर्भागः कुडुब उक्तः तस्य मानसाधनं कुडुबं कुडुबार्धं कुडुबचतुर्भागं कुडुबाष्टभागम् इत्येतानि मानानि, कारयेत् निर्मापयेत् ।

चाणक्यटीका

तप्तव्याजीति तप्तस्य मीयमानस्य द्वाविंशद्भागः । तैलस्य चतुष्षष्टिभागमधिकं ग्राह्यम् । पञ्चाशद्भागा मानास्रवो द्रोणान्मीयमानादयो ?······

कुडुबार्धं चतुर्भागं तदष्टभागं च मानान्यल्पानि संव्यवहारार्थं द्रवाणां कारयेत् ।

[वारकघटिकासंज्ञे]

कुडुवाश्चतुर (१ शीतिः वारकस्सर्पिषो मतः ।
चतुष्पष्टिस्तु तैलस्य पादश्च घटिकाऽनयोः ॥९३॥

इत्यध्यक्षप्रचारे तुलामानपौतवं एकोनविंशोऽध्यायः
आदितश्चत्वारिंशः

प्रतिपदपञ्चिका

प्रसङ्गादन्यदप्यादेयमाह—द्वात्रिंशद्भाग इति, सर्पिषो द्वात्रिंशद्भागो ग्राह्यः । तस्य तप्तव्याजीति संज्ञा तैलस्य चतुषष्टिभागः पञ्चाशद्भाग इति, तथापरोपि पञ्चाशद्भागस्तैलसर्पिषोस्तप्तव्याजी सहिते ग्राह्यः । अन्येषां तु द्रवाणां पञ्चाशद्भाग एव केवलः तस्य भग्नास्राव इति संज्ञा ।

श्रीमूला

अध्यायान्ते श्लोकमाह—कुडुवा इत्यादि । सर्पिषः, चतुरशीतिः कुडुबाः यत्र मान्ति, स वारकस्तत्संज्ञः, मतः । तैलस्य तु, चतुःषष्टिः कुडुवाः यत्र मान्ति, स वारकः । अनयोः सर्पिर्वारकतैलवारकयोः, पादः चतुर्भागः, घटिका सर्पिर्घटिकाख्या तैलघटिकाख्या च, मता ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनविंशोऽध्यायस्तुलामानपौतवम्,
आदितश्चत्वारिंशः ॥

चाणक्यटीका

कुडुवाः चतुरशीतिर्वारकः सर्पिषो मतः । चतुष्षष्टिकुडुवाः तैलस्य वारकः । घृततैलवारकयोश्चतुर्भागस्य घटिकेत्याख्या । पुराकल्पे स्थितिरियम्, देशान्तरस्थितिर्वेति ।

॥ तुलामानपौतवमेकोनविंशं प्रकरणं समाप्तम् ॥
॥ एकोनविंशश्चाध्यायः ॥

प्रतिपदपञ्चिका

कुटुम्बार्थंचतुष्टय भागानीति कुटुम्ब(डुव)प्रमाणमुक्तम् । प्रस्थचतुर्भागः कुटुम्ब इति तन्मानसाधनम् । कुटुम्बकुडुवार्थं कुडुम्बचतुर्भागं वक्ष्यतिहि । अष्टौ पारकाः सर्पिषः पणीकः प्रच्छमङ्चर्मंचेत्यादि ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायां अर्थशास्त्रटीकायां
अध्यक्षप्रचारिके द्वितीयेधिकरणे एकोनत्रिंशोध्यायः
आदितः चत्वारिंशोध्यायः ॥

अष्टात्रिंशं प्रकरणम्

विंशोऽध्यायः ।

देशकालमानम् ।

[देशमानानि]

मानाध्यक्षो देशकालमानं विद्यात् ॥

अष्टौ परमाणवो रथचक्रविप्रुट् । ता अष्टौ लिक्षा । ता अष्टौ यूकामध्यः । ते अष्टौ यवमध्यः । अष्टौ यवमध्याः अङ्गुलम् । मध्यमस्य पुरुषस्य मध्यमाया अङ्गुल्या मध्यप्रकर्षो वाऽङ्गुलम् । चतुरङ्गुलो धनुर्ग्रहः । अष्टाङ्गुला धनुर्मुष्टिः । द्वादशाङ्गुला वितस्तिः, छायापौरुषं च । चतुर्दशाङ्गुलं शमश्शलः परिरयः पदं च । द्विवितस्तिररत्निः प्राजापत्यो हस्तः । सधनुर्ग्रहः पौतवविवीतमानम् । सधनुर्मुष्टिः किष्कुः कंसो वा ।

श्रीमूला

देशकालमानमिति—सूत्रम् । देशो भूमिस्तद्विकारः प्राकारस्तम्भादिः कालस्त्रुटिलवादिः तयोर्मानमिति सूत्रार्थः । 'द्वादशहस्तादूर्ध्वमोजं युग्मं वा आ चतुर्विंशतिहस्ताद्' इति दुर्गविधाने, 'चतुर्दण्डान्तरा रथ्याः' 'पञ्चारत्नयो रथपथः' इति दुर्गनिवेशेऽन्यत्र च हस्तदण्डारत्न्यादीनां व्यवहारः कृतः । तेषां प्रमाणं तु नोक्तम् । तथा 'पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयाद्' इत्येवं राजप्रणिधौ कालविभाग उक्तः । तस्य मानं तु नोक्तम् । तदुभयमिह मानप्रसङ्गादुच्यत इति सङ्गतिः ।

मानाध्यक्ष इति । मानाध्यक्षः पौतवाध्यक्षः, देशकालमानम्, विद्यात् वक्ष्यमाणप्रकारेण जानीयात् ।

अष्टाविति । अष्टौ, परमाणवः अतीन्द्रिया अणवः संहताः, रथचक्रविप्रुट् रथचक्रोत्थापितं चक्षुर्ग्राह्यमेकं रजो भवति । ता विप्रुषः, अष्टौ, लिक्षा । ता अष्टौ लिक्षाः, यूकामध्यः । ते यूकामध्याः अष्टौ, यवमध्यः । अष्टौ यवमध्याः अङ्गुलमेकम् ।

अङ्गुलस्य प्रकारान्तरमाह—मध्यमस्येत्यादि । अङ्गुलशतोत्सेधोऽधंनवत्यङ्गुलपरिणाहो मध्यमः पुरुषः इति स्वामी । मध्यमस्य पुरुषस्य, मध्यमायाः अङ्गुल्याः हस्तमध्यमाङ्गुल्याः, मध्यप्रकर्षो मध्यप्रदेशपृथुत्वातिशयो वा, अङ्गुलम् ।

श्रीमूला

चतुरङ्गुल इति। चत्वार्यङ्गुलानि, धनुर्ग्रहः धनुर्ग्रहसंज्ञानि। अष्टाङ्गुलेति। धनुर्ग्रहद्विगुणा धनुर्मुष्टिः।

द्वादशेत्यादि। द्वादशाङ्गुला वितस्तिः तदाख्या। छायापौरुषं चेति छायापौरुषं शङ्कुप्रमाणं, तदपि द्वादशाङ्गुलमित्यर्थः। चतुर्दशेत्यादि। चतुर्दशाङ्गुलं शमसंज्ञं शलसंज्ञं परिरयसंज्ञं पदसंज्ञं च। द्विवितस्तिरिति। चतुर्विंशत्यङ्गुलोऽरत्निः। स प्राजापत्यो विश्वकर्मसम्मतो हस्तः।

सधनुर्ग्रह इति। धनुर्ग्रहयुक्तः चतुरङ्गुलाधिकः प्राजापत्यः अर्थादष्टाविंशत्यङ्गुलमानम् पौतवविवीतमानं काष्ठतुलादेः पश्वर्थक्षेत्रादेश्च हस्तमानं भवति। सधनुर्मुष्टिरिति। अष्टाङ्गुलाधिकः प्राजापत्यः किष्कुसंज्ञः कंससंज्ञो वा।

चाणक्यटीका

त्रिविधं प्रमेयं प (ण्यं ? ण्येन) देशकालेन च, तत्र पण्यस्य मानमुक्तम्, देशकालयोरुच्यत इत्याह—मानाध्यक्ष इति। सामान्यनिर्देशोऽप्ययं तुलामा (नाव ? नवि) शिष्टयोर्देशकाल (शिष्ट ?) योः सर्वव्यवहाराङ्गभूतं मानं विद्यात्।

अष्टौ परमाणव इति कात्स्न्र्याख्यानात् अत्यन्तसूक्ष्मत्वाद् रथच (क्रे क्रते ? क्रोद्धृतं) रजः विप्रुषादिकं दृश्यरूपम्। ता अष्टौ लिक्षा। अष्टौ लिक्षाः यूकामध्यः, मध्यग्रहणमवयवप्रतिषेधार्थम्। अष्टौ यवमध्या अङ्गुलम्। किं संज्ञैव। नैवम्। प्राण्यवयवोऽप्यं मध्यमस्य पुरुषस्य मध्यमाया अङ्गुल्या मध्यमो भाग एवंप्रकारः। एवंप्रकर्षो वा (मध्यमं) प्रमाणस्यायमेव स्यात्। तेनैव अष्टयवमध्यप्रमाणाङ्गुलेन मध्यमत्वम्। अतो (ऽधिक ?) न्यूनाधिकत्वं बोद्धव्यम्। चतुर्हस्तप्रमाणश्च मध्यमः पुमानिति। चतरङ्गुलो धनुर्ग्रहः संज्ञैव।

द्वादशाङ्गुला वितस्तिः। छाया (वज्ञो ? भिज्ञा) नार्था छाया पुरुषद्वादशाङ्गुलमेव। शमः[1] शलः परिरयः पदं चेति चतुर्दशाङ्गु (लका ? ला) देरविशेषप्रसिद्धाः संज्ञाः। द्विवितस्तिररत्निः प्राजापत्यो हस्तः लोकसंव्यवहारार्थः।

स एव सधनुर्ग्रहः अष्टाविंशत्यङ्गुलः पौतवविवीतमानम्। तद्यथा—"काष्ठतुलामष्टहस्तां पदवतीम्" इत्यादि। पौतवविवीतमानम् इत्युपलक्षणार्थत्वाद् ब्रह्मसोमादिग्रहणम्, तत्र हि गव्यूताद्यनेन मानेनेति। सधनुर्मुष्टिः प्रजापत्य एव द्वात्रिंशदङ्गुलः किष्कुः कंसो वा।

प्रतिपदपञ्चिका

देशकालमानमिति सूत्रम्।

देशो भूमिः तद्ग्रहणात्तद्विकारस्यापि प्राकारादेर्ग्रहणम्। कालोपि त्रुटिलव-

१. केशवस्वामी तु 'शमस्तु माने च चतुरङ्गुले, पदं पञ्चदशाङ्गुले" इत्याह।

द्विचत्वारिंशदङ्गुलस्तक्षणः क्राकचिककिष्कुः स्कन्धावारदुर्गराजपरिग्रहमानम्। चतुष्पञ्चाशदङ्गुलः कुप्यवनहस्तः। चतुरशीत्यङ्गुलो व्यामो रज्जुमानं खातपौरुषं च। चतुररत्निर्दण्डो धनुर्नालिका पौरुषं च। गार्हपत्यमष्टशताङ्गुलं धनुः पथिप्राकारमानम्। पौरुषं च अग्निचित्यानाम्। षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानम्। दशदण्डा रज्जुः। द्विरज्जुकः परिदेशः। त्रिरज्जुकं निवर्तनम्। एकतो द्विदण्डाधिको बाहुः। द्विधनुस्सहस्रं गोरुतम्। चतुर्गोरुतं योजनम्। इति देशमानं व्याख्यातम्॥

प्रतिपदपञ्चिका

निमेषादिस्तयोर्मानं परिच्छेद इति सूत्रार्थः। सम्बन्धस्तु द्वादशहस्तादूर्ध्वं। ओजं युग्मं वेत्यादि दुर्गं विधाननिवेशादौ हस्तारत्निदण्डादयोभिहिताः तत्स्वरूपं तु नोक्तम्। तथा राजप्रणिधिप्रभृतौ च पूर्वे दिवसस्य भागे रक्षाविधानमित्यादि कालप्रविभागश्च तन्मानविधिरित्यतः तुलामानादिप्रसङ्गेन देशकालयोरपि मानविधानमभिधीयत इति तदाह—मानाध्यक्षः पौतवाध्यक्ष एवान्यो वा समाहर्तृप्रक्रतः स देशकालमानं विद्यात्। कथमित्याह—अष्टौ परमाणव इत्यादि, अष्टावतीन्द्रियाः परमाणवः संहतास्सन्तः एको रथचक्र विप्रुट्रथचक्रोद्धतं चक्षुर्ग्राह्यं यद्रजः ततः क्रमेणाष्टोत्तराणि लीक्षा यूकायवमध्याङ्गुलानि प्रकारान्तरमङ्गुलस्याह—मध्यमस्येत्यादि, मध्यमस्याङ्गुलशतारोहस्यअर्धनवतिपरिणाहस्य पुरुषस्य मध्यहस्ताङ्गुल्या मध्यमप्रदेशस्य प्रकर्षः पृथुत्वातिशयः स्वाङ्गुलं तच्च इ(तु)ष्टयं धनुर्ग्रहं नाम। स द्विगुणों धनुर्मुष्टिः। स एव त्रिगुणो वितस्तिः छायापौरुषं शङ्कुप्रमाणं तदपि द्वादशाङ्गुलमेव। चतुर्दशाङ्गुलस्य शमादयश्चतस्रस्संज्ञाः। स द्विवितस्तिः चतुर्विंशत्यङ्गुलोऽरत्निः स एव प्रजापत्यस्सामान्यो हस्तः। स एव सधनुर्ग्रहोऽष्टाविंशत्यङ्गुलः पौतवविवीतमानम्। तयोर्हस्तप्रमाणं, तत्र पौतवम् काष्ठतुलादि, विवीतं प्रतीतं। सधनुर्मुष्टिःस एव प्राजापत्यो हस्तो द्वात्रिंशदङ्गुलः। किष्कुरुच्यते कंसो वेति

श्रीमूला

द्विचत्वारिंशदित्यादि। द्विचत्वारिंशदङ्गुलः हस्तः, तक्षणः वर्धकेः कर्मणि, क्राकचिककिष्कुः करपत्रकर्ममानोपयोगी किष्कुः, स्कन्धावारदुर्गराजपरिग्रहमानं स्कन्धावारादीनां च मानम्, भवति। चतुष्पञ्चाशदित्यादि। चतुष्पञ्चाशदङ्गुलः, कुप्यवनहस्तः द्रव्यवनकर्ममानहस्तः।

चतुरशीतीत्यादि। चतुरशीत्यङ्गुलः हस्तः, व्यामः, स च रज्जुमानम्, खातपौरुषं च कूपादेः पुरुषमानं च भवति।

चतुररत्निरिति। चः संज्ञासमुच्चये। चतुररत्निप्रमाणस्य दण्डः धनु नालिका पौरुषम् इति चतस्रः संज्ञाः।

श्रीमूला

गार्हपत्यमिति। गृहपतिर्विश्वकर्मा तद्दृष्टं गार्हपत्यम्, अष्टशताङ्गुलम्, धनुः तदाख्यम्। तच्च पथिप्राकारमानम् अध्वमानं प्राकारमानं च भवति। पौरुषं चेति। पुरुषमानम्, अग्निचित्यानाम् अग्निचयनविशेषाणाम्।

षट्कंस इत्यादि। कंसषट्कप्रमाणः अर्थात् प्राजापत्यहस्ताष्टकप्रमाणः, दण्डः। सः ब्रह्मदेयातिथ्यमानं ब्रह्मदेयानाम् आतिथ्यानां च मानं भवति। ब्रह्मदेयानि ऋत्विगादिब्राह्मणदेयानि, आतिथ्यानि अतिथिभोजनार्थविसृष्टक्षेत्राणि। दशदण्डेति। अर्थाच्चत्वारिंशद्धस्तप्रमाणा, रज्जुः। द्विरज्जुक इति। विंशतिदण्डप्रमाणः, परिदेशः। त्रिरज्जुकमिति। त्रिंशद्दण्डप्रमाणम्, निवर्तनं चतुरश्रनिवर्तनम्।

एकतो द्विदण्डाधिक इति। निवर्तनस्यैवैकपार्श्वे दण्डद्वयाधिकप्रमाणः पार्श्वान्तरेष्वनधिकप्रमाणः अर्थाद् द्वात्रिंशद्दण्डदीर्घस्त्रिंशद्दण्डविस्तारश्च मानविशेषः, बाहुस्तत्संज्ञः। द्विधनुस्सहस्रमिति। धनुस्सहस्रद्वयप्रमाणम्, गोरुतम्। स क्रोश इति व्यवह्रियते। चतुर्गोरुतमिति। अर्थात् क्रोशचतुष्टयं योजनसंज्ञम्। इति देशमानमिति। व्याख्यातमिति शेषः।

चाणक्यटीका

द्विचत्वारिंशदङ्गुल इति। चतुर्दशाङ्गुलाधिकः तक्ष्णो हस्तः क्रकर एव किष्कुः सारदारुपाटनार्थः। अपरे क्राकचिककिष्कुरित्यन्वर्थमेव पठन्ति। स एव क्राकचिक किष्कुः स्कन्धावारस्य दुर्गस्य राजपरिग्रहस्य राजविशेषस्य मानम्। चतुष्पञ्चाशदङ्गुलः कुप्यवनहस्तः कुप्यवनसमुत्थद्रव्यमानार्थः।

(चतुरशीत्यङ्गुलो) व्यामो रज्जुमानं (सम्भव ?) खातपौरुषं (च)। चतुररत्निर्दण्डो धनुश्च संज्ञाद्वैधम्[१]। नालिका पौरुषं च नालिकाकारेति ज्ञायते।

गार्हपत्यमष्टशताङ्गुलं धनुः गृहपतीनां वास्तुमानार्थम्। धनुः वितस्त्यधिकमित्यर्थः। तदेव पथिमानं प्राकारस्य च।

पौरुषं च अग्निचित्यानामिति गार्हपत्यं धनुः पौरुषाधिकं यज्ञवाटादिमानं धर्मार्थत्वाद् अधिको दण्डोऽर (ण्य ? त्या) इत्यर्थः[२]।

षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानं ब्रह्मदेया (नाम) तिथीनां चागन्तॄणां यद्देयं तस्य मानम्। दशदण्डा (यज्ञ ? रज्जु):, भूमिमानम्। तथा परिवेशो निवर्तनं[३] चोभयं भूमिमानम्।

---

१. "दण्डादयश्चतस्रः संज्ञाः" इति भट्टस्वामी।

२. अग्निचित्यानां धनुः अष्टशताङ्गुलाद् गार्हपत्यधनुषः पौरुषाधिकं वितस्त्यधिकं विंशत्यधिकशताङ्गुलमित्यर्थः। इदं च "पञ्चारत्निः पुरुष इति शुल्वविदः" इति पदमञ्जरीग्रन्थेन संगतार्थं भवति (५.१.२४)।

३. रज्जुत्रयप्रमाणं स्यात् क्लीबलिङ्गं निवर्तनम्, इति केशवस्वामी।

[कालमानानि तत्र तुटादिरात्र्यन्तानां विवरणम्]

कालमानमत ऊर्ध्वम् । तुटः लवो निमेषः काष्ठा कला नालिका मुहूर्तः पूर्वापरभागौ दिवसः रात्रिः पक्षः मासः ऋतुः अयनं संवत्सरः युगमिति कालाः ॥

निमेषचतुर्भागः तुटः । द्वौ तुटौ लवः । द्वौ लवौ निमेषः । पञ्च निमेषाः काष्ठा । त्रिंशत्काष्ठाः कला । चत्वारिंशत्कलाः नाडिका । सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामाः कुम्भच्छिद्रमाढकमम्भसो वा नालिका । द्विनालिको मुहूर्तः ।

पञ्चदशमुहूर्तो दिवसो रात्रिश्च चैत्रे मासि आश्वयुजे च मासि भवतः ॥

ततः परं त्रिभिर्मुहूर्तैरन्यतरः षण्मासं वर्धते ह्रसते चेति ॥

चाणक्यटीका

एकतो द्व्यधिको भागो बाहुरित्युच्यते । नैर्मुखमिति परिवेशननिवर्त्तने उभे चतुरश्रे एकवद् द्विदण्डाधिक्याद् व्यञ्जनस्थानीये भवतः । गोरुतं योजनं च प्राजापत्यमानेनैव बोद्धव्यम् ।

प्रतिपदपञ्चिका

तस्यैव संज्ञान्तरम्, द्विचत्वारिंशदङ्गुलः तक्ष्णो विश्वकर्मणो मतेन । यद्वा तक्ष्णो वर्धकेः दुर्गादिपरिकर्मणि क्राकचिककिष्कुः, करपत्राणां च हस्तेनैव स्कन्धावारदुर्गराजपरिग्रहमानं कर्तव्यम् । चतुष्पञ्चाशदङ्गुलः कुप्यवनहस्तः द्रव्यवनकर्मान्तिेषु मानहस्तः चतुरशीत्यङ्गुलो व्यामो नाम रज्जुमानं तेन रज्जूनां मानं खातपौरुषञ्चेति खातस्यकूपादेः पुरुषमानमप्येतदेव चतुररत्निरित्यादि तावत्प्रमाणस्य दण्डादयस्चतस्रस्संज्ञाः गार्हपत्यमिति, गृहपतिना विश्व कर्मणा दृष्टमष्टशताङ्गुलं धनुः तच्च पथां राजमार्गादीनां प्राकाराणां च द्वादशहस्तादीनां मानं पौरुषं च पुरुषमानमग्निचित्यानामग्निचयनविशेषाणां सुवर्णविदादीनां । षट्कंस इति प्राजापत्यहस्ताष्टकप्रमाणो दण्डो ब्रह्मदेयानामृत्विगादिदेयक्षेत्राणां आतिथ्यानां च सत्रादिधर्मनिमित्तधर्माधिकारक्षेत्राणां मानं दशदण्डः परिदेशः । चत्वारिंशद्धस्तो रज्जुः ।

त्रिरज्जुकस्त्रिंशद्दण्डः चतुरश्रन्निवर्तनं एकतो द्विदण्डाधिक इति तदेव चतुरश्रान्निवर्तनमेकत एकस्मिन् पार्श्वे दण्डद्वयाधिक्याद् बाहुर्भवति त्रिंशदण्डो यतः त्रिंशद्दण्डविस्तारो बाहुरिति । द्विधनुस्साहस्रं गोरुतमिति गोरुतं, क्रोशं चतुर्गोरुतं योजनमिति सुखबोधम् ।

श्रीमूला

कालमानमित्यादि । व्याख्यास्यत इति शेषः । कालं सप्तदशधा विभजते— तुट इत्यादि ।

श्रीमूला

तुटादीनि व्याचष्टे—निमेषेत्यादि। निमेषचतुर्भागः कालपरमाणुरिति स्वामी। परमाणुद्वयमिति भाषा। स तुटः तुटसंज्ञः। अयं तुटिस्त्रुटिरिति चोच्यते।

द्वौ तुटावित्यादि चत्वारिंशत्कला नाडिकेत्यन्तमतिरोहितम्। नालिकायाः प्रकारान्तरमाह—सुवर्णेत्यादि। सुवर्णमाषकांश्चत्वारश्चतुरङ्गुलायामा इति मेयमानयोरभेदोपचारात् सुवर्णमाषकचतुष्टयप्रमाणाचतुरङ्गुलदीर्घा जलनिर्गमनालशलाकोच्यते, कुम्भच्छिद्रं तत्समानं जलधारकघटच्छिद्रम्, आढकमम्भसः तत्कुम्भगतमाढकमितं जलम्, इतिशब्द इहाध्याहार्यः, इति वा नालिका इत्येतत्त्रितययोगेन वा नालिका परिच्छिद्यते। यथोक्तमानशलाकायुक्तच्छिद्रात् कुम्भादाढकपरिमितं जलं छिद्रतो यावता कालेन गलति सा वा नालिकेत्यर्थः।

द्विनालिक इति। नालिकाद्वयं मुहूर्तः। एतदुत्तरं पूर्वापरभागयोर्व्याख्यानं क्रमप्राप्तम्। तत्तु न कृतं सुबोधत्वात्। तौ हि मुहूर्तान्तानामुक्तानां वक्ष्यमाणानां च दिवसादीनां यथासम्भवं पूर्वभागोत्तरभागौ भवतः। तत्र पूर्वाह्णो दिवसपूर्वभागोऽपराह्णो दिवसोत्तरभागः। तथा पूर्वरात्रो रात्रिपूर्वभागोऽपररात्रो रात्र्युत्तरभाग इत्यादि यथाव्यवहारमूह्यम्। पञ्चदशेत्यादि। पञ्चदशमुहुर्तो दिवसो रात्रिश्च भवतः, किं सर्वेषु मासेषु, नेत्याह—चैत्रे मासि आश्वयुजे मासि च अर्थाद् विषुवयोर्द्वयोः। ततः परमिति। विषुवद्द्वयादुपरि, अन्यतरो दिवसो रात्रिश्च, त्रिभिर्मुहूर्तैः षण्मासं वर्धते ह्रसते च एकशश्चतुर्लवोपचयापचयक्रमेण मुहुर्तत्रयं यावत् षण्मासान् उपचीयते क्षीयते च। तत्र दिवसस्य चैत्रविषुवादुपरि वृद्धिः आश्वयुजविषुवादुपरि ह्रासः, रात्रेराश्वयुजविषुवादुपरि वृद्धिः चैत्रविषुवादुपरि ह्रासः।

चाणक्यटीका

कालमानमत ऊर्ध्वम्, वक्ष्यतीति शेषः। तुटो लव इति। अत्र तुटादयस्तावद् अवयविद्रव्यविषयाः साहचर्याद् अवयवस्यापि कालस्याभेदम् (आ ? ओ) प (त्वा ? चा) रिकं (कल्प्यच्छेपका ?)। अपरे त्वाहुः—क्रियैव ज्ञातपरिमाणा क्रियान्तरस्य परिमाणं कल्पयति कालम्। तद्यथा—गोदोहं स्वपितीति।

द्वौ तुटौ लव इति। तत्र तुट इति ह्रस्वाक्षरचतुर्भागग्रहणम्, लव इत्यर्धह्रस्वम्, निमेषो ह्रस्वमात्रम्। यथोक्तम्—लघ्वक्षरोच्चारणं निमिष इति। नालिकेति छायानालिका प्रमाणेनैव ग्राह्या।

अपरोऽपि, सुवर्णमाषाश्च चत्वारः चतुरङ्गुलमायतीकृताः। त एव कुम्भच्छिद्रकारणत्वाद् कुम्भच्छिद्रस्रावणत्वाद् (आढकम्) अम्भस इति स्रुतिपरिसमाप्तौ नालिकेत्युच्यते गौण्या वृत्त्या। अयं तु वाक्यार्थः—सुवर्णमाषतश्चतुष्टयेन चतुराङ्गुलायतेन निश्छिद्रात् कुम्भाद् यावता कालेन स्रवेद् आढकमम्भः, तावान् कालो

चाणक्यटीका

नालिकेति[1]।

उक्तं च—सुवर्णमाषकाश्चत्वारः कुट्टिताश्चतुरङ्गुलाः। (माषकचतुरङ्गुला ?) तत्प्रमाणकच्छिद्रा (दा) ढका (म्भो) विनिर्गमे नालिकेति साख्याता, (च्छायाभावे घनं पुनरर्धामलकवच्छ्लक्ष्णं समं ताम्रं च कारं चेति ?) ।

(द्विनालिको मुहूर्तः) । प (ञ्चाशन् ? ञ्चदशमु) हूर्तो दिवसो रात्रिश्च चैत्रे (मासा ? मेषा) दौ, आश्वयुजे च तुलादौ विषुवदारम्भे भवतः, न सर्वदा। ततस्त्रिभिर्मुहूर्तैरन्यतर इति दिवसो रात्रिर्वा। ततश्चैत्रात् परं प्रत्यहं मुहूर्तत्रिंशद्भाग-सञ्चारेण प्रतिमासदिवसानां वैशाखे षोडश मुहूर्ताः, सप्तदश ज्येष्ठे, अष्टादशाषाढे। एवमाश्वयुजे पञ्चदशमुहूर्तो दिवसः। ततः परं प्रतिमासं मुहूर्तहान्या कार्तिके चतुर्दश मुहूर्ताः, (सा ?) मार्गशीर्षे त्रयोदश, पौषे द्वादश मुहूर्ता इति दिवसवृद्धिह्रासक्रमेण च अहोरात्रे ह्रासो वृद्धिश्च।

यद्येवं षण्मासं वर्धते ह्रस्वते चेति कथमेतद् भवति। द्वादशमुहूर्ताद् (वि ?) पौषदिवसात् प्रभृति वृद्ध्या चैत्रे समत्वम्, आषाढं यावद् दिवसानां वृद्धिप्रकर्षा-दुत्तरायणे षण्मासं वर्धते। तथा अष्टादशमुहुर्ताद् आषाढादिदिवसात् प्रभृति हान्या आश्वयुजे मासे समत्वं पौषं यावद् दिवसानां ह्रासप्रकर्षाद् दक्षिणायने षण्मासं ह्रसत इति वृद्धिह्रासावाकलय्य नालिकां च वा, अहोऽष्टधा रात्रिं च विभजेद् राज-प्रसिद्ध्यर्थम्।

प्रतिपदपञ्चिका

इत्येवंदेशमानं व्याख्यातम् कालमानमतऊर्ध्वमिति देशमानपूर्वकत्वात् कालमा-नस्य वक्ष्यत इति वाक्यशेषः। तच्च त्रुट्यादियुगान्तं सप्तदशविधमभिधाय स्वयमेव व्याचष्टे। निमेषचतुर्भागः त्रुटिरित्ति कालपरमाणुः निमेषचतुर्भागः तस्य त्रुटिरिति संज्ञा द्वौ त्रुटौ लवो निमेषार्धः। द्विलवो निमेषः शेषं सुबोधम्। नाडिका घटिका। यदि वा सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामा स्तावत्प्रमाणशलाकीकृतास्तावत्प्रमाणक कुंभ-छिद्रमाढकमम्भसो वा कुम्भगतं यावत्तेन छिद्रेण गलतीति वाक्यशेषः सा वा नालिका नालिकाद्वयं मुहूर्तः पूर्वापरभागाविति पूर्वेषामुत्तरेषां च सम्भवतो योजनीयौ उत्तरेषां दिवसादीनां पूर्वाह्णं पूर्वरात्रादि पूर्वभागः अपराह्णापररात्रादि अपरभागः। पञ्चदशमुहूर्तो दिवसो रात्रिश्च चैत्राश्वयुजयोर्मासयो मेषतुलाभ्यो भवतः। परमूर्ध्वं विषुवंतद्यथात्रि-भिर्मुहूर्तैः प्रत्येकं चतुर्लवोपचयापचयक्रमेण।न्यतरयोरहोरात्रयोरेकतरःष्पण्मासान्वर्धते च तत्रापीति वर्धत इति ह्रसते चेति विशेषो गणितादवगन्तव्यः।

---

१. "नालिकाभिरिति, उक्तं हि—सुवर्णमाषकाश्चत्वारः चतुरङ्गुलायामाः, तत्प्रमाण-कुम्भच्छिद्रेण जलाढकस्य यावता कालेन स्रुतिः स कालो नालिकेति" इति कामन्दकीय जयमङ्गला। (५.५२)

[छायया कालमानज्ञानविधिः]

छायायामष्टपौरुष्यामष्टादशभागः छेदः, षट्पौरुष्यां चतुर्दशभागः, चतुष्पौरुष्यामष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः, अष्टाङ्गुलायां त्रयो दशभागाः, चतुरङ्गुलायाम् अष्टभागाः, अच्छायो मध्याह्न इति। परावृत्ते दिवसे शेषमेवं विद्यात्। आषाढे मासि नष्टच्छायो मध्याह्नो भवति। अतः परं श्रावणादीनां षण्मासानां द्व्यङ्गुलोत्तरा, माघादीनां द्व्यङ्गुलावरा छाया इति ॥

श्रीमूला

छायया कालमानमाह—छायायामित्यादि। छायायाम्, अष्टपौरुष्यां षण्णवत्यङ्गुलायां, दिवसस्य, अष्टादशभागः छेदः अष्टादशो भागः गतांशः त्रिंशन्नाडिकासु पादोनं नाडिकाद्वयमतीतं ज्ञेयं सपादाष्टाविंशतिनाडिकास्तु शेषाः। षट्पौरुष्यां द्विसप्तत्यङ्गुलायाम् छायायाम्, चतुर्दशभागः छेदः त्रयोदश तु शेषाः। चतुष्पौरुष्याम् अष्टाचत्वारिंशदङ्गुलायाम्, अष्टभागः छेदः अर्धयामो गतः सप्त शेषाः। द्विपौरुष्यां चतुर्विंशत्यङ्गुलायाम्, षड्भागश्छेदः पञ्चनालिकागताः पञ्चविंशतिस्तु शेषाः। पौरुष्यां द्वादशाङ्गुलायाम्, चतुर्भागश्छेदः यामो गतः यामत्रयमवशिष्टम्। अष्टाङ्गुलायां छायायाम्, त्रयो दशभागाः दशधाविभक्तस्य दिवसस्य त्रयो दशमांशाः अर्थान्नवनालिकाः, छेदः, एकविंशतिस्तु नालिकाः शिष्टाः। चतुरङ्गुलायाम्, अष्टभागाः अष्टधा विभक्तस्य दिवसस्य त्रयोऽष्टमांशाः गता विज्ञेयाः, पञ्च तु शिष्टाः। अच्छायः शङ्कुप्रविष्टच्छायो, मध्याह्नो भवति।

मध्याह्नात् परतोऽप्येवच्छायामानं, किन्तु छेदस्थाने शेषकल्पनया विज्ञेयमित्याह—परावृत्त इति। परावृत्ते दिवसे मध्यान्हात् परतः, शेषं गतावशिष्टं दिवसभागम्, एवं विद्यात् चतुरंगुलायां त्रयोष्टभागा इत्यादिना छायायामष्टपौरुष्यामष्टादशभाग इत्यन्तेन प्रकारेणाष्टभागत्रयप्रभृतिमष्टादशभागान्तं जानीयात्।

आषाढ इति। आषाढे मासि आषाढमासान्ते, नष्टच्छायोऽच्छायः, मध्याह्नः भवति। अतः परं, श्रावणादीनां षण्मासानां पौषान्तानां, द्व्यङ्गुलोत्तरा द्विद्व्यङ्गुलक्रमवृद्धा छाया भवति। तद्यथा—श्रावणस्यान्ते द्व्यङ्गुला भाद्रपदस्य चतुरङ्गुला आश्वयुजस्य षडंगुला कार्त्तिकास्याष्टांगुला मार्गशीर्षस्य दशांगुला पौषस्य द्वादशांगुलेति। अतः परं, माघादीनां षण्मासानामासाढान्तानां, द्व्यङ्गुलावरा द्विद्व्यङ्गुलक्रमक्षीणा, छाया भवति। यथा—माघस्यान्ते दशांगुला छाया फाल्गुनस्याष्टांगुला चैत्रस्य षडंगुला वैशाखस्य चतुरङ्गुला ज्येष्ठस्य द्व्यङ्गुला आषाढस्य तु शंकुप्रविष्टेति।

चाणक्यटीका

अथ छायया कथमष्टधा विभागः कार्यं इत्यत्राह—छायायामष्टपौरुष्यामिति। पौरुषं वितस्तिरित्युक्तम्। षण्णवत्यङ्गुलायाम् अष्टादशभागश्छेदः दिवसस्य, सप्तदशभागाश्चावशिष्टा भवन्ति। चतुर्दशभाग इति दिवसस्य चतुर्दशभागाः कल्पनीयाः। तत्र चतुर्दशो भागश्छिन्नः, त्रयोदशावशिष्टाः। [1]दशभागश्छेदः नवभागा अवशिष्टाः। षड्भागश्छेदः पञ्चावशिष्टाः। चतुर्भागश्छेदः द्वावष्टभा (गावा ? गौ) छिन्नौ षड् भागाः शेषमित्यर्थः।

त्रयो दशभागा इति दशधा विभक्तस्य दिवसस्य दशभागस्त्रयश्छिन्नाः सप्त शेषा इत्यर्थः। त्रयोऽष्टभागा इति पञ्चावशिष्टाः। अच्छायो मध्याह्न इति। तत्र चत्वारोऽष्टभागा उक्ताः।

परिवृत्ते अह्नर्मध्यदिवसे, शेषम् अनेन क्रमेण विद्यात्। यथा भोगस्तथा अपराह्णे शेषम्। तद्यथा—चतुरङ्गुलायां त्रयोऽष्टभागाः शेषाः, दशभागास्त्रयोऽष्टाङ्गुलायाम्, पौरुष्यां चतुर्भागः यावन्नष्टच्छायो दिवसान्त इति योज्यम्, एवं रात्रावपि नालिकया छायाविभागोऽप्यूह्यः।

अयं च नष्टच्छायो मध्याह्न आषाढे मासि भवति। ततः परं श्रावणो (द्व्य) ङ्गुलच्छायः। प्रोष्ठपदश्चतुरङ्गुलच्छायः। एवं प्रतिमासं द्व्यङ्गुलवृद्ध्या पौषे पौरुषी छाया। ततो माघादीनां द्व्यङ्गुलहान्या आषाढो नष्टच्छाय इति भागभोगास्त्वन्ये पूर्ववदेव।

प्रतिपदपञ्चिका

छाययापि कालज्ञानमाह—छायायामष्टपौरुष्यामिति, षण्णवत्यङ्गुलायां छायायां दिवसस्याष्टादशभागः च्छेदः। अष्टादशभागोऽवगतो मन्तव्यः सप्तदशावशेषाः। षट्पौरुष्यां द्विसप्तत्यङ्गुलायां चतुर्दश भागो दिवसस्य अवगतस्त्रयोदश शेषाः। चतुष्पौरुष्यां अष्टाभागोर्धप्रहरः सप्त शेषाः। द्विपौरुष्यां षड्भागश्छेदः प्रहरत्रयं शेषम्। अष्टाङ्गुलायां दशधा विभक्तस्यतत्र त्रयो भागावच्छेदः सप्तदश शेषाश्चतुरङ्गुलायामष्टधा विभक्तस्य त्रयोष्टभागावच्छेदभवः पञ्च शेषाः। अच्छायश्शङ्कुप्रविष्टच्छायो मध्याह्नः। परिवृत्ते दिवसे शेषमेव विद्यादिति। परिवृत्तौ मध्याह्नात्परतः दिवसशेषमेव अपगमप्रकारेण चतुरङ्गुलादिष्वष्टपौरुषीपर्यन्तासु यत्पूर्वमगगतं तदिह शेषं जानीयात्। तद्यथा पूर्वत्र चतुरङ्गुलायां छायायां त्रयोष्टभागा अवगताः त एवेह शेषा इत्यादि, आषाढे मासि आषाढमासावसाने शङ्कुप्रविष्टछायो मध्याह्नो भवति। तत्र श्रावणावसाने द्व्यङ्गुलाच्छायः भाद्रपदान्ते चतुरङ्गुलच्छायः द्व्यङ्गुलोत्तरता च यावत्पौषान्ते द्वादशाङ्गुलानि, ततो माघे दश, फाल्गुनेष्टद्व्यङ्गुलावरोहणं यावत्पुनर्नष्टच्छाय इति।

---

१. अष्टभाग इति मुद्रितमूलकोशेषु।

[पक्षमासयोः विवरणं, मासभेदाश्च]

पञ्चदशाहोरात्राः पक्षः। सोमाप्यायनश्शुक्लः। सोमावच्छेदनो बहुलः। द्विपक्षो मासः। त्रिंशदहोरात्रः प्रकर्ममासः। सार्धस्सौरः। अर्धन्यूनश्चान्द्रमासः। सप्तविंशतिर्नाक्षत्रमासः। द्वात्रिंशन्मलमासः। पञ्चत्रिंशदश्ववाहायाः। चत्वारिंशद्धस्तिवाहायाः॥

श्रीमूला

पञ्चदशेत्यादि। पञ्चदशाहोरात्रसमुदायः पक्षसंज्ञः। तत्र सोमाप्यायनः चन्द्रवृद्धिकरः पक्षः, शुल्कः तत्संज्ञः। सोमावच्छेदनः चन्द्रक्षयकरः, बहुलः तदाख्यः।

द्विपक्ष इति। उक्तौ शुक्लबहुलपक्षौ समुदितौ, मासः, स एव सावनः।

त्रिंशदहोरात्र इति। त्रिंशदहोरात्रसमुदायः, प्रकर्ममासः, कर्मकरभृतिगणनीयो मासः।

सार्धं इति। अर्धाहोरात्रसहित त्रिशदहोरात्रः, सौरः सौरमासः। अर्धन्यून इति। अर्धाहोरात्रन्यूनस्त्रिशदहोरात्रः, चान्द्रमासः। सप्तविंशतिरिति। सप्तविंशत्यहोरात्रो नाक्षत्रमासः।

द्वात्रिंशदिति। द्वात्रिंशदहोरात्रो मलमासः।

पञ्चत्रिंशदिति। पञ्चत्रिंशदहोरात्रः तावन्मानो मासः, अश्ववाहायाः। अश्वप्रवाहणस्य, अर्थादश्वकर्मभृत्यानाम्। 'अथ प्रवाहणे। वाहा नृस्त्री स्त्रियां वाहौ' इति केशवस्वामी।

चत्वारिंशदित्यादि। चत्वारिंशदहोरात्रो गजशुश्रूषाकर्मकरवेतनमासः।

चाणक्यटीका

एवं त्रिशन्मुहूर्तमहोरात्रम्। पञ्चदशाहोरात्राः पक्षः। स च द्विविधः—सोमाप्यायनः प्रवर्धमानसोमः शुक्लः। सोमच्छेदनो हीयमानसोमो बहुल इति।

प्रक्रममास इति। अध्यक्षाणां कर्मारम्भमासः। सार्धः सौर इति। द्वौ पक्षौ (अर्धपक्षश्च ?) सौरो मासः। अर्धन्यूनश्चान्द्रः। (अर्धत्रयोविंशतिदिवसः ?) मलमासः सेनाविक्षेपभक्तदानार्थः। अश्ववाहायाः अश्ववाहनिमित्तायाः दिनादिकल्पनायाः। एवं हस्तिवाहायाः।

प्रतिपदपञ्चिका

पञ्चदश अहोरात्राः पक्षः स द्विविधः सोमाप्यायनश्चन्द्रपूरणश्शुक्लसंज्ञः विपरीतश्च बहुलः।

द्विपक्षो मासः सावनत्रिंशदहोरात्रः अर्धं चाहोरात्रस्यार्धन्यूनश्चान्द्रः चान्द्रमानेन एकोनत्रिंशदहोरात्रोऽश्वहस्तिवाहायाः अश्वयवसघासकादीनां चत्वारिंशदहोरात्रः हस्तिवाहायाः। हस्तिवाहादीनां वेतनमासः।

[ऋतुप्रभृति युगान्तकालमानविवरणम्]

द्वौ मासावृतुः । श्रावणः प्रोष्ठपदश्च वर्षाः । आश्वयुजः कार्तिकश्च शरत् । मार्गशीर्षः पौषश्च हेमन्तः । माघः फाल्गुनश्च शिशिरः । चैत्रो वैशाखश्च वसन्तः । ज्येष्ठामूलीय आषाढश्च ग्रीष्मः । शिशिराद्युत्तरायणम् । वर्षादि दक्षिणायनम् । द्व्ययनस्संवत्सरः । पञ्चसंवत्सरो युगमिति ॥

[अधिकमाससिद्धिक्रमविवरणम्]

दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः ।
करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः ॥९४॥

श्रीमूला

द्वाविति । उभौ द्विपक्षलक्षणौ मासौ मिलितौ ऋतुसंज्ञौ ।

ऋतुं विभज्य व्याचष्टे—श्रावण इत्यादिना ग्रीष्म इत्यन्तेन । वर्षाः वर्षासंज्ञः ; ज्येष्ठामूलीयः ज्येष्ठः । शेषं सुगमम् ।

शिशिरादीत्यादि । शिशिरप्रभृति ग्रीष्मान्तमृतुत्रयम्, उत्तरायणसंज्ञम् । वर्षादि हेमन्तान्तमृतुत्रयं, दक्षिणायनम् ।

द्व्ययन इति । अयनद्वयात्मा संवत्सरो भवति ।

पञ्चसंवत्सर इति । संवत्सरपञ्चात्मकः कालो युगं युगसंज्ञया व्यवह्रियते । इतिशब्दो व्यावहारिककालमानसमाप्तौ ।

चाणक्यटीका

द्वौ मासावृतुः । ते च ऋतवो वर्षाद्या आषा (ढ ? ढात्) । तत्रापि न सर्वेष्वृतुषु अधिमासका जायन्ते, किन्तु ग्रीष्मे हेमन्ते च भवन्ति ।

शिशिरादि ऋतुत्रयम् उत्तरायणम्, आदित्य उत्तरवीथीमयति, वर्षादि ऋतुत्रयं दक्षिणायनम्, दक्षिणवीथीमयति । द्व्ययनः संवत्सरः । पञ्चसंवत्सरं युगमिति संव्यव (हार्यम्) । चतुर्युगं मन्वन्तराद्यवरं राजवृत्तावसंव्यवहार्यत्वान्नाख्यातम् । न ह्येताव (त् ? न्तं) कालं कस्यचिद्राज्ञः त (त्रा ? न्त्रे ऽ) वगतो व्यवहार इति ।

प्रतिपदपञ्चिका

द्वौ मासावाद्यमासावृतुः तद्विशेषा वर्षादयः श्रावणादिमासयुग्मैर्भवन्ति । प्रौष्ठपादो भाद्रपदः ज्येष्ठामूलीयो ज्येष्ठः शेषमृजु । शिशिरादिमासादिकमृतुत्रयं उत्तरायणं एवं वर्षादिश्रावणादिकं दक्षिणं एतद्द्वयं संवत्सरः तैः—पञ्चभिरित्येतैर्व्यावहारिककालमानमिति ।

श्रीमूला

अधिमासं श्लोकद्वयेनाह—दिवसस्येति । अर्कः सूर्यः दिवसस्य अहोरात्रस्य, षष्टिभागम् एकघटिकात्मकं, हरति प्रतिदिवसं छिनत्ति । ततः प्रतिदिवसमेकघटिका-

एवमर्धतृतीयानामब्दानामधिमासकम् ।
ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते च पश्चिमम् ॥९४॥

इत्यध्यक्षप्रचारे देशकालमानं विंशोऽध्यायः,
आदित एकचत्वारिंशः ।

श्रीमूला

हरणात्, ऋतौ षष्टिदिवसात्मकमासद्वयावसाने, एकमहश्छेदम् एकमधिकमहोरात्रं, करोति उत्पादयति । तथैव अर्कवदेव, चन्द्रमाश्च, एकम् अहश्छेदं करोति । एवम् अनेन प्रकारेण, अर्धतृतीयानामब्दानाम् अर्धोनतृतीयानाम् वर्षाणाम् अर्थान्माघप्रभृतीनां त्रिंशतो मासानां, ग्रीष्मे पूर्वम् अधिमासकम् अधिकमासं त्रिंशत्तमं द्वितीयम् आषाढं, पञ्चाब्दान्ते अर्थात् पुनरर्धतृतीयवर्षात्मनां श्रावणप्रभृतीनां त्रिंशतो मासानामन्ते, पश्चिममधिमासकं च उत्तरमधिकमासं च अर्थात् त्रिंशत्तमं द्वितीयं पौषं च, जनयतः, अर्कचन्द्रमसौ ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
विंशोऽध्यायः देशकालमानम्, आदित एकचत्वारिंशः ॥

चाणक्यटीका

दिवसस्य हरत्यर्क इति । अत्रापि काले दिवसस्येत्यहोरात्रग्रहणम् । तस्य हरत्यर्को गतिविशेषात् षष्टिभागं नालिका द्विनालिको मुहूर्तः, त्रिंशन्मुहूर्तमहोरात्रमिति । तत्र करोत्येकमहश्छेदम् । तथैवैकं (च) चन्द्रमाः । तथा चोक्तम्—"वर्षाहेमन्तग्रीष्माणां तृतीयसप्तमा दिवसोनाः शेषाः पूर्णाः" इति (अधि० २. अध्या० ६)।

यदुक्तम्—"पृथगधिमासकः" इति तदर्थमाह—एवमर्धतृतीयानामिति । एवमनेन प्रकारेण सूर्याचन्दमसौ गति (गंति ?) हान्या दिवसमृतौ वर्धयतः। अर्धतृतीयानाम् अब्दानाम् एव । (ते ?) "अधिमासं करणाधिष्ठितं (यत् ?) कुर्याद्" इत्युक्तम्, अयमेषां त्रयोदशमासः संवत्सरः, त्रिमासश्चायमृतुरितिज्ञापनार्थम् । तद्दर्शयति—ग्रीष्मे जनयत इति । पञ्चभिः संवत्सरैः अधि (क ?) मासद्वयं भवति । तत्र पूर्वाब्दाः पश्चार्धाब्दाश्च अर्धतृतीयाः । तत्र पूर्वाब्देषु अर्धतृतीयेषु आषाढे मासि सूर्याचन्द्रमसौ पूर्वं प्रथममधिमासकं जनयतः । पश्चिमानामर्धतृतीयानामब्दानां यः (पक्षो ? पौषो) मासो हैमन्तः, तस्मिन् पश्चिममिति । पञ्चाब्दान्त इति पाठान्तरम् । पञ्चानामब्दानामन्ते पूर्वार्धतृतीयाब्दापेक्षयोच्यते, युगस्यान्त इत्यर्थः । पूर्वमर्धयुग एव

चाणक्यटीका

जनयतः, पश्चिमं तु युगान्त इति । तेनयुगस्यैव पूर्वपश्चिमभागापेक्षया पूर्वपश्चिमत्वं व्याख्येयमिति ।

॥ इति देशकालमानं विंशतितमं प्रकरणं समाप्तम् ॥

॥ विंशतितमश्चाध्यायः ॥

प्रतिपदपञ्चिका

अधिमासकसम्भवमाह—दिवसस्येत्यादि, दिवसस्याहोरात्रस्य षष्टिभागघटिकामर्कः प्रत्यहं हरति । छिनत्ति, ततः क्रमेणात्तौ मासद्वयातिक्रमे करोत्येकमहच्छेदमधिकमहोरात्रं यथा सः तथैव चन्द्रोऽप्येकमेवाहच्छेदः मृतौ करोति, एवमनैन प्रकारेण अर्धतृतीयनाम शब्दानां त्रिशतोमासानामेकमधिमासकमधिकं मासं जनयतः ।

तथा च सति युगस्य द्वावधिमासकौ भवतः । तत्रापि मासादारभ्य पूर्वं प्रथमं ग्रीष्मे त्रिंशत्तमं—द्वितीयमाषाढं जनयति पश्चाब्दान्ते युगावसानसंवत्सरान्ते । श्रावणादारभ्य त्रिंशत्तमं द्वितोय पौपं जनयत इति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायां द्वितीयेऽधिकरणे अध्यक्षप्रचारिके विंशोऽध्यायः । आदित एकचत्वारिंशोऽध्यायः ।

एकोनचत्वारिंशं प्रकरणम्

एकविंशोऽध्यायः ।

शुल्काध्यक्षः ।

[शुल्कशालास्वधिकारिनियोजनेन शुल्कग्रहणविधिः]

शुल्काध्यक्षः शुल्कशालां ध्वजं च प्राङ्मुखम् उदङ्मुखं वा महाद्वाराभ्याशे निवेशयेत् । शुल्कादायिनश्चत्वारः पञ्च वा सार्थोपयातान् वणिजो लिखेयुः—"के ? कुतस्त्याः ? कियत्पण्याः ? क्व चाभिज्ञानमुद्रा वा कृता ? " इति ॥

श्रीमूला

शुल्काध्यक्ष इति सूत्रम् । शुल्कः राज्ञे देयं पञ्चदशभागादि तस्य अध्यक्षः शुल्काध्यक्षः । तद्व्यापारोऽभिधीयते इति सूत्रार्थः । देशविशेषभूतदुर्गसम्बन्धित्वाद् मानपरिच्छेद्यनानाभाण्डविषयत्वाच्च शुल्कस्य देशमानानन्तरमभिधानसङ्गतिः ।

शुल्काध्यक्ष इति । शुल्कशालाध्यक्षः, शुल्कशालां शुल्कग्रहणावस्थानं, ध्वजं च तच्चिह्नं च, प्राङ्मुखमुदङ्मुखं वा, महाद्वाराभ्याशे प्रधानद्वारसमीपे, निवेशयेत् कारयेत् ।

शुल्कादायिन इति । शुल्कग्राहिणः, चत्वारः पञ्च वा पुरुषाः शुल्काध्यक्षनियुक्ताः, सार्थोपयातान् सभाण्डोपगतान्, वणिजो नैगमान्, लिखेयुः । किं कृत्वा, के कुतस्त्या इत्यादि पृष्ट्वेति शेषः । तत्र क इति नामजातिविषयः प्रश्नः, कुतस्त्या इति निवासविषयः, कियत्पण्या इति विक्रेयवस्तुपरिमाणविषयः; क्व चाभिज्ञानमुद्रेति अन्तपालकृतपण्यविशेषज्ञसिमुद्राविषयः । शुल्कादायिनां बहुत्वं विसंवादपरिहारार्थम् ।

चाणक्यटीका

इदानीं संव्यवहारो दानग्रहणादिर्वाच्यः, स च पण्यप्रवेशात् प्रभृत्येवेति शुल्काध्यक्षव्यवहार एव तावदध्यायद्वयेनोच्यते ।

शुल्काध्यक्ष इति । समाहर्तृप्रयुक्तः (शुल्कशालां) ध्वजं च प्राङ्मुखमभिज्ञानार्थम् । किं पुनर्ध्वजस्य मुखं येन प्राङ्मुख(मुदङ्मुख)मित्युभयं सम्बध्यते । शालाध्वजस्य तत्सम्बन्धान्नगरस्य यानि मार्गद्वाराणि तदभ्याशे ततः किञ्चिन्निगद्यते । पूर्वपश्चिमा(या ? र्गा)भिमुख्यार्थम् उदग्द्वारम् दक्षिणोत्तरमार्गाभिमुख्यार्थं प्राग्द्वारम् ।

[नियमोल्लङ्घिनां मिथ्याभाषिणां वणिजां दण्डाः,
अनृतव्यवहारपरिज्ञानोपायाश्च]

अमुद्राणामत्ययो देयद्विगुणः कूटमुद्राणां शुल्काष्टगुणो दण्डः। भिन्नमुद्राणामत्ययो घटिकाः स्थाने स्थानम्। राजमुद्रापरिवर्तने नामकृते वा सपादपणिकं वहनं दापयेत्। ध्वजमूलोपस्थितस्य प्रमाणमर्घं च वैदेहकाः पण्यस्य ब्रूयुः—"एतत्प्रमाणेनार्घेण पण्यमिदं कः क्रेता ?" इति"। त्रिरुद्घोषितमर्थिभ्यो दद्यात्। क्रेतृसङ्घर्षे मूल्यवृद्धिः सशुल्का कोशं गच्छेत्।

चाणक्यटीका

शुल्कादायिन इति। शुल्कादानशीलाः अध्यक्षपुरुषाः। चत्वारः पञ्च वा इति। एकेन लिख्यमाने कालातिपातव्यामिश्रदोषाभ्यां सार्थस्यार्थघातः स्यात्। तस्माद् बहवो यौगपद्येन व (ध ? गं) शो विभज्य सार्थाभ्यागतान् वणिजो लिखेयुः—के किंनामानः, कुत आगताः, कियत्पण्याः कियत्परिमाणं पण्यम् (अस्य ? एषाम्) इति। कस्मिंश्च अन्तपालाभिज्ञानमुद्रा युष्माकं राष्ट्रप्रवेशे कृतेति।

प्रतिपदपञ्चिका

शुल्काध्यक्ष इति सूत्रम्।

शुल्कः पञ्चदशभागादि देयम् राज्ञः। तस्याध्यक्षः इति सूत्रार्थः। सम्बन्धस्तु देशनिर्देशतोऽथवा दुर्गान्तर्गतम्। पौतवाध्यक्षमभिधाय तदनन्तरं समस्तभाण्डानां तुलादिपरिच्छेदपूर्वकत्वात् शुल्कस्य दुर्गान्तर्गतत्वमेव शुल्काध्यक्षव्यापारमाह—शुल्कशालाध्यक्ष इति। शुल्कशालां शुल्कग्रहणावस्थानं च ध्वजं च तच्चिह्नं प्राङ्मुखमुदङ्मुखंवेति। दिग्ग्रहणं मङ्गलार्थं महाद्वाराभ्याशे मध्यमद्वारसमीपे निवेशयेत्। शुल्कादायिन इति, शुल्कग्राहिणः शुल्काध्यक्षेण निरूपिताश्च त्वयाः पञ्च वाजिनाः सार्थोपयातांस्तन्द्रुच भाण्डहृतसार्थादागतान्वणिजः पण्यव्यवहारिणो लिखेयुः। कथमित्याह—के कुतस्त्या इत्यादि।

पृष्ट्वा के यूयं किं जातीयाः किंनामधेया वा कुतस्त्याः किं देशवासिनो वा कियत्पण्याः किं परिमाणभाण्डाः क्वचाभिज्ञानमन्तपालकृतपण्यमुद्राणां स्वचिह्नं मुद्राविमृण्मयी युष्माकं कृतेति पृष्टाः ते यथा ब्रूयुः—तथा लिखेयुः।

श्रीमूला

अमुद्राणामिति। मुद्रारहितानां वणिजाम्, अत्ययः दण्डः, देयद्विगुणः अन्तपालदेयवर्तनीद्विगुणः। वर्तनी स्वनुपदं वक्ष्यते।

कूटेत्यादि। कूटमुद्राणां कपटकृतमुद्राणां, शुल्काष्टगुणो दण्डः।

श्रीमूला

भिन्नेत्यादि। भिन्नमुद्राणामत्ययः गृहीतनष्टमुद्राणां दण्डः, घटिकाः स्थाने स्थानं वणिगन्तरदृश्ये क्वापि शुल्कशालैकदेशे घटिकात्रयकालावस्थानं भवति। घटिका इति स्थानक्रियात्यन्तसंयोगे द्वितीया, कपिञ्जलाधिकरणन्यायेन च तासां त्रित्वम्।

राजेत्यादि। राजमुद्रापरिवर्तने, नामकृते वा परिवर्तन इत्यनुषङ्गात् कार्पासादिद्रव्याणां तूलादिनामनिवेशेन नामव्यत्ययकरणे वा, सपादपणिकं पादाधिकपणदण्डं, वहनं पण्यहारकं, दापयेत्।

ध्वजेत्यादि। ध्वजमूलोपस्थितस्य शुल्कशालाङ्गणगतस्य पण्यस्य, प्रमाणम् इयत्ताम्, अर्घं च, वैदेहकाः वणिजः, ब्रूयुः, एतत्प्रमाणेनेत्यादिविधया। त्रिरुद्घोषितं यथोक्तप्रकारेण वारत्रयघोषणया श्रावित, पण्यम्, अर्थिभ्यः क्रेतृभ्यः, दद्यात्, तेनैव वैदेहकनिर्दिष्टेनार्घेण। क्रेतृसंघर्षे क्रेतॄणाम् अर्घवर्धनहेतुभूतपरस्परस्पर्धासम्भवे, मूल्यवृद्धिः वणिङ्निर्दिष्टप्रमाणादधिकं मूल्यस्य प्रमाणम्, इष्यत इति शेषः। किन्तु सशुल्का शुल्कसहिता सा मूल्यवृद्धिः, कोशं गच्छेत् राजभाण्डागारं प्राप्नुयाद् निर्दिष्टमूल्यमात्रमेव तु वैदेहकानित्यर्थः। सशुल्कमित्यपि पाठः।

चाणक्यटीका

अमुद्राणाम् अन्तपालं वञ्चयित्वा आगतानां तैः यद्देयं वक्ष्यमाणं तद्द्विगुणो दण्डः।

कूटमुद्राणामिति। अन्तपालसदृशीं मुद्रां कृत्वा मुद्रितवतां शुक्लद्वयं देयम्, तत् सङ्गृह्यते। ततोऽष्टगुणोऽस्माद् साहसदण्डः।

भिन्नमुद्राणां तु प्रमादाद् अयमेवात्ययः, यद्घटिकास्थाने[1] स्थानम् असंव्यवहारता यावदन्तपालाभिज्ञानं पुनरागतमिति।

मुद्रापरिवर्तन इति। अन्यस्य भाण्डे मुद्रिते तेन प्रतिमुद्रां कृत्वा स्वभाण्डमुद्रणे सपादपणिकं वहनं पत्रं दापयेत् कथं पुनः शुक्लाध्यक्षेण मुद्रापरिवर्तनं ज्ञायत इति चेत्, नामकृते परिवर्तने ज्ञाते इत्यन्तं ज्ञापयति अन्तपालोऽपि नामादिलेख्यमस्मै स्वपुरुषेण प्रेषयतीति। तत्र लेखेन इदमस्य लिखितम्, मुद्रितं च भाण्डम्, ध्रुवं तेन मुद्रा परिवर्तितेति।

ध्वजमूलावस्थितस्येति। पण्यस्य इदं प्रमाणम्, इयता चार्घेण तत्र क्रीतमिति वैदेहकाः पण्यस्वामिनः कथयेयुः। अथवा वास्तव्यवणिजः पण्यप्रमाणमित्यमूलं चाध्यक्षाय कथयेयुः। ततः पण्यस्वाम्येव एतेनार्घेण इयत्प्रमाणं पण्यमिदम्, कः क्रेतेति शुल्कपरिशुद्धिज्ञानार्थं (दूरा ? त्रिरु)द्घोपयेत्। ततः परिशुद्धत्वाद् दद्यात्।

---

१. अत्र घटिकास्थानमिति शुल्कशालोच्यते। अनन्तशयनप्रकाशिकायां कौटलीयव्याख्यायां घटिकाशब्दस्य नाडिकात्मककालवाचित्वोक्तिर्नोपपन्ना।

शुल्कभयात् पण्यप्रमाणं मूल्यं वा हीनं ब्रुवतः तदतिरिक्तं राजा हरेत्, शुल्कमष्टगुणं वा दद्यात्। तदेव निविष्टपण्यस्य भाण्डस्य हीनप्रतिवर्णकेनार्घापकर्षणे सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च कुर्यात्। प्रतिक्रेतृभयाद्वा पण्यमूल्यादुपरि मूल्यं वर्धयतो मूल्यवृद्धिं राजा हरेत्, द्विगुणं वा शुल्कं कुर्यात्। तदेवाष्टगुणमध्यक्षस्य च्छादयतः। तस्माद्विक्रयः पण्यानां धृतो मितो गणितो वा कार्यः। तर्कः फल्गुभाण्डानामानुग्रहिकाणां च। ध्वजमूलमतिक्रान्तानां चाकृतशुल्कानां शुल्कादष्टगुणो दण्डः। पथिकोत्पथिकाः तद्विद्युः॥

चाणक्यटीका

क्रेतृसंहर्ष[1] इति। यदा क्रेतॄणामर्मर्थित्वे संहर्षान्मूल्यवृद्धिः स्यात्, तदा मूल्यकृते यच्छुल्कमुचितम्, यावती मूल्यस्य वृद्धिः, तदुभयं राज्ञः कोशं गच्छेत्। अन्यथा परस्परोद्वर्तनेन क्रयं कुर्वाणा (: ? त्) पण्येश्वराद् अन्यः पण्यं नैकमप्याप्नुयात्।

प्रतिपदपञ्चिका

अमुद्राणामिति मुद्रारहितानां अत्ययो दण्डः देयद्विगुणश्शुल्कद्विगुणः। कूटमुद्राणां स्वयंकृतमुद्राणां शुल्काष्टगुणो दण्डः। भिन्नमुद्राणां गृहीतमुद्राणामेव प्रमादिना नष्टमुद्राणामत्ययो देशकालाद्यपेक्षया कश्चित्स्वयमेव कल्पनीयः। घटिकास्थाने वेलायामागन्तूनां स्थानं सन्निरोधेन यदि वा शुल्कशालायां सन्निरोधमेकमह(।)ह्स्वस्थानमेव तेषां भिन्न मुद्राणां अत्ययः मुद्रापरिवर्तन इत्यनुषङ्गः। समानद्रव्याणां तूलकार्पासादीनां नामपरिवर्तने कृते कार्पासादिनेव तुलादिनामकरणे तदावेदने वा सापादपणिकं पादाधिकं वर्णं वहनं भाण्डहरकं दापयेत्। ध्वजमूलोपस्थितस्येति शुल्कशालाङ्गणस्थस्य प्रमाणमियत्तामर्घमेतावता लभ्यत इति वैदेहका वणिजः पण्यस्य ब्रूयुः।

श्रीमूला

शुल्केत्यादि। शुल्कभयात्, पण्यप्रमाणं भाण्डेयत्तां, मूल्यं वा पण्यार्घं वा, हीनम् अवरं, ब्रुवतः, तदतिरिक्तं तदुक्तातिरिक्तं प्रमाणं मूल्यं चोपलभ्यमानं, राजा हरेत्। इति तद्दण्डविधिः। तद्विकल्पमाह—शुल्कमष्टगुणं वा दद्याद्, वणिक्।

तदेवेति। तदेव तदुक्तातिरिक्तं शुल्काष्टगुणं वा, निविष्टपण्यस्य पण्यपूरितस्य, भाण्डस्य, हीनप्रतिवर्णकेन निकृष्टप्रतिवर्णकप्रदर्शनेन, अर्घापकर्षणे मूल्यपातने, सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च महार्घस्य पण्यस्य मणिमुक्तादेरल्पार्घकार्पासतूलादिनावच्छादने च, कुर्यात्।

---

१. 'संहर्षः स्पर्धायां च', इति मेदिनी, संघर्षं इति मुद्रितकोशपाठः।

श्रीमूला

प्रतिक्रेतृभयादिति। प्रतिक्रेतृपुरुषविशेषक्रयणशंकया, पण्यमूल्यान्न्यायाग्याद्, उपरि, मूल्यं वर्धयतः क्रेतुः, तन्मूल्यवृद्धिं राजा हरेत्। द्विगुणं वा शुल्कं कुर्यादिति दण्डविकल्पः।

तदिति। तदेव वैदेहकानां तत्तदपराधे यद् देयं विहितं तदेव, अष्टगुणम्, अध्यक्षस्य, छादयतः वैदेहकापराधं मैत्रीलञ्चग्रहणादिना गोपयतः, कुर्याद् राजा।

तस्मादिति। यथोक्तानृतव्यवहारसम्भवात्, विक्रयः, पण्यानां तोलनीयपरिमेयगणनीयानां, धृतः तुलातोलितः, मितः प्रस्थादिपरिमितः, गणितो वा, कार्यः। तर्कः इदमियत् स्यादिति मानार्घसम्भावनात्मा, कार्यः, फल्गुभाण्डानाम् अङ्गाराद्यल्पपण्यानाम्, आनुग्रहिकाणां लवणादीनां च

ध्वजमूलमतिक्रान्तानामित्यादि। अकृत एव शुल्के शुल्कशालामतिक्रम्य गतानां विषये, शुल्कादष्टगुणो दण्डः। पथिकेत्यादि। पथिकोत्पथिकाः पथिकाः पथि वाणिज्यच्छलचारिणः उत्पथिकाः अनुज्ञातोत्पथगतागतास्तृणेन्धनहारकाः पशुपालकाश्च प्रणिहिताः, तद् अकृतशुल्कवणिगतिक्रमणं, विद्युः, अत एव साक्षिणश्च स्युर्विवादे।

चाणक्यटीका

शुल्कभयादिति। पण्यभागे मूल्ये वा शताद् भयात् पण्यस्य प्रमाणं मूल्यं वा हीनं कथयतः सार्थिकस्य तत् पण्यं मूल्यं वा अतिरिक्तं व्यवहारेषु उपलभ्य राजा हरेदिति नियोगात् शुल्काध्यक्ष एवोच्यते। शुल्कमष्टगुणं वेति प्राक् शुल्कं दत्वा सप्तभागानपरानधिकान् दद्यात्। किञ्च, जानन्नेव प्रकरणाद्वलीयानिति सार्थिको दद्यात्। तदेव शुल्क(मष्टगु)णं दद्यादित्यर्थः।

तदेवनिविष्टपण्यस्येति। प्रविष्टस्य पण्यस्य हीनप्रतिवर्णकेनार्घापकर्षणे। पण्यमूलं शुल्कं गृह्णात्यध्यक्ष इति बुद्ध्वा पण्यस्य हीनं प्रतिवर्णकं दर्शयित्वा शुल्कार्थमर्घापकर्षणं यः करोति, तदेव तस्य शुल्काष्टगुणं दण्डम्, सारभाण्डस्य कुङ्कुमादेः फल्गुभाण्डेन ऊर्णादिना प्रच्छादने च तदेवाष्टगुणग्रहणं कुर्यात्।

प्रतिक्रेतृभयाद्वेति। प्रतिपक्षात् क्रेतुर्भयाद्वा—कथमयं न क्रीणीयात् इति द्वेषेण पण्यमूल्याद् उचिताद् उपरि तृतीयं चतुर्थं वा भागमूल्यम् आरोपयतः मूल्यवृद्धिम्, (ततोऽन्ये तापसा व्यवहारे ज्ञातमर्घकारिणः ?)[१] राजा हरेत्। द्विगुणं वा शुल्कं कुर्यात्।

तदेवाष्टगुणमध्यक्षस्य छादयत इति। तदेव शुल्काष्टगुणम् अध्यक्षस्यापि वणिक्संवृतस्य छादयतः, फल्गुना(मा ? म्ना)सारमिति, अर्थादवच्छादयतः साराष्टगुणमध्यक्षस्य तदेवाधिकं दण्डं कुर्यात्।

---

१. ततोऽन्यदपि तापसव्यञ्जनाद् अर्घहारिणः इति पाठः स्यात्।

[शुल्काप्रदानेनैव नेयानि द्रव्याणि, मिथ्याभाषणे दण्डः]

वैवाहिकम् अन्वायनम् औपायनिकं यज्ञकृत्यप्रसवनैमित्तिकं देवेज्या-चौलोपनयनगोदानव्रतदीक्षणादिषु क्रियाविशेषेषु भाण्डम् उच्छुल्कं गच्छेत् ।

चाणक्यटीका

तस्माद् (देयज्ञाति ? एतज्जातीय)कदोषपरिहारार्थम्, विक्रयः पण्यानां निसृष्टानां धारणार्हाणां धृतः, मानार्हाणांमितः, गणनार्हाणां गणितः कार्यः, न तु तर्केणेवेति । अस्यैव अपवादस्तर्कः फल्गुभाण्डानां पुष्पफलानाम् अ(नु)ज्ञेयः । आनुग्रहिकाणां यत्र दुर्लभानि तत्र वणिजामनुग्रहार्थं तेषां तर्केणापि विक्रयोऽनुज्ञातव्यः ।

ध्वजमूलमतिक्रान्तानामहतशुल्कानाम् अकृतमूल्यानां शुल्काष्टगुणो दण्डः । कथं पुनस्तद्विद्यादिति, पथिकोत्पथिकास्तद् विद्युः । महापथक्षुद्रपथरक्षिणः शुल्काध्यक्ष-पुरुषास्तदतिक्रमं विद्युः । अथवा पथिकास्तेन पथा गन्तारोऽन्ये (द्र ? प्र)ष्टव्याः, उत्पथिकाश्चारण्यनिवासिनो व्याधादयः ।

प्रतिपदपञ्चिका

तेनेति, तदुक्तप्रमाणेण (पण्यमिदं दातव्यं भयात् पण्यप्रमाण)मिझयत्ता मूल्यं अर्धं वा हीनं ब्रुवतो वैदेहकस्य तदतिरिक्तं कथितातिरिक्तं राजा हरेल । शुल्कमष्टगुणं वा दद्यादिति । तस्यैवं देशकालाद्यपेक्षया विकल्पः । तदेवकथितातिरिक्तं शुल्काष्ट-गुणं वा वनिविष्टपण्यस्य भाण्डस्य हिनिसन्निवासितचित्रपण्यस्य भाण्डस्यहीनप्रतिवर्णकेन कुष्टवर्णिकाप्रदर्शनेन अघोपकर्पणे मूल्यावरोपणे सारभाण्डस्य च वज्रमणिमुक्तादेः फल्गुभाण्डेन कार्पासादिना प्रच्छादनेन च कुर्यात् । प्रतिक्रेतृभयाद्वेति, अयमपि क्रेष्यतीत्यादावेव प्रसिद्धं पण्यमूल्यादुपरि मूल्यं वर्धं यतः क्रेतुः तन्मूल्यवृद्धिमाहरे-द्द्विगुणमुचितशुल्कद्विगुणं वा शुल्कं कुर्यादिति देशकालाद्यपेक्षया विकल्पः । अत्र वाशब्दाचार्थे—वर्णयन्ति । तदेवेति । सर्वशेषः यस्मिन्नपराधे यद्वणिजामुक्तन्तत्तदपराधे तदेवाष्टगुणं, शुल्काध्यक्षस्य राजा कुर्यात् । तद्दोपमुत्कोचादिना प्रच्छादयतः । तस्मा-दिति, वणिजामध्यक्षाणां च व्यभिचारसम्भवात् विक्रयः पण्यानां धृतस्तुलया कुङ्कुमा-दीनामितः कुडुवादिना धान्यादीनां गणितो गण्यपण्यादीनां पूगफलादीनां, कार्यस्तर्कः; प्रत्याकलनादिना, इदमेतावद्भवेदिति फल्गुभाण्डानामसारपण्यानां वहितकाङ्गारसुधा-दीनां आनुग्राहिकाणां च साराणामपि महोपकाराणां एवानर तप्रवेशार्थं ध्वजमूल-मतिक्रान्तानां च शुल्कस्थानातिगतानामकृतशुल्कानां शुल्काष्टगुणो दण्डः चशब्दोऽ-वधिसमुच्चये । पथिकास्सुखचारिणो वैदेहकव्यञ्जनादयः उत्पथिकास्त्रकाष्ठाहारगोपा-लादयोनुमताः पथसञ्चाराः तदष्टगुणशुल्ककारणं अतिक्रमणं विद्युः अन्विष्य जानीयुः ।

श्रीमूला

अशुल्कनेयं भाण्डमाह—वैवाहिकमिति । वैवाहिकं विवाहप्रयोजनकम्, अन्वायनं परिणीतायाः पतिगृहं गच्छन्त्याः पितृगृहान्नीयमानम्, औपायनिकम्

अन्यथावादिनः स्तेयदण्डः ।

कृतशुल्केनाकृतशुल्कं निर्वाहयतः द्वितीयमेकमुद्रया भित्त्वा पण्यपुटमपहरतो वैदेहेकस्य तच्च तावच्च दण्डः ।

शुल्कस्थानात् गोमयपलालं प्रमाणं कृत्वाऽपहरत उत्तमस्साहसदण्डः ।

श्रीमूला

उपायनमन्नसत्राद्यर्थं उपहारः तत्प्रयोजनकं, यज्ञकृत्यप्रसवनैमित्तिकं यज्ञकृत्यनैमित्तिकं पयोदधिघृतादिकं प्रसवनैमित्तिकं जातकर्मसूतिकाभेषजाद्यर्थं च, देवेज्यादिषु क्रियाविशेषेषु देवेज्या देवानां देवालयगतानाम् इज्या नित्यनैमित्तिकपूजोत्सवादिः चौलोपनयनगोदानानि संस्कारविशेषाः प्रसिद्धाः व्रतदीक्षणं दानविशेषादिलक्षणव्रतपरिग्रहः, एवम्प्रकारेषु धर्म्यकार्येषु, भाण्डम्, उच्छुल्कम् अशुल्कं, गच्छेत् ।

चाणक्यटीका

वैवाहिकमिति । पौरजानपदानां विवाहनिमित्तम् । वैवाहिकक्रियाया गच्छन्त्या वा सुवासिन्या यत् प्रविष्ट (क) तः प्रदेयं नीयते तद् अन्वायतम् । उपायननिमित्तम् औपायनिकम् । उच्छुल्कं गच्छेत् प्रविशेन्निष्क्रामेच्च । तथायज्ञकृत्यनिर्मित्तम् उत्स(व)निमित्तमित्यर्थः । प्रसवनिमित्तमुपकरणमिति तदुत्पाताद्युपशमाय शान्तिवचनादि तन्निमित्तं भाण्डम् । देवेज्या देवपूजा । (चौलं) चूडाकरणम् । उपनयनं वटूकरणम् । गोदानं व्रतपरिसमाप्तिः । उपनीतस्य सतः प्रतिवर्षं यद् व्रतम् आदिश्यते । आदिग्रहणात् पुंसवनाद्युपग्रहः । एतेषु क्रियाविशेषेषु भाण्डमुच्छुल्कं गच्छेत् ।

प्रतिपदपञ्चिका

विवादे वा साक्षिणेस्य उच्छुल्कमाह—वैवाहिकमित्यादि, वैवाहिकं विवाहप्रयोजनम् । अन्वायनं परिणीतायाः पितृगृहादानीतमौपायनिकं कौशलिकं, यज्ञकृत्यनैमित्तकं (यज्ञकृत्योपयोगि) यज्ञकृत्येचयोहिसती (?) हारादिकं, प्रसवनैमित्तकं जातकर्म सूतिकाभैषज्यार्थं, देवेज्यायां, देवयात्रायां चौलोपनयनगोदानादीनि प्रतीतानि । व्रते देयानि व्रते व्रतादौ द्रव्य(व्यव)धाने उदीक्षणे व्रतमोक्षणे आदिशब्दादन्येष्पि संस्कारधर्माख्येषु कार्येषु भाण्डद्रव्य मुच्छुल्कं गच्छेत् शुल्कं न दद्यात् ।

श्रीमूला

अन्यथावादिन इति । अवैवाहिकादिकमेव भाण्डं वैवाहिकादिकमिति मिथ्या ब्रुवतो वणिजः, स्तेयदण्डः चौर्यस्य यो दण्डो धर्मस्थीयविहितः स कार्यः ।

कृतेत्यादि । कृतशुल्केन दत्तशुल्केन पण्यवासनेन सह, अकृतशुल्कम् अदत्तशुल्कं, निर्वाहयतः सङ्कुले निष्क्रामयतः, इत्येकोऽपराधः, द्वितीयमेकमुद्रयेति एकस्य पण्यवासनस्य मुद्राप्रदर्शनेन तत्तुल्यरूपमपरं पण्यवासनं निर्वाहयत इत्यपरः, भित्वा पुटमपहरत इति पुटं पण्यवासनं कृतशुल्कं भित्त्वा तस्मिन् पण्यमकृतशुल्कं निवेश्य

[अनिर्वाह्यानयने दण्डादयः]

शस्त्रवर्मकवचलोहरथरत्नधान्यपशूनामन्यतमानिर्वाह्यं निर्वाहयतो यथावघुषितो दण्डः पण्यनाशश्च ॥

तेषामन्यतमस्यानयने बहिरेवोच्छुल्को विक्रयः ॥

श्रीमूला

नयत इति तृतीयः। एवमेवमपराधिनो वैदेहकस्य, तच्च तावच्च यदेव पण्यं यत्परिमाणमपहृतं तदेव तत्परिमाणमेव, दण्डः।

शुल्कस्थानादिति। ध्वजमूलात्, गोमयपलालं प्रमाणं कृत्वापहरतः गोपुरीपं धान्यस्तम्बं चात्यन्तनिस्सारद्रव्यं विश्वासपदमपदिश्य तन्निगूहितं सारद्रव्यं नयतः, उत्तमः साहसदण्डः पणसाहस्ररूपो दण्डः।

चाणक्यटीका

अन्यथावादिन इति। अतन्निमित्तस्य विवाहादिनिमित्ततां व्यपदिशतः मिथ्यावादिनः शुल्कस्तेनस्येव पूर्वोक्ता (द) न्यदण्डः।

कृतशुल्केन भाण्डेन मिश्रीकृत्य अकृतशुल्कम् अमुद्रितमेव क्वचिन्मुद्रां दर्शयित्वा निर्वाहयतः एकत्वादिवाचा अस्यान्तः प्रवेश्य द्वितीयमपि पुटमपहारयतो वैदेहकस्य तस्य शुल्कग्राह्यं यद् धृतं तावच्च अन्यच्च (दण्डयमिति किं तत्र ?) दण्डः।

प्रतिपदपञ्चिका

अन्यथा वादिन इति वैदहकस्यान्यथाभूतं ब्रुवतः स्तेयदण्डः। कृतशुल्केन दत्तशुल्केन अकृतशुल्कं निर्वाहयतःतेनसहसङ्कुलेन चत द्वितीयमेकमुद्रया वा एकस्य मुद्रया समान मन्यं पण्यपुटं निर्वाहयतः भित्वा वा पण्यपुटं पण्यवासनं भित्वा तदन्तर्गतमपहरतो वैदेहकस्य तच्च तावच्च दण्डः शुल्कस्थानध्वजमूलात् गोमयं पलालं वा नितरामसारं प्रमाणं कृत्वा विधिर्योऽपहरति उत्तमस्साहसदण्डः।

श्रीमूला

शस्त्रेत्यादि। शस्त्रादीनामष्टानाम्, अन्यतमानिर्वाह्यम् अन्यतमम् अनिर्वाह्यत्वेन कस्मिश्चिन्निमित्ते राज्ञा प्रख्यापितं, निर्वाहयतः, यथावघुपितः प्रख्यापितप्रकारो, दण्डः, पण्यनाशश्च निर्वाह्यमानशस्त्रादिपण्यहानिश्च। तत्र वर्म आवरणसामान्यं, कवचं बाहुकादियुक्तस्तद्विशेषः। शेषं प्रतीतम्।

तेषामिति। अनिर्वाह्यानाम् अन्यतमस्यानयने, बहिरेव दुर्गबाह्यदेश एव, उच्छुल्को विक्रयः अशुल्कस्तस्य विक्रयः।

चाणक्यटीका

शस्त्रवर्मेति। शस्त्रादीनां (प्रधानम् ?) अन्यत्र (मते तु ?) अनिर्वाह्यत्वेऽव-

[राज्यसीमान्तपालानां वेतनं तत्कर्तव्यांशाश्च]

अन्तपालः सपादपणिकाम् वर्तनीं गृह्णीयात् पण्यवहनस्य, पणिका-मेकखुरस्य, पशूनामर्धपणिकाम्, क्षुद्रपशूनां पादिकाम्, अंसभारस्य माषिकाम्। नष्टापहृतं च प्रतिविदध्यात् ॥

वैदेश्यं सार्थं कृतसारफल्गुभाण्डविचयनमभिज्ञानं मुद्रां च दत्त्वा प्रेषयेदध्यक्षस्य ॥

चाणक्यटीका

घोषिते निर्वहणकर्म(णि) यथावघोषित एव विनानुग्रहेण दण्डः कार्यः। पण्यस्य चास्योच्छेदनम्।

तेषामेव शस्त्रादीनामन्यतो[1] देशाद् दुर्लभानाम् आनयने बहिरेव जानपदानाम् उत्सृष्टशुल्कोऽनुग्रहार्थं विक्रयः। अन्यथा अभ्यन्तरप्रवेशे सति पुनरन्ये·····भावान्न गृह्णन्ति जानपदा (इति) मत्वा देशान्त(रं ? रान्)नयन्ति वा देशान्तरमिति।

प्रतिपदपञ्चिका

शस्त्रादीनां हेतुषु सत्सु प्रतिषिद्धनिर्गमानां निर्वाहयतो निर्वाहयतो निर्गमयतो यथाघुषितो, यथोद्दिष्टो दण्डः पण्यनाशश्च तस्य पण्यहानिश्च। पण्यशब्दः प्रत्येकम् शस्त्रमायुधं वर्म सर्वावरणपर्यायः कवचमनेकसंपुटं तस्य च ग्रहणं प्राधान्यार्थं लोहाध्यक्षमन्यत्र व्याख्यातम् तेषां शस्त्रादीनां अन्यतमं परिविषयादानयतो बहिरेव दुर्गादुच्छुल्कः शुल्कहीन विक्रयः।

श्रीमूला

विषयान्तरक्षाधिकारिणो भृतिमाह—अन्तेत्यादि। अन्तपालः, सपादपणिकां पादाधिकपणरूपां, वर्तनीं तत्संज्ञां मार्गरक्षाभृतिं, गृह्णीयात्, पण्यवहनस्य पण्यवहिनः शकटादेः। पणिकाम् एकखुरस्य एकपणात्मिकां वर्तनीं खरादेर्गृह्णीयात्। पशूनामर्ध-पणिकां गवादीनाम् अर्धपणात्मिकां, क्षुद्रपशूनां पादिकां मेषादीनां पादपणरूपाम्, अंसभारस्य माषिकां स्कन्धभारवाहिनस्ताम्रमाषात्मिकां च, वर्तनीं गृह्णीयात्। नष्टा-पहृतमिति। मुष्टनष्टं च प्रतिविदध्यात् तस्करात् प्रत्यानीय वा तस्करानुपलम्भे स्वहस्ताद्वा दद्यात् अन्तपालः।

वैदेश्यमिति। वैदेश्यं विदेशागतं, सार्थं वणिक्सङ्घं, कृपसारफल्गुभाण्ड-विचयनम् अमुकस्यैतावन्ति सारभाण्डानि एतावन्ति फल्गुभाण्डानीति स्वेन कृतं सारफल्गुभाण्डानां विचयनमन्वेषणं यस्य तं तथाभूतम्, अध्यक्षस्य शुल्काध्यक्षस्य, प्रेषयेत्। किं कृत्वा, अभिज्ञानं स्वहस्तलेखाङ्कं, मुद्रां च पण्यवासनकरणीयाम्, दत्त्वा। एष शुल्काध्यक्षहरणस्य निषेधोपायः।

---

१. अन्यतमस्येति पाठो नूनं प्रमादिको मूलकोशेषु मुद्रितेषु।

[भाण्डनिगूहनवारणोपायाः]

वैदेहकव्यञ्जनो वा सार्थप्रमाणं राज्ञः प्रेषयेत् । तेन प्रदेशेन राजा शुल्काध्यक्षस्य सार्थप्रमाणमुपदिशेत् सर्वज्ञत्वख्यापनार्थम् । ततस्सार्थमध्यक्षोऽभिगम्य ब्रूयात्—"इदममुष्याममुष्य च सारभाण्डं फल्गुभाण्डं च न निगूहितव्यम्, एष राज्ञः प्रभावः" इति । निगूहतः फल्गुभाण्डं शुल्काष्टगुणो दण्डः, सारभाण्डं सर्वापहारः ॥

चाणक्यटीका

अन्तपालः सपादपणिकां वर्तनीं गृह्णीयादिति । वर्तनीति तत्प्रभवत्वाद् आयस्यापि व्यपदेशः । एकस्य पण्यवहनदेशे एकैकस्य, न तु पुटभेदनं कृत्वा द्रव्यं कलयेत् । सपादपणिकाम् इत्यस्यापवादः । पणिकामेकखुरस्य गर्दभा(दीनामिति) । महिषस्य अर्धपणिकाम् । पादिकां क्षुद्रवर्गाणामजैडकादीनाम् । असंहारकस्य मापिकां गृह्णीयादिति । नष्टापहृतं चेति शालायां गोप्रचारे वा नष्टं गवादि, चोरैर्हृतं (च) प्रतिविदध्याद् अन्वेषणेन ।

वैदेशमिति । विदेशादागतं वैदेशं सार्थम् आगतं विविच्य यत् फल्गु यत् सारम् इति कृतसारफल्गुभाण्ड एव वा तयोश्च अभिज्ञानं लिखित्वा मुद्रां च मुद्रासङ्क्रान्तां कूटमुद्राभिज्ञानार्थं प्रेषयेद् अन्तपालः शुल्काध्यक्षस्य ।

प्रतिपदपञ्चिका

प्रसङ्गादन्तपालनस्य च कृत्यमाह—

अन्तपाल इत्यादि । अन्तपालो विषयान्तरक्षाधिकृतः । पण्यवहनस्य धान्यादिपण्य- वाहिनः शकटादेः सपादपणिकां वर्तनीं गृह्णीयादिति, एकैकस्य पण्यवहनस्य सपादपणं गृह्णीयाद् । अन्तपालादेः यस्य च—वर्तनीति संज्ञा वर्तनी मार्गः तद्रक्षपनिमित्ता वर्तनीतिपणिकामेकखुरस्य खराश्वतरादेः, पशूमांगोमहिषादीनां अर्धपणिकां क्षुद्रपशूनां मार्गेरूपादीनवं पादिकामंसहारस्यस्कन्धभारवहस्य मापिकां । नष्टं स्वयं अपंगमनमपहृत तस्करीन्तपालः प्रतिविदध्यात् अन्विष्य प्रत्यानीय च दद्यात् । तदलाभे स्वकीयमपि दद्यात् । वैदेश्यमन्यदेशगतं कृतसारफल्गुभाण्डविचयनमिति । कृतस्सारभाण्डस्य फल्गुभाण्डस्य वच विचयनमन्वेपणं यस्य तम् अभिज्ञानं स्वाक्षरादिन्यासोपेतं मुद्रां च तस्य दत्वान्तपालः प्रेषयेत् ।

श्रीमूला

सर्वनियुक्तपुरुषहरणनिषेधोपायमाह—वैदेहकेत्यादि । वैदेहकव्यञ्जनो वा वणिक्छद्मचारी वा गूढपुरुषो राजनियुक्तः सार्थप्रमाणं पण्यवहनादिसङ्ख्यां, राज्ञः प्रेषयेत् रहसि निवेदयेत् । इत्थमवगतसार्थप्रमाणस्य प्रतिपत्तिमाह—तेनेति । तेन प्रदेशेन गूढपुरुषोपदेशेन, राजा, शुल्काध्यक्षस्य, सार्थप्रमाणं स्वविदितम्, उपदिशेत् ज्ञापयेत्, सर्वज्ञत्वख्यापनार्थं 'सर्वज्ञो राजा परोक्षमपि सार्थवाहप्रमाणं दिव्यदृष्ट्या जानातीति

[नाशनयोग्याः देशान्तरादनानेयाः शुल्करहिताश्च पदार्थाः]

राष्ट्रपीडाकरं भाण्डम् उच्छिन्द्यादफलं च यत् ।
महोपकारमुच्छुल्कं कुर्याद् बीजं तु दुर्लभम् ॥९६॥

इत्यध्यक्षप्रचारे शुल्काध्यक्ष एकविंशोऽध्यायः
आदितो द्विचत्वारिंशः ।

श्रीमूला

ख्यापनार्थम् । तत इति । तत उपदेशानन्तरं, सार्थम्, अध्यक्षः अभिगम्य ब्रूयात्, किमिति—इदममुष्यामुष्य च, सारभाण्डं, फल्गुभाण्डं च, न निगूहितव्यम् । कस्मात्, एष राज्ञः प्रभावः ईदृशो राज्ञो महिमोपलभ्यते—यत् परोक्षस्यापि भवदीयसारफल्गु-भाण्डजातस्येयत्तां दिव्यदृष्ट्यावगम्यास्मभ्यमुपदिशति, इति ।

निगूहत इति । निगूहतः राजप्रभावकथनेऽप्यवच्छादयतः, फल्गुभाण्डं कार्पा-सादिकं, शुल्काष्टगुणो दण्डः । सारभाण्डं मणिमुक्ताप्रवालादिकं, निगूहतः, सर्वापहारः गूहितसर्वसारापहरणं दण्डः ।

चाणक्यटीका

वैदेहकव्यञ्जनो वा समानकर्मतया सार्थमात्रप्रवृत्तः सार्थप्रमाणं सारतः सङ्ख्यातश्च स्वान्तेवासिभिः राज्ञः संपादयेत् । (तेन) प्रदेशेन वैदेहकव्यञ्जनोपदेशेन राजा शुल्काध्यक्षस्य सार्थिकसमर्थं सार्थप्रमाणमपदिशेत्, एवंविधोऽयं सार्थ इति सर्वज्ञत्वख्यापनार्थम् । ततः सार्थमध्यक्षोऽधिगम्य ब्रूयात्—इदं कर्पूरादि, अमुष्य यक्षसेनस्य सारभाण्डम् । फल्गु भाण्डं च इदम् । तस्माद् अतोऽन्यदपि न निगूहित-व्यम् । एष राज्ञः प्रभावः यत् परोक्षमपि जानाति (इति) ।

विनिगूहतः फल्गुभाण्डमित्यादि स्पष्टम् ।

प्रतिपदपञ्चिका

अन्तपालशुल्काध्यक्षहरणप्रतिषेधार्थमाह—वैदेहकव्यञ्जन इत्यादि ।

वैदेहकव्यञ्जनो राजप्रयुक्तस्सार्थप्रमाणं वहनपण्यसङ्ख्याः राज्ञः प्रेषयेत् । एकेन प्रदेशेनेत्ति । वैदेहकव्यञ्जनोऽपदेशेन राजान्तपालशुल्काध्यक्षयोः सार्थप्रमाणं भाण्डविशेषं तत्सङ्ख्यां चोपदिशेत् । किमर्थंज्ञो सर्वं, राजेति लोके ज्ञापनार्थं । ततस्तं सार्थंअध्यक्षो-भिगम्यामुष्यामुष्य च वणिजस्सारभाण्डं फल्गुभाण्डं च तद्रूवद्भिर्न विनिगूहितव्यम् ।

अपगममेवं तदस्यादिर्न चात्रास्तद्गुणः कश्चिदेष राज्ञः प्रभावो यदेष दिव्येन चक्षुषा दूरस्थोऽपि सर्वं—पश्यति । इति तथापि विनिगूह्यितफल्गुभाण्डमूर्णाकार्पासा-दिकं शुल्काष्टगुणो दण्डः । सारभाण्डं मणिमुक्ता चन्दनकुङ्कुमादिकं सर्वापहारः ।

श्रीमूला

अध्यायान्ते श्लोकमाह—राष्ट्रेत्यादि । राष्ट्रपीडाकरं भाण्डं गरलमदिरादि-पण्यम्, उच्छिन्द्याद् वारयेद् अत्यन्ताय वा नाशयेत् । अफलमल्पफलं यद् भाण्डं

श्रीमूला

वार्ताकोर्वारुकादि, तच्च उच्छिन्द्यात् देशान्तरान्नानाययेत् । महोपकारं दुर्लभं स्वविषये, वीजम् अभ्यवहार्यं व्रीह्यादिधान्यं भैषज्यार्थं च मरिचहरीतक्यादि, उच्छुल्कं शुल्करहितं कुर्यात् । तुशब्दो विशेषार्थः । बीजं चेति पाठे चशब्दस्तुशब्द-स्यार्थे ।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकविंशोऽध्यायः शुल्काध्यक्षः, आदितो द्विचत्वारिंशः ॥

चाणक्यटीका

राष्ट्रपीडाकरमिति यत् प्रवेशितं भाण्डम् अर्घेण राष्ट्रं पीडयति, तद् उच्छिन्द्यात् गतागतविच्छेदेन । यद् वा अफलम् सुलभत्वात् तदप्युच्छिन्द्यात् । महोपकारं राष्ट्रोपकारं तदशुल्कं कुर्यात् । बीजं च यस्मिन् देशे दुर्लभं तदानयतामुपकारायेति ।

॥ इति शुल्काध्यक्षः, एकविंशं प्रकरणम् ॥
॥ एकविंशश्चाध्यायः ॥

प्रतिपदपञ्चिका

अध्यायप्रान्ते श्लोकमाह—राष्ट्रपीडाकरमित्यादि, राष्ट्रपीडाकरं विपसुरादि कर्म उच्छिद्य निषेधयेत् । आच्छाद्य विनाशयेत् यद्वा अफलं च यत् निष्फलं चकारादल्प-फलं च वरकादि तदप्युच्छिन्द्यात् । यत्नेन नावाहयेत् । यन्महोपकारं व्रीह्यादिधान्यं हरीतक्यादिभेपजं वीजं न्तु यत् दुर्लभं दुःशुल्कं कुर्यात् शुल्कं तस्यानुगृह्णीयात् ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायां अध्यक्षप्रचारिके द्वितीयेऽधिकरणे
एकविंशोऽध्यायः । शुल्काध्यक्षः । आदितः द्विचत्वारिंशोऽध्यायः ।

द्वाविंशोऽध्यायः ।

[अध्यायार्थः, त्रिधा द्विधा च शुल्कविभागः,
सामान्यतः शुल्केयत्तानिर्देशश्च]

शुल्कव्यवहारः । बाह्यमाभ्यन्तरं चातिथ्यम्, निष्क्राम्यं प्रवेश्यं च शुल्कम् । प्रवेश्यानां मूल्यपञ्चभागः ।

श्रीमूला

शुल्कव्यवहार इति । अमुकपण्यस्यैतावच्छुल्कमिति व्यवस्थाकरणं शुल्कव्यवहारः । स इहोच्यते ।

शुल्कामादौ त्रिधा पुनर्द्विधा च विभजते—वाह्यमित्यादि । चः प्रथमो भिन्नक्रमः । शुल्कं, वाह्यमाभ्यन्तरमातिथ्यं च इति त्रिधा भवतीत्यर्थः । तत्र स्वजनपदोत्पन्नपण्यसम्बन्धि वाह्यं, दुर्गस्थानीयाद्यभ्यन्तरभूमिप्रभवपण्यसम्बन्धि आभ्यन्तरम्, विदेशागतपण्यसम्बन्धि आतिथ्यम् । त्रिविधमपि तत् नैष्क्राम्यं निष्क्राम्यपण्यनिष्क्रमणनिमित्तं, प्रावेश्यं च प्रवेशनीयपण्यप्रवेशननिमित्तं च इति पुनः प्रत्येकं द्विविधम् । वृद्धपाठोऽयं व्याख्याभाषयोरुपलब्धः । अवृद्धपाठे तु सम्बन्धि लक्ष्यम् ।

प्रवेश्यानामिति । प्रवेश्यानां परदेशात् स्वदेशं स्वदेशेऽपि स्थानीयं प्रवेशयितव्यानां पण्यानां मूल्यपञ्चभागः, शुल्कं भवति । एष सामान्यविधिः ।

चाणक्यटीका

शुल्काध्यक्षप्रकरणे रक्षा व्याख्याता । इदानीं शुल्कव्यापार उच्यते शुल्कव्यवहार इति । शुल्कव्यवहार इत्यधिक्रियते ।

वाह्यं राष्ट्रजम्, आभ्यन्तरम् (दूरा ? दुर्गा)र्थम्, आतिथ्यं देशान्तरादागतमिति । द्विविधं निष्क्राम्यम्—दुर्गाद् राष्ट्रं राष्ट्राद् देशान्तरं वा प्रवेश्यमपि देशान्तराद् राष्ट्रम्, राष्ट्राद् दुर्गं च शुल्कम् ।

तत्र प्रवेश्यानां मूल्यं कृत्वा पण्यानां मध्यमोत्तराधमानां मूल्यपञ्चभागं वणिग्भ्यो गृह्णीयात् । अयमुत्सर्गः ।

प्रतिपदपञ्चिका

शुल्काध्यक्ष एवाध्यायान्तरेण शुल्कव्यवहारो विधीयते । तत्र वाह्यादिशुल्कभेदानां कस्य वा पण्यस्य कियद्ग्रहणमित्यादिपरिज्ञानं शुल्कव्यवहारः । तमाह—वाह्यमाभ्यन्तरं चेत्यादि । वाह्यं स्वजनपदोत्पन्नं । आभ्यन्तरं स्थानीयाद्युत्पन्नंचातिथ्यं, चकारो भिन्नक्रम सम्बध्यते । परदेशागतवैदेहकोत्पन्नमातिथ्यम् इत्येवं संक्षेपात्त्रिविधम् ।

[पुष्पशङ्खक्षौमवस्त्रादीनां विशेषतः शुल्कव्यवस्थाः]

पुष्पफलशाकमूलकन्दवल्लिक्यबीजशुष्कमत्स्यमांसानां षड्भागं गृह्णीयात् ।

शङ्खवज्रमणिमुक्ताप्रवालहाराणां तज्जातपुरुषैः कारयेत् कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः ।

प्रतिपदपञ्चिका

शुल्कम् तत्पुनः प्रत्येकं द्विविधं नैष्क्राम्यं प्रावेश्यं च। (नैष्क्राम्यं)निष्क्रामणनिमित्तं, प्रावेश्यं पण्यप्रवेशननिमित्तं शुल्कं प्रावेश्यानां परदेशात् स्वदेशं च स्वदेशे स्वास्थानीयम् प्रविशतां पण्यानां मूल्यं पञ्चभागशुल्कमित्युत्सर्गः ।

श्रीमूला

तदपवादं त्वाह—पुष्पफलेत्यादि । पुष्पं कुसुम्भादि फलं पनसादि शाकं वास्तुकादि मूलं वालुकादि कन्दः सूरणादिः वल्लिक्यं वल्लिजं कूश्माण्डादि बीजं धान्यादि एतेषां शुष्कमत्स्यमांसयोश्च, षड्भागं मूल्यषड्भागं शुल्कं, गृह्णीयात् ।

शंखेत्यादि । शंखादीनां षण्णां, तज्जातपुरुषैः तल्लक्षणविचक्षणैः, कारयेत् विधापयेत्, शुल्कम् । कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृताः स्वानुभवावगताः कर्मप्रमाणकालवेतनफलनिष्पत्तयो यैस्तथाविधैः । पदमिदमायुधागाराध्यक्षेऽपि व्याख्यातम् ।

चाणक्यटीका

पुष्पादीनां तु उद(कमर्थं ? कार्धं)व्यवहाराणां तद(र्थं ?) गृह्णीयात् । तत्र वल्याः फलानि वल्लिक्यानि कूष्माण्डकादीनि ।

शङ्खादीनां हारावसानानां न मिथो मूल्यं कुर्यात् । किं तर्हि, तज्जातपुरुषैः कारयेत् । तेषां विशेषमाह—कर्म यैरेवं कृतम्, प्रमाणैः ज्ञातकालैः, ज्ञातवेतनैः, ज्ञातफलनिष्पत्तिभिरिति ।

प्रतिपदपञ्चिका

तस्यापवादः पुष्पफलेत्यादि । पुष्पं कुसुमादि फलं पनसवार्ताकादि । शाकं वा वास्तुकजीरकादि मूलं वालुकादि । कन्दास्सूरणपिण्डारकादयः वल्लिक्यं कूष्माण्डकटिल्लकादि, वल्लीफलं बीजमेतेषामेव विशेषेण वा धान्यादीनां शुष्कमत्स्यादीनां च शुल्कं षड्भागं गृह्णीयात् । शङ्खादीनां षण्णां तज्जातपुरुषैस्तन्निपुणैः शुल्कं कारयेत् ।

क्षौमदुकूलक्रिमितानकङ्कटहरितालमनश्शिलाहिङ्गुलुकलोहवर्णधातूनां चन्दनागुरुकटुककिण्वावराणां सुरादन्ताजिनक्षौमदुकूलनिकरास्तरणप्रावरण-क्रिमिजातानाम् अजैलकस्य च दशभागः, पञ्चदशभागो वा ।

प्रतिपदपञ्चिका

भूयस्तेषां विशेषणं कृतकर्मेत्यादि, कृत इत्यनेकार्थत्वात् करोतेर्निष्पादिता विज्ञाता दृष्टा शङ्खवज्रादीनां कर्म प्रमाणकालवैतनफलनिष्पत्तयो यैस्तैरेव च तज्ज्ञा-तैरिति सिद्धे पुरुषग्रहणं स्त्रीणां कुर्यादिति ज्ञानेन विनिवृत्त्यर्थं हारग्रहणं च वज्रा-दीनामयुक्तानां च परिग्रहार्थम् ।

श्रीमूला

क्षौमेत्यादि । क्षौमादीनां क्षौमं स्थूलवल्कजं दुकूलं सूक्ष्मवल्कजं कृमितानश्चोन-पट्टः कङ्कटः सूत्रसन्नाहः हरितालमनश्शिलहिङ्गुलुका व्याख्याताः अञ्जनं सौवीरकादि, इदं व्याख्यायामेव पठ्यते, लोहवर्णो लोहजातिः धातुर्गैरिकादिः इत्येतेषां, चन्दनादीनां चन्दनागुरुणी प्रसिद्धे कटुकं पिप्पल्यादि किण्वावरं किण्वं मद्यबीजं तदन्तं तैलजातीयं द्रवजातम् इत्येतेषां, सुरादीनां सुरा मद्यभेदः दन्तो गजदन्तः अजिनं कृष्णचर्म क्षौमदुकूलनिकरः क्षौमनिष्पादनार्था दुकूलनिष्पादनार्थाश्च तन्तुनिकराः आस्तरणं शयनोपवेशनसाधनं प्रावरणं प्रावारः क्रिमिजातं कौशेयम् इत्येतेषाम्, अजैलकस्य च अजैलकालोमजस्य च, दशभागः पञ्चदशभागो वा शुल्कं भवति ।

चाणक्यटीका

क्षौमादीनां दशभागः पञ्चदशभागो वा । तत्र तत्सूत्रं क्षौमादिषु प्रत्येकमभि-सम्बध्यते क्षौमदुकूलसूत्रस्य य (स्त्र ? स्ता) यस्तस्येति । कङ्कटः । सूत्रोतस्तु (आ)-वरणविशेषः । लोहं सुवर्णादि, वर्णधातुः गैरकादिः ।

कटुकग्रहणेन कटुकवर्गो गृह्यते जीरकादिः । किण्वावराणामिति किण्वमवरं येषामुत्कृष्टा(दी ?)नां विशिष्टा(दी ?)नाम् । क्षौमग्रहणं निकरविशेषणम् । निकरं वस्त्रं निकराणामित्यपृथक्भूतानाम् । दुकूलवस्त्रम् । कृमिजं कौशेयम् । अजानामेड-कानां च मूल्यदशभागः । पञ्चदशभागो देशकालापेक्षया ग्रहीतव्यः ।

प्रतिपदपञ्चिका

क्षौमं स्थूलवल्कलं दुकूलं सूक्ष्मं क्रिमितानश्चीनपट्टः कङ्कटस्सूत्रसन्नाहः हरि-तालमनश्शिले प्रतीते । अञ्जनं सौवीरकादि लोहवर्णः साल्हादि ? लोहजातिः धातुर्गै-रिकादिः चन्दनागुरुणी प्रतीते । कटुकं पिप्पल्यादि किण्वं मद्योप करणम् अवरं विद लमपरे तु चन्दनादीनां किञ्च पर्यवसानानाम् इति व्याचक्षते । तेन समस्तदाराणां तैल-वर्णकादीनामपि ग्रहणं भवति । दन्तो हस्तिदन्तादिः अजिनं चर्म क्षौमं दुकूलं निष्पन्न-

वस्त्रचतुष्पदद्विपदसूत्रकार्पासगन्धभैषज्यकाष्ठवेणुवल्कलचर्ममृद्भाण्डानां धान्यस्नेहक्षारलवणमद्यपक्वान्नादीनां च विंशतिभागः पञ्चविंशतिभागो वा ॥

[द्वाराध्यक्षवेतनं तत्तद्द्रव्योत्पत्तिदेशे तद्विक्रयनिषेधः अतिक्रमे दण्डश्च]

द्वारादेयं शुल्कपञ्चभागः । आनुग्राहिकं वा यथादेशोपकारं स्थापयेत् ।

प्रतिपदपञ्चिका

मभिहितम् । इह तु तत्कारणनिकरास्संहता गृह्यन्ते । आस्तरणं च शयनीयोपकरणं प्रावरणं प्रावारादि कृमिजातं कौशेयं लाक्षादीत्यन्ये अजैलकं प्रतीतमित्येषां दशभागः पञ्चदशभागो वा शुल्कम् विकल्पश्चायं देशकालद्रव्याद्यपेक्षया ।

श्रीमूला

वस्त्रचतुष्पदेत्यादि । वस्त्रादयो धान्यादयश्च प्रसिद्धाः, तेषां, विंशतिभागः पञ्चविंशतिभागो वा शुल्कम् । अयं पूर्वोक्तश्च विकल्पो यथादेशकालं द्रष्टव्यः ।

द्वारादेयमिति । द्वाराध्यक्षग्राह्यं, शुल्कपञ्चभागः यस्य यच्छुल्कमुपदिष्टं तस्य तच्छुल्कपञ्चभागः भवति । आनुग्राहिकम् अनुग्रहानीतपण्यविषयं शुल्कं द्वारादेयं वा, यथादेशोपकारं स्वदेशानुग्रहानुगुण्येन, स्थापयेत् कल्पयेत् ।

चाणक्यटीका

वस्त्रचतुष्पदेति । वस्त्रम् । कार्पासिकं सूत्रम् । कार्पासं केवलमेव । गन्धस्तगरादि । भैषज्यं शृङ्गवेरादि । चर्म गोचर्मादि । पूर्वमजिनं[1] मूषिकोद्भवं ज्ञेयम् । आदिग्रहणात् एवंजातीयकानां शय्यासनादीनां ग्रहणम् । पक्वान्नमोदनम् । (ओद)-नादपू(र्वका ? पा)द्युपग्रहः । एषां मूल्यस्य विंशतिभागो पञ्चविंशतिभागो वा ।

द्वारदेयमिति । पण्यशुल्कं दत्त्वा नगरस्य निष्कासप्रवेशयोरपरं द्वारदेयम् । किं तत्, शुक्लस्य यः पञ्चमो भागः । आनुग्राहिकं वेति । अनुग्रहः प्रयोजनं यस्य शुल्कस्य तदानुग्राहिकम् । यथादेशोपकारं स्थापयेत् । एतद्देशानां द्वादशभाग इति । देशग्रहण-(त्वादु ? मु)पलक्षणम्, ब्राह्मणानामयमनुग्रहः, अयं क्षत्रियाणाम्, अयं सङ्घस्येति ।

प्रतिपदपञ्चिका

वस्त्रादयो धान्यादयश्च प्रतीताः । काष्ठवेण्वादीनां पञ्चानां स्वरूपग्रहणं तन्मयानां भाण्डानां च ग्रहणमित्येवमेतेषां विंशतिभागः पञ्चविंशतिभागो वा शुल्कम् ।

द्वारादेयमाह—द्वारादेयं शुल्कं पञ्चभाग इति, यस्य शुल्कं मुक्तं तस्य

---

१. दन्ताजिनेति पूर्ववाक्ये पठितमित्यर्थः ।

जातिभूमिषु च पण्यानामविक्रयः। खनिभ्यो धातुपण्याऽऽदाने षट्छत-मत्ययः। पुष्पफलवाटेभ्यः पुष्पफलाऽऽदाने चतुष्पञ्चाशत्पणो दण्डः। षण्डेभ्यः शाकमूलकन्दाऽऽदाने पादोनं द्विपञ्चाशत्पणो दण्डः। क्षेत्रेभ्य-स्सर्वसस्याऽऽदाने त्रिपंचाशत्पणः। पणोऽध्यर्धपणश्च सीतात्ययः।

प्रतिपदपञ्चिका

पञ्चभागो द्वाराध्यक्षेण ग्राह्य इति, अनुग्राहकं वेति, सर्वापवादः यत्पण्यमनुग्रहनीतं तस्य शुल्कं द्वारादेयं वा यथा देशोपकारमित्यनवरतागमने यथा स्वदेशस्योपकरोति तथा स्थापयेत्।

श्रीमूला

जातीत्यादि। जातिभूमिषु च उत्पत्तिदेशेषु च, पण्यानाम्, अविक्रयः विक्रयो न कर्तव्य इत्यर्थः।

निषेधातिक्रमे दण्डमाह—खनिभ्य इति। लोहलवणाद्याकरेभ्यः, धातुपण्यादाने धातुपण्यस्य कारणरूपस्य कार्यरूपस्य वा ग्रहणे, षट्छतम् अत्ययः षट्पणशतानि दण्डो भवति, अर्थाद् आदातुर्विक्रेतुश्च।

पुष्पफलवाटेभ्यः इत्यादि। सुगमम्।

षण्डेभ्य इत्यादि। षण्डेभ्यः शाकाद्युद्भिजक्षेत्रेभ्यः। स्पष्टमन्यत्।

क्षेत्रेभ्य इति। क्षेत्रेभ्यः धान्यकेदारेभ्यः, सर्वसस्यादाने, त्रिपञ्चाशत्पणो दण्डः। पणः अध्यर्धपणश्च केतृविक्रेत्रोर्यथाक्रमं, सीतात्ययः धान्यदण्डः। अयं च दण्ड-स्त्रिपञ्चाशत्पणेन समुच्चीयते।

चाणक्यटीका

जातिभूमिषु चेति। पण्य(भूमि ?) जन्मभूमिषु लाभाभावात् पण्याना-मविक्रयः। तत्र ह्यविदितो विक्रयः शुक्लम् (अप)वाहयेत् स प्रतिषेद्धव्यः।

कथमित्याह—खनिभ्य इति। खनिभ्यो धातुपण्यानां वज्राणाम् आदाने क्रेतुः स्वयंगामित्वात् षट्छतमत्ययः। विक्रेतुस्तेनोक्तम्।

पुष्पफलवाटेभ्यस्त्वारामेभ्यः पुष्पफलादाने क्रेतुः चतुष्पञ्चाशत्पणः।

षण्डेभ्यः (कोचरीकारिकृतेभ्यः ?) पादोनः काकणीन्यूनः द्विपञ्चाशत्पणः।

सीतात्यय इति। यः सीतायां खले क्रीणाति सस्यं सामान्येन तस्य त्रिपञ्चा-शत्पणः। सीतात्ययश्च पणार्धपणश्च सीतात्ययः। अन्यस्त्वाह—सामान्येन सर्वसस्यादाने त्रिपञ्चाशत्। पणार्धपणश्च सीतात्ययः पणमूल्ये सस्येऽर्धपणः क्षेत्रगत-स्यादानेऽत्ययः।

[निगमनम्]

अतो नवपुराणानां देशजातिचरित्रतः ।
पण्यानां स्थापयेच्छुल्कमत्ययं चापकारतः ॥९७॥

इत्यध्यक्षप्रचारे शुल्कव्यवहारो द्वाविंशोऽध्यायः
आदितस्त्रिचत्वारिंशः ।

प्रतिपदपञ्चिका

जातिभूमिष्विति, उत्पत्तिभूमिषु पण्यानामविक्रयः कर्तव्य इति वाक्यशेषः । एवमर्थात् क्रेतुरपि प्रतिषेधे तस्य दण्डमाह—खनिभ्य इत्यादि । स चात्ययो विक्रेतुरप्यवगन्तव्यः । शङ्खलोहलवणाद्याकरेभ्यो धातुपण्यादाने कारणस्य कार्यस्य वा ग्रहणे षट्शतमत्ययः षट्शतानि दण्डाः पुष्पादिवाटेभ्यः पुष्पादिग्रहणे चतुष्पंचाशत्पणो दण्डः षण्डेभ्यः शाकाद्यादाने द्विपञ्चाशत्पणः । क्षेत्रेभ्यः सर्वस्यादाने व्रीह्यादि-(पण्यादि) सर्वधान्याग्रहणे त्रिपञ्चाशत्पणो दण्डः । पणोऽध्यर्धपणश्च सीतात्यय इति, क्रेतुः विक्रेतुश्च यथाक्रमं पणोऽध्यर्धपणश्च सीतात्ययः धान्यदण्डः, स च त्रिपञ्चाशत् । पणादधिको ग्राह्यः पुष्पफलादेरपि सर्वशेषोऽयमिति ।

श्रीमूला

अध्यायान्ते श्लोकमाह—अत इति । अत उक्तशुल्कदण्डप्रकारातिरेकेण, नवपुराणानां, पण्यानां, देशजातिचरित्रतः देशाचारजात्याचारानुसारात्, शुल्कं स्थापयेत् । अपकारतः अपकारानुसाराद्, अत्ययं च दण्डं च, स्थापयेत् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वाविंशोऽध्यायः, शुल्काध्यक्षे शुल्कव्यवहारः,
आदितस्त्रिचत्वारिंशः ॥

चाणक्यटीका

अतो नवपुराणानामिति । शुल्कं द्वारदेयं निवर्तयेत् । एवं नवस्य एव पुराणस्य वा शुल्कमिति । (पूर्वोक्तमेकं ?) निर्देशानां पञ्चकानामिदम्, ब्राह्मणानामिदम्, परिमाणापेक्षमिति । पण्यानां शुल्कमत्ययं च अपरः(ततः) अल्पतापेक्षया अल्पम्, महत्तया महान्तमिति ।

॥ इति शुल्काध्यक्षः द्वाविंशतमं प्रकरणं समाप्तम् ॥
॥ द्वाविंशतितमोऽध्यायः ॥

प्रतिपदपञ्चिका

[illegible] अध्यायप्रान्ते श्लोकमाह—अत इत्यादि, अत उक्तशुल्कातिरेकेण नवानां

प्रतिपदपञ्चिका

पुराणानां च पण्यानां देशचारित्रतो देशाचारतस्तद्वज्जातिचरित्रतो जात्याचारतः शुल्कं स्थापयेत् । अत्ययं च दण्डमपकारतोऽपराधानुरूपमप्यूह्येदित्ति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे द्वाविंशोऽध्यायः ।
आदितस्त्रिचत्वारिंशोऽध्यायः ॥

चतुस्त्रिंशं प्रकरणम्

त्रयोविंशोऽध्यायः ।

सूत्राध्यक्षः ।

[सूत्राध्यक्षप्रवर्तनीयव्यवहाराः, कर्मसु नियोजनीयाश्च]

सूत्राध्यक्षः सूत्रवर्मवस्त्ररज्जुव्यवहारं तज्जातपुरुषैः कारयेत् । ऊर्णा-वल्ककार्पासतूलशणक्षौमाणि च विधवान्यङ्गाकन्याप्रव्रजितादण्डप्रतिकारिणीभिः रूपाजीवामातृकाभिः वृद्धराजदासीभिः व्युपरतोपस्थानदेवदासीभिश्च कर्तयेत् ।

श्रीमूला

सूत्राध्यक्ष इति सूत्रन् । सूत्रम् ऊर्णादिजो गुणः तस्य अध्यक्षः कर्तनवानादिकारयिता । तद्व्यापारोऽभिधीयत इति सूत्रार्थः । 'कार्पासक्षौमाणां पञ्चपले पलसूत्रम्' इत्युक्तं कोष्ठागाराध्यक्षे । तदध्यक्षस्तद्व्यापारश्चानुक्त इहोच्यते ।

सूत्राध्यक्षः इति । सूत्राध्यक्षः सूत्रवर्मवस्त्ररज्जुव्यवहारं सूत्रादीनां कर्तनवानादिकं, तज्जातपुरुषैः तच्छिल्पिकुलजैस्तत्कर्मकुशलैश्च पुरुषैः, कारयेत् ।

ऊर्णेत्यादि । ऊर्णा मेषादिलोम वल्को मूर्वादित्रसरः कार्पासः प्रसिद्धः तूलं शाल्मल्यादि शणः क्षुपभेदजं क्षौममतसीजम् एतानि च, विधवादिभिः पञ्चभिः तत्र न्यङ्गा अङ्गुविकला दण्डप्रतिकारिणी कर्मणा दण्डनिष्क्रयकारिणी शेषाः प्रसिद्धाः, रूपाजीवामातृकाभिः गणिकाधात्रीभिः, वृद्धाभिर्नृपत्तिपरिचारिकाभिः, व्युपरतोपस्थानदेवदासीभिश्च उपस्थानं देवालयेषु नृत्तगीतादिना देवसभाजनकर्म तद् व्युपरतम् अनर्हतया निवृत्तं यासां ताभिस्तथाभूताभिर्देवदासीभिर्देवालयपरिचारिकाभिश्च, कर्तयेत् सूत्रयेत् ।

चाणक्यटीका

क्षौमदुकूलादीनां दशभागः शुल्कमित्युक्तम् । तानि पुनः क्षौमदुकूलादीनि कथं कार्याणीति सूत्राध्यक्ष (: ? स्य) पुरे, सन्निधातुः राष्ट्रे च कर्माह सूत्राध्यक्ष (इति) । स्वव्यापारविधानार्थं प्रक्रियते सूत्राध्यक्ष इति । (सः) सूत्राणां रज्जूनां च (व ? क)-र्तन[1]वानव्यवहारांस्तज्जातपुरुषैरध्येतृभिः कारयेत् ।

---

१. 'कर्तनं तु क्लीछेदने सूत्रसर्जने' इति केशवस्वामी ।

[कर्मवेतनयोरानुगुण्यं, वृद्धिमतां प्रोत्साहनेन तैरपूर्वरक्षादिनिर्माणपणं च]

श्लक्ष्णस्थूलमध्यतां च सूत्रस्य विदित्वा वेतनं कल्पयेत्, बह्वल्पतां च। सूत्रप्रमाणं ज्ञात्वा तैलामलकोद्वर्तनैरेता अनुगृह्णीयात्।

चाणक्यटीका

ऊणादीनि कारयेदित्येव। अथवा कर्तयेदिति वक्ष्यमाणेन सम्बन्धः। तत्र तूलं शाल्मल्यादीनाम्। (विकलाः पतिता ?)[1] । न्यङ्गा(नि ? न) येनाङ्गेन विना शक्नुवन्ति कर्तितुं तेन (न) विकलाः। कन्यका दरिद्रदुहितरः। दण्डप्रतिकारिण्यः दण्डं दातुमशक्ता याः, ताः (किं न ? कर्मणा) प्रतिकुर्युः। रूपाजीवामातरो वेश्या-मातृकाः। वृद्धराजदास्यः अन्यकर्मायोग्यत्वात्। व्युपरतोपस्थानाः देवदास्यः देवस्य कामुकस्य वा उपस्थानासमर्थत्वात् ताभिः कर्तयेत्।

प्रतिपदपञ्चिका

सूत्राध्यक्ष इति सूत्रम्। सूत्रम् ऊर्णाकार्पासादिजम्, तस्य कर्तनवानादिकारयिता सूत्राध्यक्ष इति सूत्रार्थः। सम्बन्धस्तु कार्पासक्षौमाणां पञ्चपले सूत्रमित्युक्तम्। तस्याध्यक्षः कर्तनवानादिकारयिता तत्कर्तनवानादिकं च नोक्तम्। तदभिधीयत इति। तदाह— सूत्राध्यक्ष इत्यादि, सूत्रवस्त्रादयः प्रतीताः। तेषां व्यवहारं कर्तनवानादिलक्षणं तज्जातपुरुषैः तत्कुशलैः कारयेत्। पुरुषग्रहणं प्राधान्याद्विज्ञादीनामपि व्यापारोपदेशात्। ऊर्णेत्यादि। वल्को मालतीमूर्वाप्रभृतीनां त्रसरः क्रमितानादिः तूलमर्क्कशल्मल्यादि राङ्कवं मृगरोमेत्यपरे। क्षुमा विरुद्धिशेषः तत्प्रभवं क्षौमम्, शेषाणि प्रतीतानि।

शणक्षौमयोर्वल्कग्रहणेनैव गृहीतत्वात् पृथगुपादानं प्राधान्यग्रहणार्थम्। विधवादयः प्रतीताः। दण्डप्रतिकारिणी कर्मणा दण्डस्य प्रवेशयित्री रूपाजीवादेव-राजकुलप्रतिबन्धात्तन्मातृकाभिः निरुपयोगादिभिः तद्धात्र्यादिभिः वृद्धराजदासीभिः अनन्ययोग्याभिः व्युपरतोपस्थानदेवदासीभिः सङ्गीतकाद्ययोग्याभिः कर्तयेत् सूत्राणि कारयेत्।

श्रीमूला

श्लक्ष्णेत्यादि। श्लक्ष्णतां स्थूलतां मध्यतां च सूत्रस्य विदित्वा भृतिं कल्पयेत्। बह्वल्पतां चेति। तुल्ये काले कर्तनस्य बहुत्वमल्पत्वं च, विदित्वा वेतनं कल्पयेदित्यनु-षज्यते। सूत्रप्रमाणमिति। सूत्रस्य श्लक्ष्णतातिशयं बहुत्वं च, ज्ञात्वा, तैलामलकोद्वर्तनैः तैलाभ्यञ्जनस्नपनैरूष्मशमनार्थैः, एताः दृष्टगुणाः, अनुगृह्णीयात् उपकुर्यात् तत्प्रीतये तदन्यप्रोत्साहनाय च।

---

१. विधवा विपतिका इति पाठः स्यात्।

तिथिषु प्रतिपादनमानैश्च कर्म कारयितव्याः। सूत्रह्रासे वेतनह्रासः द्रव्यसारात्। कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारुभिश्च कर्म कारयेत्, प्रतिसंसर्गं च गच्छेत्।

———— —

चाणक्यटीका

श्लक्षणस्थूलमध्यतां सूत्रस्य ज्ञात्वा वेतनम्, उत्तमाधममध्यमं कल्पयेत्। वह्वल्पतां चेति। सूत्रस्य बहुत्वे सति तैलादिभिरनुगृह्णीयात् मू(ल्य)वधार्थम् अल्पत्वेनैवेति, (अथोक्तमिति किञ्चिदिति ?)।

प्रतिपदपञ्चिका

श्लक्षणस्थूलमध्यतामिति, सूत्रस्य प्रकारतां ज्ञात्वा त्रिविधमेव वेतनं कल्पयेत्। वह्वल्पतां चेति, तुल्यकाले अल्पत्वबाहुल्ये च कर्तनस्य दत्वा वेतनं कल्पयेत्। सूत्रप्रमाणं ज्ञात्वेति सूत्रस्य श्लक्ष्णत्वान्याधिक्यं ज्ञात्वा तैलामलकोद्वर्तनैरेनामनुगृह्णीयात्। चक्षुःप्रसादार्थमन्यासामपि यत्नातिशयार्थं च।

श्रीमूला

तिथिष्विति। तिथिषु कर्मदिवसेषु, प्रतिपादनमानैश्च प्रतिपादनं वेतनदानं दीयमानवेतनं वा तस्य मानैः एतावतः कर्मण एतावद् वेतनमित्येवंरूपैः परिच्छेदैश्च, कर्म कारयितव्याः। अथवा तिथिषु दिवसविशेषेषु पर्वादिषु अशनदानसत्कारैश्च कर्म कारयितव्याः। सूत्रह्रासे सूत्रस्य न्याय्यप्रमाणतो न्यूनत्वे, वेतनह्रासः, द्रव्यसारात् द्रव्यार्घमपेक्ष्य, कर्तव्य इति शेषः।

कृतकर्मेत्यादि। इदं पदमन्यत्र व्याख्यातम्। एवम्भूतैः कारुभिश्च तन्तुवायादिभिश्च, कर्म कारयेत्। प्रतिसंसर्गं संख्यं च, गच्छेत् तत्कर्मसम्भावितच्छलप्रयोगज्ञानार्थम्।

चाणक्यटीका

(तिथिषु) पुष्यफल्गुन्यादिषु पुष्पादिप्रतिमाननैः भक्ष्यभोज्यपानदानैश्चोपायैः कर्म सोत्साहं कारयितव्याः।

सूत्रह्रासे वेतनह्रासो द्रव्यसारात् का(र्पा)सपञ्चपलं सूत्रपलं भवति[1]। यदा तर्कितस्य सूत्रस्य ह्रासो भवति तदा तस्मिन् ह्रासे यद्दीयते वेतनं ताभ्यः, तत् कुर्यात्। द्रव्यसारापेक्षया द्रव्यसारान्मूल्यं कृत्वेत्यर्थः।

कुतोऽन्यद्दाप्यतामिति तच्च मूल्यकैः कारयेदित्याह—कृतस्य कर्मणः इयत्प्रमाणं सूक्ष्मं चेदमल्पमपि भवेत्, कालश्च महानपि स्यात्, वेतनं च प्रभूतम्, इयती फलनिष्पत्तिः, इति मूल्यमप्यस्य प्रभूतमेव। तज्ज्ञैः कारयेत्॥

इदानीं वानार्थमाह—कारुभिः तूल(क ?)कौशेयादिभिः सूक्ष्मकर्मकारिभिः

———

१. "कार्पासक्षौमाणां पञ्चपले पलसूत्रम्" इति कोष्ठागाराध्यक्षे कौटल्यः (२.१५)।

क्षौमदुकूलक्रिमितानराङ्कवकार्पाससूत्रवानकर्मान्तांश्च प्रयुञ्जानो गन्धमाल्यदानैरन्यैश्च औपग्राहिकैराराधयेत्। वस्त्रास्तरणप्रावरणविकल्पानुत्थापयेत् कङ्कटकर्मान्तांश्च तज्जातकारुशिल्पिभिः कारयेत् ॥

प्रतिपदपञ्चिका

तिथिषु अकर्तनदिवसेषु पौर्णमास्यादिषु प्रतिपादनेन उच्छिष्टादिदानेन कर्मकर्तनव्यतिरिक्तं कर्तनीयद्रव्यशोधनादिकं कारयितव्यम्। अथवा तिथिषु शेषदिवसेषु कार्तिक्यादिषु प्रतिपादनेन गन्धमाल्यभक्ष्यादिप्रतिपादनेन कर्मकर्तनमेव सविशेषं कारयितव्यम्। ह्रासे सूत्रह्रासे प्रमाणन्यूनत्वे वा वेतनह्रासो द्रव्यसाराधीनसूत्रप्रमाणमूल्यानुरूपः कल्पनीयः। कारुभिश्चेति, तन्तुवायादिभिः कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिरिति परिभाषितकर्मप्रमाणादिभिः कर्म वस्त्रवानादिकं कारयेत्।

तत्र कर्म वस्त्रादिप्रमाणं पञ्चहस्तादिकालः पञ्चरात्रादिभिः वेतनं वानमूल्यं फलनिष्पत्तिः पटादिसम्पत्तिः प्रतिसंसर्गं च तैरेकैकेन सह सख्यं कुर्यात्।

श्रीमूला

क्षौमेत्यादि। राङ्कवं रंकुलोमजं क्षौमादिचतुष्कमन्यत्र व्याख्यातम्। क्षौमादीनां पञ्चानां सूत्रवानकर्मान्तान्, प्रयुञ्जानः कारयन् अध्यक्षः, गन्धमाल्यदानैः, अन्यैश्च, औपग्राहिकैः आनुकूल्यसम्पत्तिफलैः आराधयेत् उपचरेत् तत्कारून्। तदाराधनफलमाह—वस्त्रेत्यादि। वस्त्रास्तरणप्रावरणानां विकल्पान् प्रकारभेदान्, उत्थापयेत् अपूर्वानुल्लेख्य निर्मापयेत्।

कंकटेत्यादि। कंकटकर्मान्तांश्च सूत्रसन्नाहकर्माणि, तज्जातकारुशिल्पिभिः तत्कर्मनिपुणैः कारुभिः शिल्पिभिश्च, कारयेत्।

चाणक्यटीका

प्रतिसंसृज्येत। ततः किमिति चेदाह—क्षौमदुकूलेति। तानं सूत्रमुच्यते। प्रत्येकञ्चापि। क्षौमदुकूलक्रिमिसूत्रवानकर्मान्ता(न्)। राङ्कवं[1] रङ्कुदेशभवं पट्टसूत्रं[2] (तेनायं? तानवम्)। राङ्कवसूत्रवानकर्मा(न्त? न्तान्) तथा कार्पाससूत्रवानकर्मा(न्तांश्च)।··· दिभिः अन्यैश्चोपग्रहयोजनैः सुरादिभिराराधयेत् कारुशिल्पिनः।

तथा वस्त्रास्तरणप्रावरणविकल्पांश्च प्रसिद्धान् मूल्यवृद्ध्यर्थम्, उत्पादयेत्। तथा कङ्कटकर्मान्तांश्च सूत्रेण। तज्जातैः कारुभिरन्यैश्च शिल्पिभिश्चिन्तकैः कारयेत्। ते च कङ्कटाः कूर्पासकाकृतयः पुरुषाणां रशनादिभिः[3] खचिताः रथा हस्तीति।

---

१. देशवाचिनि कच्छादिगणे (४.२ १३३) रङ्कुशब्दः पठितः। रङ्कुर्नावृद्धे इति केशवस्वामी च।

२. राङ्कवः कम्बल इति काशिका (४.२.१००)।

३. रशनादिभिरित्यर्थः।

[स्त्रीभिः सूत्रनिर्मापणविधिः, तासु वर्तनक्रमः, अतिक्रमे दण्डश्च]

याश्च अनिष्कासिन्यः प्रोषितविधवाः न्यङ्गाः कन्यका वा आत्मानं बिभृयुः ताः स्वदासीभिरनुसार्य सोपग्रहं कर्म कारयितव्याः। स्वयमागच्छन्तीनां वा सूत्रशालां प्रत्युषसि भाण्डवेतनविनिमयं कारयेत्। सूत्रपरीक्षार्थमात्रः प्रदीपः। स्त्रिया मुखसन्दर्शनेऽन्यकार्यसंभाषायां वा पूर्वस्साहसदण्डः। वेतनकालातिपातने मध्यमः, अकृतकर्मवेतनप्रदाने च ॥

———————

प्रतिपदपञ्चिका

तत्करणं तद्धरणोपायपरिज्ञानार्थं क्षौमादीनां सूत्रवानकर्मान्तान् प्रयुञ्जानः सूत्राध्यक्षो गन्धमाल्यादिदानैरन्यैश्च माल्यादिभिरौपग्राहिकैरनुवर्तननिमित्तैराराधयेत् विधेयीकुर्यात्। क्षौमादयः प्रदेशान्तरे कृतव्याख्याः, राङ्कवं रङ्कुमृगरोमजं वस्त्रादित्रयं प्रतीतम्।

तेषां विकल्पान् विविधान्प्रकारान् उत्पादयेत्। अपूर्वांनु(न)पूर्वानुत्पादयेत्। कङ्कटकर्मान्तांश्च सूत्रसन्नाहक्रियारम्भांस्तज्ज्ञातैस्तन्निपुणैः कारुभिः शिल्पिभिश्च कारयेत्। याश्चानिष्कासिन्य इति कुलयोषितः प्रोषितभर्तृकाद्याः चतस्रः पोषकाभावादात्मानं स्वयमेव बिभृयुः।

श्रीमूला

याश्चेति। याश्च, अनिष्कासिन्यः प्रोषितविधवाः भर्तृप्रवासनिमित्तवियुक्तभर्तृकाः परित्यक्तबहिर्निष्क्रमणाः न्यङ्गाः अङ्गविकलाः, कन्यका वा, आत्मानं बिभृयुः स्वपरिश्रमार्जितग्रासादिना देहयात्रां कुर्युः, ताः, स्वदासीभिः, अनुसार्य अनुवर्त्य, सोपग्रहं सप्रीतिबहुमानं यथा भवति तथा, कर्म सूत्रकर्तनादि, कारयितव्याः।

स्वयमिति। स्वयमागच्छन्तीनां, वाशब्दात् स्वदासीसमानीतानां वा, सूत्रशालां, प्रत्युषसि ईषत्तमसि दिनमुखे, भाण्डवेतनविनिमयं तद्गृहकर्तितभाण्डग्रहणपूर्वकवेतनार्पणं, कारयेत्। सूत्रपरीक्षार्थमात्रः प्रदीप इति, सूत्रगुणपरीक्षणप्रयोजना तदन्यप्रयोजनाक्षमा मात्रा प्रकाशपरिमाणं यस्य स तथाभूतः दीपः कार्यस्तत्काल इति शेषः।

स्त्रिया इत्यादि। स्त्रियाः, मुखसन्दर्शने मुखनिर्वर्णने, अन्यकार्यसम्भाषायां प्रकृतकार्यातिरिक्तकार्यप्रश्नादौ वा, पूर्वः साहसदण्डः। वेतनकालातिपातने भृतिदानकालातिक्रमे, मध्यमः साहसदण्डः। अकृतकर्मवेतनप्रदाने च अकृतकर्मणामुत्कोचग्रहणेन वेतनस्य दाने च मध्यम इत्यनुषज्यते।

चाणक्यटीका

या वा अनिष्कासिन्यः स्वगृहात्। कास्ताः प्रोषितपतिकाः विधवा वा, तथा

[अङ्गीकृतातिक्रमे तासां दण्डः]

गृहीत्वा वेतनं कर्म अकुर्वत्याः अङ्गुष्ठसन्दंशं दापयेत्, भक्षितापहृतावस्कन्दितानां च। वेतनेषु च कर्मकराणामपराधतो दण्डः।

रज्जुवर्तकैः चर्मकारैश्च [पूर्वाकारैश्च] स्वयं संसृज्येत। भाण्डानि च वरत्रादीनि वर्तयेत्।

चाणक्यटीका

न्यङ्गाः कन्यका वा आत्मानं परमाश्रित्य बिभृयुः, ताः स्वदासीभिरनुप्रविश्य विदिताभिप्रायाः सोपग्रहं कर्म कारयेत्, सूत्रस्येत्यधिकारात्।

निष्कासिनीनां स्वयमागच्छन्तीनां सूत्रशालां प्रति उपयापनज्ञानसम्पातो न भवति तावद् भाण्डस्य सूत्रस्य वेतनं कारयेत्। विनिमयश्च सूत्रस्य ग्रहण कार्पासस्य दानमिति। यदा त्वन्धकारः स्यात्तदा सूत्रपरीक्षामात्रः प्रदीपः दूरं नीत्वा सूत्रं परीक्ष्यं स्त्रियमपश्यतेत्यर्थः।

करणमनुष्येण तु स्त्रिया मुखदर्शने सूत्रव्यवहाराच्च अन्यस्य कार्यस्य, कियन्तं कालं प्रोषितभर्तृका भवती, इत्यादेरपि सम्भाषायां पूर्वः साहसदण्डः। वेतनकालातिपातने मध्यमः। अकृतकर्मवेतनप्रदाने वा। कस्यायं दण्डः, यैस्तज्जातपुरुषैरध्यक्षः कर्म कारयेदिति।

प्रतिपदपञ्चिका

ताश्च दासीभिरनुसार्यानुसाध्य सोपग्रहं सप्रश्रयं प्रीतिपूर्वकं च कर्म कर्तनादिकं कारयेत्। स्वयमागच्छन्तीनां वा, वाशब्दात् स्वदासीभिरानीतानां सूत्रशालां प्रत्युषसि सान्धकारवेलाया भाण्डवेतनविनिमयं कारयेत्, सूत्रं गृहीत्वा मूल्यं दद्यात्। सूत्रपरीक्षामात्रः प्रदीप इति। मात्रच्। प्रयोजनानन्तरं व्यावर्तयति, तेन सूत्रपरीक्षामात्रोपयोगी घटप्रदीपः कर्तव्यो न निश्शेषशालावसान इति। स्त्रिया मुखसन्दर्शनेऽन्यकार्यसम्भाषायां वा कृते गृहं कृत्वा वर्तयसीत्येवमादिकायां पूर्वस्साहसदण्डः। वेतनकालस्य यथोदितस्य अतिपातने मध्यमः। अकृतकर्मवेतनप्रदाने च मध्यम एव।

श्रीमूला

गृहीत्वेति। गृहीत्वा पूर्वमादाय, वेतनं, कर्माकुर्वत्याः, अङ्गुष्ठसन्दंशं दक्षिणाङ्गुष्ठतन्मध्यमांगुल्यग्रयोश्छेदोऽङ्गुष्ठसन्दंशः तं, दापयेत्। भक्षितापहृतावस्कन्दितानां भक्षणापहरणपलायनानां च अर्थाद् भक्षयित्वापहृत्य वा पलायितानां च, अंगुष्ठसन्दंशम् दापयेदित्येव। उक्त एव विषये दण्डविकल्पमाह—वेतनेष्विति। कर्मकराणां तन्तुवायादीनाम्, अपराधतः अपराधानुसारेण, वेतनेषु च दण्डः नावश्यं देहदण्डो यथोक्तः किन्तु तत्स्थाने यथापराधं वेतनदण्डोऽपि केवल इष्यत इत्यभिप्रायः। एवञ्च विकल्पपर्यवसित इह चकारो द्रष्टव्यः।

सूत्रवल्कमयी रज्जूः वरत्रा वैत्रवैणवीः ।
सान्नाह्या बन्धनीयाश्च यानयुग्यस्य कारयेत् ॥१८॥

इत्यध्यक्षप्रचारे सूत्राध्यक्षस्त्रयोविंशोऽध्यायः,
आदितश्चतुश्चत्वारिंशः ।

श्रीमूला

रज्ज्वित्यादि । रज्जुवर्तकैः रज्जुकल्पनजीविभि, चर्मकारैश्च चर्ममयाश्वोपकरणादिकारिभिश्च, वर्मकारैरिति पाठे सूत्रकंकटादिकारिभिः, स्वयं संसृज्येत संख्यं कुर्यात् रज्ज्वादिपालनार्थं तत्कर्मानुष्ठापनार्थं च । भाण्डानि च उपकरणानि च, वरत्रादीनि, गवादिबन्धनीप्रभृतीनि, वर्तयेत् कारयेत् । भाण्डादीनीति तु पाठो न सुष्ठु ।

चाणक्यटीका

अङ्गुष्ठसन्दंशमिति । अङ्गुष्ठाभ्यां सन्दंशं[1] दापयेत् कर्मप्रतिपत्तेति । तथा भक्षितानां कार्पासादीनाम् अपहृतानाम् । अवस्कन्दितानां विनाशितानां (तैलमूपेत्कारादिना वामितितानां ?)[2] । वेतनेपु प्रदत्तेपु । कर्मकराणामिति । कर्तकानां वापकानां वा अपराधानुरूपो दण्डः ।

रज्जुकर्मान्तानाह—रज्जुवर्तकैः कटकशृङ्खलाप्रतिबन्धार्थम् । चर्मकारैः कर्मकारैश्च वर्धक्यादिभिः काष्ठपाषाणादियोजनार्थं (सं) सृज्येत, भाण्डादीनि रज्जुविशेषान् कारयेद् वर्तयेदित्यर्थः ।

प्रतिपदपञ्चिका

गृहीत्वा वेतनं कर्म कुर्वन्त्या अङ्गुष्ठसन्दंशंदक्षिणहस्तांगुष्ठं मध्यमाङ्गुल्यग्रं च दापयेत् प्रणयेत् । भक्षयित्वा अपहृत्य वा सूत्रादिकमवस्कन्दितानां प्रपलायमानानां च पूर्वोक्त एव दण्डः । वेतनेषु चेति, भक्षितेष्वपहृतेपु वा कर्मकराणां कुविन्दादीनां, चकारोऽत्र भिन्नक्रमः सम्बध्यते । अवस्कन्दितानामपराधतोऽपराधानुरूपो दण्डः कल्पनीयः । रज्जुवर्तकैः गुणादिफलदैश्च पालैरश्वादिपालैर्वा- तदुपजीविभिर्वर्मकारैः सूत्रकण्टककर्तृभिः कर्मान्तिकारैश्च सीताध्यक्षादिभिः तदुपयोगिरज्ज्वादिपालनार्थमितरैस्तदनुष्ठानार्थं च संसृज्येत । भाण्डानि चोपस्करजातानि वस्त्रादि निवर्तयेत् पालयेत् ।

श्रीमूला

अध्यायान्ते श्लोकमाह—सूत्रेत्यादि । सूत्रवल्कलमयीः कार्पासादितन्तुमयीः

---

१. तर्जन्यङ्गुष्ठाभ्यां सन्दंशम् अतीक्ष्णां व्यथां जनयेदित्यर्थः । "दक्षिणाङ्गुष्ठतन्मध्यमाङ्गुल्यग्रयोश्छेदः" इति अनन्तशयनमुद्रिता कौटलीयव्याख्या अन्याय्या ।

२. 'तैलमूपिकोत्कर्तनादिना अवमर्दितानाम्' इति पाठः स्यात् ।

श्रीमूला

शणादिवल्कमयीश्च, रज्जूः, वैत्रवैणवीर्वरत्राः वेत्रमयीर्वेणुमयीश्च वरत्राः, कोदृशोः, सान्नाह्याः सन्नाहोपयोगिनीः, यानयुग्यस्य वन्धनीयाश्च रथादेरश्वादेश्च वन्धनयोग्याश्च, कारयेत् ।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे त्रयोविंशोऽध्यायः सूत्राध्यक्षः, आदितश्चतुश्चत्वारिंशः ॥

चाणक्यटीका

सूत्रवल्कमयीति । सूत्रवल्कमयी रज्जूः कक्ष्याग्रैवेयाद्यर्थाः । वरत्राः चर्म वर्ध्रीनिर्वृत्ताः । वैत्रवैणवीरिति । वेत्रं[1] च वेणुश्चेति, "तस्येदम्" इति (वर्ण ? अण्) । सान्नाह्याः सन्नाह्यन्ते आभिरिति सन्नहनाद्दताः । वन्धनीयाः वन्धनाय हिताः । यानस्य रथादेः । युग्यस्यर (था ? श्वा)दें: कारयेदिति ।

॥ इति सूत्राध्यक्षः त्रयोविंशं प्रकरणं समाप्तम् ॥
॥ त्रयोविंशश्चाध्यायः ॥

प्रतिपदपञ्चिका

श्लोकमाह—सूत्रवल्कमयोरित्यादि, सूत्रमयीः वल्कमयीः शणादिवल्कमयीश्च । रज्जूः कारयेत् । वरत्राख्या वेत्रमयीः वेणुमयीश्च । वेत्रग्रहणेन सर्वेषां वल्लीवर्गपरीतानां ग्रहणम् सन्नाह्याः सन्नाहोपयोगिनीः वन्धनीया वन्धनार्थाः । यानस्य रथशकटादेः युग्यस्य अश्वादेः कारयेदिति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायम्
अध्यक्षप्रचारिके द्वितीयेऽधिकरणे त्रयोविंशोऽध्यायः ।
सूत्राध्यक्षः, आदितश्चतुश्चत्वारिंशोऽध्यायः ॥

---

१. "वरेत्रां वैणवी इति तु चाणक्यस्तन्त्राध्यक्षे उपचारादाख्यत्" इति अमरव्याख्याने क्षीरस्वामी । (२.१०.३२) तन्त्राध्यक्षशव्देनात्र सूत्राध्यक्षोऽभिप्रेतः । वस्तुतस्तु वरत्रां वैणवीं वा प्राधान्येनैवाह चाणक्यः । औपचारिकत्वोक्तिस्तु परोक्षचाणक्यग्रन्थस्येति वेदितव्यम् ।

षट्त्रिंशं प्रकरणम्

चतुर्विंशोऽध्यायः ।

सीताऽध्यक्षः ।

[बीजसंग्रहणतद्वापने]

सीताध्यक्षः कृषितन्त्रगुल्मशुल्ववृक्षायुर्वेदज्ञः तज्ज्ञसखो वा सर्वधान्यपुष्पफलशाककन्दमूलवाल्लिक्यक्षौमकार्पासबीजानि यथाकालं गृह्णीयात् । बहुहलपरिकृष्टायां स्वभूमौ दासकर्मकरदण्डप्रतिकर्तृभिर्वापयेत् ।

श्रीमूला

सीताध्यक्षः इति सूत्रम् । कृषिकर्माध्यक्ष इति सूत्रार्थः । 'सीताध्यक्षोपनीतः सस्यवर्णः सीता' इत्युक्तं कोष्ठागाराध्यक्षे । तदध्यक्षस्तद्व्यापारश्चाधुनोच्यते ।

सीताध्यक्ष इति । सीताध्यक्षः, कृषितन्त्रशुल्ववृक्षायुर्वेदज्ञः कृषितन्त्रं वृद्धपराशरादिप्रणीतं शुल्वशास्त्रं भूमिसिराज्ञानशास्त्रं वृक्षायुर्वेद अग्निवेश्यादिप्रणीतः तज्ज्ञः, तज्ज्ञसखो वा, सर्वधान्यादीनि धान्यादीनि सर्वविधस्वस्वावान्तरभेदयुक्तानि, यथाकालं सङ्गृह्णीयात् । तत्र वाल्लिक्यं कूष्माण्डादिवल्लीफलम् । शेषं प्रसिद्धम् ।

बहुहलपरिकृष्टायामिति । बहुसीरविलिखितायां, स्वभूमौ तत्तद्धान्याद्यनुगुणायां भूमौ, दासादिभिः वापयेत्, दास उदरदासक्रीतदासादिः कर्मकरः वेतनार्थं कर्मकारी दण्डप्रतिकर्ता कर्मणा दण्डनिष्क्रेता ।

चाणक्यटीका

पूर्ववत् शुल्काध्यक्षापेक्षमेवेदं प्रकरणं सी (तत्यवभिष्टोनतो ? ताध्यक्षोपनीतं) कर्मेति सीताध्यक्षोऽभिधीयते । सीताध्यक्ष इति समाहर्त्रा प्रयुक्तः कृष्यध्यक्षः । (कृषिशास्त्रं पाराशरम् । शुल्वशास्त्रं भूम्युदकस्वरूपपरिज्ञानार्थम् । वृक्षायुर्वेदं च यो जानाति । यो वा तज्ज्ञैः सदा संसृज्यते सर्वधान्यानां पूर्वापरमध्यमावापानाम् । पुष्पफलशाकमूलकन्दानाम् । वाल्लिक्यस्य कूष्माण्डकादेः । क्षौमकार्पासयोश्च बीजानि यथाकालं सङ्गृह्णीयात् ।

ततो बीजानि बहुवारं परिकृष्टायां (मितं न ?) कृष्टाया(ष्प ?)मित्यर्थः । स्वभूमौ यद्बीजयोग्या या भूमिः तत्तस्याम् । दासकर्मकरदण्डप्रतिकर्तृभिर्वापयेत् ।

प्रतिपदपञ्चिका

सीताध्यक्ष इति सूत्रम् । सीता राजकृषिः, तस्यामधिकृतः सोताध्यक्ष इति सूत्रार्थः । सम्बन्धस्तु सीताध्यक्षोपनीतस्तस्सस्यवर्णः सीतेत्युक्तम् । तदध्यक्षस्तद्व्या-

[सकाले उपकरणनिर्मापणम्, सस्यानुकूलवृष्टिप्रमाणं च]

कर्षणयन्त्रोपकरणबलीवर्दैश्चैषामसङ्गं कारयेत् । कारुभिश्च कर्मार-कुट्टाकमेदकरज्जुवर्तकसर्पग्राहादिभिश्च । तेषां कर्मफलविनिपाते तत्फल-हानं दण्डः ।

प्रतिपदपञ्चिका

पारवानुक्तः । सोऽभिधीयत इति, तदाह—सीताध्यक्षइति । कृषितन्त्राद्यभिज्ञस्तज्ज्ञ-सखो वा सर्वथा सस्यादीन् विजानीयात् यथा कालं सङ्गृह्णीयात् । कृषितन्त्रं वृद्धपराशरादिप्रणीतं कृषिशास्त्रं सीराज्ञानं वृक्षायुर्वेदोऽग्निवेश्यादिप्रणीतः, सर्व-शब्दः प्रत्येकम्, धान्यादयः प्रदेशान्तरे कृतव्याख्याः, बहुफलकृष्टायामिति, बहुफल-लिखितायां स्वभूमौ या यस्य व्रीह्यादेः प्रशस्ता भूमिः तस्यां दासादिभिर्वा दापयेत् । दासकर्मकरौ प्रतीतौ ।

श्रीमूला

कर्षणेत्यादि । कर्षणयन्त्राणि हलदण्डयुगादीनि उपकरणानि रज्जुदात्रादीनि परिकर्मकरा जनाश्च बलीवर्दाः प्रसिद्धा एतैर्निर्दिष्टैः, एषां दासादीनाम्, असङ्गं क्रियानुपरोधं, कारयेत् । कारुभिश्च, कर्मारादिभिः, असंगं कारयेत्, तत्र कर्मा-रोऽयस्कारः कुट्टाकस्तक्षा मेदकः खनकः हिंसकत्वात्, भेदकपाठो वा, रज्जुवर्तकः रज्जुकल्पकः सर्पग्राहः व्यालग्राही ।

तेषामिति । कारूणां, कर्मफलविनिपाते तद्दोषजनिते कृषिफलविनाशे, तत्फल-हानं दण्डः हापितफलपरिमाणो दण्डः ।

चाणक्यटीका

एषां च दासादीनाम् । कर्षणयन्त्रैः लाङ्गलादिभिः । उपकरणैः यथाप्रतीतादिभिः । बलीवर्दैश्च असङ्गम् अ(वि)घातं कारयेत् । कारुभिश्च, किंभूतैः कर्मारैः फला-द्यर्थम्[1] । कुट्टकैः तक्षभिः हलाद्यर्थम् । [2]मेदकैर्वरुटैः शूपाद्यर्थम् । रज्जुवर्तकैः हलादि-

---

१. फलम् अयस्कारनिष्पाद्यं हलमुखादीत्यर्थः ।

२. वेणुकारवो वरटा इति दुर्गनिवेशे चाणक्यटीका (२.४; पो० ९८), वर्ध्यादिकृदिति भट्टस्वामी ।

"वरुटः ' ''''ग्रात्याज्जातेऽथो शाकटायनः ।
निरुच्यौष्ठ्य(व ? प)कारादिमेनं तस्यार्थमाह हि ।
मेदं, मेदो हि वैदाह्यान्निपाद्यां जात उच्यते ।"

इति केशवस्वामी च । अत्र शाकटायनस्य मेदकशब्दनिरुक्तिप्रकारश्चेत्थं भाति—पवयोरभेदाद् वरुटः परुटः, तस्यैव परुषः, परुषकश्च ईषद्भेदाः पर्यायाः । परुषक. कौटल्येन फलाम्लवर्गे पठितः सुरासारो मेदोजनकत्वान्मेदः मेदकश्चेति ।

षोडशद्रोणं जाङ्गलानां वर्षप्रमाणम्, अध्यर्धम् आनूपनाम् । देशवापानाम्—अर्धत्रयोदश अश्मकानाम्, त्रयोविंशतिरवन्तीनाम्, अमितमपरान्तानां, हैमन्यानां च कुल्यावापानां च कालतः ।

चाणक्यटीका

वन्धनार्थम् । सर्वग्राहैः आहितुण्डिकैः । आदिशब्दात् एवंप्रकारैश्च गोपजातीयः स्वव्यापारोपकारिभिरासङ्गं कारयेत् ।

तेषां कारूणां कर्मफलस्य विनिपाते यद्दोषात् फलहानं यज्जातं तावद् दण्डः ।

प्रतिपदपञ्चिका

दण्डप्रतिकर्ता कर्मणा दण्डस्य प्रवेशयिता कर्षणयन्त्रैः खलखनमित्यादिभिः उपकरणैः, रज्जुकुठारदत्रादिभिः कर्मकरैश्च गोपालादिभिः येषां प्रागुक्तदासादिकृषीवलानामसङ्गं कर्म स्वविधानं कारयेत् । कारुभिश्च कर्मकरादिरसङ्गं कारयेत् इति । तत्र कर्मकारो लोहकारः कुट्टकस्तक्षा मेदको रन्ध्रादिकृत् । रज्जुवर्तकश्च रज्जुकल्पकः सर्पग्राहः शावरादिः, आदिग्रहणं व्यथनावितादिग्रहणार्थम्, तेषां कारूणां कर्मफलविनिपात इति विलम्बादिकृते कृषिकर्मफलविनाशे तत्फलहानमिति यावती तस्य फलस्य हानिः कृता तज्ज्ञैस्सह निरूप्य तावान् दण्डः कर्तव्यः ।

श्रीमूला

भूमिविशेषेषु सस्यनिष्पत्तिनिमित्तं वृष्टिप्रमाणमाह—षोडशद्रोणं जागंलानां वर्षप्रमाणमिति । हस्तप्रमाणमुखयुक्ते वृष्टिमानार्थनिर्मिते कुण्डे मेघाभिवृष्टोदकासारपरिपूरिते यदि तद्गतं जलं षोडशद्रोणात्मकमुपलभ्येत, तदा तावद् वर्षप्रमाणं मरुप्रायाणां भूभागानां ससस्यनिष्पादनपर्याप्तं भवतीत्यर्थः । अध्यर्धं चतुर्विंशतिद्रोणम्, आनूपानां जलप्रायाणाम् । इदं जांगलानूपभेदेन वर्षप्रमाणमुक्तम् । देशभेदेन तदाह—देशवापानामिति । वर्षप्रमाणं वक्ष्यत इति शेषः । अर्धत्रयोदश अर्धाधिकास्त्रयोदश वर्षप्रमाणद्रोणानि, अश्मकानाम् आरट्टानाम् । त्रयोविंशतिः द्रोणानि । अवन्तीनां मालवानाम् । अमितम् असंख्यातं वर्षप्रमाणम्, अपरान्तानां पाश्चात्यदेशस्य । हैमन्यानां च हिमाम्बुनिष्पाद्यसस्यानां हिमवत्प्रदेशानां च, हैम्यानामिति पाठेऽप्ययमेवार्थः । कुल्यावापानां च कुल्योपनेयजलमातृकप्रदेशानां च, कालतः स्वस्वकालानुसारेण सस्यसम्पत्तिः, न तु वर्षप्रमाणापेक्षयेत्यर्थः ।

चाणक्यटीका

षोडशद्रोणमिति यदुक्तम् 'कोष्ठागारे'[1] वर्षमानम् अरत्निमुखं कुण्डम्" इति स एव द्रोणप्रमाणत्वाद् द्रोणः । ते षोडशद्रोणाः वर्षोदकेन यदा पूर्यन्ते तज्जाङ्गलानाम्

---

१. सन्निधातृनिचयकर्मणि । (२.५; पी० १०३)

[उत्तमसंवत्सरस्य लक्षणानि, ग्रहस्थितिभ्योऽनुमेया अंशाश्च]

वर्षत्रिभागः पूर्वपश्चिममासयोः, द्वौ त्रिभागौ मध्यमयोः सुषमारूपम् । तस्योपलब्धिः बृहस्पतेः स्थानगमनगर्भाधानेभ्यः, शुक्रोदयास्तमयचारेभ्यः, सूर्यस्य प्रकृतिवैकृताच्च । सूर्याद् बीजसिद्धिः बृहस्पतेः सस्यानां स्तम्बकरिता, शुक्राद् वृष्टिरिति ॥

चाणक्यटीका

उदारकादीनां सस्यानां प्रसाधकस्य वर्षस्य मानम् । अध्यर्धमानूपानां चतुर्विंशतिद्रोणमानूपानां शाल्यादिसस्यानाम् । साधारणसस्यानां मध्यमं वर्षमानमित्यर्थोक्तम् । एवं जाङ्गलानूपसस्यानाम् (मानवर्षणानाम् इति ?) वा (त ?) पनमुक्तम् । इदानीं देशविशेषापेक्षयोच्यते देशवापानां तु वर्षमानं वक्ष्यत इति शेषः । अर्धत्रयोदशद्रोणम् अश्मकानामिति । (वातवनगराधिष्ठानिवापसस्यानां निष्कासनम् ?)[1] ।.....

॥ इति सीताध्यक्षश्चतुर्विंशोऽध्यायः ॥

प्रतिपदपञ्चिका

प्रमाणमाह—षोडशद्रोणमित्यादि, कोष्ठागारे वर्षमानमरत्निमुखं(?) कुण्डं स्थापयेदित्युक्तम्, तस्यायमुपयोगः । तेन पर्जन्यजलधारापूरितेन वर्षोदकद्रोणपरिच्छेदमजाङ्गलानां मरुप्रायाणां षोडशद्रोणप्रमाणं वर्षमिति निरुदकमिदमेवाध्यर्धं चतुर्विंशतिद्रोणमानूपानां जलप्रायाणाम् ।

इत्येवं जाङ्गलानूपभेदेन वर्षप्रमाणमभिधाय देशभेदेनाह—देशावापानां द्वितीयां(?), वक्ष्यत इति वाक्यशेषः । अर्धत्रयोदशद्रोणमश्मकानां महाराष्ट्राणां, त्रयोविंशतिद्रोणमवन्तीनामपरान्तानां. तासाममितमसङ्ख्यातमपरान्तानां कोङ्कणविषयाणां हैम्यानां हिमवत्प्रदेशानां च कुल्यावापानां च सारणीपेयतोयानां कालतः स्वर्तुतस्सस्यम्, न वर्षोदकप्रमाणतः ।

श्रीमूला

शोभनसंवत्सरस्य रूपमाह—वर्षत्रिभाग इत्यादि । वर्षत्रिभागः वर्षस्य तत्तद्देशोक्तवृष्टिप्रमाणस्य त्रिधा विभक्तस्य एकस्त्रिभागः पूर्वपश्चिममासयोः श्रावणप्रोष्ठपदाश्वयुजकार्तिकाख्यमासचतुष्टये प्रथमचरमयोः श्रावणकार्तिकयोः भवति । शेषौ द्वौ त्रिभागौ, मध्यमयोः प्रोष्ठपदाश्वयुजयोः, भवतः । सुषमारूपं सुषमायाः शोभनस्य संवत्सरस्य रूपं भवति, अर्थाद् यथोक्तं भागशो वर्षणम् ।

---

१. इतः परं सीताध्यक्षशेषः, तदनुस्यूताः सुराद्यः सहाध्यक्षाः, हस्तिप्रचारस्य द्वात्रिंशाध्यायस्य आदिमैकदेशश्च मातृकायां लुप्ताः ।

श्रीमूला

भविष्यतः सुषमारूपस्य ज्ञापकमाह—तस्येत्यादि। तस्य सुषमारूपस्य, उपलब्धिरनुमितिः, बृहस्पतेः स्थानादित्रिकात् शुक्रोदयादित्रिकात् सूर्यस्य प्रकृति-वैकृताच्च भवति। तत्र स्थानं मेषादिराशिस्थितिः। गमनं मेषादेर्वृषभादिसङ्क्रमः। तयोर्वृष्ट्यादिफलहेतुत्वं ज्योतिश्शास्त्रप्रसिद्धम्। गर्भाधानं मार्गशीर्षादिषु षट्सु मासेषु तुषारादिदर्शनम्। तदुक्तम्—

"मार्गशिराः सतुषारः सहिमः पौषः समारुतो माघः।
साभ्रः फाल्गुनमासः सपवनवृष्टिश्च यदि चैत्रः॥
तडिदभ्रानिलविद्युज्जलवृषितो भवति यदि च वैशाखः।
सम्यग् वर्षति मघवान् धारणदिवसेषु वर्षति चेत्॥"

धारणदिवसा वैशाखकृष्णप्रतिपादयश्चत्वार इति व्याख्यातारः। शुक्रस्योदयास्तमयौ प्रसिद्धौ। चारः आषाढमासपञ्चम्यादिषु नवसु तिथिषु सञ्चारः। सूर्यस्य प्रकृतिवैकृतं स्वभावान्यथाभावः सपरिवेषत्वादि। इत्थं सुषमारूपोपलब्धिकरणं ग्रहत्रयचरित-मुक्तम्।

तत्र विशेषमाह—सूर्यादिति। सूर्यात् प्रकृतिस्थाद् विकृताद् वा, बीजसिद्धिः बीजस्य सस्यफलस्य सिद्धिर्निष्पत्तिः, अनुमीयते भवति न वेति। बृहस्पतेः स्थानादि-युक्तात्, सस्यानां स्तम्बकरिता स्तम्बपरिबृंहणम्, अनुमीयते भवति न वेति। शुक्राद् उदयादियुक्ताद्, वृष्टिः अनुमीयते भवति न वेति।

प्रतिपदपञ्चिका

पूर्वोक्तवर्षप्रमाणभागेन सुषमारूपमाह—वर्षत्रिभाग इत्यादि, यस्य देशस्य यावत्पूर्णवर्षं तत्त्रेधा विभज्य पूर्वपश्चिममानयोः श्रावणकार्तिकयोरेकत्रिभागं वर्षति, मध्यमयोः प्रोष्ठपदाश्वयुजयोः द्वौ त्रिभागौ च यदि वर्षति, तदा सुषमारूपं शोभनं संवत्सररूपं भवति। तस्य सुषमारूपस्योपलब्धिर्भविष्यति।

परिज्ञानकर्म बृहस्पतिस्थानादित्रयात् शुक्रोदयादित्रयात् सूर्यप्रकृतिवैकृताच्च तत्र स्थानं मेषादिराशिगमनं राशेः राश्यन्तरसङ्क्रान्तिः क्रान्तिः, तदुभयं वृष्ट्यादि, प्रसिद्ध-फलविपाकज्योतिश्शास्त्रादवगन्तव्यः। मार्गशीर्षादिषु षट्सु मासेषु तुलाराशिदर्शनम्। तथा चोक्तम्—

मार्गशिरास्सतुषारस्सहिमः पौषस्समारुतो माघः।
साभ्रः फाल्गुनमासः सपवनवृष्टिश्च यदि चैत्रः॥
तडिदभ्रानिलविद्युज्जलवृषितो भवति यदि च वैशाखः।
सम्यग्वर्षति मघवान् धारणदिवसेषु वर्षति चेत्॥

धारणदिवसाश्च वैशाखबहुलप्रतिपदादयश्चत्वारः शुक्रस्योदयास्तमयाभ्यां पञ्चम्यादिषु चाराच्च। आषाढपञ्चम्यादिषु नवसु तिथिषु सूर्यस्य प्रकृतिः स्वभावः,

[सस्यनिष्पत्त्यनुकूलवृष्टिक्रमः]

त्रयः साप्ताहिका मेघाः अशीतिः कणशीकराः।
षष्टिरातपमेघानामेषा वृष्टिः समाहिता ॥९९॥
वातमातपयोगं च विभजन् यत्र वर्षति।
त्रीन् कर्षकांश्च जनयन् तत्र सस्यागमो ध्रुवः ॥१००

ततः प्रभूतोदकमल्पोदकं वा सस्यं वापयेत्।

प्रतिपदपञ्चिका

तद्वैक्तं परिवेषोपरागमेघावृतत्वादि चेति सुषमादिरूपेण उपलब्धिरिति। एवं सुषमारूपलिङ्गज्ञानं ग्रहप्रकृतित्रयमुक्तम्।

अत्र विशेषमाह—सूर्याद्वीजसिद्धिरित्यादि, सूर्यादविपरीतस्वभावाद्विकृताद्वा बीजसिद्धिः फलनिष्पत्तिः स्यान्न वेति अनुमीयते। बृहस्पतेस्तिष्ठतः सङ्क्रामतो वा सस्यानां स्तम्बकरिता, तद्विपर्ययपरिज्ञानं शुक्रादुद्युतोऽस्तंयतः चारतश्च वृष्टेस्सिद्धिरसिद्धिर्वानुमीयते।

श्रीमूला

शोभनवृष्टिक्रमं श्लोकाभ्यामाह—त्रय इत्यादि। त्रयो मेघाः, साप्ताहिकाः सप्ताहोरात्राविच्छिन्नवृष्टिकारिणः। अशीतिर्मेघाः, कणशीकराः सान्द्रविन्दुर्वर्षिणः। आतपमेघानाम् आतपयुक्तानां मेघानां, वृष्टिः। एषा इत्थं परिसंख्यातमेघा, वृष्टिः, समा अन्यूनानतिरिक्ता, अत एव हिता लोकश्रेयस्करी च ॥

वातमिति। वातम् आतपयोगं च विभजन् तदुभयासंकरेण तिष्ठन्, त्रीन् कर्षकान् जनयन् तिसृभिर्वृष्टिभिर्ज्यैष्ठादिवापकालेषु तिस्रः कृषीः प्रवर्तयंश्च, त्रीन् करीषान् जनयन्निति पाठे दोहलाभार्थानां शुष्कगोमयानां त्रीन् सङ्ग्रहावसरान् विच्छिन्नवर्षणेनोत्पादयन्नित्यर्थः, अर्थात् पर्जन्यः, यत्र देशे, वर्षति, तत्र सस्यागमो ध्रुवः सस्यनिष्पत्तौ सन्देहो नास्ति ॥

तत इति। ततः यथोक्तवृष्टिप्रमाणादिपरिज्ञानानन्तरं, प्रभूतोदकं प्रचुरजलनिष्पाद्यम्, अल्पोदकं वा अल्पजलनिष्पाद्यं वा, सस्यं वापयेत्, अर्थात् प्रभूतवृष्टावल्पवृष्टौ वा देशे यथाक्रमम्।

प्रतिपदपञ्चिका

सुषमावृष्टि क्रममाह—त्रयस्साप्ताहिका इति।

त्रयो मेघास्साप्ताहिकाः सप्तरात्रमनवरतवर्षाकराः अशीतिः कणशीकराः अविरलविन्दुवर्षाः। षष्टिरातपमेघानामातपसहितानां नीलानां मेघानामेषा वृष्टिस्समा अन्यूनानधिका सर्वसस्यानां निष्पादकत्वाद्धिता श्रेयस्करी वा तमातपयोगं च विभज्य स्थित्वा

[सस्यभेदेन तद्वापकालभेदः]

शालिव्रीहिकोद्रवतिलप्रियङ्गुदारकवरकाः पूर्ववापाः। मुद्गमाषशैम्ब्याः मध्यवापाः, कुसुम्भमसूरकुलुत्थयवगोधूमकलायातसीसर्षपाः पश्चाद्वापाः। यथर्तुवशेन वा बीजवापाः ॥

[अकृष्टक्षेत्रकर्षणव्यवस्थाः]

वापातिरिक्तम् अर्धसीतिकाः कुर्युः। स्ववीर्योपजीविनो वा चतुर्थपञ्चभागिकाः यथेष्टमनवसितभागं दद्युरन्यत्र कृच्छ्रेभ्यः।

प्रतिपदपञ्चिका

यत्र देशे काले वा वर्षति देवः, त्रीन् कर्षकानिति। त्रिभिर्वर्षैः ज्येष्ठादिवापेषु कर्षकान् जनयन् कर्षकैर्वापयन् तत्र सस्यागमः सस्यनिष्पत्तिः ध्रुवो निश्चितः। तत इति, वर्षप्रमाणाद्यवधारणात् महावर्षे देशे काले वा प्रभूतोदकजन्यं वापयेत्, अल्पवर्षे त्वल्पोदकं जन्यं वा।

श्रीमूला

सस्येषु विशेषमाह—शालीत्यादि। शाल्यादयः सप्त, पूर्ववापाः पूर्वमेव वपनीयाः। मुद्गमाषशैम्ब्याः मध्यवापाः, कुसुम्भादयोऽष्टौ पश्चाद्वापाः पश्चिमकालवपनीयाः।

यथर्तुवशेन वा बीजवापा इति। य एते शाल्यादिबीजवापा उक्ताः अनुक्ताश्चान्ये, ते सर्वे तत्तद्बीजसम्यङ्निष्पत्तियोगकालानुरोधेन कर्तव्याः।

वापातिरिक्तमिति। कृतवापक्षेत्रातिरक्तं क्षेत्रम्, अर्धसीतिकाः कृषिफलार्धभागस्वीकरणसंविदा कृषन्तः बीजबलीवर्दादिसम्पन्नाः ग्राम्यकुटुम्बिनः, कुर्युः, साधयेयुः कर्षणबीजवपनादिना। स्ववीर्येत्यादि। स्ववीर्योपजीविनो वा बीजादिषु स्वामिसम्बन्धिषु सत्सु स्वकायायासमात्रं क्षेत्रे कुर्वाणा वा कर्मकराः, चतुर्थपञ्चभागिकाः निष्पन्नस्य फलस्य चतुर्थभागं पञ्चमभागं वा लभन्ते। यथेष्टमिति। अनवसितभागम् अनवसितस्य अभ्युपेत्याकृष्टस्य क्षेत्रस्य सस्यभागं, यथेष्टं स्वामीच्छानतिक्रमेण, दद्युः, अर्थादर्धसीतिकादयः। तत्रापवादः—अन्यत्र कृच्छ्रेभ्य इति। कर्षणविघातकविपदुपनिपातव्यतिरेके।

प्रतिपदपञ्चिका

तत्र विशेषः। शालिव्रीह्यादिः शाल्यादयस्सप्त पूर्ववापाः प्रथमं वपनीयाः, मुद्गादयः तत्र मध्यमवापाः, कुसुम्भादयोऽष्टौ पश्चाद्वापाः। त्रयो त्रिवर्गाः प्रतीताः।

त्रिष्वपि वर्गेषु अपवादमाह—तद्वातिरिक्तेति।

यथर्तुवशेन वेति। येषां वा बीजानां यस्मिन् ऋतावुप्तानां सम्यङ्निष्पत्तिर्भवति, तेषामुक्तानाम् अनुक्तानां वा बीजानां तदावापः कार्यः।

[सस्योपयोगिजलसौकर्यानुगुण्येन राजग्राह्यभागव्यवस्था]

स्वसेतुभ्यः हस्तप्रावर्तिममुदकभागं पञ्चमं दद्युः, स्कन्धप्रावर्तिमं चतुर्थम्, स्रोतोयन्त्रप्रावर्तिमं च तृतीयम्; चतुर्थं नदीसरस्तटाककूपोद्घाटम् ।

प्रतिपदपञ्चिका

वीजग्रहणानुक्त्योपसंहरति—वापातिरिक्तमिति, प्रभूतत्वात्कृष्टक्षेत्रमशक्यं वप्तुम् । तदर्धसीतिकाः अर्धेन भागेन कृषन्तो ग्राम्यकुटुम्बिनः कुर्युः वपेयुः । करोति-ग्रहणादकृष्टं च कृषेयुः । यदा तु वीजवलीवर्दादिकमस्ति न कर्मकरः, तास्ववीर्योपजीविनः वीजाद्यभावेन कायक्लेशमात्रोपजीविनः चतुर्थेन पञ्चमेन वा वीजभक्तादि व्ययविशुद्धेन वपेयुः । यथेष्टमिति, यदा अर्धसीतिका स्ववीर्योपजीविनो वा अभ्युपगम्य प्रमादान्न भवन्ति, तदा यथेष्टं यथाभिप्रेतम् अनवसितभागमकृष्टसस्यभागं दद्युः । अन्यत्र कृच्छ्रेभ्य इति, बलीवर्दादिसादकरेभ्यः ।

श्रीमूला

स्वसेतुभ्य इति । स्वसेतुभ्यः स्वदेहायासस्वद्रव्यव्ययनिष्पादितेभ्यस्तटाकादिभ्यः, हस्तप्रावर्तिमं कुम्भादिजलपायनरूपहस्तप्रवृत्तिसाधितम्, उदकभागम् उदकार्थं फलभागम्, पञ्चमं, दद्युः राज्ञेऽर्पयेयुः, कृषीवलाः । स्कन्धप्रावर्तिमं स्कन्धवहप्रवर्तित-यन्त्रपायितजलनिष्पन्नम् उदकभागं, चतुर्थं दद्युः । स्रोतोयन्त्रप्रावर्तिमं सारणीपायित-जलनिष्पन्नं च उदकभागम्, तृतीयं दद्युः । उदककरश्चायं भूमिकरवद् द्रष्टव्यः, यतो राजा भूम्युदकयोरविशेषात् स्वामी । तदुक्तम्—

"राजा भूमेः पतिर्दृष्टः शास्त्रज्ञैरुदकस्य च ।
ताभ्यामन्यत्तु यद् द्रव्यं तत्र स्वाम्यं कुटुम्बिनाम् ॥" इति ।

स्वसेतुभ्योऽन्यत्र देयमाह—चतुर्थमिति । नदीसरस्तटाककूपोद्घाटम्, उद्घाटयते निस्सार्यते जलमनेनेत्युद्घाटोऽरघट्टकादियन्त्रं, लक्षणया त्विह तत्जनितग्रहणम् । नद्यादिचतुष्टयाद् यन्त्रविशेषपायितजलनिष्पन्नं, चतुर्थं भागं, दद्युः ।

प्रतिपदपञ्चिका

स्वसेतुभ्य इति । जानपदाः स्वयंकृततटाकादिभ्यो हस्तप्रावर्तिमं कुम्भादि-सेकनिष्पादितं च उदकभागम् उद्वर्तितं यन्त्रोदकसेकनिष्पादितं चतुर्थभागं दद्युः स्रोतो-यन्त्रप्रावर्तिमं कुल्यासेकनिष्पन्नं तृतीयं भागं दद्युः । उक्तं हि—

"राजा भूमेः पतिर्दृष्टः शास्त्रज्ञैरुदकस्य च ।
ताभ्यामन्यत्तु यद् द्रव्यं तत्र स्वाम्यं कुटुम्बिनाम् ॥" इति ।

[सस्यस्थापनस्य सिद्धजलप्रमाणानुगुणत्वम्, सस्यविभागश्च]

कर्मोदकप्रमाणेन कैदारं हैमनं ग्रैष्मिकं वा सस्यं स्थापयेत्। शाल्यादि ज्येष्ठम्, षण्डो मध्यमः, इक्षुः प्रत्यवरः, इक्षवो हि बह्वाबाधाः व्ययग्राहिणश्च।

[क्षेत्रसन्निवेशानुगुणानि सस्यादीनि]

फेनाघातो वल्लीफलानाम्, परीवाहान्ताः पिप्पलीमृद्वीकेक्षूणाम्, कूपपर्यन्ताः शाकमूलानाम्, हरणिपर्यन्ताः हरितकानाम्, पाल्यो लवानां गन्धभैषज्योशीरह्रीवेर (हीरवेर) पिण्डालुकादीनाम्। यथास्वं भूमिषु च स्थाल्याश्चानूप्याश्चौषधीः स्थापयेत्।

प्रतिपदपञ्चिका

चतुर्थं नद्यादिभ्य उद्घाटमरघट्टादियन्त्रं सञ्जातं भागं दद्यात्। नद्यादयः प्रतीताः। इह (वसाह च स्या?)नद्यादीनामप्यरघट्टयन्त्रग्रहणम्। ननु पूर्वत्र स्वसेतुभ्योऽपि स्कन्धप्रावर्तिमे चतुर्भाग एव उदकभागोऽभिहितः तदयुक्तमिति चेत् तन्न, ते हि तेषां नद्यादयस्तु भार्या इत्यदोषः।

श्रीमूला

कर्मोदकप्रमाणेनेति। कृष्यपेक्षितजलप्राचुर्याल्पत्वानुरोधेन, कैदारं शाल्यादिक्षेत्रवाप्यं, हैमनं हेमन्तकालवाप्यं, ग्रैष्मिकं ग्रैष्मकालवाप्यं वा सस्यं, स्थापयेत् वापयेत्।

शाल्यादीत्यादि। शाल्यादिधान्यं, ज्येष्ठं श्रेष्ठं प्रधानाहारद्रव्यत्वादल्पव्ययायाससाध्यानल्पफलत्वाच्च। षण्डः कदल्यादिः, मध्यमः अल्पव्ययायाससाध्यफलत्वात्। इक्षुः प्रत्यवरः शाल्याद्यपेक्षया निकृष्टः। कुतः, हि यतः इक्षवः, बह्वाबाधाः मनुष्यमूषिकाद्युपद्रवबहुलाः व्ययग्राहिणश्च छेदनपीडनपचनादिबहुकर्मकरसापेक्षत्वात्।

अथ वापयोग्यभूमीराह—फेनाघात इति। फेनेनाहन्यत इति फेनाघातो जलपर्यन्तदेशः, वल्लीफलानां कूष्माण्डादीनाम्। परीवाहान्ताः जलोच्छ्वासपरिसरदेशाः, पिप्पलीमृद्वीकेक्षूणाम्। कूपपर्यन्ताः कूपपरिसरदेशाः, शाकमूलानाम्। हरणिपर्यन्ताः हरणिः कुल्या, सरस्तटाकादे रिक्तीभूत आर्द्रप्रदेश इति स्वामी, तस्याः पर्यन्ताः, हरितकानां यवसादीनाम्। पाल्यः क्षेत्रमध्यकृताः सेतवः, लवानां छिन्नानां गन्धादिपञ्चकप्रभृतीनां, गन्धो मांसीग्रन्थिपर्णकादिः भैषज्यं लशुनशतपुष्पादि उशीरं लामज्जं ह्रीवेरं वालाख्यं पिण्डालुकः रोमकन्दः इत्येतदादीनाम्। वापदेश इति सर्वत्र शेषः। यथास्वमिति। यथास्वं भूमिषु च स्वस्वयोग्यभूमिषु जलभूमिषु अनूपभूमिषु चेत्यर्थः, स्थाल्याश्च स्थलप्ररोहिणीश्च, अनूप्याश्च जलप्रायदेशप्ररोहिणीश्च, ओषधीः, स्थापयेत्।

[बीजसंस्काराः अङ्कुरितानां कीटाद्युपद्रवप्रतीकारश्च]

तुषारपायनमुष्णशोषणं चाऽऽसप्तरात्रादिति धान्यबीजानाम्, त्रिरात्रं पञ्चरात्रं वा कोशीधान्यानाम्, मधुघृतसूकरवसाभिः शकृद्युक्ताभिः काण्डबीजानां छेदलेपः, मधुघृतेन कन्दानाम्, अस्थिबीजानां शकृदालेपः शाखिनां गर्तदाहो गोऽस्थिशकृद्भिः काले दौहृदं च। प्ररूढांश्चाऽशुष्ककटुमत्स्यांश्च स्नुहिक्षीरेण पाययेत्।

कार्पाससारं निर्मोकं सर्पस्य च समाहरेत्।
न सर्पास्तत्र तिष्ठन्ति धूमो यत्रैष तिष्ठति ॥ १०१॥

प्रतिपदपञ्चिका

कर्मोदकप्रमाणेनेति। सेकार्थोदकानुरूपेण प्रभूते सलिले प्रभूतोदकनिष्पाद्यमल्पे त्वल्पोदकनिष्पाद्यं केदारं। वावस्थानं, हैमनं ग्रैष्मिकं वा वापयेत्। शाल्यादिकेदारो ज्येष्ठः अल्पव्ययप्रयाससाध्यमहोदयत्वादाहारद्रव्यप्राधान्याच्च षण्डः कदलीजीरकपिण्डारकादिमध्यमः, अल्पव्ययप्रयासाद्यलाभात्। इक्षुः केदारः, प्रत्यवरोऽधमः हालादिभ्यः। कस्मादित्याह—क्षवोऽभिभेदो बह्वाबाधा मूषिकशृगालशूकरमनुष्यादिप्रभूतोपद्रवा व्ययग्राहिणश्चाभीशूकशोषकच्छेदकपीडकपाचकादयः।

प्रभूतकर्मभरसाध्यत्वाद् वापभूमिमाह—फेनाघातो वल्लीफलानामित्यादि, फेनाघातः सलिलपर्यन्तो वल्लीफलानां कूष्माण्डकर्कटिकादीनां परीवाहान्तः तटाकाद्युच्छ्वासपर्यन्तः पिप्पलीमृद्वीकेक्षूणां प्रतीतानां कूपपर्यन्तः तत्समीपप्रदेशः शाकमूलकादीनां हरणीपर्यन्तस्तु तटाकादे रिक्तीभूत आर्द्रप्रदेशो हरिणो, तत्समीपः हरीतकादीनां हरिदवयवादीनां पाल्यः मूलः क्षौम्ववानां लूनानाम् इक्ष्वादीनां व इति। गन्धाः मांसीग्रन्थीवर्णिकादयः, भैषज्यं लशुनशष्पपुनादिविशेषम्। यथास्वं भूमिष्विति, स्थाल्यां स्थलभूमिषु आनूप्याश्चानूपभूमिषु उक्ताश्चानुक्ताश्च ओषधीः स्थापयेदिति।

श्रीमूला

बीजसंस्कारमाह—तुषारेत्यादि। तुषारपायनं रात्रौ तुषारे निवेशनम्, उष्णशोषणम् आतपे दिवा निवेशनं च, आ सप्तरात्रात् सप्तरात्रमभिव्याप्य कर्तव्यमिति शेषः। इति एष प्रकारो, धान्यबीजानाम्। त्रिरात्रं पञ्चरात्रं वा, कोशीधान्यानां मुद्गमाषादीनां तुषारपायनमुष्णशोषणं च। मधुघृतसूकरवसाभिः शकृद्युक्ताभिः माध्वीकसर्पिर्वराहकायस्नेहैर्गोमययुक्तैः, काण्डबीजानाम् इक्षुप्रभृतीनां, छेदलेपः छिन्नप्रदेशलेपनम्। मधुघृतेन, कन्दानां, छेदलेपः। अस्थिबीजानां कार्पासादिबीजानां, शकृदालेपः। शाखिनाम् आम्रपनसादिवृक्षाणां, गर्तदाहः तन्निवेशगर्ते तृणादिदहनं,

[आद्यबीजावापविधिः]

सर्वबीजानां तु प्रथमवापे सुवर्णोदकसंप्लुतां पूर्वमुष्टिं वापयेत्; अमुं च मन्त्रं ब्रूयात्—

———————

श्रीमूला

गोऽस्थिशकृद्भिः गवास्थिपुरीषैः, काले दौहृदं च पुष्पफलप्रसवार्हवयःप्राप्तौ दोहलं च कर्तव्यमिति शेषः।

कृमिकीटाद्युपघातप्रतीकारमाह—प्ररूढांश्चेति। प्ररूढांश्च अङ्कुरितत्रिपत्रित-मात्रांश्च पूर्वोक्तान् शाखिपर्यन्तान् अशुष्ककटुमत्स्यान् स्नुहिक्षीरेण पाययेत्, आर्द्रक्षुद्र-मत्स्यैः समन्तदुग्धाख्यौषधिक्षीरयुक्तैः सेचयेत्। चः समुच्चये।

सर्पप्रतीकारं श्लोकेनाह—कार्पासेत्यादि। कार्पाससारं कार्पासबीजस्य सारं, सर्पस्य निर्मोकं च कञ्चुकं च, समाहरेत् संमेल्य धूपयेत्। एष धूमः मिलितोभयधूपन-जनितो धूमः, यत्र तिष्ठति, तत्र सर्पाः न तिष्ठन्ति।

प्रतिपदपञ्चिका

बीजभावनामाह—तुषारपायनमित्यादि। तुषारपायनं नीहारभावनं रात्रौ च उष्णशोषणं उष्णभावनम् अह्ना। आसप्तरात्रादिति। धान्यबीजानां व्रीह्यादिधान्य-बीजानां त्रिरात्रं पञ्चरात्रं वा कोशीधान्यानां मुद्गाढकीप्रभृतीनां मधुघृतसूकरवसाभिः प्रतीताभिः सक्तुयुक्ताभिः गोमयसहिताभिः काण्डबीजानामिक्ष्वादीनां छेद लेपः मेद-प्रदेशस्य लेपनं मधुघृतेन मधुमिश्रेण कन्दानां सूरणादीनां लेपः अस्थिबीजानां कार्पा-सादिबीजानां गोमयलेपशाखिनां वृक्षाणां वाऽवगर्तस्यादाहो गोऽस्थिभिः गोमयैश्च काले दौहृदं वृक्षायुर्वेदोक्तं गर्भाधानं कर्तव्यमिति शेषः।

उपघातप्रतीकारमाह—प्ररुढांश्चेत्यादि, प्ररुढानङ्कुरितमात्रान् चकारात् द्विपत्र-चतुःपत्रांश्च अयं च सर्वेषां सामान्यकृमिकीटोपघातप्रतीकारः। कथमित्याह—अशुष्कानार्द्रान् कटुमत्स्यान् क्षुद्रमत्स्यान् स्नुहिकारं च प्रत्यादिना कुर्वीतेति, कर्प-प्रतीकारमाह—कार्पाससारं तत् बीजसारं सर्पनिर्मोकं च समाहृत्य धूमं कुर्यात्। एतेन सर्वोच्चाटनं भवति।

श्रीमूला

प्रथमवापे विशेषमाह—सर्वबीजानामिति। तुशब्दो विशेषे। सर्वबीजानां प्रथमवापे, सुवर्णोदकसंप्लुतां स्वर्णयुक्तजलकृतसंप्लवां पूर्वमुष्टिम्, प्रथमां बीजमुष्टिं वापयेत्। अमुं वक्ष्यमाणं च, मन्त्रं मन्त्रश्लोकं, ब्रूयात् वापयन्नुच्चारयेत्।

प्रजापतये काश्यपाय
देवाय च नमः सदा ।
सीता मे ऋध्यतां देवी
बीजेषु च धनेषु च ॥१०२॥

[कर्मकराणां वेतनादिः]

पण्डवाटगोपालकदासकर्मकरेभ्यो यथापुरुषपरिवापं भक्तं कुर्यात् । सपादपणिकं मासं दद्यात् । कर्मानुरूपं कारुभ्यो भक्तवेतनम् ।

[स्वयंपतितपुष्पफलादिविनियोगः]

प्रशीर्णं च पुष्पफलं देवकार्यार्थं, व्रीहियवमाग्रयणार्थं श्रोत्रियास्तपस्विनश्चाहरेयुः । राशिमूलमुञ्छवृत्तयः ।

श्रीमूला

प्रजापतय इत्यादि । देवाय पर्जन्याय । ऋध्यतां वर्धताम् । ऋध्यतेरात्मनेपदमार्षम् । आद्ययोः श्लोकपादयोर्विसन्धानमपि मन्त्रत्वकृतम् । 'प्रजापतेः काश्यपाय देवलाय नमः सदा' इति भाषापाठः । तत्र तु नम इत्येतदन्वयं परिकल्प्य प्रजापतेरिति षष्ठी सम्बन्धे समर्थनीया, 'नमः स्वस्ती'ति सूत्रे स्वस्त्यादिसाहचर्येणाव्ययस्यैव नमःशब्दस्य ग्रहणात् ।

पण्डवाटेत्यादि । पण्डवाटपालकेभ्यो गोपालकेभ्यो दासेभ्यः कर्मकरेभ्यश्च, यथापुरुषपरिवापं पुरुषपरिश्रमानुरूप्येण, भक्तं भोजनं, कुर्यात् कल्पयेत् । सपादपणिकं मासं पादाधिकपणयुक्तं मासजीवितं, दद्यात् । कर्मानुरूपं, कारुभ्यस्तक्षादिभ्यः, भक्तवेतनं भोजनं च दद्यादित्यनुकर्षः ।

प्रशीर्णं चेति । प्रशीर्णं वृक्षादेः स्वयं पतितं, पुष्पफलं पुष्पाणि फलानि च, देवकार्यार्थं देवपूजार्थम्, व्रीहियवं स्वयं पतितान् व्रीहीन् यवांश्च, आग्रयणार्थं नवसस्यार्थं, श्रोत्रियाः छन्दोऽध्यायिनः, तपस्विनः तापसाश्च, आहरेयुः गृह्णीयुः । राशिमूलं खलनिवेशितधान्यराश्यन्तिकगतं कणिशादि, उञ्छवृत्तयः धान्यकणादानजीविनः, आहरेयुरित्यनुषङ्गः ।

प्रतिपदपञ्चिका

प्रथमवापविधिमाह—सर्वबीजानामिति । प्रथमवापे वा प्रारम्भे सुवर्णोदकेन संप्लुतां प्रथमां मुष्टिं वापयेत् ।

वृत्तशीर्णं स्वयं पतितं पुष्पफलं देवकार्यार्थं व्रीहियवं चाग्रयणार्थं नवसस्येष्ट्यर्थं श्रोत्रिया वेदाध्यायिनः तपस्विनः, त एव तपोयुक्ताः हरेयुः । राशिमूलमुञ्छवृत्तय इति । क्षेत्रखलगतधान्यराशिमूलदेशविसृतधान्यदेशकणिशादिकं शिलोञ्छवृत्तयः श्रोत्रियाः, तपस्विन एव, हरेयुरिति ।

[निष्पन्नसस्यानां कोशप्रापणरक्षणादिविधिः]

यथाकालं च सस्यादि जातं जातं प्रवेशयेत् ।
न क्षेत्रे स्थापयेत् किञ्चित् पलालमपि पण्डितः ॥१०३॥
प्रकराणां समुच्छ्रायान् वलभीर्वा तथाविधाः ।
न संहतानि कुर्वीत न तुच्छानि शिरांसि च ॥१०४॥
खलस्य प्रकरान् कुर्यात् मण्डलान्ते समाश्रितान् ।
अनग्निकाससोदकाश्च खले स्युः परिकर्मिणः ॥१०५॥

इत्यध्यक्षप्रचारे सीताध्यक्षः चतुर्विशोऽध्यायः,
आदितः पञ्चचत्वारिंशः ।

श्रीमूला

अध्यायान्ते श्लोकानाह—यथाकालमिति । यथाकालं प्रवेशनार्हकालानतिक्रमेण, सस्यादि, जातं जातं निष्पन्नमखिलं, प्रवेशयेत् । क्षेत्रे किञ्चित् पलालमपि, न स्थापयेत्, पण्डितः अर्थसञ्चयविधानाभिज्ञः । यदाहुः—

"यस्य विघ्नान् न कुर्वन्ति शीतमुष्णं रतिर्भयम् ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥" इति ॥

प्रकराणामिति । प्रकराणां धान्यनिवेशस्थानानां, समुच्छ्रायान् उन्नतसन्निवेशान्, कुर्वीत । वलभीर्वा तथाविधाः उच्छ्रितानि कूटागाराणि वा कुर्वीत । शिरांसि च तेषां, न संहतानि कुर्वीत अन्योन्योपश्लिष्टानि न कुर्वीत, न तुच्छानि रिक्तकानि न कुर्वीत किन्तु चण्डवाताद्यपहारनिषेधार्थं लोहपाषाणादिगुरुद्रव्यगर्भाणि कुर्वीत ।

खलस्येति । प्रकरान्, खलस्य मण्डलान्ते स्तम्बधान्यविश्लेषणाय यत्र बलीवर्दपंक्तिर्मण्डलभ्रमणं कार्यते स प्रदेशो मण्डलम्, तस्यान्ते समीपे, समाश्रितान् कुर्यात् । खले, परिकर्मिणः परिकर्मकारिणः, अनग्निका धान्यदाहभयादग्निरहिताः, सोदकाश्च याद्दच्छिकाग्निदीपनप्रशमार्थम्, सन्निहितजलाश्च, स्युः ।

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्विशोऽध्यायः सीताध्यक्षः, आदितः पञ्चचत्वारिंशः ॥

प्रतिपदपञ्चिका

यथाकालमिति, सस्यानां यो यस्य प्रवेशकालः तदा जातमात्रमेव प्रवेशयेत् । नक्षत्रे किंचित् पलालादिकमपि स्थापयेत् । किमङ्ग पुनरपण्डितः । अर्थसञ्चयविधिश्लोकश्चात्र—

"यस्य विघ्नान्न कुर्वन्ति शीतमुष्णं रतिर्मयम् ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ।।" इति ।

तदर्थं पण्डितग्रहणं प्रकराणां कुलुन्दमानां स्थाने समुच्छ्रायान् महतः कूटाकारसन्निवेशान् कुर्यात् । वलभीर्वा दीर्घप्रकराः तथाविधास्समुच्छ्रिताः न संहृतानि न परस्परं लग्नानि । न च तुच्छानि तेषां शिरांसि रक्षःपिशाचाद्यपहारप्रतिषेधार्थमयःपाषाणाद्यधिष्ठितानि कार्याणि फलस्य प्रकारान् कुलुमान् कुर्यात् । मण्डलान्ते बीलबर्दपङ्क्तिभ्रमणभूमिपर्यन्ते समाश्रितान् समीपस्थान् अनग्निका अग्निरहितास्सोदकाश्चागन्तुवह्निप्रतिषेधार्थं खले स्युः परिकर्मिणः कुर्युरिति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायाम्
अध्यक्षप्रचारिके द्वितीयेऽधिकरणे चतुर्विंशोऽध्यायः ।
सीताध्यक्षः, आदितः अष्टचत्वारिंशोऽध्यायः ।।

द्विचत्वारिंशं प्रकरणम्

पञ्चविंशोऽध्यायः ।

सुराध्यक्षः ।

[सुरासन्धानतद्विक्रयादिदेशकालव्यवस्थाः]

सुराध्यक्षः सुराकिण्वव्यवहाराद् दुर्गे जनपदे स्कन्धवारे वा तज्जातसुराकिण्वव्यवहारिभिः कारयेत्, एकमुखमनेकमुखं वा विक्रयक्रयवशेन वा । षट्छतमत्ययम् अन्यत्र कर्तृक्रेतृविक्रेतॄणां स्थापयेत् ।

श्रीमूला

सुराध्यक्ष इति सूत्रम् । सुरा गौडी माध्वी पैष्टीत्येवं त्रिविधा, तस्या अध्यक्षस्तत्सन्धानाद्यधिकृतः । स इहोच्यत् इति सूत्रार्थः ।

समाहर्तृप्रत्यवेक्षणीये दुर्गे सुरा निर्दिष्टा । तदध्यक्षस्तद्व्यापारो वानभिहित इदानीमभिधीयते ।

सुराध्यक्ष इत्यादि । सः, सुराकिण्वव्यवहारान् सुरातद्बीजसम्बद्धान् तत्सन्धानविक्रयादिव्यवहारान्, तज्जातसुराकिण्वव्यवहारिभिः तत्कर्मकुलोत्पन्ननिपुणतद्व्यवहारिभिः, कारयेत् । कथमित्याह—एकमुखम् एकस्थानकम्, अनेकमुखं वा अनेकस्थानकं वा विक्रयक्रयवशेन वा क्रयविक्रयप्रियाप्रियत्वानुरोधेन वा । षट्छतमत्ययं षट्छतपणात्मकं दण्डम्, अन्यत्र कर्तृक्रेतृविक्रेतॄणां व्यवस्थितस्थानेतरस्थानेषु सन्धानक्रयविक्रयकारिणां, स्थापयेत् ।

प्रतिपदपञ्चिका

सुराध्यक्ष इति सूत्रम् । सुराशब्देन सर्वाः पानविशेषा गृह्यन्ते ।

"गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ।" इति ॥

वचनादुपलक्षणार्थत्वाच्च सुराशब्दस्य मोदकादीनामपि ग्रहणम् । तेषामध्यक्षः इति । तत्सन्धानविक्रयाद्यधिकारी, स इहाभिधीयत इति सूत्रार्थः । सम्बन्धस्तु समाहर्तृकर्मणि दुर्गान्तर्गता सुरा प्रदिष्टा, तत्प्रभेदस्तदध्यक्षो वा नोक्तः, सोऽभिधीयत इति । तमाह—सुराध्यक्ष इत्यादि । सुरायाः किण्वस्य च तत्कारणस्य च व्यवहारं तत्संयोजनविक्रयादिकं दुर्गादिषु त्रिषु तज्जातेत्यादि तत्कुलकन्यापालैः कारयेत् ।

[सुरातत्पात्रोरनियमेन बहिःप्रचारदोषाः नियमाश्च]

ग्रामादनिर्णयनम् असम्पातं च सुरायाः, प्रमादभयात् कर्मसु निर्दिष्टानां, मर्यादातिक्रमभयादार्याणाम्, उत्साहभयाच्च तीक्ष्णानाम्। लक्षितमल्पं वा चतुर्भागमर्धकुडुवं कुडुबमर्धप्रस्थं वेति ज्ञातशौचाः निर्हरेयुः।

पानागारेषु वा पिबेयुरसञ्चारिणः ॥

श्रीमूला

ग्रामादिति। सुराया मद्यस्य उपलक्षणया तत्पानमदवतां च, ग्रामाद्, अनिर्णयनं बहिरनिस्सरणम्, असम्पातं अगमनं च गृहाद् गृहान्तरे जनाकीर्णे वा, स्थापयेदित्यनुषङ्गः। तत्र कारणमाह—प्रमादभयात् कर्मसु निर्दिष्टानां तत्तत्कर्मनियुक्तानामध्यक्षादीनां स्वकर्मस्ववधानभङ्गभयात्, मर्यादातिक्रमभयात् आर्याणां साधूनां स्वधर्मातिलङ्घनभयात् उत्साहभयाच्च तीक्ष्णानां शूराणाम् अस्थानशस्त्रप्रयोगभयाच्च।

निर्णयनाभ्यनुज्ञानपक्षमाह—लक्षितमिति। वाशब्दः पक्षान्तरे। लक्षितम् अभिज्ञानमुद्राचिह्नितम्, अल्पम् अल्पपरिमाणम्। अल्पत्वस्यैव व्याख्यानं चतुर्भागमित्यादिना। चतुर्भागं पादकुडुबम् अर्धकुडुबम्, कुडुबम्, अर्धप्रस्थं वा परमावधिपरिमाणम्, इति एवम्प्रकारं सुरापरिमाणम्, ज्ञातशौचाः प्रतीतवृत्ताव्यभिचाराः, निर्हरेयुः निर्णयेयुः।

सामान्यविधिमाह—पानागारेष्वित्यादि। वेति वाक्यपूरणे। असञ्चारिणः मदकालवर्जितसम्पाताः।

प्रतिपदपञ्चिका

एकमुखमित्यादि। सुबोधम्। ग्रामादेर्दुर्गादेरनिर्णयनं बहिर्निस्सरणमसम्पातं च गृहाद् गृहान्तरं गमनमसङ्कुलदोषं च स्थापयेत्।

कुतः प्रमादादिभयात्, कर्मसु निर्दिष्टानाम् अध्यक्षपुरुषाणाम् आर्याणां ब्राह्मणादीनां शूरपुरुषाणां च यथाक्रमं प्रमादादिदोषभयात्। प्रमादः कर्मसु शैथिल्यम्, मर्यादातिक्रमः स्वधर्मलङ्घनम्, उत्साहः कलहः, त एते पानदोषात् सम्भवन्ति। तस्माल्लक्षितं कृताभिज्ञानमल्पं वेत्यल्पस्याप्यवस्थितत्वात् सर्वनिकृष्टं कुटुम्बचतुर्भागं सर्वोत्कृष्टं प्रस्थमिति प्रतिज्ञातशौचादुष्टं निर्हरेयुः। निर्गमयेयुः।

पानागारेषु वा वक्ष्यमाणलक्षणेषु पिबेयुः। असञ्चारिणो यावन्मदकालमसम्पातिनः।

[सुराव्यवहारफलानि]

निक्षेपोपनिधिप्रयोगापहृतादीनामनिष्टोपगतानां च द्रव्याणां ज्ञानार्थमस्वामिकं कुप्यं हिरण्यं चोपलभ्य निक्षेप्तारम् अन्यत्र व्यपदेशेन ग्राहयेत्, अतिव्ययकर्तारमनायतिव्ययं च ।

[सुराव्यवहारपानागारपातॄणां रक्षणादिव्यवस्थाः मद्यविक्रयिभिरवेक्षणीयोंऽशश्च]

न चानर्घेण कालिकां वा सुरां दद्यादन्यत्र दुष्टसुरायाः । तामन्यत्र विक्रापयेत्, दासकर्मकरेभ्यो वा वेतनं दद्यात्, वाहनप्रतिपानं सूकरपोषणं वा दद्यात् ।

श्रीमूला

एवं गर्ह्योऽपि सुराव्यवहारश्चोरसाहसिकाद्युपलम्भसाधनत्वान्महाफल इत्यभिप्रायेणाह—निक्षेपेत्यादि । निक्षेपो भाण्डघटनाय दत्तम्, उपनिधिः न्यासः, प्रयोगः आधिः, अपहृतं चोरितम्, आदिशब्दात् याचितकादि गृह्यते, एषां निक्षेपादीनाम्, अनिष्टोपगतानां साहसहृतानां च, द्रव्याणां, ज्ञानार्थं तत्त्वावगमार्थम्, अस्वामिकम् अविदितस्वामिकं, कुप्यं खड्गादिकं, हिरण्यं च मद्यपायिना पानायाहृतम्, उपलभ्य, निक्षेप्तारं कुप्यहिरण्याधातारं पुरुषम्, अन्यत्र पानागारादन्यस्मिन् प्रदेशे व्यपदेशेन वाक्पारुष्यादिच्छलेन, ग्राहयेत् नगराध्यक्षेण । पानागार एव तद्ग्रहणे व्यपदेशाकरणे चान्ये चोरादयः पानशौण्डा यथोक्तकुप्यादिकमविश्वासात् तत्र नानयेयुरित्यत उक्तम् 'अन्यत्रे'ति 'व्यपदेशेने'ति च । अतिव्ययकर्तारम् आयाधिकव्ययकारिणम् अनायतिव्ययम् आयतिं विना व्ययकारिणं च, ग्राहयेदित्यनुषङ्गः ।

न चानर्घेणेति । अनर्घेण अल्पेन मूल्येन, कालिकां वा सवृद्धिकमूल्यदानकालावधिमतीं वा कालान्तरदेयमूल्येन वेति यावत्, सुरां, न च दद्यात् क्रेतृभ्यः, अन्यत्र दुष्टसुरायाः दुष्टसुराव्यतिरेकेण । दुष्टसुरामपि प्रशस्तसुराविक्रयस्थानादन्यत्र नीत्वा धारणकक्रेतृभ्यो दापयेदित्याह—तामन्यत्र विक्रापयेदिति । दासेत्यादि । दासकर्मकरेभ्यो वा, वेतनं दद्यात् वेतनस्थाने दुष्टसुरां दद्यात् । तच्च वेतनं क्षुद्रकर्मविषयमित्यभिप्रायेणाह—वाहनेत्यादि । वाहनप्रतिपानम् उष्ट्रबलीवर्दादिप्रतिपालनविषयं, सूकरपोषणं वा वराहपोषणविषयं वा, दद्याद् अर्थाद् वेतनम् । वाहनप्रतिपानमित्यस्य उष्ट्रादिव्यापारणभृतिनिष्क्रयार्थां सुरामिति वार्थः सुवचः ।

प्रतिपदपञ्चिका

निक्षेपे चोपायनार्थम् अर्पितमुपनिधिर्न्यासः प्रयोगो बन्धकः अन्धकघटितालङ्कारादिर्वा अपहृतम् मुपितआदिग्रहणाद्याचितमवक्रीतकं च । एवमेषामनिष्टोपगतानां

पानागाराण्यनेककक्ष्याणि विभक्तशयनासनवन्ति पानोद्देशानि गन्ध-माल्योदकवन्ति ऋतुसुखानि कारयेत् । तत्रस्थाः प्रकृत्यौत्पत्तिकौ व्ययौ गूढा विद्युरागन्तूंश्च । क्रेतॄणां मत्तसुप्तानामलङ्कारच्छादनहिरण्यानि च विद्युः । तन्नाशे वणिजः तच्च तावच्च दण्डं दद्युः । वणिजस्तु संवृतेषु कक्ष्याविभागेषु स्वदासीभिः पेशलरूपाभिरागन्तूनां वास्तव्यानां च आर्य-रूपाणां मत्तसुप्तानां भावं विद्युः ॥

प्रतिपदपञ्चिका

च साहसाद्यपहृतानां द्रव्याणां चोरडामरिकादिपुरुषाणां च ज्ञानार्थं तत्त्वावबोधार्थं-मस्वामिमद्यपं कुप्यं खड्गखेटकादि हिरण्यं चोपलभ्य विज्ञाय निक्षेप्तारं पानशौण्डम् अन्यत्र पानाहारादित्यन्येषां अविश्वासप्रतिषेधार्थमपदेशेन न वाक्पारुष्यादिव्याजेन ग्राहयोगरिकादिना अतिव्ययकर्तारमल्पव्ययंमहाव्ययमनायतिव्ययं च विनैवायेन व्ययकारिणं ग्राहयेत् ।

न चानर्घेण हीनार्घेन कालिकं वा धारणकेभ्यः सुरां दद्यात् विक्रीणीयात् । अन्यत्र दुष्टसुरायाः पिष्टसुरायाः तद्धारणकेभ्योऽन्यत्र वा नीत्वा विक्रापयेत् । तदसम्भवे दासादिभ्यो वा वेतनार्थं दद्यात् । वाहनप्रतिपादनमुष्टवलीबर्दादिप्रतिपादनं सूकरप्रोषणं वा तेभ्यो दद्यात् ।

श्रीमूला

पानागाराणीत्यादि । पानोद्देशानि पानयोग्योत्कृष्टप्रदेशोपेतानि । ऋतुसुखानि ऋतुषु सर्वेषु सुखानि तत्तदुचितभोग्यवस्तुसमृद्धतया सुखकराणि । शेषं सुगमम् । तत्रस्था इति । तत्रस्थाः पानागारस्थाः. प्रकृत्यौत्पत्तिकौ प्रकृतिसिद्धः प्रकृतिर्नित्यः अपूर्वोपजन उत्पत्तिस्तत्सिद्ध औत्पत्तिकः तथाविधौ, व्ययौ मद्यपायिनां, गूढाः पानागारकर्मकरादिव्यञ्जनाः, विद्युः । आगन्तून् विदेशागतांश्च पातॄन् विद्युः ।

क्रेतॄणामिति । मद्यपायिनां, मत्तसुप्तानाम्, अलङ्कारच्छादनहिरण्यानि च देह-गतानि, विद्युः गूढा इत्येव । तन्नाशे तेषामलङ्कारादीनां चोरादिनापहारे, वणिजः मद्यविक्रयिणः, तच्च तावच्च दण्डं नष्टसदृशरूपपरिमाणं दण्डं, दद्युः ।

वणिविषयं प्रस्तावान्तरमाह—वणिजस्त्विति । मद्यविक्रयिणः, संवृत्तेषु विविक्तेषु, कक्ष्याविभागेषु, स्वदासीभिः आप्तप्रेष्याभिः, पेशलरूपाभिः रुचिराकृतिभिः, आगन्तूनां विदेशागतानां, वास्तव्यानां च स्वदेशगतानां च, आर्यरूपाणाम् आर्यवत् प्रतिभासमानानां, मत्तसुप्तानां, भावं विद्युः अभिप्रायं गृह्णीयुः । चोरत्वपरप्रयुक्त-त्वादिपरीक्षार्थम् ।

[मेदकप्रसन्नासवारिष्टयोगाः]

मेदकप्रसन्नाऽऽसवारिष्टमैरेयमधूनाम् उदकद्रोणं, तण्डुलानामर्धाढकं, त्रयः प्रस्थाः किण्वस्य इति मेदकयोगः। द्वादशाढकं पिष्टस्य, पञ्चप्रस्थाः किण्वस्य, पुत्रकत्वक्फलयुक्तो वा जातिसम्भारः प्रसन्नायोगः। कपित्थतुला, फाणितं पञ्चतौलिकम्, प्रस्थो मधुन—इत्यासवयोगः। पादाधिको ज्येष्ठः, पादहीनः कनिष्ठः। चिकित्सकप्रमाणाः प्रत्येकशो विकाराणाम् अरिष्टाः॥

प्रतिपदपञ्चिका

पानागाराणि आपानकगृहाणि अनेककक्ष्याणि । प्रभूतावस्थानानि विभक्तशयनादिप्रदेशा शौण्डिकादीनां यथासुखावस्थापनार्थं गन्धमाल्योदकवन्ति ऋतुसुखानि सर्वर्तुभोज्ययुक्तानि कारयेत् ।

तत्रस्थाः प्रकृतोत्पत्तिकौ नित्यनैमित्तिकौ व्ययौ पातॄणां गूढपुरुषास्तत्कर्मकरादिव्यञ्जना विद्युः। आगन्तूंश्च देशान्तरादागतान् ।

क्रेतॄणां मत्तसुप्तानाम्, अलङ्काराच्छादनहिरण्यानि च तच्छरीरगतानि, एवं गूढा विद्युः। तन्नाशे मत्तसुप्तानामलङ्कारादिनाशे वणिजस्सुराध्यक्षाः तच्च तावच्च दण्डं दद्युः।

वणिजस्सुराध्यक्षाः, तुशब्दोऽधिकारान्तरे, संवृतेषु कक्ष्याविभागेषु स्वदासीभिः आप्तप्रेष्याभिः पेशलरूपाभिः सुन्दराकाराभिः आगन्तूनां देशान्तरादागतानां वास्तव्यानां तत्रत्यानां च आर्यरूपाणाम् आर्यवेषधारिणां मत्तसुप्तानामभिप्रायं विद्युः, तेषां चोरडामरिकपाप्मयुक्तादिपरीक्षणार्थम् ।

श्रीमूला

मेदकादियोगविधिं प्रतिजानीते—मेदकेत्यादि। मेदकादीनां षण्णां, योगविधिरुच्यत इति शेषः।

मेदकयोगमाह—उदकद्रोणमित्यादि । द्रोणपरिमितं जलम् अर्धाढकपरिमितास्तण्डुलाः त्रिप्रस्थपरिमितं मद्यबीजमित्यनेन मिश्रणप्रकारेण मेदकयोगो भवति ।

प्रसन्नायोगमाह—द्वादशाढकमित्यादि। पुत्रकत्वक्फलयुक्तः कामरूपजनपदप्रसिद्धपुत्रकाख्यवृक्षविशेषत्वक्फलसहितः। जातिसम्भारः 'पाठालोध्रे'त्यादिनाऽनुपदं वक्ष्यमाणः पाठादिप्रयोगः। शेषं सुगमम्। पूर्वत्र तण्डुलोक्तदिशा जलप्रमाणमप्यत्र पिष्टाष्टगुणमूहनीयम्।

आसवयोगमाह—कपित्थेत्यादि। कपित्थतुला शतपलः कपित्थफलसारः, फाणितं, पञ्चतौलिकं तुलापञ्चकपरिमाणं, मधुनः प्रस्थः प्रस्थपरिमाणं माध्वीकम्,

[मैरेयः मधुः किण्वश्च]

मेषशृङ्गीत्वक्क्वाथाभिषुतो गुडप्रतीवापः पिप्पलीमरीचसम्भारस्त्रिफलायुक्तो वा मैरेयः। गुडयुक्तानां वा सर्वेषां त्रिफलासम्भारः। मृद्वीकारसो मधु। तस्य स्वदेशो व्याख्यानं कापिशायनं हारहूरकमिति। माषकलनीद्रोणमामं सिद्धं वा त्रिभागाधिकतण्डुलं मोरटादीनां कार्षिकभागयुक्तं किण्वाबन्धः॥

श्रीमूला

इत्येवम्प्रकार आसवयोगः। एष एव कपित्थादिप्रमाणच्चतुर्भागाधिको ज्येष्ठः, तच्चतुर्भागन्यूनस्तु कनिष्ठ इत्युच्यत इत्याह—पादाधिक इत्यादि। अर्थात् पूर्वोक्तो मध्यमः। तत्तद्रोगाणां यथास्वं चिकित्सोपयोगिनोऽत्त एव भिषगुपदिष्टयोज्यद्रव्यप्रमाणाः अरिष्टयोगा इत्याह—चिकित्सकप्रमाणा इत्यादि। विकाराणां वातादिविकाररूपाणां रोगाणाम्। अरिष्टा अभयारिष्टादयो वैद्यप्रसिद्धाः।

प्रतिपदपञ्चिका

मेदकेत्यादि। मेदकादीनां षण्णां विधिरभिधीयते इति वाक्यशेषः।

मेदकस्य तावदाह—उदकद्रोणतण्डुलानामिति, किण्वस्य वक्ष्यमाणलक्षणस्य, शेषं सुबोधम्। इत्येवमनया कल्पनया मेदकस्य योगो भवति। प्रसन्नाया वक्ष्यते। द्वादशाढकम् पिष्टस्य, किण्वस्य पञ्चप्रस्थाः, पुत्रकः कामरूपेषु वृक्षविशेषः, तस्य त्वक्फलं तद्युक्तो जातिसम्भारो वक्ष्यमाणः पाठादिप्रयोगः प्रसन्नायोगः इहोदकप्रमाणमनुक्तमपि पूर्वत्र तण्डुलार्धाढकस्य उदकद्रोणे पदे देशात् पिष्टाष्टगुणमुदकमूह्यमिति।

आसवस्याह—कपित्थतुलेति, तत्फलसारशतपलफाणितः पञ्चतौलिकः पञ्चपलशतपरिमाणः प्रस्थो मधुनो माक्षिकस्येत्ययं मध्यमस्यासवस्य योगः। पादाधिकः पूर्वोक्तकपित्थादिगात्रश्चतुर्भागाधिको ज्येष्ठो भवति। पादहीनस्तु कनिष्ठ इति प्रतीतम्। त्रिविधोऽयमासवयोग इति।

अरिष्टमाह—चिकित्सकप्रमाणा इति। वैद्योपदेशप्रमाणः प्रत्येकशो विकाराणां व्याधिविशेषाणाम् अरिष्टा अभयारिष्टादयश्चिकित्सार्था योगा अवगन्तव्याः।

श्रीमूला

मैरेयमाह—मेषशृङ्गीत्यादि। मेषशृङ्गीत्वक्क्वाथाभिषुतः मेषशृङ्गीसंज्ञकवृक्षत्वक्कषायसहितः, गुलप्रतीवापः गुलोपचारयुक्तः, पिप्पलीमरिचसम्भारः पिप्पलीमरिचचूर्णमिश्रः, त्रिफलायुक्तो वा त्रिफलाचूर्णयुक्तो वा, मैरेयः। वाशब्दः सम्भारविकल्पने। गुलप्रतिवापिनां मद्यानां सर्वेषामपि त्रिफलासम्भारः साधारण इति कश्चित् पक्षमाह—गुलयुक्तानामित्यादि।

[मेदकप्रसन्नासवानां सम्भाराः, श्वेतसुरायोगश्च]

पाठालोध्रतेजोवत्येलावालुकमधुकमधुरसाप्रियङ्गुदारुहरिद्रामरिच-

श्रीमूला

मधुविधिमाह—मृद्वीकारस इति। द्राक्षारसः पक्वद्राक्षाफलरसः, मधु भवति। तस्य मधुनः, स्वदेशो व्याख्यानं स्वोत्पत्तिदेशसम्बन्धनिमित्तकं विविधमर्थाद् द्विविधमाख्यानं संज्ञा, कापिशायनमिति हारहूरकमिति च। कपिशेति नदी तत्तीरगतं नगरं च तत्र भवं कापिशायनम्। हरहूरं तदेव नगरं तत्र भवं हारहूरकम्। द्वयाख्यानमिति टीकाभाषयोः स्वरसप्रतीते पाठे आख्यानद्वयमित्यर्थः, क्लीवत्वं त्रिभुवनवत्।

किण्वविधिमाह—माषकलनीत्यादि। माषकलनीद्रोणं माषकल्कभावितमुदकद्रोणम्, आमं सिद्धं वा अक्वथितं क्वथितं वा, त्रिभागाधिकतण्डुलं त्रिभागाधिकद्रोणपरिमाणतण्डुलपिष्टयुक्तं, मोरटादीनां वक्ष्यमाणानां कार्षिकभागयुक्तं प्रत्येकपादपलभागयुक्तं, किण्वाबन्धः किण्वयोगः।

प्रतिपदपञ्चिका

मैरेयमाह—मेषशृङ्गपिप्पलीक्वाथाभिषुत इति। मेषशृङ्गत्वात्क्वाथेन योऽभिषुतः कृतप्रतिबन्धनो गुडप्रतीवापो गुडेनोपचरितः पिप्पलीमरिचसम्भारः तच्चूर्णावकीर्णः त्रिफलायुक्तो वेति वाशब्दश्चार्थ इति केचित्। सम्भारविकल्प इत्यन्ये। एवमेष मैरेययोगः। गुडयुक्तानां वा, वाशब्दो गुडरहितानां च सर्वेषां द्रव्यान्तरक्वाथाभिषुतानामपि त्रिफलासम्भाराः कार्याः।

मध्वाह—मृद्वीकारस इति। परिणतद्राक्षाफलरसो मधु, तस्य मधुनः स्वदेशो व्याख्यानं तदुत्पत्तिभूमिनिमित्तमाख्याद्वयं भवति। तत्र कपिशो अवन्तिषु परिजा नाम नन्दिनगरं च तत्रैव, हारहूरकं तत्प्रभवं कापिशायनं हारहूरकमिति तद्ग्रहणमुत्तमत्वप्रदर्शनार्थं नान्यनिवृत्त्यर्थम्, ततश्च काश्मिराद्यपि मधु भवति। द्राक्षाग्रहणं खर्जूरोपलक्षणार्थम्, तद्रसोऽपि मधु भवति। सुरामभिधाय किण्वमाह—माषकलिनीत्यादि। माषकलिनी माषकल्कभावितमुदकमामं पक्वं सिद्धं वा क्वथितं त्रिभागाधिकं द्रोणं तण्डुलं पिष्टयुक्तम्। मोरटादीनामुपरि। वक्ष्यमाणानां षण्णां कार्षिकभागयुक्तं किण्व-(चिह्ना)बन्धः अम्लिकासुबन्धः गुडयुक्तानां वा सर्वेषां त्रिफलासम्भार इति। सामान्यसम्भारस्योक्तत्वात् प्रत्येकमभिधीयते।

श्रीमूला

मेदकप्रसन्नयोः सम्भारयोगमाह—पाठालोध्रेत्यादि। पाठा अम्बष्ठाख्या, लोध्रः तिरीटकल्कः, तेजोवती इभपिप्पली, एला प्रसिद्धा, वालुकं हरिवालुकं, मधुकं

पिप्पलीनां च पञ्चकार्षिकः सम्भारयोगो मेदकस्य। प्रसन्नायाश्च मधुकनिर्यूहयुक्ता कटशर्करा वर्णप्रसादिनी च। चोचचित्रकविलङ्गगजपिप्पलीनां च कार्षिकः क्रमुकमधुकमुस्तालोध्राणां द्विकार्षिकश्च आसवसम्भारः। दशभागश्चैषां बीजबन्धः। प्रसन्नायोगः श्वेतसुरायाः ॥

श्रीमूला

मधुयष्टिः, मधुरसा दूर्वा, प्रियङ्गु कुङ्कुमं, दारुहरिद्रा दार्वीसंज्ञा, दार्वितं भिन्नं वा पदं तच्च पीतदारुसंज्ञं, हरिद्रा तु प्रसिद्धा, मरिचं कोलं, पिप्पली प्रसिद्धा। पाठादीनां पञ्चकर्षिकः प्रत्येकं चूर्णपञ्चकर्षप्रमाणः, सम्भारयोगः, मेदकस्य प्रसन्नायाश्च। मधुकनिर्यूहयुक्ता यष्टिमधुककषाययुक्ता, कटशर्करा गङ्गेष्टिः, वर्णप्रसादनी च मेदकप्रसन्नयोवर्णप्रसादहेतुश्च।

आसवसम्भारमाह—चोचेत्यादि। चोचं त्वचसंज्ञं चित्रकोऽग्निसंज्ञः विलङ्गम् अमोघा गजपिप्पली प्रसिद्धा एतासां चतसृणां च, कार्षिकः प्रत्येकं कर्षप्रमाणः, टीकाभावयोरनुमिते 'षट्कार्षिक' इति पाठे सार्धफलप्रमाण इत्यर्थः, क्रमुकमधुकमुस्तालोध्राणां क्रमुको घोण्टा मधुकं श्यामकङ्गुः मुस्ता गुरुविन्दः लोध्रस्तिरीटः एतेषां, द्विकार्षिकश्च कर्षद्वयप्रमाणश्च, आसवसम्भारः। दशभागश्चैषां चोचादीनां दशभागः, बीजबन्धः आसवकरणद्रव्येषु योज्यः।

प्रसन्नायोगः श्वेतसुराया इति। प्रसन्नाया योगो य उक्तः स एव श्वेतसुराया अपि योगो भवति। किन्तु स सम्भाररहितः समकिण्वाबन्धश्चेत्याह स्वामी। सम्भारबीजबन्धावुभावपि नेत्याह भाषा।

प्रतिपदपञ्चिका

वाक्योदितपाठादयश्च वैद्यकवेद्याः प्रतीताः, तेषु पञ्चकर्षिकः प्रत्येकं पञ्चकर्षप्रमाणः सम्भारयोगो मेदकस्य।

प्रसन्नायाश्च मधूको यष्टिमधुकस्तन्निग्रहेण (तन्निर्यूहेण) कषायेण युक्ता कटशर्करा (वर्ण)प्रसादनी तयोरेव मेदकप्रसन्नायोगश्चेति। सुरेति। प्रसन्नायोगः सम्भाररहितः।

आसवसम्भारमाह—चोचेत्यादि, चोचादीनां चतुर्णां षट्कार्षिकाः क्रमुकादीनां चतुर्णां द्विकार्षिकश्चासवसम्भारः। चोचचित्रकादयो वैद्यकादिषु प्रतीताः।

दशभागश्चैषां चोचादीनां बीजबन्धः आसवकरणद्रव्येषु प्रक्षेप्तव्यः प्रसन्नायोगः। श्वेतसुरेति। प्रसन्नायोगः संहा(भा)ररहितः समकिण्वबन्धश्चेति सुरा भवति।

[सुराभेदाः सुरास्वच्छीकरणविधिश्च]

सहकारसुरा, रसोत्तरा बीजोत्तरा वा महासुरा, सम्भारिकी वा। तासां मोरटापलाशपत्तूरमेषशृङ्गीकरञ्जक्षीरवृक्षकषायभावितं दग्धकटशर्कराचूर्णं लोध्रचित्रकविलङ्गपाठामुस्ताकलिङ्गयवदारुहरिद्रेन्दीवरशतपुष्पाऽपामार्गसप्त—पर्णनिम्बास्फोतकल्कार्धयुक्तम् अन्तर्नखो मुष्टिः कुम्भीं राजपेयां प्रसादयति। फाणितः पञ्चपलिकश्चात्र रसवृद्धिर्देयः॥

श्रीमूला

अथ सुराभेदाः—सहकारसुरेति। सुरैव सहकारतैलयुक्ता सहकारसुरा। गुडप्रतिवापयुक्ता सुरा रसोत्तराख्या या शीधु इत्युच्यते। बीजोत्तरा बीजद्रव्यमात्राधिका महासुरा। सम्भारमात्राधिका सुरा सम्भारिकी।

सुराप्रसादनविधिमाह—तासामिति। तासां सर्वासां सुराणां, मोरटाटिपट्ककषायभावितं मोरटा मूलपुष्पकाख्यो वल्लीभेदः पलाशः किंशुकः पत्तूरो लोहमारकः मेषशृङ्गी विषाणी करञ्जो नक्तमालः क्षीरवृक्षो वटादिः एतेषां निर्यूहेन भावितं, दग्धकटशर्कराचूर्णं, लोध्रादिकल्कार्धयुक्तं कलिङ्गयवः देशविशेषभवो यवः शतपुष्पा सितपुष्पा सितच्छत्राख्या अपामार्गः खरमञ्जरी आस्फोतः ब्रह्मवृक्षः, शेषं प्रसिद्धम्, एषां लोध्रादीनां कल्कस्य अर्धेन कटशर्कराचूर्णार्धप्रमाणेन युक्तम्, अन्तर्नखो मुष्टिः अदृश्यनखमुष्टिमेयं, प्रक्षिप्तमिति शेषः, कुम्भीं खारीमितां सुरां, राजपेयां प्रसादयति राजपानयोग्या यथा भवेत् तथा स्वच्छां करोति। फाणितः, पञ्चपलिकश्च पलपञ्चकप्रमाणश्च, अत्र प्रसादितसुरायां, रसवृद्धिर्देयः रसवृद्धिप्रयोजनः क्षेप्तव्यः।

प्रतिपदपञ्चिका

तत्प्रसङ्गाच्चान्यानपि द्रव्यभेदकृतान् मात्राभेदकृतांश्च सुराविशेषानाह—सहकारसुरेत्यादि, सहकारतैलयुक्ता सुरैव गुडप्रतिवापा सुरा, (गुडप्रतीता वा सुरा) रसोत्तरा, शीधुसंज्ञा भवति। बीजोत्तरा बीजद्रव्यमात्राधिका महासुरा। बीजोत्तरा, रसोत्तरा च सम्भारिकी सम्भारासि(भि)केव। तासामिति, सर्वसुराणां प्रसाधनविधिमाह—मोरटेत्यादि, मोरटा लघु(लघु)वल्लीविशेषः पत्तुरः पङ्कुरः क्षीरवृक्षाः न्यग्रोधादयः। शेषं प्रतीतम्।

एतेषां कषायेण निर्यासेन भावितं दग्धकटशर्कराचूर्णं तथा लोध्रादिकल्कार्धयुक्तमन्तर्नखो मुष्टिरदृष्टनखो मुष्टिः कुम्भीं चतुष्पष्टिसहस्रपत्रां(फलां) राजपेयां राजार्हां प्रसादयति स्वच्छीकरोति। फाणितः पञ्चपलिकः पञ्चपलप्रमाणः। फाणितश्चात्र कुम्भ्यां स्वच्छीकृतायां रसवृद्धिस्तन्निमित्तं देयः प्रक्षेप्तव्यः।

[उत्सवेषु सुरासन्धानपानयोरनुज्ञा]

कुटुम्बिनः कृत्येषु श्वेतसुरां औषधार्थं वा अरिष्टमन्यद्वा कर्तुं लभेरन् । उत्सवसमाजयात्रासु चतुरहस्सौरिको देयः । तेष्वननुज्ञातानां प्रहवणान्तं दैवसिकमत्ययं गृह्णीयात् ॥

[सुराश्रपणादेः तद्रसानभिज्ञकर्तव्यता शुल्कं च]

सुराकिण्वविचयं स्त्रियो बालाश्च कुर्युः । अराजपण्याः पञ्चकं शतं शुल्कं दद्युः ।

श्रीमूला

कुटुम्बिन इति । कुटुम्बिनः पौरजानपदाः, कृत्येषु विवाहादिकार्येषु, श्वेतसुराम्, औषधार्थम् वारिष्टम् औषधार्थम् भिषगुपदिष्टमरिष्टं वा, अन्यद्वा मेदकादि वा, कर्तुं सन्धातुं लभेरन् ।

उत्सवेत्यादि । उत्सवसमाजयात्रासु वसन्ताद्युत्सवेषु बन्धुजनमेलनेषु इष्टदेवतापूजासु च, चतुरहः सौरिको देयः चत्वारो दिवसाः सुरापानार्था अनुज्ञातव्याः, सुराध्यक्षेण । तेषु उत्सवादिषु अननुज्ञातानाम् अनुज्ञां विनैव पिबतां, प्रहवणान्तं प्रहवणं तुष्टिभोजनं तेनोत्सवादिसमाप्तिकालो लक्ष्यते, तदवधिकमित्यर्थः, दैवसिकमत्ययं गृह्णीयात् प्रात्यहिकं दण्डं गृह्णीयात् सुराध्यक्षः । अननुज्ञातपानजनितमददिवसेषु कर्महानिनिमित्तं दण्डं कर्मकरेभ्यो गृह्णीयादिति केचिद् व्याचक्षते ।

सुरेत्यादि । सुराकिण्वविचयं सुराया विचयं श्रपणादिरूपं कर्म किण्वस्य विचयं शोषणादिरूपं च, स्त्रियो बालाश्च कुर्युः तद्रसानभिज्ञाः ।

अराजपण्या इति । स्वोत्पादितमद्यविक्रयिणः, शुल्कं राजभागं, दद्युः । कथं दद्युः, पञ्चकं शतम् इतिशब्द इहाध्याहर्तव्यः । पञ्चकं शतमिति । पञ्चशुल्कोऽस्मिञ्छते दीयत इत्यनेन क्रमेण दद्युरित्यर्थः । केषां पण्यानामित्याकाङ्क्षायामाह—सुरकेत्यादि । तत्र सुरैव सुरका, मेदकारिष्टमधूनि प्रतीतानि, फलाम्ला तालनालिकेरादिमद्यम्, अम्लशीधु उदक्षु प्रतीतमिति स्वामी । चकारः किण्वादिग्रहणार्थः ।

प्रतिपदपञ्चिका

कुटुम्बिन इत्यादि । कुटुम्बिनो जानपदाः कृत्येषु विवाहादिषु श्वेतसुरां मधुपसुरां पानार्थम् अरिष्टं वा औषधार्थमध्यक्षाय वा इदं मेदकादीनाम् अन्यतमं कर्तुम् उपयोक्तुं च लभेरन् । उत्सवेषु वसन्तादिषु समाजेषु स्थानस्थानस्वजनमेलनेषु यात्रासु च स्वदेवतापूजासु चेत्याहुः । चतुर्दैवसिकस्सौरिकस्सुरापानकाले देयः (कालो कल्पनीयः) ।

पृष्टेन(प्रष्टेन)अध्यक्षेण समुल्कलनीयः (?) । तेष्वेव विवाह इत्यादिष्वनुज्ञातानां पिबतां दैवसिकमत्ययं स्वयमेव परिकल्प्य गृह्णीयात् ।

सुरकामेदकारिष्टमधुफलाम्लाम्लशीधूनां च
अह्नश्च विक्रयं व्याजीं ज्ञात्वा मानहिरण्ययोः ।
तथा वैधरणं कुर्यादुचितं चानुवर्तयेत् ॥१०६॥

इत्यध्यक्षप्रचारे सुराध्यक्षः, पञ्चविंशोऽध्यायः,
आदितष्षट्चत्वारिंशः ।

प्रतिपदपञ्चिका

सुराकिण्वविचयमिति । विचयशब्दः प्रत्येकम्, सुराविचयं श्रवणोत्सेचनादि किण्वविचयम् । समुत्सेदनविशोषणमर्दनादिकं स्त्रियो बालाश्च तद्रसानभिज्ञाः कुर्युः ।

अराजपण्यानां राजभाव्यमाह—अराजपण्याः मद्यविक्रयिणः पञ्चकं शतं दद्युः ।

श्रीमूला

उक्तशुल्कातिरेकेण व्याज्या अपि करणमध्यायान्तश्लोकेनाह—अह्नश्चेति । अह्नश्च विक्रयं दिनकृतं विक्रयं, तथा वैधरणं मानावश्यम्भाविनं पण्यच्छेदं च, ज्ञात्वा इयत्तया निर्धार्य, मानहिरण्ययोर्व्याजीम् षोडशभागरूपां मानव्याजीं विंशतिभागरूपां हिरण्यव्याजीं च, कुर्यात् कल्पयेत्, सुराध्यक्षः । करणं च न यथाकामं भवति, किन्तु समुदाचारसिद्धमेवानुसर्तव्यमित्याह—उचितं चानुवर्तयेदिति ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चविंशोऽध्यायः, सुराध्यक्षः, आदितः षट्चत्वारिंशः ॥

प्रतिपदपञ्चिका

केषां पण्यानामित्याह—सुरेत्यादि । सुरादीनां तत्कारणानां गुडधातकीकिण्वप्रभृतीनामिति केचित् । तत्र पलाम्ला तालनालिकेरादिमद्यम् अम्लशीधु (स्यादि ?)-सन्धानसम्भवमुदक्षु प्रतीतम् । अन्ये तु सुरादीनुत्तरश्लोकेन सह सम्बध्नन्ति । तच्चाह—अह्नश्चेत्यादि, दैवसिकं विक्रयं ज्ञात्वा तथा वैधरणं च मानविधाववर्ज्यं-पण्यच्छेदनं च ज्ञात्वा ततो मानहिरण्ययोः व्याजीं कुर्यात् । षोडशभागो मानव्याजी, पञ्चकं शतं हिरण्यव्याजी, तच्च शुल्कव्यतिरेकेण अवगन्तव्यम् उचितं च यथोक्तप्रकारातिरेकेण अन्यमपि देशप्रसिद्धमाचारमनुवर्तयेत् अनुपालयेदिति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायाम्
अध्यक्षप्रचारिके द्वितीयेऽधिकरणे पञ्चविंशोऽध्यायः ।
सुराध्यक्षः, आदितः षट्चत्वारिंशोऽध्यायः ॥

त्रिचत्वारिंशं प्रकरणम्

षड्विंशोऽध्यायः ।

सूनाध्यक्षः ।

[अहन्तव्यहन्तॄणां दण्डभेदाः]

सूनाध्यक्षः प्रदिष्टाभयानाम् अभयवनवासिनां च मृगपशुपक्षिमत्स्यानां बन्धवधहिंसायामुत्तमं दण्डं कारयेत् । कुटुम्बिनामभयवनपरिग्रहेषु मध्यमम् ।

श्रीमूला

सूनाध्यक्ष इति सूत्रम् । सूना भक्ष्यप्राणिवधस्थानं तदध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः । उत्तममध्यमाधमेषु कर्मसु तदनुरूपा अध्यक्षाः कार्याः इत्युक्तमधस्तात् । तत्र समाहर्तृसन्निधातृप्रभृतय उत्तमाः पौतवाध्यक्षादयो मध्यमाश्चाभिहिताः । इदानीमधमकर्माध्यक्षा अभिधीयन्त इति सम्बन्धः ।

तदाह—सूनाध्यक्ष इति । सूनाध्यक्षः, प्रदिष्टाभयानां प्रख्यापिताहिंसानाम्, अभयवनवासिनां च ब्रह्मसोमारण्यसर्वातिथिमृगवनादिवासिनां च, मृगपशुपक्षिमत्स्यानां च, बन्धवधहिंसायां बन्धनप्रहारमारणेषु, उत्तमम् उत्तमसाहसं, दण्डं कारयेत् । मृगाणां कुरङ्गादीनां पशूनां खड्गमहिषादीनां पक्षिणां मयूरादीनां मत्स्यानां च बन्धवधहिंसायां बन्धनप्रहारमारणेषु, उत्तमं उत्तमसाहसं, दण्डं कारयेत् । कुटुम्बिनाम्, अभयवनपरिग्रहेषु अभयवनवासिमृगादिविषये वधादौ, मध्यमं साहसं, कारयेत् ।

प्रतिपदपञ्चिका

सूनाध्यक्ष इति सूत्रम् ।

सूना वल्यानां भक्ष्यप्राणिनां वधस्थानम्, तस्या अध्यक्षो वध्यावध्यनियमनतदुपादेयाद्यधिकारी, स इहाभिधीयत इति सूत्रार्थः । सम्बन्धस्तूत्तममध्यमावरेषु कर्मसु तज्जातिकर्माध्यक्षं स्थापयेदिति ।

तत्र समाहर्तृसन्निधात्रादीनुत्तमान् पौतवाध्यक्षादींश्च मध्यमानभिधाय अधमानां सूनाध्यक्षादीनां वक्तव्यत्वेन सूनाध्यक्षोऽभिधीयत इति ।

तदाह—सूनाध्यक्ष इत्यादि । स प्रदिष्टभयानां निवारितहिंसानाम् अभयवनवासिनां ब्रह्मसोमारण्यसर्वातिथिमृगवनाभिवासिनां च मृगादीनां, मृगा एडका-

अप्रवृत्तवधानां मत्स्यपक्षिणां बन्धवधहिंसायां पादोनसप्तविंशतिपणमत्ययं कुर्यात्, मृगपशूनां द्विगुणम्। प्रवृत्तहिंसानामपरिगृहीतानां षड्भागं गृह्णीयात्। मत्स्यपक्षिणां दशभागं वाऽधिकं, मृगपशूनां शुल्कं वाऽधिकम् ॥

[स्थानविशेषेषु रक्षणीयाः प्राणिनः, अरक्षणे दण्डश्च]

पक्षिमृगाणां जीवत्षड्भागं अभयवनेषु प्रमुञ्चेत्। सामुद्रहस्त्यश्व-

---

प्रतिपदपञ्चिका

कुरङ्गादयः पशवो वन्याः खड्गमहिषादयः पक्षिणस्तित्तिरिमयूरादयः मत्स्याः प्रतीताः। तद्ग्रहणं कुलीरादीनामप्युपलक्षणार्थं, तेषामपि गुप्तिस्थानेषु रक्षणीयत्वात्तेषां बन्धहिंसायां तन्त्र्यादिबन्धनहंसमारणेषु उत्तमं दण्डं कारयेत्। कुटुम्बिनां कृषीवलानाम् अभयवनपरिग्रहेष्वभयवनसमीपक्षेत्रेषु मृगादीनां वधादिषु मध्यमदण्डं कारयेत्।

श्रीमूला

अप्रवृत्तेत्यादि। अप्रवृत्तवधानां चिरानुष्ठीयमानवधाः प्रवृत्तवधाः तथा न भवन्तीत्यप्रवृत्तवधाः तेषां, मत्स्यपक्षिणां बन्धवधहिंसायां, पादोनसप्तविंशतिपणम्, अत्ययं दण्डं, कुर्यात्। मृगपशूनां तथाविधानां, द्विगुणम् अर्धोनचतुष्पञ्चाशत्पणं दण्डं कुर्यात्।

प्रवृत्तेत्यादि। प्रवृत्तहिंसानाम्, अपरिगृहीतानाम् अस्वामिकारक्षितवनगतानां वधादौ, षड्भागं गृह्णीयात्। मत्स्यपक्षिणां, दशभागं वाधिकं दशमांशं ततोऽधिकं वा, गृह्णीयात्। मृगपशूनां, शुल्कं वाधिकं राजादेयं मृगपशुमूल्यस्य दशभागं ततोऽधिकं वा, गृह्णीयात्।

पक्षीत्यादि। पक्षिमृगाणां वनगृहीतानां, जीवत्षड्भागं जीवतां षड्भागम्, अभयवनेषु प्रमुञ्चेत्।

रक्ष्यप्राणिन आह—सामुद्रेत्यादि। सामुद्राः समुद्रभवाः हस्त्यश्वाद्याकृतयश्चेति

प्रतिपदपञ्चिका

अप्रवृत्तवधानां अप्रसिद्धहंसानां मत्स्यानां हस्तिपुरुषाद्याकृतीनां पक्षिणां क्रौञ्चोत्क्रोशप्रभृतीनां वडबद्धहंसानां पादोनसप्तविंशतिपणमयदण्डं कुर्यात्। मृगाणां रुरुपृषतादीनां पशूनां गोमहिष्यादीनां द्विगुणं सार्धं त्रिपञ्चाशत्पणम्।

प्रवृत्तवधानां राजभाव्यमाह—प्रवृत्तवधानामिति।

अनिषिद्धवधानां शुष्कमूल्यदशभागो वाधिकः, केचित्तु षड्भागमूल्यस्येति व्याचक्षते।

पुरुषवृषगर्दभाकृतयो मत्स्याः सारसाः नादेयाः तटाककुल्योद्भवा वा। क्रौञ्चोत्क्रोशकदात्यूहहंसचक्रवाकजीवञ्जीवकभृङ्गराजचकोरमत्तकोकिलमयूर-शुकमदनशारिका विहारपक्षिणो मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगाः हिंसाबाधेभ्यो रक्ष्याः। रक्षातिक्रमे पूर्वः साहसदण्डः॥

[मांसविक्रयविधिः]

[1]मृगपशूनामनस्थि मांसं सद्योहतं विक्रीणीरन्। अस्थिमतः प्रतिपातं दद्युः। तुलाहीने हीनाष्टगुणम्॥

श्रीमूला

विग्रहः तथाभूताः, मत्स्याः जलचरविशेषाः, तथा सारसाः सरश्चराः, नादेयाः नदीचराः, तटाककुल्योद्भवा वा तटाकभवाः कुल्याभवाश्च मत्स्याः, तथा क्रौञ्चोत्क्रोशकादयस्त्रयोदश पक्षिणः, तत्र क्रौञ्चः क्रुङ्नामा उत्क्रोशकः कुररः दात्यूहः कालकण्ठकः जीवञ्जीवकः पक्षिभेदः भृङ्गराजो धूम्याटः चकोरश्चन्द्रिकाप्रियः मदन-शारिके पक्षिजातिभेदौ, शेषाः प्रसिद्धाः, विहारपक्षिणः क्रीडार्थाः कुक्कुटादयः मङ्गल्या-श्चान्येऽपि प्राणिनः पक्षिमृगाः मङ्गलार्थाश्च गरुडभरद्वाजादय इतरेऽपि प्राणिनः पक्षिणो मृगाश्च, हिंसाबाधेभ्यः मारणपीडनेभ्यो रक्ष्याः। रक्षातिक्रमे तद्रक्षणाना-स्थायां, पूर्वः साहसदण्डः, सूनाध्यक्षस्य।

मांसविक्रयविधिमाह—मृगेत्यादि। मृगपशूनाम्, अनस्थि अस्थिविनाकृतं, मांसं, सद्योहतम् अयातयामम् अभिनवं, विक्रीणीरन्। अस्थिमतः अस्थियुक्तस्य मांसस्य, प्रतिपातं दद्युः। पातो हानिः तत्प्रतिनिधिः प्रतिपातः हीनप्रतीकारः तं दद्युः,

प्रतिपदपञ्चिका

पक्षिमृगाणां जीवग्राहं गृहीतानां षड्भागमादाय यवनादिषु मुञ्चेत्। पण्यार्थमप्रवृत्ते वधानामित्युक्तं दर्शयितुमाह—सामुद्रा इत्यादि। सामुद्राः समुद्रोद्भवा हस्त्यश्वपुरुषाद्याकृतयस्तद्रूपा प्राणिन उदकचारित्वेन मत्स्यव्यपदेशा नादेयाश्च तत्रा-नूपो जलाविलो देशः, शेषं प्रतीतम्। क्रौञ्चादयश्च पक्षिण उत्क्रोशो यः शब्दादि, मत्स्यः मीनोऽवपत्यमत्स्यान् गृह्णाति। दात्यूहश्चातकः। भृङ्गराजः कृष्णो धूमाट-काख्यः। मदनशुकसारिकाः तज्जात्व(ज्जात्य)न्तर्गताः, विहारपक्षिणः क्रीडार्थाः बाल-कुक्कुटादयः मङ्गलार्थाश्च, श्यामाभरद्वाजादयः। एवमन्येऽप्युक्तव्यतिरेकेण प्राणिनो द्विपदचतुष्पदसरीसृपभेदाः पक्षिणो मृगाश्च यथादेशप्रसिद्धमवगन्तव्यव्यपदेशाहिंसा-बाधेभ्यो रक्ष्याः। तेषां च कृते रक्षातिक्रमे वधबन्धाद्युपेक्षणेऽध्यक्षस्य पूर्वस्साहसदण्डः।

---

१. पशूनाम—इति प्र० प०।

[सर्वथा अवध्याः प्राणिनः, तद्वधे दण्डश्च]

वत्सो वृषो धेनुश्चैषामवध्याः। घ्नतः पञ्चाशत्को दण्डः, क्लिष्टघातं घातयतश्च ॥

[अविक्रेयमांसानि]

परिसूनम् अशिरःपादास्थि विगन्धं स्वयंमृतं न विक्रीणीरन्। अन्यथा द्वादशपणो दण्डः ॥

श्रीमूला

अस्थियोगहापितमांसमात्राप्रतिपूरणार्थामधिकमांसमात्रां दद्युरित्यर्थः। तुलाहीने हीनाष्टगुणं तुलोन्मानच्छद्मनिमित्तहानियोगिनि मांसे हीनमांसादष्टगुणं मांसं, दद्युः। तत्र चाष्टगुणेऽष्टभाग एव हापितपूरणार्थः क्रेतुः अवशिष्टास्तु अष्टभागाः सप्त सूनाध्यक्षस्येत्याह स्वामी।

वत्स इति। वत्सः स्तनन्धयः, वृषः रेतस्सेचनक्षमः, धेनुश्च प्रसवधर्मिणी गौश्च, एषां मृगपशूनाम् अनुज्ञातवधानामपि मध्ये, अवध्याः। घ्नतः वत्सादिमारयितुः, पञ्चाशत्कः पञ्चाशत्पणिकः दण्डः। क्लिष्टघातं घातयतश्च विचित्रव्यथोत्पादनदारुणो वधो यथा भवेत् तथा वधं कारयतश्च उक्त एव दण्डः।

अविक्रेयमांसान्याह—परिसूनमिति। परिसूनं सूना मांसपरिनिष्पादनस्थानं तत् परिवर्जितं यस्य तत् तथाभूतम् अर्थात् सूनातिरिक्तस्थलनिहतप्राणिदेहोद्धृतं मांसं, तथा विगन्धं अशिरःपादास्थि शिरःपादास्थिशून्यं वनहतखादितावशिष्टमृगाङ्गसम्बन्धि मांसं, तथा विगन्धं दुर्गन्धि मांसं, स्वयंमृतं च रोगमृतमांसं च, न विक्रीणीरन्। अन्यथा परिसूनादिविक्रये, द्वादशपणो दण्डः।

प्रतिपदपञ्चिका

विक्रयविधिमाह—पशूनामिति, पशुग्रहणं मृगाणामप्युपलक्षणार्थम्, अनस्थि अस्थिरहितं शुद्धमांसं विक्रीणीरन्। नन्वयुक्तमिदम्, उत्तरत्रानस्थिमांसविक्रयप्रतिषेधात्। तत्राह—अस्थिमतः प्रतिपातं(कं) दद्युरिति, अस्थिमतो मांसस्य यावन्मात्रमस्थि तावच्छुद्धं मांसमधिकं दद्युरिति, तुलाहीने हीनाष्टगुणं दद्युरिति वर्तते। तत्र भावितपूरणमात्रं क्रेतुरवशिष्टं सूनाध्यक्षस्य।

वत्सः स्तनन्धयः वृषः सेक्ता स्त्री प्रसवधर्मिणी एषां पशूनां वध्यानामप्येते न वध्याः तत्सन्तानाविच्छित्यर्थं रुन्धतो घ्नतो वत्सादीन् पञ्चाशत्पणो दण्डः। क्लिष्टं घातं दुःखमारिकया घातयतश्च पूर्व एव दण्डः।

परिसूनमिति। सूनास्थानं वर्जयित्वा अन्यस्मिन् देशे निहत्य अशिरः शिरोरहितम् एवमपादमनस्थि च तत्तच्चिह्नार्थं विगण्डं घुटितं स्वयंमृतं च रोगिणां मांसं न विक्रीणीरन्। अन्यथेति। परिसूनाशिरःपादादिविक्रये द्वादशपणो दण्डः।

[वध्याः मृगादयः]

दुष्टाः पशुमृगव्याला मत्स्याश्चाऽभयचारिणः ।
अन्यत्र गुप्तिस्थानेभ्यः वधबन्धमवाप्नुयुः ॥१०७॥

इत्यध्यक्षप्रचारे सूनाध्यक्षः षड्विंशोऽध्यायः,
आदितस्सप्तचत्वारिंशः ।

प्रतिपदपञ्चिका

अयं च परिसूनवधदण्डो ग्राम्यपशुविषयः अशिरः पादादिविक्रयदण्डश्चारण्यपशुविषयो द्रष्टव्यः ।

अभयवनचारिणां वधबन्धादिप्रतिषेधापवादः ।

श्रीमूला

अध्यायप्रान्ते श्लोकमाह—दुष्टा इति । अभयचारिणः अभयवनेषु रक्ष्यमाणाः, दुष्टाः हिंस्राः, पशुमृगव्यालाः पशवो गवयादयः, मृगाः शुनकादयः, व्याला व्याघ्रादयश्च, मत्स्याश्च शिशुमारादयः, गुप्तिस्थानेभ्योऽन्यत्र अभयवनेभ्योऽन्यस्मिन् स्थाने, समागता इति शेषः, वधबन्धम् अवाप्नुयुः । स एषाऽभयवनस्थपशुमृगादिवधस्य प्राक्प्रतिषिद्धस्य प्रतिप्रसवः ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षड्विंशोऽध्यायः सूनाध्यक्षः, आदितः सप्तचत्वारिंशः ॥

प्रतिपदपञ्चिका

अध्यायप्रान्ते श्लोकमाह—दुष्टा इत्यादि, दुष्टघातुकाः पशवो महिषादयः व्यालाः व्याघ्रसिंहादयः मत्स्याश्च कुलीरशिशुमारादयः ।

अभयचारिणोऽभयवनस्थाः अन्यत्र गुप्तिस्थानेभ्यो रक्षास्थानेभ्यः खातिकादिभ्यो ग्राहाद्यनवबन्धमाप्नुयुः । तेषु त्वन्यतोऽप्यानीय यत्नतो रक्षणीयाः । अन्यत्र वध्याश्चेति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायाम् अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे षड्विंशोऽध्यायः सूनाध्यक्षः,
आदितः सप्तचत्वारिंशोऽध्यायः ॥

चतुश्चत्वारिंशं प्रकरणम्

सप्तविंशोऽध्यायः ।

गणिकाध्यक्षः ।

[वेश्यास्त्रीणां स्थापनभरणयोर्विधिः]

गणिकाध्यक्षः गणिकान्वयामगणिकान्वयां वा रूपयौवनशिल्पसम्पन्नां सहस्रेण गणिकां कारयेत्, कुटुम्बार्धेन प्रतिगणिकाम् । निष्पतिताप्रेतयोर्दुहिता भगिनी वा कुटुम्बं भरेत । तन्माता वा प्रतिगणिकां स्थापयेत् । तासामभावे राजा हरेत् ॥

श्रीमूला

गणिकाध्यक्ष इति सूत्रम् । गणिका रूपाजीवाः तासामध्यक्षः, अर्थात् तद्व्यापार उच्यत इति सूत्रार्थः । 'रूपाजीवाः स्नानशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येद'-त्युक्तम् । तदध्यक्षस्त्वनुक्त इदानीमभिधीयते ।

गणिकाध्यक्ष इति । सः, गणिकान्वयां गणिकावंशभवाम्, अगणिकान्वयां वा, वाशब्देन गणिकात्वं प्रति वंशस्याप्रयोजकत्वे सूचिते गणिकात्वप्रयोजकं धर्ममाह— रूपयौवनशिल्पसम्पन्नां सौन्दर्यतरुणिमकलाकौशलशालिनीं स्त्रियं, सहस्रेण गणिकां कारयेत् नवकुटुम्बस्थापनार्थं रूप्यसहस्रदानेन गणिकास्थाने स्थापयेत्, वक्ष्यमाणनियोगानुष्ठानाय । अयमेकगणिकास्थापनपक्षः । अनेकगणिकास्थापनपक्षमाह—कुटुम्बार्धेनेति । कुटुम्बं गणिकाकुटुम्बकर्म राजपरिचर्यालक्षणं तस्यार्धेन अर्धमेकमनयानुष्ठेयमपरमन्ययेत्यर्धंशो विभजनेन, अथवा कुटुम्बस्थापनार्थदेयद्रव्यं कुटुम्बं तस्यार्धेन अर्धंशो दानेन, प्रतिगणिकां द्वितीयामपि कारयेत् । कुटुम्बार्धोक्त्या पूर्वोक्तस्य सहस्रस्याप्यर्धंशो विभज्य दानं गणिकाप्रतिगणिकयोरुक्तप्रायम् ।

निष्पतितेत्यादि । निष्पतिताप्रेतयोः प्रोषिताप्रमीतयोर्गणिकयोः, दुहिता, भगिनी वा, कुटुम्बं गणिकातन्त्रं, भरेत वहेत । अर्थात् तद्धनं च हरेत । तन्माता वा प्रतिगणिकां स्थापयेत्, दुहितृभगिन्योरभावे तन्मातैव तत्स्थानेऽन्यामादिश्य तत्कार्यं कारयेत् । तासां दुहितृभगिनीप्रतिगणिकामातॄणाम्, अभावे, राजा, हरेद् गणिकाधनम् ।

[तासां रूपवयोऽनुसारेण स्थानमानकल्पनावश्यकता]

सौभाग्यालङ्कारवृद्ध्या सहस्रेण वारं कनिष्ठं मध्यममुत्तमं वाऽऽरोपयेत्। छत्रभृङ्गारव्यजनशिबिकापीठिकारथेषु च विशेषार्थम्। सौभाग्यभङ्गे मातृकां कुर्यात् ॥

प्रतिपदपञ्चिका

गणिकाध्यक्ष इति सूत्रम्।

गणिका वक्ष्यमाणलक्षणाः, तासामध्यक्षो गणिकाध्यक्षः, तद्व्यापारोऽभिधीयत इति सूत्रार्थः। सम्बन्धस्तु सुरासूनाध्यक्षवद् व्याख्येयः। अथवा रूपाजीवाः स्नानशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येदित्युक्तम्।

तासामध्यक्षस्तत्प्रचारो वा नोक्तः, सोऽभिधीयत इति। तदाह—गणिकाध्यक्ष इत्यादि, स हि गणिकान्वयामगणिकान्वयां वा इत्यनेन गणिकात्वे रूपादय एव निमित्तं नान्वय इति व्याख्यातं भवति। तत्र रूपयौवने प्रतीते, शिल्पं गीतवाद्यादि वक्ष्यमाणं, तत्सम्पन्नां सहस्रेणेति कोशात् सहस्रं दत्वा सहस्रग्राहिणी गणिकेयमिति प्रसिद्ध्यर्थं गणिकां कारयेत् तत्पत्तिमाकोपयेत्, (तत्पदमारोपयेत्)।

कुटुम्बार्थे(र्धे)न तद्द्विगुणोऽर्धेन विभज्य तां प्रतिगणिकां द्वितीयां स्थापयेत्। निष्पतिताप्रेतयोः देशान्तरगतमात्रयोः भगिनी दुहिता वा कुटुम्बं भरेत। तदीयतन्त्रं रिक्थं वाऽधितिष्ठेत्। माता वा तस्या इति भगिनीदुहित्रभावे तस्या मातैव अन्यां प्रतिगणिकां तत्स्थाने स्थापयित्वा कुटुम्बं भरेत। तासां भगिन्यादीनां मातुश्चाभावे राजा तद्रिक्थं वा हरेत्। अनेन च गणिकानां पुत्रा अदायादा इत्याख्यातं भवति।

श्रीमूला

सौभाग्यालङ्कारवृद्ध्येति। सौभाग्यालङ्कारवृद्ध्यानुगुण्येन, सहस्रेण उपदापणसहस्रग्रहणेन, वारं नियोगं, कनिष्ठम् अधमम्, मध्यमम्, उत्तमं वा, आरोपयेद् दद्यात् तत्र कनिष्ठस्य सहस्रग्रहणे मध्यमस्य द्विसहस्रग्रहणम् उत्तमस्य त्रिसहस्रग्रहणमिति बोद्धव्यम्। किमर्थं कनिष्ठादिमारोपयेदित्यत्राह—छत्रभृङ्गारव्यजनशिबिकापीठिकारथेषु च विशेषार्थमिति। छत्रादिग्रहणादिकर्मसु अनुष्ठानप्रतिनियमार्थं, यद्वा तेषु यथायोगमनुष्ठीयमानेषु शोभोत्कर्षार्थम्। तत्रच्छत्रादिषु षट्सु मध्ये प्रथमद्विकं नियोगस्य कनिष्ठस्य द्वितीयद्विकं मध्यमस्य तृतीयद्विकमुत्तमस्येति क्रम औचित्यादवसेयः।

सौभाग्यभङ्ग इति। रूपयौवनापगमे वार्धकनिमित्ते, मातृकां कुर्यात् तावत्कालभुक्तां मातृस्थानीयां कुर्यात्, अर्थाद् भोग्यगणिकायाः।

[कस्याश्चन वेश्यायाः राजदास्यनिर्मोक्षेच्छायां, तस्याः
तत्पुत्रदास्योश्च निर्मोक्षमूल्यवृत्तिकल्पनादिविधिः]

निष्क्रयश्चतुर्विंशतिसाहस्रो गणिकायाः। द्वादशसाहस्रो गणिकापुत्रस्य। अष्टवर्षात् प्रभृति राज्ञः कुशीलवकर्म कुर्यात्। गणिकादासी भग्नभोगा कोष्ठागारे महानसे वा कर्म कुर्यात्। अविशन्ती सपादपणम्, अवरुद्धा मासवेतनं दद्यात् ॥

प्रतिपदपञ्चिका

सौभाग्यालङ्कारवृद्धयेति करणे सप्तम्यर्थे वा तृतीया, सहस्रेणेति सहस्रं गृहीत्वा वारं नियोगं कनिष्ठमधमं, यत्र तु सहस्रेण कनिष्ठः तदा द्वाभ्यां मध्यमः, त्रिभिरुत्तम इत्यारोपयेत् दद्यात्। तत्र छत्रभृङ्गारौ कनिष्ठवारगतानां तौ च व्यजनशिबिके च मध्यमवारगतानां च ते च विकोरथौ(थौ) चोत्तमवारगतानां विशेपार्थं सौभाग्यालङ्कारयोरतिशयार्थंमारोपयेदिति।

सौभाग्यभङ्गे वार्धकेन भोग्यत्वापगते मातृकां मातृस्थानीयामेनामन्यस्याः कुर्यात्।

श्रीमूला

गणिकात्वनिर्मोक्षविधिमाह—निष्क्रय इति। निष्क्रयः राजदास्यनिर्मोक्षमूल्यं, चतुर्विंशतिसाहस्रः चतुर्विंशतिसहस्रपणः, गणिकायाः। द्वादशसाहस्रो द्वादशसहस्रपणो निष्क्रयः, गणिकापुत्रस्य। निष्क्रयाभावे त्वाह—अष्टवर्षादिति। अष्टवर्षात् प्रभृति, राज्ञः, कुशीलवकर्म चारणकर्म, कुर्याद् गणिकापुत्रः।

गणिकादासीति। गणिकायाः परिचारिका, भग्नभोगा भोगार्हवयोऽतिक्रान्ता, कोष्ठागारे, महानसे वा, कर्म व्रीह्यवघातादिकं पाकपात्रमार्जनादिकं वा, कुर्यात्। अविशन्ती, कर्माकुर्वती, सपादपणं, मासवेतनं दद्याद् गणिकायै। का दद्यात्, अवरुद्धा पुरुषेण केनचिद् गृहेऽवरुध्यात्मैकभोग्यतां नीता गणिकादासी।

प्रतिपदपञ्चिका

निष्क्रयमाह-निष्क्रयश्चतुर्विंशतिसहस्रो गणिकाया इति गणिकाया राजदास्या निष्क्रयः प्रतिमोक्षणमूल्यं चतुर्विंशतिसाहस्रः, तावन्तं निष्क्रयं दत्वा स्वतन्त्रा भवति। तत्पुत्रस्य द्वादशसहस्र, तस्य निष्क्रयाभावे अष्टवर्षात्प्रभृति राज्ञः कुशीलवकर्मचारणतां कुर्यात्। गणिकाया दासी भग्नभोगा वृद्धा कोष्ठागारे कुट्टनादिकं महानसे वा रन्धनादिकर्म कारयेत्। अभग्नभोगा तु सैव अवरुद्धा नियतैकपुरुषगामिनी सपादपणं मासवेतनं गणिकायै दद्यात्। अपरे तु भग्नभोगैव यदा केनचिद् अवधृता भवति, तदा कर्मनिष्क्रयार्थं गणिकाध्यक्षाय दद्यात्।

[वेश्याभिः स्वायव्ययादिनिर्देशावश्यकता, भूषणानां रक्षणविधिः, उद्वेजकानां दण्डश्च]

भोगं दायमायव्ययमायतिं च गणिकायाः निबन्धयेत् । अतिव्ययकर्म च वारयेत् । मातृहस्तादन्यत्राभरणन्यासे सपादचतुष्पणो दण्डः, स्वापतेयं विक्रयमाधानं नयन्त्याः सपादपञ्चाशत्पणो दण्डः, चतुर्विंशतिपणो वाक्पारुष्ये, द्विगुणो दण्डपारुष्ये, सपादपञ्चाशत्पणः पणोऽर्धपणश्च कर्णच्छेदने ॥

[अतिचरतां कामुकपुरुषाणां दण्डः]

अकामायाः कुमार्या वा साहसे उत्तमो दण्डः, सकामायाः पूर्वः साहसदण्डः ।

श्रीमूला

भोगमिति । भोगं भोक्तृपुरुषदत्तं धनं, दायं मातृक्रमागतं धनम्, आयं भोगातिरिक्तलाभम्, व्ययम्, आयतिं च प्रभावं च, गणिकायाः, निबन्धयेत् पुस्तके लेखयेद्, गणिकाध्यक्षः । अतिव्ययकर्म च, वारयेत् प्रतिषेधयेत् ।

मातृहस्तादिति । मातृहस्त्रादन्यत्र प्रियविटादिहस्ते, आभरणन्यासे आभरणानां रक्षार्थेऽर्पणे, सपादचतुष्पणो दण्डः, गणिकायाः । स्वापतेयं स्वं वस्त्रभाजनादि, विक्रयम्, आधानं वा, नयन्त्याः, सपादपञ्चाशत्पणो दण्डः ।

चतुरित्यादि । चतुर्विंशतिपणः तावन्मानो दण्डः, वाक्पारुष्ये वाचा पराक्रोशे । द्विगुणः अष्टचत्वारिंशत्पणः, दण्डपारुष्ये करपादलगुडताडनादौ । सपादपञ्चाशत्पणः, पणोऽर्धपणश्च सार्धपण इत्यर्थः, कर्णच्छेदने दण्डः । तत्राद्यो राज्ञे देयः, द्वितीयस्तु गणिकाध्यक्षाय । त एते गणिकादण्डाः ।

प्रतिपदपञ्चिका

भोगं भागीयमपदिष्टसहस्रादिकं दायं मातृक्रमागतं रिक्थम् आयं भागीयव्यतिरिक्तलाभं व्ययं भक्तताम्बूलादिकं गणिकाया गणिकाध्यक्षो निबन्धयेत् । अतिव्ययकर्म अनुचितव्ययकारणं वारयेत् । मातृहस्तादन्यत्र आभरणन्यासे समर्पिते सपादचतुष्पणो गणिकायाः दण्डः । स्वापतेयमलङ्कारातिरिक्तं विक्रयाधानं नयन्त्यास्सपादपञ्चाशत्पणो दण्डः । चतुर्विंशतिपणो वाक्पारुष्ये दुरुक्तदोषे । द्विगुणोऽष्टचत्वारिंशत्पणोदण्डः दण्डपारुष्ये पादताडनादौ सपादपञ्चाशत्पणो राज्ञः पणार्धमर्धपणश्च, गणिकाध्यक्षस्य कर्णच्छेदने दण्डो देयः ।

श्रीमूला

अथ तत्कामुकपुरुशदण्डमाह—अकामाया इति । अकामाया इच्छारहितायाः, कुमार्याः, वाशब्दः प्रस्तावान्तरद्योतनार्थः, साहसे बलात्करणे, उत्तमो दण्डः उत्तमसाहसः । सकामायाः इच्छन्त्याः कुमार्याः, साहसे, पूर्वः साहसदण्डः ।

गणिकामकामां रुन्धतो निष्पातयतो वा, व्रणविदारणेन वा रूपमुपघ्नतः, सहस्रं दण्डः। स्थानविशेषेण वा दण्डवृद्धिः आ निष्क्रयद्विगुणात्, पणसहस्रं वा दण्डः ।

प्राप्ताधिकारां गणिकां घातयतो निष्क्रयत्रिगुणो दण्डः। मातृकादुहितृकारूपदासीनां घाते उत्तमः साहसदण्डः। सर्वत्र प्रथमेऽपराधे प्रथमः; द्वितीये द्विगुणः; तृतीये त्रिगुणः; चतुर्थे यथाकामी स्यात् ॥

श्रीमूला

गणिकामिति। गणिकाम्, अकामां, रुन्धतः स्वगृहे अवरुध्य वासयतः, निष्पातयतो वा निष्पतनं निर्मोक्षणं कारयतो वा, व्रणविदारणेन वा रूपम् उपघ्नतः व्रणहेतुना दन्तनखादिक्षतेन रूपं विकारयतो वा सहस्रदण्डः। स्थानेत्यादि। स्थानविशेषेण वा शरीरगततत्तत्स्थानविशेषानुरूप्येण वा, दण्डवृद्धिः उक्तस्य सहस्रदण्डस्य वृद्धिः गुणनिका कल्पनीया। आ कुत एषा वृद्धिकल्पनेत्याह—आनिष्क्रयद्विगुणात्, निष्क्रयश्चतुर्विंशतिसाहस्रो य उक्तस्तस्य द्विगुणम् अष्टाचत्वारिंशत्साहस्रमभिव्याप्य। तदुपरि शरीरावयवोपघातनिमित्ता दण्डवृद्धिर्नास्तीत्यर्थः। स्वामी तु स्थानविशेषेण वेति प्रतीकमुपादाय व्याचष्टे—"उत्तमादिवारप्राधान्येन दण्डवृद्धिः कल्पनीया। आ कुत इत्याह—आ निष्क्रयद्विगुणादिति। निष्क्रयश्चतुर्विंशतिसाहस्रः तद्द्विगुणोऽष्टाचत्वारिंशत्साहस्रः" इति। आ निष्क्रयद्विगुणादित्येतदनन्तरं 'पणसहस्रं वा दण्डः' इति वाक्यम् अर्थशास्त्रादर्शेषु पठ्यते। तत्तु स्वामिटीकाभाषयोरननुसंहितत्वात् पूर्वोत्तरग्रन्थानाकाङ्क्षितत्वाच्च प्रक्षिप्तं मन्यमानैर्न व्याख्यातमस्माभिः। प्राप्ताधिकारामिति। लब्धच्छत्रभृङ्गारादिनियोगां, गणिकां, घातयतः, निष्क्रयत्रिगुणः द्वासप्ततिसाहस्रपणो, दण्डः। मातृकादुहितृकारूपदासीनां घाते कुट्टन्याः कुमार्याः प्रतिकर्मदास्या वा ताडने, उत्तमः साहसदण्डः।

सर्वत्रेति। सर्वस्मिन्, प्रथमेऽपराधे यो य उक्तस्तस्मिंस्तस्मिन्निदम्प्रथमकृतेऽपराधे, प्रथमः यो य उक्तो दण्डः स स प्रथम इत्यर्थः। द्वितीये तस्मिंस्तस्मिन्नपराधे पुनरारब्धे, द्विगुणः स स दण्डः कार्य इति शेषः। तृतीये त्रिगुणः। चतुर्थेऽपराधे, यथाकामी स्यात् चतुर्गण-सर्वस्वहरण—प्रवासनादिरूपं दण्डं स्वेच्छानुरोधेन विदध्यादित्यर्थः।

प्रतिपदपञ्चिका

गणिकादण्डमभिधाय पुरुषस्याह-अकामाया इति। अनिच्छन्त्याः कुमार्याः गणिकादुहितुः साहसे बलात्करणे उत्तमस्साहसदण्डः सकामायास्तु पूर्वस्साहसदण्डः

[अतिचरन्तीनां वेश्यानां तद्धनाद्यपहर्तॄणामन्येषां च दण्डः]

राजाज्ञया पुरुषमनभिगच्छन्ती गणिका शिफासहस्रं लभेत; पञ्चसहस्रं वा दण्डः। भोगं गृहीत्वा द्विषत्याः भोगद्विगुणो दण्डः। वसतिभोगापहारे भोगमष्टगुणं दद्यात् अन्यत्र व्याधिपुरुषदोषेभ्यः। पुरुषं घ्नत्याः चिताप्रदापोऽप्सु प्रवेशनं वा ॥

प्रतिपदपञ्चिका

पञ्चधर्मस्थीयापवादो दण्डः। केचिदिह साहसं प्रकरणमाचक्षते, तच्चासत्, तद्दण्डस्याभिहितत्वात्। उक्तं हि गणिकादुहितरं प्रकुर्वतश्चतुष्पञ्चाशत्पणो दण्डः।

शुल्कं मातृबलाद्वारयतः निष्पातयतो विनाशयतो व्रणविदारणेन वा नखदशनादिक्षतेन रूपमुपघ्नतो विनाशयतः सहस्रदण्डः। स्थानविशेषेणेति उत्तमादिवारप्राधान्येन दण्डवृद्धिः कल्पनीया। कुत इत्याह—आनिष्क्रयद्विगुणादिति, निष्क्रयश्चतुर्विंशतिसाहस्रस्तद्विगुणोऽष्टचत्वारिंशत्साहस्रः।

प्राप्ताधिकारां लब्धच्छत्रादिनियोगां गणिकां घातयतो निष्क्रयत्रिगुणो दण्डः।

मातृकाकुट्टनी दुहितृका तस्या एव कुमारिका रूपदासी गन्धमालादिकर्मकरी तासामेकां घातयतः उत्तमस्साहसदण्डः। सर्वत्रेति। यो यस्मिन् अपराधे दण्डः अभिहितः, सः प्रथमेऽपराधे कर्तव्यः, द्वितीये द्विगुणः, तृतीये त्रिगुणः। चतुर्गुणसर्वस्ववधादियोजनीयस्साहस्रः गौरवादिति।

श्रीमूला

राजाज्ञयेति। राजाज्ञानुरोधेन, पुरुषमनभिगच्छन्ती, गणिका, शिफासहस्रं कशाघातसहस्रम्, दण्डं लभेत। पञ्चसहस्रं वा दण्डः शिफासहस्राभावपक्षे पञ्चसहस्रपणात्मको दण्डः।

भोगमिति। भोगं सम्भोगवेतनं, गृहीत्वा द्विषत्याः भोगदं पुरुषमरोचयमानायाः, भोगद्विगुणो दण्डः। वसतीत्यादि। वसतिभोगापहारे वसतिभोगस्य रात्रिसम्भोगस्य अपहारे कथादिव्याजेन कालयापने, भोगं सम्भोगवेतनं गृहीतम्, अष्टगुणं दद्यात्। तत्रापवादः—अन्यत्र व्याधिपुरुषदोषेभ्य इति। व्याधयः कुष्ठादयः पुरुषदोषा अरागत्वादयः तद्व्यतिरेकेण।

पुरुषमिति। पुरुषं घ्नत्याः मारयन्त्याः, चिताप्रतापः तेनैव सह चितायामारोप्य दहनम्, अप्सु प्रवेशनं वा गलमहाशिलाबन्धेन जलनिमज्जनं वा कर्तव्यम्।

प्रतिपदपञ्चिका

राजाज्ञया राजादेशेन पुरुषमगच्छन्ती गणिका शिफासहस्रं कशाप्रहारसहस्रं दण्डं लभेत। भोगं गृहीत्वा भोगदण्डं पुरुषं द्विषन्त्याः तमनिच्छन्त्याः दण्डः। वसति भोगापहारे

गणिकाभरणम् अर्थं भोगं वाऽपहरतोऽष्टगुणो दण्डः । गणिका भोगम् आयतिं पुरुषं च निवेदयेत् ॥

[उक्तार्थानां नटादिष्वप्यतिदेशः, नटादिभिर्देया राजभागाश्च]

एतेन नटनर्तकगायकवादकवाग्जीवनकुशीलवप्लवकसौभिकचारणानां स्त्रीव्यवहारिणां स्त्रियो गूढाजीवाश्च व्याख्याताः । तेषां तूर्यमागन्तुकं पञ्चपणं प्रेक्षावेतनं दद्यात् । रूपाजीवा भोगद्वयगुणं मासं दद्युः ॥

— ———

प्रतिपदपञ्चिका

वसत्यां भोगरात्रौ वासगृहे वा भोगापहारे अनुपचारणे कथादिव्याजेन कालातिगमने वा भोगमष्टगुणं दद्यात् । अन्यत्र व्याधिपुरुषदोषेभ्य इति । व्याधिभ्यः कुष्ठप्रमेहादिभ्यः पुरुषदोषेभ्यश्चारागत्वादसह्यं दन्तनखप्रहारादिभ्यश्च । पुरुषवधे गणिकायाश्चिताप्रताप इति, तेनैव सह दहनमप्सु निमज्जनं वा महाशिलां गले बध्वाऽधोनयनम् । गणिकाभरणमलङ्कारमर्थं तद्व्यतिरिक्तं वस्तु हिरण्यादिकं भोगं वसतिवेतनं वा अपहरतः कामुकस्याष्टगुणं दण्डं कुर्यात् ।

श्रीमूला

गणिकाभरणमिति । गणिकाया आभरणम्, अर्थं तदन्यद् वा वस्तु, भोगं वा सम्भोगवेतनं वा, अपहरतः, अष्टगुणः अपहृतद्रव्याष्टगुणः, दण्डः । गणिकेति । सा, भोगम् आयतिं तन्मूलमायम्, पुरुषं च कृतवासम्, निवेदयेत् ।

एतेनेति । उक्तेन गणिकाकल्पेन, नटादीनां दशानां, स्त्रियः, गूढाजीवाश्च प्रच्छन्नव्यभिचारजीविन्यश्च, व्याख्याताः उक्ताः, त एते गणिकाविधय एव यथासम्भवामासु योजनीया इत्यर्थः । तत्र नटा अर्थाभिनयजीविनः, नर्तकाः गात्रविक्षेपमात्रकारिणः, गायका कण्ठगायिनः, वादकाः वैणिकादयः, वाग्जीवनाः कथकाः, कुशीलवा नर्तकीप्रधानाः, प्लवका रज्ज्वारोहकाः, सौभिका 'ऐन्द्रजालिकाः छायाग्राहका इत्यपरे' इति स्वामी, चारणाः विटमल्लादयः, स्त्रीव्यवहारिणो बन्धकीकुटुम्बिनः । चारणानां स्त्रीव्यवहारिणामिति व्यस्तपाठोऽपि ।

तेषामिति । तेषां, तूर्यं नटनर्तकादिमेलकम्, आगन्तुकं विदेशादागतं, पञ्चपणं प्रेक्षावेतनं स्वकलाप्रकाशनार्थं वेतनं, दद्याद् राज्ञे ।

रूपाजीवा इति । गणिकाः, भोगद्वयगुणं दिवसद्वयलाभं, मासं मासद्वयं, दद्युः ।

प्रतिपदपञ्चिका

गणिकाभोगं पुरुषं चेति । वसत्यां भोगं भोगनिमित्तामायतिं पुरुषं वसन्तं च पुरुषं गणिकाध्यक्षस्य निवेदयेत् रक्षाविधानार्थम् ।

[कलापाठकानाम् अभ्यस्तकलानां गणिकादीनां च सौकर्यपरिकल्पनम्]

गीतवाद्यपाठ्यनृत्तनाट्याक्षरचित्रवीणावेणुमृदङ्गपरचित्तज्ञानगन्धमाल्य-संयूहनसम्पादनसंवाहनवैशिककलाज्ञानानि गणिकाः दासीः रङ्गोपजीविनीश्च ग्राहयतो राजमण्डलादाजीवं कुर्यात्। गणिकापुत्रान् रङ्गोपजीविनश्च मुख्यान्निष्पादयेयुः सर्वतालावचराणां च ॥

प्रतिपदपञ्चिका

एतेनेति । गणिकाकल्पेन यथोक्ते नटादीनां स्त्रियो गूढाजीवा छन्नबन्धक्यो यथायोगं व्याख्याताः । तासामपि मातृहस्तादन्यत्राभरणन्यासे सपादचतुष्पणो दण्ड इत्यादयो यथासम्भवं योज्याः ।

तत्र नटनर्तकाः प्रतीताः वाग्जीवनाः कथकचारणादयः, कुशीलवाः नर्तकी-प्रधानाः प्लवकाः परत्रारोहकाःसौभिकाः ऐन्द्रजालिकाः छायाग्राहका इत्यपरे, चारणा-पिड्गदूत-धूर्तादयः स्त्रीव्यवहारिणो बन्धकीपोषकाः तेषां तूर्य नगादिपेटकमागन्तुक-मन्यदेशागतं प्रेक्षामूल्यं पञ्चपणं दद्यात् । रूपाजीवाः सर्वा वेश्या भोगद्वयं दिवसद्वयं लाभं मासस्यं दद्युः ।

श्रीमूला

गीतवाद्येत्यादि । गीतादीनां कालान्तानां षोडशानां ज्ञानानि, गणिकाः पूर्वोक्ताः दासीरङ्गोपजीविनीश्च दासीर्गणिकातिरिक्तवेश्याः रङ्गोपजीविनीर्नटादिस्त्रि-यश्च, ग्राहयतः शिक्षयत आचार्यस्य राजमण्डलाद् राज्ञो यन्मण्डलं नगरग्रामादि-समूहोत्थमायजातं तत्सकाशाद्, आजीवं वृत्तिं, कुर्यात् कल्पयेद् राजा । तत्र गीतवाद्ये प्रसिद्धे, पाठ्यमाख्यायिकादि, नृत्तं पदार्थाभिनयः, नाट्यं वाक्यार्थाभिनयः, अक्षरं लिपिः, चित्रम् आलेख्यकर्म, वीणा वेणुर्मृदङ्गश्च प्रसिद्धाः, परचित्तज्ञानं परेङ्गिताकार-वेदनं, गन्धमाल्यसंयूहनसम्पादने गन्धसंयूहनं गन्धयुक्तिः, माल्यसम्पादनं माल्यगुम्फनं, संवाहनमङ्गमर्दनं, वैशिकं दत्तकाचार्यादितन्त्रं, कलाः उक्तातिरिक्ताश्चतुष्षष्ट्यन्तर्गताः कलाविद्याः ।

गणिकेत्यादि । गणिकापुत्रान्, रङ्गोपजीविनश्च, मुख्यान् निष्पादयेयुः प्रधानान् आचार्यादिस्थानीयान् कुर्युः । केषां, सर्वतालावचराणां च सर्वेषामपि रङ्गोपजी-विनाम् ।

प्रतिपदपञ्चिका

गीतवाद्येत्यादि । तत्र गीतवाद्ये प्रतीते । पाठ्यमाख्याख्यायिकादि,नृत्तं नर्तकीप्रयोज्यम् अक्षराणि लिपयश्चित्रमालेख्यं वीणावेणू प्रतीतौ, तयोश्च वाद्यग्रहणेन गृहीतत्वात् प्राधान्यज्ञापनार्थं पुनरुपादानम्। परचित्तज्ञानमिङ्गिताकारवेदनं, गन्धसंयूहनं

[नटयादिस्त्रीवशीकरणावश्यकता]

संज्ञाभाषान्तरज्ञाश्च स्त्रियस्तेषामनात्मसु ।
चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः ॥१९८॥

इत्यध्यक्षप्रचारे गणिकाध्यक्षः, सप्तविंशोऽध्यायः,
आदितोऽष्टचत्वारिंशः ।

प्रतिपदपञ्चिका

गन्धयुक्तिः माल्ययूहनं माल्यग्रथनं संवाहनमङ्गमर्दनं संवादनं प्रियवचनरचनाचातुर्यं वैशिकं दत्तकादिकामतन्त्रज्ञानं कलाज्ञानमुक्तव्यतिरिक्तशयनोपचारादिककलाविद्यासु वैदग्ध्यम्, केचित्तु वैशिककलाज्ञानमित्येकमेव पठन्तो बाह्यान्तश्चतुरषष्टिकलापरिज्ञानमाचक्षते। ज्ञानशब्दः प्रत्येकम्, गणिका व्याख्याताः। दासीः शेषवेश्याः रङ्गोपजीविनः नटादिस्त्रियश्च, चस्समुच्चये, ग्राहयतस्तत्तदाचार्यस्य राजमण्डलादाजीवं वृत्तिं कारयेत्। गणिकापुत्रा रङ्गोपजीविनो नटादयः तेषां मुख्यान्नायकपात्राणि नाट्याचार्यान्निष्पादयेयुः सर्वतालापचारांश्चेति वक्ष्यमाणेन श्लोकेन सह सम्बन्धः।

श्रीमूला

प्रान्ते श्लोकमाह—संज्ञेत्यादि। संज्ञाभाषान्तरज्ञाः सङ्केतविशेषज्ञाः भाषाविशेषज्ञाश्च, तेषां तालावचराणां, स्त्रियः, अनात्मसु अजितेन्द्रियेषु दूष्येषु, चारघातप्रमादार्थं चाराणां परप्रयुक्तगूढपुरुषाणां घातार्थं रहोविस्रम्भवधार्थं च विषयासक्तिजननेन स्वकर्तव्योपेक्षोत्पादनार्थं च, प्रयोज्याः विधेयीकृत्य प्रयोक्तव्याः राज्ञा। विधेयत्वार्थमाह—बन्धुवाहना इति। बन्धुभिरर्थदानशीकृतैर्वाह्यमाना यथाराजादेशं नीयमानाः।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तविंशोऽध्यायः गणिकाध्यक्षः, आदितोऽष्टाचत्वारिंशः ॥

प्रतिपदपञ्चिका

राज्ञः सङ्केतविशेषविदः भाषान्तरज्ञाः भाषाविशेषज्ञाः स्त्रियः तेषां नटादीनां सम्बन्धिन्यः अनात्मस्वजितेन्द्रियेषु चारघातार्थं तदुपलब्धपरप्रयुक्तगूढपुरुषमप्रयोज्याः प्रयोक्तव्याः बन्धुबान्धवाः अर्थादिनोपगृहीततदासबन्धुवर्गवशीकृता इति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायां अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे सप्तविंशोऽध्यायः गणिकाऽध्यक्षः।
अदितस्सप्तचत्वारिंशोऽध्यायः ॥

पञ्चचत्वारिंशं प्रकरणम्

अष्टाविंशोऽध्यायः ।

नावध्यक्षः ।

[नावध्यक्षव्यवस्थापनीयाः तरपण्यराजदेयादयः]

नावध्यक्षः समुद्रसंयाननदीमुखतरप्रचारान् देवसरोविसरोनदीतरांश्च स्थानीयादिष्ववेक्षेत । तद्वेलाकूलग्रामाः क्लृप्तं दद्युः । मत्स्यबन्धका नौकाभाटकं षड्भागं दद्युः । पत्तनानुवृत्तं शुल्कभागं वणिजो दद्युः । यात्रावेतनं राजनौभिः सम्पतन्तः । शङ्खमुक्ताग्राहिणो नौभाटकान् दद्युः, स्वनौभिर्वा तरेयुः । अध्यक्षश्चैषां खन्यध्यक्षेण व्याख्यातः ॥

श्रीमूला

नावध्यक्ष इति सूत्रम् । नावां यानपात्राणाम् अध्यक्ष आदेयभागाधिकृत इत्यर्थः । समाहर्तृकर्मण्यात्मरक्षितके च नावोऽभिहिताः । तदध्यक्षस्त्वनुक्त इहाभिधीयते ।

नावध्यक्ष इति । सः, समुद्रसंयाननदीमुखतरप्रचारान् समुद्रकूलसमीपयानस्य नदीसमुद्रसङ्गमतरणस्य च मार्गान्, देवसरोविसरोनदीतरांश्च देवसरः सदाजलसमृद्धं महासरः, विसरः शोष्यसरः, नदी प्रसिद्धा, एषां तरणमार्गांश्च स्थानीयादिषु स्थानीयद्रोणमुखखार्वटिकसङ्ग्रहग्रामेषु, अवेक्षेत ।

तद्वेलेत्यादि । तद्वेलाकूलग्रामाः समुद्रतटमहासरःप्रभृतितीरवर्तिग्रामवासिनः, क्लृप्तं कल्पितं किमपि तरणार्थं राजादेयं, दद्युः नौत्यापारसततोपयोगात् । तदभावान्नान्ये जानपदास्तद् दद्युः ।

मत्स्येत्यादि । मत्स्यबन्धका दाशाः, नौकाभाटकं राजकीयाया नौकाया अवक्रयं, षड्भागं मत्स्यषष्ठभागं, दद्युः । पत्तनानुवृत्तं पण्यपत्तनसिद्धं, शुल्कभागं शुल्कार्थं भागं पण्यमूल्यस्य पञ्चमभागं षष्ठभागं वा, वणिजः, दद्युः । शुल्काध्यक्षग्राह्य एवायं शुल्कभाग इहोक्तः, तदतिरिक्तप्रार्थना नावध्यक्षेण मा कारीत्येतदर्थम् । यात्रावेतनं, राजनौभिः, सम्पतन्तः गतागतं कुर्वन्तः, दद्युर्यथाप्रसिद्धम् । शङ्खमुक्ताग्राहिणः नौभाटकं दद्युः, विशेषाकथनाद् उक्तमत्स्यबन्धकवत् षड्भागम् । स्वनौभिर्वा तरेयुः । एषां स्वनौतरणाभ्यनुज्ञानान्मत्स्यबन्धानां स्वनौतरणप्रतिषेधो गम्यते । नौहाटकमित्यपपाठः । नौविभागमिति तु व्याख्यापाठः ।

[पालनीयाः अनुग्राह्याः ध्वंसनीयाश्च नावः]

पत्तनाध्यक्षनिबन्धं पण्यपत्तनचारित्रं नावध्यक्षः पालयेत् । मूढ·

श्रीमूला

अध्यक्षश्चेति । नावध्यक्षस्य, एषां शङ्खादीनाम् विषये, खन्यध्यक्षेण व्याख्यातः खन्यध्यक्षवद् भाटकलब्धशङ्खादीनां कर्मान्तान् पण्यव्यवहारं च नावध्यक्षः कारयेदित्यर्थः ।

प्रतिपदपञ्चिका

नावध्यक्ष इति सूत्रम् ।

नावो यानपात्राणि तेषामादेयभागकादिप्रतिजागरणाधिकारी नावध्यक्ष इति सूत्रार्थः । सम्बन्धस्तु समाहर्तृकर्मणि राष्ट्रान्तर्गतं नदीपालास्तारा नावो वा इति आत्मरक्षिके चानाप्तनाविकाधिष्ठितामन्येन प्रतिवद्धामिति नाव उक्तास्तदध्यक्षस्तु-नोक्तः, सोऽभिधीयत इति ।

तमाह—नावध्यक्ष इत्यादि । स समुद्रसंयानादितीरप्रचारान् स्थानीया-दिष्ववेक्षेत प्रतिजागृयात् । तत्र समुद्रयानं कूलसमीपेन गमनं समुद्रवर्जन्यायात् ग्राह्यम्, नदीमुखं नदीसमुद्रसङ्गमः, तेषां तीरप्रचारान् तरणमार्गान् देवसरस्सदाविशोष्यं महासरो विसरस्तद्विपरीतं नदीतराश्च मुखव्यतिरेकेण सर्वनदीनां, चस्समुच्चये, स्थानीयादिषु स्थानीयद्रोणमुखखार्वटिकसङ्ग्रहग्रामेष्ववेक्षत । तद्वेला कूलग्रामा इति समुद्रादितीरनिवासग्रामाः । क्लृप्तमिति, किंचिदुचितपरिकल्पितं दद्युः, नान्य-जानपदं सामान्यं, तेषां नौव्यापारेण सदोपयोगात् मत्स्यबन्धा धीवराः नौविभावकं राजनावमक्रयं षड्भागं बन्धमत्स्यानां दद्युः ।

पत्तनानुवृत्तमिति । पण्यपत्तनं प्रसिद्धम्, शुल्कभागमिति । शुल्कनिमित्तं भागं पण्यमूल्यात् पञ्चमं षष्ठं वा यथाप्रतिष्ठं वणिजः पण्यविक्रयिणो दद्युः । नन्वयं शुल्काध्यक्षव्यापार इति चेत् सत्यम्, तदधिकप्रार्थना नावध्यक्षेण निवारणीयेति तदर्थमिह वचनम् ।

यात्रावेतनं चेति । लुप्तनिर्दिष्टश्चकारो द्रष्टव्यः । गत्यास्समभागकं च राजनौभि-स्सम्पतन्तः पत्तनानुवृत्तमेव दद्युः । शङ्खमुक्ताग्राहिणस्तु नौविभागकं मत्स्यबन्धकवत् भागं दद्युरिति केचित् । देयभागस्य अनिर्देशात् पूर्ववद् यथाप्रसिद्धं स्वपरिकल्पितं वा दद्युरित्यपरे । स्वनौभिर्वा तरेयुरमी शङ्खमुक्ताग्राहिणः मत्स्यबन्धकास्तु राजनौभिरेव । अध्यक्षश्चैषां शङ्खादीनां खन्यध्यक्षेण व्याख्यात इति । यथा खन्यध्यक्षश्शङ्खादि-कर्मान्तान् कारयति, तथा नावध्यक्षोऽपि तद्भागकाद्यधिगतानां शङ्खादीनां तान् कर्मान्तान् पण्यव्यवहारांश्च कारयेत् ।

श्रीमूला

पत्तनेत्यादि । पत्तनाध्यक्षनिबन्धं पत्तनाध्यक्षप्रतिष्ठापितं, पण्यपत्तनचारित्रं पण्यपत्तनाचारं, नावध्यक्षः, पालयेत् नातिवर्तेत ।

वाताहतां तां पितेवानुगृह्णीयात् । उदकप्राप्तं पण्यमशुल्कमर्धशुल्कं वा कुर्यात् । यथानिर्दिष्टाश्चैताः पण्यपत्तनयात्राकालेषु प्रेषयेत् । संयान्तीर्नावः क्षेत्रानुगताः शुल्कं याचेत । हिंस्रिकाः निर्घातयेत्, अमित्रविषयातिगाः पण्यपत्तनचारित्रोपघातिकाश्च ।

[पात्रकालादिव्यवस्थया सनियन्त्रणं नौप्रवर्तनं
नियमोल्लङ्घिनां दण्डस्तदपवादश्च]

शासकनियामकदात्ररश्मिग्राहकोत्सेचकाधिष्ठिताश्च महानावो हेमन्त-

---

श्रीमूला

मूढवाताहतामिति । दिङ्मोहापयातां वाताहतां विपरीतवाताकुलितां च, तां नावं, पितेव, अनुगृह्णीयात् तारयेत् । उदकप्राप्तं जलदूषितं, पण्यम्, अशुल्कम्, अर्धशुल्कं वा, कुर्यात् तच्छेदानुरूप्येण ।

यथानिर्दिष्टाश्चेति । अशुल्का अर्धशुल्का वा, एता नावः, पण्यपत्तनयात्राकालेषु, प्रेषयेद् असङ्गं विसृजेत् । संयान्तीर्गच्छन्तीः, नावः, क्षेत्रानुगताः शुल्कस्थानगताः, शुल्कं याचेत । इह शुल्कस्य याचनं न वक्तव्यं सिद्धत्वात्, तदिहोच्यते शुल्कतोऽधिकं मा याचीत्युपदेशार्थम् । हिंस्रिकाः हिंस्राश्चोरादयः तद्वतीः, नावः, निर्घातयेत् । अमित्रविषयातिगाः शत्रुदेशयायिनीः, पण्यपत्तनचारित्रोपघातिकाश्च नावः, निर्घातयेत् ।

प्रतिपदपञ्चिका

पत्तनाध्यक्षनिबन्धनं तेन प्रतिष्ठानीतं पण्यपत्तनं चरित्रं तदाचारं नावाध्यक्षः पालयेत् ।

मूढवाताहतामिति । मूढा दिङ्मोहादपयातानां वाताहतामनिष्टवातेन अनभिप्रेता तद्द्वीपमायातां नावं पितेवानुगृह्णीयात् । अन्येषामपि अनुरागार्थम् उदकप्राप्तं समुद्रोदकमिति दूषितं पण्यमशुल्कं शुल्करहितमर्धशुल्कं वा दद्युः ।

चरित्रे परे प्रसिद्धार्थानां शुल्कं वा कुर्यात् । तिमित पण्यश्चेदुपेक्षया विकल्पः, यथा निर्दिष्टाश्चैता इति उच्छुल्का अर्धशुल्का वैता नावः पण्यपत्तनयात्राकालेषु यो यस्य पत्तनस्य यात्राकालस्तस्मिन् विसृजेत् न विघातयेत् ।

संयान्तीरिति । संयान्तारतिक्रान्ता वा नावः क्षेत्रानुगता स्वतीरशुल्कगोचरप्राप्ताः शुल्कं याचेत शुल्कग्रहणमधिकनिवृत्त्यर्थम् । हिंस्रिकास्तस्करनावा निर्घातयेत् प्रतिनौभिरुच्छिन्द्यात् अमित्रविषयातिगाः शत्रुविषयाभिगामिनः पण्यपत्तनचारित्रोपघातिकाश्च नयेदिति वर्तते ।

श्रीमूला

शासकेत्यादि । शासकादिपञ्चकाधिष्ठिताश्च शासको निदेष्टा नियामकः पोत-

ग्रीष्मतार्यासु महानदीषु प्रयोजयेत्। क्षुद्रिकाः क्षुद्रिकासु वर्षास्राविणीषु। बद्धतीर्थाश्चैताः कार्याः राजद्विष्टकारिणां तरणभयात्। अकालेऽतीर्थे च तरतः पूर्वः साहसदण्डः। काले तीर्थे च अनिसृष्टतारिणः पादोनसप्तविंशतिपणः तरात्ययः। कैवर्तकाष्ठतृणभारपुष्पफलवाटपण्डगोपालकानामनत्ययः सम्भाव्यदूतानुपातिनां च सेनाभाण्डप्रचारप्रयोगाणां च; स्वतरणैस्तरतां, बीजभक्तद्रव्योपस्करांश्चानूपग्रामाणां तारयताम्।

श्रीमूला

वाहः दात्रग्राहको लवित्रग्राही रश्मिग्राहकः प्रग्रहग्राही उत्सेचकः प्रविशज्जलापनेता एतैरपायप्रतिविधायिभिरध्यासिताश्च, महानावः, हेमन्तग्रीष्मतार्यासु अवर्षाकालेऽपि नौतरणीयासु, महानदीषु सिन्धुसरयूप्रभृतिषु, प्रयोजयेत्। क्षुद्रिकाः क्षुद्रनावः, क्षुद्रिकासु वर्षास्राविणीषु वर्षाकालमात्रतरणीयजलासु कुनदीषु, प्रयोजयेदिति वर्तते।

बद्धेत्यादि। बद्धतीर्थाश्च बद्धाः संयताः सनियन्त्रणाः कृतारक्षा इति यावत्। तीर्था अवतारा यासां तास्तथाभूताः, एताः नावः, कार्याः। कुतः, राजद्विष्टकारिणां शत्रुप्रयुक्ततीक्ष्णरसदादीनां, तरणभयात्।

नियन्त्रणविधिमाह—अकाल इति। अकाले निशीथादौ, अतीर्थे अघट्टे च तरतः पूर्वः साहसदण्डः। काले तीर्थे च, अनिसृष्टतारिणः अननुज्ञातस्य तरतः, पादोनसप्तविंशतिपणः, तरात्ययः तरणदण्डः।

तरणदण्डापवादमाह—कैवर्तेत्यादि। कैवर्तादीनां कैवर्तानां धीवराणां काष्ठवाहिनां तृणवाहिनां पुष्पवाटपालकानां फलवाटपालकानां पण्डपालकानां गोपालकानां च, अनत्ययः अदण्डः। सम्भाव्यदूतानुपातिनां च सम्भाव्यम् अनुपतनीयतया शङ्कितं चोरादिमनुपततां दूतं राजदूतं कार्यशेषार्थमनुपततां च, अनत्यय इत्यनुपज्यते। सेनाभाण्डचारप्रयोगाणां च सेनोपकरणगूढपुरुषप्रयोगाणां च, अनत्ययः। स्वतरणैः स्वकीयैस्तरणसाधनैः बाह्वलाबूभस्त्रादिभिः, तरतां, बीजभक्तद्रव्योपस्करांश्च बीजं वापार्थं भक्तं कर्मकराशनं द्रव्यं पुष्पफलशाकादि उपस्करः वेशवारः इत्येतांश्च, अनूपग्रामाणां जलप्रचुरदेशसन्निविष्टग्रामवासिनां, तारयताम् अनत्ययः।

प्रतिपदपञ्चिका

शासको निधाता नियामकः सर्वमार्गाभिज्ञः दातृग्राहको दोषग्राहको रश्मिग्राहकः कर्णधार उत्सेचनको विप्रविष्टजपापनायां इत्येवमेतैरधिष्ठिता महानावो हेमन्तग्रीष्मतार्यासु तस्मिन्नपि काले नाव्यप्रहारासु महानदीषु सिन्धुसरस्वत्यादिषु प्रयोजयेत् अपायपरिहारार्थम्। क्षुद्रिकासु लघुनदीषु वर्षास्राविणीषु श्रावणभाद्रपदतार्यासु क्षुद्रिकाः लघुनावः क्षुद्रिकाग्रहणं च कोटिमकतरण्डकाद्युपलक्षणार्थम्। बन्धतीर्थाः सारतीर्थाश्चैता

ब्राह्मणप्रव्रजितबालवृद्धव्याधितशासनहरगर्भिण्यो नावध्यक्षमुद्राभिस्तरेयुः ॥

[परदेशादागन्तॄणां व्यवस्थाः, अपराधिनां बन्धनविधिः, अपराधिचिह्नानि च]

कृतप्रवेशाः पारविषयिकाः सार्थप्रमाणा वा विशेयुः। परस्य भार्यां कन्यां वित्तं वाऽपहरन्तं शङ्कितमाविग्नमुद्भाण्डीकृतं महाभाण्डेन मूर्ध्नि भारेणाऽवच्छादयन्तं सद्योगृहीतलिङ्गिनम् अलिङ्गिनं वा प्रव्रजितम् अलक्ष्यव्याधितं भयविकारिणं गूढसारभाण्डशासनशस्त्राग्नियोगं विषहस्तं दीर्घपथिकममुद्रं चोपग्राहयेत् ॥

प्रतिपदपञ्चिका

नदीः कारयेत्। कस्मादित्याह राजद्विष्टकारिणां परप्रयुक्ततीक्ष्णरसदादीनां तरणभयात्। अकाले अर्धरात्रादौ अतीर्थे च प्रसिद्धमार्गादन्यत्र तरतः पूर्वस्साहसदण्डः । काले दिवा तीर्थे प्रसिद्धेऽप्यनिसृष्टकारिणोऽनुज्ञातस्य गच्छतः पादोनसप्तविंशतिपणस्तरात्ययः तरणनिमित्तो दण्डः। कैवर्तकानां च तीर्थे अकालेऽपि स्वव्यापारार्थं तरताम् अनत्ययः। सम्भाव्यानुपातिनां तस्करापहृतान्वेषणायानुपातिनां दूतानुपातिनां कार्यशेषेण राजदूतमनुप्रेषितानां सेनाभाण्डप्रचारप्रयोगाणां च राजप्रहितचारपुरुषाणां स्वतरणैरलाबुदृतिगण्डिकादिभिस्तरतामनत्ययः (तरात्यय) इति वर्तते। बीजं क्षेत्रावापार्थं भक्तं कृषिपशुपालाद्यशनं द्रव्याणि पुष्पफलशाकगोरसादीनि उपस्कराणां स्वतैरस्तारयतां स्वयं च तरतामनत्ययः।

श्रीमूला

आतराप्रदानेन नावध्यक्षमुद्रामात्रं गृहीत्वा ये तरणार्हा जनास्तानाह—ब्राह्मणेत्यादि। सुगमम्।

प्रतिपदपञ्चिका

ब्राह्मणादयः प्रतीताः ते नावाध्यक्षे मुद्राभिगृहीततदीयमुद्राभिस्तरेयुः न वेतनं दद्युः।

श्रीमूला

कृतप्रवेशा इति। कृतप्रवेशा अभ्यनुज्ञातप्रवेशाः, पारविषयिकाः परदेशागताः, सार्थप्रमाणा वा अननुज्ञातप्रवेशत्वेऽपि अनुज्ञातसार्थाधिष्ठातृका वा, विशेयुः, नृपस्य देशम्।

परस्येति। परस्य भार्यां कन्यां वित्तं वा अपहरन्तम्, उपग्राहयेत् शङ्कितत्वादिलिङ्गैर्वक्ष्यमाणैरनुमाय बन्धयेत्। तत्र शङ्कितं चकितचारिणम्, आविग्नं सम्भ्रान्तम्

[देशकालादिभेदेन द्रव्यभेदेन च तरपण्यविधिः]

क्षुद्रपशुर्मनुष्यश्च सभारो मापकं दद्यात्। शिरोभारः कायभारो गवाश्वं च द्वौ। उष्ट्रमहिषं चतुरः। पञ्च लघुयानम्। षट् गोलिङ्गम्। सप्त शकटम्। पण्यभारः पादम्। तेन भाण्डभारो व्याख्यातः। द्विगुणो महानदीषु तरः। क्लृप्तमानूपग्रामा भक्तवेतनं दद्युः। प्रत्यन्तेषु तराः शुल्कमातिवाहिकं वर्तनीं च गृह्णीयुः। निर्गच्छतश्चाऽमुद्रस्य भाण्डं हरेयुः। अतिभारेणाऽवेलायामतीर्थे तरतश्च।

श्रीमूला

उद्भाण्डीकृतं समधिकभाण्डभारवाहिनं, महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं बृहदाकृतिना पलालादिभारेण शिरसि कृतेनावृत्तप्रायमुखं, सद्योगृहीतलिङ्गिनं प्रव्रजितं तत्कालकलितपरिव्राजकचिह्नम्, अलिङ्गिनं वा प्रव्रजितं सद्यःपरित्यक्तपरिव्राजकचिह्नं वा, अलक्ष्यव्याधितं व्याधितव्यपदेशिनमदृष्टव्याधिचिह्नं, भयविकारिणं वदनश्वेतीभावादिभयचिह्नयुक्तं, गूढसारभाण्डशासनशस्त्राग्नियोगं गूढसारभाण्डं गूढरत्नादिद्रव्यं गूढशासनं गूढलेखं गूढशस्त्रं गूढायुधं गूढाग्नियोगं गूढोऽग्नियोगः औपनिषदवक्ष्यमाणनिष्प्रतीकाराद्यग्नियोगद्रव्यं यस्य तं तथाभूतं च, विषहस्तं, दीर्घपथिकं दूराध्वगमनश्रान्तम्, अमुद्रम् अन्तपालमुद्रारहितं च उपग्राहयेत्।

प्रतिपदपञ्चिका

कृतप्रवेशाः प्रविष्टपूर्वा अनुमतप्रवेशाः पारविषयिकाः परविषयादागताः सार्थप्रमाणाः अकृतप्रवेशा अपि कृतप्रवेशसार्था विदितविशेषत्वात् विजिगीषुदेशं प्रविशेयुः।

परस्य भार्यादीनपहरन्तं वक्ष्यमाणलक्षणैर्लिङ्गैर्ज्ञात्वा ग्राहयेत्। तान्याह—शङ्कितमित्यादि। शङ्कितं स्वदोषचरितम् आविग्नम् उत्तरलम् उद्भाण्डीकृतम् उद्वाहितभाण्डभारविसंस्थूलम् अभाण्डेन पलालभारादिभारेण वा दुर्वृद्धवोट्टलादिना मूर्ध्नि शिरसि निवातेन प्रत्यभिज्ञायमानं वाऽऽच्छादयन्तं सद्यस्तदानीमेव गृहीतलिङ्गं कृतप्रव्रजितरूपमलिङ्गिनमप्रव्रजितलिङ्गं वा परित्यक्तलिङ्गं प्रव्रजितं परिव्राजकादीनाम् अन्यतमम् अलक्ष्यव्याधिं कृतरोगिव्यपदेशमलक्षितलिङ्गम् भयविकारिणं शुल्कश्यावरक्तादिभयलिङ्गसहितम्। गूढेत्यादि, सारभाण्डं रत्नसुवर्णादि शासनं लेखं शस्त्रं क्षुरिकादि अग्नियोगो निष्प्रतीकाराग्नियोगद्रव्याणि, गूढशब्दः प्रत्येकम्, विषहस्तं गृहीतवत् सनाभादिविषं दीर्घपथिकं दूराध्वानगमनखिन्नम् अमुद्रमगृहीतान्तपालमुद्रं च कारयेत् चकारात् कृतकूटमुद्रं च उपग्राहयेत् बध्नीयात्।

श्रीमूला

तरवेतनविधिमाह—क्षुद्रेत्यादि। क्षुद्रपशुः अजादिः, मनुष्यश्च सभारः कर-

श्रीमूला

गृहीतभारः, माषकं दद्यात् । शिरोभारः शिरोधार्यो भारः, कायभारः स्कन्धधार्यः, गवाश्वं च गौश्चाश्वश्च, द्वौ माषौ, दद्यादिति सम्बध्यते । उष्ट्रमहिषम् उष्ट्रश्च महिषश्च, चतुरः माषकान्, दद्यात् । पञ्च लघुयानं लघुगन्त्री पञ्च माषकान् दद्यात् । षड् गोलिङ्गं मध्यमगन्त्री षट् माषान् दद्यात् । सप्त शकटम् दद्यात् । पण्यभारः पण्यानां तुलाविंशतिः, पादं पणचतुर्भागं, दद्यात् ।

तेनेति । तेन पण्यभारवेतनकथनेन, भाण्डभारो महिषोष्ट्रादिवाह्यो, व्याख्यातः उक्तः, एकैकस्य भारस्यैकं माषकं दद्यादिति । त एत आतरा लघुनदीविषयाः । अत एवाह—द्विगुणो महानदीषु तर इति । तरः तरणवेतनम् ।

क्लृप्तमिति । क्लृप्तं यत्किञ्चिद्, अनूपग्रामाः, भक्तवेतनं राजभाव्यातिरिक्तं, दद्युः नाविकस्य ।

प्रत्यन्तेष्विति । विषयसीमसु, तराः तारकाः, शुल्कम्, आतिवाहिकम् अतिवाहननिमित्तं राजभाव्यं, वर्तनी च अन्तपालदेयं च, गृह्णीयुः सार्थात् । निर्गच्छतश्चामुद्रस्य सार्थस्य, भाण्डं हरेयुः । अतिभारेणेति । अतिभारेण पुरुषद्वय-बहनीयेन भारेण युक्तस्य, अवेलायाम् अकाले, अतीर्थे अघट्टे, तरतश्च, भाण्डं हरेयुरिति वर्तते ।

प्रतिपदपञ्चिका

तरवेतनमेवाह—क्षुद्रपशुरित्यादि, क्षुद्रपशुरजैडकादिः, मनुष्यश्च सभारो गृहीतालम्बपोट्टकादिः माषकं दद्यात् । शिरोभारः पोट्टलिकपात्राकारः कायभारः स्कन्धभारः, गवाश्वं च द्वौ द्वौ माषकौ । उष्ट्रमहिषं चतुरः । पञ्चमाषकान् लघुयानं लघुगन्त्रि षण्माषकान् गोलिङ्गं मध्यमगन्त्रीसप्तमाषकान् शकटं महागन्तृ पण्यहारो विंशतितुलाः पादं पणचतुर्भागं दद्यात् । तेन भाण्डभारो महिषोष्ट्रादियानं व्याख्यातं यावन्तो भारास्तावन्तः पादान् दद्युरिति । द्विगुण इत्ययमेव यथोदितो महानदीषु गङ्गायमुनादिकासु द्विगुणो यः अतश्च वचनात् पूर्वं लघुनदीषु विज्ञेयम् ।

क्लृप्तमिति । पूर्वत्र राजभाव्यमिदन्तु नावध्यक्षस्य भक्तवेतनं दद्युरिति केचित् । पूर्वत्राऽविशेषेणाऽभिहितस्य विशेषणार्थमिदमित्यपरे ।

प्रत्यन्तेष्विति । विषयान्तेषु तारयन्तीति तरा नावध्यक्षपुरुषाश्शुल्कं यथोक्त-मातिवाहिकं सार्थादिति वाहिकनिमित्तं वर्तनीयमन्तःपालादेयं च चकारादात्मभाव्यं च गृह्णीयुः । निर्गच्छतश्चेति । उत्तीर्णस्य मुद्रारहितस्य चकारान्निर्गच्छतश्च भाण्डं हरेयुः सर्वापहारं कुर्युः ।

अतिभारेणेति । द्विवाह्यमेकस्य वहवः अवेलायामसम्पाते समये अतीर्थेन प्रसिद्धादन्येन तरतश्च भाण्डं हरेयुरिति वर्तते ।

पुरुषोपकरणहीनायामसंस्कृतायां वा नावि विपन्नायां नावध्यक्षो नष्टं विनष्टं वा अभ्यावहेत् ।

सप्ताहवृत्तामाषाढीं कार्तिकीं चाऽन्तरा तरः ।
कार्मिकप्रत्ययं दद्यात् नित्यं चाह्निकमावहेत् ॥१०९॥

इत्यध्यक्षप्रचारे नावध्यक्षोऽष्टाविंशोऽध्यायः,
आदित एकोनपञ्चाशः ।

श्रीमूला

पुरुषेत्यादि । पुरुषैः शासननियामकादिभिः उपकरणैश्चारित्रसेचनादिभिर्हीनायाम्, असंस्कृतायां वा सीवनादिसंस्काररहितायां वा, नावि, विपन्नायां सत्यां, नावध्यक्षः, नष्टं जलप्रलीनं लवणजातीयम्, विनष्टं जलयोगदूषितरूपादिकं वा, पण्यद्रव्यम्, अभ्यावहेद् दद्यात् ।

तरवेतनकालं श्लोकेनाह—सप्ताहेत्यादि । सप्ताहो वृत्तो यस्या ऊर्ध्वं सा सप्ताहवृत्ता तादृशीम्, आषाढीम् आषाढपौर्णमासीं, कार्तिकीं कार्तिकपौर्णमासीं तथाविधाम्, अन्तरा आषाढबहुलसप्तम्याः कार्तिकबहुलसप्तम्याश्च मध्ये इत्यर्थः, तरः आतरः ग्राह्य इति शेषः, निर्दिष्टस्य कालस्य वर्षात्वाद् वर्षातार्यासु नदीषु । सर्वर्तुतार्यासु तु नित्यं ग्राह्य इत्यर्थात् सिद्धम् । कार्मिकप्रत्ययम् अयमयं कर्मदिवस इति कर्मदिवसज्ञानं, दद्याद् नावध्यक्षाय । नित्यं च, आह्निकं दिने दिनेऽधिगततमातरम्, आवहेत् दद्यात् ।

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टाविंशोऽध्यायः, नावध्यक्षः, आदित एकोनपञ्चाशः ॥

प्रतिपदपञ्चिका

पुरुषाश्शासकनियामकादयः । उपकरणानि दातृरश्मिपटरज्ज्वादीनि तद्धीनायामसंस्कृतायामकृतसीवनादिसंस्कारायां नावि विपन्नायां नष्टं सर्वथा प्रलीनं विनष्टमुदकविधृतं नावध्यक्षोऽभ्यावहेत् दद्यात् तद्दोषेण तस्य विनाशात् । तरवेतनकालमाह—सप्ताहवृत्तामाषाढीमित्यादि, आषाढबहुलसप्तमीं कार्तिकबहुल· प्तमीं चान्तरा तयोः मध्ये-तरस्तरवेतनं वर्षास्राविणीषु नदीषु ग्राह्यम् इति वाक्यशेषः । ग्रीष्मतार्यासु महानदीषु नित्यं ग्राह्यं तदुभयमपि कार्मिकप्रत्ययं तत्कर्म तद्विदितं दद्यात् नावध्यक्षं प्रवेशयेत् वर्षास्राविणीषु तु जलवृद्धिक्षयानियमादाह्निकं तर्रादवसान् विगणय्य तरवेतनमालभेत् दद्यादिति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायां
द्वितीयेधिऽकरणे अध्यक्षप्रचारिकेऽष्टाविंशोऽध्यायः ।
नावध्यक्षः, आदित एकोनपञ्चाशोऽध्यायः ।

षट्चत्वारिंशं प्रकरणम्

एकोनत्रिंशोऽध्यायः ।

गोऽध्यक्षः ।

[गोऽध्यक्षेणाऽवेक्षणीया अष्टौ अंशाः]

गोऽध्यक्षो वेतनोपग्राहिकं करप्रतिकरं भग्नोत्सृष्टकं भागानुप्रविष्टकं व्रजपर्यग्रं नष्टं विनष्टं क्षीरघृतसञ्जातं चोपलभेत ।

[तत्र वेतनोपग्राहिकम्]

गोपालकपिण्डारकदोहकमन्थकलुब्धकाः शतं शतं धेनूनां हिरण्यभृताः पालयेयुः । क्षीरघृतभृता हि वत्सानुपहन्युरिति वेतनोपग्राहिकम् ।

श्रीमूला

गोध्यक्ष इति सूत्रम् । गवाम् उपलक्षणया महिषादीनां गोमहिषाद्याजीवानां चाध्यक्षो गोध्यक्षः तत्कर्माभिधीयत इत्यर्थः । स्वपक्षपरपक्षवशीकरणसाधनभूतासु वार्तापदार्थेषु कृषिपाशुपाल्यवणिज्यासु कृषिवणिज्ये सीताध्यक्षपण्याध्यक्षयोरुपपादिते । पाशुपाल्यं त्वनुक्तमिहाभिधीयत इति सङ्गतिः ।

गोध्यक्ष इति । गोध्यक्षः, वेतनोपग्राहिकादीन्यष्टौ, उपलभेत अध्यक्षयेत् ।

प्रतिपदपञ्चिका

गोऽध्यक्ष इति सूत्रम् । गावः प्रसिद्धाः, तद्ग्रहणं महिष्याजावीनां ग्रहणार्थम् । तासामध्यक्षः तत्प्रजीवगणनाद्यधिकारी गोऽध्यक्ष इति सूत्रार्थः । सम्बन्धस्तु व्ययशरीरे गोमण्डलमुक्तं न स्वरूपमतः तत्प्रतिपाद्यत इति । अथवा कृषिपाशुपाल्ये वाणिज्या च वार्ता तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्यामिति वार्तोपदिष्टा, तत्र सीताध्यक्षपण्याध्यक्षयोः कृषिवाणिज्यप्रतिपादिते पाशुपाल्यं वक्तव्यम्, तदभिधीयत इति ।

तदाह—गोऽध्यक्ष इति, स वेतनोपग्राहिकादीनष्टौ पदार्थानुपलभेत जानीयात् ।

श्रीमूला

तानि क्रमशो व्याचष्टे—गोपालकेत्यादि । गोपालकादयः पञ्च गोपालकः प्रसिद्धः पिण्डारको महिषपालः दोहकः क्षीरदोग्धा मन्थको दधिमथनकर्मा लुब्धको व्यालभय-

[करप्रतिकरः]

जरद्गुधेनुगर्भिणीपष्ठौहीवत्सतरीणां समविभागं रूपशतमेकः पालयेत्। घृतस्याष्टौ वारकान्, पणिकं पुच्छं, अङ्कचर्म च वार्षिकं दद्यादिति कर-प्रतिकरः।

———————

श्रीमूला

परिहर्त्ता इत्येते, शतं शतं धेनूनां गवां पालयेयुः। किंवेतनास्ते, हिरण्येन धनधान्यरूपेण वेतनेन भृताः पुष्टाः, न तु तदन्येन क्षीरेण घृतेन वेत्यर्थः। कुतः क्षीरघृतभृता न कर्तव्यास्तत्राह—क्षीरघृतभृता हीति। तद्वेतना हि, वत्सान् स्तनन्धयान्, उपहन्युः क्षीरलोभनिमित्तादतिदोहनात् कर्शयेयुः। इति एतद्, वेतनोपग्राहिकं वेतनोपग्राह-निमित्तत्वात् तत्संज्ञम्।

प्रतिपदपञ्चिका

तांश्च स्वयमेव व्याचष्टे—गोपालकेत्यादि, स च प्रतीतः, पिण्डारको महिषीपालः, दोहकमन्थकौ प्रतीतौ। लुब्धको व्याघ्रादिव्यालं प्रति विधीयते। शतं शतं धेनूनां स्वच्छन्दिनां हिरण्यहृता हिरण्यवेतनाः पालयेयुः। कस्मान्नक्षीरभृतः हि हेतौ, वत्सान् स्तनन्धयानुपहन्युः। क्षीरलोभादतिदोहेन कृशीकुर्युः। इत्येतद्वेतनप्रदानोपग्राहि-कमित्यन्येयं: वेतनोपग्राहनिमित्ताऽन्वर्थसंज्ञा। एवमुत्तरेषामपि संज्ञानामन्वर्थता यथासम्भवं योजनीया।

श्रीमूला

जरदित्यादि। जरद्गुर्जरद्गवी गोह्लस्वत्वमार्षम्। धेनुर्दोग्ध्री गर्भिणी प्रसिद्धा। पष्ठौही वृषगवेषिणी वत्सतरी अतीतस्तनन्धयभावा इत्येतासां पञ्चानां, समविभागं प्रत्येकं विंशतिक्रमेव तुल्यविभागयुक्तं, रूपशतं शतात्मकं जरद्गव्यादिभेदमेलकम्, एकः पालनवृत्तिः, पालयेत्। घृतस्येति। घृतस्य, अष्टौ वारकान् चतुरशीतिकुडुबान्, पणिकं पुच्छं पुच्छगणनया देयः करः पुच्छः तमेकैकस्य पशोरेकैकपणात्मकम्, अङ्कचर्म च राजमुद्रायुक्तं मृतचर्म च वार्षिकं वर्षदेयं, दद्यात् स्वामिने। इति करप्रति-करः एष प्रकारः करप्रतिकरसंज्ञः।

प्रतिपदपञ्चिका

करप्रतिकरमाह—जरदित्यादि। जरद्गवीधेनुर्गर्भिणी प्रतीते, पष्ठौही वृषाभिलाषिणी, वत्सतरी परित्यक्तस्तनपाना। समांवभागं विंशतिः विंशतिमेकैकस्य भेदस्य, एवं जरद्गुधेन्वादिरूपशतमेकैको गोपालकः पिण्डारको वा पालयेत्। तथा ते पालकाः घृतस्याष्टौ वारकान् चतुरशीतिकुटुम्बप्रमाणान् पणिकं पुच्छे (पशोः) पणशतं मृतस्याङ्कचर्म राजाङ्कोपलक्षितं चर्म, चकारात् स्नायुशृङ्गाणि च वर्षदेयं दद्युः। इत्येतस्य करप्रतिकर इति संज्ञा।

[भग्नोत्सृष्टकम्]

व्याधितान्यङ्गाऽनन्यदोहीदुर्दोहापुत्रघ्नीनां च समविभागं रूपशतं पालयन्तस्तज्जातिकं भागं दद्युरिति भग्नोत्सृष्टकम् ।

[भागानुप्रविष्टकम्]

परचक्राटवीभयादनुप्रविष्टानां पशूनां पालनधर्मेण दशभागं दद्युरिति भागानुप्रविष्टकम् ।

[व्रजपर्यग्रम्]

वत्साः वत्सतराः दम्याः वहिनः वृषाः उक्षाणश्च पुङ्गवाः । युगवाहन-

---

श्रीमूला

व्याधितेत्यादि । व्याधितादीनां पशूनां व्याधिता रुग्णा न्यङ्गा अङ्गविकला अनन्यदोही एकेनैव दोहनीया न त्वन्येन दोहनीया दुर्दोहा पादबन्धनादिकृच्छ्रदोह्या पुत्रघ्नी स्रवद्गर्भा म्रियमाणवत्सा च इत्येतासां च, समविभागं रूपशतं पूर्वोक्तप्रत्येक-विंशतिप्रकार, पालयन्तः, तज्जातिकं भागं पूर्वोक्तस्यार्धं त्रिभागं वा तदनुरूपं घृतादिराजभागं, दद्युः । इति भग्नोत्सृष्टकं तदाख्यम् ।

भागानुप्रविष्टकमाह—परचक्रेत्यादि । परचक्राटवीभयात् शत्रुच्छलनाभयात् वनचरापहारभयाच्च, अनुप्रविष्टानां राजव्रजप्रवेशितानां, पशूनां, पालनधर्मेण पालनस्य सवेतनत्वनियमेन, दशभागं, दद्युः पशुस्वामिनो राज्ञे । इत्येतद्, भागानु-प्रविष्टकं तदाख्यम् ।

प्रतिपदपञ्चिका

भग्नोत्सृष्टमाह—व्याधितेत्यादि, व्याधिता न्यङ्गा च प्रतीते, अनन्यदोही एकेनैव दोह्या नान्येन दुह्यते दुर्दोहा दुःखेन बन्धनादिना दुह्यते, पुत्रघ्नी म्रियमाण-विजायिनी इत्येतासामपि पूर्ववत् समविभागं रूपशतं पालयन्तस्तज्जातिकं तदनुरूपं भागमिति घृतादिराजभागं दद्युरिति । एतद् भग्नोत्सृष्टसंज्ञं भवति ।

भागानुप्रविष्टकमाह—परचक्राटवीत्यादि, परबलविलोपभयादाटविकलुण्ठनभयाद् वा अनुप्रविष्टानां राजव्रजं प्रवेशितानां गोमहिष्यादीनां पालनधर्मेण रक्षास्वभावेन विना वेतनं रक्षा न भवतीति दशभागं धनिनो गोऽध्यक्षाय दद्युरिति । एतद् भागानुप्रविष्टसंज्ञं भवति ।

श्रीमूला

व्रजपर्यग्रमाह—वत्सा इत्यादि । वत्साः स्तनन्धयाः, वत्सतराः परित्यक्तस्तन-पानाः, दम्याः दमनयोग्याः, वहिनः वोढारः, वृषाः सेक्तारः, उक्षाणश्च जरद्गवाश्च,

शकटवहा वृषभाः सूनामहिषाः पृष्ठस्कन्धवाहिनश्च महिषाः। वत्सिका वत्सतरी पष्ठौही गर्भिणी धेनुश्चाप्रजाता वन्ध्याश्च गावो महिष्यश्च। मासद्विमासजातास्तासामुपजाः वत्सा वत्सिकाश्च। मासद्विमासजातानङ्कयेत्। मासद्विमासपर्युषितमङ्कयेत्। अङ्कं चिह्नं वर्णं शृङ्गान्तरं च लक्षणम्, एवमुपजाः निबन्धयेदिति व्रजपर्यग्रम्।

श्रीमूला

पुङ्गवाः इत्येते षडविधाः पुमांसो गावः। युगवाहनशकटवहाः, वृषभाः सेक्तारः, सूनामहिषाः मांसमात्रोपयोगिनो महिषाः, पृष्ठस्कन्धवाहिनश्च, महिषाः इत्येते चतुर्विधा महिषाः। स्त्रीगवीनां महिषीणां च साधारणान् भेदानाह—वत्सिकेत्यादि। तत्र धेनुर्दोग्ध्री। अप्रजाता विजननार्हवयोऽनधिरूढा वन्ध्या वशा। शेषाः प्रसिद्धाः। इत्थं सप्तविधा गावो महिष्यश्च। मासेत्यादि। मासद्विमासजाताः मासजाताः द्विमासजाताश्च, तासां गोमहिषीणां, वत्साः स्तनन्धयाः, वत्सिकाः स्तनन्धय्यश्च, उपजाः उपजासंज्ञिताः। तासु मासाद्विमासजातान्, अङ्कयेत् तप्तमुद्रया योजयेत्। भागानुप्रविष्टकादिविषयमङ्कनमाह—मासाद्विमासपर्युषितमङ्कयेदिति। ज्ञातस्वामिकस्याऽज्ञातस्वामिकस्य वा राजव्रजप्रविष्टस्यैकमासपरिवासे द्विमासपरिवासे वा जाते तमप्यङ्कयेद् गोध्यक्ष इत्यर्थः। चतुर्विधं लक्षणमाह—अङ्कमिति। अङ्कं स्वस्तिकादि-सन्निवेशं तप्तमुद्राकृतं कृत्रिमं, चिह्नं पुच्छश्वेतिमकालिमादि सहजं, वर्णं शुक्ल-कृष्णादि, शृङ्गान्तरं च शृङ्गगतं विशेषं च, लक्षणं, निबन्धयेत् पुस्तके लेखयेत्। एवम् अनेन प्रकारेण उक्तचतुर्लक्षणीयोगेन, उपजाः, निबन्धयेत्। इति एतत् सप्तदश-विधं व्रजपर्यग्रं तदाख्यम्।

प्रतिपदपञ्चिका

व्रजपर्यग्रमाह—वत्सा इत्यादि। वत्साः स्तनन्धयाः, वत्सतराः अतीतवत्स-भावाः, दम्याः दमनार्हाः, वहिनो वोढारः, वृषाः सेक्तारः, उक्षाणो जरद्गवाः इत्येवमेतेषां प्रकारः। पुङ्गवाः करभाः द्वितीयवर्षजाताः, वृषभाः सेक्तारः, सूना-मांसैकोपयोगिनः, महिषाः पृष्ठस्कन्धवाहिनः इत्येवमेते चतुष्प्रकाराः पुंमहिषाः।

स्त्रीपशुप्रकारानाह—वत्सिकेत्यादि, तत्र प्रजाता गोकुमारी, वन्ध्या वृषसम्प्रयो-गेऽप्यप्रसविनी, शेषाः प्रतीताः। इत्येवं सप्तस्त्रीपशुप्रकाराः। गावो महिष्यश्च मासद्वि-मासजाता वत्सा वत्सिकाश्च, तासां महिषीणां उपजसंज्ञा भवति। वत्सवत्सिका-ग्रहणं तद्भेदेन लेख्यनिबन्धनार्थम्। मासाद्विमासजातानङ्कयेत् लक्षयेत्।

नानूपजामङ्कयेदिति वक्तव्ये (कर्तव्ये) मासद्विमासजातग्रहणं भागानुप्रविष्टा-द्युपलक्षणम्।

मासद्विमासपर्युषितमङ्कयेदिति। प्रनष्टस्वामिकविषयं वेदितव्यम्। तच्च लक्षणं

[नष्टम्]

चोरहृतम् अन्ययूथप्रविष्टम् अवलीनं वा नष्टम् ।

[विनष्टम्]

पङ्कविषमव्याधिजरातोयाहा [धा] रावसन्नं वृक्षातटकाष्ठशिलाभिहतम् ईशानव्यालसर्पग्राहदावाग्निविपन्नं विनष्टम् । प्रमादात् अभ्यावहेयुः ।

एवं रूपाग्रं विद्यात् ॥

[गवादिहन्तॄणां अपहर्तॄणां च दण्डः आहर्तॄणां सम्मानं च]

स्वयं हन्ता घातयिता हर्ता हारयिता च वध्यः । परपशून् राजाङ्केन परिवर्तयिता रूपस्य पूर्वं साहसदण्डं दद्यात् ।

स्वदेशीयानां चोरहृतं प्रत्यानीय पणिकं रूपं हरेत् । परदेशीयानां मोक्षयिताऽर्धं हरेत् ।

प्रतिपदपञ्चिका

चतुर्विधं कोष्ठ(?) अङ्कं स्वस्तिकादि । चिह्नं श्वेतपुच्छकादि वर्णः श्वेतरक्तकादिः, शृङ्गं खण्डमुण्डविशङ्कटादि, अन्तरशब्दो विशेषवाची प्रत्येकम्, एवमनेकलक्षणामुपजां निबन्धयेत् लेखयेदित्येतत् सप्तदशप्रकारं व्रजपर्यग्रं नाम ।

श्रीमूला

त्रिविधं नष्टमाह—चोरेत्यादि । चोरहृतम्, अन्ययूथप्रविष्टम्, अवलीनं वा वने स्वयूथाद् भ्रष्टं वा, नष्टं नष्टाख्यम् ।

विनष्टमाह—पङ्केत्यादि । पङ्कादिभिः षड्भिः पङ्केन कर्दममज्जनेन विषमेण गर्तादिपतनेन व्याधिना रोगेण जरया वयोवृद्धतया तोयेन महारयजलप्रवाहाकृष्ट्या आहारेण इत्येतैरवसन्नं विपन्नं, वृक्षादिभिश्चतुर्भिः वृक्षपातभृगुभ्रंशमहाकाष्ठपतनमहाशिलापातरूपैरभिहतम्, ईशानादिपञ्चकविपन्नम् ईशानेन विद्युज्ज्योतिषा हिंस्रमृगपन्नगनक्रवनवह्निभिश्च प्रमोतं, विनष्टं तदाख्यं भवति । प्रमादादिति । पालकानवधानदोषाद्, विनष्टमिति वर्तते, अभ्यावहेयुः दद्युः, अर्थात् पालकादयः ।

एवमिति । उक्तेन प्रकारेण, रूपाग्रं गवादिप्रमाणं, विद्यात् ।

स्वयमेव गवादिहननहरणकर्तुस्तत्प्रयोजयितुश्च गोपालकस्य वधो दण्ड इत्याह—स्वयं हन्तेत्यादि ।

परपशूनामिति । अराजपशूनां, राजाङ्केन रूपस्य परिवर्तयिता राजकीयाङ्कदानेन रूपभेदयिता, पूर्वं साहसदण्ड दद्यात् ।

[गोपालककर्तव्यसङ्ग्रहः, जीवद्भ्यो मृतेभ्यो वा तेभ्यो लब्धवस्तूनां उपयोगादिविधिः, कर्तव्यभ्रष्टानां दण्डश्च]

बालवृद्धव्याधितानां गोपालकाः प्रतिकुर्युः। लुब्धकश्वगणिभिः अपास्तस्तेनव्यालपरबाधभयम् ऋतुविभक्तमरण्यं चारयेयुः। सर्पव्यालत्रासनार्थं गोचरानुपातज्ञानार्थं च त्रस्नूनां घण्टतूर्यं च बध्नीयुः। समव्यूढतीर्थं अकर्दमग्राहम् उदग्राहम् उदकमवतारयेयुः, पालयेयुश्च। स्तेनव्यालसर्पग्राहगृहीतं व्याधिजराऽवसन्नं च आवेदयेयुः, अन्यथा रूपमूल्यं भजेरन्। कारणमृतस्याङ्कचर्म गोमहिषस्य, कर्णलक्षणमजाविकानां, पुच्छमङ्कचर्म चाश्वखरोष्ट्राणां, बालचर्मबस्तिपित्तस्नायुदन्तखुरशृङ्गास्थीनि चाहरेयुः। मांसमाममार्द्रं शुष्कं वा विक्रीणीयुः। उदश्वित् श्ववराहेभ्यो दद्युः। कूर्चिकां[1] सेना भक्तार्थमाहरेयुः। किलाटो घाणपिण्याकक्लेदार्थः।

श्रीमूला

स्वदेशीयानामिति। तेषां, चोरहृतं, प्रत्यानीय प्रत्यर्प्य, पणिकं रूपं हरेत् रूपसङ्ख्यानग्राह्यो दण्ड इह रूपमित्युच्यते। एकैकस्य रूपस्यैकपणप्रमाणं रूपदण्डं गृह्णीयात्। परदेशपशूनामुपगतानां, मोक्षयिता तत्स्वामी, अर्घं हरेत् तन्मूल्यस्यार्धं गृह्णीयात्, अर्थादर्धं दण्डं दद्यात्।

प्रतिपदपञ्चिका

नष्टमाह—चोरहृतमित्यादि, चोरहृतमन्ययूथप्रविष्टं च प्रलीनमवलीनं स्वयूथात् परिभ्रष्टमित्येवमेतत् त्रिप्रकारं नष्टसंज्ञं भवति। विनष्टमाह—पङ्केत्यादि, पङ्कादिभिः षड्भिरवसन्नं निश्चेष्टीभूतं वृक्षादिभिश्चतुर्भिर्हतं विकलीकृतमीशानादिभिः पञ्चभिर्निमित्तैर्विपन्नम्, एवं पञ्चदशप्रकारं विनष्टं भवति। तत्र पङ्कं प्रतीतम्, विषमं गर्तादि, व्याधिर्विलयजादिः, दावाग्निर्वनवह्निरित्येवम्, एतैर्विपन्नं विनष्टं भवति। प्रमादान्मद्यादिप्रसङ्गाद् विनष्टं वा अभ्यावहेयुः गोपालादयो दद्युरिति।

एवम् उक्तेन प्रकारेण गोऽध्यक्षो रूपाग्रं चतुष्पदप्रमाणं विद्यात्। स्वयं हन्ता पशूनां व्यापादयिता घातयिता प्रयोजको हर्ता हारयिता वा वध्यो हन्तव्यः। पशूनां राजाङ्केन तदङ्ककरणेन परिवर्तयिता रूपस्यैकैकस्य पूर्वं साहसदण्डं दद्यात्।

स्वदेशीयानामित्यादि, सुबोधम्।

श्रीमूला

बालवृद्धेत्यादि। सुगमम्।

लुब्धकस्वगणिभिरित्यादि। व्याधैः श्वगणपोषकैश्च, अपास्तस्तेन-व्यालपर-

---

१. रुचिकां, किञ्चित् कांस्येन—पा०

श्रीमूला

बाधभयं परिहृतचोरहिंस्रमृगशत्रूपद्रवभयम्, ऋतुविभक्तम् ऋतुषु विभक्तम् अस्मिन्नस्मिन् ऋताविदमिदं तृणजलादिसमृद्धतया समुचितमिति विभज्य व्यवस्थितम्, अरण्यं, चारयेयुः।

सर्पेत्यादि। सर्पव्यालत्रासनार्थं सर्पव्यालानां भयजननार्थं, गोचरानुपातज्ञानार्थं देशममुकमनुसञ्चरन्ति गाव इति घण्टातूर्यशब्दतोऽनुमानार्थं च, त्रस्नूनां शब्दत्रासिनां पशूनामत्रासार्थंपरिचेतव्यशब्दानां, घण्टातूर्यं लोहघण्टारूपं तूर्यं, बध्नीयुः, कण्ठे।

· समेत्यादि। समव्यूढतीर्थम् अविषमविस्तीर्णावतारम्, अकर्दमग्राहम् अपङ्कनक्रम्, उदकम्, अवतारयेयुः स्नानपानार्थं, पालयेयुश्च यावत्स्नानपानकालमप्रमत्ता जलजन्यभयाद् रक्षेयुश्च पशुयूथम्।

चोरव्यपहृतं रोगवार्धकप्रमीतं पशुमध्यक्षाय काले निवेदयेयुरनिवेदने मूल्यमेकैकस्य रूपस्य दद्युरित्याह—स्तेनेत्यादि।

कारणेत्यादि। कारणमृतस्य व्याधिजरादिमृतस्य, अङ्कचर्म अङ्कयुक्तं चर्म, गोमहिषस्य, आहरेयुः आहृत्य दर्शयेयुः प्रत्ययार्थम्। कर्णलक्षणं कर्णाङ्कितं चिह्नम्, अजाविकानां वस्तोरभ्राणाम्, आहरेयुः। पुच्छम् अङ्कचर्म च अश्वखरोष्ट्राणाम्, आहरेयुः। वालादीनि च नव, आहरेयुः कुप्यार्थम्। तत्र वस्तिर्मूत्राशयः, पित्तं मायुः, स्नायुः स्नावः। शेषं प्रसिद्धम्।

मांसमिति। मांसम्, आमम् अपक्वम्, आर्द्रं, शुष्कं वा, विक्रीणीयुः। उदश्विदिति। उदश्वित् तक्रं, श्ववराहेभ्यो, दद्युः पोषणार्थम्।

कूर्चिकामिति। तक्रयुक्तक्षीरविकृतिं, शुष्कघनीकृततक्रविकारमिति स्वामी। सेनाभक्तार्थम्, आहरेयुः। किलाट इति। किलाटः क्षीरविकृतिः, घाणपिण्याकक्लेदार्थः किञ्चित्सावशेषतैलः पिण्याको घाणपिण्याकः तस्य गोमहिषादिभक्ष्यस्य क्लेदार्थः क्लेदनरूपे संस्कारे विनियोक्तव्यः।

प्रतिपदपञ्चिका

बालवृद्धव्याधितानां प्रतिकुर्युरिति, तेषां तात्पर्यार्थमकालक्षेपणार्थञ्च वचनमिति। लुब्धकादिभिरपास्तः अपनीतं स्तेनाभयं यत्र तद् ऋतुविभक्तं तत्कालोचितभक्षणोदकसञ्चारमरण्यं सञ्चारयेयुः।

सर्पाः प्रतीताः, व्यालाः व्याघ्रसिंहादयः, तेषां त्रासनार्थं गोचरानुपातज्ञानार्थमस्मिन्देशे गावश्चरन्तीति अदर्शनेऽपि शब्देनाऽनुमानार्थं त्रस्नूनां त्रसनशीलानां नित्यशब्दपरिचयार्थं त्रस्नुग्रहणं सस्यभक्षिकाप्रपलायिनीनामप्युपलक्षणार्थं घण्टातूर्यमिति लोहकाष्ठमयमनेकं बध्नीयुः।

सममविषमं व्यूढं विस्तीर्णं तीर्थं यस्य महतो यूथस्य तुल्यकालमवतरणार्थम्

[पशूनां विक्रये अध्यक्षादिदेयोंऽशः, दोहनादिकालव्यवस्थाश्च]

पशुविक्रेता पादिकं रूपं दद्यात् । वर्षाशरद्धेमन्तान् उभयतः कालं दुह्युः । शिशिरवसन्तग्रीष्मान् एककालम् । द्वितीयकालदोग्धुः अङ्गुष्ठच्छेदो दण्डः । दोहकालमतिक्रामतस्तत्फलहानं दण्डः । एतेन नस्यदम्ययुगपिङ्गनवर्तनकाला व्याख्याताः ॥

———

प्रतिपदपञ्चिका

अकर्दममपङ्कग्राहि, अग्राहं मकरादिरहितमुदकमवतारयेयुः । चकारोऽवतारणान्त उत्तार्य गोचरगमनार्थम् ।

स्तेनादिगृहीतं व्याधिजराभ्याम् अवसन्नं निश्चेष्टीभूतं चावेदयेयुः । अन्यथा अनावेदनात् रूप्यमूल्यं भजेरन् । गोपालकादाप्याः (आप्तव्याः) ।

कारणमृतस्य व्याध्यादीनां नामाङ्कचर्म च तदुपलक्षितं चर्म गोमहिषस्य कर्णलक्षणं तत् चिह्नम् अजावीनां पुच्छमङ्कं चर्म च अश्वखरोष्ट्राणां वालादीनि च कुप्यार्थं मातुर्मनश्शुध्यर्थं च स्वयमुपहरेयुः ।

मांसमाममपक्वं आर्द्रम् शुष्कं वा महिष्यादीनां विक्रीणीरन् ।

उदश्वित् तक्रं श्ववराहेभ्यः पोषणार्थं दद्युः । रुचिकां शुष्कघनीकृततक्रमविकारं सेनाभक्तार्थं हरेयुः ।

किलाटो रुचिरोदकं घाणपिण्याकक्लेदनार्थः किञ्चित् सावशेषं तैलपिण्याको घाणपिण्याकः ।

श्रीमूला

पशुविक्रेतेति । सः, पादिकं रूपम् एकैकस्य रूपस्य विक्रीयमाणस्य पादपणं, दद्यात्, अध्यक्षाय ।

वर्षेत्यादि । वर्षाशरद्धेमन्तान् ऋतून्, उभयतः कालं सायं प्रातश्च, दुह्युः, गोमहिषीः । शिशिरवसन्तग्रीष्मान्, एककालं रात्रावेव, दुह्युः ।

द्वितीयेत्यादि । द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्ड इति अयं च कालनियमो देशव्यवस्थया द्रष्टव्यः, क्वचिद् देशे ग्रीष्मेऽपि त्रिकालदोहदर्शनादित्याह स्वामी । दोहकालमिति । तं प्रातः सायं च यथोक्तम्, अतिक्रामतः, तत्फलहानं तद्दिवसवेतनहानिः, दण्डः ।

एतेनेति । दोहकालातिपातनेन नस्यदम्ययुगपिङ्गनवर्तनकालाः नस्यकालो नासावेधनकालः दम्यकालो दमनार्हकालः युगपिङ्गनकालः अदान्तस्य दान्तेन सह युगे योजनकालः वर्तनकालो मेथिबन्धनप्रचारणकालः इत्येते, व्याख्याताः तानप्यतिक्रामतस्तत्फलहानं दण्ड इत्यर्थः ।

[पशुभेदेन क्षीरघृतप्रमाणादि]

क्षीरद्रोणे गवां घृतप्रस्थः । पञ्चभागाधिको महिषीणाम् । द्विभागाधिकोऽजावीनाम् । मन्थो वा सर्वेषां प्रमाणम्, भूमितृणोदकविशेषाद्धि क्षीरघृतवृद्धिर्भवति ।

[सेक्तॄणाम् ऋषभाणां दुरुपयोगनिषेधः]

यूथवृषं वृषेणावपातयतः पूर्वः साहसदण्डः, घातयत उत्तमः ।

प्रतिपदपञ्चिका

पशुविक्रेता जानपदं पादिकं रूपमिति । प्रतिरूपं पणचतुर्भागं गोऽध्यक्षस्य दद्यात् ।

वर्षाशरद्धेमन्तान् षण्मासानुभयतः कालं सायं प्रातश्च धेनूः दुह्युः । शिशिरवसन्तग्रीष्मानेककालं रात्रावेव ।

तदा द्वितीयदोहे दोग्धुः कराङ्गुष्ठच्छेदो दण्डः । इत्ययं च कालनियमो देशव्यवस्थया द्रष्टव्यः । क्वचिद् देशे ग्रीष्मेऽपि त्रिकालदोहदर्शनाद् दोहकालं यथोक्तमतिक्रामतः तत्फलहानं तद्दिवसवेतनहानमतिक्रमणहीनतुल्यं वा दण्डः ।

एतेन दोहकालातिपातनेन सस्यादिकालाः व्याख्याताः, तेषामपि तत्फलहानं दण्डः । तत्र नस्यं नासिकावेधनं दम्यं दमनीयं दमः अङ्कपिण्डनं दान्तेन सहाऽदान्तस्य संयोजनं वर्तनं मेथिनिबन्धनं भ्रमणं प्रातः प्रचारणमित्यपरे ।

श्रीमूला

क्षीरेत्यादि । क्षीरद्रोणे, गवां घृतप्रस्थः प्रस्थमितं घृतं जायते । पञ्चभागाधिकः प्रस्थपञ्चमभागयुक्तो घृतप्रस्थः, महिषीणां, क्षीरद्रोणे भवति । इदं च घृतप्रमाणं प्रायिकम् । अत एवाह—मन्थो वेति । मथनमेव, सर्वेषां घृतपरिमाणानां, प्रमाणं निश्चायकम् । तत्र हेतुकथनम्—भूमितृणोदकविशेषाद्धीत्यादिना । क्षीरघृतवृद्धिः क्षीरघृतयोर्वृद्धिः क्षीरे घृतस्य वृद्धिर्वा ।

यूथेत्यादि । यूथवृषं सेक्तारं वृषेण तथाविधेन सह, अवपातयतः योधयतः, पूर्वः साहसदण्डः । घातयतः उत्तमः साहसदण्डः ।

प्रतिपदपञ्चिका

घृतपरिमाणमाह—क्षीरद्रोण इति, गवां क्षीरद्रोणे घृतप्रस्थो भवति । पञ्चभागाधिकः सकुटुम्बप्रस्थो महिषीणां क्षीरद्रोण इति, द्विभागाधिकः सार्धः प्रस्थोऽजावीनां क्षीरद्रोणे भवतीति । प्रायिकश्चैतन्निश्चयस्तु मन्थादेवावगन्तव्यः । तदाह—मन्थो वा सर्वेषां प्रमाणमिति, कुत इत्याह—भूमितृणोदकविशेषादिति, भूम्यादिविशेषेण क्षीरस्य घृतस्य वृद्धिर्भवति । क्षीरवृद्धिर्वृतादीनां क्षीरस्य च घृतवृद्धिरित्यपरे ।

[गवादिरक्षणतदुपनिवेशादिकदूर्णाग्रहणानां व्यवस्थाः]

वर्णावरोधेन दशतीरक्षा । उपनिवेशदिग्विभागो गोप्रचारात् बलान्वयतो वा गवां रक्षासामर्थ्याच्च । अजादीनां षाण्मासिकीमूर्णां ग्राहयेत् । तेनाऽश्वखरोष्ट्रवराहव्रजा व्याख्याताः ।

प्रतिपदपञ्चिका

यूथवृषं सेक्तारमन्थेन वृषेण सह पातयतो योधयतः पूर्वः साहसदण्डः । घातयतो विकलीकारयतो वा उत्तमः ।

श्रीमूला

वर्णेत्यादि । वर्णावरोधेन दशतीरक्षा वर्णनियमेन दशकवर्गाणां रक्षा शुक्लवर्ण एको दशकवर्गः लोहितवर्णोऽन्य इत्येवं नियतैकैकवर्णयोगिनां दशानां दशतां रक्षणं, कर्तव्यम् । दशतीशब्दस्य स्त्रीत्वमत एव पाठात् कल्प्यं दशतामिति वा पाठः ।

उपनिवेशेत्यादि । उपनिवेशदिग्विभागः गवाद्युपनिवेशदिग्व्यवस्था, गोप्रचाराद् गोप्रचारदिशमनुसृत्य, बलान्वयतो वा गवां गोबलयोगमनुसृत्य च, रक्षासामर्थ्याच्च चोरादिभयरहितत्वनिमित्तकं रक्षणसौकर्यमनुसृत्य च, भवति ।

अजादीनामिति । अजाविप्रभृतीनां, षाण्मासिकीं षण्मासप्रवृद्धाम्, ऊर्णां ग्राहयेत् ।

तेनेति । उक्तेन गवादिकल्पेन अश्वखरोष्ट्रवराहव्रजाः, व्याख्याताः । वेतनोपग्राहिकादीन्यश्वादियूथेष्वपि यथासम्भवं योज्यानीत्यर्थः ।

प्रतिपदपञ्चिका

वर्णावरोधेन वर्णनियमेन दशतीनां पशुदशवर्गाणां रक्षणं करणीयं तद् यथा-शक्ये यूथे दश धवलाः, दश लोहिताः, दश शबलाः, इत्यादि ।

पूर्वस्यां दिशि गोचरो भवति । पूर्वद्वार एवोपनिवेशः कर्तव्यः । तथा तद्बलाबलतो गवां यदि गावो दूरात् गन्तुं न शक्नुवन्ति, तदा गोप्रचारसमीपे उपनिवेशः कार्यः । रक्षासामर्थ्याच्च यदि दक्षिणस्यां दिशि चोरादिभयं भवति, तदोत्तरस्यां दिशि गोचरः उपनिवेशो वा कार्यः इति ।

अजादीनां षाण्मासिकीमूर्णां ग्राहयेत् । अजादीनामपि क्वचिद् देशे रोमवृद्धिर्भवतीति प्रसिद्धिः ।

तेनेति । प्रागुक्तगवादिविधानेन अश्वखरोष्ट्रवराहव्रजा व्याख्याताः । तेषामपि वेतनोपग्राहिकादिकं सङ्केतः सर्वं योजनीयमिति ।

[गवादीनां आहारव्यवस्था:]

बलीवर्दानां नस्याश्वभद्रगतिवाहिनां यवसस्यार्धभार:, तृणस्य द्विगुणम्, तुला घाणपिण्याकस्य, दशाढकं कणकुण्डकस्य, पञ्चपलिकं मुखलवणम्, तैलकुडुवो नस्यम्, प्रस्थः पानम्। मांसतुला, दध्नश्चाढकम्. यवद्रोणम्, माषाणां वा पुलाकः, क्षीरद्रोणमर्धाढकं वा सुरायाः, स्नेहप्रस्थः, क्षारदशपलं, शृङ्गिबेरपलं च प्रतिपानम्।

श्रीमूला

अशनादिकमाह—बलीवर्दानामिति। तेषां मध्ये, नस्याश्वभद्रगतिवाहिनां नस्यानां कृतनासावेधानाम् अश्वभद्रगतिवाहिनां च अश्वास्तेजस्सत्त्वयुक्ता अश्वभद्राः तद्गतिवाहिनां रथव्यायोगार्हाणां गवां, यवसस्य घासस्य, अर्धभारः दश तुलाः, अशनं भवतीति शेषः। तृणस्य सामान्यस्य, द्विगुणं विंशतितुलाः। तुला घाणपिण्याकस्य। दशाढकं चत्वारिंशत् प्रस्थाः कणकुण्डकस्य सूक्ष्मतण्डुलांशयुक्तस्य तण्डुलमलस्य। पञ्चपलिकं, मुखलवणं सिन्धूद्भवं लवणम्। तैलकुडुवो नस्यं कुडुवमितं तैलं नासापुटनिषेच्यमौषधम्। प्रस्थः प्रस्थपरिमाणं तैलं घृतं वा, पानम्। मांसतुला शतपलप्रमाणं मांसम्। दध्नश्चाढकम्। यवद्रोणं यवानां द्रोणं, माषाणां वा पुलाकः अर्धपक्वः सिक्थो वा, द्रोणपरिमाणः। यवमाषपुलाकयोश्चायं विकल्पः। क्षीरद्रोणमिति। द्रोणमितं क्षीरम्, अर्धाढकं वा सुरायाः क्षीराभावे अर्धाढकमिता सुरा। स्नेहप्रस्थः तैलघृतान्यतरस्य प्रस्थः, क्षारदशपलं गुडपलदशकं, शृङ्गिबेरपलं शुण्ठ्याः पलं च, इत्येतच्चतुष्टयं मिलितं, प्रतिपानम् अग्निदीपनार्थं पानं, भवति।

प्रतिपदपञ्चिका

बलीबर्दादीनाम् इति, निर्धारणे षष्ठी, नस्याश्वाः, विद्धनासा अश्वाकारा रथादिवाहिनः तदन्तर्भावात्। तेषाम् अयं वक्ष्यमाणो विधिरिति केचित्। अपरे तु बलीवर्दानां नस्याश्वभद्रगतिवाहिनां नासाव्यसनसमनन्तरकालमेव अश्वैः सह भद्रां गतिं वहतीति वाहिनो रथवाहनसमर्थान् (वक्ष्यति कुर्यात् ?)। गवाश्च व्यायोगं रथेष्वल्पभयो न वा इति। तेषामशनं यवसस्य अर्धभारः धाणपिण्याकतुला, दशाढकं कणकुट्टस्येति, प्रदेशान्तरे व्याख्यातम्। दशपलं तावत्प्रमाणममृतलवणं भवति। भक्षार्थं लवणं तैलकुडुम्बो नस्यं नासिकापुटदेयम्। तैलप्रस्थश्च पानं मांसं तुलापलशतं दध्नश्चाढकम्, यवद्रोणं माषाणां वा द्रोणं वा पुलाकोऽर्धसिद्धः। क्षीरद्रोणमर्धाढकं सुराया अर्धेन चार्धप्रस्थः तैलस्य घृतस्य वा। क्षीरस्य (गुडस्य ? दुग्धस्य) दशपलं शुण्ठीपलं चैतच्चतुष्टयं संयोजितं प्रतिपानमापराह्णिकमेषां च यवादीनां किञ्चिन्नित्यं किञ्चिन्नैमित्तिकं वैकल्पिकं च।

पादोनमश्वतरगोखराणां, द्विगुणं महिषोष्ट्राणां कर्मकरबलीवर्दानाम् । पायना (थं) र्थानां च धेनूनाम् । कर्मकालतः फलतश्च विधानम् । सर्वेषां तृणोदकप्राकाम्यम् । इति गोमण्डलं व्याख्यातम् ।

[यूथकल्पनाः]

पञ्चर्षभं खराश्वानामजावीनां दशर्षभम् ।
शत्यं गोमहिषोष्ट्राणां यूथं कुर्याच्चतुर्वृषम् ॥११०॥

इत्यध्यक्षप्रचारे गोऽध्यक्षः, एकोनत्रिंशोऽध्यायः,
आदितः पञ्चाशः ।

श्रीमूला

पादोनमिति । पादन्यूनं पूर्वोक्तं भद्रगतिबलीवर्दविधानमेव, अश्वतरगोखराणां वेसरपुङ्गवान्तरगर्दभानां, भवति । द्विगुणमिति । द्विगुणं भद्रगत्युक्तद्विगुणं महिषोष्ट्राणां, कर्मकरबलीवर्दानां शकटाद्युपयोगिनां पुङ्गवानां च । पायनार्थं च धेनूनामिति । पायनप्रयोजनकं यद् विधानमुक्तं तच्च चकाराद् भक्षणार्थं च, द्विगुणमिति वर्तते । कर्मकरबलीवर्दविषये धेनुविषये च विधानद्वैगुण्यवचनेनाप्यपरितुष्यन् विधानसार-मुपदिशति—कर्मकालतः फलतश्च विधानमिति । कर्मकालपरिमाणाद्यनुसारेण कर्मकरबलीवर्दानां दुग्धबाहुल्यादिफलप्राप्त्यनुसारेण च धेनूनामशनपानविधानं द्विगुणं ततोऽप्यधिकं वा निश्चेतव्यमित्यभिप्रायः । सर्वेषामिति । सर्वपशूनां, तृणोदकप्राकाम्यं तृणस्य उदकस्य च प्राकाम्यं पर्याप्तत्वं, कार्यम् । तृणोदकं प्रकाम्य-मिति पाठे तृणं च उदकं च प्रकर्षेण काम्यं दुग्धवृद्ध्यनुरूपमपेक्षणीयं, यद्वा कामः पश्वभिलाषस्तत्पूरणानुरूपमित्यर्थः । इति गोमण्डलं तत्सम्बद्धं विधाजातं, व्याख्यातं वितत्य प्रतिपादितम् ।

प्रतिपदपञ्चिका

पादोनमिति, तदेव भद्रगतिबलीवर्दयवसादिविधानमश्वतरगोखराणां वेस-राणाम् इतरपुङ्गवानां गर्दभानां च द्विगुणं तदेव यवसहारादि महिषोष्ट्राणां कर्मकर-बलीवर्दानाम् अवघट्टहलशकटाद्युपयोगिनां, पायनार्थानां च राज्ञो महानसि वा धेनूनां कर्मकालतः फलतश्च यथासङ्ख्यं यावत्कर्मकालं बलीवर्दानां यवदोहं क्षीरबाहुल्यतो वा धेनूनां विधानम् । सर्वेषां पशूनां तृणोदकप्राकाम्यं तत्प्रत्ययलाभः पर्ग वृष्टिकरं तत् पशूनामिति गोमण्डलं व्याख्यातम् । वेतनोपग्राहिकादिद्विविधानां तत् सर्वं विस्तरेण प्रतिपादितमिति ।

श्रीमूला

यूथकल्पनां श्लोकेनाह—पञ्चर्षभमिति । शत्यं व्यक्तिशतप्रमाणं, यूथं,

श्रीमूला

खराश्वानां, पञ्चर्षभं पञ्च ऋषभाः सेक्तारो यस्मिंस्तत् तथाभूतं, कुर्यात् । अजावीनां, यूथं, दशर्षभं दशसेक्त्रधिष्ठितं, कुर्यात् । गोमहिषोष्ट्राणां, यूथं, चतुर्वृषं सेक्तृचतुष्टया-धिष्ठितं, कुर्यात् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनत्रिंशोऽध्यायः, गोध्यक्षः, आदितः पञ्चाशः ॥

प्रतिपदपञ्चिका

अध्यायप्रान्ते श्लोकमाह—पञ्चर्षभमित्यादि, ऋषभो वर्षश्च सेक्ता, शत्य शतप्रमाणम्, शेषं सुबोधम् ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायाम्
अध्यक्षप्रचारे द्वितीयेऽधिकरणे एकोनत्रिंशोऽध्यायः, गोऽध्यक्षः,
आदितः पञ्चाशोऽध्यायः ॥

सप्तचत्वारिंशं प्रकरणम्

त्रिंशोऽध्यायः ।

अश्वाध्यक्षः ।

[तत्तद्भेदनिर्देशविधानपूर्वकम् अश्वरक्षणविधिः]

अश्वाध्यक्षः पण्यागारिकं क्रयोपागतम् आहवलब्धम् आजातं साहाय्यकागतकं पणस्थितं यावत्कालिकं वाऽश्वपर्यग्रं कुलवयोवर्णचिह्नकर्मवर्गागमैर्लेखयेत् । अप्रशस्तन्यङ्गव्याधितांश्चावेदयेत् । कोशकोष्ठागाराभ्यां च गृहीत्वा मासलाभं अश्ववाहश्चिन्तयेत् ।

श्रीमूला

अश्वाध्यक्ष इति सूत्रम् । अश्वाध्यक्षः सर्वाश्वनायकः अर्थात् तद्व्यापारोऽभिधीयत इति सूत्रार्थः । स्वाम्यादिप्रकृत्यभिधानानन्तरं दण्डप्रकृतिं प्राप्तावसरां वक्तुमुपक्रमः । तत्राश्वानां प्राधान्यात् प्रथमं तदध्यक्षाभिधानम् ।

अश्वाध्यक्ष इत्यादि । अश्वपतिः, पण्यागारिकं प्राभृतोपनीतं पण्यागारगतं, क्रयोपागतं, क्रीतम्, आहावलब्धं युद्धाहृतम्, अजातं निजाश्वोत्पन्नं, साहाय्यागतकं साहाय्यदानेन लब्धं, पणस्थितम् आधित्वेन स्थितं, यावत्कालिकं यावान् प्रयोजनकालस्तावते कालायान्यस्मादानीतं, वाशब्दश्चार्थे, इत्थं सप्तप्रकारम्, अश्वपर्यग्रम् अश्वानां प्रमाणं, कुलवयोवर्णचिह्नकर्मवर्गागमैः कुलेन पारसीककाम्बोजारट्टवनायुप्रभृतिना, वयसा द्विवर्षत्रिवर्षचतुर्वर्षादिना, वर्णेन शुक्लकृष्णादिना, चिह्नेन धवलवालफालप्रोथादिना, कर्मणा सान्नाह्यादिना, वर्गेण पारसीकादिभिरियद्भिरियानयं वर्ग इति वर्गीकरणेन, आगमेन प्राप्तिस्थानेन च; इत्येवं सप्तभिर्विशेषैर्युक्तं, लेखयेत् ।

अप्रशस्तेत्यादि । अप्रशस्तान् शृङ्गस्थानमांसवुद्वुदत्वान्यप्रभैकाङ्घ्रित्वादिदोषयुक्तान्, न्यङ्गान् अङ्गविकलान्, व्याधितांश्च, आवेदयेत्, यथाकालं परिवर्तनार्थं चिकित्सार्थं च ।

कोशकोष्ठागाराभ्यां चेति । कोशात् कोष्ठागाराच्च, गृहीत्वा मासलाभं मासपरिव्ययक्लृप्तं हिरण्यमश्वभोज्यं चादाय, अश्ववाहः, चिन्तयेत् तत्कार्यम् ।

प्रतिपदपञ्जिका

अश्वाध्यक्ष इति सूत्रम् । अश्वाध्यक्षो महाश्वपतिः, सोऽश्वपर्यग्राहादीन् वक्ष्यमाणाननुतिष्ठेदिति सूत्रार्थः । सम्बन्धस्तु पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु

[अश्वरूपसंङ्ख्याद्यानुगुण्येन अश्वशालापरिकल्पनविधिः]

अश्वविभवेनायताम् अश्वायामद्विगुणविस्तारां चतुर्द्वारोपावर्तनमध्यां सप्रग्रीवां प्रद्वारासनफलकयुक्तां वानर-मयूर-पृषत-नकुल-चकोर-शुक-शारिका-भिराकीर्णां शालां निवेशयेत् ।

प्रतिपदपञ्चिका

विनयं गच्छेदिति हस्त्यादयोऽभिहिताः, तदध्यक्षास्तु नोक्ताः, तेऽभिधीयन्त इत्ययमध्या-यत्रयस्यापि सम्बन्धः । अथवा स्वाम्यमात्यजनपददुर्गकोशप्रकृतयोऽभिहिताः । तदनन्तर दण्डप्रकृतिर्वक्तव्या सामिधीयत इति, सम्बन्धस्तु तत्रापि प्राधान्यात् अश्वानामश्वाध्यक्षः इत्येतदाह । तथा चोक्तम्—

शक्यमश्वसहस्रेण वीरारूढेन भारत ! ।
व्यायता यद्द्वितीयेन कृत्स्ना जेतुं वसुन्धरा ।। इति ।

तमाह—अश्वाध्यक्ष इत्यादि । सपण्यागारिकादि सप्तप्रकारमश्वपर्यग्रं कुलादिषड्-विशेषणं प्रत्येकं लेखयेत् । तत्र पण्यागारिकं दर्शनागतं क्रयोपगतं क्रीतम् आवहलब्धं सङ्ग्रामाहृतम् आजातं स्ववेदवाघातं साहाय्यागतकं साहाय्यदानेन लब्धं पणस्थितम् अधिकृतं यावत्कालिकं यावत्प्रयोजनं परकीयमानितमश्वपर्यग्रमश्वपरिमाणम् । कुलेन काम्भोजादिना वयसा द्विवर्षत्रिवर्षचतुर्वर्षादिना, वर्णेन श्वेतशोणादिना चिह्नेन पौण्ड्र प्रोथादिना पाण्डुप्रोढकालवकालादिना, कर्मणा सान्नाह्यादिना, वर्गेण समुदायेन, तद्यथैतावतीभिर्वालमीताभिश्च काम्भोजादिभिरेतावानयं वर्ग इति समुदायीकृत्य आगमेन यतो लब्धः इत्येवं लेखयेत् । अश्वाध्यक्षः अप्रशस्तादीन् वा वेदयेत् । अप्रशस्तं कृष्णं तालुकावर्तादि व्यङ्गः काणखञ्जादिः व्याधितः सरोगः ।

कोषकोष्ठागाराभ्यामित्यवच्छेदार्थः कोषाद्धिरण्यं कोष्ठागाराध्यक्षस्य स्नेहलव-णोर्णादिकं गृहीत्वा मासलाभं पञ्चत्रिंशद्दिवसपरिव्ययं गृहीत्वा अश्वानां मन्दुरादीं-श्चिन्तयेत् च ।

श्रीमूला

शालाविधिमाह—अश्वविभवेनेति । अश्वविभवेनायताम् अश्वपर्यग्रानुरूप्येण दीर्घाम्, अश्वायामद्विगुणविस्ताराम्, अश्वायाममनुपदं वक्ष्यति, तद्द्विगुणविस्तारां, चतुर्द्वारोपावर्तनमध्यां चतुर्द्वारं सुखप्रवेशनिर्गमार्थमग्न्यादिभये निष्क्रमणद्वाराणां सर्वतः सौलभ्यार्थं च परिकल्पितद्वारचतुष्टयम्, उपावर्तनं प्रलुठनस्थानं मध्ये यस्यास्तां तथाभूतां, सप्रगीवां प्रग्रीवेण मुखप्रासादेन सहितां, प्रद्वारासनफलकयुक्तां प्रद्वाराभ्यां द्वारोभयपार्श्वगताभ्याम् आसनफलकाभ्यां युक्तां, वानरमयूरादिभिः सप्तभिर्विष-प्रतीकारप्रयोजनाभिराकीर्णाम्, शालां मन्दुरां, निवेशयेत् निर्मापयेत् ।

अश्वायामचतुरश्रश्लक्ष्णफलकास्तारं सखादनकोष्ठकं समूत्रपुरीषोत्सर्गम् एकैकशः प्राङ्मुखमुदङ्मुखं वा स्थानं निवेशयेत् । शालावशेन वा दिग्विभागं कल्पयेत् । वडवावृषकिशोराणाम् एकान्तेषु ॥

प्रतिपदपञ्चिका

शालामाह—अश्वविभवेनायतामिति, अश्वसङ्ख्याभिरूपेण प्रमाणेनाऽऽयतां दीर्घमानेन च । दैर्घ्यस्याऽनियममाह—अश्वायामद्विगुणविस्तारामिति । अश्वायामं वक्ष्यति द्वात्रिंशदङ्गुलीमुखमुत्तमाश्वस्य पञ्चमुखान्यायाम इति । तदद्विगुणविस्तारां चतुर्द्वारामुपावर्तनमध्यां च प्रवेशनिर्गमयोरसम्बाधार्थम् अग्न्यादिमये यथासन्नद्वारनिर्गमार्थम् । चतुर्द्वारित्वम् उपावर्तनं प्रलुण्ठनस्थानं गोकरीषकल्पिततल्पमध्ये तदेकदेशे यस्याः सोपावर्तनमध्येति केचित् ।

अपरे पुनरुपावर्तनं प्रमाणविशेषणम् आचक्षाणास्तावत् प्रमाणमध्यं पार्श्वपङ्क्ति-(पद)द्वयान्तरमाचक्षते । तथा च—

"केचिदाहुर्युगायामं रथचर्येति चापरे ।
हयायामसमं केश्चिदुपावर्तनमिष्यते ॥" इति ।

समासकरणं च द्वारस्यापि तावन्मात्रज्ञापनार्थम् । सप्रग्रीवां मुखशालोपेतां प्रद्वारासनफलकां द्वारोभयपार्श्वसम्प्रश्रयासनफलकयुक्तामादक्षिणामवस्थानार्थं वानरमयूरादिभिराकीर्णां विषप्रतीकाराद्यर्थं कारयेत् निवेशयेत् ।

श्रीमूला

अश्वायामेत्यादि । अश्वायामचतुरश्रश्लक्ष्णफलकास्तारम् अश्वदैर्घ्यानुगुण्येन चतुरश्रनिर्मितं श्लक्ष्णं च फलकम् आस्तार आस्तरणं यस्मिंस्तत् तथाभूतं, सखादनकोष्ठकं खादनकोष्ठैर्यवसादिविकिरणाधारभूतैस्तन्द्रूक्षणकोष्ठैः सहितं, समूत्रपुरीषोत्सर्गं मूत्रपुरीषानवरोधसंविधानसहितम् अर्थात् किञ्चिदग्रतः समुन्नतम्, एकैकशः प्रत्यश्वं, प्राङ्मुखम् उदङ्मुखं वा स्थानं निवेशयेत् । शालावशेन वा दिग्विभागं कल्पयेदिति । राजभवनस्य य उत्तरपूर्वो दिग्विभागोऽश्वशालार्थं उक्तः 'उत्तरपूर्वं भागं कोशो गवाश्वं च' इति, स चेदश्वानां बाहुल्यादपर्याप्तः, तदा निर्मातव्यशालामहत्त्वानुगुण्येन दिग्विभागोऽन्यः स्वीकरणीय इत्यर्थः । वडवेत्यादि । वडवानां प्रसविनीनां वृषाणां सेक्तॄणां किशोराणां षण्मासादूर्ध्वम् आ त्रिवर्षात् किशोराः तेषां च एकान्तेषु तदन्याश्वानां तेषां चाऽन्योन्यदृष्ट्यगोचरेषु स्थलेषु, स्थानं कल्पयेदिति वर्तते ।

प्रतिपदपञ्चिका

महाशालानिवेशनमभिधाय प्रत्येकमाह-अश्वायामचतुरश्रश्लक्ष्णफलकास्तारमिति । अश्वायामचतुरश्रश्लक्ष्णैः फलकैरास्तारो यस्मिन् सखादनकोष्ठं यवसादि-

[प्रजातजातयोरश्वयोः देशकालवयोऽनुगुणाहारव्यवस्था]

वडवायाः प्रजातायास्त्रिरात्रं घृतप्रस्थपानम्; अत ऊर्ध्वं सक्तुप्रस्थः स्नेहभैषज्यप्रतिपानं दशरात्रम्; ततः पुलाको यवसमार्तवश्चाहारः। दशरात्रादूर्ध्वं किशोरस्य घृतचतुर्भागः सक्तुकुडुवः, क्षीरप्रस्थश्चाहार आ षण्मासादिति। ततः परं मासोत्तरमर्धवृद्धिर्यवप्रस्थ आ त्रिवर्षात्; द्रोण आ चतुर्वर्षादिति। अत ऊर्ध्वं चतुर्वर्षः पञ्चवर्षो वा कर्मण्यः पूर्णप्रमाणः।

प्रतिपदपञ्चिका

विकरणाधारो वेनयवसादिखादनकोटि(वी)कोपेतं वा मूत्रपुरीषोत्सर्गं किञ्चिदग्रतः समुन्नतमेकैकशः प्रत्येकमश्वानां स्थानं निवेशयेत्। प्रागुदङ्मुखग्रहणं मङ्गलार्थं दिगन्तरप्रतिषेधार्थं च। शालावशेन वा दिग्विभागमित्यादि उत्तरपूर्वभागे कोशोगवाश्वं चेत्युक्तम्, तद्यदि न तत्र तावानवकाशो महतो च शाला कार्या, तदा तद्योग्येऽन्यस्मिन्नपि दिग्विभागे शालां कुर्यादित्यर्थः। वडवा प्रसविनी। वृषः सेक्ता। किशोरः षण्मासादूर्ध्वमा त्रिवर्षादिति। एतेषामेकान्तेषु अन्यवाजिनां तेषां च परस्परमदर्शने शालां कुर्यात्।

श्रीमूला

वडवाया इति। तस्याः, प्रजातायाः प्रसूतायाः, त्रिरात्रं, घृतप्रस्थपानं प्रथमदिवसादूर्ध्वं प्रातः प्रातरिति स्वामी। अतः ऊर्ध्वं, सक्तुप्रस्थः अपराह्णभोजनं, तदनन्तरं स्नेहभैषज्यप्रतिपानं स्नेहयुक्तमूलक्वाथादिप्रतिपानं, दशरात्रम्। तत इति। तदनन्तरं, पुलाकः अर्धसिद्धयवादिः यवसं घासः, आर्तवश्चाहारः ऋतुयोग्यश्चाहारः सस्यलक्षणः।

दशरात्रादिति। दशरात्रादूर्ध्वं, किशोरस्य, घृतचतुर्भागः पादकुडुवघृतयुक्तः सक्तुकुडुवः, क्षीरप्रस्थश्च, आहारः। आ षण्मासादिति। आमासषटकम् एवं कर्तव्यम्। ततः परमिति। षण्मासादूर्ध्वं, मासोत्तरमर्धवृद्धिः प्रतिमासं वर्धमानार्धप्रस्थः। आ कुतोऽयं यवप्रस्थो वर्धत इत्याह—आ त्रिवर्षादिति। द्रोण इति। यवद्रोणः त्रिवर्षादूर्ध्वम्, आ चतुर्वर्षाद्, आहारः। अत ऊर्ध्वं, चतुर्वर्षः, पञ्चवर्षो वा अश्वः, कर्मण्यः सान्नाह्यादिकर्मार्हः, पूर्णप्रमाणः पूर्णं प्रमाणं वक्ष्यमाणं यस्य स तथाभूतो भवति।

प्रतिपदपञ्चिका

वडवायाः प्रजाताया इति। प्रसूतायास्त्रिरात्रं घृतप्रस्थः प्रातः प्रातरच्छापानं तच्च दिनमेकं लङ्घिताया इति द्रष्टव्यम्। अतः त्रिरात्रादूर्ध्वं सक्तुप्रस्थः अपराह्णभोजनं स्नेहभैषज्यप्रतिपादनमिति, भोजनानन्तरं स्नेहोक्षितं च मूलादिकं वा प्रतिपानं

[तत्तत्प्रमाणाद्यानुगुण्येनोत्तमत्वादिव्यवस्था]

द्वात्रिंशदङ्गुलं मुखमुत्तमाश्वस्य, पञ्चमुखान्यायामः विंशत्यङ्गुला जङ्घा, चतुर्जङ्घः उत्सेधः। त्र्यङ्गुलावरं मध्यमावरयोः, शताङ्गुलः परिणाहः पञ्चभागावरं मध्यमावरयोः।

[अश्वस्वरूपानुगुण्येन आहारव्यवस्थाः, तन्नियोजनव्यवस्थाश्च [

उत्तमाश्वस्य द्विद्रोणं शालिव्रीहियवप्रियङ्गूणामर्धशुष्कमर्धसिद्धं वा

प्रतिपदपञ्चिका

दशरात्रम्, ततो दशरात्रादूर्ध्वं पुलाकोऽर्धसिद्धयवादिः । यवसम्भरितं शुष्कं वा सस्यमार्तवमृतुयोग्यमाहारःर्थं देयम् । दशरात्रादूर्ध्वं किशोरस्य घृतचतुर्भागः सक्तुकुडुवः चतुर्भागः घृतसंयुक्तः। क्षीरप्रस्थश्चाहार आ षण्मासादिति। ततः परं षण्मासादूर्ध्वं मासोत्तरमर्धप्रस्थ इति मासमेकं यवप्रस्थः। ततो मासे मासे अर्धप्रस्थो वर्धते। आ त्रिवर्षादिति त्रिवर्षादूर्ध्वं द्रोणमेकवर्षमत ऊर्ध्वमिति तृतीयाद् चतुर्थाद्वा वर्षात् चतुर्वर्षः पञ्चवर्षो वा कर्मण्यः सन्नाहादिक्रियायोग्यः पूर्णप्रमाणो वक्ष्यमाण-प्रमाणोपेतो भवति।

श्रीमूला

तदेव प्रमाणं व्याचष्टे—द्वात्रिंशदित्यादि। उत्तमाश्वस्य, द्वात्रिंशदङ्गुलं मुखं, पञ्च मुखानि आयामः षष्टयधिकशताङ्गुलं दैर्घ्यं, विंशत्यङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः अशीत्यङ्गुलमौन्नत्यम्। त्र्यङ्गुलावरं मध्यमावरयोः यदुक्तमुत्तमस्य मुखादिप्रमाणं तद् मध्यमस्य त्र्यङ्गुलावरं त्र्यङ्गुलन्यूनम् अवरस्य अधमस्य ततोऽपि त्र्यङ्गुलन्यूनम्। टीकाभाषयोः द्वयङ्गुलावरमिति पाठ उपात्तः। अथ परिणाहस्य प्रमाणमाह—शताङ्गुल इति। अङ्गुलशतप्रमाणः, परिणाहः परिक्षेपः, अर्थादुत्तमाश्वस्य। पञ्चभागावरं मध्यमावरयोः उत्तमाश्वपरिणाहप्रमाणात् पञ्चभागन्यूनम् अर्थादशीत्यङ्गुलं मध्य-माश्वस्य षष्टयङ्गुलमवराश्वस्य परिणाहप्रमाणम्।

प्रतिपदपञ्चिका

तच्च प्रमाणमाह—द्वात्रिंशदङ्गुलं मुखमाप्रोथमस्तकमुक्तमुत्तमाश्वस्य, पञ्चमुखान्या-यामो दीर्घत्वं, विंशत्यङ्गुला जङ्घा जानुखुरान्तरं, चतुर्जङ्घ उत्सेधः अशीत्यङ्गुलः सखुर-पृष्ठवंश उच्छ्रायः द्वयङ्गुलावरं मध्यमावरयोरिति। मुखाद्युत्सेधान्तमुत्तमाश्वस्य यद् यत् प्रमाणमभिहितम्, तत्र सर्वत्र द्वयङ्गुलाभ्यामवरोऽमध्यमः। ततो द्वयङ्गुलाभ्या-मवरोऽधमः अवगन्तव्यः। शताङ्गुलः परिणाहः आसमार्गवं(मं)ध्रापरिक्षेपः उत्तमस्य पञ्चभागावरं मध्यमावरयोरिति पूर्ववद् व्याख्येयम्। परिणाह इति वर्तते, पञ्चनवत्यङ्गुलं परिक्षेपः प्रमाणं मध्यमस्य, नवत्यङ्गुलमवरस्येति।

श्रीमूला

आहारविधानमाह—उत्तमाश्वस्येति। तस्य, द्विद्रोणं शालिव्रीहियवप्रियङ्गूणां

मुद्गमाषाणां वा पुलाकः; स्नेहप्रस्थश्च। पञ्चपलं लवणस्य। मांसं पञ्चाशत्पलिकम्। रसस्याढकं द्विगुणो वा दध्नः पिण्डक्लेदनार्थम्। क्षार-पञ्चपलिकः सुरायाः प्रस्थः पयसो वा द्विगुणः प्रतिपानम्। दीर्घ-पथभारक्लान्तानां च खादनार्थं स्नेहप्रस्थोऽनुवासनम्। कुडुवो नस्य-कर्मणः। यवसस्यार्धभारः, तृणस्य द्विगुणः, षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा। पादावरमेतन्मध्यमावरयोः। उत्तमसमो रथ्यो वृषश्च मध्यमः। मध्यमसमश्चावरः। पादहीनं वडवानां पारशमानां च; अतोऽर्धं किशोराणां च। इति विधायोगः।

श्रीमूला

शाल्याद्यन्यतमस्य द्रोणद्वयम्, अर्धशुष्कम् अर्धसिद्धं वा, भोजनमिति शेषः। मुद्ग-माषाणां वा, पुलाकः भक्तसिक्थकः, उक्तपरिमाणः। स्नेहप्रस्थश्च घृतस्य तैलस्य वा प्रस्थश्च पानार्थः। पञ्चपलं लवणस्य। मांसं, पञ्चाशत्पलिकं पञ्चाशत्पलप्रमाणम्। रसस्य मांससंस्कृतस्य, आढकं, द्विगुणं वा दध्नः दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपुलाकक्लेदनार्थम्। क्षारपञ्चपलिकः गुलादिपञ्चपलयुक्तः सुरायाः प्रस्थः, पयसो वा, द्विगुणः प्रस्थद्वयं, प्रतिपानम् अपराह्णदेयम्। दीर्घपथभारक्लान्तानां च दीर्घाध्वलङ्घन-भारवहनपरिश्रान्तानां च, खादनार्थम् अग्निदीपनद्वारेण सम्यगाहारग्रहणार्थं, स्नेहप्रस्थः, अनुवासनम् अनुवासनाख्यवस्तिचिकित्सादानं, भवति। यदुक्तम्—

"वस्तिर्द्विधाऽनुवासाख्यो निरूहश्च ततः परः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः॥
कषायक्षीरतैलैर्यो निरूहः स निगद्यते॥" इति।

कुडुवः स्नेहस्य प्रस्थचतुर्भागः, नस्यकर्मणः नासिकासेचनस्य। यवसस्य हरितसस्यादेः, अर्धभारः दश तुलाः। तृणस्य शुष्कस्य, द्विगुणः विंशतितुलाः, यवसाभावे। षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा हस्तषट्कपरिणाहः पुञ्जीलानां तृणस्तम्बानां ग्रहो वा अर्थाद् भुजद्वयालिङ्गनग्राह्यस्तृणस्तम्बसङ्घातो वा।

पादावरमेतन्मध्यमावरयोरिति। उत्तमस्याश्वस्योक्तं द्विद्रोणादिकं सर्वं चतुर्भागन्यूनं मध्यमस्य ततोऽपि चतुर्भागन्यूनमधमस्य। उत्तमसम इति। उत्तमा-श्वविधसमानविधः, रथ्यो वृषश्च मध्यमः रथवाही मध्यमाश्वः सेक्ता च मध्यमाश्वः। मध्यमसमश्चावरः अधमाश्वो रथवाही अधमाश्वः सेक्ता च मध्यमाश्वविधासमान-विधः। पादहीनं चतुर्भागहीनम् अर्थात् त्रिविधमपि विधाविधानं, वडवानां पारशमानां च अश्वतराणां च। इह पारशमानामिति माकारयुक्तपाठलेखनं कोशेषु चिन्त्यम्। पारशवानामिति तु वाकारयुक्तं पठितव्यं, तदा हि पारशवशब्दः सङ्करजातिमनुष्य-

विधापाचक-सूत्रग्राहक-चिकित्सकाः प्रतिस्वादभाजः ।

युद्धव्याधिजराकर्मक्षीणाः पिण्डगोचरिकाः स्युः । असमरप्रयोग्याः पौरजानपदानामर्थेन वृषाः वडवास्वायोज्याः ।

———————

श्रीमूला

वचनः सङ्करजे अश्वे वेगसराख्ये भक्त्या प्रयुक्त इति शक्यते वक्तुम् । अतोऽर्धं वडवाविधाया अर्धम्, किशोराणां च । इति एवं, विधायोगः उक्तः ।

प्रतिपदपञ्चिका

विधाविधिमाह—उत्तमाश्वस्य द्विद्रोणमित्यादि, शाल्यादीनामन्यतमस्य, शाल्यादयः प्रतीताः । प्रियङ्गुकम्बुः अर्धशुष्कं मनाक्क्लिन्नमिति, अर्धसिद्धं मनाक्सिद्धं मुद्गमाषाणां वा पुलाकः । स्नेहप्रस्थो पानस्य पञ्चपलकं लवणस्य, मांसं पञ्चाशत्-पलिकमिति, तावन्मात्रं मांससंस्कृतस्य रसस्याढकं दध्नो वा द्विगुणमाढकद्वयम् उक्तवतः पिण्डक्लेदनार्थं क्षारपञ्चपलिको गुडादिपञ्चपलोपेतः सुरायाः प्रस्थः पयसो वा द्विगुणः प्रस्थद्वयं प्रतिपानमापराह्णिकम् । दीर्घपथभारक्लान्तानां चेति । दीर्घाध्वगमनेन भारवहनेन च क्लान्तानामाप्यायनार्थं देयम्, तथा खादनार्थं खादितजरणार्थम् अग्निवृद्ध्यै देयम् । स्नेहप्रस्थोऽनुवासनं वस्तिदानं, कुडुवो नस्यकर्मणः नासिकादानस्य यवसस्य हरितसंस्यादेरर्धभारः । तृणस्य शुक्लस्य (शुष्कस्य) द्विगुणः । षडरत्नि-परिक्षेपस्तद्रज्जुपरिक्षेपः पुञ्जोलग्रहो वा तृणस्य भुजद्वयपरिष्वङ्गग्राह्यः ।

पादावरं चतुर्भागहीनमेतद् द्विद्रोणादिकं मध्यमावरयोर्यथाक्रमं वरं भवति । उत्तमसम इति, उत्तमाश्वविधासमानविधः रथ्यो रथवाहिवृषश्च सेवता मध्यमः । मध्यमसमश्च रथ्यो वृषश्च पादहीनं वडवानामिति । विधानमपि त्रिविधं विधा विधानं पादहीनं भवति । पारशमानां च वेसराणां पादहीनमेव ।

अतोऽर्धमिति । वडवाविधार्धं किशोराणामित्ययं विधायोगः प्रतिपादित इति ।

श्रीमूला

विधापाचकसूत्रग्राहकचिकित्सका इति । अश्वाहारपक्तारोऽश्वपरिचारका अश्ववैद्याश्च, प्रतिस्वादभाजः विधाभागिनः, अतो विधायास्तद्भजनीया मात्रापि अश्वभोज्यमात्राभिः सह संविधेयेत्यभिप्रायः ।

युद्धव्याधिजराकर्मक्षीणा इति । युद्धादित्रयक्षीणाः सान्नाह्यादिकर्मक्षीणाश्च, पिण्डगोचरिकाः अप्रशस्तः पिण्डः कुक्षिपूरणमात्रार्थं आहारो गोचर एषामिति तथाभूताः, स्युः । असमरप्रयोग्या इति । युद्धानर्हाः, पौरजानपदानाम्, अर्थेन प्रसूतिरूपप्रयोजनेन, वृषाः सेक्तारो भवन्तः, वडवासु आयोज्याः ।

प्रयोग्यानामुत्तमाः काम्भोजक सैन्धवाऽऽरट्टजवानायुजाः। मध्यमाः वाल्हीक-पापेयक-सौवीरक-तैतलाः। शेषाः प्रत्यवराः। तेषां तीक्ष्णभद्रमन्द-वशेन सान्नाह्यमौपवाह्यकं वा कर्म प्रयोजयेत् ॥

[सान्नाह्यपदार्थः, औपवाह्याश्वमार्गस्य पञ्चधा विभागः, प्रत्येकं तद्भेदाश्च]

चतुरश्रं कर्माश्वस्य सान्नाह्यम्। वल्गनः नीचैर्गतः लङ्घनः धोरणः

प्रतिपदपञ्चिका

विधापाचको रन्धकः, सूत्रग्राहकः पारिकर्मिकः, चिकित्सकश्च वैद्यः, प्रतिस्वादभाजो विधासम्भाजः। युद्धव्याधिजराकर्मक्षीणा इति। युद्धादयः प्रतीताः, कर्म उपवाह्यं तैः क्षीणाः पिण्डगोचरिकाः उदरपूरणमात्रलाभिनो न निश्शेपविधा-लाभिन इति। येत्वसमरप्रयोग्याः समरव्यापारासमर्थास्ते पौरजानपदानां प्रसूतज्याः (? प्रसूतासु आयोज्याः) प्रयोजनीयाः।

श्रीमूला

प्रयोग्यानामिति। प्रगतचर्यादिशिक्षाणां युद्धयोग्यानामश्वानां मध्ये, उत्तमाः, काम्बोजकादयः कम्बोजादिदेशचतुष्टयोत्पन्नाः। मध्यमा वाह्लीकादिदेशचतुष्टयोत्पन्नाः, शेषाः उक्तेतरसौराष्ट्रादिदेशभवाः, प्रत्यवराः अधमाः।

अश्वानां द्विविधं कर्माह—तेषामिति। उत्तमादीनां, तीक्ष्णभद्रमन्दवशेन तीक्ष्णोऽतिमात्रतेजस्सत्त्वः आघातलेशस्याप्यसोढा भद्रस्तेजस्सत्त्वयुक्तः, आघात-सत्त्वानुरूपचेष्टो मन्दो निस्तेजस्सत्त्वो महाघातोत्पादनीयकर्मप्रतिपत्तिः त्रिविधैतत्स्व-भावानुगुण्येन, सान्नाह्यं साङ्ग्रामिकम्, औपवाह्यकं वा क्रीडायानाध्वयानादिप्रयोजनकं वा, कर्म, प्रयोजयेत्।

प्रतिपदपञ्चिका

प्रयोग्यानां युद्धयोग्यानाम् उत्तमाः प्रधानाः काम्भोजादयश्चत्वारः, एवं वाह्लीकादयश्चत्वारो मध्यमाः, शेपास्सौराष्ट्रादयः प्रत्यवराः, तत्र सैन्धवाः सिन्धु-देशजाः, पारसीकाः तद्देशजाः, काम्भोजादयस्तु पट् तुरगाकरा देशविशेषाः।

तेषामिति। काम्भोजादीनां तीक्ष्णादिवशेन तीक्ष्णोऽतितेजस्वी ततश्च सोऽल्पेनाऽव्याहतेनोद्विजते, भद्रस्तेजस्वी, सत्ववांश्च स यथाघातः सत्वसदृशं च चेष्टते, मन्दो निस्तेजाः निस्सत्वश्च स महताऽऽघातेन कर्म प्रतिपद्यते, तद्वशेन तदनुरूपेण सान्नाह्यं सङ्ग्रामादिकम्, औपवाह्यकं क्रीडासुखद्रुतयानप्रयोजनम्, एवं द्विविधं चतुर्विध-फलं कर्म प्रयोजयेत्। तथा च चतुर्विधं फलं दृष्टं, पुष्ट्याऽश्वानां पुरातनैः युद्धक्रीडासु बोधार्थं गमनार्थं तथाऽध्वनः इति।

श्रीमूला

चतुरश्रमिति। चतुरश्रं सौष्ठवयुक्तम्, कर्म शालिहोत्रादिप्रपञ्चितविशेषं साङ्ग्रामिककर्म, सान्नाह्यं, भवति।

नारोष्ट्रश्च औपवाह्याः। तत्रौपवेणुकः वर्धमानकः यमकः आलीढप्लुतः पूर्वगः त्रिकचाली च वल्गनः। स एव शिरःकर्णविशुद्धो नीचैर्गतः षोडशमार्गो वा। प्रकीर्णकः प्रकीर्णोत्तरः निषण्णः पार्श्वानुवृत्तः ऊर्मिमार्गः शरभक्रीडितः शरभप्लुतः त्रितालः बाह्यानुवृत्तः पञ्चपाणिः सिंहायतः स्वाधूतः क्लिष्टः श्लाघितः बृंहितः पुष्पाभिकीर्णश्चेति नीचैर्गतमार्गाः। कपिप्लुतः भेकप्लुतः एणप्लुतः एकपादप्लुतः कोकिलसञ्चारी उरस्यः बकचारी च लङ्घनः। काङ्कः वारिकाङ्क्षः मयूरः अर्धमयूरः नाकुलः अर्धनाकुलः वाराहः अर्धवाराहश्चेति धोरणः। संज्ञाप्रतिकारो नारोष्ट्र इति ॥

श्रीमूला

औपवाह्यं पञ्चधा विभजते—वल्गन इत्यादिना। औपवाह्याः औपवाह्याश्वमार्गाः।

वल्गनमार्गं विवृणोति—तत्रेत्यादि। तत्र वल्गनादिषु पञ्चसु मार्गेषु मध्ये, औपवेणुकः हस्तमात्रमण्डल इति स्वामी, वर्धमानकस्तावन्मात्रमण्डलपङ्क्तिपरिपाटीवल्गनः, यमको युगपदुभयमण्डलवल्गनः, आलीढप्लुतः एकपादसङ्कोचापरपादप्रसारणपूर्वप्लुतियुक्तः, पूर्वगः पूर्वार्धवल्गनः, त्रिकचाली त्रिकं पृष्ठवंशाधरः तेन पश्चार्धलक्षणात् पश्चार्धवल्गनः।

स एवेति। वल्गनमार्ग एव, शिरःकर्णविशुद्धः शिरसा कर्णाभ्यां चाविकृतः, नीचैर्गतः तदाख्यः। षोडशमार्गो वा वक्ष्यमाणषोडशविधश्च सः। के ते प्रकारा इत्याह—प्रकीर्णक इत्यादि। प्रकीर्णकः सर्वगतिसङ्करयुक्तः, प्रकीर्णोत्तरः प्रकीर्ण एवैकगतिप्रधानः. निषण्णो निष्कम्पपृष्ठगतिः, पार्श्वानुवृत्तस्तिर्यग्गतिः, ऊर्मिमार्गः उन्नतानतगतिः, शरभक्रीडितः शरभगतिः, शरभप्लुतः शरभतुल्योत्पतनः, त्रितालः त्रिपदगामी, बाह्यानुवृत्तः सव्यापसव्यवल्गनगतिः, पञ्चपाणिः चरणत्रयं सकृदवस्थाप्य एकं द्विरवस्थापयति, सिंहायतः सिंहतुल्यगतिः, स्वाधूतः अतिदीर्घगतिः, क्लिष्टो विवहनविस्रब्धगतिः, श्लिङ्गितोऽवनताग्रयायी, बृंहित उन्नताग्रयायी, पुष्पाभिकीर्णो गोमूत्रिकागतिः। इति एते, नीचैर्गतमार्गाः।

लङ्घनमाह—कपिप्लुत इत्यादि। वानरमण्डूकहरिणप्लुतैः सदृशप्लुतत्वात् कपिप्लुतो भेकप्लुत एणप्लुतश्च, एकपादप्लुतः सङ्कोच्य पादत्रयमेकेन पादेन प्लुतं यस्य सः, कोकिलसञ्चारी पिकवत्सञ्चारः, उरस्यः सङ्कोच्य सर्वान् पादान् उरसैव प्लवमानः, बकचारी च बकवत्सञ्चारश्च, लङ्घनः।

धोरणमाह—काङ्क इत्यादि। काङ्कसमानगतिः काङ्कः, वारिकाङ्क्षः हंसादिसमानगतिः। एवं मायूरादिर्व्याख्येयः। इति एवमष्टविधो धोरणः।

[रथवाहिभिः भारवाहिभिश्चाश्वैः एकदिनप्राप्याध्व-
परिमाणानां निर्देशः, गतिभेदाश्च]

षण्णव द्वादशेति योजनान्यध्वा रथ्यानाम् । पञ्च योजनान्यर्धाष्टमानि

श्रीमूला

नारोष्ट्रमाह—संज्ञाप्रतिकार इति । शिक्षितसङ्केतानुरूपचेष्टितः नारोष्ट्राख्यः । इतिशब्द औपवाह्यनिरूपणसमाप्तौ ।

प्रतिपदपञ्चिका

तत्र साान्नाह्यं कर्माह—चतुरश्रमिति । चतुरश्रं युद्धक्रीडासौष्ठवसामर्थ्यलक्षणं कर्माश्वस्य सान्नाह्यं भवति । तच्च विशेषतः शालिहोत्राद् धनुर्वेदादिभ्यश्चाव-गन्तव्यम् ।

सम्प्रति वल्गनादि पञ्चप्रकारमौपवाह्यकमभिधाय स्वयमेव व्याचष्टे—तत्रेत्यादि । औपवेणुकादिषट्प्रकारो वल्गनमार्गः, औपवेणुको हस्तमात्रमण्डलः वर्धमानस्ताव-न्मात्रमण्डलपङ्क्तिपरिपाटीवल्गनः, यमको युगपदुभयमण्डलवल्गनः, वृथाट्टः (?) पूर्वार्ध-वल्गनः त्रिकचाली चार्धपश्चवल्गन इति ।

नीचैर्गतं मार्गमाह—स एवेति । वल्गन एव शिरःकर्णविशुद्धस्तद्विकाररहित इत्येतावता विशेषेण नीचैर्गतो भवति । स षोडशमार्गश्च वक्ष्यमाणः प्रकीर्णकादि-षोडशप्रकारगतिः । वाशब्दश्चार्थे, तानेव प्रकारान् दर्शयति—प्रकीर्णक इत्यादि ।

तत्र प्रकीर्णकः सर्वगतिसङ्कीर्णः, प्रकीर्णोत्तरः स एवैकगतिप्रधानः, निषण्णो निष्कम्पपृष्ठगतिः, पार्श्वानुवृत्तस्तिर्यग्गतिः, ऊर्मिमार्गो निम्नोन्नतगतिः, शरभक्रीडितः तत्तुल्यगतिः, शरभप्लुतः तत्तुल्योत्पतनः, त्रितालश्चरणत्रययायी, बाह्यानुवृत्तस्सव्याप-सव्यवल्गनगतिः, पञ्चपाणिश्चरणत्रयं सकृदवस्थाप्य एकं द्विरवस्थापयति । सिंहायतः सिंहतुल्यगतिः स्वाधूतः अत्यन्तदीर्घगतिः, क्लिष्टो विवहनविस्रब्धयायी, श्लिङ्गितो-ऽवनताग्रयायी बृंहित उन्नताग्रयायी, पुष्पावकीर्णो गोमूत्रिकागतिरित्येते नीचैर्गतस्य मार्गा शनैर्गतप्रकाराः ।

सप्तप्रकारं लङ्घनमाह—कपिप्लुत इत्यादि । तत्र सङ्कुचितपादत्रयेणैकेन पादेन यः प्लवते स एकपादप्लुतः । सङ्कुचितसर्वपादः उरसैव यः प्लवते स उरस्यः । शेषास्तु कपिप्लुतादयः तद्वदित्युपमानाद् व्याख्येयाः । अष्टप्रकारं धोरणमाह—काङ्क इत्यादि, कङ्कचारिका तुल्यगतिः काङ्कस्तथैव द्विगुणयाकरिकः, मायूरार्धमायूरादयोऽपि मयूरा-दिगतिसाम्यात् साकल्यतो विकल्पनीयाः ।

नारोष्ट्रस्त्वेकप्रकार एव, तमाह—संज्ञाप्रतीकार इति । शिक्षितस्य विज्ञानं संज्ञा, तस्याग्रतः कृतसङ्केतस्य प्रतीकारः, तदनुरूपश्चेष्टितं नारोष्ट्र इति ।

श्रीमूला

गन्तव्याध्वमानमाह—षण्णव द्वादशेत्यादि । रथ्यानां रथवाहिनामुत्तममध्य-

दशेति पृष्ठवाह्यानामश्वानामध्वा ॥

विक्रमो भद्राश्वासो भारवाह्य इति मार्गाः ।
विक्रमो वल्गितमुपकण्ठमुपजवो जवश्च धाराः ।

[मुखादियोजनीयवन्धनोपकरणालङ्काराहाराणां व्यवस्थापकाः]

तेषां बन्धनोपकरणं योग्याचार्याः प्रतिदिशेयुः । साङ्ग्रामिकं रथाश्वालङ्कारं च सूताः । अश्वानां चिकित्सकाः शरीरह्रासवृद्धिप्रतीकारमृतुविभक्तं चाहारम् ।

श्रीमूला

गाधमानाम् अश्वानाम्, अध्वा, षट् नव द्वादशेति क्रमात् षड्योजनो नवयोजनो द्वादशयोजनश्च भवति । तथा पञ्च योजनानि, अर्धाष्टमानि सार्धानि सप्त योजनानि, दश योजनानि, इति क्रमेण पृष्ठभारवाहिनाम् अश्वानां त्रिविधानाम् अध्वा ।

त्रिविधं गतिभेदमाह—विक्रम इति । विक्रमः शनैर्गमनम्, भद्राश्वासो मध्यमः, भारवाह्यो द्रुतगमनम्, इति मार्गाः ।

धारा आह—विक्रमो वल्गितमिति । विक्रमः शनैर्गमनम्, वल्गितं प्रेङ्खितम्, उपकण्ठमुत्प्लुत्योत्प्लुत्य गमनम्, उपजवः प्रथमवेगः, जवश्चरमवेगः, इति धाराः ।

तेषामिति । रथ्यानां पृष्ठवाह्यानां चाश्वानाम्, बन्धनोपकरणं बन्धनान्युपकरणानि च मुखकण्ठपृष्ठपादादियोजनीयानि कवियपर्याणादीनि, योग्याचार्याः प्रतिदिशेयुः अश्वशिक्षाचार्याः उपदिशेयुः । साङ्ग्रामिकं रथाश्वालङ्कारं च, सूताः सारथयः प्रतिदिशेयुः । अश्वानां चिकित्सकाः अश्ववैद्याः, शरीरह्रासवृद्धिप्रतीकारं देहबलहानिप्रतिक्रियां मेदोवृद्धिप्रतिक्रियां च ऋतुविभक्तं चाहारं तत्तदृतुयोग्यतया व्यवस्थितम् आहारं च, प्रतिदिशेयुः ।

प्रतिपदपञ्चिका

अध्वप्रमाणमाह—षणव द्वादशेति, अध्वा रथ्यानामिति, रथवाहिनामश्वानां त्रिविधानामुत्तमादीनामध्वा तद्वत्पञ्च योजनानि अर्धाष्टमानि दशेति पृष्ठवाह्यानां, द्वियोजनग्रहणमुभयेषामधिकप्रतिषेधार्थम् ।

त्रिविधं गतिभेदमाह—विक्रम इत्यादि । विक्रमश्शनैर्गमनं, भद्राश्वासो मध्यमः, भारवाह्यो द्रुतगमनमिति ।

धारा आह—विक्रम इत्यादि । विक्रमः त्रिविधा स्वभावगतिः पुङ्खितं प्लुतम्, उपकण्ठं प्रथमवेगः । उपजवश्चरमवेगः । धारा इति सर्वेषां संज्ञा ।

तेषामिति । रथ्यापृष्ठवाह्यानामश्वानां बन्धनान्यग्रिमपश्चिमादीनि उपकरणानि रश्मियग्रिखलीनतल्पकपर्याणादीनि, योग्याचार्याः शिक्षोपजीविनः, प्रतीयुः उपदिशेयुः ।

[उपचारेण अश्वतोषणकर्तारः सप्त]

सूत्रग्राहकाऽश्वबन्धकयावसिकविधापाचकस्थानपालकेशकारजाङ्गलीविदश्च स्वकर्मभिरश्वानाराधयेयुः।

[प्राप्तावश्यकर्मसु देशकालातिक्रमे दण्डाः]

कर्मातिक्रमे चैषां दिवसवेतनच्छेदनं कुर्यात्। नीराजनोपरुद्धं वाहयतश्चिकित्सकोपरुद्धं वा द्वादशपणो दण्डः। क्रियाभैषज्यसङ्गेन व्याधिवृद्धौ प्रतीकारद्विगुणो दण्डः। तदपराधेन वैलोम्ये पत्रमूल्यं दण्डः।

———

प्रतिपदपञ्चिका

साङ्ग्रामिकं रथाश्वालङ्कारमिति, ध्वजचामरस्थानकादिमण्डनं चकारादावरणादिकं च सूतास्सारथयः। अश्वानां चिकित्सकाः वैद्याः अश्ववैद्याः, शरीरह्लासप्रतीकारं दौर्बल्यप्रतिविधानं, वृद्धिप्रतीकारमिति स्थौल्यदर्शनमृतुविभक्तं च यथर्तुयोगं चाहारं प्रतिदिशेयुरिति वर्तते।

श्रीमूला

सूत्रेत्यादि। सूत्रग्राहकादयः सप्त, स्वकर्मभिः, अश्वान्, आराधयेयुरुपचरेयुः। तत्र सूत्रग्राहकः सूत्रग्रहणाधिकृतः वेल्लनपायनोद्वर्तनादिकर्ता, अश्वबन्धकः खलीनपर्याणाद्युपकरणबन्धनाधिकृतः, यावसिकः ऋत्वनुगुणयवसप्राशयिता, विधापाचकः शालामुद्गमाषादिपक्ता, स्थानपालः अश्वावस्थानदेशशोधकः, केशकारः कालिककेशकल्पकः, जाङ्गलीविद् विषविद्याकोविदः।

कर्मातिक्रमे चेति। स्वस्वकर्मणामननुष्ठानेऽन्यथानुष्ठाने वा, एषां सूत्रग्राहकादीनाम्, दिवसवेतनच्छेदनं कुर्यात्। नीराजनोपरुद्धं नीराजना शान्त्युदकपुष्पदीपादिना सत्कारो दुरितशान्तये बलवृद्धये च क्रियमाणः तदर्थमुपरुद्धं, चिकित्सकोपरुद्धं वा चिकित्सार्थं, वाहयतः, द्वादशपणो दण्डः। क्रियाभैषज्यसङ्गेन क्रियायाश्चिकित्सनस्य भैषजस्य औषधस्य च यथाकालाकरणेन, व्याधिवृद्धौ, प्रतीकारद्विगुणः प्रतिक्रियार्थव्ययद्विगुणः, दण्डः, अश्वाध्यक्षस्य। तदपराधेन क्रियाभैषज्यदोषेण, वैलोम्ये अश्वस्य विपत्तौ, पत्रमूल्यं विपन्नवाहमूल्यं दण्डः।

प्रतिपदपञ्चिका

सूत्रग्राहादयः सप्त कर्मकराः स्वकर्मभिः स्वेन स्वेन कर्मणा अश्वानाराधयेयुः। सूत्रग्राहको वेल्लनपायनोद्वर्तनादिना, अश्वबन्धकः पूर्वापरबन्धसौष्ठवेन, यावसिको यथर्तुयवसप्रवेशकारः तथ्येन, विधापाचकः परस्परधारणमूत्रपुरीषादिशोधनेन (?)। केशकारो यथाकालं केशकल्पनैः, जाङ्गलिको विषप्रतीकारेण।

स्वकर्मातिक्रमे व्यापाराकरणे चैषां सूत्रग्राहादीनां दिवसवेतनस्य छेदनं कुर्यात्

तेन गोमण्डलं खरोष्ट्रमहिषम् अजाविकं च व्याख्यातम् ॥

[प्रतिदिनं पर्वतिथिप्रभृतिषु च कर्तव्यान्यश्वाराधनानि]

द्विरह्नः स्नानमश्वानां गन्धमाल्यं च दापयेत् ।
कृष्णसन्धिषु भूतेज्याः शुक्लेषु स्वस्तिवाचनम् ॥१११॥
नीराजनामाश्वयुजे कारयेन्नवमेऽहनि ।
यात्रादाववसाने वा व्याधौ वा शान्तिके रतः ॥११२॥

इत्यध्यक्षप्रचारे अश्वाध्यक्षः, त्रिंशोऽध्यायः,
आदित एकपञ्चाशः ॥

प्रतिपदपञ्चिका

(दद्यात्) । नीराजनोपरुद्धमिति । तदर्थः प्रतिषिद्धारोहं चिकित्सकोपरुद्धं वा सिरा-मोक्षाद्यर्थं वैद्येन निषिद्धमश्वं वाहयतो द्वादशपणो दण्डः । क्रियाभैषज्ययो-श्चिकित्सौषधयोः सङ्गेन व्याघातेन अश्वस्य व्याधिवृद्धौ सत्यां प्रतीकारद्विगुणो दण्डः । तत्परिव्ययद्विगुणो दण्डोऽश्वाध्यक्षस्य । तदपराधेन क्रियाभैषज्यदोषेण वैलोम्ये अश्व-मरणे पत्रमूल्यं दण्डः ।

श्रीमूला

तेनेति । तेन अश्वाराधनादिविधिनोक्तेन, गोमण्डलं खरोष्ट्रमहिषम् अजाविकं च व्याख्यातं गोमण्डलादिविधिरप्युक्तप्रायः । अश्ववदेव गोमण्डलादेरप्याराधनादिकं कर्तव्यम्, तदकरणे गवाध्यक्षस्य दण्डश्च भवतीत्यर्थः ।

अध्यायान्ते श्लोकावाह—द्विरह्नः स्नानमश्वानामित्यादि । दिने दिने वारद्वयम् अश्वानां स्नानं, शरद्ग्रीष्मयोः, दापयेत् । गन्धमाल्यं च दापयेत्, नित्यम् । कृष्णसन्धिषु भूतेज्याः कृष्णपर्वसु अमावास्यासु भूतबलीन्, दापयेत् शुक्लेषु शुक्लसन्धिषु स्वस्तिवाचनं ब्राह्मणाशीर्वादनं, दापयेत् । नीराजनाम् आरातिकाम्, आश्वयुजे मासि, कारयेत्, नवमेऽहनि नवम्याम्, यात्रादौ अवसाने वा उद्योगस्यारम्भे समाप्तौ च, व्याधौ वा अश्वमारके च, शान्तिके रतः शान्तिप्रयोजनके कर्मण्यासक्तः ।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाऽधिकरणे
त्रिंशोऽध्यायः, अश्वाध्यक्षः, आदित एकपञ्चाशः ॥

प्रतिपदपञ्चिका

तेन अश्वप्रकारेण गोमण्डलादिकं च व्याख्यातम्, तदपि तत्कर्मकरैः अश्ववड-वादिवदाराधनीयम् । क्रियाभैषज्यप्रसङ्गेन व्याधिवृद्धावित्यादि सर्वं योजनीयम् ।

साम्प्रतमुक्तशेषमुपकारमदृष्टभयप्रतीकारमङ्गल्यञ्च अध्यायप्रान्ते श्लोकाभ्या-माह—द्विरह्नः स्नानमश्वानामिति । शरद्ग्रीष्मयोर्द्रष्टव्यम् । गन्धमाल्यं च दापयेत्

प्रतिपदपञ्चिका

इति । सर्वदा कृष्णसन्धिपु अमावास्यारात्रिपु भूतेज्याः भूतवलीन् मांसोदनोल्लोपिका-फलादिभिरश्वरक्षार्थम् । शुक्लेपु पौर्णमासीपर्वसु स्वस्तिवाचनं ब्राह्मणपूजनाशीर्वादनं, नीराजनं शालिहोत्राद्यभिहितविधानमाश्वयुजे मासि शुक्लपक्षनवम्यां कारयेत् । तथा यात्रादावुद्योगकाले, अवसाने यात्राप्रतिनिवृत्तौ व्याधौ वा अश्वभारके शान्ति-कर्मणि रतस्तत्पर इति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायांम् अर्थशास्त्रटीकायाम् अध्यक्षप्रचारिके द्वितीयेऽधिकरणे त्रिंशोऽध्यायः । अश्वाध्यक्षः, आदितः एकपञ्चाशोऽध्यायः ।

अष्टचत्वारिंशं प्रकरणम्

हस्त्यध्यक्षो हस्तिप्रचारश्च

एकत्रिंशोऽध्यायः

तत्र हस्त्यध्यक्षः

[हस्त्यध्यक्षेणावेक्षणीयाः अंशाः]

हस्त्यध्यक्षो हस्तिवनरक्षां दम्यकर्मशान्तानां हस्तिहस्तिनीकलभानां शालास्थानशय्याकर्मविधायवसप्रमाणं कर्मस्वायोगं बन्धनोपकरणं साङ्ग्रामिकमलङ्कारं चिकित्सकानीकस्थोपस्थायुकवर्गं चानुतिष्ठेत् ।

श्रीमूला

हस्त्यध्यक्ष इति सूत्रम् । हस्त्यध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः । सङ्गतिस्त्वश्वाध्यक्षवद् द्रष्टव्या । इदं च प्रकरणमध्यायद्वयेन वितन्यते ।

हस्त्यध्यक्ष इति । सः, हस्तिवनरक्षां गजवनप्रवेशनिषेधादिरूपाम्, दम्यकर्मक्षान्तानां शिक्षाग्रहणदान्तानां, हस्तिहस्तिनीकलभानां, शालादिषट्कप्रमाणं शाला कुटी स्थानम् आलानप्रदेशः शय्या संवेशस्थानं कर्म सान्नाह्यादिकं विधा आहारः यवसं हरितसस्यादि एतेषां प्रमाणम्, कर्मसु आयोगं दम्यादिकर्मसु वक्ष्यमाणेषु आसक्तिम्, बन्धनोपकरणं बन्धनमालानग्रैवेयकादि उपकरणम् अङ्कुशवेणुयन्त्रादि च, साङ्ग्रामिकं वर्मतोमरादिकम्, अलङ्कारं वैजयन्तीक्षुरप्रमालादिकम्, चिकित्सकादिवर्गं च चिकित्सका गजवैद्याः अनीकस्थाः गजशिक्षाविचक्षणाः उपस्थायुकाः कर्मकराः तेषां वर्गं च, अनुतिष्ठेत् अवेक्षेत ।

प्रतिपदपञ्चिका

हस्त्यध्यक्ष इति सूत्रम् । अस्य सूत्रस्य अर्थसम्बन्धावश्वाध्यक्षवद् व्याख्येयौ । हस्तिवनरक्षादीन् वक्ष्यमाणाननुतिष्ठेत् । तत्र हस्तिवनरक्षा हस्तिवनप्रतिषेधादिका, दम्यानां दमनीयानां, कर्मक्षान्तानां गृहीतशिक्षाणां, हस्तिहस्तिन्यौ प्रतीते, कलभानां बालकानां, शाला हस्तिकटिस्थानं स्तम्ब(म्भ)स्थानं, शय्या शयनभूमिः, कर्म सान्नाह्यादिः, विधायवसौ प्रतीतौ । तत्प्रमाणमियत्ता, कर्मस्वायोगं दम्यादिक्रियाभ्यसनम्, बन्धनं ग्रैवेयं वरत्रादिकम् उपकरणमङ्कुशं वेण्या(ण्वा)दिकं, साङ्ग्रामिकं शाटीरजयन्तादिकम्, अलङ्कारं शङ्खचामरनक्षत्रमालादिकं, चिकित्सको हस्तिवैद्यः, अनीकस्थो हस्तिशिक्षाचार्यः, औपस्थायुकवर्गो हस्तिकर्मकरसमूहः ।

[हस्तिशालायाः तत्र तद्वाससौकर्यस्य च कल्पनं
हस्तिस्वभावभेदेन शालास्थानभेदश्च]

हस्त्यामद्विगुणोत्सेधविष्कम्भायामां हस्तिनीस्थानाधिकां सप्रग्रीवां कुमारीसङ्ग्रहां प्राङ्मुखीमुदङ्मुखीं वा शालां निवेशयेत् ।

हस्त्यायामचतुरश्रश्लक्ष्णालानस्तम्भफलकान्तरकं मूत्रपुरीषोत्सर्गस्थानं निवेशयेत् ।

स्थानसमशय्याम् अर्धापाश्रयां दुर्गे सान्नाह्यौपवाह्यानां, बहिर्दम्य-व्यालानाम् ।

श्रीमूला

शालानिवेशमाह—हस्त्यायामेत्यादि । नवहस्तो हस्त्यायामः तद्द्विगुणः अष्टादशहस्त उत्सेध उच्छ्रयः विष्कम्भो विस्तारः आयामो दैर्घ्यं च यस्यास्तां तथाभूताम्, हस्तिनीस्थानाधिकां हस्तिनीस्थानं षडरत्नि तेनाधिकाम् अर्थाच्चतुर्विंशतिहस्तदीर्घां, सप्रग्रीवां प्रग्रीवेण मुखशालयोपेतां, कुमारीसङ्ग्रहां कुमारी आलानस्तम्भोपरिनिवेशिता तुला सुखबन्धनार्था तत्सङ्ग्रहवर्ती, प्राङ्मुखीम् उदङ्मुखीं वा शालां, निवेशयेत् निर्मापयेत् ।

स्थाननिवेशमाह—हस्त्यायामेत्यादि । हस्त्यायामो नवहस्तः तच्चतुरश्रं तदनुरूपमवृत्ताद्याकारं श्लक्ष्णो मसृण आलानस्तम्भः फलकान्तरं फलकरूपं स्थलच्छादकञ्च च यस्य तत् तथाभूतं च, मूत्रपुरीषोत्सर्गस्थानं तदुत्सर्गानुगुणं किञ्चिदग्रोन्नतं स्थानम्, निवेशयेत् । स्थानसमशय्यां स्थानसमां शय्याम्, अर्धापाश्रयाम् अर्धम् अर्धपञ्चमहस्तः तावन्मानोऽपाश्रय उन्नतस्थानं यस्यां तादृशीं, दुर्गे दुर्गान्तः, सान्नाह्यौपवाह्यानां, बहिर्दम्यव्यालानां दुर्गबहिर्देशे दमनीयानां हिंस्राणां च निवेशयेत् ।

प्रतिपदपञ्चिका

शालानिवेशमाह—हस्त्यायामेत्यादि, हस्त्यायामो नवारत्निः, तद्द्विगुणोत्सेधविष्कम्भायामामष्टादशहस्तोच्छ्रायपृथुत्वायामां हस्तिनीस्थानेन षडरत्नीनाधिकामेवंचतुर्विंशतिहस्तां सप्रग्रीवां नवहस्तमुखशालासहितां कुमारीसङ्ग्रहामित्यालानस्तम्भोपरिन्यस्तां तुलाकुमारीं तत्सङ्ग्रहां तदुपेतां सुखबन्धनार्थाम्, प्राङ्मुखीमित्यादि कृतव्याख्यानं हस्त्यायामचतुरश्रं नवहस्तं चतुरश्रग्रहणं वृत्तादिनिवृत्त्यर्थम् । श्लक्ष्णालानस्तम्भं मसृणालानस्तम्भयुक्तं मसृणफलकान्तरयुक्तं च मूत्रपुरीषोत्सर्गस्थानं किञ्चिदग्रोन्नतं स्थानं शालामध्ये हस्त्यवस्थानं निवेशयेत् ।

स्थानसमां न चतुरस्रां शय्यामर्धापाश्रयामर्धपञ्चमहस्तोन्नतैकपार्श्वां दुर्गं दुर्गाभ्यन्तरे सान्नाह्यानामौपवाह्यानां च बहिर्दुर्गात् दम्यानामारब्धदमनानां व्यालानां च घातुकानाम् ।

[हस्तिनां दिनचर्याः]

प्रथमसप्तमावष्टमभागावह्नः स्नानकालौ, तदनन्तरं विधायाः, पूर्वाह्णे व्यायामकालः, पश्चाह्नः प्रतिपानकालः। रात्रिभागौ द्वौ स्वप्नकालौ, त्रिभागः संवेशनोत्थानिकः।

[गजग्रहणयोग्यः कालः, अवस्थाभेदेन गजानां ग्राह्यत्वाग्राह्यत्वे च]

ग्रीष्मे ग्रहणकालः। विंशतिवर्षो ग्राह्यः विक्को मूढो मत्कुणो व्याधितो गर्भिणी धेनुका हस्तिनी च अग्राह्याः।

श्रीमूला

कालविनियोगमाह—प्रथमेत्यादि। अह्नः, प्रथमसप्तमौ, अष्टमभागौ, स्नानकालौ। एतेन द्विः स्नानमुक्तम्। तदनन्तरं विधायाः द्वितीयोऽष्टभागो भोजनस्य कालः। पूर्वाह्णे, व्यायामस्य कर्माभ्यासस्य कालः। पश्चाह्नः अपराह्णः, प्रतिपानकालः। इहापरशब्दस्याह्नशब्दपरकस्य पश्चभावकरणमार्षम्। रात्रिभागाविति। रात्रेर्द्वौ त्रिभागौ, स्वप्नकालौ। त्रिभागः संवेशनोत्थानिकः अवशिष्टस्तृतीयभागो दशघटिकात्मकः संवेशनोत्थानविनियोज्यः। तत्र पञ्च घटिकाः संवेशनस्य, परा उत्थानस्येति द्रष्टव्यम्।

गजग्रहणकालमाह—ग्रीष्मे ग्रहणकाल इति। तदा हि गजास्तापातिरेकात् प्रक्षीणबला भूत्वा सुग्रहा भवन्तीति। विंशतिवर्षोऽतिक्रान्तविंशतिवयस्कः तदधिकवयस्को वा, ग्राह्यः ग्रहणार्हः।

अग्राह्यानाह—विक्क इति। विक्कः स्तनन्धयः, मूढः हस्तिनीसमानदन्तः, मत्कुणो दन्तरहितः, व्याधितः रोगी, गर्भिणो प्रसिद्धा, धेनुका स्तनपानदायिनी हस्तिनी च, अग्राह्याः।

प्रतिपदपञ्चिका

प्रथमसप्तमावित्यादि प्रतीतम्, तदनन्तरं द्वितीयाष्टभागो विधाया भोजनस्य कालः पूर्वाह्णे व्यायामस्य कर्माभ्यासस्य कालः पश्चाह्नोऽपराह्णः प्रतिपानस्य कालः, रात्रिविभागौ द्वौ स्वप्नस्य कालः, त्रिभागः संवेशनोत्थानिकः संवेशनोत्थानयोरिति तृतीयमपि कालं द्वि(त्रि)धा विभज्य रात्रौ षड्भागशेषे चोत्थापनमिति ग्रीष्मग्रहणस्य (बन्धनस्य) सम्बन्धस्य काल इति सर्वत्रानुवर्तनीयम्। ग्रीष्मग्रहणं क्षीणबलत्वात् सुखग्रहणार्थम्, नान्यकालप्रतिषेधार्थम्।

विंशतिवर्षो ग्राह्य इति विंशतिग्रहणं तन्न्यूनस्याग्रहणार्थम्, नाधिकप्रतिषेधार्थम्। अग्राह्यानाह-विक्क इत्यादि, विक्कः स्तनन्धयः।

[गजेपूत्तमादिविभागः तदानुगुण्येनाहारव्यवस्थाश्च]

सप्तारत्निरुत्सेधो नवायामो दशपरिणाहः प्रमाणतश्चत्वारिंशद्वर्षो भवत्युत्तमः। त्रिंशद्वर्षो मध्यमः। पञ्चविंशतिवर्षोऽवरः। तयोः पादावरो विधाविधिः।

[उत्तमस्याहारप्रमाणानि, गजप्रमाणादिभेदेन आहारभेदश्च]

अरत्नौ तण्डुलद्रोणः, अर्धाढकं तैलस्य, सर्पिषस्त्रयः प्रस्थाः, दशपलं लवणस्य, मांसं पञ्चाशत्पलिकं, रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थ, क्षारं दशपलिकं, मद्यस्य आढकं द्विगुणं वा पयसः प्रतिपानम्। गात्रावसेकस्तैलप्रस्थः शिरसोऽष्टभागः प्रादीपिकश्च; यवसस्य द्वौ भारौ सपादौ, शष्पस्य शुष्कस्यार्धतृतीयो भारः। कडङ्गरस्यानियमः। सप्तारत्निना तुल्यभोजनोऽष्टारत्निरत्यरालः। यथाहस्तमवशेषः षडरत्निः पञ्चारत्निश्च। क्षीरयावसिको विक्कः क्रीडार्थं ग्राह्यः।

प्रतिपदपञ्चिका

ननु विंशतिवर्षो ग्राह्य इत्यनेनैव विक्कप्रतिषेधे सिद्धे तद्ग्रहणं विषयविभागार्थम्। विक्कः क्रीडार्थमेव ग्राह्यो न कार्यार्थः। मूढो हस्तिनीतुल्यदन्तः मत्कुणो निर्दन्तः, व्याधितः पाकलादिग्रस्तः, गर्भिणीधेनुके प्रतीते। हस्तिनी नित्यदृष्टा।

श्रीमूला

प्रमाणमाह—सप्तारत्निरुत्सेध इति। सप्तहस्तोच्छ्रायवान्, नवायामो नवहस्तदैर्घ्यः, दशपरिणाहः दशहस्तपरिक्षेपः, प्रमाणतः प्रमाणेन यथोक्तेन युक्तः, चत्वारिंशद्वर्षः, उत्तमो भवति। त्रिंशद्वर्षः तावद्वयस्को वक्ष्यमाणषडरत्निप्रमाणो, मध्यमः। पञ्चविंशतिवर्षोऽवरः तावद्वयस्को वक्ष्यमाणप्रमाणोऽधमः।

विधाविधिमाह—तयोः पादावरो विधाविधिरिति। वक्ष्यमाणोत्तमविधाविध्यपेक्षया चतुर्भागन्यूनो विधाविधिर्मध्यमस्य, मध्यमविधापेक्षया चतुर्भागन्यूनश्चाधमस्य।

उत्तमस्य विधाप्रमाणमाह—अरत्नौ तण्डुलद्रोण इति। एकस्योत्सेधारत्नेः प्रमाणस्य एकस्तण्डुलद्रोणः। अर्धाढकं तैलस्येत्यादि सुगमम्। रसस्य मांससंस्कृतस्य आढकं, द्विगुणं वा दध्नः रसाभावे दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपिण्डसेचनार्थम्। क्षारं दशपलिकं गुडादि दशपलप्रमाणम्। मद्यस्याढकं, द्विगुणम् आढकद्वयं वा, पयसः क्षीरस्य, प्रतिपानम् अपराह्णदेयम्। गात्रावसेकः शरीराभ्यङ्गः, तैलप्रस्थः। शिरसः, अष्टभागः तैलार्धकुडुवः। प्रादीपिकश्च प्रदीपार्थश्च, अष्टभागः। यवसस्य

श्रीमूला

हरितसस्यादेः, द्वौ भारौ चत्वारिंशत् तुलाः। शष्पस्य बालतृणस्य हरितस्य, सपादौ द्वौ भारौ। शुष्कस्य यवसस्य शष्पस्य च, अर्धतृतीयो भारः सार्धं भारद्वयम्। कडङ्गरस्य शाखाबुसस्य सल्लकीपल्लवादेः, अनियमः यावत्तृप्ति दानमित्यर्थः। अनया चैकारत्न्युत्सेधोक्तया प्रक्रियया सप्तारत्न्युत्सेधस्योत्तमहस्तिनस्तण्डुलादिकडङ्गरान्तं विधाजातं सप्तगुणितं द्रष्टव्यम्।

अष्टारत्न्युत्सेधस्यात्यरालाख्यस्यानेन प्रकारेण विधाधिक्यप्राप्तावपवादमाह—सप्तारत्निना तुल्यभोजन इत्यादि।

यथाहस्तमिति। षड त्नेस्तण्डुलद्रोणषट्कं पञ्चारत्नेस्तण्डुलद्रोणपञ्चकमित्येवम् उत्सेधहस्तमानानुरोधेन, अवशेषः सप्तारत्न्यष्टारत्न्यतिरिक्तः, षडरत्निः सप्तारत्न्युत्सेधापेक्षयैकारत्निन्यूनोत्सेधो मध्यमगणनीयः, पञ्चारत्निश्च मध्यमापेक्षयैकारत्निन्यूनोत्सेधोऽधमगणनीयश्च, विधापरिमाणयोगीति शेषः। तत्र मध्यमाधमयोरुत्सेधवदायामे परिणाहे चैकैकारत्निह्रासो द्रष्टव्यः।

क्षीरयावसिक इत्यादि। क्रीडार्थं न तु कर्मार्थं ग्राह्यो विक्को यदि कौतुकाद् गृहीतः, तदा स क्षीरयवसाभ्यां यथातृप्तिदत्ताभ्यां पोषणीय इत्यर्थः।

प्रतिपदपञ्चिका

हस्तिप्रमाणमाह—सप्तारत्निरुत्सेध इति। तावत्प्रमाणोच्छ्रायः नवायामो नवहस्तप्रतिमो न पेचकान्तरो दशपरिणाहो दशहस्तकक्ष्याबन्धः।

प्रमाणतोऽनेनप्रमाणेनेत्थंभूतेन चत्वारिंशद्वर्षः चतुर्थीं दशाम् उत्तरिष्यन् उत्तमो भवति।

त्रिंशद्वर्षस्तृतीयदशावसाने मध्यमो वक्ष्यमाणप्रमाणो भवति। वक्ष्यति हि—"यथाहस्तमवशेषः षडरत्निः पञ्चारत्निश्चे"ति। अनेन चोत्तमप्रमाणात् सप्तभागहीनस्ततोऽपि षड्भागहीनः। पञ्चविंशतिवर्षावर इत्येवमवसेयम्। तयोर्मध्यमावरयोः पादावरो वक्ष्यमाणोत्तमविधायाश्चतुर्भागहीनो मध्यमस्य ततोऽप्यवरस्य चतुर्भागहीनो विधा विधिर्वेदितव्यः इति। तमाह—अरत्नौ तण्डुलद्रोण इति, अयं च विधिः प्रथमोक्तोच्छ्रायप्रमाणविषय इति केचित्, आयामप्रमाणविषय इत्यन्ये। प्रस्थद्वयं तैलस्य, सर्पिषो वा त्रयः प्रस्थाः, दशपलं लवणस्येति प्रतीतमेव। मांसं पञ्चाशत्पलिमं तावत्प्रमाणेन मांसेन संस्कृतस्य रसस्य आढकद्विगुणं वा दध्नः आढकद्वयं भुक्तवतः पिण्डक्लेदनार्थं देयम्। क्षारं दशपलिकं गुडादि दशपलोपेतं मद्यस्य सुरादेराढकं द्विगुणं वाढकद्वयं, पयसः क्षीरस्य प्रतिपानमापराह्लिकं गात्रावसेको गात्राभ्यञ्जस्तैलप्रस्थः शिरसोऽभ्यञ्जाष्टभागः। अर्धकुडुबः प्रादीपिकश्च प्रदीपार्थाष्टभाग एव, यवसस्य हरितस्य द्वौ भागौ, शष्पस्य हरिततृणस्य शुष्कस्योभयस्याप्यर्धतृतीयभारः सार्धभारद्वयं, कडङ्गरस्य सल्लकीप्रभृतिशाखायवसस्य, अनियम इत्ययं विधायोगः।

[अवस्थासप्तकभेदेन गजस्य सप्तशोभाः, तासाम् ऋतूनां चानुगुण्येन व्यायामविधिश्च]

सञ्जातलोहिता प्रतिच्छन्ना संलिप्तपक्षा समकक्ष्या अतिकीर्णमांसा समतल्पतला जातद्रोणिकेति शोभाः।

शोभावशेन व्यायामं भद्रं मन्द्रं च कारयेत्।
मृगसङ्कीर्णलिङ्गं च कर्मस्वृतुवशेन वा ॥११३॥

इत्यध्यक्षप्रचारे हस्त्यध्यक्षः, एकत्रिंशोऽध्यायः,
आदितो द्विपञ्चाशः।

प्रतिपदपञ्जिका

सप्तारत्नेः, तेन सप्तारत्निना तुल्यभोजनोऽष्टारत्निरित्ययं चारत्नौ तण्डुलद्रोण इत्यस्य अपवादः अत्यराल इति।

तस्य संज्ञा यथाहस्तम् अवशेष इति। सप्तहस्तावष्टहस्तावशेषौ द्वौ षडरत्निः पञ्चारत्निश्च तयोः षडरत्नौ षड्द्रोणः, पञ्चारत्नौ पञ्चेत्यादि सर्वं योजनीयम्। "बिक्को न ग्राह्य" इत्युक्तम्, असावपि क्रीडामात्रैकप्रयोजनो ग्राह्यः। स च क्षीरयावसिकः क्षीरेण यवसेन च उपचरणीयः।

श्रीमूला

सप्तविधाः शोभा आह—सञ्जातलोहितेति। त्वगस्थिमात्रयुक्तस्य हस्तिन उपजातरुधिरा प्रथमावस्था तत्कृता शोभा सञ्जातलोहिता नाम, प्रतिच्छन्ना किञ्चिन्मांसोपजनच्छन्नास्थिका, संलिप्तपक्षा मांसलेपमसृणपार्श्वा, समकक्ष्या अन्यूनानतिरिक्तमांसावयवा, व्यतिकीर्णमांसा क्वचिदुन्नतं क्वचिदवनतमित्येवं व्यामिश्रं मांसं यस्यां सा तथाभूता, समतल्पतला समं पृष्ठवंशसमोत्पन्नमांसं तल्पतलं पृष्ठवंशपार्श्वं यस्यां सा तथा, जातद्रोणिका द्रोणीव द्रोणिका द्रोणीसमाना पृष्ठस्याकृतिः सा वंशस्य निम्नीभावात् तत्पार्श्वोन्नतिकृताज्जाता यस्यां सा तथा। इति शोभाः, सप्त सप्तावस्थाकृताः।

अध्यायान्ते श्लोकमाह—शोभावशेनेत्यादि। उक्तावस्थानुगुण्येन, व्यायामं शिक्षां, कारयेत्। कं, भद्रम् उत्तमं, मन्दं मध्यमं, चकारात् मृगमवरं च हस्तिनम्। मृगसङ्कीर्णलिङ्ग च मृगं भद्रादिसङ्करजं च भद्रमन्दभद्रमृगादिनवप्रकारं हस्तिनम्। कर्मसु सान्नाह्यौपवाह्येषु, व्यायामं परिश्रमं कारयेत्। ऋतुवशेन वा शरदाद्यनुष्णकालानुसारेण च, कर्मसु व्यायामं कारयेत्।

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिऽकरणे
एकत्रिंशोऽध्यायः, हस्त्यध्यक्षः, आदितः द्विपञ्चाशः॥

प्रतिपदपञ्चिका

साम्प्रतं सप्त शोभा आह—सञ्जातलोहितेत्यादि, तत्र सञ्जातलोहिता त्वगस्थिशेषावस्थितायाः उपजायमानरुधिरावस्था प्रतिच्छन्ना किञ्चिदुपजातमांस-संलिप्ता स्निग्धत्वगनुबन्धमांसा समकक्ष्या सम्पूर्णमांसा व्यतिकीर्णमांसा मांसोपचयाति-शयेन किञ्चिन्निम्नोन्नता समतल्पतला वंशसमुत्पन्नमांसोदयपार्श्वा जातद्रोणिका निम्नवंशा । इत्यासां शोभानां भद्राणां च वक्ष्यमाणगजविशेषाणां विशेषलक्षणं विस्तरेण हस्तिशिक्षातोऽवगन्तव्यम् ।

व्यायामप्रकरणं श्लोकेनाऽऽह—शोभावशेनेत्यादि, शोभावशेन छायानुरूपेण व्यायामं शिक्षाभ्यासं भद्रमुत्तमगजं मन्द्रं च मध्यमगजं च चकारान्मृगनमपरं सङ्कीर्णं च भद्रादिसंयोगोत्पन्नं कर्मसु सान्नाह्यौपवाह्येषु तथा ऋतुवशेन शरद्धेमन्तादिवशेन व्यायामं कारयेदिति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रे अध्यक्षप्रचारिके
द्वितीयेऽधिकरणे एकत्रिंशोऽध्यायः, हस्त्यध्यक्षः,
आदित द्विपञ्चाशोऽध्यायः ।

द्वात्रिंशोऽध्यायः ।

हस्तिप्रचारः

[शिक्षणभेदेन चत्वारो गजभेदाः, यथाक्रमं तेषां निरूपणं च]

कर्मस्कन्धाश्चत्वारः—दम्यः सान्नाह्य औपवाह्यो व्यालश्च । तत्र दम्यः पञ्चविधः—स्कन्धगतः स्तम्भगतो वारिगतोऽवपातगतो यूथगतश्चेति । तस्योपविचारो विक्ककर्म ।

श्रीमूला

कर्मस्कन्धा इत्यादि । कर्मस्कन्धाः क्रियासमूहाः, चत्वारः चतूरूपाः । रूपाण्याह—दम्य इत्यादि ।

तत्रेति । तेषु चतुर्षु मध्ये, दम्यः पञ्चविधः । ता एव विधा आह—स्कन्धगतः स्कन्धारोहप्रवणः, स्तम्भगतः आलानबन्धनसहः, वारिगतः वारिर्गजग्रहणभूमिस्तत्प्रविष्टः, अवपातगतः अवपातनार्थं कल्पितं तृणादिच्छन्नं गर्तं गतः, यूथगतो दान्तहस्तिनीसहविहारव्यसनी, चः समुच्चये । तस्य दम्यस्य, उपविचारः उपचरणं, विक्ककर्म विक्कस्योपचरणमिव भवति । तच्च क्षीरयवसेक्षुकाण्डादिदानम् ।

प्रतिपदपञ्चिका

हस्त्यध्यक्षे हस्तिप्रचार इति सूत्रम् ।

पूर्वाध्याये शालादयोऽनुष्ठेया अभिहिताः, तेषां शालास्थानशय्याकर्मविधायवसप्रमाणान्यभिहितानि, कर्मस्वायोगादयस्तु वक्तव्यास्तेऽभिधीयन्ते ।

तदाह—कर्मस्कन्धाश्चत्वार इत्यादि, कर्मस्कन्धाः क्रियासमूहाः अधिष्ठानभूताश्चत्वारः, चतुर्ग्रहणम् अवान्तरभेदभिन्ना अपि चत्वार एवेति ज्ञापनार्थम् । तानेवाह—दम्यः सान्नाह्यऔपवाह्यो व्यालश्चेति ।

तत्र दम्यभेदांस्तावदाह—दम्यः पञ्चविध इति पञ्चप्रकारोपस्थाभेदाः, तानेव प्रकारान् दर्शयति-स्कन्धगत इत्यादि, स्कन्धगतो विसोढः । स्कन्धारोहणः, स्तम्भगतोऽभ्युपगतालानस्तम्भबन्धनः, वारिगतो वारिबन्धाख्यारण्यभागप्रविष्टः, अपपातगतो गर्तंगतः, यूथगतो हस्तिबन्धकीभिः सह विहारितस्येति, तस्य दम्यस्य उपचारादिकर्म विक्कस्यैव क्रिया क्षीरयवसेक्षुकाण्डशर्करोत्कादिभिरुपचरणम् ।

साम्नाह्यः सप्तक्रियापथः उपस्थानं संवर्तनं संयानं वधावधो हस्तियुद्धं नागरायणं साङ्ग्रामिकं च । तस्योपविचारः कक्ष्याकर्म ग्रैवेयकर्म यूथकर्म च ।

औपवाह्योऽष्टविधः—आचरणः, कुञ्जरौपवाह्यः, धोरणः, आधानगतिकः, यष्ट्युपवाह्यः, तोत्रोपवाह्यः, शुद्धोपवाह्यः, मार्गायुकश्चेति । तस्योपविचारः

श्रीमूला

साम्नाह्यमाह—साम्नाह्य इत्यादि । सः सप्तक्रियापथः उपस्थानादिसप्तविध-क्रियामार्गः । तत्र उपस्थानं पूर्वापरावयवानां नमनोन्नमनादिकं ध्वजोल्कावेणुरज्ज्वा-दिलङ्घनं च, संवर्तनं शयनोपवेशनरेखागर्तविषमलङ्घनादिकं भूमिकर्म, संयानम् ऋजुवक्रगोमूत्रिकामण्डललाघवादिगतिविशेषः, वधावधः हस्तदन्तगात्रैरश्वनररथा-देस्तत्प्रतिनिधेर्वा घातो ग्रहणं वा, हस्तियुद्धं हस्तिभिर्हीनतुल्यसमैः सह वरण्डकाद्या-मिषमन्तरतः कृत्वा युद्धं 'प्रसिद्धलालापिण्डिकाख्यमि'ति स्वामी । नागरायणं गोपुराट्टालकपरिघादिभञ्जनं, साङ्ग्रामिकं प्रकाशयुद्धसौप्तिकादिकम् । तस्योपविचार इति । साम्नाह्यस्योपचरणं, कक्ष्याकर्म वरत्राबन्धनशिल्पं, ग्रैवेयकर्म कलापिकादि-कण्ठबन्धनकौशलं, यूथकर्म च पूर्वकायोन्नतत्वापरकायोन्नतत्वसमकायत्वादिचिह्नैर्हस्ति-शास्त्रोक्तैर्गिरिचरादियूथान्तर्गतत्वं विज्ञाय तत्तद्यूथानुगुणकर्मसु नियोजनं च ।

औपवाह्यमाह—औपवाह्योऽष्टविध इत्यादि । तत्र आचरणः पूर्वकायोन्नतावन-तापरकायोन्नतावनतादिसर्वविधगजगत्यनुसारी, कुञ्जरौपवाह्यः कुञ्जरान्तरेण सहौपवाह्यादिकर्ता, धोरण एकेनैव पक्षेण सर्वकर्मकरः, आधानगतिकः द्वित्रिविध-गतियायी सर्वगतिकुशलश्च, यष्ट्युपवाह्यः यष्ट्यैव केवलया क्रियाकारी, तोत्रोपवाह्यः सकण्टकयष्ट्या क्रियाकारी, शुद्धोपवाह्यः यष्टितोत्रनैरपेक्ष्येण पदाघातादिसंज्ञयैव केवलया सर्वकर्मकरः, मार्गायुकश्च मृगयुकर्मशिक्षितश्च, इति । मार्गायुक इति ह्रस्वद्वितीयाक्षपाठो युक्तः । तस्य औपवाह्यस्य, उपविचारः उपचरणम् । तदेवाह—

चाणक्यटीका

(वर्ममादिभिर्युद्धकान्ति ?) साङ्ग्रामिकमिति विचारः । तदेकदेशभूतं वक्ष्यते । (कक्ष्या)ग्रैवयेकयोः स्वयं विरचनात् कान्तिः स्वयं यूथविरचनयोग्यता चेति ।

औपवाह्योऽष्टविधः[1] । (आचरणः) प्रतिहस्तिदर्शनाद् व्यक्तावलेपः । कुञ्ज-

---

१. "उपस्थानम्, (·सं)वर्तनम्, वधावधः हस्तियुद्धम्, साङ्ग्रामिकमिति सप्तविधेन साम्नाह्येन, औपवाह्येन—आचरणः, कुञ्जरौपवाह्यः, (अनुगतीर ? आधानगतिकः), यष्ट्योपवाह्यः, तोत्रोपवाह्यः, मार्गायुकः, शुद्धोपवाह्यः इति सप्तधा विभक्तेन" इति अवन्ति-सुन्दरीकथायां दण्डी । (टो एस एस, न. १७२. पृ. २०४) ।

शारदकर्म हीनकर्म नारोष्ट्रकर्म च। व्याल एकक्रियापथः। तस्योपविचार

चाणक्यटीका

रौपवाह्यः विहारयुद्धादिकुशलः। धोरणः (आवरणशृङ्गारमग्र्यव्यूह्प्रकामा निगदिता ?)। यष्टिमात्रेण वाह्यते यष्ट्यौपवाह्यः। तोत्रेणैव केवलेन वाह्यते तोत्रौपवाह्यः। यष्टितोत्रादिभिर्विना वाह्यते शुद्धौपवाह्यः। मृगग्रहणार्पणवधाय कुशलो (मभातयुक्त ? मार्गयुक[1]) इति। तस्योपविचारः एतैरष्टभिः कर्मभिः विनीतस्य।

प्रतिपदपञ्चिका

सान्नाह्यमाह—सान्नाह्यः सप्तक्रियापथ इति, उपस्थानादिसप्तक्रियामार्गाः। तत्रोपस्थानं पूर्वापरावयवानां प्रतिनमनोन्नमनादिकम्।

तथा ध्वजोल्कावेणुरज्ज्वादिलङ्घनादिकञ्च संवर्तनं शयनोपवेशनरेखागर्तविषमलङ्घनादिकं च संवर्तनं भूमिकर्म, संयानम् ऋजुवक्रगोमूत्रिकामण्डललाघवादिगतिविशेषः, वधावधो हस्तदन्तगात्रैरश्वरथनरादेः तत्प्रतिषेधे व्याघातः, हस्तियुद्धं हस्तिभिस्सह परस्परं वरण्डकाप्राकारान्तरितैर्युद्धं प्रसिद्धलालापिण्डिकाख्यं, नागरायणं गोपुराट्टालिकपरिखासङ्क्रमादिभञ्जनं, साङ्ग्रामिकं प्रकाशयुद्धं सौप्तिकादि तस्य सान्नाह्यस्योप विचारः कक्ष्याकर्म कक्ष्यावन्धविज्ञानं, ग्रैवेयकर्म ग्रीवासम्बन्धकलापकादिज्ञानं, यूथकर्म च।

पूर्वापरोदितसमकायादिलिङ्गैः गिरिचरादियूथतामपगमय्य तदनुरूपक्रियायोजनमाचरणादिकमष्टविधमुपवाह्यमाह—आचरण इत्यादि, तत्राचरणः पूर्वापरोन्नतमध्यविनीतसमानां गिरिचरादिसर्वहस्तिनां गतानुविधायी चेति कुञ्जरौपवाह्यः सन्नाह्योपवाह्यो भवति। निःशेषक्रियायुक्तः धोरणः एकपक्षेण सर्वकर्माणि करोति, यो यत्र यं येभ्यश्चाआधानगतिको द्वित्रिपदयायी सर्वगतिसम्पादकश्च, यष्ट्युपवाह्यः कण्टकवर्जितया यष्ट्या सर्वक्रियासम्पादकः, तोत्रोपवाह्यः कण्टकया शुद्धोपवाह्यः पदादिसंज्ञया, मार्गायुको मृगयाकुशलः। तस्योपविचारः।

श्रीमूला

शारदकर्म शारदस्याप्रतिभस्य अनुरूपं कर्म। शारदश्च चतुर्विधः, स्थूलकृशलोहितप्राकृतभेदात्। तेन स्थूलस्य कृशीकरणं, कृशस्य स्थूलीकरणं, लोहितस्य मन्दाग्नेरग्निदीपनं, प्राकृतस्य प्रकृतिस्थस्य स्वास्थ्यरक्षणमिति चतुष्प्रकारं शारदकर्म। हीनो निर्व्यायामस्तस्य व्यायामयोजनं हीनकर्म, नारोष्ट्रकर्म च संज्ञाशिक्षणं च।

---

१. "मृगयाशीला मृगयवः तेषां कर्म मार्गयुकं पञ्चविधं हस्तिशिक्षोक्तम्। तेन युक्ताः। तत्कर्म (गो?णि)शब्दे गौण्या वृत्त्या मार्गयुकमिति व्यपदिश्यते। ते हि स्वयं मृगयां गत्वा रूपमादाय वितस्य च स्वमिने समार्पयन्ति" इति भूमिच्छिद्रविधाने चाणक्यटीका। (२.२. पृ० ८४) मार्गायुक इति दीर्घद्वितीयाच्क पाठ एव अर्थशास्त्रमातृकासु दृश्यते।

आयम्यैकरक्षः कर्मशङ्कितोऽवरुद्धो विषमः प्रभिन्नः प्रभिन्नविनिश्चयो मदहेतुविनिश्चयश्च । क्रियाविपन्नो व्यालः । शुद्धः सुव्रतो विषमः सर्वदोषप्रदुष्टश्च ।

श्रीमूला

व्याल इति । सः एकक्रियापथः एककर्ममार्गः । तस्योपविचारः उच्यत इति शेषः ।

चाणक्यटीका

अधीरोन्मृष्टकर्मणां पुनः (नगारु ? शारद) कर्म । क्षीणानां पोषणादिक्षीणकर्म । आश्चर्यार्थं संज्ञया यथेष्टं प्रतिचरणं नारोष्ट्रकर्मेति ।

व्याल (क ? :) स च एकक्रियः आ(त्ये ? त्ययि)कक्रियश्च अप्रतीकारः ।

प्रतिपदपञ्चिका

शारदकर्म, चतुर्विधश्च शारदः स्थूलः कृशो लोहितः प्रकृतश्च । तत्र स्थूलस्य कर्शणं कृशस्य बृंहणं लोहितस्य मन्दाग्नेरपि दीपनं प्रकृतस्य सरोगस्य स्वास्थ्यरक्षणम् एतच्चतुर्विधमपि शारदकर्मौपवाह्यस्य कर्तव्यम् । हीनकर्मेति व्यायामहीनो हीनः, तस्य कर्मणि व्यायामयोजनमुपवाह्यस्य कर्तव्यम् । नारोष्ट्रकर्म संज्ञाप्रतीकारकरणं दम्यौपवाह्ये कर्तव्यमिति । व्यालमाह—व्यालः एकक्रियापथ इति, आयाम्य एकक्रियापथो दुष्टैककर्मशास्त्रे समाम्नातः । तस्य व्यालस्योपविचार एक एव केवलो न कर्मभेदः ।

श्रीमूला

आयम्यैकरक्षः नियम्यैकेन रक्षणीयः अथवा आयम्यो दण्डस्तेनैवैकेन रक्षणीयः सः । तस्य विशेषानाह—कर्मशङ्कितः शिक्षाकाले विसंवादी, अवरुद्धः कर्मानुपयोगोपेक्षितः, विषमः यदृच्छानुष्ठायी, प्रभिन्नो मददोषदुष्टः, प्रभिन्नविनिश्चयः मदाद् विधादिदोषाच्च व्याकुलीभूतः, मदहेतुविनिश्चयश्च सदामदत्वादविज्ञातमदहेतुश्च ।

व्यालसामान्यलक्षणमाह—क्रियाविपन्न इति । दुष्टकर्मदूषितः, व्यालः । शुद्ध इत्यादि तद्विशेषकथनम् । तत्र शुद्धः केवलघातुकोऽष्टादशदोषयुक्तः, सुव्रतः केवलचालकः पञ्चदशदोषयुक्तः, विषमः घातनचालनोभयकारो शुद्धसुव्रतोभयदोषैर्युक्तः, सर्वदोषप्रदुष्टः उक्तैस्त्रयस्त्रिंशद्दोषैः स्वकीयैश्चैकोनविंशतिदोषैर्युक्तः । शुद्धादीनां तद्दोषाणां च लक्षणं हस्तिशास्त्रतोऽवगन्तव्यम् ।

चाणक्यटीका

तस्योपविचारः तत्र आयामिनो हस्तिपकं गृहीत्वा पलायनस्य एकेन रक्ष्यमाणत्वान कर्मविशेषादात्मैकरक्षः । कर्मशङ्कितः (नास्ति नीताविनयनाकर्मणा ?) । अपराद्धः विपरीतकर्मोपक्रमाद् दुष्टः । तस्य सम्यक् प्रवर्तनम् । विषमः (आवर्जितविगृह्लीववलितंच्छलितोद्धूतपक्षसंसृष्टप्राधान्यान्नाष्टविलितक्रियः ?) तस्य प्रत्यापत्तिकर्म ।

[गजसम्बन्धीनि बन्धनाद्युपकरणानि]

तेषां बन्धनोपकरणमनीकस्थप्रमाणम् । आलानग्रैवेयकक्ष्यापरायणपरिक्षेपोत्तरादिकं बन्धनम् । अङ्कुशवेणुयन्त्रादिकमुपकरणम् । वैजयन्तीक्षुरप्रमालास्तरणकुथादिकं भूषणम् । वर्मतोमरशरावापयन्त्रादिकः साङ्ग्रामिकालङ्कारः ।

चाणक्यटीका

प्रमत्तः (सोमक्रयः वदुपचर्यः ?) । प्रभिन्नः कर्मणा । प्रभिन्नविनिश्चय इति प्रभिद्यमानस्य कचनादिभिः परिज्ञानं प्रभिन्नविनिश्चय इति । अस्य कर्मविशेषापराधीकरणम् । मदहेतुविनिश्चय इति (व्रतस्यात्ययमिति सन्तापाभिजनयः ?) प्रथितयोधबलानि मदकरणीयानां विनिश्चयः तस्य कर्मविशेषेण विनिश्चयः।

कीदृशः पुनरसौ व्याल इति यत्क्रियाविपन्नो (व्या) ल इति मृदुतीक्ष्णसुकुमारक्रियाभिर्यथाक्रमं मृदुमन्दभद्रेषु विपर्ययोपक्रमक्रियावचनपदुष्टो व्यालः । स चतुर्विधः । दन्तगात्रापरकार्येर्दोपकारी शुद्धः । उपरि च (र ? ल) नादिदोषकारी सुव्रतः । उभयगतदोषाणां साकल्याद् वल्गुदोषप्रदुष्ट इति ।

प्रतिपदपञ्चिका

आयम्यैकरक्ष इति । आयम्यः मन्त्रौषधीभिर्वशीकृत्य बद्ध्वा वा एकरक्षः एकेन यन्त्रा रक्षणीयः, अथवा आयम्यैकरक्षो दण्डैकप्रतीकारः, सर्वत्र कर्मशङ्कितः शिक्षाकाले विसंवादशीलः, अवरुद्धो निर्वेदपरित्यक्तः, कर्मसु निरुद्ध इत्यपरे । विषमो यदृच्छया विनीतः, प्रभिन्नो मददोषेण व्यालीभूतः, प्रभिन्नविनिश्चयो विधादिवैषम्यमेदाद् व्यालीभूतः । मदहेतुविनिश्चयः मदकालकर्मण्यमाचक्षते ।

किं पुनर्व्यालस्य लक्षणमित्याह—क्रियाविपन्नो व्याल इति, क्रियाविपन्नः कर्मणा दूषित इति सामान्यम् ।

तस्य विशेषाः शुद्धादयश्चत्वारः । तत्र शुद्धः केवलघातुकोऽष्टदन्तदोषयुक्तः, सुव्रतः केवलं चालकः पञ्चदशदोषयुक्तः । विषमः प्रतिनियतघातनचालनःशुद्धसुव्रतोदोषैस्त्रयस्त्रिंशताप्युपेतस्सर्वदोषदुष्टः । समुदितचालनादिप्रकृष्टदोषः स्वदोषैरेकोनविंशत्या पूर्वैश्च त्रयस्त्रिंशता स एव द्विपञ्चाशता दोषैर्युक्तः । तेषां तद्दोषाणां च विशेषलक्षणं हस्तिशिक्षातोऽवगन्तव्यम् ।

श्रीमूला

तेषामिति । गजानां, बन्धनोपकरणं बन्धनमुपकरणं च, अनीकस्थप्रमाणम् अनीकस्थो हस्तिशिक्षाविचक्षणस्तत्प्रमाणकं तदुपदिष्टं, करणीयम् । आलानेत्यादि । आलानादिकं बन्धनं तत्र आलानं स्तम्भः ग्रैवेयं कलापकः कण्ठबन्धः कक्ष्या वरत्रा

[हस्तिपरिचारकवर्गः, तल्लभ्याः आहारभागाः चिकित्सककर्तव्यविशेषाश्च]

चिकित्सकानीकस्थाऽऽरोहकाऽऽधोरणहस्तिपकौपचारिकविधापाचकयावसिकपादपाशिककुटीरक्षकौपशायिकादिः औपस्थायिकवर्गः ।

श्रीमूला

परायणम् आरोहणालम्बरज्जुः परिक्षेपः पादपाशादिः उत्तरं द्वितीयं कलापादिकम्, आदिशब्दात् त्रिपद्यादिग्रहणम् । अङ्कुशेत्यादि । अङ्कुशादिकम् उपकरणम् । तत्र अङ्कुशः सृणिः वेणुर्दण्डः यन्त्रम् आयुधागाराध्यक्षोक्तं पाञ्चालिकादि । भूषणमाह—वैजयन्तीत्यादि । वैजयन्ती गजपताका क्षुरप्रमाला नक्षत्रमाला आस्तरणं नमतं कुथः वर्णकम्बलः आदिपदाच्छङ्खादिग्रहणम् । साङ्ग्रामिकालङ्कारमाह—वर्मेत्यादि । वर्म कवचं तोमरश्चतुर्हस्तादिरायुधागाराध्यक्षोक्तः शरावापस्तूणीयन्त्रं नानारूपमायुधाध्यक्षोक्तम् एतदादिकः; साङ्ग्रामिकः युद्धार्थः अलङ्कारः ।

चाणक्यटीका

तेषामेव व्यालानाम् । बन्धनविशेषम्, उपकरणानि च कटकादीनि हस्तिशिक्षाविद्भिर्नियमयेत् ।

यानि तु सर्वेषां साधारणानि आलानानि बन्धनम् । अपरायणम् अपराबन्धः । आदिशब्दाद् गात्रवैरामण्यवारिवर्तीनि (?) स्वस्तिकादिबन्धा द्रष्टव्याः । यन्त्रं काष्ठमयं (क्षा ? दा) न्त्यर्थम् । आदिशब्दाद् रज्जुकक्कलासिकादयः । क्षुरप्रमाला [1]नक्षत्रमालो कुथा वर्णकम्बल उपरि दीयते । शरावाप इति । यन्त्रादिः सर्वतोभद्रादिः ।

प्रतिपदपञ्चिका

तेषां हस्तिनां बन्धनमुपकरणञ्च अनीकस्थप्रमाणं तच्छास्त्रज्ञोपदिष्टं कार्यमिति वाक्यशेषः । तदाह—आलानेत्यादि । बन्धनशब्दः प्रत्येकम्, आलानबन्धनं स्तम्भबन्धनं, ग्रैवेयं कालापकादि, कक्ष्या कण्ठबन्धनं, पारायणं चतुष्पथाद्यारोपयतामालम्बनरज्जुः, परिक्षेपः पादपाशादिः, उत्तरबन्धनं द्वितीयकक्ष्याकलापादिकम्, आदिग्रहणं वाजिनामप्युपलक्षणार्थम् । अङ्कुशवेणू प्रतीतौ । यन्त्रं हस्तिनाद दन्तकल्पनादौ, यन्त्रणार्थम् अनेकविधम् आयुधागाराध्यक्षाभिहितमित्यपरे । वैजयन्ती कदलिका क्षुरप्रमाला नक्षत्रमालाऽऽस्तरणं गजास्तरणं कुथो वर्णकम्बलः आदिग्रहणं शङ्खचामराद्युपलक्षणार्थम् । वर्म जयन्तं(?)तोमरश्चतुर्हस्तादिः त्रिविध आयुधागाराध्याये व्याख्यातः । शरावः तूणीरो यन्त्रं पाञ्चालिकाद्यनेकविधं चलयन्त्रं, तेषु सम्भवतो हस्त्युपयोगिहस्तिवारतालवृन्तादि चक्रादिकं च ग्राह्यम् । साङ्ग्रामिकः सङ्ग्रामप्रयोजनः चालङ्कारः ।

श्रीमूला

हस्तिकर्मकरवर्गमाह—चिकित्सकेत्यादि । चिकित्सको गजवैद्यः अनीकस्थः

---

१. 'अथ नक्षत्रमाला स्याद्धस्तिमस्तकभूषणे' इति केशवस्वामी ।

चिकित्सककुटीरक्षविधापाचकाः प्रस्थौदनं स्नेहप्रसृतिं क्षारलवणयोश्च द्विपलिकं हरेयुः; दशपलं मांसस्यान्यत्र चिकित्सकेभ्यः ।

श्रीमूला

प्रतीतः आरोहकः शास्त्रज्ञो गजारोहः आधोरणः शास्त्राभिज्ञः कर्मकुशलः हस्तिपको हस्तिरक्षी औपचारिकश्चारणोद्वर्तनाभ्यञ्जनादिकर्ता विधापाचकः आहारपक्ता यावसिकः यवसप्रवेशकः पादपाशिकः पादबन्धकः कुटीरक्षकः शालापालनशुचीकरणाद्यधिकृतः औपशायिकः शयनशालाधिकृतः एतदादिः, औपस्थायिकवर्गः कर्मकरवर्गः ।

चाणक्यटीका

आरोहको हस्त्यारोहः । आधोरणः सौमनस्यादिपरिच्छदकुशलः । हस्तिपकः बन्धनादिकुशलः । औपशायिको वारणानां शाययिता । औपकारिकः प्रत्यवेक्षिता, प्रेषणकारीत्यन्ये[1] । चिकित्सकानीकस्थयोरौपस्थायुकवर्गे पठितत्वात् "चिकित्सकानीकस्थौपस्थायुकवर्गं(मनु)तिष्ठेद्" इत्यत्र उद्देशवाक्ये[2] तयोर्ग्रहः प्राधान्यज्ञापनार्थम्, एतौ विशेषेणानुष्ठेयाविति ॥

प्रतिपदपञ्चिका

चिकित्सको हस्तिवैद्यः, अनीकस्थो हस्तिशिक्षावित्, आरोहकः शास्त्रज्ञमहामात्रकः आधोरणः, शास्त्रसंस्काररहितः क्रियाकुशलः, हस्तिपकः मेण्टकः औपचारिकश्चरणाभ्यञ्जनाद्यधिकारी, विधापाचको रन्धकः, यावसिकः घासिकः, पादपाशिकः पादबन्धकः कुटीरक्षकः, कुटीरक्षणशोधनाद्यधिकारो औपशायिकः शय्याशालाधिकृतः हस्तपरिशायिको वा । आदिग्रहणं शिखरितूरिकाद्यर्थम् । इत्ययमौपस्थायिकवर्गः कर्मकरवर्गः ।

श्रीमूला

चिकित्सककुटीत्यादि । चिकित्सकादयस्त्रयः, प्रस्थौदनं प्रस्थप्रमाणमन्नं, स्नेहप्रसृतिं तैलधृतादेरर्धाञ्जलिम्, क्षारलवणयोश्च, द्विपलिक पलद्वयप्रमाणं, हरेयुः हस्त्याहाराल्लभेरन्, प्रत्येकमात्मार्थे दशपलं मांसस्य, अन्यत्र चिकित्सकेभ्यः चिकित्सकान् वर्जयित्वा, हरेयुः कुटीरक्षा विधापाचकाश्च ।

---

१. "हस्त्यश्वरथविद्याविदः, विद्वत्वादेव शिक्षयितारो रक्षयितारश्च उत्तराध्यक्षाः ।" इति उपयुक्तपरीक्षायां चाणक्यटीका । (२.९. पृ० १२०) उत्तराध्यक्षा औपरिका इति भट्टस्वामी ।

२. हस्त्यध्यक्षोपक्रमवाक्ये ।

पथिव्याधिकर्ममदजराऽभितप्तानां चिकित्सकाः प्रतिकुर्युः ।

[हस्तिपरिचारकाणां दण्डहेतवः क्रियाः, दण्डविधिश्च]

स्थानस्याशुद्धिः, यवसस्याग्रहणं, स्थले शायनम्, अभागे घातः, परारोहणम्, अकाले यानम् अभूमौ, अतीर्थेऽवतारणं तरुखण्डे—इति अत्ययस्थानानि । तमेषां भक्तवेतनादाददीत ।

चाणक्यटीका

प्रस्थौदनमिति । औपस्थायुकानामचिकित्सकादय एव त्रयः समग्राः प्रस्थौदनादि हरेयुः । अन्यत्र चिकित्सकेभ्य इति (अन्यत्र ?) चिकित्स्यानां तु हस्तिनां मा भूत् न्यूनमात्रेति निर्हरेयुः ।

प्रतिपदपञ्चिका

चिकित्सकादयः तण्डुलप्रस्थस्यौदनं स्नेहस्य प्रसृतिं घृतस्य तैलस्य वा चुलुकं क्षारलवणयोश्च द्विपलिकं पलद्वयं हरेयुः प्रत्येकम् । हस्तिविधाया लभेत । दशपलिकं मांसस्य दशपलानि, कुटीरक्षकविधापाचकौ चिकित्सकवर्जेन गृह्णीयाताम् ।

श्रीमूला

पथीत्यादि । पथ्यादिपञ्चकाभितप्तानां हस्तिनां, चिकित्सकाः, प्रतिकुर्युः पथिगमनादिजन्याभितापप्रतीकारं कुर्युः ।

दण्डहेतूनाह—स्थानस्येत्यादि । स्थानस्य अशुद्धिः अमार्जनम्, यवसस्य अग्रहणम् आशनाभावः, स्थले स्थण्डिले शायनम्, अभागे घातः ताडनानर्हे मर्माद्री ताडनं, परारोहणम् आरोहणानधिकृतस्याऽऽरोहणम्, अकाले यानम् अनियते काले चारणम्, अभूमौ विषमदेशे यानम्, अतीर्थे नद्यादेरघट्टे अवतारणम्, तरुषण्डे तरुगहने अवतारणम्, इति एवञ्जातीयानि, अत्ययस्थानानि दण्डस्य कारणानि, अर्थाद् औपस्थायिकवर्गस्याऽध्यक्षस्य च । तं दण्डम् एषां भक्तवेतनाद्, आददीत गृह्णीयात् ।

चाणक्यटीका

पथा, व्याधिना, कर्म(णा), मदप्रबन्धेन, जरया वा अभितप्तानां तु चिकित्सकाः तापापहरणेन प्रतिकुर्युः ।

मूत्रपुरीषादिना स्थानस्याशुद्धिः । यवसस्य भक्ष्यावय(वस्य) । आधोरणेनानवधारितायां शायनम् । तोत्राङ्कुशादिभिरनभीष्टे स्थाने घातः । आरोहकादिवर्गादन्यस्य नरस्य अप्रतिपन्नस्य आरोहणम् । अनुचिते काले कूलप्रचारादिना (यानम्) । अभूमौ पङ्कादौ । अतीर्थे (च्छिन्नभेदाकरमार्जनतोर्णे ?)[1] च यान-

---

१. विच्छिन्नसेतावकरमार्जनतीर्थे इति पाठः स्यात् ।

[शान्तिकर्मविधिः]

तिस्रो नीराजनाः कार्याश्चातुर्मास्यर्तुसन्धिषु ।
भूतानां कृष्णसन्धीज्याः सेनान्यः शुक्लसन्धिषु ॥११४॥

[गजेभ्यो दन्तग्रहणविधिः]

दन्तमूलपरीणाहद्विगुणं प्रोज्झ्य कल्पयेत् ।
अब्दे द्व्यर्धे नदीजानां पञ्चाब्दे पर्वतौकसाम् ॥११५॥

इत्यध्यक्षप्रचारे हस्तिप्रचारे द्वात्रिंशोऽध्यायः,
आदितः त्रिपञ्चाशः ।

चाणक्यटीका

मित्येव जनवृन्दे हि संस्तव्यमिति । (मृद्वकिद्वेति ?) अत्ययस्थानमिति । स्थानग्रहणम् असत्यपि दोषे (ण ?) तेषु स्थानेष्वेव दण्डः कार्यः । जाते तु दोषे सविशेष इति ज्ञापनार्थम् । तद्दोषैरिति । भक्तवेतनाद् उचितं दण्डं निष्पादयेत् ।

प्रतिपदपञ्चिका

व्याध्यादिभिः पञ्चभिरभितप्तानां व्यथितानां चिकित्सकाः प्रतिकुर्युः स्वास्थ्यम् आपादयेयुः । व्याध्यादयः प्रतीताः ।

स्थानस्याशुद्धिरसंमार्जनं कुटीरक्षकस्य यवसस्य घासस्य ग्राहणमनाशनं यावसिकस्य स्थले शय्यारहिते स्थलशायनमौपशायिकस्य भागे निर्निमित्ते प्रदेशे वा मर्मादौ घातस्ताडनं मेकण्डकादेः परारोहणमसम्बन्धिजनारोहणं तस्यैव अकाले यान-मर्धरात्रमध्याह्नादौ प्रचारणमभूमौ विषमे प्रदेशे यानमतीर्थे नावतरणं प्रसिद्धमार्गेण नद्याद्यवगाहनं, तरुखण्डे वा वृक्षगहने वा अवतरणं प्रवेशनम् । इति शब्दः प्रकारे, इत्येवम् अन्यदप्यत्ययस्थानं दण्डनिमित्तं हस्त्यध्यक्षस्य तत्कर्मकराणां च, स च दण्डो देशकालाद्यपेक्षया स्वयमेव कल्पनीयः । तेषां हस्त्यध्यक्षस्य तत्कर्मकराणाञ्च स च दण्डः देशकालाद्यपेक्षया स्वयमेव कल्पनीयः । तेषां हस्त्यध्यक्षतत्कर्मकराणाञ्च दण्डं भक्तवेतनाराददीत गृह्णीयात् ।

श्रीमूला

विधिशेषं श्लोकद्वयेनाह—तिस्र इति । तिस्रो नीराजनाः बलवृद्धिदुरितशान्ति-प्रयोजना आरार्तिकाः, कार्याः । कदा कदा, चतुर्मास्यृतुसन्धिषु चातुर्मास्यश्चतुर्षु मासेषु भवाः पौर्णमास्यः तासु, ऋतुसन्धिषु पूर्वापरऋतुसन्धिस्थासु अर्थात् कार्तिका-फाल्गुन्याषाढीषु, भूतानां, कृष्णसन्धीज्याः अमावस्यासु बलयः, कार्याः । सेनान्यः स्कन्दस्य, शुक्लसन्धिषु पूर्णमासु, इज्याः कार्या इति शेषः ।

श्रीमूला

दन्तेत्यादि । दन्तमूलपरीणाहद्विगुणं विषाणमूलपरिक्षेपमानद्विगुणप्रमाणं भागं, प्रोज्झ्य परिहाय, कल्पयेत् छित्त्वा गृह्णीयात्, प्रोज्झितातिरिक्तं दन्तभागमित्यर्थम् । छेदकालमाह—अब्दे द्व्यर्धे सार्धे वर्षद्वये अतीते, नदीजानां नदीचारिणां हस्तिनां, पञ्चाब्दे अतीते पर्वतौकसां गिरिचराणाम् ।

इति कौटिलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे द्वात्रिंशोऽध्यायः, हस्त्यध्यक्षे हस्तिप्रचारः, आदितस्त्रिपञ्चाशः ।।

चाणक्यटीका

तिस्र इति, चत्वारो मासाश्चातुर्मासी । (क इति धातवो मरुतः ?) वर्षा-हेमन्तग्रीष्माः । तेषां सन्धिषु पौर्णमासीषु (तिस्रो नीराजनाः) भवन्ति, कार्तिक्यां, फाल्गुन्याम्, आषाढ्यामिति, अर्थाद् भूतबलिस्तु द्वादशसु । (तम ? सो ऽ) प्यमावास्या-(सु) इत्येव ।

मूलस्य तस्य परीणाहद्विगुणमायामेन प्रारभ्य कल्पयेदिति यदपेक्षया प्रायो वर्षविधानम् । अत्र विधिस्तु शिक्षायां कृतप्रपञ्चः । अब्दे (द्व्यर्धे) नदीजानाम् । (महावृद्धि ? पञ्चाब्दे) पर्वतचारिणामिति । अर्थात् त्र्यब्दे चतुरब्दे वा मिश्राणा-मित्यूह्यम् ।

।। इति हस्तिप्रचारः त्रिंशं प्रकरणम् ।।
।। द्वात्रिंशश्चाध्यायः ।।

प्रतिपदपञ्चिका

साम्प्रतं दृष्टरूपं कर्तव्यशेषम् अध्यायप्रान्ते श्लोकाभ्यामाह—तिस्रो नीराजनाः कार्या इति । वर्षाभ्यन्तरे चातुर्मास्यर्तुसन्धिषु कार्तिकफाल्गुनाषाढेषु भूतानां ग्रह-पिशाचादीनां कृष्णसन्धिष्वमावास्यादिषु इज्या बल्युपहारः सेनानिनः कार्तिकेयस्य शुक्लसन्धिषु पौर्णमासीषु । दन्तकल्पनमाह—दन्तमूलपरिणाहमिति । विषाणबध्न-परिक्षेपद्विगुणमभ्यस्तं प्रोज्झ्य मुक्त्वा कल्पयेत् तदधिकं छेदयेत् । "पुनरप्यब्दे द्व्यर्धे अर्धतृतीये वर्षे कल्पयेत् । नदीजानां पञ्चाब्दे पञ्चसु वर्षेषु पर्वतौकसां गिरिचराणा-मि"ति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायाम्
अध्यक्षप्रचारिके द्वितीयेऽधिकरणे द्वात्रिंशोऽध्यायः ।।
हस्तिप्रचारः, आदितस्त्रिपञ्चाशोऽध्यायः ।

एकोनपञ्चाशपञ्चाशैकपञ्चाशानि प्रकरणानि

त्रयस्त्रिंशोऽध्यायः

रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च

[रथाध्यक्षकर्तव्यविशेषाः]

अश्वाध्यक्षेण रथाध्यक्षो व्याख्यातः ।
स रथकर्मान्तान् कारयेत् ।

श्रीमूला

रथाध्यक्ष इति सूत्रम् । रथानाम् अध्यक्षः घटनसंस्करणाद्यधिकृतो रथाध्यक्षः अर्थात् तत्कर्माभिधीयत इति सूत्रार्थः ।

अश्वाध्यक्षेणेति । अश्वाध्यक्षविधानेन, रथाध्यक्षः व्याख्यातः रथाध्यक्षविधानं व्याख्यातम्, रथ्यानां शालानिवेशनं विधादानं कर्मायोजनं गन्तव्याध्वपरिकल्पनं बन्धनोपकरणघटनं कर्मकरनियोजनं नीराजनमित्येवञ्जातीयमश्वाध्यक्षोक्तं कर्म रथाध्यक्षेणाप्यनुष्ठेयमित्यर्थः ।

अधिकं त्वाह—स इत्यादि । रथाध्यक्षः, रथकर्मान्तात् घटनसंस्करणरूपान्, कारयेत् ।

चाणक्यटीका

अश्वाध्यक्षेण रथाध्यक्षो व्याख्यातः । पण्यागारादिनिबन्धनेन युद्धे मृतामृत-प्रत्यवेक्षणेन च सादृश्यात् ।

स रथाध्यक्षो रथकर्मान्तान् कारयेत् ।

प्रतिपदपञ्चिका

रथाध्यक्ष इति सूत्रम् । रथा वक्ष्यमाणादेव रथादयः । तेषामध्यक्षो घटना-द्यधिकारी रथाध्यक्ष इति सूत्रार्थः । सवन्धस्त्वश्वाध्यक्षवदस्यापि व्याख्येयः । तमाह-अश्वाध्यक्षेण रथाध्यक्षो व्याख्यात इति । अनेन च शालादिनीराजनान्तं रथ्यानां पृष्ठवाह्यानां चाविशेषेणाश्वाध्यक्षे व्याख्यातम् । विशेषेणाप्युत्तमसमो रथ्यो वृषश्च मध्यमः तथा "षण्णवद्वादशयोजनान्यध्वाश्वानामि"ति चैतदशेषमश्वाध्यक्षोक्तं यथासम्भवं रथाध्यक्षेणाप्यनुष्ठेयमिति ।

अनुक्तं तु रथविधानमाह—स रथकर्मान्तानित्यादि, स रथाध्यक्षो, रथकर्मान्तान् पूर्वंघटनाघटितसंस्कारदक्षिणान्, कारयेत्, तेषां च विनियोग-प्राधान्यात् ।

[प्रमाणविनियोगादिभेदेन रथभेदाः]

दशपुरुषो द्वादशान्तरो रथः। तस्मादेकान्तरावराः आ षडन्तरादिति सप्त रथाः।

देवरथपुण्यरथसाङ्ग्रामिकपारियाणिकपरपुराभियानिकवैनयिकांश्च रथान् कारयेत्।

श्रीमूला

रथस्य प्रमाणमाह—दशपुरुष इति। 'द्वादशाङ्गुलो वितस्तिश्छायापौरुषं चे'ति द्वादशाङ्गुलो यः पुरुष उक्तः तेन पुरुषप्रमाणेन दशपुरुषः दशवितस्तिः अर्थादुत्सेधे पञ्चहस्तः, द्वादशान्तरः हस्तषट्कविस्तारः, रथः। अयमुत्तमः। इतो न्यूनप्रमाणान् रथानाह—तस्मादिति। दशपुरुषरथाद्, एकान्तरावराः आ षडन्तरात् आ षड्वितस्तिविस्तारादेकैकवितस्तिविस्तारन्यूनाः, अर्थाद् विस्तारन्यूनतानुगुणोत्सेधन्यूनतायुक्ताश्च, रथा भवन्तीति शेषः। इति अनेन प्रकारेण, सप्त रथाः दशपुरुषेणाऽऽदिमेन सह।

विनियोगभेदनिबन्धनांस्तत्संज्ञाभेदानाह—देवरथेत्यादि। देवरथो यात्रोत्सवेषु देवप्रतिमासञ्चारणार्थो रथः, पुण्यरथः विवाहादिमङ्गलावसरारोहणार्थः, साङ्ग्रामिकः 'अध्वसञ्चारार्थः, परपुराभियानिकः शत्रुदुर्गभञ्जनावसरोपयोज्यः, वैनयिकः विनयश्चर्याशिक्षणं तदर्थः, एवंसंज्ञान् रथान् कारयेत्।

चाणक्यटीका

दशवितस्तिविस्तारः (रथः)। कथं विज्ञायते ? द्वादशवितस्त्यायाम इति अन्तरशब्देनाऽऽयामाभिधानात्। तथा चोक्तम्—

स्यन्दनस्य प्रमाणं स्याद् विस्तारायामतः पृथक्।

(यश्चा ? पञ्चा) रत्निः परिग्राह्यः षडरत्निः (स) उत्तमः॥ इति।

तस्मादुत्तमाद् एकैकवितस्त्यवरायामा आ (षडन्तरात्) सप्त रथा भवन्ति। तदेवात्र प्रमाणं सामान्येन भवति। अन्यस्त्वाह—एकैकवितस्तिह्रासाद् विस्तारह्रासो भवति आ चतुर्वितस्तिविस्तारादिति[1]। कथं पुनः षड्वितस्त्यामेन शय्यानां योग इति चेत् कूबरस्य पञ्चबन्धस्य (स्वानत्वाददोषः ?)। तथा चोक्तम्—कूबरस्य चतुर्हस्तम्। पञ्चवितस्ति कथं द्वित्रिदण्डफल एवैकतदन्तर इति ?)।

·देवरथः देवोत्सवादिषु तत्प्रतिमारोहाय वा योग्यः। पुण्यरथः क्रीडाविहारादिप्रयोजनः। सङ्ग्रामयोग्यः साङ्ग्रामिकः। परिचङ्क्रमार्थः पारियाणिकः।

---

१. अन्या चेयं व्याख्या भट्टस्वामिनाऽऽदृता।

[रथानुबन्धिकर्मकरप्रोत्साहनावश्यकता]

इष्वस्त्रप्रहरणावरणोपकरणकल्पनाः सारथिरथिकरथ्यानां च कर्मस्वायोगं विद्यात् । आ कर्मभ्यश्च भक्तवेतनं भृतानामभृतानां च योग्यारक्षानुष्ठानं अर्थमानकर्म च ।

चाणक्यटीका

संयानाय प्रभवति अतिशयक्रीडार्थं (सां)यानिकः वैनयिकः, (एव)······मादीनां योग्यार्थं इति । एतान् षड् रथविशेषान् कारयेत् ।

प्रतिपदपञ्चिका

तद्भेदमेव तावदाह-देवरथेत्यादि, देवरथो यात्रादौ देवतासञ्चारार्थम्, पुष्परथोऽभिषेकदिवसमङ्गलादावारोहणार्थम्, साङ्ग्रामिको युद्धार्थः, पारियाणिकोऽध्वगमनार्थः, परपुराभियानिकः शत्रुदुर्गादियोगार्थः, वैनयिकोऽभ्यासार्थः, इत्येवं षड् रथान् कारयेत् ।

तेषां प्रमाणमाह-दशपुरुष इत्यादि, द्वादशाङ्गुलेन पुरुषेण दशपुरुषः पञ्चहस्तोत्सेधो द्वादशान्तरः षडरत्निविस्तारः सर्वोत्तमो भवति ।

तस्मादुत्तम-रथप्रमाणादेकान्तरावरा इत्येकेन वितस्त्यन्तरेणावराः आ षडन्तरादित्याषड्वितस्तिविस्तारात् सप्त रथा भवन्ति । एवञ्च विस्तारहान्या सामर्थ्यादुच्छ्रायस्यापि वितस्त्यन्तरेणैव हानिर्द्रष्टव्या । दशभागेनेत्यपरे । तथेष्वादिकल्पनां रथाध्यक्षो विद्यात् ।

श्रीमूला

इष्वस्त्रेत्यादि । इष्वादिकल्पनाः इषूणां बाणानां सतूणीराणाम् अस्त्राणाम् धनुषां प्रहरणानां तोमरादीनाम् आवरणानां पल्याणादीनाम् उपकरणानां वल्गादीनां च कल्पना रचनाः, सारथिरथिकरथ्यानां कर्मसु आयोगं च यन्तॄणां रथयोद्धॄणां रथवाहानां च स्वस्वकर्मसु अभियोगातिशयं च, विद्यात् । आ कर्मभ्यश्चेति । आ कर्मणां परिसमाप्तेः, भक्तवेतनं, भृतानां नित्यनियुक्तशिल्पिनाम्, अभृतानाम् आगन्तुशिल्पिनां च सपरिकर्मिणां, योग्यारक्षानुष्ठानं योग्यानां स्वकर्मण्यतिनिपुणानां शिल्पिनां यद्वा अश्वहृदयरथचर्यादिशिक्षारूपयोग्योपदेशाचार्याणाम् आरक्षा परोपजापाद् रक्षणम् अनुष्ठानं व्यापारसौष्ठवासौष्ठवमात्रं च, अर्थकर्म प्रभूतधनदानं मानकर्म पारितोषिकवलयवस्त्रादिदानसत्कारं च, विद्याद् आकलयेत् ।

इति रथाध्यक्षप्रकरणं समाप्तम् ।

चाणक्यटीका

तथा इष्वस्त्राणां धनुषाम् । प्रहरणानां शक्त्यादीनाम् । आवरणानां वर्मादीनाम् । उपकरणानां युगवरत्रादीनां कल्पनाः विद्यात् । तथा सारथि (रथिक)···रथ्यानामश्वानां

[पदात्यध्यक्षकर्त्तव्यसङ्ग्रहः]

एतेन पत्त्यध्यक्षो व्याख्यातः । स मौलभृतश्रेणिमित्राऽमित्राऽटवीबलानां सारफल्गुतां विद्यात्, निम्नस्थलप्रकाशकूटखनकाकाशदिवारात्रियुद्धव्यायामं च विद्यात्, आयोगमयोगं च कर्मसु ।

चाणक्यटीका

यथास्वं कर्मस्वायोगं विनियोजनं विद्यात् । आ कर्मभ्यश्चेति अभृतानां रथकारादीनां यावत् कर्म परिसमाप्तं तावत् भक्तवेतनम्, एभ्यो दद्यादित्यर्थः । भृतानां च अस्येयम् ईदृशी योग्या, अस्येयं रक्षा, इदमस्य अनुष्ठानम्, इदमस्य अर्थकर्म, इदमस्य मानकर्मेति । विद्यादित्येव ।

॥ रथाध्यक्षः, एकोनपञ्चाशं प्रकरणम् ॥

प्रतिपदपञ्चिका

इषुशब्देन तत्समूहाधारस्तूणः परिगृह्यते । अस्त्रं धनुः, प्रहरणं तोमरादिः, आवरणं जवनादि, उपकरणं तुरगादोनां वध्रावरत्रादि, तेषां कल्पनास्तद्योगानां यथाद्व विरचना, तथा सारथेः सूतस्य, रथिकस्य योद्धुः, रथ्यानां रथवाहिनाम्, चकारात् तत्पादरक्षादीनां च कर्मस्वायोगं तात्पर्यं सौष्ठवं सामर्थ्यं वा विद्यात् । आ कर्मभ्यश्च परिसमाप्ति यावत् भक्तवेतनम् आहूतानामागन्तूनां रथकारादि-शिल्पिनां तत्कर्मकराणां च हृतानां च पूर्ववत् परिगृहीतानां भक्तवेतनं विद्यात् । योग्यारक्षानुष्ठानमर्थमानकर्म चेति । ये शिल्पिनामतिशयेन योग्याः कुशलास्तेषां संरक्षणं तदनुष्ठानम्, आरक्षा योग्यारक्षा परोपजापादेस्तेषां रक्षणम्, तदनुष्ठानं तत्कर्म तात्पर्यम्, अर्थकर्म अर्थादानं, मानकर्म वस्त्रस्रगनुलेपनादिदानेन सत्कारकरणम्, तत् कस्य कदा कादृग् वा कर्तव्यमिति रथाध्यक्षो विद्यादिति केचित् । अपरे तु योग्याम्याम् अभ्यासस्तद्ग्रहणेन सारथिरथिकादीनाम् अश्वहृदयरथचर्यायुद्धादिशिक्षाप्रदायिनो गृह्यन्ते, तेषामारक्षकानुष्ठानमर्थमानकर्म च रथाध्यक्षो विद्यादिति व्याचक्षते ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायां
द्वितीयेऽधिकरणे रथाऽध्यक्ष प्रकरणम् ।

श्रीमूला

पत्त्यध्यक्ष इति सूत्रम् । पदात्यधिकृतव्यापारोऽभिधीयत इति सूत्रार्थः ।

एतेनेति । उक्तेन रथाध्यक्षव्यापारेण, पत्त्यध्यक्षो व्याख्यातः, पदात्यध्यक्ष इष्वस्त्रप्रहरणादिकल्पनाः कर्मस्वायोगं भक्तवेतनं योग्यारक्षानुष्ठानमर्थमानकर्म चेत्येतत् सर्वं पदातिविषयं चिन्तयेदित्यर्थः । अधिकविधिमाह—स इत्यादि ।

श्रीमूला

पत्त्यध्यक्षः, मौलभृतश्रेणिमित्रमित्राटवीबलानां मौलं मूले स्थानीये भवं भृतं वेतनपरिगृहीतं बलं श्रेणिर्जनपदावस्थायियुधीयगणः मित्रबलममित्रबलमटवीपालबलम् इति षड्विधानां बलानां, सारफल्गुतां, विद्यात् स्थानविनियोगाय जानीयात्। निम्नादियुद्धव्यायामं च निम्नयुद्धाद्यष्टविधयुद्धशिक्षां च, विद्यात्। तत्र निम्नयुद्धं सतृणजलमध्यदेशयुद्धं स्थलयुद्धं निरुदकस्तम्बदेशयुद्धं प्रकाशयुद्धं प्रतीतं कूटयुद्धं साङ्ग्रामिकाधिकरणविकल्पितं कपटयुद्धं खनकयुद्धं भूमिं खात्वा तत्र स्थित्वा क्रियमाणं युद्धम् आकाशयुद्धं प्राकारादिकमारुह्य क्रियमाणं युद्धं, दिवायुद्धरात्रियुद्धे प्रतीते। आयोगमयोगं च कर्मस्विति। पत्तीनां स्वकर्मसु 'सर्वदेशकालशस्त्रवहनं व्यायामश्चेति पदातिकर्माणि' इति साङ्ग्रामिकाधिकरणे वक्ष्यमाणेषु तत्परत्वमव्यापारं च विद्यात्।

इति पत्त्यध्यक्षप्रकरणं समाप्तम्।

चाणक्यटीका

एतेन पत्त्यध्यक्षो व्याख्यातः। कर्मस्वायोगभक्तवेतनादिपरिज्ञानसादृश्यात्। विशेषतस्तु मौलादिबलानां प्रत्येकम् इतरेतरापेक्षया च कर्म युद्धकर्म। (एतोमपदं ग्रहणानि इतरथा ह्याकरकाणिवेत्रे ?[१])

त्रयस्त्रिंशश्चाध्यायः।

प्रतिपदपञ्चिका

पत्त्यध्यक्ष इति सूत्रम्। पत्तयः पादाताः ये पादचारणैव यूद्धयन्ति, तेषामध्यक्षः तेष्वधिकृतः, स इह अभिधीयते। तमाह-एतेन पत्त्यध्यक्षो व्याख्यात इति, एतेन यथाभिहितरथाध्यक्षव्यापारेण पत्त्यध्यक्षस्य व्यापारोऽपि व्याख्यात इति सोऽपि पत्तीनामिष्वस्त्रप्रहरणावरणोपकरणकल्पनास्तेषां कर्म स्वायोगमा कर्मभ्यश्च भक्तवेतनमभृतानां हृभृतानां च योग्यारक्षानुष्ठानार्थमर्थमानकर्म चेति विद्यादिति सर्वं योजनीयम्।

एवमातिदेशिकमभिधाय तस्य वैशेषिकं विधिमाह—स मौलभृतेत्यादि, युद्धव्यायाममायोगमयोगं च कर्मसु विद्यादिति तत्र कर्माणि पत्तिकर्माणि वक्ष्यति हि, सर्वदेशकालास्त्रवहनं व्यायामश्चेति पत्तिकर्माणीति तेष्वायोगस्तात्पर्यसौष्ठवसामर्थ्यानि। अस्य चातिदेशः सिद्धस्य पुनर्वचनं परेषां (सर्वेषां) च गणान्तरेभ्यः स्वकर्मस्वायोगः प्रधानमिति ज्ञापनार्थम्। अयोगोऽनुत्थानशीलत्वं, तदपि तेषां प्रोत्साहनाय ज्ञातव्यमेव। एतत्पत्त्यध्यक्षो विद्याज्जानीयादिति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायामध्यक्षप्रचारिके द्वितीयेऽधिकरणे पत्त्यध्यक्षप्रकरणम्।

---

१. इतः परं सेनापतिप्रचारः, मुद्राध्यक्षः, विवीताध्यक्षः, समाहर्तृप्रचारस्य आदिमैकदेशश्च मातृकायां त्रुटिताः।

[सेनापतिना अभ्यसनीयाः अंशाः कर्तव्याश्च]

तदेव सेनापतिः सर्वयुद्धप्रहरणविद्याविनीतो हस्त्यश्वरथचर्यासङ्घुष्टश्चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानं विद्यात्। स्वभूमिं युद्धकालं प्रत्यनीकमभिन्नभेदनं भिन्नसन्धानं संहतभेदनं भिन्नवधं दुर्गवधं यात्राकालं च पश्येत् ।

श्रीमूला

सेनापतिप्रचार इति सूत्रम् । हस्त्यश्वरथपदातिरूपचतुरङ्गसमुदायात्मकं मौलभृतादिषट्प्रकारोपेतं बलं सेना तस्य पतिर्नायकः सेनापतिः तस्य प्रचारो व्यापारोऽभिधीयत इति सूत्रार्थः । एकैकाङ्गाध्यक्षकथनानन्तरं सर्वाङ्गसमुदायाध्यक्षस्य क्रमप्राप्तत्वाद् वचनम् ।

तदेवेत्यादि । अश्वाध्यक्षादीनां पत्त्यध्यक्षान्तानां चतुर्णामङ्गाध्यक्षाणां यत् कर्मजातमभिहितं तदेव, सेनापतिः, विद्यात् । स कथम्भूतः, सर्वयुद्धप्रहरणविद्याविनीतः सर्वेषु युद्धेषु निम्नयुद्धादिषु सर्वेषु प्रहरणेषु धनुर्वर्गादिषु विद्यासु आन्वीक्षिकीप्रभृतिषु च कृतशिक्षः, हस्त्यश्वरथचर्यासङ्घुष्टः गजाद्यारोहणयोधनादिकर्मसु प्रख्यातः । तदेवेत्येतद् विशिनष्टि—चतुरङ्गस्य बलस्याऽनुष्ठानाधिष्ठानमिति । हस्त्यश्वरथपदात्यात्मिकायाः सेनायाः यान्यनुष्ठानानि हस्त्यश्वरथपत्तिकर्माणीति साङ्ग्रामिकाधिकरणे वक्ष्यमाणानि कर्माणि तदधिष्ठानं तदाश्रयम् अश्वाध्यक्षादिकर्मणामश्वादिकर्मानुरूपकरणीयत्वात् ।

अतिदिष्टकर्मातिरिक्तं कर्माह—स्वभूमिमित्यादि । स्वभूमिं सेनाव्यायामार्हं देशं, युद्धकालं प्रकाशादियुद्धयोग्यं कालम्, प्रत्यनीकं शत्रुबलम्, अभिन्नभेदनम् अभिन्नस्य परव्यूहस्य भेदनं विश्लेषणम्, भिन्नसन्धानं भिन्नस्य विश्लिष्टस्य स्वबलस्य संश्लेषणम्, संहतभेदनं परस्परक्षार्थं सङ्घटितानां विघटनम्, भिन्नवधं विघटितानां वधम्, दुर्गवधं परपुरस्थानीयादिविध्वंसनम्, यात्राकालं च अभिषेणनकालं च, पश्येत् विद्यात् ।

प्रतिपदपञ्चिका

सेनापतिप्रचार इति सूत्रम् । सेना चतुरङ्गं षड्विधं च बलं, तस्याः पतिर्नेता सेनापतिः । स च राज्ञः पुत्र एवाऽऽत्मसम्पन्नो यदि लब्धः स एव मुख्यः । उक्तं हि "आत्मसम्पन्नं सेनापत्ये यौवराज्ये वास्थापयेदि"त । तदभावे अन्योऽपि क्षत्रियजातीयो ब्राह्मणोऽब्राह्मणो वा आत्मसम्पन्न एव भवितव्यः इति तस्य सेनापतेः प्रचारः सेनाविषयो व्यापारः, स इहाऽभिधीयत इति सूत्रार्थः ।

सम्बन्धस्तु दण्डप्रकृतेश्चतुर्णामङ्गानां प्रत्येकमध्यक्षान् प्रतिपाद्य तदनन्तरं सर्वाङ्गसमुदितस्य दण्डस्य प्रणेतुः सेनापतेः प्रचारोऽभिधीयत इति । तदाह—तदेव

तूर्यध्वजपताकाभिर्व्यूहसंज्ञाः प्रकल्पयेत् ।
स्थाने याने प्रहरणे सैन्यानां विनये रतः ॥११६॥

इत्यध्यक्षप्रचारे रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च,
त्रयस्त्रिंशोऽध्यायः, आदितः चतुष्पञ्चाशः ।

प्रतिपदपञ्चिका

सेनापतिरित्यादि, तद्वृत्तेनात्र चाश्वाद्यङ्गचतुष्टयाध्यक्षविषयं कार्यजातं परामृश्यते । तस्य सर्वस्य सेनापतिनाऽवश्यविज्ञाप्यत्वात् सर्वयुद्धप्रहरणविद्याविनीत इति सर्वशब्दो युद्धादिभिः प्रत्येकम्, सर्वेषु युद्धेषु निम्नयुद्धादिषु प्रकाशकूटतूष्णींयुद्धेषु च, सर्वेषु च प्रहरणेषु धनुर्वर्गादिषु, सर्वासु च विद्यासु आन्वीक्षिक्यादिषु विनीतः शिक्षितः हस्त्यश्वरथचर्यारथसङ्घुष्टः हस्त्याद्यारोहविनयनयोधनेषु प्रसिद्धः । एवम्भूतः सेनापतिः तदेव विद्यादिति वीप्सालोपोऽत्र द्रष्टव्यः । तत्तदध्यक्षोक्तं सर्वं विद्यादिति तस्य वेतने विशेषः, चतुरङ्गस्य बलस्य अनुष्ठानाधिष्ठानं विद्यादिति चतुरङ्गबलस्य यदनुष्ठानं हस्त्यश्वरथपत्तिकर्माणीति सूत्रे वक्ष्यमाणानि हस्त्यादिकर्माणीति तदधिष्ठानं तद्विषयं तदेव पूर्वोक्तं वेदितव्यम् । तद्यथा, तानि तेषां कर्माणि परीक्ष्य तदनुरूपपरिकल्पितानि भक्तवेतनविधायवसादिदानानि तत्तदध्यक्षाः कुर्युः, सोऽपि तेषां कृताकृतमहरहर्विद्यात् । स हि तेषां कर्मसु विनियोक्ता ।

एवमातिदेशिकमुक्त्वा तस्य(ा)साधारणं कर्तव्यमाह—स्वभूमिमित्यादि, स्वभूमिः स्वसैन्यव्यायामयोग्यो देशः, अर्थकालस्वसैन्यव्यायामयोग्यं प्रकाशकूटमन्त्रव्यायामयुद्धकालं च प्रत्यनीकं परबलं तदपेक्षया स्वसैन्यप्रतिव्यूहनं च अभिन्नभेदनं परव्यूहस्य भिन्नसाधनं आत्मव्यूहस्य सङ्गतभेदनम्, अन्योन्यरक्षिणां शत्रुसैनिकानां दूरीकरणम् । यथा द्रोणः संशप्तकैरर्जुनमभिमन्योः दूरीचकार, भिन्नवधः, यथा तेनैवार्जुनादपकृष्टस्य अभिमन्योर्वधः कृतः, दुर्गवधः अवस्कन्दसौप्तिकादिना दुर्गलम्भोपायाभिहितैश्च प्रकारैः शत्रोः स्थानीयस्कन्धावारविध्वंसनम्, यात्राकालो मार्गशीर्षादिः वक्ष्यमाणः, एतत्सर्वं सेनापतिः पश्येत् जानीयात् । पश्यतिग्रहणं प्रत्यक्षीकृतानामिव स्पष्टतर विज्ञानार्थम् ।

श्रीमूला

विधिशेषं श्लोकेनाह—तूर्येत्यादि । स्थाने गमननिवृत्तौ, याने गमने प्रहरणे पराभिहनने च विषये, तूर्यध्वजपताकाभिः वाद्यैः शङ्खचक्रादिचिह्नैः वैजयन्तीभिश्च, व्यूहसंज्ञाः युद्धव्यूहितस्वसैन्यस्य सङ्केतान् पराविज्ञेयान्, प्रकल्पयेद् उल्लिखेत् । उल्लिखितसङ्केताविसंवादेन स्वसैन्यानि वाद्यविशेषश्रवणध्वजपताकाविशेषदर्शनैः

श्रीमूला

स्थानयानाद्यनुष्ठानं यथा कुर्युस्तथा तान् शिक्षयेच्चेत्यभिप्रायकमध्यक्षविशेषणमाह—सैन्यानां विनये रत इति ।

इति कौटिलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयस्त्रिंशोऽध्यायः, रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च,
आदितश्चतुष्पञ्चाशः ॥

प्रतिपदपञ्चिका

तस्य कर्तव्यान्तरम् अध्यायप्रान्ते श्लोकेनाह—तूर्यध्वजेत्यादि। तूर्याणि वाद्यानि, ध्वज(झष)ऋषभकलशादिचिह्नानि, पताकाः वैजयन्त्यः, चित्रकपटादिकृताः, ताभिः व्यूहसंज्ञाः युद्धकाले दिने दिने व्यूहीकृतस्य स्वसैन्यस्य सङ्केतात् प्रकल्पयेत् स्थापयेत्। विषयान्याह[1]-स्थाने याने प्रहरणे चेति, तद्विषया इत्यर्थः। तद् यथा अमुष्मिन् वाद्यविशेषे श्रुते अमुकयोर्वा ध्वजपताकयोर्दृष्टयोः स्थातव्यं यातव्यं प्रहर्तव्यं वेति प्रत्यहमन्याः संज्ञाः कर्तव्याः परेषामनभिज्ञानार्थमिति । सैन्यानां स्वयोधानां विनये विविधे नयने यथा स्वयं न भज्येरन्[2] परांश्च विजयेरन्, तथा प्रवर्तने छिद्रेषु च रक्षणे रतः तात्पर्येण सदोद्यत इति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायामध्यक्षप्रचारिके
द्वितीयेऽधिकरणे सेनापतिप्रचारः इति प्रकरणम् ।
त्रयस्त्रिंशोऽध्यायः । आदितः चतुःपञ्चाशोऽध्यायः ॥

---

१. किं विषया पा० ।

२. मन्येरन्—पा० ।

द्विपञ्चाशत्त्रिपञ्चाशे प्रकरणे

चतुस्त्रिंशोऽध्यायः

मुद्राध्यक्षो विवीताध्यक्षश्च

[मुद्राध्यक्षाधिकारः, तत्कृतनियमातिक्रमे दण्डश्च]

मुद्राध्यक्षो मुद्रां माषकेण दद्यात्। समुद्रो जनपदं प्रवेष्टुं निष्क्रमितुं वा लभेत। द्वादशपणममुद्रो जानपदो दद्यात्। कूटमुद्रायां पूर्वः साहसदण्डः तिरोजनपदस्योत्तमः।

श्रीमूला

मुद्राध्यक्ष इति सूत्रम्। मुद्रा नाम पण्यलेख्यादिषु करणीयो राजकीयश्चिह्न-विशेषः शुल्काध्यक्षे प्रस्तुतः, तस्या अध्यक्षो मुद्राध्यक्षः। स तद्व्यापारश्च तत्रानुक्त इहाभिधीयत इत्यर्थः।

मुद्राध्यक्ष इति। सः, मुद्रां नायं चोरः शत्रुचारो वेति प्रत्ययजननार्थां, माषकेण दद्यात् माषकं राजकोशवृद्ध्यर्थं गृहीत्वा दद्यात्, प्रवेष्ट्रे निष्क्रमित्रे च।

मुद्राग्रहणस्य फलमाह—समुद्र इति। गृहीतमुद्र एव जनः, जनपदं विजिगीषु-देशं, प्रवेष्टुं निष्क्रमितुं तस्मान्निर्गन्तुं च, लभेत अधिकारं प्राप्नुयादित्यर्थः।

अगृहीतमुद्रस्य प्रविशतो निर्गच्छतश्च दण्डमाह—द्वादशपणमित्यादि। द्वादशपणं दण्डम्, अमुद्रः अगृहीतमुद्रः, जानपदः विजिगीषुजनपदभवः, दद्यात्। अन्यजनपदभवस्य तु अमुद्रस्य कूटमुद्राकरणवक्ष्यमाणदण्डवृद्धिन्यायेन दण्डवृद्धिः काचित् स्थापनीया। कूटमुद्रायां कृत्रिममुद्रायां प्रदर्श्यमानायां, पूर्वः साहसदण्डः, अर्थाद् विजिगीषुजनपदभवस्यैव। तिरोजनपदस्य अन्यजनपदभवस्य कूटमुद्राप्रदर्शयितुः, उत्तमः साहसः।

इति मुद्राध्यक्षप्रकरणं समाप्तम्।

प्रतिपदपञ्चिका

मुद्राध्यक्ष इति सूत्रम्। मुद्रा राजकीयं लाञ्छनं, तस्याः अध्यक्षः तत्प्रवर्तयिता इहाभिधीयत इति सूत्रार्थः। सम्बन्धस्तु उद्देशनिर्देशतोऽथवा के कुतस्त्याः कियत्पण्याः क्वचाभिज्ञानमुद्रा वा कृता इत्यत्र मुद्रोक्ता, तदध्यक्षः तद्व्यापारो वा नोक्तः, स इहाभिधीयत इति सम्बन्धः।

[गोप्रचारार्हभूभागाध्यक्षकर्तव्याः, तस्करादिनिवारणोपायाश्च]

विवीताध्यक्षो मुद्रां पश्येत्। भयान्तरेषु च विवीतं स्थापयेत्। चोरव्यालभयान्निम्नारण्यानि शोधयेत्। अनुदके कूपसेतुबन्धोत्सान् स्थापयेत्, पुष्पफलवाटांश्च। लुब्धकश्वगणिनः परिव्रजेयुररण्यानि। तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दम् अग्राह्याः कुर्युः शैलवृक्षविरूढा वा, शीघ्रवाहना वा।

प्रतिपदपञ्चिका

तदाह—मुद्राध्यक्ष इत्यादि, उक्तं ह्यन्तेष्वन्तपालदुर्गाणि जनपदद्वाराणि अन्तपालाधिष्ठितानि कारयेदिति विजिगीषुदेशनिर्गमयोरन्तपालदुर्गाणि द्वाराणि अतः तैरेव प्रवेशनिर्गमौ नियन्तव्यौ, अतस्तेषु मुद्राध्यक्षो मुद्रां माषेण दद्यादिति। विशद्भ्यो निर्गच्छद्भ्यश्च राजभार्यं माषं गृहीत्वा मुद्रां प्रयच्छेत्। किमर्थम्? परावसर्पज्ञानार्थं, चोरादिग्रहणार्थम्, पण्यव्यवहारिभ्यः शुल्कग्रहणं माषग्रहणाच्च राज्ञः कोशवृद्धिर्भवतीति च।

तदाह—समुद्रो जनपदं प्रवेष्टुं निर्गमितुं च लभेतेति, सर्वोऽपि समुद्रो मुद्राध्यक्षात् गृहीत्वैव मुद्रां विजिगीषुदेशं प्रवेष्टुं निष्क्रमितुं च ततो लभेत। नन्वेको मुद्राध्यक्षः कथमनेकेष्वन्तपालदुर्गेषु मुद्रां दास्यति स्वयमेकत्रान्यत्र च स्वपुरुषैर्दातुं शक्नोति।

अमुद्राणां प्रवेशनिर्गमे दण्डमाह—द्वादशपणमित्यादि। अगृहीतमुद्रो जानपदो विजिगीषुदेशजो द्वादशपणं दद्यात्।

कूटमुद्राकारिणः कृतकमुद्रां दर्शयतो जानपदस्य पूर्वः साहसदण्डः। तिरोजानपदस्यान्यदेशजस्य कूटमुद्राकारिण उत्तमः साहसदण्डः। अनया कूटमुद्रादण्डवृद्ध्या तिरोजानपदस्य पूर्वत्रापि दण्डवृद्धिः कल्पनीया।

ननु दुर्गचारिणां कथं दण्डग्रहणमिति चेत् तेऽपि विवीताध्यक्षहस्ते पतिष्यन्ति, मुद्रादर्शनस्य विहितकार्यत्वात्। वक्ष्यति हि—विवीताध्यक्षो मुद्राः पश्येदिति। शङ्कितेषु च देशेषु विवीतं वक्ष्यति। भयान्तरेषु च विवीतं स्थापयेदिति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायामध्यक्षप्रचारिके
द्वितीयेऽधिकरणे मुद्राध्यक्षप्रकरणम्।

श्रीमूला

विवीताध्यक्ष इति सूत्रम्। विवीतं गोप्रचरणार्हस्तृणादिमान् प्रदेशः, तस्याऽध्यक्षस्तद्व्यापारोऽभिधीयत इति सूत्रार्थः। य एते मुद्राध्यक्षदण्डनीया उक्ता अमुद्रकूटमुद्राः, ते महापथमृजुमपहाय विमार्गेणैव विवीतगतेन प्रायश्चरन्तो विवीताध्यक्षेणैव स्वयं स्वपुरुषद्वारेण वा गृहीत्वा मुद्राध्यक्षायार्पणीया इत्यतो मुद्राध्यक्षानन्तरं विवीताध्यक्षकथनसङ्गतिः।

श्रीमूला

विवीताध्यक्ष इति । सः, मुद्रां पश्येत् प्रतिविवीतपथिकं मुद्राऽस्ति न वेति परीक्षेत ।

मुद्राविचयस्य व्याप्त्यर्थमाह—भयान्तरेषु चेति । भयं चोरपरापसर्पचारशङ्का, तद्गोचरेषु भूप्रदेशेषु कृष्येष्वकृष्येषु वा सर्वविधेषु, विवीतं स्थापयेत् । एतेन 'अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेद्' इति भूभिच्छिद्रविधानप्रकरणोक्त्या कृष्यभूमौ विवीताभावात् तत्पथचारिषु मुद्राविचयाभावप्रसङ्ग इति शङ्का निरस्ता । चोरव्यालभयात्, निम्नारण्यानि निम्नानि गभीराणि भूच्छिद्राणि अरण्यानि च, शोधयेत् तस्करा हिंस्रमृगाश्च तत्र निलीय वसन्ति न वेति मुहुः परीक्षेत ।

अनुदक इति । निर्जले प्रदेशे, कूपसेतुबन्धोत्सान् कूपान् उदपानान् सेतुबन्धान् जलावरोधबन्धान् उत्सान् तात्कालिकान् क्षुद्रकूपांश्च स्थापयेत् । पुष्पफलवाटान्, चकारात् प्रपादिकं च, स्थापयेत् ।

लुब्धकश्वगणिन इति । लुब्धकाश्च श्वगणिनश्च, परिव्रजेयुररण्यानि वनानि परितश्चरेयुः, अर्थाच्चोरामित्रादीनां प्रवेशपरिहाराय प्रविष्टपरिज्ञानाय च । चोराद्यागमस्याऽन्तपालादीन् प्रति निवेदनार्थमाह—तस्करेत्यादि । तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दम्, अग्राह्याः तस्करामित्राणां ग्रहणागोचराः सन्तः, कुर्युः । अग्राह्यत्वप्रकारमाह—शैलवृक्षाधिरूढा वेत्यादि । स्पष्टार्थम् ।

प्रतिपदपञ्चिका

विवीताध्यक्ष इति सूत्रम् । विवीतं तृणाद्युत्पत्तिस्थानम्, तदध्यक्षस्तद्व्यापारोऽभिधीयत इति सूत्रार्थः । सम्बन्धस्तु उद्देशतोऽथवा कृष्यायां भूमो पशुभ्यो विवीतानि प्रयच्छेदिति विवीतमुक्तम्, तदध्यक्षस्तद्व्यापारो वा नोक्तः, सोऽभिधीयत इति । यद्वा पूर्वस्मिन् सूत्रे [1]अकृतमुद्रादीनां दण्डविधानमुक्तम्, तच्च तेषां दर्शनाधीनम्, दर्शनं च विवीताध्यक्षकार्यमिति तदनन्तरं तत्प्रतिपादनमिति ।

तदाह-विवीताध्यक्षो मुद्राः पश्येदिति । सर्वत्र पथिकान् दृष्ट्वा मुद्रापरिचयं कुर्यादित्यर्थः । तत्रामुद्रान्[2] कूटमुद्रांश्च गृहीत्वा मुद्राध्यक्षस्यार्पयेत्, तद्दण्डस्य तत्कार्यत्वात्, अस्य तु दर्शनमात्रमेव विहितमिति । न तु विवीताध्यक्षो विवीतप्रदेशेषु मुद्राः पश्यति, विवीतस्थानं च नियतमकृष्यायां भूमावित्युक्तत्वात् ।

कथमन्यत्र मुद्रादर्शनमिति, तत्राह-भयान्तरेषु च विवीतं स्थापयेदिति, भयान्तरेषु शङ्कितपरपुरुषादिसम्पातभयेषु प्रदेशेषु कृष्यायामपि भूमौ पडिति स्थापयेदिति चोरव्यालभयान्निम्नारण्यानि शोधयेदिति । चोराः प्रतीताः, व्यालाः व्याघ्र-

---

१. कृतमुद्रादीनाम्—पा० ।

२. मुद्रा कूटमुद्राश्च—पा० ।

अमित्राटवीसञ्चारं च राज्ञो गृहकपोतैर्मुद्रायुक्तैर्हारयेयुः, धूमाग्नि-परम्परया वा

प्रतिपदपञ्चिका

सर्पादयो हिंस्राः, तत्कृत्तभयान्निम्नानि सोदकान्युदकानि बहुच्छिद्राणि, अरण्यानि तरुगहनानि च शोधयेत्, चोरादीनन्विष्य ग्राहयेत् ।

अनुदके जलवर्जिते देशे कूपादीन् स्थापयेत् । कूपास्सेतुबन्धाश्च प्रतीताः । उत्साः कूपाः एवं स्थिराः क्षुद्राश्च, पथिकानां स्नानपानार्थमेतान् कारयेदिति । पुष्पफलवाटांश्च मनुष्याणाम् उपजीवनाय, चकारात् छायावृक्षप्रपादींश्च तद्रहितेषु स्थापयेदिति ।

लुब्धकाः श्वगणिनश्च विवीताध्यक्षप्रयुक्ताः परिव्रजेयुः, सर्वतश्चरेयुः । किमर्थम् ? चोराद्यागमपरिज्ञानार्थम् । तदाह-अरण्य इत्यादिना । अरण्ये तरुगहने तस्कराणा-ममित्राणां च, तद्ग्रहणमाटविकानामप्युपलक्षणार्थम् । तेषामभ्यागम आगच्छन्तीति परिज्ञाने शङ्खशब्दं दुन्दुभिशब्दं स्वयमग्राह्यास्तेषाम् अगोचरीभूताः कुर्युः स्वभावतो विषमप्रदेशावस्थिताः कृत्वा वा शङ्खादिशब्दं सुरङ्गे प्रवेशयेयुः[1] इति शङ्खादिशब्द-करणम् अन्तपालप्रबोधनार्थम् । शलवृक्षादिरूढा वा दुरारोहान् वा शैलवृक्षान् अधिरुह्य, सुशीघ्रवाहना वेत्ति शीघ्रगामिभिरश्वतरादिभिर्वाहनैर्गत्वा वा बोधयेयुरिति यथासम्भवं योजनीयम् ।

श्रीमूला

अमित्रेत्यादि । अमित्राटवीसञ्चारं च अमित्राणां शत्रूणाम् अटवीसञ्चारं मृगयाद्यर्थं वनसञ्चारवृत्तान्तं, राज्ञः स्थानीयस्थितस्य गृहकपोतैर्मुद्रायुक्तैः लेखयुक्तै-र्गृह्यकपारावतैः, हारयेयुः । धूमाग्निपरम्परया वा हारयेयुः, दिवा धूमपरम्परया नक्तमग्निपरम्परया वा नयेयुः । परम्परा तु—आ वनाद् आस्थानीयं विवीताध्यक्षपुरुषाः कृतसङ्केताः क्रोशान्तरेषु स्थिताः वनगतपुरुषप्रथमप्रदर्शितधूमाग्निदर्शनात् तदुत्तर-क्रोशान्तरस्थितेन स्वोत्तरं क्रोशान्तरस्थितं प्रति धूमाग्निप्रदर्शनं, तेन स्वोत्तरं प्रति तेन स्वोत्तरं प्रतीत्येवंरूपा द्रष्टव्या ।

प्रतिपदपञ्चिका

राज्ञोऽपि शीघ्रवेदनोपायमाह-अमित्राटवीसञ्चारमिति ।

अमित्राणामाटविकानां च प्रवृत्तिं राज्ञः स्थानीयस्थस्यैव कपोतेन मुद्रायुक्तेन हारयेत् प्रेषयेत् । वक्ष्यति हि–विदेशप्रवृत्तिज्ञानं तदहरेव गृहकपोतेन मुद्रासंयुक्तेनेति तथा हारयेदित्यर्थः । धूमाग्निपरम्परया अमित्राटवीसञ्चारं राज्ञो हारयेदिति दिवा धूम-परम्परया रात्रावग्निपरम्परया ज्वालापरम्परया, तद्यथा—विवीताध्यक्षपुरुषाः

---

१. प्रविशेयुः—पा० ।

द्रव्यहस्तिवनाजीवं वर्तनीं चोररक्षणम् ।
सार्थातिवाह्यं गोरक्ष्यं व्यवहारं च कारयेत् ॥११७॥

इत्यध्यक्षप्रचारे मुद्राऽध्यक्षोविवीताध्यक्षश्च,
चतुस्त्रिंशोऽध्यायः, आदितः पञ्चपञ्चाशः ।

प्रतिपदपञ्चिका

द्विक्रोशान्तरेषु स्थिताः प्रथमेन धूमेऽग्नौ च दर्शने सर्वेऽपि स्वेषु स्वेषु स्थानेषु तदानीमेव दर्शयेयुः । यथा राजा जानीयादिति ।

श्रीमूला

व्यापारशेषं श्लोकेनाह—द्रव्येत्यादि । द्रव्यहस्तिवनाजीवं द्रव्यवने हस्तिवने च विद्यमानो य आजीवः उपजीव्यपदार्थः कुप्याध्यक्षहस्त्यध्यक्षोपादेयव्यतिरिक्तः यवसेन्धनाङ्गारादिः तं, वर्तनीं दुर्गमार्गसन्तारणभृतिं चोररक्षणतद्भृतिं, सार्थातिवाह्यं भयस्थानेषु वणिक्सङ्घस्यातिवाहनवेतनं, गोरक्ष्यं गोरक्षानिमित्तमादेयं, व्यवहारं यथोक्तपदार्थक्रयविक्रयव्यवहारं च, कारयेत् अनुष्ठापयेत् ।

इति कौटिलीयार्थशास्त्रव्याख्यामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुस्त्रिंशोऽध्यायः । मुद्राध्यक्षो विवीताध्यक्षश्च,
आदितः पञ्चपञ्चाशः ॥

प्रतिपदपञ्चिका

इदानीमध्यायप्रान्ते श्लोकमाह—द्रव्यहस्तिवनाजीवमित्यादि, आजीव्यत इत्याजीवः, यत्किञ्चिदुपादेयमित्यर्थः । द्रव्यवने हस्तिवने च कूपाध्यक्षः हस्त्यध्यक्षः, विषयसारदार्वादि कुप्यद्रव्यं हस्तिव्यतिरेकेण यथाजीव्यं यवसेन्धनाङ्गारादि तद्विवीताध्यक्षः कारयेत् उपाददीत । वर्तनीं दुर्गमप्रदेशेषु मार्गप्रवर्तनं चोररक्षणं चोरग्रहणम् आटविकादीनामप्युपलक्षणार्थम् । तेभ्यो मार्गसंरक्षणं सार्थातिवाह्यं सार्थानां च वणिजां भयप्रदेशेष्वतिवाहनं गोरक्ष्यमेतच्च वार्तोपलक्षणं कृष्यादिप्रवर्तनमित्यर्थः । व्यवहारं तत्रत्यानां क्रयविक्रयव्यवहारविवादपदनिर्णयं, चकाराद् वर्तन्यादिभिश्च [1]राजभाव्यग्रहणं, परप्रयुक्तगूढपुरुषादिग्रहणं च विवीताध्यक्षः कारयेदिति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायामध्यक्षप्रचारिके
द्वितीयेऽधिकरणे विवीताध्यक्षप्रकरणम्, चतुस्त्रिंशोऽध्यायः,
आदितः पञ्चपञ्चाशः ॥

---

१. राजार्थानाम्—पा० ।

चतुःपञ्चाशपञ्चपञ्चाशे प्रकरणे

पञ्चत्रिंशोऽध्यायः

समाहर्तृप्रचारः

[समाहर्त्रा विलिख्य स्थापनीयाः अंशाः]

समाहर्ता चतुर्धा जनपदं विभज्य ज्येष्ठमध्यमकनिष्ठविभागेन ग्रामाग्रं परिहारकमायुधीयं धान्यपशुहिरण्यकुप्यविष्टि(कर)प्रतिकरम् इदमेतावदिति निबन्धयेत् ।

श्रीमूला

समाहर्तृप्रचार इति सूत्रम् । सर्वेभ्य आयस्थानेभ्यो दुर्गराष्ट्रखनिसेतुवनव्रजवणिक्पथलक्षणेभ्यो राजार्थानां सम्यगाहर्ता समाहर्ता, तस्य प्रचारो व्यापारः सर्वजनपदचिन्तनरूपोऽभिधीयत इति सूत्रार्थः । एकैकार्थाध्यक्षाणां प्रतिपादनानन्तरं सर्वार्थाध्यक्षस्य प्राप्तावसरत्वात् कथनम् ।

समाहर्तेत्यादि । समाहर्ता, चतुर्धा जनपदं विभज्य चतुर्भिरंशैः जनपदं पृथक्कृत्य, ज्येष्ठमध्यमकनिष्ठविभागेन चतुर्ष्वप्यंशेषु प्रत्येकं ज्येष्ठो मध्यमः कनिष्ठ इति विभागं कुलसङ्ख्याप्रयुक्तं ग्रामाणां सारफल्गुत्वप्रयुक्तं च विभागं कृत्वा, ग्रामाग्रं निबन्धयेत् ग्रामाणां प्रातिस्विकं सामूहिकं च परिमाणं लेखयेत् । कथं निबन्धयेदित्याह—इदमेतावदितीति । एतच्च ग्रामाग्रादौ सर्वत्र सम्बध्यते । अमुकग्राम ईदृग्रूप एतत्परिमाणः अमुकग्रामसमुदाय ईदृग्रूप एतत्परिमाणश्चेत्यनेन प्रकारेण । तथा परिहारकं परिहारः महादानादिनिमित्तः करमोक्षस्तद्युक्तं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत्, एत एतावन्तो ग्रामाः करमोक्षिता इति लेखयेत् । आयुधीयं दण्डकरदायकं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत्, एते एतावन्तो ग्रामाः एतावत आयुधीयान् प्रयच्छन्तीति लेखयेत् । धान्यादिपञ्चकप्रतिकरम् इदमेतावदिति निबन्धयेत् । प्रतिनियतः करः प्रतिकरः, स धान्यादिषु प्रत्येकं सम्बध्यते, धान्यप्रतिकरं पशुप्रतिकरं हिरण्यप्रतिकरं कुप्यप्रतिकरं विष्टिप्रतिकरं च, इदमेतावदिति निबन्धयेत्, एष्वेषु ग्रामेषु अमुकामुकधान्येभ्य एतावांस्तत्तद्धान्यप्रतिकरः प्रतिवत्सरम् उपसम्पद्यत इति लेखयेत् । एतावान् पशुप्रतिकरोऽमुकामुकजातीयान् वाहदोहलोमाद्युपकर्तॄन् एतावतः पशून् उपनयतीति लेखयेत् । एष एतावान् हिरण्यप्रतिकरः कोशप्रवेश्यं हेमरूप्यं रूप्यरूपं ताम्ररूपं चैतावत् प्रयच्छतीति लेखयेत् । कुप्यप्रतिकर एष एतावान् एतान्येतावन्ति कुप्यद्रव्याणि वितरतीति लेखयेत् । विष्टिप्रतिकर एष एतावानेतावतां कर्मकरपुरुषाणामर्पणेनोपकरोतीति लेखयेत् ।

चाणक्यटीका

(अथसमाहर्तृप्रचारः)······तेषु च गृहेषु । एतावच्चातुर्वर्ण्यं ब्राह्मणादयः । एतावन्तश्च एतादृश एषाम् (हृतः ? आहृत्य) कृषिवाणिज्यादिक इति इयत्ताञ्च विद्यात् ।

प्रतिपदपञ्चिका

समाहर्तृप्रचार इति सूत्रम् । जनपदे दुर्गाद्यायस्थानसप्तकाद् राजार्थानां सम्यक् समन्ततो वा आहर्ता समाहर्ता, तस्य प्रचारः स्वयं गोपस्थानीकैश्च जनपदचिन्तनमिति सूत्रार्थः ।

सम्बन्धस्तु उद्देशनिर्देशतोऽथवा एकैकार्थाधिकारिणामध्यक्षाणां प्रचारान् प्रतिपाद्य सर्वार्थाधिकारिणः समाहर्तुः प्रतिपाद्यत इति । ननु समाहर्तृसमुदयप्रस्थापनमित्यस्मिन् सूत्रे तत्प्रकारस्याभिहितत्वात् नारब्धव्यमिदं सूत्रमिति चेत् उच्यते, तत्र हि क्रमप्राप्ते कोशप्रकृतिप्रतिपादने सन्निधातृनिचयकर्मान्तरं निचेतव्यस्य समुदयस्य प्रस्थापनं समाहर्तृकार्यमिति तावन्मात्रं प्रतिपादितम् । सर्वसमुदयानां उत्पत्तिक्षेत्रभूतस्य जनपदस्य चिन्ताप्रकारः तत्सहायाश्च नोक्ता इति तत्प्रतिपादनार्थमिदम् आरभ्यते । तदाह-समाहर्तेत्यादि, स जनपदं तदन्तर्गतानि दुर्गाद्यायस्थानानि चतुर्धा विभज्य चतुरोऽशान् कृत्वा तेष्वंशेषु प्रत्येकं ज्येष्ठमध्यमकनिष्ठविभागेषु नकुलसङ्ख्ययान्वाहसारतया च ग्रामाणां ज्येष्ठादिविभागं कृत्वा ग्रामाग्रं ग्रामसङ्ख्यानियमे इदमेतावदिति ग्रामादिषु सर्वेषु योजनीयम्, इदमिति स्वरूपनिर्देशः । एतावदिति परिमाणनिर्देशः । तच्च परिमाणमेकैकस्य ग्रामस्य ग्रामसमुदायस्य च भवति । एवं ग्रामाग्रं निबन्धयेत् लेखयेत् । तथा परिहारकमिति, ग्रामशब्दोऽपि परिहारकादिभिः सम्बन्धनीयः चकारश्चाऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः । एतदुक्तं भवति । परिहारकंप्रवृत्तपरिहारकं च ग्रामाग्रमिदमेतावदिति न [1]लङ्घयेत् । परिहारो देयमोक्षः । तथा आयुधीयं दण्डकरम् । तथा धान्यपशुहिरण्यकुप्यविष्टिप्रतिकरमिति, धान्यादयः प्रतीताः, प्रतिकरः प्रत्येकं धान्यादिभिः सम्बद्धयते, प्रत्येकं नियतः करो प्रतिकरो राजदेयः, तत्र धान्यप्रतिकरं धान्यभोगम्, तद्द्वयं पशुप्रतिकरं हिरण्यप्रतिकरं (कुप्य)विष्टिप्रतिकरमिति धान्यादिष्वपीदमेतावदिति योजनीयम् । तद्यथा-अमुष्मिन् जनपदे चतुर्धा विभक्ते एतावद्भिरेको भागः, तत्रैकस्मिन् भागे एतावन्तो ग्रामाः, एतेष्वेत एव सन्त उत्तमाः, एतावन्तो मध्यमाः, एतावन्तोऽधमाः, तेष्वप्येतावन्तः परिहारकाः निवृत्तकराः, ते चैतावद्भिरायुधीयैरुपकुर्वन्ति, एत एतावन्तो धान्यप्रतिकराः, ते चैतानि चैतानि धान्यानि व्रीह्यादीन्येतावन्ति चैतावन्ति वार्षिकं प्रयच्छन्ति । एत एतावन्तः पशुप्रतिकराः पशुप्रतीकाराः ते चैतानेतान् दोहवाहनोपकारिणः पशून् प्रयच्छन्ति, एत एतावन्तो (हिरण्यप्रतिकराः) हिरण्यप्रतीकाराः, ते चैतदेतच्च हेम, रूप्यं जम्बूनदशातकुम्भादिकं वा हिरण्यं काशप्रवेश्यं वा चतुर्भागताम्रं रूप्यं रूपं कार्षापणं

---

१. निबन्धयेत्—पा० ।

[गोपसंज्ञकाधिकारिचिन्तनीयाः अंशाः, चिन्तनक्रमश्च]

तत्प्रदिष्टः पञ्चग्रामीं दशग्रामीं वा गोपश्चिन्तयेत्। सीमावरोधेन ग्रामाग्रं, कृष्टाकृष्टस्थलकेदारारामषण्डवाटवनवास्तुचैत्यदेवगृहसेतुबन्धश्मशानसत्रप्रपापुण्यस्थानविवीतपथिसङ्ख्यानेन क्षेत्राग्रं, तेन सीम्नां क्षेत्राणां च मर्यादारण्यपथिप्रमाणसम्प्रदानविक्रयानुग्रहपरिहारनिबन्धान् कारयेत्; गृहाणां च करदाकरदसङ्ख्यानेन; तेषु च एतावच्चातुर्वर्ण्यम् एतावन्तः कर्षकगोरक्षकवैदेहककारुकर्मकरदासाश्च, एतावच्च द्विपदचतुष्पदम्, इदं च हिरण्यविष्टिशुल्कदण्डं समुत्तिष्ठतीति कुलानां च स्त्रीपुरुषाणां बालवृद्धकर्मचरित्राजीवव्ययपरिमाणं विद्यात्।

प्रतिपदपञ्चिका

वा एतावदेतावच्च प्रयच्छन्ति। एत एतावन्तः (कुप्यप्रतिकराः) कुप्यप्रतीकाराः, ते चैतदेतच्च कुप्यद्रव्यमेतावदेतावच्च ददति, एत एतावन्तो विष्टिप्रतिकराः ते चैकैकैः एतावद्भिश्च दुर्गादिकर्मोपयोगिभिः पुरुषैरुपकुर्वन्ति।

श्रीमूला

इत्थं कृतनिबन्धस्य जनपदस्य चतुर्भागमेकैकः स्थानिकश्चिन्तयेदिति वक्ष्यति। चतुर्भागेऽपि ग्रामान् पञ्चशो दशशो वा विभज्य एकैकस्मिन् ग्रामविभागे स्थानिकनियम्यमवान्तरचिन्तकं गोपसंज्ञमेकैकं कुर्यादित्याह—तत्प्रदिष्ट इति। तेन समाहर्त्रा प्रदिष्टो नियुक्तः पुरुषः, पञ्चग्रामीं दशग्रामीं वा ग्रामाणामुत्तमत्वे तत्पञ्चकम् अधमत्वे तद्दशकम् अर्थान्मध्यमत्वे तत्षट्कादिकं च यथोचितं गोपश्चिन्तयेत् गोपसंज्ञः सन् चिन्तयेत्। यश्चिन्तयति स गोपसंज्ञयोच्यत इत्यर्थः।

कथं चिन्तयेदित्याह—सीमावरोधेनेति। नदीशैलादिसीमपरिच्छेदेन, ग्रामाग्रं ग्रामपरिमाणं, कारयेत् निबन्धयेत्। कृष्टाकृष्टाद्यष्टादशसङ्ख्यानेन, क्षेत्राग्रं क्षेत्रपरिमाणं, कारयेत् एतावत् कृष्टमेतावदकृष्टमित्येवं कृष्टादिक्षेत्रं परिच्छिद्य निबन्धयेत्। तत्र कृष्टं कृष्टपच्यव्रीह्याद्युत्पत्तिक्षेत्रम्, अकृष्टम् अकृष्टपच्यनीवाराद्युत्पत्तिक्षेत्रं, स्थलम् उज्जटदेशः, केदारः शालेयादिक्षेत्रम्, आरामः उपवनं, षण्डः कदल्यादिक्षेत्रं, वाटः इक्ष्वादिभूमिः, वनं ग्रामवास्युपजीव्यवृक्षवृन्दस्थानं, वास्तु ग्रामभूमिः, चैत्यः उद्देशवृक्षः, देवगृहादित्रयं प्रसिद्धं, सत्रम् अन्नदानशाला, प्रपा पानीयशाला, पुण्यस्थानं तीर्थादि, विवीतं गोप्रचारप्रदेशः, पन्थाः रथशकटपद्गगतागतमार्गः। तेनेति। तेन सङ्ख्यानेन, सीम्नां नदीशैलादीनां, क्षेत्राणां च, मर्यादादिनिबन्धान् कारयेत्। तत्र मर्यादा परस्परावधिः, अरण्यमनुपजीव्यवनं, पन्थाः कृष्टादिपरस्परप्रवेशनिर्गममार्गः, प्रमाणं स्वस्वपरिमाणं, सम्प्रदानम् अमुकेनामुकस्य दत्तमितीदृशं, विक्रयः प्रसिद्धः, अनुग्रहः धान्याद्यृणदानेन

श्रीमूला

कर्षकाणामुपकारः, परिहारः करमोक्षः। गृहाणां च करदाकरदसङ्ख्यानेन, निवन्धान् कारयेदिति वर्तते। एतावन्ति गृहाणि करदायकैर्जनैरध्युषितानि एतावन्ति चाकरदायकैरित्येवं सङ्ख्याय पुस्तकेषु लेखयेत्।

तेषु चेति। तेषु च गृहेषु, एतावत् चातुर्वर्ण्यम्, एतावन्तोऽमुकामुकवर्णभवा जनाः, एतावन्तः कर्षकादयः षड्वर्गाश्च, एतावच्च द्विपदचतुष्पदमिदं च पिण्डेनैतावन्तो मनुष्याश्च पशवश्चैते, वसन्तीति सर्वत्र शेषः। इदं च हिरण्यविष्टिशुल्कदण्डं हिरण्यं स्वर्णरूप्यादि, विष्टिः कर्मकरः, शुल्कः पट्टदेयं, दण्डः सैन्यः इत्येतच्चतुष्टयं वार्षिकं, समुत्तिष्ठति उत्पद्यते राजार्थम्, इति अनेन प्रकारेण, निवन्धान् कारयेदिति वर्तते।

कुलानामिति। कुलानां च स्त्रीपुरुषाणां कुटुम्वसम्वन्धिनां च स्त्रीणां पुरुषाणां च, वालादिपरिमाणं वालवृद्धिपरिमाणम् एतावद्वयस्काः स्त्रियः पुरुषाश्चेत्येवं वयःपरिच्छेदं कर्माणि वर्णजातिप्रसिद्धानि तत्परिमाणं चरित्रं देशजात्याद्याचारस्तत्परिमाणम् आजीवो वृत्तिः अर्थात् तन्निमित्त आयस्तत्परिमाणं व्ययः कुटुम्वभरणार्थधनविनियोगस्तत्परिमाणं च, विद्यात्, गोपः।

प्रतिपदपञ्चिका

एवं स्वकारणिकैः पिण्डेन कृतनिवन्धस्य जनपदस्य गोपस्थानिकैर्विभज्य चिन्तामाह, तत्रापि प्रथमं गोपस्वरुपं तच्चिन्तनप्रकारं चाह-तत्प्रदिष्ट इत्यादि। तेन-समाहर्त्रा प्रदिष्टो नियुक्तो यः पञ्चग्रामीं दशग्रामीं वा चिन्तयति तस्य गोप इति संज्ञा। तत्र (तु) पञ्चग्रामीं दशग्रामीमिति सर्वोत्तमसर्वनिकृष्टग्रामसङ्ख्यानिर्देशान्मध्यमानां तारतम्यापेक्षया षडादिसङ्ख्या कल्पनीया। तेन गोप इति उत्तमग्रामाणां पञ्चकं मध्यमानां षट्कं सप्तकमष्टकं नवकं वा, अधमानां दशकं वा चिन्तयेत् निरूपयेत् यथा परिदृष्टं निवन्धयेच्च। कथमित्याह-सीमावरोधेन नदीशैलवृक्षादिभिर्यथोक्ताभिः सीमाभिरवरुध्य अवच्छिद्य ग्रामाग्रं ग्रामपरिमाणं निवन्धयेत्। तथा कृष्टादिसङ्ख्यानेन क्षेत्राग्रं क्षेत्रपरिमाणं निवन्धयेत्। तत्र कृष्टं कृष्टपच्यानां व्रीह्यादिसस्यानां भवनं क्षेत्रम्, अकृष्टं अकृष्टपच्यानां नीवारादीनां स्थलम्, जाङ्गलं, केदारं शाल्यादिक्षेत्रं, खण्डः पूगकदल्यादिक्षेत्रम्, वनं ग्रामवासिनामुपजीव्यवृक्षादिस्थानं, वह्लसोमारण्यं च पाटेक्ष्वादिक्षेत्रम्, वास्तुचैत्यदेवग्रहसेतुवन्धश्मशानानि प्रतीतानि। तत्र सेतुवन्धशब्देन कूपकुल्यादयोऽपि गृह्यन्ते। सत्रं भक्तदानस्थानम्, प्रपा पानीयस्थानम्, पुण्यस्थानं तीर्थाश्रमदेवायतनादि, विवीतः प्रतीतः, पन्थानो महासार्थपथाः, एवमेतेषां कृष्टादीनां सङ्ख्यानेन इदमेतावदिति सङ्ख्याय क्षेत्राग्रं ग्रामसीमान्तर्गतक्षेत्रपरिमाणं निवन्धयेत्।

तद्यथा, अमुष्या नद्या उत्तरतोऽमुष्माच्छैलाद्दक्षिणतोऽमुष्या कृष्टेः पश्चिमतोऽमुष्या नद्याः पूर्वतश्च निविष्टोऽसावमुकनामा ग्रामः, असौ च पिण्डेनैतावत् क्षेत्रमिति पूर्वं निबद्धय पुनरस्मिन्नेतावत् अकृष्टमित्यादि सङ्ख्याय वन्धयेदिति। तैनेति सर्वनाम्ना

[स्थानिकेन चिन्तनीयाः अंशाः, प्रजानां गोपस्थानिकविधेयीकरणावश्यकता च]

एवं च जनपदचतुर्भागं स्थानिकः चिन्तयेत् । गोपस्थानिकस्थानेषु प्रदेष्टारः कार्यकरणं बलिप्रग्रहं च कुर्युः ।

प्रतिपदपञ्चिका

मासान्निष्कृष्य सङ्ख्यानं परामृश्यते । सीम्नां क्षेत्राणां च मर्यादानिबन्धः सङ्ख्यानेन कारयेत् । तत्र सीमानः नदीशैलादयः, क्षेत्राणि कृष्टादीनि, तेषां मर्यादाः अन्योन्याऽवधयः । अरण्यं ग्रामीणैरनुपजीव्यं वनम्, पन्थानः कृष्टादीनाम् अन्योन्यप्रवेशनिर्गममार्गाः, प्रमाणानि प्रत्येकपरिमाणानि, सम्प्रदानं यैर्यैर्येभ्यो यादृशानि दत्तानि, विक्रयः प्रतीतः । तद्यथा, इदं क्षेत्रं अमुनाऽमुष्मादित्थं प्रतिगृहीतं क्रीतं वेति, अनुग्रहपरिहारौ प्रागुक्तौ, अनुग्रहः परिहारश्च ऊह्यः, कोशवृद्धिकारी दद्यादिति । एवमेतेषां मर्यादादीनां सीमाक्षेत्रसम्बन्धिनां यथासम्भवं निबद्धं सङ्ख्यानेन कारयेदिति । गृहाणां च ग्रामान्तर्गतानां करदाकरदसङ्ख्यानेन निबद्धं कारयेदिति वर्तते । गृहशब्देन एतावन्ति गृहाणि करदानि, एतेषु प्रतिगृहं निवासिजनेनैतावद्देयम्, एतेषु च न किञ्चिद् देयमिति ।

तेषु च गृहेषु, एतावच्चातुर्वर्ण्यमिति, ब्राह्मणादयो वर्णाश्चातुर्वर्ण्यमिति, तद्ग्रहणं मन्त्रप्रभावाणामप्युपलक्षणार्थम्, कर्मकरो भृतकः, दासो गृहदासादिः, द्विपादो मनुष्यः, चतुष्पादाः, पशवः, शेषाः प्रतीताः । एतानपि पृथक् सङ्ख्याय निबन्धयेदिति । इदं च हिरण्यादिकमेषु गृहेषु समुत्तिष्ठति राज्ञ उत्पद्यत इति निबन्धयेदिति । हिरण्यादयः कृतव्याख्याः ।

किञ्च, कुलानां कुटुम्बानां स्त्रीपुरुषादिपरिमाणं च गोपो विद्यात् । तत्र स्त्र्यादयः प्रतीताः । कर्माणि जात्युक्तानि अध्ययनादीनि, चरित्रं देशजातिकुलप्रबन्धः, आचारः आजीवः प्रत्युपायः, आयः अर्थोत्पत्तिः, व्ययः कुटुम्बभरणाद्यर्थः, एवमेतेषां स्त्रीपुरुषादीनां, परिमाणमियत्तां गोपो विद्यात् इति ।

श्रीमूला

एवञ्चेति । अनेन प्रकारेण जनपदचतुर्भागं, स्थानिकः स्थानिकपदव्यपदेश्यश्चतुर्भागनायकः, चिन्तयेत् ।

गोपेत्यादि । गोपस्थानिकस्थानेषु गोपानां स्थानिकानां च स्वव्यापारानुष्ठानप्रदेशेषु, प्रदेष्टारः कण्टकशोधनाधिकारिणः, कार्यकरणं कण्टकोद्धरणलक्षणकार्यानुष्ठानं, बलिप्रग्रहं च बलीनां गोपस्थानिकनिबन्धारूढानां राजार्थानां प्रसभग्रहणं च अर्थात् स्वयमदायकेभ्यः, अथवा बलिप्रग्रहं बलिनां राष्ट्रमुख्यानां राजार्थोत्थापनविघ्नकारिणां प्रग्रहं गोपस्थानिकविधेयास्ते यथा स्युस्तथा दमनम्, कुर्युः ।

इति समाहर्तृप्रचारः समाप्तः ॥

गृहपतिवैदेहकतापसव्यञ्जनप्रणिधयश्च ।

चाणक्यटीका

एवं जनपदचतुर्भागं स्थानिकश्चिन्तयेत् । यथा गोपाः पञ्चग्रामीं दशग्रामीं वा तथा जनपदचतुर्भागं चत्वारोऽध्यक्षाः स्थानिकसंज्ञाः समाहर्तृप्रयुक्ताश्चिन्तयेयुः ।

गोपस्थानिकप्रचारेषु प्रदेष्टारः कण्टकशोधनोक्ताः कारणिकाः सहायत्वेन नियुक्ताः कार्यस्य यथोक्तस्यानुष्ठानम्, आयानां ग्रहणं च कुर्युरिति ।

॥ इति समाहर्तृप्रचारः, षट्त्रिंशं (? चतुःपञ्चाशं) प्रकरणम् ॥

प्रतिपदपञ्चिका

गोपस्थानिकस्थानेष्विति । गोपस्थानिकाश्च यत्र यत्र स्थित्वा स्वाधिकारं चिन्तयन्ति, तत्र स्थिताः प्रदेष्टारः कण्टकशोधनाधिकृताः, कार्यकरणं तत्रत्यानां कण्टकानामुद्धरणम्, बलिप्रग्रहं गोपस्थानिकनिबद्धानां राजभाग्यानां समुदयानां प्रग्रहं स्वयमप्रयच्छद्भ्यः प्रसह्य उपादानम्, अथवा बलिनां बलवतां ग्रामराष्ट्रमुख्यानां प्रग्रहं नियमनं गोपस्थानिकवशे स्थापनम्, वाशब्दश्चार्थे, एतत् सर्वं प्रकुर्युरिति ।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायाम् अध्यक्ष-
प्रचारिके द्वितीयेऽधिकरणे समाहर्तृप्रचारः इति प्रकरणम् ।

श्रीमूला

गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधय इति सूत्रम् । गृहपतिकव्यञ्जन वैदेहकव्यञ्जनास्तापसव्यञ्जनाश्च संस्थाविशेषाः गूढपुरुषोत्पत्तिप्रकरणोक्ताः, प्रणिधयः गूढपुरुषाः लक्षणया तेषां प्रणिधानानि ग्रामेषु जनपदेषु च नियोजनानि अभिधीयन्त इति सूत्रार्थः । गृहपतिकवैदेहकतापसव्यञ्जनप्रणिधय इति समस्तपाठे गृहपति-व्यञ्जनादीनां त्रयाणां संस्थाविशेषाणां प्रणिधयः प्रणिधानानि नियोजनानीति स्पष्ट एवार्थः । संस्थापञ्चके तिसृणां प्राधान्याद् ग्रहणमन्ययोरप्यभ्युपायत्वाविशेषा-दुपलक्षणम् । तेन कार्पटिकोदास्थितसंस्थयोरपि प्रणिधानं सङ्गृहीतं द्रष्टव्यम् । संस्था-प्रणिधानं च ग्रामजनपदवृत्तान्तज्ञानस्य गोपस्थानिकप्रचारपरीक्षणस्य च समाहर्त्री-वश्यापेक्षणीयस्याभ्युपायभूतं समाहर्तृप्रचारस्वाङ्गमिति तस्येहाभिधानसङ्गतिः ।

चाणक्यटीका

समाहर्तृप्रचारपूर्वकाः गृहपतिवैदेहकतापसव्यञ्जना (नां ? :, तेषां) व्यवहारा उच्यन्ते ।

प्रतिपदपञ्चिका

गृहपतिकवैदेहकतापसव्यञ्जनाःप्रणिधय इति सूत्रम् । व्यञ्जनशब्दः प्रत्येकम्, गृहपतिकव्यञ्जनो वैदेहकव्यञ्जनस्तापसव्यञ्जनश्च संस्थाविशेषा गूढपुरुषोत्पत्ताव-

[गृहपतिकव्यञ्जनैर्ज्ञेया: अंशाः]

समाहर्तृप्रदिष्टाश्च गृहपतिकव्यञ्जनाः येषु ग्रामेषु प्रणिहिताः, तेषां ग्रामाणां क्षेत्रगृहकुलाग्रं विद्युः; मानसञ्जाताभ्यां क्षेत्राणि, भोगपरिहाराभ्यां गृहाणि, वर्णकर्मभ्यां कुलानि च। तेषां जङ्घाग्रामायव्ययौ च विद्युः। प्रस्थितागतानां च प्रवासावासकारणम्, अनर्थ्यानां च स्त्रीपुरुषाणां चारप्रचारं च विद्युः।

प्रतिपदपञ्चिका

भिहिताः। तेषां प्रणिधिं प्रणिधानं व्यञ्जनपदे, ग्रामादिषु नियोजनमिति सूत्रार्थः। प्रणिधय इति बहुवचननिर्देशः कापटिकादीनामपि प्रणिधानस्योपसङ्ग्रहार्थः।

तथा च वक्ष्यति—

"चिन्तयेयुश्च संस्थास्ता संस्थाश्चान्यास्वयोनय ॥" इति।

यद्येवं संस्थाप्रणिधिरित्येव वक्तव्यम्, किमर्थं त्रयाणामुपादानमिति चेत्सत्यम्, समाहर्तृकार्योपयोगिनि जनपदवृत्तान्तज्ञाने तेषां प्राधान्यात् स्वरूपतोऽथवा समाहर्तृप्रचारे महतो जनपदस्यैकेन समाहर्त्रा चिन्तयितुमशक्यत्वात्। गोपस्थानिकैर्विभज्य चिन्तनमुक्तम्, ते हि कर्मसु परीक्षणीया एव, उक्तं हि "कर्मसु चैषां नित्यं परीक्षां कारयेत्, चित्तानित्यत्वान्मनुष्याणाम्। अश्वसधर्माणो हि मनुष्या नियुक्ताः कर्मसु विकुर्वत" इति। अपसर्पाधिष्ठितं च प्रचारमिति च, तस्मात्तत्प्रचारपरीक्षार्थं समाहर्तृप्रचारशेषभूम्योरेतदन्तरमिदमभिधीयत इति सम्बन्धः।

श्रीमूला

तत्र गृहपतिव्यञ्जनप्रणिधानं तावदाह—समाहर्तृप्रदिष्टाश्चेति। समाहर्त्रा नियुक्ताः, गृहपतिकव्यञ्जनाः, येषु ग्रामेषु, प्रणिहिताः नियोजिताः, तेषां ग्रामाणां, क्षेत्रगृहकुलाग्रं क्षेत्रसङ्ख्यां गृहसङ्ख्यां कुलसङ्ख्यां च, विद्युः। कानि कानि कथं विद्युरित्याह—मानसञ्जाताभ्यां क्षेत्राणीति। मानेन यामविस्तारादिपरिच्छेदेन उत्पन्नसस्यपिण्डेन च क्षेत्राग्रं विद्युः। भोगपरिहाराभ्यां गृहाणि करकरमोक्षाभ्यां गृहवास्तव्यान्, विद्युः। वर्णकर्मभ्यां कुलानि च ब्राह्मणादिजात्या तथा यजनकृष्यादिकर्मणा कुटुम्बानि च विद्युः। तेषामिति। कुलानां जङ्घाग्रं, जङ्घाशब्देन पादचारिणो लक्ष्यन्ते। कुलसम्बन्धिनां पादचारिणां द्विपदचतुष्पदानामग्रम् इयत्ताम्, आयव्ययौ च धनोत्पत्तिविनियोगौ च, विद्युः। प्रस्थितेत्यादि। प्रस्थितागतानामिति व्यस्तसमस्तविपर्यस्तग्रहणं प्रस्थितानां निजाधिवासस्थलादन्यत्र वस्तुं गच्छताम्, आगतानां वस्तुमन्यप्रदेशादागतानां, प्रस्थितागतानां वस्तुमन्यत्र गत्वा पुनः प्रत्यागतानाम्, आगतप्रस्थितानां क्वचिद् वस्तुमागत्य ततोऽन्यत्र वस्तुं प्रस्थितानां चेत्यर्थः। प्रवासावासकारणं प्रवासे अध्युष्यमाणस्थलवासपरित्यागे आवासे तदन्यस्थलवास-

[वैदेहकव्यञ्जनैः ज्ञातव्याः अंशाः]

एवं वैदेहकव्यञ्जनाः स्वभूमिजानां राजपण्यानां खनिसेतुवनकर्मान्त-

श्रीमूला

परिग्रहे च कारणं, विद्युः। अनर्थ्यानां च स्त्रीपुरुषाणां अनाशंसनीयानां नर्तकीवन्धक्यादीनां स्त्रीणां विटकितवादीनाम् पुरुषाणां च प्रवासावासकारणं विद्युः। चारप्रचारं च परप्रयुक्तापसर्पप्रवृत्तिं च, विद्यु :।

चाणक्यटीका

गृहपतिकव्यञ्जनाश्चेत् क्षेत्रकुलाग्रं विद्युः। कथमिति, यदि (ए)तावत् प्रमाणम् एतावत् फलमिति मानसञ्ज्ञाताभ्यां क्षेत्राणि। एतावन्ति भुज्यन्ते एतावन्ति परिहा(रा ? री)णीति भोगपरिहाराभ्यां गृहाणि। एतावन्तो ब्राह्मणाः क्षत्रिया वा इतिं जात्या, एतावन्तः कर्षका इति कर्मणा कुलानि। तथा तेषामेव कुलानामाश्रयस्य एतावन्तः पुरुषा इति, अस्य अयमायो व्यय इति च विद्युः। प्रस्थितागतानां स्त्रीपुरुषाणां निर्गतकारणं प्रविष्टानां प्रविष्टकारणम्, तेषां चारादिति। तथा आनर्थ्यानां गतागतं कः केन संसृज्यत इति समाहर्त्रे निवेदयितुं विद्युः॥

प्रतिपदपञ्चिका

तदाह—समाहर्तृप्रदिष्टाश्चेत्यादि, समाहर्त्रा प्रदिष्टाः प्रयुक्ताः, गृहपतिकव्यञ्जना येषु ग्रामेषु प्रणिहिता नियुक्ताः, तेषां ग्रामाणां क्षेत्रकुलगृहाग्रं विद्युरिति क्षेत्रादीनां सङ्ख्या विद्युः। कथमित्याह—मानसञ्ज्ञाताभ्यां क्षेत्राणीति। मानेन क्षेत्राणाम् इयत्ता परिच्छेदेन तदुत्पन्नसस्यादिपिण्डेन क्षेत्राग्रं विद्युः। क्षेत्राणीति बहुवचनं प्रतिकुटुम्बं कृष्टादिविभेदेन विभज्य ज्ञानार्थम्। तथा भोगपरिहाराभ्यां गृहाणीति, करदाकरदसंख्यानेनेत्यर्थः, वर्णकर्माभ्यां कुलानीति, वर्णो जातिः, कर्म कृष्यादिकम्, ताभ्यां कुलानि कुटुम्बानि विद्युरिति। किञ्च तेषां कुलानां जङ्घाग्रमिति, जङ्घाशब्देन पादचारिणो मनुष्याः पशवश्च गृह्यन्ते। एतावद् द्विपदचतुष्पदमिति जानीयादित्यर्थः। आयव्ययौ च अर्थानामुत्पत्तिं व्ययं च विद्युरिति। किञ्च, प्रस्थितानागतानां च प्रवासावासकारणं विद्युरिति। गृहाद् गृहं ग्रामाद् ग्रामं राष्ट्राद् राष्ट्रं च प्रस्थितानागतानामिति। सङ्ख्याविगृहीतविपर्यस्तग्रहणं प्रस्थितानामागतानां प्रस्थितागतानाम् आगतप्रस्थितानां च। तत्र प्रस्थितानामेकत्र वसतामन्यत्र वस्तुं गच्छतामागतानाम् अन्यतस्तत्र वस्तुमागतानां प्रस्थितागतानां च प्रवासावासकारणमितीदमेषां प्रवासे स्थानान्तरगमने कारणमिदमिदमेषां स्थानान्तरादागत्य वासे कारणमिति च विद्युरिति। अनर्थानां च स्त्रीपुरुषाणां नटनर्तकादीनां वन्धक्यादीनामसत्स्त्रीणां पारदारिकाक्षधूर्तादिपुरुषाणां वा प्रवासावासकरणं विद्युरिति। चारप्रचारं च परप्रयुक्तानां चारपुरुषाणां च प्रचारं विद्युरिति।

श्रीमूला

वैदेहकव्यञ्जनप्रणिधानमाह—एवमिति। एवं यथा गृहपतिव्यञ्जनास्तथा

क्षेत्रजानां परिमाणम् अर्घं च विद्युः, परभूमिजातानां वारिस्थलपथोपयातानां सारफल्गुपण्यानां कर्मसु च। शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभागभक्त-पण्यागारप्रमाणं विद्युः।

श्रीमूला

वैदेहकव्यञ्जनाः, स्वभूमिजानां राजपण्यानां पण्याध्यक्षप्रतिपादितानां, खनिसेतुवन-कर्मान्तक्षेत्रजानां खनिजानां खन्यध्यक्षोक्तानां शङ्खवज्रादीनां सेतुजानां मत्स्यप्लवा-दीनां वनजानां कुप्याध्यक्षोक्तानां द्रव्यवनभवानां कर्मान्तजानां खातवप्रादिकर्मान्त-भूम्युत्पन्नानां क्षेत्रजानां व्रीह्यादीनां सीताध्यक्षोक्तानां च, परिमाणम् इयत्ताम्, अर्घं मूल्यं च, विद्युः। परभूमिजातानां देशान्तरजातानां, वारिस्थलपथोपयातानां साराणां रत्नादीनां फल्गूनां शाकादीनां च पण्यानां, कर्मसु च क्रयविक्रयादिषु च, परिमाणमर्घं च विद्युरिति वर्तते। तथा शुल्काद्यष्टकप्रमाणं शुल्कस्य शुल्काध्यक्षोक्तस्य वर्तन्या अन्तपालादेयस्य आतिवाहिकस्य सार्थातिवाहनार्थस्य विवीताध्यक्षग्राह्यस्य गुल्मदेयस्य रक्षिसङ्घदेयस्य तरदेयस्य नावध्यक्षदेयस्य भागस्य सहव्यवहारि-विभाज्यांशस्य भक्तस्य व्यवहर्तृपुरुषबलीवर्दादिभोजनव्ययस्य पण्यागारस्य पण्य-गृहभाटकादेश्च प्रमाणम् इयत्तां, विद्युः।

चाणक्यटीका

स्वभूमिजानामिति। राजभूम्युत्पन्नानाम् ख(नि)जाः शङ्खादयः। वनजाः शैलेयकमुस्तादयः। कर्मान्तजा वस्त्रादयः। क्षेत्रजाः शाल्यादयः। तेषां परिमाणमर्घं वाऽनुप्रथिश्य विद्युः। परभूमिजानां तु इयता व्यापारेणेदं निष्पादिततिति कर्म-प्रमाणम्। शेषं गतार्थम्।

प्रतिपदपञ्चिका

एवं गृहपतिकव्यञ्जनप्रणिधिमुक्त्वा वैदेहकव्यञ्जनप्रणिधिमाह—एवं वैदेहकव्यञ्जना इत्यादि, यथा गृहपतिकव्यञ्जना ग्रामाणां क्षेत्रकुलगृहादिकं विद्युः, एवं वैदेहकव्यञ्जना अपि स्वभूमिजानां विजिगीषुदेशानां राजपण्यानां पण्याध्यक्षोक्तानां खन्यादिषु पञ्चसूत्पन्नानाम्, तत्र खनिजानि खन्यध्यक्षोक्तानि शङ्खवज्रादीनि, एतच्चाकरजानामप्युपलक्षणार्थम्। सेतुजानि मत्स्यादीनि, उक्तं हि "मत्स्यप्लवहरित-पण्यानां सेतुषु राजस्वाम्यं गच्छेयुरि"ति। वनजानि द्रव्यवनोत्पन्नानि कुप्याध्यक्षो-क्तानि, कर्मान्तजानि निखातवप्रादिकर्मान्तजानि, क्षेत्रजानि सीताध्यक्षोक्तानि, एवमेतेषां परिमाणमियत्ताम् अर्घं मूल्यं च विद्युः।

तथा च परभूमिजानां देशान्तराद् वारिपथाभ्यामुपयातानां विजिगीषुदेशं प्राप्तानाम्, सारपण्यानां चन्दनादीनाम्, फल्गुपण्यानां वस्त्रधान्यलवणादीनाम्, तत्र सारफल्गुशब्देन श्रेष्ठकनिष्ठमात्रौ वरौ सर्वपण्योपलक्षणार्थौ। तेन रत्नादिशाकपर्यन्तं

[तापसव्यञ्जनैः तच्छिष्यैश्च ज्ञातव्याः अंशाः]

एवं समाहर्तृप्रदिष्टास्तापसव्यञ्जनाः कर्षकगोरक्षकवैदेहकानामध्यक्षाणां च शौचाशौचं विद्युः। पुराणचोरव्यञ्जनाश्चाऽन्तेवासिनः चैत्यचतुष्पथशून्यपदोदपाननदीनिपानतीर्थायतनाश्रमारण्यशैलवनगहनेषु स्तेनाऽमित्रप्रवीरपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनान्युपलभेरन् ।

———

प्रतिपदपञ्चिका

सर्वपण्यानां ग्रहणम्, तेषां कर्मसु क्रयविक्रयादिषु शुल्कादीनां प्रमाणं विद्युः। तत्र शुल्कं शुल्काध्यक्षोक्तम्, वर्तन्यन्तपालादेयम्, आतिवाहिकं सार्थातिवाहननिमित्तं विवीताध्यक्षदेयम्। उक्तं हि—"सार्थादतिवाह्यं गोरक्ष्यव्यवहारं च कारयेदि"ति। गुल्मदेयं चाराद्यादेयम्, तरदेयं नावध्यक्षादेयम्, भागकं दशभागादि राजभाव्यं सहव्यवहारिणां परस्परदेयभागं वा भक्तपरिचारकपुरुषबलीवर्दादिपरिव्ययम्, पण्यागारं प्राभृतादिकम्। एवमेतेषां प्रमाणं वैदेहकव्यञ्जना विद्युरिति। तथा तापसव्यञ्जना अपि कर्षकादीनां शौचाशौचं विद्युरिति यथासम्भवं योजनीयम्।

श्रीमूला

तापसव्यञ्जनप्रणिधानमाह—एवमिति। अनेन प्रकारेण, समाहर्तृप्रदिष्टाः समाहर्तृनियुक्ताः, तापसव्यञ्जनाः, कर्षकगोरक्षकवैदेहकानाम्, अध्यक्षाणां च गोपादीनां च, शौचाशौचं विद्युः। पुराणचोरव्यञ्जनाश्चेति। सन्धिच्छेदादिना परद्रव्यापहारिणश्चोराः ते चिराभ्यस्ततत्कर्माणः पुराणचोराः तद्व्यञ्जनास्तद्वेषाः, अन्तेवासिनः तापसव्यञ्जनशिष्याः, चैत्यादिष्वेकादशसु स्थानेषु, तत्र चैत्यं देवालयः चतुष्पथं शृङ्गाटकं शून्यपदं निर्जनस्थानम् उदपानः स्रोतःप्रापितावरुद्धजलो जलाधारः नदी प्रसिद्धा निपानम् उपकूपजलाशयः तीर्थायतनं पुण्योदकप्रदेशः आश्रमो मुनिगृहम् अरण्यं ब्रह्मसोमारण्यं शैलगहनवनगहने प्रसिद्धे। एतेषु स्थित्वेति शेषः। स्तेनामित्रप्रवीरपुरुषाणां च स्तेनानां चोराणाम् अमित्रपुरुषाणां शत्रुप्रयुक्तानां तीक्ष्णरसदादीनां प्रवीरपुरुषाणाम् अल्पनिमित्तपरमारणसाहसिकानां च; चकारादनर्थ्यस्त्रीपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनानि अमुष्मिन् देशे अमुष्मिन् काले प्रवेशः स्थितिर्निर्गमनमित्येतानि प्रयोजनं च उपलभेरन् जानीयुः।

चाणक्यटीका

एवं तापसव्यञ्जनाः समाहर्तृप्रयुक्ताः कर्षकादीनां शौचाशौचं विद्युः। पुराणचोरव्यञ्जनाश्चेति चोरादिविश्वासनार्थं वयं चोरा एव, इदानीमशक्ताः कर्तुं चौर्यमित्येवं ख्यापयन्तः।

[निगमनम्]

समाहर्ता जनपदं चिन्तयेदेवमुत्थितः ।
चिन्तयेयुश्च संस्थास्ताः संस्थाश्चान्याः स्वयोनयः ॥११८॥

इत्यध्यक्षचारे समाहर्तृप्रचारः, गृहपतिवैदेहकतापसव्यञ्जनप्रणिधयश्च,
पञ्चत्रिंशोऽध्यायः, आदितः षट्पञ्चाशः ।

प्रतिपदपञ्चिका

पुराणचोरव्यञ्जनाश्चान्तेवासिन इत्यादि । चोरास्तालोद्घाटनसन्धिच्छेदादिकुशलाः, ते बहुशः कृतकर्माणः पुराणचोराः, तद्व्यञ्जनास्तदुपकरणसङ्ग्रहणादिकारिणः, तद्व्यञ्जनं (स्तोमिभिः प्रतिसर्गार्थम् ?) स्तेनादयो हि पुराणचोराः अमित्रपुरुषाः, शत्रुप्रयुक्ताः तीक्ष्णादयः, प्रवीरपुरुषास्साहसिका ये द्यूतनिमित्तेऽपि वा कलहे परानात्मानं वा निर्व्यपेक्ष्यं व्यापादयन्ति इति । तेषां स्तेनादीनामनर्थस्त्रीपुरुषाणां च प्रागुक्तानां प्रवेशस्थाननिर्गमात् प्रयोजनं चोपलभेरन् । अनेन मार्गेणामुष्मिन् काले प्रविशन्ति, अत्र देशे अमुष्मिन् काले तिष्ठन्ति, अनेन मार्गेण काले चास्मिन् निर्गच्छन्ति, इदं चैषां प्रयोजनम्, इह सस्यमिति सर्वमेव जानीयुरिति ।

श्रीमूला

अध्यायान्ते श्लोकमाह—समाहर्तेति । एवम् उक्तेन प्रकारेण, उत्थित उद्युक्तः, समाहर्ता जनपदं चिन्तयेत्, अर्थाद् गोपस्थानिकसहायः । ताश्च संस्थाः समाहर्तृप्रदिष्टाः पूर्वोक्ताः गृहपतिकव्यञ्जनादयः संस्थाविशेषाः, जनपदं चिन्तयेयुः, चकाराद् गोपस्थानिकौ च । संस्थाश्च तांश्च तत्तद्व्यञ्जनयोनीन् संस्थाविशेषान्, अन्याः स्वयोनयः तत्तद्योनिसमानयोनयः संस्थाः, चिन्तयेयुः परीक्षेरन् । संस्थापरीक्षार्थस्य चेदं संस्थान्तरप्रणिधानस्य वचनं न तात्पर्यतो विध्यर्थं, किन्तु कर्मकराः प्रायोऽर्थलोभाद् राजार्थं वा ह्रापयन्ति प्रजा वा परिपीडयन्तीत्यवश्यं तत्कर्मशोधने समाहर्त्रा नित्यं प्रतिजागरितव्यमित्युपदेशार्थम् । तेन संस्थाचिन्तनाय संस्थान्तरकल्पने संस्थानवस्थाप्रसङ्ग इति न चोदनीयम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाऽधिकरणे
पञ्चत्रिंशोऽध्यायः, समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनाः
प्रणिधयश्च, आदितः षट्पञ्चाशः ॥

चाणक्यटीका

तत्संस्थाश्च अन्याः संस्थाः परप्रयुक्ताश्चिन्तयेयुः । यस्मादेतास्तासां समानयोनयो विश्वसनीया इत्यर्थः ॥

॥ इति गृहपतिकवैदेहकतापसव्यञ्जनप्रणिधयः, सप्तत्रिंशं (? पञ्चपञ्चाशं)प्रकरणम् ॥
॥ पञ्चत्रिंशश्चाध्यायः ॥

प्रतिपदपञ्चिका

अध्यायप्रान्ते प्रकरणद्वयशेषं श्लोकमाह—समाहर्तेत्यादि, एवं यथोक्तप्रकरण-द्वयानुष्ठानेन, उत्थितः नित्योद्युक्तः, समाहर्ता जनपदं चिन्तयेत्। स्वयं गोपस्थानी-कैस्संस्थाभिश्च चिन्तयेत्। चिन्तयेयुश्च संस्था इति, संस्थाश्च समाहर्तृप्रदिष्टा एवं चिन्तयेयुरिति, तेषामपि प्रचारमन्यैः तद्व्यञ्जनैस्सह समाहर्ता परीक्षयेदित्यर्थः। नन्वेवमनवस्था प्रसज्येत, सत्यमिदम्, अत्र विवक्षितमाचार्यस्यार्थस्य हि स्वादुत्वादर्था-धिकारिणां भक्षणमवश्यम्भावि दुर्ज्ञानञ्च भवति उक्तं हि—"यथा ह्यनास्वादयितुं शक्यमि"त्यादिना श्लोकत्रयेण, तेषां च भक्षणाद् राजार्थो जनपद उभयं वा पीड्येत। तत्र राजार्थपीडने स्वाम्यर्थपीडनात् नरकपातो दण्डश्चानन्तरः प्रजापीडने महानधर्मो राजदण्डः, ताभिरेकलोष्ठवधश्च, उभयपीडने च उभयं भवति। तस्मादुभयमपि यथा न किञ्चिदपि पीड्येत सर्वप्रकारम्, तथा समाहर्त्रा प्रयतितव्यमवहितेनेति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायामध्यक्ष-प्रचारिके द्वितीयेऽधिकरणे पञ्चत्रिंशोध्यायः।
आदितः षट्पञ्चाशोऽध्यायः॥

षट्पञ्चाशं प्रकरणम्

षट्त्रिंशोऽध्यायः ।

नागरिकप्रणिधिः ।

[नागरिकादिभिश्चिन्तनीया अंशाः]

समाहर्तृवन्नागरिको नगरं चिन्तयेत् । दशकुलीं गोपो विंशतिकुलीं चत्वारिंशत्कुलीं वा । स तस्यां स्त्रीपुरुषाणां जातिगोत्रनामकर्मभिः जङ्घाग्रं आयव्ययौ च विद्यात् । एवं दुर्गचतुर्भागं स्थानिकश्चिन्तयेत् ।

श्रीमूला

नागरिकप्रणिधिरिति सूत्रम् । नगरे स्थानीये नियुक्तो नागरिकः, तस्य प्रणिधिः प्रणिधानं व्यापारे नियोजनम् अभिधीयत इति सूत्रार्थः । सर्वसमुदयानां यथोक्तरूपाणां रक्षणीयत्वाद् तद्रक्षणस्य तदाश्रयस्थानरक्षणाधीनत्वात् स्थानीयस्य तदाश्रयस्थानत्वात् तद्रक्षणस्येहाभिधानसङ्गतिः ।

समाहर्तृवदिति । नागरिकः, नगरं स्थानीयं, समाहर्तृवत् चिन्तयेत् । यथा समाहर्ता जनपदं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत्, तथा स्थानीयं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत् । तत्र गोपस्य चिन्तनीयं विषयमाह— दशकुलीमिति । दशकुलीं दशकुलानि उत्तमानि, गोपः, चिन्तयेदिति सम्बध्यते । तथा विंशतिकुलीं विंशतिकुलानि मध्यमानि, चत्वारिंशत्कुलीं वा चत्वारिंशत्-कुलानि वाधमानि, चिन्तयेत् । स गोपः, तस्यां दशकुल्यां विंशतिकुल्यां चत्वा-रिंशत्कुल्यां वा स्वचिन्ताविषयभूतायां, स्त्रीपुरुषाणां स्त्रीणां पुरुषाणां च, जातिगोत्र-नामकर्मभिः, जङ्घाग्रं जङ्घाशब्देन पादचारिजनो लक्ष्यते, तेन जनसङ्ख्यामित्यर्थः, आयव्ययौ च, विद्यात् ।

स्थानिकस्य चिन्तनीयमाह—एवमिति । एवं यथा गोपो दशकुलीप्रभृति तद्गत-स्त्रीपुरुषजङ्घाग्रायव्ययज्ञानपूर्वं चिन्तयेत्, तद्वत् दुर्गचतुर्भागं स्थानिकः चिन्तयेद्, दुर्गचतुर्भागगतस्त्रीपुरुषजङ्घाग्रायव्ययज्ञानपूर्वं तन्त्रयेत्, दुर्गचतुर्भागचिन्तकश्चायं स्थानिकाख्यः ।

चाणक्यटीका

यथा समाहर्त्ता चतुर्धा विभज्य जनपदं चिन्तयेत्, तथा समाहर्तृवन्नागरिको नगरनियुक्तः नगरं चिन्तयेत् । समाहर्तृप्रयुक्त एव । तत्र कनिष्ठादिनाम(चिदि ?-

[धर्मकर्तृप्रभृतिकर्तव्येषु नगररक्षकनिवेदनेन कर्तव्याः
स्वप्रामाण्येन कर्तव्याश्चांशाः]

धर्मावसथिनः पाखण्डपथिकानावेद्य वासयेयुः, स्वप्रत्ययाश्च तपस्विनः श्रोत्रियांश्च; कारुशिल्पिनः स्वकर्मस्थानेषु स्वजनं वासयेयुः, वैदेहकाश्चान्योन्यं स्वकर्म थानेषु। पण्यानाम् अदेशकालविक्रेतारम् अस्वकरणं च निवेदयेयुः। शौण्डिकपाक्वमांसिकौदनिकरूपाजीवाः परिज्ञातमावासयेयुः।

चाणक्यटीका

भिरि)ह कुलविभागमाह—दशकुलीमिति। स गोपः, तस्यां दशकुल्यां स्त्रीपुरुषाणां जात्याद्युपनिबन्धैः जङ्घाग्रायादि विद्यात्।

दुर्गचतुर्भागं स्थानिको नागरिकप्रयुक्तः एकैकश्चिन्तयेत्।

प्रतिपदपञ्चिका

नागरिकप्रणिधिरिति सूत्रम्। नगरं स्थानीयम्, तत्र नियुक्तो नागरिकः, तस्य प्रणिधिः तद्व्यापारानुष्ठानम्, तदिहाभिधीयत इति सूत्रार्थः।

सम्बन्धस्तु उद्देशनिर्देशतोऽथवा समस्तैरध्यक्षैस्सर्वसमुदयानामुत्पत्तिः प्रतिपादिता। उत्पन्नानां समुदयानां राज्ञश्च स्थानीयमाश्रयः। उक्तं हि—"जनपदमध्ये समुदयस्थानं स्थानीयं निवेशयेदि"ति। रक्षितं हि तत्तेषां आश्रयो भवतीति समुदयप्रतिपादनानन्तरं तदाश्रयभूतस्य स्थानीयस्य रक्षणमभिधीयत इत्ययं सम्बन्धः।

तदाह—समाहर्तृवन्नागरिको नगरं चिन्तयेदिति। यथा समाहर्ता जनपदं चतुर्धा विभज्य स्वयं गोपस्थानीयैश्च चिन्तयेदिति। तत्र गोपस्य चिन्त्यकुलसङ्ख्यानियमं तच्चिन्तनप्रकारं चाह—दशकुलीं गोपो विंशतिकुलीं चत्वारिंशत्कुलीं वेति। सर्वोत्तमानि दशकुलानि, सर्वनिकृष्टानि चत्वारिंशत्कुलानि, विंशतिग्रहणस्य प्रदर्शितार्थत्वात्, मध्यमानि सारापेक्षया विंशतिं पञ्चदश पञ्चविंशतिमित्यादि नागरिकप्रदिष्टोऽयं चिन्तयति तस्य गोप इति संज्ञा। विषयश्च तस्य तावन्ति कुलानि।

चिन्ताप्रकारमाह—स तस्या इत्यादि। स गोपः तस्या दशकुल्यादिकायाः स्त्रीपुरुषाणां स्त्रीप्रधानानां गणिकानाट(? नटो)कशौण्डिकादिकुलानां पुरुषप्रधानानां च वणिक्कारुकर्मकरप्रभृतिकुलानाम्, प्रत्येकं जात्यादिभिः जङ्घाग्रं मनुष्यसङ्ख्यामायव्ययौ च विद्यात्। जात्यादयः प्रतीताः। एवं दुर्गचतुर्भागं स्थानिकः चिन्तयेत्। इति यथा गोपो दशकुलीप्रभृतीनां जङ्घाग्रमायव्ययौ च विद्यादेवं स्थानिकोऽपि दुर्गचतुर्भागस्य स्त्रीपुरुषाणां जात्यादिभिः जङ्घाग्रामायव्ययौ च विद्यादिति। तस्य दुर्गचतुर्भागचिन्तकस्य स्थानिक इति संज्ञा।

श्रीमूला

धर्मावसथिन इति। धर्मावसथाः धर्मशालाः तदधिकारिणो धर्मावसथिनः, पाषण्डपथिकान् पाशुपतशाक्यभिक्षुकादीन् अध्वगान्, आवेद्य गोपाय निवेद्य, वासयेयुः

अतिव्ययकर्तारम् अत्याहितकर्माणं च निवेदयेयुः । चिकित्सकः प्रच्छन्नव्रण-प्रतीकारकारयितारम् अपथ्यकारिणं च गृहस्वामी च निवेद्य गोपस्थानिक-योर्मुच्यते, अन्यथा तुल्यदोषः स्यात् । प्रस्थितागतौ च निवेदयेत्, अन्यथा रात्रिदोषं भजेत । क्षेमरात्रिषु त्रिपणं दद्यात् ।

श्रीमूला

धर्मावसथेषु । स्वप्रत्ययाश्च स्वकृतः स्वयं विचार्य कृतः प्रत्ययः तपस्विश्रोत्रियविश्वासो येषां ते तथाभूताः सन्तः, तपस्विनस्तापसान्, श्रोत्रियान् छान्दसांश्च, वासयेयुरिति वर्तते । स्वप्रत्ययत्ववचनं तद्वासनिमित्तस्य दोषस्य स्वगामित्वद्योतनार्थम् ।

कारुशिल्पिन इति । कारवः शिल्पिनश्च, स्वकर्मस्थानेषु स्वजनं, वासयेयुः, स्वप्रत्ययाः । वैदेहकाश्च वणिजश्च, स्वप्रत्ययाः, अन्योन्यं स्वकर्मस्थानेषु तत्पण्यवणिक् तत्पण्यवणिजमिति न्यायमनपहाय पण्यव्यवहारस्थानेषु, वासयेयुः । पण्यानाम्, अदेशकालविक्रेतारम् अदेशे अकाले च विक्रयकर्त्तारम् आगन्तुकं, निवेदयेयुः, नागरिकाय । अस्वकरणं च अस्वीयस्य पण्यस्य व्यवहरणं च, निवेदयेयुः ।

शौण्डिकेत्यादि । शौण्डिकाः मद्यविक्रयिणः पाक्वमांसिकाः पक्वमांसविक्रयिणः औदनिका अन्नविक्रयिणः रूपाजीवाः वेश्याश्च, परिज्ञातं समानशीलादिद्वारेण विदितम्, आवासयेयुः । पुनः किं कुर्युः, अतिव्ययकर्त्तारम्, अतिव्ययस्य विज्ञातायत्यभ्यधिकस्या-विज्ञातायतिकस्य वा व्ययस्य कर्त्तारम्, अत्याहितकर्माणं च अतिमात्रारब्धमद्यपानादि-कर्माणं च निवेदयेयुः, गोपस्थानिकेभ्यः ।

चिकित्सक इति । भिषक्, प्रच्छन्नव्रणप्रतीकारकारयितारं प्रच्छन्नं स्वकृतापरा-धोद्भेदभयादन्याविदितं यथा भवति तथा व्रणानां शस्त्राद्युत्पादितानां प्रतीकारस्य चिकित्सायाः कारयितारम्, अपथ्यकारिणं च अपथ्यानि रोगमरणोत्पादकानि द्रव्याणि करोति सम्पादयत्यन्विष्यति वेत्यपथ्यकारी तं च, निवेद्य गोपस्थानिकयोः, मुच्येत शुध्येत् । अन्यथा अनिवेदने, तुल्यदोषः स्याद् अपराधिभ्यां समानदोषो गण्येतेत्यर्थः । तथा गृहस्वामी च यस्मिन् गृहे व्रणप्रतीकारयित्रपथ्यकारिणोरनुष्ठानं तद्गृहपतिश्च, निवेद्य गोपस्थानिकयोर्मुच्येतान्यथा तुल्यदोषः स्यात् ।

प्रस्थितागतौ चेति । प्रस्थितः स्वगृहात् कार्यान्तरेण देशान्तरं प्रस्थितः आगतः देशान्तरात् कार्यान्तरेण स्वगृहं प्राप्तः तौ च, निवेदयेत् प्रस्थानागमनकाल-प्रयोजनाद्याख्यानपूर्वमावेदयेत्, अर्थाद् गृहस्वामी । अन्यथा निवेदनाभावे, रात्रिदोषं भजेत रात्रौ ताभ्यां कृतस्य चौर्यादिलक्षणस्य दोषस्य भागी भवेत् । क्षेमरात्रिषु क्षेम-युक्तासु अनुपजातचौर्यासु अनिवेदनरात्रिषु, त्रिपणं पणत्रयात्मकमनिवेदनापराधदण्डं, दद्यात् । क्षेमेऽपि दण्डविधानं निवेदनानुष्ठानस्य कदाप्यव्यभिचारार्थम् ।

चाणक्यटीका

धर्मावसथिन इति। धर्मार्थं कृतपरिग्रहा(र्थानां ? :)पाषण्डान् निवेद्य गोपस्थानिकेभ्यः वासयेयुः। स्वयं तपस्विनोऽनिवेद्य वासयेयुः।

कारवः शिल्पिनश्च स्वकर्मस्थानेषु कर्मशालासु न गृहेषु। स्वजनं नान्यमागन्तुकं वासयेयुः। वैदेहकाश्चाऽन्योऽन्यं स्वकर्म(स्थानेषु।)......(सविकारमाह ?) आपणादन्यत्र रात्रौ (वा) विक्रेतारम्। (अनु)युक्तश्च (यः) स्वकरणं न करोति तं निवेदयेयुः गोपादिभ्य इत्येव।......ना अस्वकरणं लवणस्य वालुकाप्रक्षेपात् द्रव्यकरणमेव गोपादिभिः स्वयं परिज्ञातमेव वासयेयुः। अतिव्ययकर्त्तारम् आश्चर्यकर्माणं च निवेदयेयुः।

चिकित्सको यस्य गृहे प्रतीकारयति, स च गृहस्वामी (प्र)च्छन्नव्रण प्र(तीकारयितारम्) अपथ्यकारिणश्च निवेद्य गोपस्थानिकयोः तद्दोषेण मुच्यते। अन्यथा अव्यवस्थाकारित्वात् तद्विनयात्ययः॥

प्रस्थितागतौ च गृहस्वामी निवेदयेत्। अन्यथा यो हि दोष उत्पद्यते, तमसौ भजेत अनुभवेदित्यर्थः। क्षेमरात्रिषु अनुत्पन्नभोक्ता स्वयमप्यनिवेदयिता त्रिपणं दण्डं दद्यात्।

प्रतिपदपञ्चिका

धर्मावसथिन इत्यादि, धर्मावसथा धर्मार्थाः सभामण्डपादयः, तदधिकृता धर्मावसथिनः, ते पाषण्डान् शाक्यभिक्षुकादीन्, पथिकांश्च वैदेहकान् वस्तुमागतान् गोपस्य स्थानिकस्य वा निवेद्य वासयेयुः प्रतिश्रयं दद्युः। स्वप्रत्ययात् स्वयमेव प्रतीत्य तपस्विनः श्रोत्रियांश्च आवसेयुरिति। कारुशिल्पिनश्चेति, स्वप्रत्यया इति वर्तते। कारवः शिल्पिनश्च स्वप्रत्ययाः स्वकर्मस्थानेषु स्वकर्मशालासु स्वगृहेषु वा स्वजनं सजातीयं वासयेयुरिति।

वैदेहकाश्चान्योन्यमिति, स्वप्रत्ययाः स्वकर्मस्थानेषु स्वजनं वासयेयुरिति। तेषां स्वकर्मस्थानीयानि क्रयविक्रयस्थानानि ये स्वप्रत्ययाः स्वजनं वासयन्ति, ते तद्दोषांश्च भजेरन्निति। किञ्चित्पण्यानामदेशकालविक्रेतारमदेशे अन्तग्रहादौ अकाले अरूपे वेलायां विक्रयकर्तारः स्वकरणं[1] च अनिषिद्धदेशकालेऽपि कुत इदं त्वया लब्धमिति पृष्टे येन स्वकरणमात्मीयत्वसमर्थनं च कृतम्, गोपस्थानिकयोर्वैदेहका एव निवेदयेयुः।

शौण्डिकादयः सुरादिव्यवहारिणः, रूपाजीवा वेश्याः, ते परिज्ञानं कुलशीलादिभिः परीक्षणं स्वेषु स्वेषु वासयेयुः। अतिव्ययकर्तारम् अप्रतिज्ञातायतिं सुरापूपादिष्वतिप्रभूतं व्ययं कुर्वाणम् अत्याहितकर्माणं च, सः प्रसिद्धकृष्यादिलब्धविभवः स्वल्पेन प्रणष्टसर्वस्वः अर्थमाहितमारब्धं महापातनदर्शनादिकं कर्म येन तं च त एव शौण्डिकादयो निवेदयेयुः।

---

१. अस्वकरणं—पा० (श्रीमूला)।

[नगरे गूढचारिणां कर्तव्यानि]

पथिकोत्पथिकाश्च बहिरन्तश्च नगरस्य देवगृहपुण्यस्थानवनश्मशानेषु सव्रणम् अनिष्टोपकरणम् उद्भाण्डीकृतम् आविग्नम् अतिस्वप्नम् अध्वक्लान्तम् अपूर्वं वा गृह्णीयुः एवमभ्यन्तरे शून्यनिवेशावेशनशौण्डिकौदनिकपाकमांसिकद्यूतपाखण्डावासेषु विचयं कुर्युः।

प्रतिपदपञ्चिका

चिकित्सक इत्यादि। चिकित्सकः प्रतीतः। प्रच्छन्नव्रणप्रतीकारयितारमिति, यच्छस्त्रप्रहरणादिजनितं व्रणं परैरविज्ञातं प्रतीकारयति चिकित्सां कारयति। अपथ्यकारिणं च अपथ्यानि प्राणिनां व्याधिजननमरणानि वा द्रव्याणि यः पृच्छन् कुर्वन् वा दृष्टस्तं च गोपस्थानिकयोर्निवेद्य मुच्येत शुद्धः स्यात्, अन्यथा अनिवेदने तुल्यदोषः, स्वयमपि तत्कारिदोषभाक् स्यात्। गृहस्वामी च तौ यस्य गृहे स्थित्वा व्रणप्रतीकारं अपथ्यानि च कुर्वते, सोऽपि गृहस्वामी गोपस्थानिकयोनिवेद्य मुच्यते, अन्यथा तुल्यदोषः स्यादिति।

प्रस्थितागतौ च निवेदयेदिति। गृहस्वामी इति वर्तते। स्व स्वगृहे वसन्तं प्रस्थितमपूर्वमागतं च निवेदयेत्—'असावस्मद्गृहवासी अमुना कार्येणामुष्मिन् दिवसे अमुं देशं प्रस्थितः, असौ चामुष्माद् देशादमुना कार्येणागत' इति। अन्यथा तयोरनिवेदने रात्रिदोषं भजेत। रात्रिवृत्तं चौर्यादिकमेतत् कृतं भवेदिति। क्षेमरात्रिष्विति। यासु रात्रिषु चौर्यादिकं न वृत्तं तास्ववस्थितागतानिवेदने त्रिपणं दण्डं दद्यादिति।

श्रीमूला

पथिकेत्यादि। पथिकोत्पथिकाश्च पथिका महामार्गचारिणो वैदेहकादिव्यञ्जनाः उत्पथिका विवीतपथचारिणः काष्ठतृणादिहारकगोपालकादिव्यञ्जनाः त उभये सञ्चाराः, बहिरन्तश्च नगरस्य विद्यमानेषु, देवगृहादिषु चतुर्षु स्थानेषु, सव्रणं शस्त्राद्युत्पादितव्रणम्, अनिष्टोपकरणम् अनिष्टानि वर्जनीयान्युपकरणानि काकल्यादीनि चोरादिसाधनानि यस्य तम् उद्भाण्डीकृतं समधिकभारभाण्डवाहिनम्, आविग्नं भीतम्, अतिस्वप्नं रात्रिव्यायामजागरवशादतिमात्रनिद्रापन्नम्, अध्वक्लान्तं दीर्घाध्वसञ्चारश्रान्तम्, अपूर्वं वा अज्ञातपूर्वं वा, गृह्णीयुः, अर्थान्नागरिकाय चार्पयेयुः।

एवमिति। अनेन प्रकारेण अभ्यन्तरे स्थानीयान्तराले, शून्यनिवेशादिषु शून्यालये अवेशने शिल्पशालायाम् शौण्डिकावासे औदनिकावासे पाक्वमांसिकावासे द्यूतावासे पाषण्डावासे चेत्येवं सप्तसु, विचयं सव्रणाद्यन्वेषणं कुर्युः, अर्थाद् गूढपुरुषा नागरिकादिसम्बन्धिनः।

[अग्निभयप्रतीकारविधिः, अप्रतिकुर्वतां शिक्षाः च]

अग्निप्रतीकारं च ग्रीष्मे मध्यमयोरह्नश्चतुर्भागयोः । अष्टभागोऽग्निदण्डः । बहिरधिश्रयणं वा कुर्युः । पादः पञ्चघटीनाम् कुम्भद्रोणीनिःश्रेणीपरशुशूर्पाङ्कुशकचग्रहणीदृतीनां च अकरणे · तृणकटच्छन्नान्यपनयेत् । अग्निजीविनः एकस्थान् वासयेत् । स्वगृहप्रद्वारेषु गृहस्वामिनो वसेयुः असंपातिनो रात्रौ । रथ्यासु कुटव्रजाःसहस्रं तिष्ठेयुः, चतुष्पथद्वारे राजपरिग्रहेषु च । प्रदीप्तम् अनभिधावतो गृहस्वामिनो द्वादशपणो दण्डः, षट्पणोऽवक्रयिणः, प्रमादाद् दीप्तेषु चतुष्पञ्चाशत्पणो दण्डः । प्रादीपिकोऽग्निना वध्यः ।

चाणक्यटीका

पथिकोत्पथिकाः पथ्युत्पथे च नागरिकपुरुषाः बहिरन्तश्च नगरस्य देवगृहादिषु सव्रणम्, चौर्याद्युपकरणसहितम्, उद्भाण्डं तृणादिभारप्रच्छादितभाण्डम्, उद्विग्नरूपम्, अतिस्वप्नम्, अध्वकान्तम्, अदृष्टपूर्वं भीतं गृह्णीयुः ।

एवं नगराभ्यन्तरे शून्यनिवेशने साधारणस्थाने, आवेशने सुवर्णका(रा)दिघटनाशा(खा ? ला)याम्, शौण्डिक्याद्यावासेषु विचारणां कुर्युः परिशोधनार्थम् ।

प्रतिपदपञ्चिका

पथिकोत्पथिका इत्यादि । पथिकाः प्रसिद्धमार्गसञ्चारिणो वैदेहकादयः, उत्पथिकाः काष्ठतृणादिहारकाः गोपालिकादयः चानुमताः, पथसञ्चाराः तद्व्यञ्जनाः पुरुषाः, बहिर्नगरस्य समीपस्थेषु देवगृहादिषु सव्रणादीन् गृह्णीयुः । तत्र देवगृहादीनि प्रतीतानि, सव्रणं शस्त्रप्रहरणादिजनितार्द्रव्रणम् अनिष्टोपकरणं काकलीसन्दंशविषशस्त्रादिधारणम्, उद्भाण्डीकृतमुद्वाहितभरसंस्थूलदेहम्, आविग्नं यस्य कस्यचिद् दर्शनात् भीतम् अतिस्वप्नं रात्रिप्रजागरातिव्यायामातिगाढनिद्रम्, अध्वक्लान्तं दीर्घाध्वगमनखिन्नम्, अपूर्वमविज्ञातपूर्वम्, वाशब्दादन्यानपि शङ्कनीयान् दृष्ट्वा गृह्णीयुः । स्वयं नागरिकपुरुषैर्वा ग्राहयेयुः ।

एवमभ्यन्तरे नगरस्य शून्यनिवेशादिषु पूर्वोक्तसव्रणादीन् विचयमन्वेषणं कुर्युः । नागरिकगोपस्थानिकाः तत्तद्व्यञ्जनैरिति वाक्यशेषः । कर्तुः शून्यनिवेशाः शून्यगृहाणि, आवेशनं शिल्पिशाला, शौण्डिकादीनां प्रत्येकमावासास्तेषां गृहाणि, तत्र द्यूतावासो द्यूतसभा, शेषं प्रतीतम् ।

श्रीमूला

अग्नीत्यादि । कुर्युरित्यनुवर्तते । अग्निप्रतिषेधं च अग्निकार्याणां महताम् अग्न्यतिप्रज्वलनबहुलस्फुलिङ्गोद्गतिहेतूनां वारणं च कुर्युः । कदा, ग्रीष्मे ग्रीष्मर्तौ, तत्रापि न सर्वदा, किन्तु मध्यमयोरह्नश्चतुर्भागयोः दिवससम्बन्धिनोः द्वितीयतृतीय-

श्रीमूला

यामपोः । तृणपर्णादिमयपटलावृतगृहविषयश्चायं प्रतिषेधः । निषिद्धकारिणां दण्डमाह—अष्टभाग इति । पणाष्टभागः, अग्निदण्डः निषिद्धकालाग्निकार्यकरणनिमित्तो दण्डः । अग्निकार्यस्य पाकार्थस्थाल्यधिश्रयणस्य तदानीमवर्जनीयत्वे त्वाह—बहिरिति । बहिरधिश्रयणं वा पटलानावृतावकाशाधिश्रयणं वा कुर्युः ।

अग्निकार्यकरणस्य घटिकाविशेषसम्बन्धे दण्डविशेषमाह—पाद इति । पादः पणचतुर्भागदण्डः, पञ्चघटीनां द्वितीयतृतीययाममध्यमपञ्चघटिकानां सार्धद्वादशघटिकात ऊर्ध्वम् आ सार्धसप्तदशघटिकात इत्यर्थः । कुम्भद्रोण्यादीनां चाकरणो कुम्भो घटो जलपूर्णः द्रोणी दारुमयो जलाधारो जलपूर्णः निःश्रेणी अधिरोहणी उच्चदेशारोहणार्था परशुः कुठारो दार्वादिच्छेदनार्थः शूर्पं प्रस्फोटनं प्रतिमुखधूमप्रसरवारणार्थम् अङ्कुशं सृणिर्दह्यमानवस्त्वाकर्षणार्थः कचग्रहणी शालापटलतृणहरणसाधनं दृतिश्चर्ममयमुदकपात्रम् इत्येतेषामग्निनिर्वापणसाधनानां ग्रीष्मकाले गृहद्वारेष्वनिवेशने, पाद इत्यनुवर्तते, पणचतुर्भागो दण्डः ।

तृणकटच्छन्नान्यपनयेदिति । तृणकटमयच्छदींषि गृहाणि, अपनयेद् निरस्येद् ग्रीष्मे । अग्निजीविनः अयस्कारताम्रतक्षादीन्, एकस्थान् वासयेत् । एकस्मिन् महति चतुश्शाले कृताग्निभयप्रतिविधाने वासयित्वा कर्म कारयेत् । स्वगृहेत्यादि । स्वगृहप्रद्वारेषु स्वगृहमुखद्वारेषु, गृहस्वामिनो वसेयुः । कथम्भूताः, असम्पातिनो रात्रौ निशायामन्यत्र सञ्चारं वर्जयन्तः । रथ्यासु विशिखासु, कुटव्रजाः सजलाः कुम्भपंक्तयः, सहस्रं तिष्ठेयुः । चतुष्पथद्वारराजपरिग्रहेषु च चतुष्पथेषु शृङ्गाटकेषु द्वारेषु नगरादिद्वारेषु राजपरिग्रहेषु कोशगृहकुप्यगृहकोष्ठागारपण्यगृहगजाश्वशालादिषु च, कुटव्रजास्तिष्ठेयुः ।

प्रदीप्तमिति । प्रदीप्तम् अनभिधावतः प्रज्वलिताग्निकं किमपि गृहं दृष्ट्वाप्यनभिद्रवतः, गृहस्वामिनः, द्वादशपणो दण्डः भवति । षट्पणोऽवक्रयिणः भाटकेन गृहे वसतोऽनभिधावतो गृहस्वाम्युक्तदण्डार्धदण्डः । प्रमादादिति । प्रमादाद् अनवधानाद्, दीप्तेषु सत्सु अर्थात् स्वगृहेष्वपि, चतुष्पञ्चाशत्पणो दण्डः । स गृहारक्षकस्येत्येके ।

प्रादीपिक इति । प्रदीपिका वह्निना गृहसन्दीपनं, तत्कर्ता, अग्निना तद्दीपितेनैव, वध्यः तदैव गृहीतश्चेत् । कालान्तरगृहीतस्याप्यग्निदाहः कण्टकशोधने वक्ष्यते—'विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनदीपकमग्निना दाहयेदि'ति ।

चाणक्यटीका

अग्निप्रतिषेधं ग्रीष्मे रक्षार्थं कुर्युः । तत्रापि मध्यमयोरह्नश्चतुर्भागयोः प्रचण्डयोः अग्निकरणे पणस्य अष्टभागो दण्डः । पूर्वपश्चिमयोस्तु प्रशान्तत्वान्न दोषः । तस्यामपि वेलायामवश्यकर्तव्येऽग्नौ ग्रामाद् बहिरधिश्रयणम् उपनिपातप्रतीकारोक्तमेव[1] कुर्युः ।

———

१. "ग्रीष्मे बहिरधिश्रयणं ग्रामा (: ? त) कुर्युः" (५.३०.)।

चाणक्यटीका

प्रतिगृहम् उदकपूर्णानां पञ्चघटादीनाम् अकरणे पणपादो दण्डः। भाण्डानाञ्च अग्निप्रतीकारोपकरणानामकरणे पादो दण्ड इत्येव।

तृणकटच्छन्नाद्यपनयेद् ग्रीष्म इत्येव। अग्निजीविनः सुवर्णकारादीन् न ह्यैरकस्थान्[1] आवासयेत्, सर्वेषामन्येषामनर्थो मा भूदिति। स्वगृहद्वारे गृहस्वामिनः अनर्थरात्रौ वसेयुरसञ्चाररम(व ?)गच्छन्तः। कुटव्रजा उदकपूर्णघटसङ्घाताः। सहस्रमिति प्रभूतोपलक्षणार्थम्। चतुष्पथे पुरद्वारे राजपरिग्रहे वाहनागारादौ।

तत् प्रदीप्तमनभि(करसो ? सरतो)[2] गृहस्वामिनः। द्वादशपणो दण्डः। चतुष्पणोऽवक्रयिणः अन्यतः क्रीत्वा गृहं वसतो[3] दण्डः। गृहस्वामिनां प्रमादाद् दीप्तेष्वंशेषु चतुष्पञ्चाशत्पणो दण्डः। प्रदीपितक इति। गृहाणां प्रदीपिता तेन अ(न्ये ? ग्नि)ना वा निजौषध्या।

प्रतिपदपञ्चिका

अग्निप्रतिषेधं च ग्रीष्म इति। कुर्युरिति वर्तते। अग्निप्रतिषेधम् अग्निनिषेधं ग्रीष्मे कुर्युरिति। कथमित्याह—मध्यमयोरह्नश्चतुर्भागयोरित्यादि। चतुर्धा विभक्तस्याह्नो मध्यमौ द्वौ भागौ, प्रहरद्वयम्, तस्मिन् काले किञ्चिदप्यग्निकार्यं न कुर्युरिति तदानीं कुर्वतां पणाष्टभागोऽग्निदण्डः अग्निनिमित्तो दण्डः।

पादः पञ्चघटीनामिति, तत्रापि मध्यमासु पञ्चसु घटिकासु पादः पूर्वोक्तद्विगुणो दण्डः, कुम्भादीनामकरणे च पाद इति वर्तते। ग्रीष्मे कुम्भादीनि गृहद्वारेष्ववस्थापयतां च पणचतुर्भागो दण्डः। तत्र कुम्भाः प्रतीताः, द्रोण्यः श्लक्ष्णगफलकघटिता जलाधारविशेषाः, कुम्भा द्रोण्यश्च जलपूर्णाः स्थापनीयाः। निःश्रेणिरुच्चाधिरोहणसाधनं, काष्ठादियन्त्रम्, परशुः कुठारः वंशादिच्छेदनाय, शूर्पं प्रतीतम् तच्च निर्वापयतः प्रतिमुखधूमनिवारणाय, अङ्कुशः सृणिः। इहकृतसंस्थानमाह—महाप्रमाणदण्डो दह्यमानदार्वादिकर्षणार्थः, कचग्रहणी यन्त्रविशेषः, किञ्चित्प्रसृतकुञ्चिताङ्गुलिहस्तसंस्थानलोहघटिता ग्रामहायष्टिश्शत्रूणां केशकर्षणार्थं। क्रियते सा तृणाद्यपनयनाय, धृतिः प्रतीता, एवमेतानि ग्रीष्मे गृहद्वारेषु गृहिभिः स्थापनीयानि।

तृणकटच्छन्नान्यपनयेदिति। तृणानि पलालादीनि, कटाः प्रतीताः, तैश्छन्नानि यानि गृहाणि ग्रीष्मे तानि तेषां अपनयेद्(अवस्थापयेदि)त्यर्थः।

---

१. ऐरकस्थान् एरकाख्यतृणच्छन्नगृहवासिनः सुवर्णकारादीन् नावासयेद् इत्यर्थः स्यात्। भट्टस्वामी तु एकस्थान् इति पठित्वा अग्निजीविनः कांस्यायोपजीविनः एक(स्मिन् ?) शाले निवातप्रदेशे कृताग्निप्रतिकारे सर्वान् समानीय कर्म कारयेत्" इति व्याचष्टे।

२. "उह्यमानम् अलाबुदृतिप्लवगण्डिकावेणिकाभिस्तारयेयुः। अनभिसरतां द्वादशपणो दण्डः (५.३०) इत्यादावापदो निस्तारणेऽभिसरतिः प्रयुज्यते।

३. भाटकेन वसत इति भट्टस्वामी।

[रथ्यादिकलुषीकरणे दण्डाः]

पांसुन्यासे रथ्यायामष्टभागो दण्डः, पङ्कोदकसन्निरोधे पादः, राजमार्गे द्विगुणः। पुण्यस्थानोदकस्थानदेवगृहराजपरिग्रहेषु पणोत्तराः विष्ठादण्डाः, मूत्रेष्वर्धदण्डाः, भैषज्यव्याधिभयनिमित्तमदण्ड्याः।

प्रतिपदपञ्चिका

अग्निजीविनः कांस्यायोपजीविनः, कांस्यायस्कारादिना एकस्मिन् [1]शाले निवातप्रदेशे कृताग्निप्रतीकारो सर्वान् समानीय कर्म कारयेदित्यर्थः। स्वगृहप्रद्वारेष्विति। स्वेषां गृहाणां प्रद्वारेषु प्रथमद्वारेषु गृहस्वामिनः सर्वे गृहिणो वसेयुः। सदा[2] सन्निधानं कुर्युः। तत्र विशेषमाह—असम्पातिनो रात्राविति, रात्रौ त्वसञ्चारिणो वसेयुः, रात्रिसञ्चारस्याशङ्कास्थानत्वात्। रथ्यासु कुटव्रजाः सहस्रास्तिष्ठेयुरिति। प्रतिरथ्यं सोदकाः कुम्भाः बहवः श्रेणीकृताः तिष्ठेयुः। तथा च चतुष्पथादिषु च तिष्ठेयुः इति। चतुष्पथाः पथासन्धयः, द्वाराणि नगरराजगृहद्वारि, राजपरिग्रहा हस्त्यादिशालागोष्ठागारादयो, बाह्योपकार्यादयश्च, प्रदीप्तमनभिधावत इति।

यत्र क्वचिदग्निमुत्थितं दृष्ट्वा सहसानभिधावतो गृहस्वामिनो यस्य गृहं तस्य द्वादशपणो दण्डः। षट्पणोऽवक्रयिण इति। भागकेन वसतोऽनभिद्रवतः षट्पणो गृहस्वामिनोऽर्धदण्ड इति, प्रमादादनवधानात् दीप्तेषु स्वेष्वपि गृहादिषु चतुष्पञ्चाशत्पणो दण्डः। प्रादीपिको गृहादिष्वग्निदोऽग्निना वध्यः, तस्मिन्नेवाग्नौ प्रक्षेप्तव्यः। यदि तदानीमेव गृहीतः ,कालान्तरगृहीतस्याप्यग्निदाहनं वक्ष्यति। विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनदीपकमग्निना दाहयेदिति।

श्रीमूला

पांस्वित्यादि। रथ्यायां रथशकटादिसञ्चारमार्गे, पांसुन्यासे पांसूनां धूलीनां तज्जातीयानामवकराणां च निक्षेपे, अष्टभागः पणाष्टमांशः, दण्डः। तत्रैव पङ्कोदकसन्निरोधे पङ्कमिश्रजलावरोधने, पादः पादपणदण्डः। राजमार्गे, महामार्गे, द्विगुणः पांसुन्यासे पङ्कोदकसन्निरोधे च रथ्योक्तद्विगुणः पादपणात्मकोऽर्धपणात्मकश्च क्रमेण दण्डः।

पुण्येत्यादि। राजमार्ग इत्यनुवर्तते, तत्र पुण्यस्थानादिषु चतुर्षु च, पणोत्तरा उत्तरोत्तरेकैकपणकाधिकाः राजमार्गे एकपणः पुण्यस्थाने द्विपणः उदकस्थाने तटाकादौ त्रिपणः देवगृहे चतुष्पणः राजपरिग्रहे राजगृहकोशागारादौ पञ्चपण इत्येवमात्मकाः, विष्ठादण्डाः। मूत्रेषु उक्तेष्वेव प्रदेशेषु मूत्रविसर्जने, अर्धदण्डाः क्रमाद् अर्धपणैकपणसार्धपणार्धतृतीयपणात्मका दण्डाः।

---

१. काले—पा०।	२. यथा—पा०।

[शवविषये नियमोल्लङ्घने दण्डाः]

मार्जारश्वनकुलसर्पप्रेतानां नगरस्यान्तरुत्सर्गे त्रिपणो दण्डः, खरोष्ट्राश्वतराश्वपशुप्रेतानां षट्पणः, मनुष्यप्रेतानां पञ्चाशत्पणः। मार्गविपर्यासे शवद्वारादन्यतः शवनिर्णयने पूर्वः साहसदण्डः। द्वास्थानां द्विशतम्। श्मशानादन्यत्र न्यासे दहने च द्वादशपणो दण्डः ॥

श्रीमूला

भैषज्यव्याधिभयनिमित्तमदण्ड्या इति। भैषज्यं विरेचनद्रव्यसेवनं व्याधिरतिसारप्रमेहादि भयं प्रसिद्धम् एतन्निमित्तकं चेद् विष्ठामूत्रकरणं राजमार्गादौ, तर्हि दण्ड्या न भवन्ति।

चाणक्यटीका

पांसुन्यासे रथ्यायामष्टभागो दण्डः पणस्येत्यर्थः। पङ्कोदकसन्निरोधे पादः। रथ्यायामित्येव। राजमार्गे द्विगुणः। उभयं तत्रेत्यर्थः।

राजमार्गादिषु विष्ठयावघातस्य यथोत्तरमेकैकपणोत्तरा दण्डाः। मूत्रेणावघात(क ?)स्य सार्धका दण्डाः।

भैषज्येन व्याधिना भयेन वा दूरं गन्तुमसमर्था न दण्ड्याः।

प्रतिपदपञ्चिका

पांसुन्यास इति। रथ्यायामेव गृहावस्करन्यासे वर्णाष्टभागो दण्डः। पङ्कोदकसन्निरोधे रथ्यायामेव पङ्कोदकाभ्यां सञ्चारनिरोधे पादः पूर्वोक्तद्विगुणो दण्डः। राजमार्गे महारथ्यायां पांसुन्यासे पङ्कोदकसन्निरोधे च रथ्यादण्डो द्विगुणः।

राजपरिग्रहे राजाङ्कणादौ वा पञ्चपण इति। मूत्रेष्विति, तेष्ववस्थानेषु मूत्रकरणे पूर्वोक्ताद् विष्ठादण्डादर्धदण्डः। भैषज्यव्याधिभयनिमित्तमदण्ड्य इति, भैषज्यादिनिमित्तमेतेष्ववस्थानेषु मूत्रपुरीषकरणे दण्ड्यो न भवति। तत्र भैषज्यः विरेचनादिद्रव्यप्रयोगः व्याधिः प्रमेहातिसारादिः भयं प्रतीतम्।

श्रीमूला

मार्जारेत्यादिवाक्यत्रयमतिरोहितार्थम्।

मार्गेत्यादि। मार्गविपर्यासे प्रसिद्धमार्गादन्येन मार्गेण शवानां नयने, शवद्वारादन्यतः शवनिर्णयेन व्यवस्थितप्रेतनिर्हरणद्वारातिरिक्तद्वारेण प्रेतनिर्हरणे, पूर्वः साहसदण्डः। द्वाःस्थानां द्वाररक्षिणां द्वारान्तरनिर्णयनमप्रतिषेधतां, द्विशतं पणद्विशतदण्डः। श्मशानादित्यादि। न्यासे स्थापने, स च बालानाथादीनाम्। शेषं स्पष्टम्।

[अपररात्रेषु अनिमित्तं सञ्चारनिषेधः]

विषण्नालिकमुभयतोरात्रं यामतूर्यम्; तूर्यशब्दे राज्ञो गृहाभ्याशे सपादपणमक्षणताडनं प्रथमपश्चिमयामिकम्, मध्यमयामिकं द्विगुणं बहिश्चतुर्गुणम्। शङ्कनीये देशे लिङ्गे पूर्वापदाने च गृहीतमनुयुञ्जीत। राजपरिग्रहोपगमने नगररक्षारोहणे च मध्यमःसाहसदण्डः। सूतिकाचिकित्सकप्रेतप्रदीपयाननागरिकतूर्यप्रेक्षाग्निनिमित्तं मुद्राभिश्चाग्राह्याः। चाररात्रिषु प्रच्छन्नविपरीतवेषाः प्रव्रजिता दण्डशस्त्रहस्ताश्च मनुष्या दोषतो दण्ड्याः॥

चाणक्यटीका

मार्जारादीनां मृतानां नगराभ्यन्तरोत्सर्गे यथोक्ता दण्डाः।

मार्गविपर्यासे प्रतिमार्गविपर्यासे शवद्वारादन्यतश्च (व्रीहिसुयमेन ? बहिर्नयने) दण्डः। द्वाःस्थानां द्विशतो दण्डः प्रेतानिवारणात्। श्मशानादन्यत्र प्रेतस्य तस्य न्यासे अन्यदेशे दहने वा दण्डः। दुर्गनिवेशे हि यथावर्णं स्थाननियमो व्याख्यातः[1]।

प्रतिपदपञ्चिका

मार्जारश्वनकुलसर्पप्रेतानां तच्छवानां नगरस्य अन्तरुत्सर्गे त्रिपणो दण्डः। खरोष्ट्राश्वतराश्वपशुप्रेतानां षट्पणः, मनुष्यप्रेतानां पञ्चाशत्पणो दण्ड इति सुबोधम्। मार्गविपर्यासे क्लृप्तमार्गादन्येन मार्गेण द्वारादन्यतश्च प्रसिद्धद्वारादन्यद्वारेण शवनिर्णयने (शव)निर्हरणे पूर्वः साहसदण्डः। द्वास्थानामनवतारयतां द्विशतो दण्डः। श्मशानादन्यत्र न्यासे दहने वा द्वादशपणो दण्ड इति। तत्र न्यासो बालानाथादिशवानां त्यागो निखननं वा।

श्रीमूला

विषण्नालिकमिति। यामतूर्यं यामे यन्त्रणीयजनसञ्चारे प्रहरे भवं तूर्यं तत्सञ्चारनिरोधसूचकं वाद्यघोषणं यामतूर्यं, तत्, उभयतोरात्रं रात्रेरुभयोः, पार्श्वयोः, अर्थात् प्रथमपश्चिमयामयोः कर्तव्यमिति शेषः। तत्रापि घटिकानियमार्थमाह—विषण्नालिकं विवर्जिताः षट् नालिकाः रात्रिपूर्वपश्चिमभागसम्बन्धिन्यो यस्मिंस्तद् यथा भवति तथा, रात्रेरादितः षट्सु घटिकास्वतीतासु अन्ततश्च षट्सु घटिकास्ववशिष्टास्वित्यर्थः। इह उभयतोरात्रमिति रात्रिमुभयत इत्यर्थेऽव्ययीभावः समासान्तश्चार्षः। तूर्यशब्द इति। श्रूयमाणे, राज्ञो, गृहाभ्याशे गृहसमीपे सञ्चरतामिति शेषः, सपादपणम् अक्षणताडनं पादाधिकपणोऽकालसञ्चारणदण्डः भवति। तच्चाक्षणसञ्चारदण्डनं किं सर्वरात्रियामविषयं, नेत्याह—प्रथमपश्चिमयामिकं प्रथमयामशेषसञ्चारविषयम्

---

1. उत्तरः पूर्वो वा श्मशानवाटः दक्षिणेन वर्णोत्तराणाम् इत्यत्र। (पी० ९९)

श्रीमूला

पश्चिमयामशेषसञ्चारविषयं चेत्यर्थः। द्वितीयतृतीययामसञ्चारविषयमाह—मध्यमेत्यादि। मध्यमयामिकम् अक्षणताडनं, द्विगुणम् अर्धतृतीयपणम्। इदं सर्वं नगरान्तःसञ्चारविषयं, नगरबहिर्देशसञ्चारविषयमाह—बहिरिति। बहिर्नगराद् बहिर्नगरपरिसरदेशे, चतुर्गुणं राजगृहाभ्याशसञ्चारोक्तदण्डचतुर्गुणम् अर्थात् पञ्चपणात्मकम् अक्षणताडनं भवति।

शङ्कनीय इति। शङ्कन्तेऽस्मिन् स्थितं पुरुषं चोरजारादित्वेनेति शङ्कनीयः तथाभूते सति, देशे निष्कुटादौ, शङ्कनीयेलिङ्गे अवगुण्ठनकुड्यच्छायानिलयनादिके सति, पूर्वापदाने च पूर्वकृते चौर्यादिवृत्ते च प्रतीते सति, गृहीतम् अनुयुञ्जीत तद्देशस्थं तल्लिङ्गिनं तदपदानकं च जनं दृष्ट्वा गृहीत्वा पृच्छेत्—कस्त्वं कुतः कस्य किमर्थमिहागतोऽसीति।

राजपरिग्रहोपगमन इति। राजकीयावसथोद्यानादिष्वननुमतस्य प्रवेशने, नगररक्षारोहणे च नगररक्षाणां प्राकाराट्टालकादीनामारोहणे च, मध्यमः साहसदण्डः।

सूतिकेत्यादि। सूतिकादिसप्तकनिमित्तं सूतिका प्रसूता तत्पदेन तच्छुश्रूषणं लक्ष्यते। सूतिकानिमित्तं सूतिकाशुश्रूषणे निमित्ते चिकित्सकनिमित्तं चिकित्सकपरिचरणे निमित्ते प्रेतनिमित्तं शवनिर्हरणे निमित्ते प्रदीपयाननिमित्तं दीपेनात्मानं प्रकाश्य गमने निमित्ते नागरिकतूर्यनिमित्तं नागरजनसमूहनचिह्नतूर्यवादने निमित्ते प्रेक्षानिमित्तं राजानुज्ञातनाटकादिप्रयोगदर्शने निमित्ते अग्निनिमित्तं च स्वपरगृहाद्यग्निदीपने निमित्ते च, अग्निग्रहणस्योपलक्षणार्थत्वादन्यऽस्मिन्नपि भयहेतौ निमित्ते, अग्राह्याः अक्षणसञ्चारिणो न ग्राह्याः, किन्तु निमित्तं परीक्ष्य मोक्तव्या इत्यर्थः। तथा मुद्राभिश्चाग्राह्याः मन्त्रिनागरिकादिमुद्रोपेताश्चाक्षणचारिणो न ग्राह्याः।

चाररात्रिष्विति। चारः सर्वसञ्चारः तत्सम्बन्धिनीषु रात्रिषु अनुमतसर्वसञ्चारासु महोत्सवादिरात्रिष्वित्यर्थः, प्रच्छन्नविपरीतवेषाः प्रच्छन्ना अवगुण्ठनादिसंवृत्तस्वरूपाः विपरीतवेषाः पुंवेषाः स्त्रियः स्त्रीवेषाः पुरुषाश्च राजाज्ञानिष्कासिताः, प्रव्रजिताः परिव्राजकाः, दण्डशस्त्रहस्ताश्च दण्डपाणयः शस्त्रपाणयश्च, मनुष्याः, दोषतो दण्ड्याः परीक्ष्य यथादोषोपलम्भं दण्डनीयाः।

चाणक्यटीका

षण्णालिकमुभयत इति। प्रदोषे नालिकात्रयं पश्चार्धे नालिकात्रयम् इति उभयतो रात्रेः षण्णालिकाः, (प्रायामभूत् ?) परस्य तु(यं)शब्दे कृतेऽपि प्रथमपश्चिमयोर्द्वारदेशे प्रसिद्धे (र)क्षणे[1] सञ्चारे यत् ताडनं सञ्चरतो ग्रहणं तत्र सपादपणो

१. षण्णालिकमिति रक्षणताडनमिति च चाणक्यटीकापाठः शुद्धिमत्तरः।

चाणक्यटीका

दण्डः। मध्यमयामिकं (द्विगुणं) मध्यमयो रक्षणताडने अर्धतृतीयपणो दण्डः। वहिश्चतुर्गुणं[1] राजगृहाद् विदूरे पञ्चपणमित्यर्थः।

शङ्कनीये देशे शून्यप्रत्यासन्ने (न ?) च (प्रपूर्वकृतख्यातिं गृहीत्वा ततः किं निमित्तं सनाथीत्युपचर्यानुयुक्ते ?) परीक्षेत।

राजपरिग्रहसमीपगमने नगररक्षाणाञ्च प्राकारादीनाम्[2] आरोहादीनाम् आरोहे गृहीतस्य दण्डः।

सूतिकानिमित्तं चिकित्सार्थं सञ्चरन्तः, तथा प्रदीपयानारूढः, नारीसहायः, तूर्यप्रेक्षार्थं समुद्रा न ग्राह्याः।

अपररात्रिषु[3] उत्सन्नरात्रिषु (यज्ञलवोये ?) उत्सवप्रेक्षार्थम्, प्रच्छन्नवेषाः, विपरीतवेषाः, प्रव्रजिताः, निर्लोहदण्डमात्रहस्ताः, शस्त्रहस्ताश्च मनुष्याः (विशेषवत् ?)। दोषतः (दण्डयाः)।

प्रतिपदपञ्चिका

विषण्नालिकमुभयतोरात्रं यामतूर्यमिति। यमनं यामः सञ्चारनिरोध इत्यर्थः। तच्चिह्नं तूर्यं यामतूर्यम्, तदुभयतोरात्रं विषण्नालिकं कुर्यात्। रात्रेरादितः षट्सु नालिकासु गतासूपक्रान्तासु शिष्टासु विरमेदित्यर्थः। यामतूर्ये दत्ते सर्पोऽपि न सम्पतेदिति। तूर्यशब्द इति। तस्मिन् तूर्यशब्दे वर्तमाने राजाभ्याशे अन्तर्नगरे सपादपणमक्षणतालनमिति, तालनं ताडनं, तेन च दण्डो लक्ष्यते। क्षणोऽनुज्ञातः कालः, अक्षणो निषिद्धः, तन्निमित्तो दण्डः। अक्षणतालनं तत्प्रथमपश्चिमयामिकं प्रथमपश्चिमयाममयोरनुज्ञातषण्नालिकावशिष्टकादिविषयं सपादपणं भवति। तद्यथा प्रथमस्यादौ पश्चिमस्यान्ते च पट् षण्नालिका वर्जयित्वा अवशिष्टकालमतद्विषयमेतद्दण्ड-विधानमिति। मध्यमयामिकं द्विगुणमिति। मध्यमयामयोरक्षणतालनद्विगुण-मर्धाधिकपणद्वयं भवति। बहिश्चतुर्गुणमिति नियमात् नगराद् बहिस्तत्पर्यन्तदेशे चतुर्गुणं पञ्चगुणं भवति।

शङ्कनीये देशे निष्कुटादौ प्रस्थितस्य चोर्यादिकं शङ्कनीयं लिङ्गं च शङ्कनीयः। अवगुण्ठने किञ्चिद्गूहनादिके पूर्वापदानेऽपि च पूर्वमपि यत्कृतचोर्यादिकर्मणि एवमेतेषु दृष्टेषु गृहीतमनुयुञ्जीत। एभिरुपलक्षितो यो दृष्टः, तं गृहीत्वा वाक्यकर्मभ्या-मनुयुञ्जीत वाक्यकर्मानुयोगं च कण्टकशोधने वक्ष्यति।

---

१. अन्तश्चतुर्गुणम् इति केरलभाषाटीकापाठः।

२. आरोहो नगाद्युच्छ्रितो देशः।

३. अपरात्रेषु इतिपाठः स्यात्। "पूर्वरात्रव्यवहारिणाम्" (३.१.) इत्यादिः कृतसमा-सान्तः प्रयुज्यते। चाररात्रिषु इति मुद्रितकोशपाठः।

[अनुचितकर्मकर्तॄणाम् आरक्षिणां दण्डाः]

रक्षिणामवार्यं वारयतां वार्यं चाऽवारयतामक्षणद्विगुणो दण्डः। स्त्रियं दासीम् अधिमेहयतां पूर्वः साहसदण्डः, अदासीं मध्यमः, कृतावरोधामुत्तमः, कुलस्त्रियं वधः ॥

प्रतिपदपञ्चिका

राजपरिग्रहोपगमन इति, राजपरिग्रहाणां महानसकोष्ठागारादीनामुद्यानादिविहारस्थानानां च अनधिकृतस्योपगमने प्रवेशने नगररक्षारोहणे च नगररक्षणानाम् अट्टालप्रतोलीकोशादीनामनधिकृतस्य आरोहणे च मध्यमः साहसदण्डः।

अक्षणसञ्चारिष्वग्राह्यानाह—सूतिकाचिकित्सकेत्यादि, तत्र सूतिकानिर्देशात्, तस्याः स्वयं गमनाभावात् तत्परिकर्मिणः स्त्रीपुरुषाः गृह्यन्ते। चिकित्सका मन्त्रौषधादिभिर्विपरोगादिप्रतिकर्तारः। तद्ग्रहणं तत्परिकर्मिणामप्युपलक्षणार्थम्। प्रेतग्रहणं च शवनिर्हारिणामुपलक्षणार्थमेव। एते प्रदीपयाने प्रदीपेनाऽऽमानं प्रकाश्य सञ्चरन्तो न ग्राह्याः। तथा नागरिकतूर्यप्रेक्षाग्निनिमित्तमिति। निमित्तशब्दः प्रत्येकम्, तत्र नागरिकतूर्यनिमित्तं नागरिककृते सर्वनागरसमवायचिह्नं तूर्यनिनादे सति प्रेक्षानिमित्तं राजानुमतमहानटादिदर्शननिमित्तं गृहादिषु प्रदीप्तेषु। उक्तं हि 'प्रदीप्तमनभिद्रवतो गृहस्वामिनो द्वादशपणो दण्डः, षट्पणोऽवक्रयिण' इति। अग्निग्रहणं परावस्कन्दादीनां भयहेतूनामप्युपलक्षणार्थम्। मुद्राभिश्च राजमन्त्रिणो नागरिकस्य वा मुद्राभिः, एवमेतेषु निमित्तेषु क्षणसञ्चारिणोऽवग्राह्याः। अत्र च ग्रहणप्रतिषेधात् निमित्तानि परीक्ष्यैव मुञ्चेदिति।

तथा चाररात्रिष्विति। अनिषिद्धसर्वजनप्रचारासु च देवोत्सवादिरात्रिषु च प्रच्छन्नवेषा अवगुण्ठनादिना विपरिवर्तितवेषा आज्ञया निष्कासिताः यष्ट्यादिप्रहारजनितगूढव्रणाः शस्त्रहस्ताश्च आर्द्रव्रणाः, एवमेते प्रच्छन्नवेषादयो दोषतो दण्ड्याः। तेषु यस्य यो दोषः उपलब्धः शङ्कितो वा, तद्दोषानुरूपं दण्ड्या इत्यर्थः।

श्रीमूला

रक्षिणामिति। अवार्यम् अभ्यनुज्ञाताक्षणसञ्चारं सूतिकाशुश्रूषुप्रभृति, वारयतां, वार्यं च सामान्यजनम्, अवारयतां, रक्षिणां नागरिकपुरुषाणाम्, अक्षणद्विगुणः अक्षणसञ्चारविहितदण्डद्विगुणः सार्धपणद्वयात्मकः, दण्डः। स्त्रियं दासीम् अन्यदीयाम् अधिमेहयतां, बलाद् गच्छतां रक्षिणां, पूर्वः साहसदण्डः। अदासीं गणिकाम् अधिमेहयतां, मध्यमः साहसदण्डः। कृतावरोधां दासीमदासीं वा केनचिद् भार्यात्वेन परिगृहीताम्, अधिमेहयताम्, उत्तमः साहस दण्डः। कुलस्त्रियम्, अधिमेहयतां, वधः प्राणवियोजनं दण्डः।

[नागरिककर्तव्यविशेषाः अकृतकृत्यानां दण्डश्च]

चेतनाचेतनिकं रात्रिदोषम् अशंसतो नागरिकस्य दोषानुरूपो दण्डः, प्रमादस्थाने च। नित्यमुदकस्थानमार्गभूमिच्छन्नपथवप्रप्राकाररक्षावेक्षणं नष्टप्रस्मृतापसृतानां च रक्षणम् ॥

चाणक्यटीका

द्विगुण इति। रक्षणताडनमेव दण्डो यथोक्ताद् द्विगुण इत्यर्थः। स्त्रिया दण्ड एवायम्, तामधिमेहयतां कामयमानानां दण्डः। कुलस्त्रियम्......(उत्स)वादेनिमित्तात् ज्ञातिगृहे। सञ्चर(न्ति ? न्तीम्) तामधिमेहयताञ्च स एव दण्डः।

प्रतिपदपञ्चिका

रक्षिणां नागरिकपुरुषाणामवार्यं चिकित्सकादिकं वारयतां वार्यं च महाजन-मक्षणप्रचारणमवारयतामक्षणद्विगुणो दण्डः, अक्षणचारिणां यो दण्ड उक्तः, तद्द्विगुणो दण्ड इति।

स्त्रियं दासीमधिमेहयतां पूर्वः साहसदण्डः इति, रक्षिणामिति वर्तते। यां काञ्चित् कस्यचिद् दासीस्त्रीमधिमेहयतां बलाद् गच्छतां रक्षिणां पूर्वः साहसदण्डः। अदासीं स्वतन्त्रां गणिकां मध्यमः। कृतावरोधां कस्यचिद् गृहिणीत्वेन नियतवर्तनी-मुत्तमः। कुलस्त्रियं वध इति सुबोधम्।

श्रीमूला

चेतनाचेतनिकमिति। चेतनभवमचेतनभवं च रात्रिदोषं रात्रिदृष्टममङ्गलम्, अशंसतः अनिवेदयतः, नागरिकस्य पौरस्य, दोषानुरूपो दण्डः कल्प्यः। प्रमादस्थाने च प्रमादो रक्षिपुरुषाणां रक्षाव्यापारशैथिल्यं तस्य स्थाने हेतुभूते मद्यपानादौ च, दोषानुरूपो दण्डः कल्प्यः। प्रमादस्थाने च प्रमादो रक्षिपुरुषाणां रक्षाव्यापारशैथिल्यं तस्य स्थाने, हेतुभूते मद्यपानादौ च दोषानुरूपो दण्डः।

नित्यमिति। उदकस्थानानि नदीकूपतटाकादीनि, मार्गाः प्रवेशनिर्गमद्वाराणि, भूमयः स्थलानि, छन्नपथाः सुरुङ्गादिमार्गाः, वप्राः प्राकाराधाराः, प्राकारा वरणाः, रक्षाः अट्टालकपरिखादयः, एषामुदकस्थानादीनां सप्तपदार्थानामवेक्षणं परीक्षणं, नित्यं प्रतिदिवसानुष्ठेयं कर्म भवति नागरिकस्य।

नष्टप्रस्मृतापसृतानां च नष्टानां स्वामिप्रमादगलितानां भूषणादीनां प्रस्मृतानां स्वामिविस्मृतानाम् अपसृतानां स्वयमपगतानां द्विपदचतुष्पदानां च रक्षणं, नित्यं नियतानुष्ठेयम् आ स्वामिदर्शनात्।

चाणक्यटीका

चेतनिकं वैरादिगृहं, अचेतनिकञ्च प्राकारादिपतनात्। रात्रिदूषकस्य दोषानु-रूपो दण्डः। प्रमादस्थाने च।

[कारागृहबद्धविषये वन्धितव्यविषये च देशकालाधिकारिभेदेन पालनीयाः नियमाः]

बन्धनागारे च बालवृद्धव्याधितानाथानां जातनक्षत्रपौर्णमासीषु विसर्गः, पुण्यशीलाः समयानुबद्धा वा दोषनिष्क्रयं दद्युः ॥

चाणक्यटीका

नित्यमुदकस्थानाद्यवेक्षणं कार्यम् । तथा नष्टं प्रपलायितं स्वामिभिः प्रस्मृतम् अपहृतं चोरादिभिः यत् तेषाम् आ स्वामिपरि(स ? सर)प्राप्तेः रक्षणं कार्यम् ।

प्रतिपदपञ्चिका

चेतनाचेतनिकं, प्राण्यप्राणिसम्भवं रात्रिदोषं रात्रौ यत् कुशलं नगरे वृत्तं तदंशतः प्रातरेव नागरिकस्य अनिवेदयतः नगरवासिजनस्य दोषानुरूपो दण्डः कार्यः। सर्वेषां प्रमादस्थाने शङ्कितापायकरणे च तत्तद्दोषानुरूपो दण्ड इति वर्तते ।

नित्यमुदकस्थानेत्यादि, उदकस्थानं नदीतटाककूपादिकम्, मार्गाः द्वाराणि, भूमिपथः जलनिस्सरणमार्गः, छन्नपथप्रकाराः प्रागुक्ताः, रक्षाः अट्टालकादयः। एवमेतेषामुदकस्थानादीनां नित्यमवेक्षणं रक्षिपुरुषैः कार्यमिति शेषः। किमर्थमुदकदूषणादिप्रतिषेधार्थम् । तन्नष्टप्रस्मृताप्रसृतानां च रक्षणं कार्यमिति । नष्टानां प्रमोषादिना स्वामिनामदर्शनागतानां प्रस्मृतानां क्वचिदङ्कचिह्नितानामेवं विस्मृतानामपसृतानां स्वयमेव पलायितानां दासादीनां पशूनां च रक्षणं नागरिकेन कर्त्तव्यं नष्टादीनि स्वामिन एव यावद् गृह्णन्ति, तावन्नागरिकपुरुषैः रक्षितव्यानीति ।

श्रीमूला

बन्धनागारे चेति। कारागृहे च स्थितानां, बालादीनां चतुर्णां, जातनक्षत्रपौर्णमासीषु राज्ञो वार्षिकजन्मर्क्षोत्सवेषु पूर्णिमासु च, विसर्गः बन्धनगृहाद् मोक्षणं, कर्तव्यमिति शेषः। पुण्येत्यादि। पुण्यशीलाः धर्माचरणस्वभावाः कुतोऽपि यादृच्छिकाद् वृत्तव्यातिक्रमात् प्रसक्तकारागृहप्रवेशा इत्यर्थम्, समयानुबद्धा दोषनिष्क्रयं दद्युः समयेन आयतिविशुद्धिप्रातिभाव्यसंविदा प्रतिबद्धाः कृतदोषानुरूपं हिरण्यदण्डं दद्युः, बन्धनगृहे प्रवेशाभावाय। तदिदं बन्धनगृहप्रवेशनपक्षप्रतिक्षेपकं पक्षान्तरं वाशब्दो द्योतयति ।

चाणक्यटीका

बन्धनस्थानां बालादीनाम् अनाथानाञ्च । यस्मिन् राजा जातः तस्मिन् दशमैकान्नविंशति(मयो ? तमयोर)घनक्षत्रयोः पौर्णमास्यां रक्षाबन्धनविक्रमणार्थं विसर्गः। पुण्यशीलाः केचित्तु (त एव वा ?) प्रतिभाव्यशपथादि(खण्डन्वेषणमाहुयैः ? दण्डनिष्क्रयणमाहुः) तन्निष्क्रयं वा बन्धा(द्)[1] दद्युः ।

---

1. बन्धस्वाम्यो इति केशवस्वामी ।

दिवसे पञ्चरात्रे वा बन्धनस्थान् विशोधयेत् ।
कर्मणा कायदण्डेन हिरण्यानुग्रहेण वा ॥११९॥
अपूर्वदेशाधिगमे युवराजाभिषेचने ।
पुत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते ॥१२०॥

इत्यध्यक्षप्रचारे द्वितीयेऽधिकरणे नागरिकप्रणिधिः,
षट्त्रिंशोऽध्यायः, आदितः सप्तपञ्चाशः,
एतावता कौटलीयस्यार्थशास्त्रस्य अध्यक्षप्रचारो नाम
द्वितीयमधिकरणं समाप्तम्

प्रतिपदपञ्चिका

बन्धनागाराच्च कारागृहात्, बालानां वृद्धानां व्याधितानामनाथानां च जातिनक्षत्रे रात्रौ जन्मनक्षत्रे, पौर्णमासीषु कार्तिक्यादिषु, विसर्गो मोक्षः कार्य इति । पुण्यशीलाः समयानुबन्धा वा दोषनिष्क्रयं दद्युरिति । पुण्यशीला धार्मिकाः, तेषामपि यदि कदाचित् केनचिद् दोषेण बन्धनागारप्रवेशः प्राप्तः, तदा ते समयानुबन्धाश्च पुनरेवं करिष्याम इति समयानुबन्धं प्रातिभाव्यादिदानेन कृत्वा दोषनिष्क्रयं बन्धनागारप्रवेश-निमित्तस्य निष्क्रयं दोषानुरूपं हिरण्यदण्डं दद्युः, न बन्धनागारं प्रविशेयुः । वाशब्दा-न्निष्क्रयादाने समयानुबन्धाकरणे च प्रविशेयुरेव ।

श्रीमूला

अध्यायान्ते श्लोकावाह—दिवस इति । दिवसे प्रतिदिवसं, पञ्चरात्रे वा प्रति-पञ्चरात्रं वा, बन्धनस्थान्, विशोधयेत् विशोधनं दण्डग्रहणेन दोषनिष्क्रयं कारयेत् । कथम्, कर्मणा भारवहनशकटाकर्षणादिना दण्डदानासामर्थ्ये, कायदण्डेन शरीरताडना-दिना कर्मकरणासौकर्ये, हिरण्यानुग्रहेण वा हिरण्यग्रहणरूपेणानुग्रहेण वा बन्धनस्थ-गुणित्वे । इह केचिद् 'विशोधयेदि'त्यस्यावृत्त्या 'बन्धनगतान् विशोधयेत् सुस्था दुःस्था वेति परीक्षेते'त्यर्थान्तरमपि सङ्गृह्णन्ति ।

बद्धमोक्षनिमित्तान्याह—अपूर्वेत्यादि । अपूर्वदेशाधिगमे शत्रुजयनिमित्ते नूतन-देशलाभे । शेषं सुगमम् ।

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
आध्याक्ष्याख्याधिकरणं द्वैतीयीकमपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य श्रीसीता-म्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु कौटिलीयार्थ-शास्त्रव्याख्यायां श्रीमूलाख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे षट्त्रिंशोऽध्यायः, नागरिकप्रणिधिः ।

अध्यक्षप्रचारो द्वितीयमधिकरणं समाप्तम् ॥

शुभं भूयात् ।

चाणक्यटीका

दिवसे दिवसे पञ्चरात्रे वा बन्धनस्थान् विशोधयेत्, कः किं ददाति किंसमर्थो वेति। कर्मणा कायबन्धेन शारीरेण। हिरण्यानुग्रहेण वा।

अपूर्वदेशस्याधिगमे प्राप्तौ। मोक्ष इति बन्धनस्य। विनापि कर्मादिदण्डेन धर्माभिवृद्ध्यर्थं विधीयते। धर्मलाभो ह्यन्येभ्यो लाभेभ्यः श्रेयानिति।

इति नागरिकप्रणिधिरष्टत्रिंशं (? षट्पञ्चाशं) प्रकरणं समाप्तम्,
षट्त्रिंशश्चाध्यायः, आदितः सप्तपञ्चाशोऽध्यायः,
समाप्तं चाध्यक्षप्रचारो द्वितीयमधिकरणम् ॥

प्रतिपदपञ्चिका

इदानीमध्यायप्रान्ते श्लोकाभ्यां कर्तव्यशेषमाह—दिवस इत्यादि, दिवसे पञ्चरात्रे, वीप्सालोपो द्रष्टव्यः। दिवसे दिवसे पञ्चरात्रे पञ्चरात्रे वेति तत्र प्रतिदिवसविशोधनं मुख्यम्, पञ्चरात्रविशोधनं जघन्यम्, द्विरात्रादिषु मध्यमम्। एवं बन्धनस्थानां विशोधनं दोषनिष्क्रयं कारयेदिति। कथमित्याह—कर्मणेति, हिरण्यादिदानासमर्थाच्छूद्रान्तरपरिक्लेशैर्हिरण्येन हिरण्यग्रहणेन अनुग्रहेण वाऽल्पायकारिणं प्रभूतोपकारेण अनुग्रहं कृत्वा वा एवं चतुर्विधं विशोधयेदिति।

सर्वबन्धनमोक्षनिमित्तमाह—अपूर्वदेशाधिगमे विजिगीषोर्यातव्योच्छेदादिना देशान्तरप्राप्तिः। तथा युवराजाभिषेचने पुत्रस्य भ्रातुर्वा यौवराज्यप्रतिपादने पुत्रजन्मनि वा राज्ञः पुत्रजनने, पुत्रग्रहणं पौत्रनप्त्रोरपि उपलक्षणार्थम्। वाशब्दादश्वमेधादिमहाक्रतुदीक्षासु उल्कापात-भूमिकम्पादिमहोत्पातेषु राज्ञो जनपदस्य वा व्याधिदुर्भिक्षादिमहाभयेषु च सर्वेषामपि बन्धनागारस्थानां बन्धनस्य मोक्षोऽभिधीयते विशालाक्षप्रभृतिभिः पूर्वाचार्यैरिति। एतेषु निमित्तेषु महादोषानपि मुञ्चेदित्यर्थः इति।

इति भट्टस्वामिनः प्रतिपदपञ्चिकायामर्थशास्त्रटीकायामध्यक्षप्रचारिके
द्वितीयेऽधिकरणे षट्त्रिंशोऽध्यायः। नागरिकप्रणिधिः, आदितः
सप्तपञ्चाशोऽध्यायः, द्वितीयमधिकरणं समाप्तम्।

———

अथ धर्मस्थीयं नाम तृतीयमधिकरणम्

सप्तपञ्चाशाष्टपञ्चाशप्रकरणे

प्रथमोऽध्यायः

व्यवहारस्थापना विवादपदनिबन्धश्च

[धार्मिकामात्यप्रवर्तनीयव्यावहारिककर्मस्थानानि]

धर्मस्थास्त्रयस्त्रयोऽमात्याः जनपदसन्धिसङ्ग्रहणद्रोणमुखस्थानीयेषु व्यावहारिकानर्थान् कुर्युः ।

श्रीमूला

अथ धर्मस्थीयं नाम तृतीयमधिकरणम् । धर्मेषु वर्णाश्रम-जाति-सम्बन्धिषु तिष्ठन्ति तान् विदन्ति अनुवर्तन्ते चेति धर्मस्थाः, तानधिकृत्य प्रवृत्तं धर्मस्थीयम् । 'धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु स्थापयेदि'ति प्रथमाधिकरणस्य दशमाध्याये, द्वितीये भागे 'पौरजानपदानां कार्याणि पश्येत्' इति एकोनविंशाध्याये चोक्तम् । के कति वा कार्यद्रष्टारः कुत्र स्थित्वा कार्यं पश्येयुरित्यादिकं वक्तुमिदमधिकरणमारभ्यते ।

तत्र व्यवहारस्थापना इति प्रथमं सूत्रम् । विवादपदनिबन्धः इति द्वितीयम् । तदुभयमेकस्मिन्नध्याये प्रतिपाद्यते । व्यवहारा नाम विवाहसंयुक्तं, दायभागः इत्यादयो द्वादश वक्ष्यमाणाः, तेषां स्थापना ग्राह्याग्राह्यत्वनिरूपणमिति पूर्वसूत्रस्यार्थः । विवादपदानां पूर्ववाद्युत्तरवादिवचनानां निबन्धः व्युष्टदेशजात्यादिक्रमेण पत्रलेखनमित्युत्तरसूत्रस्य ।

प्रथमसूत्रं व्याचष्टे धर्मस्था इत्यादि । धर्मस्थास्त्रयस्त्रयः, अमात्याः सहावस्थिताः, जनपदसन्ध्यादिषु जनपदसन्धावन्तपालदुर्गे सङ्ग्रहणे दशग्रामीप्रधानाधिष्ठाने चतुश्शतग्रामीप्रधाने द्रोणमुखेऽष्टशतग्रामीप्रधानाधिष्ठाने स्थानीये चेत्येतेषु, व्यावहारिकान्, अर्थान् कार्याणि, कुर्युः ।

चाणक्यटीका

अध्यक्षाधि(प्र ?)करणेन प्रपञ्चवता योगमभिधाय क्षेमाय धर्मस्थीयकण्टकशोधनयोगवृत्तानि त्रीण्यधिकरणान्युच्यन्ते । तेष्वप्ययं प्रथमतमः, यदर्थाद् विनीतशास्त्रानुविधायिभिर्व्यवहारैः प्रजानां क्षेमो विधीयत इति धर्मस्थीयं तावदुच्यते । अत्रापि प्रमाणानां व्यवहाराणां स्थापना व्यवस्थितिरिति, विवादपदानां च निबन्ध इति प्रकरणद्वयम् [illegible] एकेनाध्यायेन विधीयते ।

[निषेध्याः व्यवहाराः, उल्लङ्घने दण्डश्च]

तिरोहितान्तरगारनक्तारण्योपध्युपह्वरकृतांश्च व्यवहारान् प्रतिषेधयेयुः । कर्तुः कारयितुश्च पूर्वस्साहसदण्डः । श्रोतृणामेकैकं प्रत्यर्धदण्डाः । श्रद्धेयानां तु द्रव्यव्यपनयः ।

चाणक्यटीका

तत्र अधिकरणाधिकारीयं सूत्रमाह— धर्मस्था इति । सहकारित्वेन निश्चिताः । ननु राज्ञ एवात्र कर्तृत्वम्, यथोक्तम्—'द्वितीये पौरजानपदानां कार्याणि पश्येत्' (अधि० १, अध्या० १९) इति । सत्यम्, राज्ञ एवाधिकारः, तस्य तु सहकारिणश्च देशव्यवहितानां व्यवहाराणामिति तावत् स्वयं राज्ञः प्रयोजककर्तृत्वमा(द्य ? प्य)त इति प्रयोज्यकर्त्तारः सदा कार्यदर्शने कार्यविपर्यासप्रतिविधानार्थं कल्पिताः स्युः । यथोक्तम्—

यतः स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
सोऽस्य कार्याणि सम्पश्येत् सभ्यैरेव त्रिभिर्वृतः ॥

धर्मस्थैरित्यर्थः । तस्माद्राज्ञः सहकारित्वेन प्रयोज्यकर्तृत्वे विषयीक्रियन्ते ।

त्रयस्त्रय इति स्थाने व्याप्त्यर्थं द्विर्वचनम् । त्रित्वसङ्ख्या च एकस्य यथेष्टम् अनवग्रहचारित्वाद् द्वयोः संहतयोरसंहतयोर्वा राजकार्यविनाशित्वात् । चतुरादिष्वपि (दश ? दोषः) ।

(अमात्या इति) अमात्योत्पत्तौ सहाध्यायित्वादिभिर्यथासम्भवम् उक्तलक्षणाः । जनपदसन्धौ अन्तपालदुर्गे । सङ्ग्रह इति कार्वटिके द्रोणमुखे स्थापयेत् जनपदनिवेशोपलक्षिते[२] । व्यावहारिकानिति व्यवहारयोग्यान् अष्टादशव्यवहारपदनिबन्धादीन् पदार्थान् नि(श्चये ? श्चिनु)युः ।

श्रीमूला

अग्राह्यव्यवहारानाह—तिरोहितेत्यादि । तिरोहितादीन् षड् व्यवहारान् आरप्स्यमानान् आरब्धांश्च, प्रतिषेधयेयुः । तत्र तिरोहितः प्रच्छन्नदत्तविषयः प्रच्छन्नात्तविषयश्च । स च स्वामिदेशकालक्रियाद्रव्यादिभेदेन बहुविधः । तत्र

---

१. यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
तदा नियुञ्ज्याद् विद्वांसं ब्राह्मणं कार्यदर्शने ।
सोऽस्य कार्याणि सम्पश्येत् सभ्यैरेव त्रिभिर्वृतः ।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ॥

इति मुद्रितमनुपाठः, (८, ९,१०)

२ 'दशग्रामी सङ्ग्रहेण सङ्ग्रहं स्थापयेत्' इति जनपदनिवेशाध्याये कौटल्यः । (२,१)

[तेषामेव देशकालादिभेदेनोपादेयत्वादुष्टत्वे]

परोक्षेणाऽऽधिकर्णग्रहणम् अवक्तव्यकरा वा तिरोहिताः सिद्ध्येयुः ॥

दायनिक्षेपोपनिधिविवाहसंयुक्ताः स्त्रीणाम् अनिष्कासिनीनां व्याधितानां च अमूढसंज्ञानाम् अन्तरगारकृताः सिद्ध्येयुः । साहसानुप्रवेशकलहविवाहराजनियोगयुक्ताः पूर्वरात्रव्यवहारिणां च रात्रिकृताः सिद्ध्येयुः । सार्थव्रजाश्रमव्याधचारणमध्येषु अरण्यचराणाम् अरण्यकृताः सिद्ध्येयुः । गूढाजीविषु चोपधिकृताः सिद्ध्येयुः । मिथःसमवाये च उपह्वरकृताः सिद्ध्येयुः ॥

श्रीमूला

स्वामितिरोहितः स्वाम्यनुज्ञां विनैवान्येन तद्धनं यद् विनियुज्यते, देशतिरोहितः परोक्षिसाक्षिकः, कालतिरोहितः शतवर्षोपेक्षितऋणादिविषयः, क्रियातिरोहितः देशान्तरस्थे प्रमाणलेख्ये ऋणार्थनाविषयः, द्रव्यतिरोहितः द्विपाच्चतुष्पात्स्थावरेषु दृष्ट्यगोचरेषु तद्विक्रयः । अन्तरगारकृतः गर्भागारकृतः, नक्तकृतः रात्रिकृतः, अरण्यकृतः, उपधिकृतः छद्मकृतः, उपह्वरकृतः रहस्यकृतो दातृप्रतिग्रहीतृमात्रविदितः । कर्तुः प्रतिषिद्धव्यवहारप्रयोक्तुः, कारयितुस्तत्प्रयोजकस्य च, पूर्वः साहसदण्डः । श्रोतॄणां धर्मस्थानाम्, एकैकं प्रति प्रत्येकम्, अर्धदण्डाः पूर्वसाहसस्यार्धानि । श्रद्धेयानां तु निष्कपटानां तु प्रतिसिद्धव्यवहारस्पर्शिनां, द्रव्यव्यपनयः साध्यद्रव्यहानिः, न तु दण्ड इत्यर्थः ।

चाणक्यटीका

तिरोहितकृतः दातृप्रति उपह्वरकृतः । गृहीतदेया(दा)नाय (साक्ष्य)सान्निध्यकृतः । अरण्यकृतः । उपधिकृतः च्छद्म, गृहान्तःकृतः यत्साहसं प्रयच्छति । उपह्वरकृतः असाक्षिकार्यकः, एवंविधो व्यवहारो न कोऽपि दाप्य इति प्रतिषेध्यार्थपक्षे (पा)तयेयुः । (तथा चिरव्यवहार इति यद्वाध्यक्षोऽननुज्ञाता तावति तयोर्व्यवस्थाभेदेन दण्डः ?) । श्रोतॄणां साक्षिणाम् । (स ?) श्रद्धेयानां (श्म ?) सम्भाव्यन्यायानां (स्व ?) दण्डो द्रव्यव्यय एव व्यवहारनिवृत्तिरित्यर्थः ।

श्रीमूला

प्रतिषिद्धापवादमाह परोक्षेणेति । परोक्षेण अधिकर्णग्रहणम् अप्रत्यक्षं गृहारामादिकमाधिं कृत्वा ऋणग्रहणम्, सिध्येत् तिरोहितमपि । अवक्तव्यकरा वा अमुकधनममुकेन व्यवह्रियमाणं न दुष्यतीति लोकसम्प्रतिपन्ना व्यवहारा वा, तिरोहिताः स्वामितिरोहिता अपि, सिध्येयुः ।

श्रीमूला

अन्तरगारकृतानुपादेयानाह—दायेत्यादि। दायो दायविभागस्तत्सम्बद्धः, निक्षेपः आभरणाद्यर्थं स्वर्णाद्यर्पणम् अथवा अन्तस्स्थद्रव्यरूपसङ्ख्याप्रदर्शनपूर्वं वासनस्यार्पणम्, तत्सम्बद्धः उपनिधिः अनाख्यातवस्तुगर्भसमुद्रवासनोपनिधानसम्बद्धः, विवाहसंयुक्तः स्त्रीधनविषयः इत्येतेऽन्तरगारकृताः, स्त्रीणाम्, अनिष्कासिनीनां गृहबहिर्निर्गत्वरीणाम्, व्याधितानां चामूढसंज्ञानां रोगिणां चानष्टचेतनानाम् अन्तरगारकृताः सिध्येयुः।

रात्रिकृतव्यवहारेष्वदुष्टानाह साहसेत्यादि। साहसयुक्तः परधन-प्रसभलुण्ठन-सम्बद्धः अनुप्रवेशयुक्तः परधनस्वगृहानुप्रवेशनविषयः कलहयुक्तः वाक्पारुष्यादिसम्बद्धः विवाहयुक्तः प्रसिद्धः राजनियोगयुक्तः राजनियोगो राजाज्ञाप्रयुक्तो नगररक्षाधिकृत-व्यापारः तद्युक्तस्तत्सम्बद्धः इति पञ्चैते व्यवहाराः, पूर्वरात्रव्यवहारिणां च वेश्या-शौण्डिकादीनां च व्यवहाराः, रात्रिकृताः सिध्येयुः।

अरण्यकृतव्यवहारेष्वदुष्टानाह—सार्थेत्यादि। सार्थो वणिक्सङ्घः, व्रजा गोष्ठवृत्तयो गोपालाः आश्रमो वनकुटुम्बिनः, व्याधाः किराताः, चारणाः लङ्घनप्लवनादिजीविनः, इत्येषां मध्येषु, अरण्यचराणां वनचराणां, व्यवहाराः, अरण्यकृताः सिध्येयुः।

उपधिकृतव्यवहारानुपादेयानाह - गूढाजीविषु चेति। कूटहिरण्यादिव्यवहारिषु च, उपधिकृताः छलकृता व्यवहाराः सिध्येयुः।

उपह्वरकृतव्यवहारान् उपादेयानाह—मिथःसमवाये चेति। रहःसम्प्रयोगे स्त्रीपुंसयोर्गान्धर्वविवाहनिमित्ते, उपह्वरकृताः सिध्येयुः।

चाणक्यटीका

प्रसङ्गनिवृत्तये अस्यापवादमाह—परोक्षेणेति। परोक्षाधिना स्थावरेण जङ्गमेन (वा) कृतम्, क्षेत्रं दासीं वा गृहीत्वा शतं देहीति यद् ऋणग्रहणम्, तत् तिरोहितमपि सिध्यति।

न तु परोक्षेण प्रतिभूप्रचारापरोक्षेण मूल्येन वा क्रयादिप्रत्ययितकर्तृतया ये व्यवहारा व्याख्याताः, तानेवोपपादयति—ते सर्वे सिध्येयुरिति। दायेति भर्तॄणां वा स्थितये विभागो दायः। कारुहस्ते करणाद्यर्थं सुवर्णादेर्निक्षेपः। उपनिधिरिति न्यासस्य दानार्पणे। विवाहसंयुक्ता धनदानादयः। तथा स्त्रीणामनिष्कासिनीनां व्याधितानां वा अमूढसंज्ञानां षडेव अन्तर(गार)कृताः सिध्येयुः।

तथा साहससंयुक्ताः, गृहानुप्रवेशाहरणादयश्च तद्युक्ताः, कलहयुक्ताः, विरुद्ध-श्चारो विचारः सङ्ग्रहणं तद्युक्ताः, राजाज्ञया च ये दानग्रहणादयः, पूर्वरात्रव्यवहारिणां च (सारिता पूर्वितो ?) अ(दी ? ही)ना[1] रात्रिकृतानुविचारार्हत्वात् सिध्येयुः।

---

१. "अथाहीनो नृलिङ्गकः। द्विरात्रादिषु यज्ञेषु प्राक् त्रयोदशरात्रतः" इति केशव-स्वामी।

[उक्तातिरिक्तानां परतन्त्रकृतानां च अकार्यकरत्वम्]

अतोऽन्यथा न सिद्ध्येयुः—अपाश्रयवद्भिश्च कृताः, पितृमता पुत्रेण, पित्रा पुत्रवता, निष्कुलेन भ्रात्रा, कनिष्ठेनाविभक्तांशेन; पतिमत्या पुत्रवत्या च स्त्रिया, दासाहितकाभ्याम्, अप्राप्तातीतव्यवहाराभ्याम्, अभिशस्तप्रव्रजितव्यङ्गव्यसनिभिश्च, अन्यत्र निसृष्टव्यवहारेभ्यः। तत्रापि क्रुद्धेनार्तेन मत्तेनोन्मत्तेनावगृहीतेन वा कृताः व्यवहाराः न सिद्ध्येयुः। कर्तृकारयितृश्रोतॄणां पृथग् यथोक्ताः दण्डाः।

चाणक्यटीका

(मूढाजीविषु) च्छद्मव्यवहारिषु अतिसन्धानार्हेष्वित्यर्थः।
(स ?) मिथःसमवायेन एकमत्या, असाक्षि(क)ता अपि सिध्येयुः।

श्रीमूला

अतोऽन्यथा न सिध्येयुरिति। उक्तातिरिक्तप्रकारास्तिरोहितादयो नोपादेयाः। अपाश्रयवद्भिश्चेति। अपाश्रयवन्तः परतन्त्राः तैश्च, कृताः व्यवहाराः, न सिध्येयुः। परतन्त्रान् प्रपञ्चयति—पितृमता पुत्रेण पितरि व्यवहारनिपुणे विद्यमाने पुत्रेण कृताः, पित्रा पुत्रवता पुत्रे कुटुम्बभरणक्षमे विद्यमाने पित्रा निवृत्तव्यवहारेण कृताः, निष्कुलेन भ्रात्रा कुलनिष्पतिनेन भ्रात्रा कृताः, कनिष्ठेनाविभक्तांशेन कनिष्ठेन दायभागात् प्राक्कृताः पतिमत्या पुत्रवत्या च स्त्रिया भर्तरि पुत्रे च कुटुम्बभरणक्षमे विद्यमाने स्त्रिया कृताः, दासाहितकाभ्यां दासेन स्वाम्यधीनेन आहितकेन आधीकृतेन चाधिग्राहकाधीनेन कृताः, अप्राप्तातीतव्यवहाराभ्याम् अप्राप्तव्यवहारेण ऊनषोडशवयस्केन अतीतव्यवहारेण अतिक्रान्तसप्ततिवयस्केन च कृताः, अभिशस्तादिभिश्चतुर्भिश्च अभिशस्तैर्महापातकदूषितैः प्रव्रजितैः संन्यासिभिः व्यङ्गैः मूक-बधिरादिभिः व्यसनिभिः स्त्रीद्यूतपानासक्तैश्च कृताः। तत्रापवादमाह—अन्यत्र निसृष्टव्यवहारेभ्य इति। निसृष्टव्यवहारव्यतिरेकेण, ते चेत् पितृ-मातृपुत्र-पुत्रवत्पित्रादयः प्रधानैरर्पितव्यवहाराधिकारास्तदा, तत्कृता व्यवहाराः सिध्येयुरेवेत्यर्थः।

निसृष्टव्यवहारेष्वपि तेषु विशेषमाह—तत्रापीति। निसृष्टव्यवहारेष्वपि मध्ये, क्रुद्धेन जिघांसुना, आर्तेन दुःखिना, मत्तेन हर्षवता, उन्मत्तेन विभ्रान्तचित्तेन अवगृहीतेन वा दण्डितेन वा, कृताः व्यवहाराः न सिध्येयुः। कर्तृकारयितृश्रोतॄणां पृथग् यथोक्ता दण्डा इति। ये प्रतिषिद्धान् व्यवहारान् कुर्वन्ति कारयन्ति शृण्वन्तश्च साक्षीभवन्ति, तेषां प्रत्येकं यथाविहिताः दण्डा भवन्ति।

चाणक्यटीका

अतोऽन्यथा न सिध्येयुरिति यथोक्तविशेषणाभावात् कृता अपि न सिध्येयुरिति नियमार्थं वचनम्।

[सर्वेषां व्यवहाराणाम् उपादेयत्वे हेतवः, लेखनेषु उत्तरोत्तरप्राबल्यञ्च]

स्वे स्वे तु वर्गे देशे काले च स्वकरणकृताः सम्पूर्णाचाराः शुद्धदेशाः दृष्टरूपलक्षणप्रमाणगुणाः सर्वव्यवहारास्सिद्ध्येयुः। पश्चिमं त्वेषां करणमादेशाधिवर्जं श्रद्धेयम् ॥ इति व्यवहारस्थापना ॥

चाणक्यटीका

अपाश्रयवद्भिश्च कृताः, न सिध्येयुः। अनेन कर्तृविशेषापेक्षया प्रतिषेधमाह केन इत्यस्य विशेषः—पितृमातृव्यवहारयोः सपितृकेण पुत्रेण। पुत्रवता निवृत्तप्रसवेन पित्रा। (निष्कलेन) कलम् इति बीजपर्यायः। भ्रात्रा[1] कनिष्ठेन अविभक्तांशेन। पतिमत्या प्राप्तव्यवहारपुत्रया च स्त्रिया। अपाकृतव्यवहाराभ्यां दासाहितकाभ्यामिति। सम्बन्धात् स्वामिद्रव्यप्रतिषेधो नात्मद्रव्यस्य। एवम् अभिशस्तप्रव्रजितव्यसनिभिश्च (पि ? अपु)त्रादिभिः। अन्यत्र निसृष्टव्यवहारेभ्यः अपाश्रयैरनुज्ञातव्यवहारेभ्यः पुत्रादिभ्यः।

तत्रापि स्वतन्त्रेष्वपि। क्रुद्धादिना न सिध्येयुः। पृथग् यथोक्ता दण्डा इति कर्तुः कारयितुश्च पूर्वः साहसदण्डः। श्रोतॄणामर्धं इति व्यवस्थादृढीकरणार्थम्।

श्रीमूला

सर्वापवादमाह—स्वे स्वे इति। स्वे स्वे वर्गे स्वकरणकृताः स्वस्वजातौ स्वक्रियाक्रमकृताः, स्वे स्वे देशे अरण्यादौ अरण्यादिचरैः स्वकरणकृताः, स्वे स्वे काले च रात्रौ रात्रिव्यवहारिभिः दिवा दिवाव्यवहारिभिश्च स्वकरणकृताश्च, सर्वव्यवहाराः सिध्येयुः। सम्पूर्णचाराः राजमार्गो दिवा अर्थिप्रत्यर्थिसान्निध्यमित्येवमाद्यपेक्षितदेशकालादिसमुदाचारश्चारः, क्वचिदाचार इत्येव पाठः। स सम्पूर्णः अविकलनिर्वृत्तः येषु ते तथाभूताः, व्यवहाराः शुद्धदेशाः दिशन्ति उपदिशन्ति स्वोपलब्धमर्थं प्राड्विवाकायज्ञापयन्तीति देशाः साक्षिणः ते शुद्धाः परोक्षित्वादिदोषरहिताः येषु ते तथाभूताः, दृष्टरूपलक्षणप्रमाणगुणाः दृष्टं साक्षात्कृतं रूपमाकृतिः लक्षणं व्यावृत्तिचिह्नं प्रमाणं माषगुञ्जादि आढकद्रोणादि वितस्तिहस्तादि च गुणः शुक्लनीलभ्राजिष्णुत्वादिश्च येषु ते तथाविधाः, सर्वव्यवहाराः, सिध्येयुः। त एते व्यवहारा उपादेया लेख्यप्रमाणकाः प्रवर्तन्ते। तच्च लेख्यं पूर्वकालकृतमेकमुत्तरकालकृतं चापरमित्येवं द्वयोरेकार्थगोचरयोर्लेख्यकरणयोः पूर्वोत्तरकालजन्मनोर्यदि कदाचिदुपलब्धिस्तदा किं प्रतिपत्तव्यमित्याह—पश्चिमं चैषां करणमिति। एतत्सम्बन्धि उत्तरकालकृतं लेख्यकरणम्, श्रद्धेयं विश्वसनीयं पूर्वकरणपरीक्षापुरस्सरप्रवृत्तिकत्वादुत्तरकरणस्येत्यभि-

---

१. 'कलं शुक्रे चरमधातौ' इति मेदिनी, 'देहधात्वन्तरे' इति केशवस्वामी। क्लीबेन भ्रात्रेत्यर्थः। निष्कुलेनेति प्रामादिकः पाठो मुद्रितकोशेषु।

(विवादपदनिबन्धः)

[पुस्तकेषु लेखनीयाः विवादसम्बधिनोंऽशाः]

संवत्सरम् ऋतुं मासं पक्षं दिवसं करणम् अधिकरणम् ऋणं वेदकावेदकयोः कृतसमर्थावस्थयोः देशग्रामजातिगोत्रनामकर्माणि चाभिलिख्य, वादिप्रतिवादिप्रश्नान् अर्थानुपूर्व्या निवेशयेत्; निविष्टांश्चावेक्षेत ॥

श्रीमूला

प्रायः। आदेशाधिवर्जमित्यपवादः। आदेशं बन्धं च वर्जयित्वा, आदेशः आदानम् अर्थस्य स्वत्वेन स्वीकरणं क्रयः प्रतिग्रहो वेति यावत्। आधिस्तु बन्धो भोग्यरूपः। आदेशाध्योस्तु विषये पूर्वकरणमेव श्रद्धेयम्, यतोऽर्थस्य परसंस्थत्वेन तद्वृत्त्युपोद्वलितस्य पूर्वलेख्यस्य प्राधान्यं न हीयते। तथा च याज्ञवल्क्यः—

"सर्वेष्वेव विवादेषु बलवयुत्तरा क्रिया।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा॥" इति॥

इति व्यवहारस्थापना समाप्ता।

चाणक्यटीका

पुनरपवादमाह—स्वे स्व इति ब्राह्मणानां ब्राह्मणेष्वित्यादि। करणस्थाने व्यवहारवेलायां स्वकरणकृता इति सजातीयसाक्षिमध्ये कृताः। सम्पूर्णाचाराः अयं गौरयमश्वश्चेति। दृष्टरूपाः दृष्टप्रमाणाः दृष्टलक्षणाः दृष्ट (प्रदृष्ट ? प) वाहादिगुणा व्यवहारा निरवद्याः सिध्येयुः।

पश्चिमं चैषामिति कारणात् पौनःपुन्ये साक्षिपत्रलेख्यादिगुणयुक्तात् पश्चिमं करणम् (अ)कृतपूर्वम् दत्ताधिकेन वा तत्र पूर्वपूर्वमेव श्रद्धेयमिति।

॥ इति व्यवहारस्था(पना) ॥

श्रीमूला

अथ विवादपदनिबन्ध इति सूत्रम्। तदर्थादिकं तु वर्णितं प्रागेव। संवत्सरमित्यादि। संवत्सरं राजवर्षोपलक्षितं कलिशकादिवर्षम्, ऋतुं वसन्तादिं, मासं चैत्रादिं, पक्षं मासार्धं, दिवसं तिथिं, करणं बवादिकं तिथ्यर्धम्, अधिकरणं स्थानीयद्रोणमुखादि, ऋणं वृद्ध्यर्थप्रयुक्तं धनं, वेदकावेदकयो वेदकः परोत्पादितपीडानुभवितृत्वात् तन्निवेदयितृत्वाद् वा अभियोक्ता अवेदको वेदकविपरीतोऽभियोज्यः तयोः, कीदृशयोः, कृतसमर्थावस्थयोः समर्थावस्था सम्बद्धावस्था अधमर्णोत्तमर्णभावलक्षणः सम्बन्धः स कृतो याभ्यां तथाभूतयोः समर्था क्षमा उत्तमाधमर्णभावावस्था कृता याभ्यां तथाभूतयोर्वा, कृतसमस्यावस्थयोरिति पाठे समस्थशब्दस्य समानस्थितिकार्थतया कृतसमानस्थितिकसम्बन्धयोरित्यर्थः। देशग्रामादीनि षट् च, अभिलिख्य,

[साक्षिनिमित्तं पराजयहेतवो विपर्यस्तवृत्तयो नव, पराजितस्य दण्डश्च]

निबद्धं पादमुत्सृज्यान्यं पादं सङ्क्रामति; पूर्वोक्तं पश्चिमेनार्थेन नाभिसं [धत्ते] बध्यते; परवाक्यम् अनभिग्राह्यमभिग्राह्यावतिष्ठते; प्रतिज्ञाय 'देशं निर्दिश' इत्युक्ते न निर्दिशति, हीनदेशमदेशं वा निर्दिशति; निर्दिष्टाद् देशादन्यं देशमुपस्थापयति; उपस्थिते देशेऽर्थवचने 'नैवम्' इत्ययपव्यते; साक्षिभिरवधृतं नेच्छति; असम्भाष्ये देशे साक्षिभिर्मिथस्सम्भाषते—इति पराक्तहेतवः ।

श्रीमूला

वादिप्रतिवादिप्रश्नान् अभियोक्त्रभियोज्यविषयाणि चोद्यानि अर्थानुपूर्व्या अर्थगुरुलघुभावक्रमेण, निवेशयेत् अभिलिखेत् । निविष्टांश्च, अवेक्षेत शोधयेद् अधिकोद्वापार्थं न्यूनप्रतिपूरणार्थं च ।

चाणक्यटीका

विवादपदनिबन्धः

कथमित्याह—तत्रेति । तद्यथा—पुष्यमित्रस्य करणं श्रद्धेयम् । (सन्दंशेन ?) (चे ? शु)क्लपक्षपञ्चम्यां (धं ? ध)र्माधिकरणे वणिग्भिक्षदत्ते लग्नकेन मागधेन ब्राह्मणेन कौण्डिन्यगोत्रेण अध्यापकविष्णुभूतिना आवेदकेन संव्यवहार्यवर्षे अष्टमे व(ह ? स)न्ते (फाल्गुनशुषमापककरणो वैपवणिश्च ?) सुभद्र आवेदयतीति अभिलिख्य (आदौ एवं चतुरंशहवति गोभूमिलग्नकोष्ठाहृत्वा ?) कृतसमर्थाव (त्ता ?-स्था) भवतः[1] पश्चात् पूर्वपक्षोत्तरपक्षमाक्षिप्रश्ना(ना)नुपूर्व्या यथाक्रमं लेखयेत् । लिखितांश्च एवं भवतोक्तम्, अनेन प्रत्युक्तम्, पृष्टे साक्षिभिरेवं कथितम्, इति दृढीकरणार्थमवेक्षेत । निविष्टञ्चेति एकधर्मसम्बन्धादेकवचनम् ।

श्रीमूला

पराजयहेतूनाह—निबद्धमित्यादि । निबद्धं पूर्वलिखितं पादमुत्सृज्यान्यं पादं सङ्क्रामति । तद्यथा—वाक्पारुष्यमिति पूर्वं विलिख्य पश्चाद् दण्डपारुष्यं वक्ति । पूर्वोक्तं पश्चिमेनार्थेन नाभिसन्धत्ते इति । यथा—पूर्वं पशुहिरण्यधान्यानि देयान्युक्त्वा पश्चाद् हिरण्यमात्रं देयमिति वक्ति, न तु सर्वं निर्दिशति । परवाक्यमिति ।

---

१. कृतसमर्थावस्थयोरिति इदं कौटल्यवचनम् "उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये," इति याज्ञवल्क्यस्मृतौ (२. १०) परिवर्तितं भाति । "कृतावस्थो गृहीतप्रतिभूः" इति मेधातिथिः (मनु ८. ६०) । समर्थेन प्रतिभुवा कृतप्रत्यर्पणबन्धस्येत्यर्थः ।

श्रीमूला

प्रत्यर्थ्युक्तम्, अनभिग्राह्यम् अदूषणीयमेव, अभिग्राह्य दूषयित्वा, अवतिष्ठते तूष्णीमास्ते दुष्टत्वं न समर्थयते। प्रतिज्ञाय देशमित्यादि। त्रयो मे साक्षिणः सन्तीत्येवमादिना सङ्ख्याविशेषेण साक्षिणं प्रतिश्रुत्य, निर्दिशेत्युक्ते न निर्दिशति तान् नामादितो निर्दिशेति कथिते नोद्दिशति। हीनदेशम् अदेशं वा निर्दिशति प्रतिज्ञातसङ्ख्यान्यूनसङ्ख्यान् साक्षिण उद्दिशति स्यालमातुलादीन् वा साक्षित्वानर्हान् उद्दिशति निर्दिष्टाद् देशादिति नामत उद्दिष्टात् साक्षिणः अन्यं, देशं साक्षिणम्, उपस्थापयति सन्निधापयति। उपस्थिते देश इति। सन्निहिते साक्षिणि, अर्थवचने स्वदृष्टमर्थं ब्रुवाणे, नैवमिति अपव्ययते नैवंविधोऽर्थं इति वदन्नपसरति। अपपूर्वो व्ययतिरनभ्युपगमार्थक आत्मनेपदी मृग्यः। साक्षिभिरिति। साक्षिवाक्यैः अवधृतं नेच्छति निर्णीतं नानुमन्यते। असम्भाष्ये देश इति। सम्भाषणानर्हे देशे, साक्षिभिः सह, मिथः सम्भाषते रहसि मन्त्रयते। इति एवम् एतेऽन्यपादसङ्क्रमादयः साक्षिमिथस्सम्भाषान्ताः, परोक्तहेतवः उक्तं वचनं समर्थनं तद्विपरीतं परोक्तम् असर्थनं तेन च तन्मूलः पराजय इह लक्ष्यते पराजयस्य हेतव इत्यर्थः। पराशब्दोपसृष्टस्य वचेः पराजिवत् स्वार्थविपरीते वृत्तिरिह द्रष्टव्या।

चाणक्यटीका

भङ्गहेतूनाह—(नि)बद्धं (पद) मुत्सृज्येति। ऋणं धारयतीति निबध्य प्रतिपादयितुमसमर्थः उपनिहितमेव द्रव्यं नार्पयतीति अन्यत् पदं सङ्क्रामति।

पूर्वोक्तमिति। प्रतिश्रुत्य यन्न ददाति तत् किमृणं न भवतीति पश्चिमेन अर्थेन अतिसन्धत्ते व्यंसयति[1]।

परवाक्यमनभिग्राह्यमिति वणिज्यार्थम् अनेन मत्तो माषकशतकमुद्धृतमिति अभियुक्तोऽस्मि। किमनेन वणिज्यार्थमेतदेव प्रतिपादयेत्। अन्यथा मया जितमित्यन्यथा प्रधानमुपतिष्ठते।

प्रतिज्ञाय देशं देशयितारं साक्षिणं निर्देशेत्युक्ते कृतसङ्ज्ञानत्वान्न तावन्निर्दिशति।

हीनं देशम् अन्वयम्, बन्धुमित्रादिर्ह्यापृच्छ्यताम्, किं ते (हे ? न), इत्यन्यमुपस्थापयति।

उपस्थिते साक्षिणि विशेषणं ब्रवीति न (मत्वा ?) मयापि धारयतीत्युक्तं नैव सहस्रं लिखितमिति अर्थवचनमपव्ययते।

साक्षिभिरभिहिते (छिन्दन्तीति ?) विना कारणेन ममैते न प्रमाणमिति।

असम्भाष्ये निर्जने देशे मिथः उपजापार्थं सम्भाषते। इति साक्षिवचनमन्तरेणापि गतानुमानेन भङ्गस्य हेतवः, तस्यैव वचनाद्वा।

---

१ वञ्चयतीत्यर्थः।

परोक्तदण्डः पञ्चबन्धः। स्वयंवादिदण्डो दशबन्धः। पुरुषभृतिरष्टांशः। पथिभक्त म(र्घ)र्थविशेषतः। तदुभयं नियम्यो दद्यात् ॥

[अपराधिस्थाने निर्दिष्टेन निर्देशकेन च पालनीयाः नियमाः]

अभियुक्तो न प्रत्यभियुञ्जीत, अन्यत्र कलहसाहससार्थसमवायेभ्यः। न चाभियुक्तेऽभियोगोऽस्ति। अभियोक्ता चेत् प्रत्युक्तस्तदहरेव न प्रतिब्रूयात्, परोक्तस्स्यात्। कृतकार्यविनिश्चयो ह्यभियोक्ता, नाभियुक्तः। तस्याप्रतिब्रुवतस्त्रिरात्रं सप्तरात्रमिति। अत ऊर्ध्वं त्रिपणावरार्ध्यं द्वादशपणपरं दण्डं कुर्यात्। त्रिपक्षादूर्ध्वमप्रतिब्रुवतः परोक्तदण्डं कृत्वा यान्यस्य द्रव्याणि स्युस्ततोऽभियोक्तारं प्रतिपादयेदन्यत्र वृत्त्युपकरणेभ्यः। तदेव निष्पततोऽभियुक्तस्य कुर्यात्। अभियोक्तुर्निष्पातसमकालः परोक्तभावः। प्रेतस्य व्यसनिनो वा साक्षिवचनाः सारम्। अभियोक्ता दण्डं दत्त्वा कर्म कारयेत्। आधिं वा स कामं प्रवेशयेत्। रक्षोघ्नरक्षितं वा कर्मणा प्रतिपादयेत्, अन्यत्र ब्राह्मणादिति ॥

श्रीमूला

पराजितदण्डमाह,परोक्तदण्डः पञ्चबन्ध इति। साक्षिनिमित्तस्वपक्षासिद्धिमूलस्य पराजयस्य दण्डः पराजितदेयस्यार्थस्य पञ्चमांशो भवति।

स्वयंवादिदण्डो दशबन्ध इति। विनैव साक्षिणं स्वयं वादं कृतवतः पराजितस्य दण्डः पराजितदेयस्य दशभागः। पुरुषभृतिरष्टांशः व्यवहारद्रष्टृकर्मकरपुरुषवेतनमष्टभागः, स च सामर्थ्यात् कार्षापणस्यैव ग्राह्यः। पथिभक्तमिति। साक्ष्यानेतॄणां मार्गगतागतभोजनार्थंदेयम् अर्घविशेषतः तण्डुलादिमूल्यभेदमनुसृत्य, कल्पनीयमिति शेषः। तदुभयमिति। पुरुषभृतिं पथिभक्तं च नियम्यः पराजितः, दद्यात्।

अभियुक्त इति। केनचित् कृताभियोगः, न प्रत्यभियुञ्जीत अर्थादभियोक्तारम् अनिस्तीर्णे स्वाभियोगे। तत्रापवादः अन्यत्र कलहसाहससार्थसमवायेभ्य इति। कलहसाहसादिषु तु विषये प्रत्यभियुञ्जीतैव। अभियुक्तमपि केनचित् तदन्यो नाभियुञ्जीतेत्याह—न चाभियुक्त इत्यादि।

यदाह योगीश्वरः—

"अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्।
न चाभियुक्तमन्येन नोक्तं विप्रकृतिं नयेत् ॥" इति।

अभियोक्तेति। सः, प्रत्युक्तः अभियुक्त.दत्तोत्तरः, तदहरेव न प्रतिब्रूयाच्चेत्

श्रीमूला

यस्मिन् दिने प्रत्युक्तस्तस्मिन्नेव दिने प्रत्युत्तरमभियुक्तोवत्युपमर्देन स्वपक्षसमर्थनक्षमं न दद्याच्चेत्, परोक्तः स्यात् सद्यः प्रतिवचनाभावमात्रेण स पराजितो मन्तव्य इत्यर्थः। कुत इत्याह—कृतकार्यविनिश्चयो ह्यभियोक्ता नाभियुक्त इति। इदमीदृशमेवं साधनीयमिति प्रागेव सम्प्रधार्य कार्यप्रवृत्त इत्यभियोक्ता सपदि प्रत्युरदानप्रतिबद्धः, अन्यस्तु सम्प्रधारणीयकार्यगतित्वान्न तथेत्यर्थः।

अभियुक्तप्रतिवचनकालावधिमाह—तस्याप्रतिब्रुवतस्त्रिरात्रं सप्तरात्रमिति। तस्य अभियुक्तस्य श्रुतार्थस्य प्रतिवचनदानकालावधिस्त्रिरात्रात् प्रभृति आ सप्तरात्राद् अनुमन्तव्यः। अत ऊर्ध्वमिति। सप्तरात्रात् परतः, त्रिपणावरार्ध्यं त्रिपणोऽवरार्ध्यः अवरो यस्मिंस्तं तथाभूतं, द्वादशपणपरं द्वादशपणोत्तमं, दण्डं कुर्यात्। त्रिपक्षात् पक्षत्रयाद्, ऊर्ध्वम्, अप्रतिब्रुवतः अभियुक्तस्य, परोक्तदण्डं पराजितदण्डं पञ्चबन्धरूपं, कृत्वा, यानि अस्य अभियुक्तस्य, द्रव्याणि धान्यहिरण्यलोहदारुभाण्डादीनि स्युः, ततः तैर्द्रव्यैस्तदुद्धृतद्रव्यैर्वा, अभियोक्तारं प्रतिपादयेत्। यथाप्रार्थितधनभाजं कुर्यादित्यर्थः। किं सर्वैरेवाभियुक्तद्रव्यैः, नेत्याह—अन्यत्र वृत्युपकरणेभ्य इति। कृष्यादिजीविकार्थानि हलखनित्रकुद्दालानि वर्जयित्वा। तदेवेति। अप्रतिब्रुवतोऽभियुक्तस्य यदुक्तं विधानं तदेव, निष्पततोऽभियोक्तृसन्निधानेऽपसरतः अभियुक्तस्य कुर्यात्। अभियोक्तुः, निष्पातसमकालः निष्पातोऽभियुक्तसन्निधानेऽपसरणं तत्समानकालः, परोक्तभावः पराजितत्वं मन्तव्यम्। प्रेतस्य व्यसनिनो वा साक्षिवचनाः सारमिति। प्रमीतस्य विपद्गतस्य वाभियोक्तुरथवाभियुक्तस्य धनं साक्षिभिर्विभाव्यमानाः तत्पुत्रादयो दद्युर्गृह्णीयुर्वा। अभियुक्ते पराजिते निरुपाये किमभियोक्ता कुर्यादित्यत्राह—अभियोक्तेति। सः, दण्डं पराजयदण्डं, दत्त्वा स्वयं राज्ञे, कर्म कारयेत् अर्थादभियुक्तम्। आधिं वा स कामं प्रवेशयेदिति। अथवा, सः अभियोक्ता अभियुक्तवन्ध्वन्यतममाधित्वेन कर्म करणार्थं गृह्णीयाद् यथेच्छम्। रक्षोघ्नेत्यादि। वाशब्दश्चार्थे। रक्षोघ्नरक्षितम् अकुशलपरिहारार्थः शिरसि सितसर्षपप्रक्षेपो रक्षोघ्नरक्षा तद्युक्तं यथा भवति तथा कर्मणा प्रतिपादयेत् योजयेत्, अर्थात् पराजितं तदर्पितमाधिपुरुषं वा। एतेन, कर्म कारयितुरात्मरक्षणे प्रयत्नः कर्तव्यतयोपदिष्टो द्रष्टव्यः। इतरथा हि पराजित आधिपुरुषो वा कर्म कुर्वन्नवेतनकर्मकरण निर्बन्धमात्मनोऽसहमानः कारयितारं कदाचिज्जिघांसेदिति। 'कर्म कारयेद'स्यस्य विधेः सङ्कोचमाह—अन्यत्र ब्राह्मणादितीति। इतिशब्दात् क्षत्रियादरपि तपस्वी ब्राह्मणप्रकारो ग्राह्यः।

चाणक्यटीका

परोक्तस्य पराजयदण्डः पञ्चबन्धः। परिवा(द ? दित)स्य वस्तुनः पञ्चभाग इत्यर्थः। यदि पूर्वमभियुज्य च एत्य वा स्वयं भङ्गं प्रतिपद्यते तदा पूर्वस्मादर्धः।

साक्षिप्रतिवादिसन्निधापनार्थानां भृतानां या दिवसभृतिः पणाष्टभागः, पथिभक्तं भक्तदानम् (एवादिवस ?) कालापेक्षया अर्घविशेषात्। तदुभयं (राम्यान् ?) नियम्यः पराजित एव दद्यात्।

[धर्मप्रवर्तनमेव राजधर्मः]

चतुर्वर्णाश्रमस्यायं लोकस्याचाररक्षणात् ।
नश्यतां सर्वधर्माणां राजा धर्मप्रवर्तकः ॥१२१॥

चाणक्यटीका

अभियुक्तः असमाप्तव्यवहारः अभियोक्तारं न प्रत्यभियुञ्जीत, अन्यत्र कलहादिभ्यः अहमनेनापि पूर्वं पश्चादाक्रुष्ट इति ब्रूयात् । साहसेऽपि अभियुक्तश्चेद् ब्रूयादनेन (अद्वियेचार्यादिकृत्तभितोऽवेक्ष्य ?) सार्थमपि अनेन द्रव्यं कूटमुद्रया अपनीतम् । अभियुक्तश्चेद् ब्रूयादनेनापि सारम् असारेण प्रतिच्छादितम् अनेनापीति, उभयमनुसर्त्तव्यम् । जनपदादि (स)मवायेऽपि अनेन समवायो भिन्नः, अनेनापीति, उभावप्य-(नुम) न्तव्यौ । न चाभियुक्ते अभियोगोऽस्ति द्वितीयेनाभियोक्त्रेत्यर्थः ।

प्रत्युक्तः (प्रीतरात्तः ? परोक्तः) स्यात् । भङ्गकारणमाह—कृतकार्यविनिश्चय इति । एवं मया प्रतिपादनीयमिति प्रागेव अवधृतविचारपदनिश्चय इति न प्रतिब्रूयात् । (इतरस्तु तमभिस्यतीति योजयति प्रतीत्यर्थं न स्मरति आगमव्यानेनाचष्टव्यवहारः सुवाच्यम् ?) ।

असावपि चिरं नोपेक्ष्यः, तद्दर्शयति—तस्य अप्रतिब्रुवतः देशकालापेक्षया त्रिसप्तरात्रमेव उपेक्ष्यम्, अत ऊर्ध्वं त्रिपणं द्वादशपणपरं शनैर्दण्डं वर्धयेत् । न भङ्गमवतारयेत् । परोक्तदण्डं कृत्वेति यथोक्तं दण्डम् । ततोऽभियोक्तारमिति । तस्माद् सकाशाद् द्रव्याणि यथाभियोगम् अभियोक्तारं प्रतिपादयेत् लम्भयेत् । (अन्यत्र) वृत्त्युपकरणेभ्य इति । कर्षकादीनां कृषिकरणादिद्र(व्यार्थे ? व्येभ्य) इत्यर्थः ।

तदेव निष्पतत इति । तदेव वृत्त्युपकरणम् अन्ततः पलायमानस्य अभियुक्तस्य अभियोक्तार लम्भयेत् । निष्पातसमकालमिति पलायनसमकालं परोक्त (भावः) । प्रेत (यत ?) स्य (तिच ?) कृत्वा अधियोगकर्म तस्य जातव्यसनस्य वा निष्पतितस्य साक्षिवचनात्[1] सत्यासत्यतामुपलभ्य (परेभ्योऽभिभवः भङ्गमङ्गं वा ?) अपराधयेदित्यर्थः । असारं त्वभियुक्तं परोक्तश्च तदीयं दण्डं दत्त्वा अभियोक्ता कर्म कारयेद् आ स्वद्रव्यशुद्धेः ।

आधिं वा सकाममिति । यो ब्रूयाद् ऋणाय मा आध (मस्य ? त्स्व) इति तम् अन्यत्र आधिना प्रवेशयेत् । (रक्षोघ्ना) दिभिः प्रत्ययैर्वा कृताकृतरक्षं कर्मणा प्रतिपादयेत्, असम्प्रत्ययार्थं पुनवचनम् । ब्राह्मणं तु न कर्म कारयेत् । न चतुर्थाश्रमस्यायं यथोक्तभङ्गदण्डः ।

श्रीमूला

सम्यग्व्यवहारदर्शनस्य सर्वलोकयोगक्षेमसाधकतां श्लोकैराह—चतुर्वर्णेत्यादि ।

---

१. 'साक्षिवसनात् । सारं' इति, "साक्षिवचनमसारम्" इति च उभयत्राप्यपपाठौ मुद्रितकोशेषु ।

[धर्मादिषु चतुर्षु राजाज्ञाया एव प्राबल्यम्]

धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
विवादार्थश्चतुष्पादः पश्चिमः पूर्वबाधकः ॥१२२॥
अत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु ।
चरित्रं सङ्ग्रहे पुंसां राज्ञामाज्ञा तु शासनम् ॥१२३॥

श्रीमूला

अयं राजधर्मः सम्यग्व्यवहारदर्शनरूपः, चतुर्वर्णाश्रमस्य चत्वारो वर्णा ब्राह्मणादयः आश्रमाश्च ब्रह्मचर्यादयो यस्मिंस्तथाभूतस्य, लोकस्य, आचाररक्षणात् स्वस्वसमुदाचारपरिरक्षणाद्धेतोः नश्यतां सर्वधर्माणां स्वतः क्षीयमाणानां सर्वेषां धर्माणां, प्रवर्तकः प्रोज्जीवकः ।

चाणक्यटीका

लोकस्याचाररक्षणहेतुत्वात् । तदभावे नश्यतां सर्वधर्माणां प्रवर्त्त (कं ? कः) धर्मसंस्थ(मि ? इ)त्यर्थः । नार्थभूषणं राजधर्म एव ।

श्रीमूला

व्यवहारस्तावच्चतुष्पादः । तत्पादानां स्वरूपं बलाबलं चाह—धर्मश्चेति । धर्मो व्यवहारः चरित्रं राजशासनमिति चतुर्भिः पादैर्युक्तो, विवादार्थः विवादविषयोऽर्थः । पश्चिमः एषु पादेषु पश्चिमः चरमः पादः पूर्वबाधकः पूर्वान् पादान् बाधते सर्वपादापेक्षया प्रबल इत्यर्थः ।

धर्मादीनां स्वरूपमाह—अत्रेति । अत्र धर्मादिषु मध्ये, सत्ये स्थितः प्रतिष्ठितः धर्मः अर्थयाथात्म्यं धर्मपदार्थ इत्यर्थः । व्यवहारस्तु साक्षिषु स्थितः साक्षिवाक्यविभावनीयो व्यवहारपदार्थ इत्यर्थः । चरित्रं लोकाचारः, सङ्ग्रहे ग्रामसमूहे दशग्राम्यादौ, पुंसां प्रतिष्ठितम् । राज्ञाम् आज्ञा तु इदमित्थमेवेति न्यायोपपत्तियुक्तो यथार्हदण्डप्रणयनादिर्नियोगस्तु, शासनं राजशासनपदार्थः ।

चाणक्यटीका

पश्चिमः पूर्वबाधक इति । धर्मस्य विवादनिर्णयार्थस्य व्यवहारः । तस्यापि चरित्रम् । तस्यापि च मन्त्रम् । तत्रापि राजशासनम् ।

तत्र अर्थिप्रत्यर्थिनोरन्यतरस्य । सत्य इति सत्यप्रतिबद्धास्तुलादयोऽपि शपथाः प्रोच्यन्ते । तैरसाक्षिकं व्यवहारं निर्णयेत्, स धर्म इत्युच्यते । व्यवहारस्तु साक्षिषु प्रमाणेषु स्थितम्, तेषु शपथो नाश्रयणोयः । चरित्रं पुंसां सङ्ग्रहे एकवाक्यतया स्थितम्, इयमत्रास्तु व्यवस्थेति ।

[व्यवहारविशुद्धेः अदृष्टहेतुत्वम्]

राज्ञः स्वधर्मस्स्वर्गाय प्रजा धर्मेण रक्षितुः ।
अरक्षितुर्वा क्षेप्तुर्वा मिथ्यादण्डमतोऽन्यथा ॥१२४॥

[दण्डप्रशंसा]

दण्डो हि केवलो लोकं परं चेमं च रक्षति ।
राज्ञा पुत्रे च शत्रौ च यथादोषं समं धृतः ॥१२५॥

चाणक्यटीका

यथोच्यते—"देशस्य जातेः सङ्घस्य धर्मो ग्रामस्य वापि यः ।
उचितस्तस्य तेनैव दायधर्मं प्रवर्त्तयेत् ॥"
(अधि० २ अध्या० ७) इति ।

(तत्र साक्षिणेति अन्तर्भया दैवानुसारिणी यामाज्ञामर्थापराधा आज्ञा अर्थशास्त्रपतयः ?) शासनं तेन सर्वं बाध्यते ।

"तस्माद्धर्मान् यथेष्टेषु·········पार्थिवः ।
अनिष्टं[1] त्वप्यनिष्टेषु तद्धर्मान्न विचारयेत् ॥" इति ।

यथोक्तम्—अनर्थसंयुक्तं च व्यवहारे न्यू·····हि[2] ।

श्रीमूला

राज्ञ इति । राज्ञः, स्वधर्मः शस्त्राजीवो भूतरक्षणं च, स्वर्गाय भवति । कथम्भूतस्य, प्रजा धर्मेण रक्षितुः । अरक्षितुर्वा अरक्षकस्य वा क्षेप्तुर्वा मिथ्यादण्डम् अयथार्हदण्डं प्रणेतुर्वा, राज्ञः, अतोऽन्यथा उक्तादन्यः प्रकारः अर्थान्नरकः भवति । एवमदृष्टसाधकता सम्यग्व्यवहारदर्शनस्य दर्शिता ।

दण्डं प्रशंसति—दण्डो हीति । दण्डो हि, केवल एकोऽनितरसहायः, लोकं परं च इमं रक्षति उभयलोकसुखभोगसौभाग्यं प्रयोक्तुः प्रयच्छति । कथम्भूतोऽसौ, राज्ञा प्रयोक्त्रा, पुत्रे च शत्रौ च, यथादोषम् अपराधानुरूप्येण, समं धृतः अविशेषेण प्रयुक्तः ।

---

१. तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥
इति मुद्रितमनुकोशपाठः । (७.१३)

२. "वश्येन्द्रियः·······अनर्थसंयुक्तं च व्यवहारं वर्जयेत्" इति विनयाधिकारान्तर्गते राजर्षिवृत्ते कौटल्यः ।

[सम्यग्व्यवहारप्रवर्तनस्य ऐहिकफलहेतुत्वम्]

अनुशासद्धि धर्मेण व्यवहारेण संस्थया ।
न्यायेन च चतुर्थेन चतुरन्तां महीं जयेत् ॥१२६॥

[क्वचित् धर्मशास्त्रस्य क्वचिन्न्यायस्य च प्राबल्यम्]

संस्थया धर्मशास्त्रेण शास्त्रं वा व्यावहारिकम् ।
यस्मिन्नर्थे विरुध्येत धर्मेणार्थं विनिश्चयेत् (विनिर्णयेत्) ॥१२७॥
शास्त्रं विप्रतिपद्येत धर्मन्यायेन केनचित् ।
न्यायस्तत्र प्रमाणं स्यात्तत्र पाठो हि नश्यति ॥१२८॥

चाणक्यटीका

राज्ञः स्वधर्मो (यत ? क्तम्) अधिकं वा दधतः स्वर्गाय, अन्यथा (पत)नीयः स्यादित्यर्थः ।

अस्यैव समर्थनमाह—दण्डो हि केवल इति । तस्मात् (शुद्धो मनो न मुञ्च ?) पथा असङ्करेण रक्षति राज्ञा चान्ततः केवल इति । यस्माच्छुद्धः अत्रैव च यथादोषं समं धृतः न द्वेषादधिकं स्नेहाद् वा न्यूनीकृत इत्यर्थः ।

श्रीमूला

सम्यग्व्यवहारदर्शनस्य परमं दृष्टफलमाह—अनुशासद्धीति । अनुशासत् लोकं न्याय्ये पथि स्थापयन्, कथं, धर्मेण धर्मानुसारेण, व्यवहारेण साक्षिवाक्यानुसारेण, सस्थया लोकाचारेण, न्यायेन च चतुर्थेन न्यायोपपन्नराजकीयनिर्णयलक्षणेन चतुर्थपादरूपेण, चतुरन्तां चतुस्सागरपर्यंतां, महीं जयेत् । यथोक्तप्रकारानुशासनमहिम्ना सार्वभौमत्वं राजा प्राप्नुयादित्यर्थः ।

धर्मादिषु 'पश्चिमः पूर्ववाधकः' इति यत् पूर्वमुक्तं, तस्यापवाद माह—संस्थयेति । संस्थया महाजनाचारेण, धर्मशास्त्रेण मानवादिना च सह, शास्त्रं वा व्यावहारिकं शास्त्रं राजशासनं वा व्यावहारिकं साक्षिवच्च वा, यस्मिन्नर्थे विरुध्येत, यच्छब्देन तच्छब्दाक्षेपात् समर्थं, धर्मेण विनिर्णयेत् धर्मशास्त्रमपि विनिश्चिनुयात् । न तु तथाविधे विषये राजवचन-साक्षिवचनयोः प्रामाण्यमित्यर्थः ।

क्वचिद् धर्मशास्त्रमपि न्यायेन बाध्यत इत्याह—शास्त्रमिति । शास्त्रं मानवादिधर्मशास्त्रं, केनचिद् धर्मन्यायेन सर्वप्रकारोपपन्नेन धर्मयुक्तेन लोकाचारेण विप्रतिपद्येत अत्यन्तबाधितार्थविषयतया विरुध्येत, यत्रेति शेषः । तत्र, न्यायः, प्रमाणम् अर्थनिर्णयहेतुः स्यात् । कुतः, तत्र पाठो हि नश्यति यस्मात् तादृशे विषये धर्मशास्त्रवचनम् अदर्शनं प्राप्नोति, न प्रवर्तत इत्यर्थः ।

[साक्ष्याद्यतिरिक्तानि पञ्च व्यवहारसाधनानि]

दृष्टदोषस्स्वयंवादः स्वपक्षपरपक्षयोः ।
अनुयोगार्जवं हेतुः शपथश्चार्थसाधकः ॥१२९॥

श्रीमूला

"कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः ।"

इति सत्यपि स्मृतिवचने सेतोर्भिन्नस्य समीपे कुद्दालहस्तं कमपि शिशुं तिष्ठन्तं दृष्ट्वा न कोऽप्यध्यवस्यति—अनेन शिशुना सेतुर्भिन्न इति ।

चाणक्यटीका

धर्मेणेति । सत्येन साक्षिवचनेन चरित्रेण न्यायेन धर्मकामनया आ मूलात् शास्त्रानुरोधिना अर्थानुशासनेनेत्यर्थः ।

पश्चिमः पूर्वबाधक इति व्यासङ्गनिवृत्त्यर्थमाह—संस्थायेति । यत्र चरित्रेण वर्णाश्रमेण वा शास्त्रं सक्षिवचनादिप्रतिवद्धं तत्र धर्मेण निर्णयेत् । वर्णाश्रमधर्माविरोधे तु साक्षिभिश्चरित्रेण वेत्यर्थः ।

शास्त्रं विप्रति(पत्ति)शास्त्रं व्यवहा(रे ? रः)धर्मन्यायेन चेद् विरुध्यते तत्र शास्त्रोक्तं वा न्याय्यं (यतनी ? वाचरणी)यम्, (वायु ? न्याय)निरुद्धमुभयं हि नश्यति । नाचरणीयमित्यर्थः । तद्यथा—

"अपुत्रा शयनं पत्युः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणाद् द्रव्यं दायदास्तूर्ध्वमाप्नुयुः ॥" (कात्यायनः)

इति धर्मशास्त्रवचनम्[१] । "तीर्थोपरोधो हि धर्म(पर ? वधः ।)" (अधि० ३. अध्या० ४) इत्यर्थशास्त्रवचनम् । तत्र न्यायः चरित्ररक्ष(ण ? णा)समर्था चेद् अर्थशास्त्रोक्तमाचरणीयम् । असमर्था न क(यातिम् ? दाचिद्) उपरोद्धव्या, उपरोधे हि अननुज्ञातैः संसृज्यत इति ।

श्रीमूला

उक्तसाक्ष्याद्यतिरेकेण पञ्च व्यवहारसाधनान्याह—दृस्तेत्यादि । दृष्टदोषोऽर्थसाधकः दृष्टदोषः उपलब्धापराधचिह्नः दह्यमाने गृहे ज्वलितालातपाणिस्तदन्तस्तिष्ठन् जनः स्वाग्निदत्वानुमापकः, कायगतनवव्रणक्षरत्क्षतजोक्ष्यमाणभूमेर्वा कस्यचिद् रुधिरार्द्रशस्त्रपाणिः पार्श्वे तिष्ठन् स्वात्मनस्तच्छेतृत्वानुमापकः । स्वयंवादः मयैवेदं कृतमिति वादः, अर्थसाधकः अर्थनिर्णायकः । स्वपक्षपरपक्षयोरनुयोगार्जवं वादि-

---

१. "धर्मशास्त्रवचनमपीदम् "अपुत्रा पतिशयनं पालयन्ती गुरुसमीपे स्त्रीधनम् आ आयुःक्षयाद् भुञ्जीत । आपदर्थं हि स्त्रीधनम् । ऊर्ध्वं दायादं गच्छेत् ।" (३.२) इति कौटल्यग्रन्थपङ्क्त्या शब्दतोऽर्थतश्च साम्यं वहति ।

[पराजयहेतुभूताः अंशाः]

पूर्वोत्तरार्थव्याघाते साक्षिवक्तव्यकारणे ।
चारहस्ताच्च निष्पाते प्रदेष्टव्यः पराजयः ॥१३० ॥

इति धर्मस्थीये विवादपदनिबन्धः, प्रथमोऽध्यायः,
आदितोऽष्टपञ्चाशः

श्रीमूला

प्रतिवादिनोरजिह्मप्रश्नोत्तरकरणम्, अर्थसाधकम् । यथा—पथि शकटचक्रारोपणेन पादो मे भग्नः शाकटिकेनेति तं प्रति कस्यचिदभियोगे 'कुत एवं कृतवानसी' ति धर्मस्थेन पृष्टं शाकटिकं भयवशात् क्षणं तूष्णीम्भूतं दृष्ट्वा 'किमयं मूक' इति शङ्कमाने प्राड्विवाके 'बहुवारमेप मां शकटनिकटादपसरेति शृण्वत्सु शकटगजनेषु तदोक्तवान्' इदानीं तु मूक इव लक्ष्यते' इत्यभियोक्तुः प्रश्नोत्तरवचनमृजुभावेन प्रवृत्तम् अभियोज्य निरपराधत्वसमर्थकं सद्व्यवहारनिर्णयाय कल्पत इत्येवञ्जातीयं द्रष्टव्यम् । हेतुरर्थसाधकः उपपन्नकारणप्रदर्शनमर्थनिर्णायकम्, यथा—पारदारिकत्वविषयेऽभियोगेऽभियुक्तेनात्मनः क्लीबत्वनिवेदनम् । शपथः पुत्रादिभिः शपनम् उपलक्षणाद् दिव्यक्रिया च, सोऽर्थसाधकः ।

चाणक्यटीका

उक्तोपकारमाह—दृष्टदोष इति । प्रायप्ययं कलहकारः । तस्मादनेनैवायं कलहः कृत इति । स्वयं पदस्य प्रतिपत्तिः । स्वपक्षपरपक्षयोः वादिप्रतिवादिनोः पक्षयोः अनुपूर्वकः प्रश्न आर्जवं वा यस्य । सम्भावि(तं ? तो) हेतुः । (पूर्वानुशये तस्मादनेनैवाह ?) । सर्वाभावे शपथाश्चार्थस्य (मधो ? मिथो) निर्णयस्येति ।

श्रीमूला

पराजयनिमित्तान्याह—पूर्वोत्तरेत्यादि । पूर्वोत्तरार्थव्याघाते चोरोऽयमिति शङ्क्यमानस्य 'क्व भुक्तं क्व शयितं त्वये'त्यादि पृष्टस्य प्रत्युक्तौ पूर्वोत्तरविरोधे, साक्षिवक्तव्यकारणे साक्षिणां वक्तव्यस्याप्रामाण्यदोषस्य कारणे बन्धुत्वोपकार्यत्वादिरूपे निमित्ते, चारहस्ताच्च निष्पाते बन्धनागारिकहस्तात् प्रच्छन्नपलायने च सति, पराजयः, प्रदेष्टव्यः स्थापयितव्यः ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
प्रथमोऽध्यायः विवादपदनिबन्धः,
आदितोऽष्टपञ्चाशः ॥

चाणक्यटीका

पूर्वं निबद्धस्य उत्तरेण वचनेन व्याघाते, साक्षिवक्तव्ये स्यालादीनाम् उद्देशे, चारहस्ताच्च निष्पाते आरक्षिभ्योऽपक्रमणे, प्रदेष्टव्यः पराजयः परिच्छेत्तव्यः एवंकारिणो भङ्ग इति।

॥ इति प्रथमं प्रकरणम्, प्रथमश्चाध्यायः[1] ॥

---

१. चाणक्यटीकाया इयानेवादर्शः समुपलब्धः। अन्ते च माधवयज्वकृतायाः कौटल्यव्याख्याया सप्तमाधिकरणीयषष्ठाध्यायान्तिमं वाक्यं सप्तमाध्यादिमं च वाक्यशकलं लिखितमस्ति। यथा—

गूढवधे स्वर्णलक्षणाद्दिदानम् इत्येतास्तूष्णीं युद्धस्य लक्षणम् असाधारणरूपम् इत्यर्थः। इति षाड्गुण्ये नयचन्द्रिकायां संहितप्रयाणिकं परिपणितादिसन्धयश्च: षष्ठोऽध्यायः॥

तदेवं परिपणितादिभेदसन्धिम्"""सम्प्रति तेषामेव द्वैधीभाविकानां समहीनांशलाभ"""॥

एकोनषष्टितमं प्रकरणम्

द्वितीयोऽध्यायः ।

विवाहसंयुक्तम् ।

तत्र विवाहधर्मः, स्त्रीधनकल्पः आधिवेदनिकश्च

[विवाहधर्मः—तत्र विवाहनिरूपणप्राथम्ये हेतुः]

विवाहपूर्वो व्यवहारः ।

[अष्टौ विवाहभेदाः, तेषु धर्म्याः अधर्म्याश्च]

कन्यादानं कन्यामलङ्कृत्य ब्राह्मो विवाहः । सहधर्मचर्या

श्रीमूला

विवाहसंयुक्तमिति सूत्रम् । विवाहा अष्टविधाः ब्राह्मप्राजापत्यार्षदैवगान्धर्वाऽऽसुरराक्षसपैशाचाख्याः तत्संयुक्तं तत्सम्बद्धं स्त्रीधनकल्पादि, तदिहाभिधीयत इति सूत्रार्थः । व्यावहारिकाणामर्थानामनुष्ठानप्रकार उक्तः, व्यवहाराणां प्रतिपादनमधुना प्रस्तूयते । तेषु च ऋणादानादिषु कतमः पूर्वनिरूपणार्ह इति चिन्तायाम्, ऋणादानपूर्वो व्यवहार इति मनुः । वास्तुकपूर्वो व्यवहार इति भार्गवः । निक्षेपपूर्वो व्यवहार इति बृहस्पतिः । कौटल्यस्तु—गृहस्थस्यैव व्यवहारेष्वधिकाराद् गार्हस्थ्यं प्रति च विवाहस्यैव हेतुत्वाद् विवाहसंयुक्तव्यवहार एव व्यवहारेषु मुख्य इति विवाहसंयुक्तप्रकरणमेवादौ निरूपणीयं मन्यते । यदाहुः—

"ऋणमादौ मनुर्ब्रूते वास्तुकं भार्गवो मुनिः ।
बृहस्पतिस्तु निक्षेपं विवाहं कुटलान्वयः ॥" इति ।

इदं प्रकरणं त्रिभिरध्यायैर्वितन्यते । तत्रादिमे विवाहधर्मः, स्त्रीधनकल्पः, आधिवेदनिकमिति त्रिकं प्रतिपाद्यते, द्वितीये शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाः, तृतीये निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासो दीर्घप्रवासश्चेति ।

विवाहसंयुक्तस्य प्रथमं निरूपणे हेतुं निर्दिशति—विवाहपूर्वो व्यवहार इति । व्यवहार इति जातावेकवचनं, सर्वे व्यवहाराः विवाहमूलाः । विवाहपूर्वत्वं चोपपादितम् ।

विवाहभेदांस्तल्लक्षणप्रदर्शनपूर्वमाह—कन्यादानमिति । कन्यामलङ्कृत्य यत् तस्याः प्रदानं, स विवाहो ब्राह्म इत्युच्यते ।

प्राजापत्यः। गोमिथुनादानात् आर्षः। अन्तर्वेद्यामृत्विजे दानात् दैवः। मिथस्समवायात् गान्धर्वः। शुल्कादानात् आसुरः। प्रसह्यादानात् राक्षसः। सुप्तादानात् पैशाचः। पितृप्रमाणाश्चत्वारः पूर्वे धर्म्याः, मातापितृप्रमाणाः शेषाः। तौ हि शुल्कहरौ दुहितुः। अन्यतराभावेऽन्यतरो वा।

[विवाहसमयलब्धेषु धनेषु कन्ययैव ग्राह्या अंशाः,
तद्विभागतदुपयोगव्यवस्थादयश्च]

द्वितीयं शुल्कं स्त्री हरेत। सर्वेषां प्रीत्यारोपणमप्रतिषिद्धम्। वृत्तिराबन्ध्यं वा स्त्रीधनम्। परद्विसाहस्रा स्थाप्या वृत्तिः आबन्ध्याऽनियमः।

श्रीमूला

सहधर्मं चर्येति। 'सहधर्मश्चर्यतामि'त्येतावदुक्त्वा समन्त्रकं यत् कन्या दीयते, स प्राजापत्याख्यः।

गोमिथुनादानादिति। वरसकाशाद् गोद्वयं गृहीत्वा यत् कन्या दीयते, स आर्षः।

अन्तर्वेद्यामिति। यज्ञवेदिमध्ये स्थिताय ऋत्विजे यद् दीयते, स दैवः।

मिथस्समवायादिति। कन्यावरयोर्निजेच्छयान्योन्यसंयोगाद् गान्धर्वो विवाहो भवति।

शुल्कादानादिति। आत्मार्थे कन्यार्थे च वराच्छुल्कं गृहीत्वा यत् कन्यादानं, स आसुराख्यः।

प्रसह्यादानादिति। बलात्कारेण कन्याहरणाद् राक्षसविवाहो भवति।

सुप्तादानादिति। सुप्ताया हरणात् पैशाचाख्यो विवाहः।

पितृप्रमाणा इति। एतेष्वष्टसु विवाहेषु पूर्वे ब्राह्मादयश्चत्वारः, पितृप्रमाणाः धर्म्याः पितृप्रमाणत्वाद् धर्मयुक्ताः। अन्ये त्वधर्म्या इत्यर्थसिद्धम्। मातापितृप्रमाणा इति। माता पिता चेत्युभौ प्रमाणभूतौ येषां ते तथाभूताः, शेषाः गान्धर्वादयः। कस्मान्मातापितृप्रमाणकत्वमित्याह—तौ हीत्यादि। मातापितरौ हि, शुल्कहरौ दुहितुः कन्याशुल्कं गृह्णीतः। अन्यतराभावे अन्यतरो वा माता पिता वा शुल्कं हरति। एवं विवाहधर्म उक्तः।

स्त्रीधनं प्रस्तौति—द्वितीयमिति। द्वितीयं शुल्कं वरसकाशग्राह्यपरिभाषितशुल्कव्यतिरिक्तं शुल्कं प्रीतिवशाद् दत्तं, स्त्री कन्यैव हरेत, न तु पितरौ। सर्वेषां प्रीत्यारोपणमप्रतिषिद्धमिति। वरेण न केवलं वरबन्ध्वादिभिः सर्वैरपि कन्याया देहे भूषणादिनिवेशनम् अप्रतिषिद्धम् अनिवारितम्। अर्थात् तदपि कन्यैव हरेत।

तदात्मपुत्रस्नुषाभर्मणि प्रवासाप्रतिविधाने च भार्याया भोक्तुमदोषः, प्रतिरोधकव्याधिदुर्भिक्षभयप्रतीकारे धर्मकार्ये च पत्युः। सम्भूय वा दम्पत्योर्मिथुनं प्रजातयोस्त्रिवर्षोपभुक्तं च धर्मिष्ठेषु विवाहेषु नानुयुञ्जीत। गान्धर्वासुरोपभुक्तं सवृद्धिकमुभयं दाप्येत। राक्षसपैशाचोपभुक्तं स्तेयं दद्यात्। इति विवाहधर्मः।

[स्त्रीधनकल्पः—मृतपतिकस्त्रीधनस्य स्त्रीवृत्त्या-
द्यानुगुण्येन विनियोगभेदाः]

मृते भर्तरि धर्मकामा तदानीमेवास्थाप्याभरणं शुल्कशेषं च लभेत। लब्ध्वा वा विन्दमाना सवृद्धिकमुभयं दाप्येत। कुटुम्बकामा तु श्वशुरपतिदत्तं

श्रीमूला

तदिदं कन्याहरणीयं स्त्रीधनशब्दितं द्विरूपमित्याह—वृत्तिराबन्ध्यं वा स्त्रीधनमिति। वृत्तिर्भूमिहिरण्यादिर्जीविकार्था, आबन्ध्यं भूषणादि। परद्विसाहस्रा कार्षापणसहस्रद्वयपरमावधिः, वृत्तिः, स्थाप्या कल्पयितुमर्हा। आबन्ध्यानियमः आभरणस्य सङ्ख्यानियमाभावः।

तदिति। तत् स्त्रीधनम्, आत्मपुत्रस्नुषाभर्मणि स्वस्य पुत्राणां तद्भार्यायाश्च पोषणे, प्रवासाप्रतिविधाने च भर्तृविदेशगमननिमित्ते जीविकोपायविरहसङ्कटे च, भार्याया, भोक्तुम्, अदोषः दोषाभावः। प्रतिरोधकेत्यादि। 'साम्प्रतमेवादत्त्वा मा याही' त्येवं रोधेन हरणं प्रतिरोधकं तत्प्रतीकारे व्याधिप्रतिकारे दुर्भिक्षप्रतीकारे भयप्रतीकारे च, धर्मकार्ये च विषये, पत्युः स्त्रीधनव्ययकारिणः, अदोष इत्यनुवर्तते। इतोऽपि स्त्रीधनस्य व्ययाद् भर्तुरदोष इत्याह—सम्भूय वेति। दम्पत्योः, मिथुनं प्रजातयोः अपत्यद्वयं यद्वा पुमपत्यमेकं स्त्र्यपत्यं चैकं जनितवतोः, सम्भूय मिलित्वा, त्रिवर्षोपभुक्तं च स्त्रीधनं, धर्मिष्ठेषु विवाहेषु ब्राह्मादिषु चतुर्षु, नानुयुञ्जीत नार्थयेत प्रत्यर्पयेति। गान्धर्वेत्यादि गान्धर्वासुरोपभुक्तम्, उभयं धर्मकार्यादिविनियुक्तं सम्भूय त्रिवर्षोपभुक्तञ्च समनन्तरोक्तं द्विरूपं स्त्रीधनं, सवृद्धिकं, दाप्येत निर्यात्येत। राक्षसेत्यादि। राक्षसपैशाचोपभुक्तं स्त्रीधनं, स्तेयं दद्यात् स्तेयं चौर्यं चोरितद्रव्यं तदिव दद्यात् चोरदण्डयुक्तं दद्यादित्यर्थः।

इति विवाहधर्मं इति। व्याख्यात इति शेषः।

स्त्रीधनकल्पमाह—मृत इति। मृते भर्तरि, धर्मकामा भर्तुरात्मनश्च परलोकहितं धर्मं कामयमाना, तदानीमेव सद्य एव, आस्थाप्याभरणं देहधृतं भूषणमवतार्य शुल्कशेषं च सह भुक्तावशिष्टं शुल्कं चकारादाभरणं च, लभेत। लब्ध्वा वेति। आभरणं शुल्कशेषं चाधिगम्य, विन्दमाना भर्त्रन्तरं परिगृह्णती, सवृद्धिकम्, उभयं दाप्येत कुटुम्बकामा तु सन्तानकामनया देवरं भजमाना तु, श्वशुरपतिदत्तं स्त्रीधनं,

निवेशकाले लभेत। निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः।

श्वशुरप्रातिलोम्येन वा निविष्टा श्वशुरपतिदत्तं जीयेत। ज्ञातिहस्तादभिमृष्टायाः ज्ञातयो यथागृहीतं दद्युः। न्यायोपगतायाः प्रतिपत्ता स्त्रीधनं गोपायेत्। पतिदायं विन्दमाना जीयेत। धर्मकामा भुञ्जीत। पुत्रवती विन्दमाना स्त्रीधनं जीयेत। तत्तु स्त्रीधनं पुत्रा हरेयुः। पुत्रभरणार्थं वा विन्दमाना पुत्रार्थं स्फातीकुर्यात्। बहुपुरुषप्रजानां पुत्राणां यथापितृदत्तं स्त्रीधनमवस्थापयेत्। कामकारणीयमपि स्त्रीधनं विन्दमाना पुत्रसंस्थं कुर्यात्। अपुत्रा पतिशयनं पालयन्ती गुरुसमीपे स्त्रीधनम् आ आयुःक्षयाद् भुञ्जीत।

श्रीमूला

निवेशकाले लभेत। कोऽसौ निवेशकालः तत्राह—निवेशकालं हीत्यादि। दीर्घप्रवासे उत्तरतराध्यायव्युत्पादिते।

श्वशुरप्रातिलोम्येन वेति। श्वशुरशासनातिक्रमेण, निविष्टा भर्त्रन्तरं गता, श्वशुरपतिदत्तं जीयेत श्वशुरेण पत्या च दत्तं दाप्येत। ज्ञातिहस्तादभिमृष्टाया इति। विद्यमान एव पत्यौ पत्यन्तरपरिगृहीतायाः, ज्ञातयः नवपतयः यथागृहीतं गृहीतान्यूनं श्वशुरपतिदत्तं, दद्युः अर्थाच्छ्वशुराय पत्ये च।

न्यायोपगताया इति। न्यायेन देवरादिमुपगतायाः, प्रतिपत्ता परिग्रहीता, स्त्रीधनं गोपायेत् रक्षेत् न तु स्वयमुपयुञ्जीत।

पतिदायमिति। पत्या दत्तं वस्त्राभरणादिकं, विन्दमाना भर्त्रन्तरपरिग्राहिणो, जीयेत दाप्येत, श्वशुरकुलाय। धर्मकामा भुञ्जीतेति। अविन्दमाना संयता चेत् पतिदायं भुञ्जीत।

पुत्रवतीति। पुत्रयुक्ता, भर्त्रन्तरगामिनी, जीयेत दाप्येत स्त्रीधनं न स्वयं भुञ्जीतेत्यर्थः। के तद्भोक्तारः, तत्राह—तत्तु स्त्रीधनमित्यादि।

पुत्रभरणार्थं वेति। पुत्रपोषणार्थं, विन्दमाना पुत्रार्थं पुत्रनिमित्ते, स्फीतीकुर्यात् वर्धयेत् स्त्रीधनम्।

बहुपुरुषप्रजानामित्यादि। यासां बहवो भर्तारः पुत्राश्च तासां, स्त्रीधनं, यथापितृदत्तं पुत्राणामवस्थापयेत् तत्तद्भर्तृदत्तं तत्तद्भर्तृजनित पुत्रार्थे दद्यात्।

कामकारणीयमपीति। यथेच्छविनियोज्यमपि, स्त्रीधनं विन्दमाना भर्त्रन्तरगामिनी, पुत्रसंस्थं कुर्यात् पुत्राय दद्यात्। अपुत्रेति। पुत्रहीना, पतिशयनं पालयन्ती पतिव्रता गुरुसमीपे स्त्रीधनम्, आ आयुःक्षयाद् यावज्जीवं, भुञ्जीत मूलमविनाशयन्त्यती वृथादिकं सञ्जातमात्रमुपयुञ्जीतेत्यर्थः।

आपदर्थं हि स्त्रीधनम् । ऊर्ध्वं दायादं गच्छेत् ।

[मृतस्त्रीधनभागिनः]

जीवति भर्तरि मृतायाः पुत्राः दुहितरश्च स्त्रीधनं विभजेरन्, अपुत्रायाः दुहितरः, तदभावे भर्ता । शुल्कमन्वाधेयमन्यद्वा बन्धुभिर्दत्तं बान्धवा हरेयुः । इति स्त्रीधनकल्पः ॥

[आधिवेदनिकम्—पुत्रार्थिनो बहुभार्यापरिग्रहानुमतिः, कालादिनियमश्च]

वर्षाण्यष्टौ अप्रजायमानामपुत्रां वन्ध्यां चाकाङ्क्षेत, दश बिन्दुं, द्वादश कन्याप्रसविनीम् । ततः पुत्रार्थी द्वितीयां विन्देत । तस्यातिक्रमे शुल्कं स्त्रीधनमर्धं चाधिवेदनिकं दद्यात् । चतुर्विंशतिपणपरं च दण्डम् ।

श्रीमूला

कुतः, आपदर्थं हि स्त्रीधनं वृत्तिकृच्छ्रपरिहारमात्रविनियोज्यं हि स्त्रीधनं नाम न पुनः कामचारव्ययार्थम् । ऊर्ध्वं दायादं गच्छेदिति । तथा तथा रक्षितं स्त्रीधनं तस्यामुपरतायां भर्तृसपिण्डं गच्छेत् ।

ध्रियमाणे पत्यौ प्रमीतायाः स्त्रीधनं पुत्रा दुहितरश्चाविशेषाद् विभजेयुः, पुत्राभावे दुहितरः तदुभयाभावे तु पतिर्गृह्णीयादित्याह—जीवतीत्यादि ।

आसुराद्यधर्म्यविवाहविषये तु स्त्रीधनं न भर्तृगामि, किन्तु स्त्रीबन्धुगामीत्याह—शुल्कमित्यादि । शुल्कं प्रतीतम्, अन्वाधेयं पितृगृहानीतम्, अन्यद् वा, बन्धुभिर्भ्रात्रादिभिः दत्तं स्त्रीधनं, बान्धवाः पित्रादयः, हरेयुः ।

इति स्त्रीधनकल्प इति । अनेन प्रकारेण स्त्रीधनविनियोगविधिर्व्याख्यातः ।

अथाधिवेदनिकमाह—वर्षाणीति । अप्रजायमानां सकृत् प्रसूय पुनर्गर्भमगृह्णतीम्, अपुत्रां व्याध्यादिवशात् पुत्ररहितां, वन्ध्यां च गर्भधारणायोग्यां च, अष्टौ वर्षाणि, आकाङ्क्षेत प्रतिपालयेत् पुत्रं प्रसूते नवेति परीक्षार्थम् । दश बिन्दुं दश वर्षाणि नश्यत्प्रसूतिं, प्रतिपालयेत् । द्वादश कन्याप्रसविनीं स्त्र्यपत्यप्रसवशीलां द्वादश वर्षाणि आकाङ्क्षेत । काङ्क्षतेरात्मनेपदमार्षम् ।

तत इति । यथोक्तकालप्रतीक्षानन्तरं पुत्रप्रसवाभावे, पुत्रार्थी पुत्रकामश्चेद्, द्वितीयां विन्देत अन्यामुद्वहेत् । तस्येति । यथोक्तकालनियमस्य, अतिक्रमे अननुवर्तने, शुल्कं, स्त्रीधनम्, अर्धं चाधिवेदनिकं परिणीताया उपरि अन्यस्याः परिणयनमधिवेदनं तन्निमित्तं यद् द्रव्यं गतं तस्यार्धं च, दद्याद् अधिविन्नायै । चतुर्विंशतिपणपरं च दण्डमिति । चतुर्विंशतिपणोत्तमं नियमातिक्रमदण्डं च, राज्ञे दद्यात् ।

शुल्कं स्त्रीधनमशुल्कस्त्रीधनायास्तत्प्रमाणमाधिवेदनिकम् अनुरूपां च वृत्तिं दत्त्वा बह्वीरपि विन्देत । पुत्रार्था हि स्त्रियः

[परिगृहीतपत्नीनाम् ऋतुयौगपद्ये तद्गमनविधिः]

तीर्थसमवाये चासां यथा विवाहं पूर्वोढां जीवत्पुत्रां वा पूर्वं गच्छेत् । तीर्थगूहनाऽगमने षण्णवतिर्दण्डः ।

[स्त्रीष्वगम्यानां निर्देशः, तादृशीनामेव
पुरुषाणां क्वचिद्गम्यता च]

पुत्रवतीं धर्मकामां वन्ध्यां निन्दुं नीरजस्कां वा नाकामामुपेयात् । न चाकामः पुरुषः । कुष्ठिनीमुन्मत्तां वा न गच्छेत् । स्त्री तु पुत्रार्थमेवंभूतं वोपगच्छेत् ।

[भर्तुरपि क्वचित्त्याज्यता]

नीचत्वं परदेशं वा प्रस्थितो राजकिल्विषी ।
प्राणाभिहन्ता पतितस्त्याज्यः क्लीबोऽपि वा पतिः ॥१६१॥

इति धर्मस्थीये विवाहसंयुक्ते विवाहधर्मः स्त्रीधनकल्प आधिवेदनिकं
च द्वितीयोऽध्यायः । आदित एकोनषष्टितमः ।

श्रीमूला

नवं शुल्कं स्त्रीधनम् आधिवेदनिकतुल्यमानं द्रव्यं तत्तद्विवाहोचितशरीरयात्रोपायं च प्रतिपाद्य बह्वीनामप्यधिवेदनं न दुष्यतीत्याह—शुल्कमित्यादि । तत्र हेतुवचनं—पुत्रार्था हि स्त्रिय इति । अनेन पूर्वपरिणीतानाम् अपुत्रवतीनां निष्फलजन्मत्वादुपेक्षणं न्याय्यमिति दर्शयति ।

बह्वीनाम् ऋतुयौगपद्येऽभिगमनविधिमाह—तीर्थसमवाये चासामिति । तीर्थं स्त्रीपुष्पं तत्समवाये बह्वीनां पत्नीनां युगपदृतुप्राप्तौ, यथाविवाहं ब्राह्मादिविवाहक्रममनपहाय, पूर्वं गच्छेत् । विवाहतुल्यतायामाह—पूर्वोढां पूर्वकालपरिणीतां, जीवत्पुत्रां वा अपूर्वोढामपि, पूर्वं गच्छेत् ।

तीर्थेत्यादि । तीर्थगूहनागमने तीर्थस्याप्रकाशने भर्त्रनभिगमने च, षण्णवतिः षण्णवतिपणः, दण्डः । पुत्रवतीमिति । पुत्रवतीं, धर्मकामां वन्ध्यां पुत्रार्थव्रतोपवासिनीं वन्ध्यां, निन्दुं नश्यत्प्रसूतिं, नीरजस्कां वा निवृत्तार्तवां वा, अकामाम् अनिच्छन्तीं, नोपेयात् न गच्छेत्, अर्थात् पुरुषः सकामोऽपि । न चाकामः पुरुषः, उपेयात् अर्थात् सकामामपि । कुष्ठिनीम् उन्मत्तां वा, न गच्छेत्, पुरुषः । स्त्री तु, पुत्रार्थं पुत्रोत्पत्त्यर्थम्, एवंभूतं वा कुष्ठिनमुन्मत्तं वा उपगच्छेत् ।

अध्यायप्रान्ते श्लोकमाह—नीचत्वमित्यादि । नीचत्वं परदेशं वा प्रस्थितः

श्रीमूला

नीचत्वं गतो वा विदेशं गतो वा, राजकिल्बिषी राजदुष्पुरोहितो राजदुष्प्रतिग्रही राजयक्ष्मवांश्च इति त्रिरूपः, प्राणाभिहन्ता नरमारकः, पतितः महापातकदूषितः, क्लीबोऽपि वा षण्डो वा, पतिः, त्याज्यः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे द्वितीयोऽध्यायः । विवाहसंयुक्ते विवाहधर्मः, स्त्रीधनकल्पः, आधिवेदनिकम्, आदित एकोनषष्टितमः ॥

तृतीयोऽध्यायः

शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाश्च ।

[शुश्रूषार्हवयोव्यवस्था]

द्वादशवर्षा स्त्री प्राप्तव्यवहारा भवति । षोडशवर्षः पुमान् । अत ऊर्ध्वम् अशुश्रूषायां द्वादशपणः स्त्रिया दण्डः पुंसो द्विगुणः ॥

[गृहभरणनियुक्ताभ्यः स्त्रीभ्यः भरणोपकरणार्पणव्यवस्थाः]

भर्मण्यायाम् अनिर्दिष्टकालायां ग्रासाच्छादनं वाऽधिकं यथापुरुषपरिवापं सविशेषं दद्यात् । निर्दिष्टकालायां तदेव सङ्ख्याय बन्धं च दद्यात्; शुल्कस्त्रीधनाधिवेदनिकानामनादाने च ।

श्रीमूला

पूर्वाध्याये विवाहधर्मादिकमुक्तम् । इह तु शुश्रूषादय उच्यन्ते । तत्र शुश्रूषा परिचरणं, भर्म कुटुम्बभरणनियोगः, पारुष्यं वाक्पारुष्यं दण्डपारुष्यं च, द्वेषः अप्रीतिः, अतिचारः प्रतिषिद्धाचरणम्, उपकारव्यवहारप्रतिषेधः जनविशेषविषयोपकाराचरणनिषेधः ।

द्वादशवर्षेति अतिक्रान्तद्वादशवयस्का स्त्री, प्राप्तव्यवहारा व्यवरारयोग्या परिचरणकर्मनियोजनार्हा भवति । षोडशवर्षः पुमान्, प्राप्तव्यवहारः भवति । अत ऊर्ध्वम्, अशुश्रूषायाम् अपरिचर्यायां द्वादशपणः स्त्रियाः दण्डः, पुंसो द्विगुणः चतुर्विंशतिपणो दण्डः ।

भर्मण्यायामिति । गृहभरणनियुक्तायाम्, अनिर्दिष्टकालायाम् अद्यैतावद् गृहीतमेतावद् विनियुक्तमित्यकृतकालनिर्देशायां, ग्रासाच्छादनं वार्षिकं ग्रासमाच्छादनं च पर्याप्तं किञ्चिदधिकं वा, यथापुरुषपरिवापं गृहभरणीयजनोपकरणानतिक्रमणे, सविशेषं सातिशयं दद्याद् असङ्ख्यायैव । निर्दिष्टकालायां तदेव ग्रासाच्छादनमेव न तु ततोऽधिकं, संख्याय एकस्याहोरात्रस्यैतावदितीयत्तामाकलय्य दद्यादित्यनुषज्यते । बन्धं च दद्यात् विवदमानायां तस्यां साध्यद्रव्यस्य पञ्चभागं दशभागं च दद्यात् । शुल्कादीनामनादाने च शुल्कस्त्रीधने प्रतीते आधिवेदनिकम् अधिवेदननिमित्तं पत्या दत्तम् ''एतेषामग्रहणेऽपि, बन्धं दद्यात् ग्रहणे तु का कथेत्यर्थः ।

श्वशुरकुलप्रविष्टायां विभक्तायां वा नाभियोज्यः पतिः—इति भर्म ।

[वाग्दण्डपारुष्ये, द्वेषे दण्डाश्च]

"नग्ने ! विनग्ने ! न्यङ्गे ! अपितृके ! अमातृके !" इत्यनिर्देशेन विनयग्राहणम् । वेणुदलरज्जुहस्तानामन्यतमेन वा पृष्ठे त्रिराघातः तस्यातिक्रमे वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः । तदेव स्त्रिया भर्तरि प्रसिद्धमदोषाया ईर्ष्याया बाह्यविहारेषु द्वारेषु । अत्ययो यथानिर्दिष्टः—इति पारुष्यम् ॥

भर्तारं द्विषती स्त्री सप्तार्तवान्यमण्डयमाना तदानीमेव स्थाप्याभरणं निधाय भर्तारम् अन्यया सह शयानमनुशयीत । भिक्षुक्यन्वाधिज्ञातिकुलानामन्यतमे वा भर्ता द्विषन् स्त्रियम् एकाम् अनुशयीत ।

श्रीमूला

श्वशुरेत्यादि । श्वशुरकुलप्रविष्टायां विभक्तायां वा श्वशुरगृहप्राप्तायां वा भर्तृकृतविभागायां वा स्त्रियां, नाभियोज्यः पतिः भर्ता तया अभियोक्तुं न योग्यो ग्रासाच्छादनार्थे । इति भर्मेति । व्याख्यातमिति शेषः ।

पारुष्यमाह—नग्ने इत्यादि । नग्ने । असंस्कृतबुद्धित्वात् कोट्टवीतुल्ये, विनग्ने । विशेषेण नग्ने । नष्टे । विनष्टे । इति पाठे स्फुट एवार्थः । न्यङ्गे । निन्द्ये अङ्गहीने वा अपितृके । अमातृके । कुत्सितपितृके । कुत्सितमातृके, इत्यनिर्देशेन एवम्प्रकारेण साक्रोशसम्बोधनेन, विनयग्राहणं सदाचारस्योपदेशना कर्तव्या । अनिर्देशेन विनयासिद्धावाह—वेणुदलेत्यादि । वेणुदलादीनां त्रयाणाम् अन्यतमेन वा पृष्ठे, त्रिराघातः त्रीणि ताडनानि, कर्तव्यानि । तस्यातिक्रमे उक्तस्य द्विविधस्य पारुष्यस्य अतिक्रमे विहितविजातीयारुन्तुदाक्रोशकरणे अवेण्वादिना अपृष्ठे सकृदपि वाघाते वेण्वाद्यन्यतमेन पृष्ठ एव चतुराघाते चेत्यर्थः, वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः वाक्पारुष्यदण्डाद् दण्डपारुष्यदण्डाच्च वक्ष्यमाणादर्धदण्डाः, भवन्ति ।

गणिकाद्यासक्तिनिमित्तकेर्ष्यावशाद् भर्तरि विषये स्त्रियाः पतिव्रतायाः पारुष्यस्य प्रसक्तस्य मात्रामाह—तदेवेत्यादि । तदेव भर्तुर्यादृशमुक्तं तादृशमेव । द्वारेषु पारुष्यप्रयोगस्थानेषु । अत्ययो यथानिर्दिष्ट इति, उक्ता विध्यतिक्रमनिमित्तः स्त्रियः दण्डः वाक्पारुष्यदण्डपारुष्योक्त एव न त्वर्धदण्डः पुंस इव । इति पारुष्यं, व्याख्यातम् ।

द्वेषमाह—भर्तारमिति भर्तारं द्विषती आरोचयमाना, स्त्री, सप्तार्तवानि सप्त ऋतुकालान् अमण्डयमाना शयनार्थमनुपतिष्ठमाना प्रतीक्ष्येतेति शेषः । ततो मण्डयमाना किं कुर्यादित्याह—तदानीमेव सद्य एव, स्थाप्याभरणं निधाय स्थाप्यशब्दो न्यासवाची स्वीयं भूषणम् अपुनर्द्वेषप्रत्ययार्थं भर्तुर्न्यासं कृत्वा, अन्यया सह शयानं भर्तारम् अनुशयीत ।

दृष्टे लिङ्गे, मैथुनापहारे, सवर्णापसर्पोपगमे वा मिथ्यावादी द्वादशपणं दद्यात् । अमोक्ष्या भर्तुरकामस्य द्विषती भार्या, भार्यायाश्च भर्ता । परस्परं द्वेषान्मोक्षः । स्त्रीविप्रकाराद्वा पुरुषश्चेन्मोक्षमिच्छेत्, यथागृहीतमस्यै दद्यात् । पुरुषविप्रकाराद्वा स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीतं दद्यात् । अमोक्षो धर्मविवाहानामिति—इति द्वेषः ॥

[अतिचारे (प्रतिषिद्धाचरणे) दण्डाः]

प्रतिषिद्धा स्त्री दर्पमद्यक्रीडायां त्रिपणं दण्डं दद्यात् । दिवा स्त्रीप्रेक्षाविहारगमने षट्पणो दण्डः, पुरुषप्रेक्षाविहारगमने द्वादशपणः, रात्रौ

श्रीमूला

सपश्चात्तापमुपतिष्ठेत । स्त्रियाः स एव भर्तृद्वेषदण्डो बोद्धव्यः । स्त्रियं द्विषतो भर्तुर्विधिमाह—भिक्षुकीत्यादि । भर्ता, द्विषन् स्त्रियं, भिक्षुक्यादिकुलानां भिक्षुको शान्तशुद्धव्यवहारिणी श्रमणी अन्वाधिः स्त्रीधनाधिष्ठाता ज्ञातिर्बन्धुः एषां कुलानि गृहाणि तेषाम्, अन्यतमे न त्वन्यकुले वसन्तीमिति शेषः, एकां पुरुषान्तरमस्पृशन्तीं ताम्, अनुशयीत अनुतपन् स्वयमुपतिष्ठेत । एकामित्युक्त्या पुरुषान्तरसहशयने । स्त्रियास्त्यागः सूचितः । पुरुषस्य तु अन्यसहशयनेऽप्यदोषः प्रागुक्तः ।

दृष्टेत्यादि । दृष्टलिङ्गे साक्षादुपलब्धेऽन्यस्त्रीमैथुनचिह्ने सति, मैथुनापहारे मैथुनस्यापलापे, द्वादशपणं दण्डं, दद्याद्, अपलपिता । सवर्णापसर्पोपगमे वा मिथ्यावादी सवर्णा सखी तद्रूपापसर्पसङ्गमे सति वा तदपलापकर्ता, द्वादशपणं दद्यात् ।

दम्पत्योरन्यतरद्वेषात् तदन्यमोक्षो न भवति, किन्तु परस्परं द्वेषान्मोक्ष इत्याह—अमोक्ष्येति । अकामस्य मोक्षमनिच्छतः । भार्यायाश्च अकामाया लिङ्गविपरिणामेनात्र सम्बन्धः ।

स्त्रीविप्रकाराद्वेति । स्त्रिया अपराधात्, पुरुषश्चेद्, मोक्षमिच्छेद् यथा गृहीतम् अस्यै दद्यात् स्त्रीसकाशाद् गृहीतं सर्वविधं द्रव्यं स्त्रियै दत्त्वा मुच्येत ।

पुरुषविप्रकाराद्वेति । पुरुषापराधात्, स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीतं दद्यात् अदत्त्वैव स्त्रियै स्त्रीधनं तत्सकाशात् मुच्येत । स एष स्त्रीपुंसान्योन्य मोक्षविधिरधर्म्यविवाहानामासुरादीनाम् । ब्राह्मादीनां तु मोक्षणं नास्तीत्याह—अमोक्षो धर्मविवाहानामिति । इति द्वेषो व्याख्यातः ।

अतिचारविधिमाह—प्रतिषिद्धेत्यादि । प्रतिषिद्धा भर्त्रा वारिता, स्त्री, दर्पमद्यक्रीडायां दर्पक्रीडायां मद्यक्रीडायां च प्रवर्तमानेति शेषः, त्रिपणं दण्डं दद्यात् । दिवेति । अह्नि, स्त्रीप्रेक्षाविहारगमने स्त्रीप्रयुज्यमाननाटयदर्शनार्थम् उद्यानक्रीडार्थं च गमने, षट्पणो दण्डः, अर्थात् स्त्रियाः प्रतिषिद्धायाः । पुरुषप्रेक्षाविहारगमने

द्विगुणः । सुप्तमत्तप्रव्रजने भर्तुरदाने च द्वारस्य द्वादशपणः । रात्रौ निष्कासने द्विगुणः ॥

स्त्रीपुंसयोर्मैथुनाङ्गविचेष्टायां रहश्शीलसम्भाषायां वा चतुर्विंशतिपणः स्त्रिया दण्डः; पुंसो द्विगुणः । केशनीवीदन्तनखावलम्बनेषु पूर्वस्साहस-दण्डः; पुंसो द्विगुणः । शङ्कितस्थाने संभाषायां च पणस्थाने शिफादण्डः । स्त्रीणां ग्राममध्ये चण्डालः पक्षान्तरे पञ्चशिफा दद्यात्, पणिकं वा प्रहारं मोक्षयेत्—इत्यतिचारः ॥

प्रतिषिद्धयोः स्त्रीपुंसयोरन्योन्योपकारे क्षुद्रकद्रव्याणां द्वादशपणो दण्डः, स्थूलकद्रव्याणां चतुर्विंशतिपणः; हिरण्यसुवर्णयोश्चतुष्पञ्चाशत्पणः स्त्रिया दण्डः पुंसो द्विगुणः ॥

श्रीमूला

पुरुषप्रयुज्यमानप्रेक्षाविहारगमने, द्वादशपणः । रात्री द्विगुणः स्त्रैणप्रेक्षाविषये द्वादशपणः पौंस्नप्रेक्षाविषये चतुर्विंशतिपणः ।

सुप्तेत्यादि । सुप्तमत्तप्रव्रजने सुप्ते मत्ते च भर्तरि स्वगृहं विहाय गमने, भर्तुरदाने च द्वारस्य आगतस्य भर्तुर्गृहद्वारकवाटानुद्घाटने च, द्वादशपणः दण्डः । रात्री निष्कासने गृहाद् बहिर्भर्तुर्निरसने, द्विगुणः चतुर्विंशतिपणः ।

स्त्रीपुंसयोरिति । तयोः, मैथुनार्थे अनङ्गविचेष्टायां मैथुनमावां गमिष्याव इत्याकूतसूचककामचेष्टितकरणे, रहोऽश्लीलसम्भाषायां वा रहसि असभ्यवृत्तसम्भाषणे च, चतुर्विंशतिपणः स्त्रिया दण्डः, पुंसः द्विगुणः अष्टचत्वारिंशत्पणः ।

केशेत्यादि । केशग्रहणे नीवीग्रहणे दन्तक्षतकरणे नखक्षतकरणे च पूर्वः प्रथमः, साहसदण्डः स्त्रियाः, पुंसः द्विगुणः पञ्चशतपणात्मको मध्यमः साहसदण्डः ।

शङ्कितेत्यादि । शङ्कितस्थाने सम्भाषायां च शङ्कास्पदे प्रदेशे सम्भाषणमात्रेऽपि कृते, पणस्थाने शिफादण्डः एकैकस्य पणस्य स्थाने एकैकशिफाताडनं दण्डः । स्त्रीणामिति । तासां, ग्राममध्ये पश्यत्सु ग्रामजनेषु, चण्डालः वधताडननियुक्तः पुरुषः, पक्षान्तरे एकैकपार्श्वविकाशे, पञ्चशिफाः पञ्चशिफाप्रहारान्, दद्यात् । पणिकं वा पणोऽस्य शुल्को दीयते पणिकः तथाभूतं वा प्रहारं मोक्षयेत्, एकैकस्य प्रहारस्यैकैकं पणं निष्क्रयं दत्वा प्रहारदण्डं मोचयेदित्यर्थः । इत्यतिचारः, व्याख्यातः ।

अथप्रतिषेधमाह—प्रतिषिद्धयोरिति । वारितपरस्परव्यवहारयोः, स्त्रीपुंसयोः, अन्योन्योपकारे क्षुद्रकद्रव्याणां स्रक्चन्दनाद्यल्पद्रव्याणां परस्परदानेनोपकारे, द्वादशपणो दण्डः, स्त्रियाः । स्थूलकद्रव्याणां वस्त्राभरणादीनाम्, अन्योन्योपकारे

त एवागम्ययोरर्धदण्डाः; तथा प्रतिषिद्धपुरुषव्यवहारेषु च—इति प्रतिषेधः ॥

[स्त्रियाः स्वाम्यप्रच्युतिहेतवः]

राजद्विष्टातिचाराभ्याम् आत्मापक्रमणेन च ।
स्त्रीधनानीतशुल्कानाम् अस्वाम्यं जायते स्त्रियः ॥१३२॥

इति धर्मस्थीये विवाहसंयुक्ते शुश्रूषाभर्मपारुष्यद्वेषातिचाराः
उपकारव्यवहारप्रतिषेधाश्च तृतीयोऽध्यायः ।
आदितष्षष्टितमः ।

श्रीमूला

चतुर्विंशतिपणः । हिरण्यसुवर्णयोः, अन्योन्योपकारे, चतुष्पञ्चाशत्पणः । पुंसो विशेषमाह—दण्ड इति । उक्तो द्वादशपणादिः सर्वो दण्डः, पुंसो द्विगुणः ।

त एवेति । उक्ता एव दण्डाः, अगम्ययोः अर्धदण्डाः भ्रातृभगिन्यादिरूपयोः स्त्रीपुंसयोर्विषये अर्धहीना भवन्ति । ननु च भ्रातृभगिन्यादीनामन्योन्योपकारो निसर्गसिद्ध वात्सल्यप्रयुक्तो न त्वन्येषां स्त्रीपुंसानामिव सम्भावितदुरभिसन्धिप्रयुक्तः इति कथमसौ दण्डार्हः इति चेत्, सत्यं, किन्तु ऋजुबुद्धयारब्धोऽसावनुष्ठानप्रबन्धवशात् क्रमेण दुरभिसन्धिं जनयेदिति दण्डार्ह एवासौ ।

य एते स्त्रीपुंसयोः प्रतिषिद्धव्यवहारयोः परस्परोपकारे दण्डास्त एव पुरुषयोरपि प्रतिषिद्धव्यवहारयोरित्याह—तथेत्यादि । इति प्रतिषेध इति । एवम् उपकारव्यवहारप्रतिषेधो व्याख्यातः ।

राजद्विष्टातिचाराभ्यामिति । राजद्विष्टकथनेन दर्पमद्यक्रीडादिगमनेन च, आत्मापकमणेन च स्वयं भर्तृसकाशान्निष्पतनेन च, स्त्रीधनानीत शुल्कानाम् अस्वाम्यं स्त्रिया जायते स्त्रीधने पितृगृहोपाहृते शुल्के च स्त्रियाः स्वामित्वं हीयते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
तृतीयोऽध्यायः । विवाहसंयुक्ते शुश्रूषाभर्मपारुष्यद्वेषाति-
चारोपकारव्यवहारप्रतिषेधाः, आदितः षष्टितमः ॥

चतुर्थोऽध्यायः

निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासः दीर्घप्रवासश्च

[स्त्रियाः पतिकुलान्निर्गमने, तस्याः अन्यैः वासावकाशदाने च दण्डाः]

पतिकुलान्निष्पतितायाः स्त्रियाः षट्पणो दण्डोऽन्यत्र विप्रकारात्; प्रतिषिद्धायां द्वादशपणः; प्रतिवेशगृहातिगतायाः षट्पणः। प्रातिवेशिकभिक्षुकवैदेहकानामवकाशभिक्षापण्यादाने द्वादशपणो दण्डः; प्रतिषिद्धानां पूर्वः साहसदण्डः; परगृहातिगतायाः चतुर्विंशतिपणः। परभार्यावकाशदाने शत्यो दण्डोऽन्यत्रापद्भ्यः; वारणाज्ञानयोर्निर्दोषः॥

श्रीमूला

पूर्वाध्यायशेषोक्तमपक्रमणं 'निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः' इत्युक्तं निवेशकालं च वर्णयितुमयमध्याय आरभ्यते।

पतिकुलादिति। पतिगृहात्, निष्पतितायाः निर्गतायाः, स्त्रियाः प्राप्तव्यवहारायाः, षट्पणो दण्डः, अन्यत्र विप्रकाराद् पुरुषकृतापराधाभावे। प्रतिषिद्धायां 'मा कुरु निष्पतनमि'ति वारितायां सत्यां तस्या निष्पतने, द्वादशपणः। प्रतिवेशगृहातिगतायाः इतीदं वाक्यं क्वचिन्न पठ्यते।

प्रातिवेशिकभिक्षुकवैदेहकानामिति। प्रातिवेशिकः प्रतिगृही भिक्षुको वृत्तच्युतः पाषण्डादिः वैदेहकः कुवणिक् इत्येतेषाम्, अवकाशभिक्षापण्यादाने अवकाशभिक्षाशब्दौ तद्दानपरौ अवकाशदाने भिक्षादाने पण्यग्रहणे च, द्वादशपणो दण्डः। प्रतिषिद्धानां, पूर्वः प्रथमः, साहसदण्डः पञ्चाशदुत्तरद्विशतपणात्मकः। परगृहातिगतायाः भर्तृगृहसमनन्तरगृहमतिक्रम्य व्यवहितं गृहं गतायाः, चतुर्विंशतिपणः दण्डः।

परेत्यादि। परभार्यावकाशदाने परभार्याया वासभूमिदाने, शत्यो दण्डः पणशतपरिमाणो दण्डः। अपवादमाह—अन्यत्रापद्भ्य इति। आपत्सु तु न दोषः।

[पतिगृहान्निर्गमनेऽपि क्वचिददोषः
गन्तव्यस्थानव्यवस्था च]

'पतिविप्रकारात् पतिज्ञातिसुखावस्थग्रामिकान्वाधिभिक्षुकीज्ञातिकुलानामन्यतममपुरुषं गन्तुमदोषः' इत्याचार्याः। 'सपुरुष वा ज्ञातिकुलम्। कुतो हि साध्वीजनस्य छलम्! सुखमेतदवबोद्धम्' इति कौटल्यः। प्रेतव्याधिव्यसनगर्भनिमित्तमप्रतिषिद्धमेव ज्ञातिकुलगमनम् ॥

तन्निमित्तं वारयतो द्वादशपणो दण्डः। तत्रापि गूहमाना स्त्रीधनं जीयेत। ज्ञातयो वा छादयन्तः शुल्कशेषम्—इति निष्पतनम् ॥

श्रीमूला

वारणाज्ञानयोर्निर्दोष इति, 'मा मम गृहं प्रविशे'ति वार्यमाणापि वा अज्ञायमानैव वा यदि प्रविशेत्, तदा निरपराधः, कः, अर्थाद् गृहस्वामी।

पतिधिक्कारवशादन्यत्रापसरणस्यावश्यं प्राप्तौ साध्वीजनः कमाश्रयं गच्छेदित्याकाङ्क्षायामाह—पतिविप्रकारादिति। भर्तृकृतधिक्कारदोषात्. पतिज्ञात्यादिकुलानां पतिज्ञातिर्भर्तृबान्धवः सुखावस्थः विवाहस्थेयः ग्रामिको ग्राममहत्तरः अन्वाधिः स्त्रीधनस्थेयः भिक्षुकी तपस्विनी भैक्षजीविनी ज्ञातिः स्वबान्धवः एतत्सम्बन्धिनां गृहाणाम्, अन्यतमम्, अपुरुषम् अविद्यमानपुरुषं, गन्तुं गत्वाधिवस्तुम्, अदोषः दोषाभावः स्त्रियाः। इत्याचार्याः मन्यन्त इति शेषः।

आचार्यमतमभ्युपगम्यैव ज्ञातिकुले विशेषं स्वमतेनाह—सपुरुषं वेति विद्यमानपुरुषमपि वा, ज्ञातिकुलं पतिबन्धुगृहं स्वबन्धुगृहं च, गन्तुमदोष इति वर्तते। तत्र हेतुमाह—कुतो हि साध्वीजनस्य, छलं व्यभिचरणं, निष्कल्मषहृदयतया न कुतोऽपि भवतीत्यर्थः। प्रकाशभयाच्च छलं न जायत इत्याह—सुखमेतदवबोद्धुमिति। छलं स्त्रीकृतं भर्तुरन्यस्य वा सद्यः सुज्ञानं नतु गोपयितुं शक्यमित्यर्थः।

पतिकुलादन्यत्रगमनं यत् सामान्यतः प्रतिषिद्धं तस्यापवादमाह—प्रेतव्याधीत्यादि। सुबोधम्।

तन्निमित्तमिति। उक्तनिमित्तकं ज्ञातिकुलगमनं, वारयतः पुरुषस्य, द्वादशपणो दण्डः। तत्रापीति। ज्ञातिकुलेऽपि, गूहमाना केनापि छलेन गूढ वसन्ती, स्त्रीधनं, जीयेत हाप्येत अर्थाद् भर्त्रा स्वयं ह्रियेत। ज्ञातयो वा छादयन्तः स्त्रियं छलेन गूढं स्वगृहे वासयन्तः, शुल्कशेषं, जीयेरन्निति विपरिणतानुषङ्गः। इति निष्पतनमिति। व्याख्यातमिति शेषः।

[पतिगृहान्निर्गम्य पथि पुरुषान्तरानुगमने दण्डाः तदपवादश्च]

पतिकुलान्निष्पत्य ग्रामान्तरगमने द्वादशपणो दण्डः, स्थाप्याभरणलोपश्च। गम्येन वा पुंसा सहप्रस्थाने चतुर्विंशतिपणः, सर्वधर्मलोपश्चान्यत्र भर्मदानतीर्थगमनाभ्याम्। पुंसः पूर्वः साहसदण्डः तुल्यश्रेयसः, पापीयसो मध्यमः। बन्धुरदण्ड्यः। प्रतिषेधेऽर्धदण्डः। पथि व्यन्तरे गूढदेशाभिगमने मैथुनार्थेन शङ्कितप्रतिषिद्धाभ्यां वा पथ्यनुसारेण सङ्ग्रहणं विद्यात्। तालावचरचारणमत्स्यबन्धकलुब्धकगोपालकशौण्डिकानामन्येषां च प्रसृष्टस्त्रीकाणां पथ्यनुसरणमदोषः। प्रतिषिद्धे वा नयतः पुंसः स्त्रियो वा गच्छन्त्यास्त एवार्धदण्डाः—इति पथ्यनुसरणम्॥

श्रीमूला

अथ पथ्यनुसरणमाह—पतिकुलादिति। पतिगृहात् निष्पत्य पत्यननुज्ञया निर्गम्य, ग्रामान्तरगमने, द्वादशपणो दण्डः, स्थाप्याभरणलोपश्च अपुनर्गमन प्रत्ययार्थंन्यस्तभूषणहानिश्च, भवति। गम्येन वा पुंसा, सहप्रस्थाने प्रस्थाय ग्रामान्तरगमने, चतुर्विंशतिपणो दण्डः, सर्वधर्मलोपश्च भर्त्रनुष्ठीयमानयज्ञादिसर्वधर्मसहचरणहानिश्च।

तत्रापवादः—अन्यत्र भर्मदानतीर्थगमनाभ्यामिति। भर्मदानं गृहभरणं तदर्थं वा तीर्थगमनम् ऋतुगमनं तदर्थं वा भर्त्रन्तिकगमने न दोष इत्यर्थः। पुंसो दण्डमाह—पुंस इति। स्त्रियं ग्रामान्तरं नेतुः पुरुषस्य, पूर्वः साहसदण्डः पञ्चाशदधिकद्विशतपणात्मकः, कीदृशस्य तुल्यश्रेयसः स्त्रीसमानजातिश्रेष्ठ्यस्य। पापीयसो मध्यमः स्त्री-(नि ?)हीनजातीयस्य मध्यमः साहसदण्डः पञ्चशतपणात्मकः। बन्धुरदण्ड्यः बन्धुर्नेता दण्डार्हो न भवति। प्रतिषेधेऽर्धदण्ड इति। बन्धोरपि भर्त्रा प्रतिषिद्धस्य नेतुरुक्तसमांशो दण्डः।

पथीति। मार्गेऽपि, व्यन्तरे मार्गविदूरावकाशे, गूढदेशाभिगमने छन्नप्रदेशगमने च सति, मैथुनार्थेन विद्यात् मैथुनमभिसन्धाय तद् गमनमिति जानीयात्। शङ्कितप्रतिषिद्धाभ्यां वेति। मैथुनार्थित्वशङ्काविषयीभूतेन, भर्तृप्रतिषिद्धेन चेत्याभ्यां सह, पथ्यनुसारेण पथ्यनुगमनेन, सङ्ग्रहणं विद्यात् स्त्रीसङ्ग्रहणोक्तो दण्डविधिः स्त्रीपुंसयोर्वेदितव्य इत्यर्थः। स तूत्तराधिकरणे कन्या प्रकर्मणि वक्ष्यते।

तालावचरेत्यादि। तालावचरो नटः चारणः कुशीलवः मत्स्यबन्धको बलिशजीवी लुब्धको व्याधः गोपालक आभीरः शौण्डिकः सुरासन्धानजीवी इत्येतेषाम्, अन्येषां च प्रसृष्टस्त्रीकाणां तदितरेषां चानुज्ञातस्त्रीकाणां ताम्बूलिकमालाकारादीनां, पथ्यनुसरणं प्रकरणात् स्त्रियाः पथि पुरुषान्तरानुगमनम्, अदोषः दोषो न भवति। तालावचरादिस्त्रियमपि भर्तृप्रतिषिद्धां पथि नयतः पुरुषस्य नीयमानायाश्च पूर्वोक्तदण्डार्धदण्डा भवन्तीत्याह—प्रतिषिद्धे वेत्यादि। इति पथ्यनुसरणं व्याख्यातम्।

[ह्रस्वप्रवासिपतिनिरीक्षणकालव्यवस्था:]

ह्रस्वप्रवासिनां शूद्रवैश्यक्षत्रियब्राह्मणानां भार्याः संवत्सरोत्तरं कालमाकाङ्क्षेरन्नप्रजाताः, संवत्सराधिकं प्रजाताः। प्रतिविहिताः द्विगुणं कालम्; अप्रतिविहीतास्सुखावस्था बिभृयुः; परं चत्वारि वर्षाण्यष्टौ वा ज्ञातयः; ततो यथादत्तमादाय प्रमुञ्चेयुः ॥

ब्राह्मणमधीयानं दशवर्षाण्यप्रजाता, द्वादश प्रजाता, राजपुरुषम् आ आयुःक्षयादाकाङ्क्षेत। सवर्णतश्च प्रजाता नापवादं लभेत। कुटुम्बर्द्धिलोपे वा सुखावस्थैर्विमुक्ता यथेष्टं विन्देत जीवितार्थमापद्गता वा। धर्मविवाहात् कुमारी परिग्रहीतारमनाख्याय प्रोषितमश्रूयमाणं सप्ततीर्थानि-

---

श्रीमूला

ह्रस्वप्रवासमाह—ह्रस्वप्रवासिनामिति। क्षिप्रं प्रत्यागमिष्यामीत्युक्त्वा देशान्तरं गतानां, शूद्रवैश्यक्षत्रियब्राह्मणानां,, भार्याः, संवत्सरोत्तरंकालम् आकाङ्क्षेरन् एकं वत्सरं शूद्री द्वौ वैश्यीत्रीन् क्षत्रियो चतुरो ब्राह्मणीत्येवं क्रमेण प्रत्यागमनकालम् अतिक्रान्तावधेर्भर्तुः प्रतीक्षेरन्, कथम्भूताः, अप्रजाताः अनुपजातप्रसवाः। संवत्सराधिकं प्रजाताः उपजातप्रसवाः अधिकमेकं संवत्सरम्. आकाङ्क्षेरन्। प्रतिविहिताः भर्तृसुविहितवृत्तिव्ययाः स्त्रियो, द्विगुणं कालं शूद्रयाद्युक्तक्रमेण द्विवर्षचतुर्वर्षषड्वर्षाष्टवर्षात्मकम्,आकाङ्क्षेरन्। अप्रतिविहिताः स्त्रीः,सुखावस्था बिभृयुः विवाहव्यवस्थास्थेयपुरुषाः पोषयेयुः। परं द्विगुणकालादूर्ध्वं, चत्वारि वर्षाणि अष्टौ वा वर्षाणि, ज्ञातयः पतिबान्धवाः, बिभृयुः। ततः तदूर्ध्वं, भर्तुरनागमने, यथादत्तम् आदाय, प्रमुञ्चेयुः स्त्रीज्ञातिगृहं प्रति विसृजेयुः, तासामिच्छा चोदत्यार्थम्।

ब्राह्मणमिति ब्राह्मणम्, अधीयानं विद्याध्ययनाय देशान्तरं गतं, दश वर्षाणि, अप्रजाता अप्रसूतिः स्त्री, अकाङ्क्षेत। द्वादश वर्षाणि, प्रजाता प्रसूता, आकाङ्क्षेत। राजपुरुषं प्रोषितम्, आ आयुःक्षयाद् आकाङ्क्षेत। सवर्णत इति। यथोक्त प्रतीक्षाकालादूर्ध्वं समानवर्णात्, चकारात् स्वोत्कृष्टवर्णादपि प्रजाता प्राप्तगर्भा स्त्री, नापवादं लभेत दण्डनीया न भवेत्। कुटुम्बर्द्धिलोपे वेति। बन्धुकुटुम्बे दारिद्र्यादात्मभरणासमर्थे सति, सुखावस्थैर्विमुक्ता विवाहव्यवस्थास्थेयैर्यथोचितकालं भृत्वा विसृष्टा स्त्री, यथेष्टं विन्देत ईप्सितमन्यं पुरुषं वरयेत्, जीवितार्थं देहयात्रार्थम्। आपद्गता वा आपन्निवारणार्थं वा।

धर्मविवाहादिति। ब्राह्मादि धर्मविवाहमधिगम्य स्थिता, कुमारी अक्षतयोनिः, परिग्रहीतारम्, अनाख्याय प्रोषितम् अनापृच्छ्य देशान्तरगतम्, अश्रूयमाणम् अज्ञायमानवृत्तान्तं, सप्त तीर्थानि, आर्तवानि आकाङ्क्षेत। श्रूयमाणं तं, संवत्सरम्

आकाङ्क्षेत; संवत्सरं श्रूयमाणम् । आख्याय प्रोषितमश्रूयमाणं पञ्च तीर्थान्याकाङ्क्षेत, दश श्रूयमाणम् । एकदेशदत्तशुल्कं त्रीणि तीर्थान्यश्रूयमाणं; श्रूयमाणं सप्त तीर्थान्याकाङ्क्षेत । दत्तशुल्कं पञ्चतीर्थान्यश्रूयमाणं; दश श्रूयमाणम् । ततः (अन्ततः) परं धर्मस्थैर्विसृष्टा यथेष्टं विन्देत । तीर्थोपरोधो हि धर्मवध इति कौटल्यः ।

[दीर्घप्रवासिपतिनिरीक्षणकालव्यवस्थाः]

दीर्घप्रवासिनः प्रव्रजितस्य प्रेतस्य वा भार्या सप्त तीर्थान्याकाङ्क्षेत । संवत्सरं प्रजाता । ततः पतिसोदर्यं गच्छेत्; बहुषु प्रत्यासन्नं धार्मिकं भर्मसमर्थं कनिष्ठमभार्यं वा; तदभावेऽप्यसोदर्यं सपिण्डं कुल्यं वा; आसन्नमेतेषाम् । एष एव क्रमः ।

श्रीमूला

आकाङ्क्षेत । आख्याय प्रोषितमित्यादि । एकदेशदत्तशुल्कम् सावशेषार्पितशुल्कम् । दत्तशुल्कं निरवशेषार्पितशुल्कम् । शेषं सुबोधम् । ततः परमिति । यथोक्तकालादूर्ध्वं, धर्मस्थैः विसृष्टा पत्यन्तरवरणायाभ्यनुज्ञाता, यथेष्टं विन्देत यथाकामितं पतिं परिगृह्णीयात् । तत्रहेतुमाह—तीर्थोपरोधो हीति । तीर्थस्य ऋतुकालस्य प्रजननयोग्यस्य उपरोधः पुरुषानभिगमनेन विफलीकरणं, धर्मवधः धर्मस्य पुत्रोत्पत्तिलभ्यस्य सुकृतस्य वधो घातः, भवति इति । कौटल्यः मन्यत इति शेषः । यत् स्मर्यते—

"पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण नाकपृष्ठे महीयते ॥" इति ।

दीर्घप्रवासिन इति । महाप्रस्थानं गतस्य, प्रव्रजितस्य सन्न्यस्तस्य, प्रेतस्य वा, भार्या, सप्त तीर्थानि आकाङ्क्षेत, अप्रजाता संवत्सरं प्रजाता सा, आकाङ्क्षेत । ततः, पतिसोदर्यं पत्युर्भ्रातरं, गच्छेद् उपतिष्ठेत् पुत्रार्थम् । बहुषु अनेकेषु पतिसोदर्येषु सत्सु, प्रत्यासन्नं समनन्तरं, गच्छेत् । स यद्यधार्मिकः तदा धार्मिकं गच्छेत् । सर्वेषु धार्मिकेषु भर्मसमर्थं भरणशक्तं गच्छेत् । सर्वेषु भरणसमर्थेषु कनिष्ठं गच्छेत्, अभार्यं वा गच्छेत् । तदभावेऽपीति । पतिसोदर्याभावेऽपि, असोदर्यं वैमात्रेयं गच्छेत् । तदभावे सपिण्डं गच्छेत् । कुल्यं वा सपिण्डाभावे पतिकुलोत्पन्नं, गच्छेत् । आसन्नमेतेषामिति । कुल्यानां बहूनां मध्ये पुरुषगणनायामासन्नं गच्छेत् । एष एव क्रमः यथोक्त एव पुरुषपरिग्रहविषयो न्यायः ।

[उक्तनियमातिक्रमे दण्डाः]

एतानुत्क्रम्य दायादान् वेदने जारकर्मणि ।
जारस्त्रीदातृवेत्तारः सम्प्राप्ताः सङ्ग्रहात्ययम् ॥१३३॥

इति धर्मस्थीये विवाहसंयुक्ते निष्पतनं पथ्यनुसरणं
ह्रस्वप्रवासः दीर्घप्रवासश्च चतुर्थोऽध्यायः
विवाहसंयुक्तं समाप्तम्
आदित एकषष्टितमः

श्रीमूला

एतानिति । एतान् दायादान् पतिसोदर्यादीन्, उत्क्रम्य, वेदने पुरुषान्तर-परिणयने, जारकर्मणि जारपुरुषगमने वा, जारस्त्रीदातृवेत्तारः जारः स्त्रीभोक्ता स्त्री व्यभिचारिणी दाता स्त्रीदायकः स्त्रीधनस्थेयश्च वेत्ता स्त्रियं विन्दमानः इत्येते, सङ्ग्रहात्ययं सम्प्राप्ताः स्त्रीसङ्ग्रहणविहितेन दण्डेन दण्डनीयाः ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिऽकरणे चतुर्थोऽध्यायः,
विवाहसंयुक्ते निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासो
दीर्घप्रवासश्च । विवाहसंयुक्तं समाप्तम् ।
आदित एकषष्टितमोऽध्यायः ॥

षष्टितमं प्रकरणम्

पञ्चमोऽध्यायः

दायविभागः

दायक्रमः

[कुलधनविभागकालः, विभाज्यं धनं,
तद्भागिनः, पुनर्विभागश्च]

अनीश्वराः पितृमन्तः स्थितपितृमातृकाः पुत्राः। तेषाम् ऊर्ध्वं पितृतो दायविभागः पितृद्रव्याणाम्, स्वयमार्जितमविभाज्यम् अन्यत्र पितृद्रव्या-दुत्थितेभ्यः। पितृद्रव्यादविभक्तोपगतानां पुत्राः पौत्रा वा आ चतुर्थादित्यंशभाजः। तावदविच्छिन्नः पिण्डो भवति। विच्छिन्नपिण्डाः सर्वे समं विभजेरन्।

———

श्रीमूला

दायविभाग इति सूत्रम्। दायः कुलसाधारणं द्रव्यं तस्य विभाग उच्यत इति सूत्रार्थः। पूर्वाध्यायान्ते 'एतानुत्क्रम्य दायादान्' इत्यासूत्रितो दायः कैः कथं विभाज्य इत्येतदस्मिन् प्रकरणेऽभिधीयते। त्रिभिश्चाध्यायैरिदं वितन्यते। तत्र प्रथमे दायक्रमः, द्वितीयेंऽशविभागः, तृतीये पुत्रविभाग इति।

अनीश्वरा इति। पितृमन्तः प्रशस्तमातापितृकाः, स्थितपितृमातृकाः जीवन्मातापितृकाः, पुत्राः, अनीश्वराः कुलधने स्वामिनो न भवन्ति। तेषां पुत्राणाम्, ऊर्ध्वं पितृतः पित्रोरनन्तरं, दायविभागः, पितृद्रव्याणां पित्र्युपार्जितद्रव्याणां, कर्त्तव्यः। स्वयमार्जितम्, अविभाज्यं भ्रातृविभागानर्हं भवति। तत्रापवादः—अन्यत्र पितृद्रव्या-दुत्थितेभ्य इति। पितृद्रव्योपाश्रयार्जितद्रव्यव्यतिरेकेण। पितृद्रव्योत्थितानि तु पितृद्रव्यवद् विभाज्यान्येव।

पितृद्रव्यादविभक्तोपगतानामिति। अविभज्य पितृद्रव्यमुपरतानां, पुत्राः पौत्रा वा, आ चतुर्थादिति अनेन प्रकारेण आ चतुर्थपुरुषावधेः, अंशभाजः पितृक्रमप्रकृत-विषमांशभाजो भवन्ति। तत्र हेतुः—तावत् चतुर्थपुरुषान्तर यावत्, अविच्छिन्नः पिण्डो भवति। विच्छिन्नपिण्डाः सर्वे चतुर्थपुरुषात् परतो ये तत्कालजीविनस्ते सर्वे समं विभजेरन्।

अपितृद्रव्याः विभक्तपितृद्रव्या वा सह जीवन्तः पुनर्विभजेरन् । यतश्चोत्तिष्ठेत स द्व्यंशं (द्व्यंशं) लभेत ॥

[प्रमीतधनभागिनः]

द्रव्यमपुत्रस्य सोदर्याः भ्रातरः सहजीविनो वा हरेयुः, कन्याश्च रिक्थम्; पुत्रवतः पुत्रा दुहितरो वा धर्मिष्ठेषु विवाहेषु जाताः; तदभावे पिता धरमाणः; पित्रभावे भ्रातरो भ्रातृपुत्राश्च । अपितृका बहवोऽपि च भ्रातरो भ्रातृपुत्राश्च पितुरेकमंशं हरेयुः । सोदर्याणामनेकपितृकाणां पितृतो दायविभागः ।

———

श्रीमूला

अपितृद्रव्या इति । अविद्यमानपितृद्रव्याः, विभक्तपितृद्रव्या वा, सहजीवन्तः संसृज्य जीवन्तः, पुनर्विभजेरन् पुनरपि विभागं कुर्युः । तत्र विशेषमाह—यतश्चेति । यत्प्रयत्नाद्, उत्तिष्ठेत धनं वर्धेत, सः, द्व्यंशं द्विरावृत्तमंशं, लभेत । अन्ये तु व्याचक्षते—धनपिण्डस्यैकमर्धमुत्थापको लभेत, अन्यदर्धमितरे सर्वे विभजेरन्निति । द्रव्यमिति । अपुत्रस्य प्रमीतस्य द्रव्यं, सोदर्या भ्रातरः सहजीविनः एकोदरजा भ्रातरः संसृष्टिनः, हरेयुः । वेति वाक्यभूषणम् । कन्यानामपि सत्त्वे प्रतिपत्तिमाह—कन्याश्चेति । तास्तु विवाहाद्यपेक्षितं द्रव्यं हरेयुः ।

रिक्थमिति । रिक्थं दायं, पुत्रवतः प्रमतीस्य, पुत्राः, हरेयुरिति वर्तते । दुहितरो वा, धर्मिष्ठेषु ब्राह्म्यादिषु चतुर्षु विवाहेषु जाताः, हरेयुः पुत्राभावे । तदभावे दुहित्रभावे, पिता, धरमाणो जीवन्, हरेत् । पित्रभावे भ्रातरः, भ्रातृपुत्राश्च भ्रात्रभावे, हरेयुः ।

अपितृका इति । अपितृकाः प्रमीतपितृकाः, ते च बहवः, तेऽपि च भ्रातरः सोदर्यभ्रातरोऽसोदर्यभ्रातरश्च, सर्वे ते भ्रातृपुत्राश्च भ्रातॄणां पुत्राश्च, एवम्भूताः, पितुरेकमंशं हरेयुः । अयमर्थः—त्रयो भ्रातरः प्रमीता अविभक्ताः । तेषु ज्येष्ठस्य त्रयः पुत्राः मध्यमस्य द्वौ पुत्रौ कनिष्ठस्यैकः पुत्रः इत्याहत्यषण्णां सोदर्यासोदर्यभ्रातॄणां विभागे करणीये पिण्डधनस्य न षोढा विभागः किन्तु तत्तत्पितृतस्त्रेधा विभागं कृत्वा एकं त्रिभागं ज्येष्ठस्य पुत्रास्त्रयो गृह्णीयुः, द्वितीयं त्रिभागं मध्यमस्य द्वौ पुत्रौ गृह्णीयातां, तृतीयं त्रिभागं कनिष्ठस्य य एकः पुत्रः स गृह्णीयादिति । अथवा भ्रातर इत्येतदन्तस्यैव खण्डस्य यथोक्तोऽर्थं उदाहरणं च भ्रातृपुत्राश्चेति त्वन्यविषयम्—भ्रातृपुत्राश्च पितुरेकमंशं हरेयुरिति । तद्यथा—द्वयोर्भ्रात्रोरविभक्तयोरन्यतरस्य मृतस्य पुत्रास्त्रयोऽवशिष्टश्चैको भ्रातेति चतुर्णां विभागप्रसङ्गे पिण्डधनं द्व्यंशीकृत्यैकं द्व्यंशं भ्राता गृह्णीयादपरं द्व्यंशं भ्रातृपुत्रा विभज्य गृह्णीयुरिति ।

[प्रमीतकृतऋणभागिनः]

पितृभ्रातृपुत्राणां पूर्वे विद्यमाने नापरमवलम्बन्ते, ज्येष्ठे च कनिष्ठमर्थग्राहिणः ॥

[पुत्राणां समभागिता, बालानूढयोर्विशेषश्च]

जीवद्विभागे पिता नैकं विशेषयेत्। न चैकमकारणान्निर्विभजेत। पितुरसत्यर्थे ज्येष्ठाः कनिष्ठाननुगृह्णीयुः अन्यत्र मिथ्यावृत्तेभ्यः। प्राप्तव्यवहाराणां विभागः। अप्राप्तव्यवहाराणां देयविशुद्धं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुर्व्यवहारप्रापणात्। प्रोषितस्य वा सन्निविष्टसमम्

श्रीमूला

यदि समानोदरा भ्रातरो बहवः तेषां पितरस्तु भिन्नाः, तदा कीदृशो दायव्यवस्थेत्यपेक्षायामाह—सोदर्याणामित्यादि। पितृतो दायविभागः तत्तत्पुत्राः स्वस्वपितृधनं गृह्णीयुः।

पितरि तत्पुत्रेषु च सहजीविषु पुत्रान्यतमो बहुपुत्रः कुटुम्बार्थे यदि ऋणं कृत्वा म्रियेत, तदा ऋणदातॄणां प्रतिपत्तिमाह—पितृभ्रातृपुत्राणा मित्यादि। अयमर्थः—अर्थग्राहिणः ऋणकर्तुः पितृभातृपुत्राणां मध्ये पितरि विद्यमाने भ्रात्रादीन् ऋणदातारो नाभियुञ्जरीन् किन्तु पितरमेवाभियुञ्जरीन्, पित्रभावे भ्रातॄन्। भ्रातृषु विद्यमानेषु पुत्रं नाभियुञ्जरीन् किन्तु भ्रातॄनेवाभियुञ्जरीन् भ्रात्रभावे पुत्रम्। पुत्रे च ज्येष्ठे विद्यमाने न कनिष्ठभियुञ्जरीन् किन्तु ज्येष्ठमिति। इहार्थग्राहिणमित्यपपाठः प्रतिभाति।

'तेषामूर्ध्वं पितृतो दायविभाग' इत्युक्तम्। जीवति पितरि दायविभागमाह—जीवद्विभाग इति। जीवद्विभागविषये, पिता, नैकं विशेषयेत् पुत्रेष्वेकतममधिकांशेन वा न्यूनांशेन वा न योजयेत्, किन्तु समेनैवांशेन सर्वान् योजयेत्। एकं पुत्रम्, अकारणात् विना निमित्तं, न निर्विभजेत निरंशं न कुर्यात्। पितुरसत्यर्थे पितृधनाभावे, ज्येष्ठाः पुत्राः, कनिष्ठान्, अनुगृह्णीयुः बिभृयुः अन्यत्र मिथ्यावृत्तेभ्यः कनिष्ठाश्चेन्मिथ्यावृत्ता न भवन्ति।

प्राप्तव्यवहाराणां विभाग इति। अतीतषोडशवर्षाः स्वयं विभागं भजन्ते। अप्राप्तव्यवहाराणां देयविशुद्धम् ऋणादिदेयव्ययविशोधितं भागम्, मातृबन्धुषु मातुलादिषु, ग्रामवृद्धेषु वा, स्थापयेयुः न्यस्येयुः। आ कुतः, व्यवहारप्रापणात् व्यवहारप्रापकं षोडशं वयोऽभिव्याप्य। प्रोषितस्य वेति। देशान्तरगतस्य च भागं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुरिति वर्तते।

असन्निविष्टेभ्यो नैवेशनिकं दद्युः, कन्याभ्यश्च प्रादानिकम् ॥

ऋणरिक्थयोस्समो विभागः ॥

[पात्रविभागविधिवैयर्थ्यम्]

'उदपात्राण्यपि निष्किञ्चनाः विभजेरन्' इत्याचार्याः । 'छलमेतदिति' कौटल्यः । सतोऽर्थस्य विभागो नासतः ॥

[अपुत्रधनस्य तद्दायादसत्त्वासत्त्वयोः विनियोगक्रमः]

'एतावानर्थः सामान्यः, तस्यैतावान् प्रत्यंशः' इत्यनुभाष्य ब्रुवन् साक्षिषु विभागं कारयेत् । दुर्विभक्तम् अन्योन्यापहृतम् अन्तर्हितम् अविज्ञातोत्पन्नं वा पुनर्विभजेरन् ।

श्रीमूला

सन्निविष्टेत्यादि । असन्निविष्टेभ्यः अनुरूपस्त्रीपरिणयेन प्राप्तगार्हस्थ्याः सन्निविष्टाः अतथाभूता असन्निविष्टा अविवाहिताः तेभ्यः, नैवेशनिकं निवेशनं परिणयनं तत्प्रयोजनकं द्रव्यं, सन्निविष्टसमं सनिविष्टभ्रात्रर्थे यावद् व्ययितं विवाहार्थं तत्तुल्यप्रमाणं, दद्युः । कन्याभ्यश्च प्रादानिकं प्रदानं विवाहः तत्पर्याप्तं द्रव्यं, दद्युः ।

ऋणरिक्थयोः समो विभाग इति । ऋणं 'सवृद्धिकं प्रत्यर्पयामी' ति परिभाष्योत्तमर्णाद् गृहीतं रिक्थम् अधमर्णाय वृद्ध्यर्थं प्रयुक्तं तयोरुभयोः पितृकृतयोस्तुल्यो विभागः कार्यः ।

उदपात्राण्यपीति । जलहरणार्थानि पात्राण्यपि, निष्किञ्चनाः अर्थहीनाः विभजेरन् । इत्याचार्यः आहुरिति शेषः । इदमाचार्यवचनं छलदुष्टमित्याह—छलमेतदिति कौटल्य इति । तदुपपादयति सतोऽर्थस्य विभागो नासत इति । यद्युदपात्ररूपैरर्थैर्विभागयोग्यैरूपेताः न तर्हि ते निष्किञ्चनव्यपदेशमर्हन्ति, यदि निष्किञ्चनास्तदा न सोदपात्रा भवितुमर्हन्ति । निष्किञ्चनाश्च सोदपात्राश्चेति व्याहतमित्यर्थः । एवञ्च वदतः आचार्यं कौटल्यस्यायमभिप्रायः—सारस्यफल्गुनो वार्थमात्रस्य विभागे न्यायप्राप्ते उदपात्राणामविभाज्यत्वशङ्कैव कुतस्त्येति व्यर्थस्तद्विभागोपदेशः, प्रत्युत महाधनान् प्रति तद्विभागस्य तदिच्छया प्राप्नुवतोऽशक्यप्रतिषेधस्य प्रतिषेधोऽपि ततः प्रतीयत इत्यनिष्टं चेति ।

अपुत्रादिकधनस्य दायादविभागमाह—एतावानित्यादि । एतावद् धनं सामान्यमस्ति तत्रैतावत् प्रतिव्यक्ति अंश उत्पद्यत इति अनुभाष्यानूद्यब्रुवन् प्रकटं कीर्तयन् साक्षिसन्निधौ विभागं कारयेत् । दुर्विभक्तमिति । विषमविभक्तम्, अन्योन्यापहृतं परस्परगुप्तम्, अन्तर्हितं देशकालान्तरितम्, अविज्ञातोत्पन्नं वा धनं, पुनर्विभजेरन् ।

अदायादकं राजा हरेत्, स्त्रीवृत्तिप्रेतकार्यवर्जमन्यत्र श्रोत्रियद्रव्यात् । तत् त्रैविद्येभ्यः प्रयच्छेत् ।

[निरंशाः, तत्कुटुम्बरक्षणक्रमश्च]

पतितः पतिताज्जातः क्लीबश्चानंशाः जडोन्मत्तान्धकुष्ठिनश्च । सति भार्यार्थे तेषामपत्यमतद्विधं भागं हरेत्, ग्रासाच्छादनमितरे पतितवर्जाः ।

तेषां च कृतदाराणां लुप्ते प्रजनने सति ।
सृजेयुर्बान्धवाः पुत्रांस्तेषामंशं प्रकल्पयेत् ॥१३४॥

इति धर्मस्थीये दायविभागे, दायक्रमः, पञ्चमोऽध्यायः
आदितो द्विषष्टितमः

श्रीमूला

दायादस्याप्यभावे धनस्य गतिमाह—अदायादकमिति । दायादरहितं धनं, राजा हरेत् कथं हरेत् स्त्रीवृत्तिप्रेतकार्यवर्जं स्त्रीदेहयात्रार्थं प्रमीतौर्ध्वदैहिकार्थं च धनमपेक्षितं वर्जयित्वा । तत्रापवादमाह अन्यत्र श्रोत्रियद्रव्यादिति । छन्दोऽध्यायिधनं तु न हरेत् । क्व तर्हि तद् विनियुञ्जीतेत्याह तत त्रैविद्येभ्यः प्रयच्छेदिति । तिस्रो विद्या अधीयते त्रैविद्यास्तेभ्यो, दद्यात् ।

निरंशानाह—पतित इत्यादि । सुबोधम् । सतीति । तेषां जडादीनां, भार्यार्थे विवाहे सति, अतद्विधम् अजडमनुन्मत्तमनन्धमकुष्ठि च, अपत्यं, भागं हरेत् । इतरे अजडापत्याद्यतिरिक्ताः, पतितवर्जाः, ग्रासाच्छादनं, हरेयुरिति विपरिणतानुषङ्गः ।

अध्यायप्रान्ते श्लोकमाह—तेषां चेति । जडोन्मत्तादीनां, कृतदाराणां, प्रजनने लुप्ते बीजशक्तिविरहे, बान्धवाः पुत्रान् सृजेयुः अर्थाज्जडादीनां क्षेत्रेषु । तेषां पुत्राणाम्, अंशान् प्रकल्पयेत् ।

इतिकौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
पञ्चमोऽध्यायः, दायविभागे दायक्रमः,
आदितो द्विषष्टितमः ॥

अंशविभागः—षष्ठोऽध्यायः ।

[एकस्त्रीपुत्रेषु ज्येष्ठादिक्रमेण चतुष्पदां द्रव्यान्तराणां विभागक्रमः]

एकस्त्रीपुत्राणां ज्येष्ठांशः ब्राह्मणानामजाः, क्षत्रियाणामश्वाः, वैश्यानां गावः, शूद्राणामवयः । काणलिङ्गाः तेषां मध्यमांशः । भिन्नवर्णा कनिष्ठांशः । चतुष्पदाभावे रत्नवर्जानां दशानां भागं द्रव्याणामेकं ज्येष्ठो हरेत्; प्रतिमुक्तस्वधापाशो हि भवति—इत्यौशनसो विभागः ।

[तत्रैव प्रकारान्तरम्]

पितुः परिवापात् यानमाभरणं च ज्येष्ठांशः, शयनासनं भुक्तकांस्यं च मध्यमांशः, कृष्णधान्यायसं गृहपरिवापो गोशकटं च कनिष्ठांशः ।

श्रीमूला

अथ ज्येष्ठांशादिक्रमोऽस्मिन्नध्यायेऽभिधीयते । तत्र ज्येष्ठांशमाह—एकस्त्रीपुत्राणामिति । एकस्याः स्त्रियाः पुत्राणां बहूनां मध्ये, ब्राह्मणानाम्, अजाः ज्येष्ठांशः ज्येष्ठांशत्वेन कल्पनीया भवन्ति, यज्ञार्थत्वेनोत्कृष्टत्वात्, क्षत्रियाणाम् अश्वाः ज्येष्ठांशः । युद्धार्थत्वेन तथात्वात् । वैश्यानां गावः ज्येष्ठांशः, वाणिज्यार्थत्वेन तत्त्वात् । शूद्राणाम् अवयो मेषाः ज्येष्ठांशः, कृष्याद्यर्थत्वेन तथात्वात् ।

काणलिङ्गा इति । काण एकदृक् तल्लिङ्गास्तज्जातीयाः पङ्ग्वादयः अजा अश्वा गावोऽवयश्च, तेषां ब्राह्मणादीनां चतुर्णां यथाक्रमं, मध्यमांशः । भिन्नवर्णा अनेकवर्णा अजादयः, तेषां कनिष्ठांशः ।

चतुष्पदेत्यादि । चतुष्पदाभावे, रत्नवर्जानां, द्रव्याणाम् एकं दशानां भागं दशभागमेकं ज्येष्ठो हरेत् । कुतो ज्येष्ठोऽधिकमंशं हरेदित्याह—प्रतिमुक्तस्वधापाशो हि भवतीति । यस्माद् ज्येष्ठः कण्ठनिवेशितपितृकर्मपाशो भवति तस्मादित्यर्थः । इति औशनसो विभाग इति । यथोक्तप्रकारो विभाग उशनसा विहितः । अप्रतिषेधाच्चायं कौटल्यस्याभिमतो द्रष्टव्यः ।

प्रकारान्तरमाह—पितुरिति । पितुः, परिवापात् परिच्छदात् यानम् आभरणं च ज्येष्ठांशः । शयनासनं, भुक्तकांस्यं भोजनस्थालं च, मध्यमांशः । कृष्णधान्यायसं तिलवरकादि आयसम् अयोविकारश्च, गृहपरिवापो मुसलादिर्गृहपरिच्छदः, गोशकटं च गोयुक्तं शकटं च, कनिष्ठांशः ।

शेषद्रव्याणा(मेकद्र)मेतद्द्रव्यस्य वा समो विभागः।

[भगिनीविषये विशेषः]

आदायादा भगिन्यः, मातुः परिवापाद् भुक्तकांस्याभरणभागिन्यः।

[सन्मनुष्योचितचारित्रहीनविषये क्रमविशेषः]

मानुषहीनो ज्येष्ठस्तृतीयमंशं ज्येष्ठांशाल्लभेत। चतुर्थमन्यायवृत्तिः निवृत्तधर्मकार्यो वा कामाचारस्सर्वं जीयेत। तेन मध्यमकनिष्ठौ व्याख्यातौ तयोर्मानुषोपेतो ज्येष्ठांशादर्धं लभेत।

[एकपुरुषोढबहुस्त्रीपुत्रेषु यमलयोश्च ज्यैष्ठ्यव्यवस्था]

नानास्त्रीपुत्राणां तु संस्कृतासंस्कृतयोः कन्या कृतक्रिययोरभावे च, एकस्याः पुत्रयोर्यमयोर्वा पूर्वजन्मना ज्येष्ठभावः।

श्रीमूला

शेषद्रव्याणाम् उक्तातिरिक्तद्रव्याणाम्, एकद्रव्यस्य वा द्रव्यस्यैकस्यापि वा, समः सर्वपुत्रसाधारणो विभागः।

भगिन्यो दायहीनाः, किन्तु मातृपरिच्छदेभ्यो भुक्तकांस्याभरणानि हरेयुरित्याह—अदायादा इत्यादि।

मानुषहीन इति। मानुषशब्देन मनुष्यसामान्यस्यापेक्षितः पुरुषकारगुणो गृह्यते तद्रहितो, ज्येष्ठः ज्येष्ठांशात् तृतीयमंशं लभेत न तु कृत्स्नं ज्येष्ठांशम्। अन्यायवृत्तिः, निवृत्तधर्मकार्यो वा, चतुर्थं ज्येष्ठांशचतुर्भागं लभेत। कामाचारः इत्वरः, सर्वं जीयेत ज्येष्ठांशमखिलं हाप्येत।

तेन मध्यमकनिष्ठौ व्याख्याताविति। तयोरप्येष न्यायः सञ्चारयितव्य इत्यर्थः। तयोः मध्यमकनिष्ठयोः, मानुषोपेतः पुरुषकारयुक्तोमध्यमः कनिष्ठो वा, ज्येष्ठांशादर्धं लभेत यथाप्राप्तस्वांशानपहानेन। इत्यमेकस्त्रीपुत्रविभागोऽभिहितः।

नानास्त्रीपुत्राणामिति। एकस्य पुरुषस्य बह्व्यो याः स्त्रियः तासां पुत्राणां, पूर्वजन्मना ज्येष्ठभावः, व्यवस्थाप्य इति शेषः, कदा, संस्कृतासंस्कृतयोरभावे संस्कृता ब्राह्मादिविधिपरिगृहीता असंस्कृता गान्धर्वादिविवाहपरिगृहीता तयोरभावे तथाभूतमातृभेदाभावे, कन्याकृतक्रिययोरभावे च कन्या विवाहात् पूर्वमक्षतयोनिः कृतक्रिया विवाहात् पूर्वं क्षतयोनिः तयोरभावे च तथाभूतमातृभेदाभावे च। उक्तविधयोर्मातृभेदयोः सत्त्वे पूर्वजन्मना न ज्येष्ठभावः किन्तु मातृवशादेव व्यवस्थाप्यः। तद्यथा—संस्कृतापुत्र उत्तरकालजातोऽप्यसंस्कृतापुत्रापेक्षया ज्येष्ठः, कन्यापुत्रश्च तथाविधः क्षतयोनिपुत्रापेक्षया ज्येष्ठ इति। एकस्याः पुत्रयोर्यमयोर्वा युग्मजातयोर्वा, पूर्वंजन्मना ज्येष्ठभावः।

[तेषु सङ्करजातीयपुत्राणां चातुर्वर्ण्य-
पुत्राणां च विभागक्रमः]

सूतमागधव्रात्यरथकाराणामैश्वर्यतो विभागः। शेषास्तमुपजीवेयुः। अनीश्वरास्समविभागा इति।

चातुर्वर्ण्यपुत्राणां ब्राह्मणीपुत्रश्चतुरोंऽशान् हरेत्, क्षत्रियापुत्रस्त्रीनंशान्, वैश्यापुत्रो द्वावंशौ, एकं शूद्रापुत्रः। तेन त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोर्व्याख्यातः। ब्राह्मणस्यानन्तरापुत्रः तुल्यांशः क्षत्रियवैश्ययोरर्धांशः, तुल्यांशो वा मानुषोपेतः।

श्रीमूला

सूतमागधव्रात्यरथकाराणामिति। सूतो ब्राह्मण्यां क्षत्रियादुत्पन्नः मागधः क्षत्रियायां वैश्यादुत्पन्नः व्रात्योऽनुपनीतविवाहिताद् ब्राह्मणात् सवर्णायां जातः रथकारो वास्तुवृत्तिरिज्याधानोपनीतिमान् वैण्यभेदः एतेषां, नानास्त्रीपुत्राणामिति वर्तते, नानास्त्रीषु जातानां पुत्राणाम्, ऐश्वर्यतो विभागः प्रभविष्णुत्वानुसारेण विभागः तेष्वेक एव चेदैश्वर्यवान् स एव कृत्स्नं पितृधनं हरेत्। शेषाः पुत्राः, तम् ईश्वरम्, उपजीवेयुः। अनीश्वराः समविभागाः तेष्वेकश्चेदीश्वरो न भवेत् सर्वे समं विभजेरन्। इतिशब्दः प्रकारार्थः। अनेन प्रकारेण सङ्करजातीयस्यान्यस्यापि नानास्त्रीपुत्राणां यथोचितं विभाग उन्नेय इत्यर्थः।

चातुर्वर्ण्यपुत्राणामित्यादि। अयमर्थः—ब्राह्मणस्य चतुर्ष्वपि वर्णेषु यदि पुत्राः स्युः, तदा पितृधनं ज्येष्ठांशवर्जं शिष्टं दशधा विभज्य तेषां मध्ये ब्राह्मणीपुत्रः चतुरोंऽशान् हरेत्, क्षत्रियापुत्रः त्रीन् अशांन् वैश्यापुत्रो द्वावंशौ, शूद्रापुत्र एकमंशमिति।

तेनेति। तेन ब्राह्मणविषयोक्तचतुर्वर्णपुत्रविभागविधिना, त्रिवर्णं द्विवर्णपुत्रविभागः क्षत्रियवैश्ययोः, व्याख्यातः उक्तप्रायः। तद् यथा—क्षत्रियस्य क्षत्रियावैश्याशूद्रापुत्रेषु त्रिषु विद्यमानेषु ज्येष्ठांशवर्जं पितृधनं षोढा विभज्य त्रीनंशान् क्षत्रियापुत्रो हरेत्, द्वावपरौ वैश्यापुत्रः, एकमंशं शूद्रापुत्रः। तथा वैश्यस्य वैश्याशूद्रापुत्रयोर्विद्यमानयोर्ज्येष्ठांशवर्जं पितृधनं त्रेधा विभज्य द्वावंशौ वैश्यापुत्रो हरेद् एकमंशं शूद्रापुत्र इति।

ब्राह्मणस्यानन्तरापुत्रस्तुल्यांश इत्यादि। अयमर्थः—ब्राह्मणस्य सवर्णायां क्षत्रियायां चैकैकः पुत्रोऽस्ति, वैश्याशूद्रयोस्तु पुत्राभावः, तदा क्षत्रियापुत्रो ज्येष्ठांशवर्जं ब्राह्मणीपुत्रतुल्यं भागं भजेत। क्षत्रियस्य सवर्णायां वैश्यायां चैकैकः पुत्रः शूद्रायां पुत्राभावः, तदा वैश्यापुत्रो ज्येष्ठांशवर्जं क्षत्रियापुत्रभागस्यार्धं भजेत। तथा वैश्यस्य सवर्णायामेकः पुत्रः शूद्रायामेकः पुत्रः तदा शूद्रापुत्रो ज्येष्ठांशवर्जं वैश्यापुत्रभागस्यार्धं भजेत। यदुक्तं क्षत्रियवैश्ययोरर्धांश इति, तस्यापवादमाह—तुल्यांशो

[सवर्णासवर्णस्त्र्यैकपुत्रविषये विशेषः तदपवादश्च]

तुल्यातुल्ययोरेकपुत्रस्सर्वं हरेत् । बन्धूंश्च बिभृयात्, ब्राह्मणानां तु पारशवस्तृतीयमंशं लभेत । द्वावंशौ सपिण्डः कुल्यो वाऽऽसन्नः स्वधादानहेतोः । तदभावे पितुराचार्योऽन्तेवासी वा ।

क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतम् ।
मातृबन्धुः सगोत्रो वा तस्मै तत् प्रदिशेद् धनम् ॥१२५॥

इति धर्मस्थीये दायविभागेंऽशविभागः, षष्ठोऽध्यायः,
आदितस्त्रिषष्टितमः

श्रीमूला

वा मानुषोपेत इति । वैश्यापुत्रः पुरुषगुणोपेतः क्षत्रियापुत्रतुल्यभागः स्यात् । शूद्रापुत्रः पुरुषगुणोपेतो वैश्या पुत्रतुल्यभागः स्यादित्यर्थः ।

तुल्यातुल्ययोरिति । सवर्णासवर्णयोः स्त्रियोः, एकपुत्रः एक एव अद्वितीय एव यः पुत्रः सः, सर्वं पितृधनं हरेत्, बन्धूंश्च पितृभरणीयान्, बिभृयात् ।

असवर्णपुत्रस्यैकाकिनो यत् सर्वधनभाक्त्वमुक्तं, तस्यापवादमाह— ब्राह्मणानां त्विति । विप्राणां, पारशवः शूद्रायामुत्पन्नः पुत्रस्तु, तृतीयमंशं लभेत एकाकी सन्नपि, नतु सर्वं पितृधनम् । अवशिष्टयोस्तृतीयांशयोः क्व विनियोगस्तत्राह— द्वावंशाविति । अवशिष्टौ त्र्यंशौ, सपिण्डः पितृसपिण्डः, तदभावे कुल्यो वा पितृकुलोत्पन्नः समानोदकी वा, आसन्नः अन्तरङ्गः, लभेत । कुतः, स्वधादानहेतोः सपिण्डकुल्यौ हि पितृनिवापकरणसमर्थौ, न तु शूद्रापुत्र इति कृत्वा । तदभाव इति । सपिण्डकुल्ययोरभावे, पितुराचार्यः, लभेत, तौ द्वावंशौ । पितुः, अन्तेवासी शिष्यो वा, लभेत ।

सर्वस्याप्यभावे आह—क्षेत्रे वेति । अस्य क्षेत्रे वा पितुः सवर्णक्षेत्रे वा, नियुक्तः नियोगविधिना प्रयुक्तः, मातृबन्धुः सगोत्रो वा, क्षेत्रजं सुतं जनयेत् । तस्मै क्षेत्रजाय, तद् धनं, प्रदिशेत् ।

इतिकौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
षष्ठोऽध्यायः दायविभागेंऽशविभागः,
आदितस्त्रिषष्टितमः ॥

सप्तमोऽध्यायः

पुत्रविभागः

[परपुरुषाज्जातस्य किंनिरूपिता पुत्रतेत्यंशे मतभेदः]

'परपरिग्रहे बीजमुत्सृष्टं क्षेत्रिणः' इत्याचार्याः । 'माता भस्त्रा, यस्य रेतस्तस्यापत्यम्' इत्यपरे । 'विद्यमानमुभयम्' इति कौटल्यः ।

[सामान्यतः पुत्रभेदाः सवर्णासवर्णयोर्विशेषश्च]

स्वयंजातः कृतक्रियायामौरसः । तेन तुल्यः पुत्रिकापुत्रः । सगोत्रेणान्यगोत्रेण वा नियुक्तेन क्षेत्रजातः क्षेत्रजः पुत्रः । जनयितुरसत्यन्यस्मिन् पुत्रे स एव द्विपितृको द्विगोत्रो वा द्वयोरपि स्वधारिक्थभाग्भवति ।

श्रीमूला

दायस्यांशक्रम उक्तः । दायादविशेषपरिज्ञानार्थं पुत्रभेदोऽभिधीयते । अथवा पूर्वाध्यायान्ते 'क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतमि'ति क्षेत्रजः पुत्रः प्रस्तुतः । तत्प्रसङ्गात् पुत्राणां भेदास्तेषु मुख्यामुख्यभावश्चास्मिन्नध्याये प्रतिपाद्यन्ते ।

परपरिग्रह इति । अन्यस्य स्त्रियां, बीजमुत्सृष्टम् अन्येन रेत उत्सृज्योत्पादितः पुत्रः, क्षेत्रिणः तस्या भर्तुरेव पुत्रः न तु बीजोत्स्रष्टुः । इत्याचार्या आहुः ।

माता चर्मप्रसेविकावद् बीजाधारमात्रमप्रधानमिति तत्सम्बन्धस्याकिञ्चित्करत्वाद् बीजोत्पन्नो न तत्परिणेतुरपत्यं भवितुमर्हति, किन्तु बीजिन एवेत्यन्येषां मतमित्याह—माता भस्त्रेत्यादि ।

बीजं क्षेत्रं चोभयं समवेतं विद्यमानं कार्ययेति क्षेत्रजो बीजक्षेत्रिणोरुभयोरपि पुत्र इत्यात्मनो मतमित्याह—विद्यमानमित्यादि ।

पुत्रभेदानाह—स्वयंजातः कृतक्रियायामित्यादि । परिणीतायां स्वयमुत्पादितः पुत्रः औरसाख्यः । तेन औरसेन तुल्यः पुत्रिकापुत्रः 'अस्यां यो जायते गर्भः स मे पुत्रो भविष्यति' इति परिभाष्य वराय दत्ता कन्या पुत्रिका तस्याः पुत्रः । सगोत्रेणेत्यादि । सुबोधम् । जनयितुरिति । रेतस्सेक्तुः, असत्यन्यस्मिन् पुत्रे, अविद्यमाने औरसपुत्रे, स एव क्षेत्रज एव, द्विपितृकः बीजिक्षेत्र्युभयपितृकः, द्विगोत्रो वा बीजिक्षेत्र्युभयगोत्रकश्च भवन्, द्वयोरपि स्वधारिक्थभाक् स्वधादायी दायहरश्च, भवति ।

तत्सधर्मा बन्धूनां गृहे गूढजातस्तु गूढजः। बन्धुनोत्सृष्टोऽपविद्धः पुत्रः। कन्यागर्भः कानीनः। सगर्भोढायास्सहोढः। पुनर्भूतायाः पौनर्भवः। स्वयंजातः पितृबन्धूनां च दायादः। परजातस्संस्कर्तुरेव न बन्धूनाम्। तत्सधर्मा मातापितृभ्यामद्भिर्दत्तो दत्तः। स्वयं बन्धुभिर्वा पुत्रभावोपगत उपगतः। पुत्रत्वेऽधिकृतः कृतकः। परिक्रीतः क्रीत इति।

श्रीमूला

तथा चाहुः—

"क्षेत्रीयानुमतं बीजं यस्य क्षेत्रे प्ररोहति।
तदपत्यं तयोरेव बीजक्षेत्रीययोर्मतम्॥" इति।

तत्सधर्मेति। बन्धूनां गृहे, गूढजातस्तु भर्तृनियोगं विनैव गूढमन्यस्योत्पन्नः, गूढजः। सः, तत्सधर्मा क्षेत्रजतुल्यः। बन्धुनेति। बन्धुनोत्सृष्टः मातापितृभ्यां परित्यक्तः अपविद्धः तदाख्यः, संस्कर्तुः पुत्रः येन स संस्कृतस्तस्य पुत्रः। कन्यागर्भ इति। कन्याभावे प्रसूतः, कानीनः। सगर्भोढाया इति। गर्भेण सहितैव या व्यूढा सा सगर्भोढा तस्याः, पुत्रः, सहोढः तदाख्यः। पुनर्भूतायाः पौनर्भव इति। पुनर्विवाहितायाः दिधिषुशब्दितायाः पुत्रः पौनर्भवाख्यः। स च त्रिविधो मातृत्रैविध्याद्—या ह्यक्षतयोनिरेव सती भर्तृमरणादन्यस्मै ससंस्कारं दत्ता सैका पुनर्भूः, स्वभर्तारमुपेक्ष्यैवान्यमाश्रिता द्वितीया, मृते भर्तरि भर्तृबन्ध्वभावात् सपिण्डाय सवर्णाय वा दत्ता तृतीयेति।

स्वयञ्जातः पितृबन्धूनामिति। स्वयञ्जात औरसः पुत्रः, सः पितृबन्धूनां च दायादः पितुः संस्कर्तुस्तद्बन्धूनां च दायहारी भवेत्। परजातः क्षेत्रजातादिः परोत्पन्नः, संस्कर्तुरेव दायादः, न बन्धूनां न पितृबन्धूनां दायादः।

तत्सधर्मेति। स्वयञ्जाततुल्यः, मातापितृभ्याम् अद्भिर्दत्तः समन्त्रकोदकपूर्वं दत्तः, दत्तः तत्संज्ञः।

अयमहं 'युवयोः पुत्रः' इति यः स्वयमात्मानं पुत्रत्वेनार्पयति स एकः उपगताख्यः। बन्धुभिर्वा 'युवयोरयं पुत्र' इति दत्तोऽपर उपगताख्य इत्याह—स्वयं बन्धुभिर्वेत्यादि।

पुत्रत्वेऽधिकृतः कृतकः परिक्रीतः क्रीत इति। 'त्वमावयोः पुत्र' इति पुत्रत्वे कल्पितः कृतकाख्यः। मूल्यं दत्त्वा मातापितृसकाशात् पुत्रत्वेन गृहीतः क्रीताख्यः। इतिशब्दः पुत्रविभागसमाप्तौ।

औरसे तूत्पन्ने सवर्णास्तृतीयांशहराः। असवर्णा ग्रासाच्छादनभागिनः।

ब्राह्मणक्षत्रिययोरनन्तरापुत्रास्सवर्णाः, एकान्तरा असवर्णाः।

[अनुलोमाः]

ब्राह्मणस्य वैश्यायामम्बष्ठः। शूद्रायां निषादः पारशवो वा। क्षत्रियस्य शूद्रायामुग्रः। शूद्र एव वैश्यस्य। सवर्णासु चैषामचरितव्रतेभ्यो जाता व्रात्याः—इत्यनुलोमाः।

[प्रतिलोमाः]

शूद्रादायोगवमत्तचण्डालाः। वैश्यान्मागधवैदेहकौ। क्षत्रियात्सूतः। पौराणिकस्त्वन्यस्सूतो मागधश्च ब्रह्मक्षत्राद्विशेषतः। त एते प्रतिलोमाः स्वधर्मातिक्रमाद्राज्ञस्सम्भवन्ति॥

श्रीमूला

उक्तविधेषु पुत्रेषु विद्यमानेषु पश्चादौरसस्योत्पत्तौ तेषां का प्रतिपत्तिरित्याकाङ्क्षायां पितृधनं त्रेधा विभज्य तत एकं त्रिभागं सवर्णाः गृह्णीयुः, अन्यौ द्वौ त्रिभागावौरसो गृह्णीयात्, असवर्णास्तु ग्रासाच्छादनमात्रं लभेरन्नित्याह—औरसे तूत्पन्न इत्यादि।

सवर्णासवर्णविषयमाह—ब्राह्मणक्षत्रिययोरन्तरापुत्राः सवर्णा इति। ब्राह्मणस्य क्षत्रियापुत्राः सवर्णाः क्षत्रियस्य वैश्यापुत्राः सवर्णाः। एकान्तरा असवर्णा इति। ब्राह्मणस्य वैश्यापुत्रा असवर्णाः, क्षत्रियस्य शूद्रापुत्रा असवर्णाः।

अनुलोमानाह—ब्राह्मणस्य वैश्यायामित्यादि। सुबोधम्।

शूद्र एव वैश्यस्येति। वैश्यस्य शूद्रायामुत्पन्नः शूद्र एव, न जात्यन्तरम्।

सवर्णासु चेति। एषां ब्राह्मणक्षत्रियवैश्यानाम् अचरित व्रतेभ्यः अनुपनीय कृतविवाहेभ्यः सवर्णासु जाताः, व्रात्याः व्रात्यसंज्ञाः। इत्यनुलोमाः जातयो व्याख्याता इति शेषः।

प्रतिलोमानाह—शूद्रादित्यादि। शूद्राद् वैश्यायामुत्पन्न आयोगवो नाम, क्षत्रियायां क्षत्तः, ब्राह्मण्यां चण्डालः। क्षत्तशब्द इहाकारान्तः प्रयुक्तः, अत एव स्त्रियाम् आकारान्तोऽनुपदं प्रयोक्ष्यते।

वैश्यान्मागधवैदेहकाविति। वैश्यात् क्षत्रियायां जातो मागधः, ब्राह्मण्यां वैदेहकः।

क्षत्रियात् सूत इति। क्षत्रियाद् ब्राह्मण्यां जातः सूतः।

[अन्तरालाः, तद्विषये विवाहविभागादि व्यवस्थाश्च]

उग्रान्नैषाद्यां कुटकः (कुक्कुटकः)। विपर्यये पुल्कसः।

श्रीमूला

पृथुचक्रवर्तियज्ञभूम्युत्पन्नस्य पौराणिकस्य सूताख्यस्य मागधाख्यस्य च पृथुस्तोत्रविधायिनः प्रतिलोमजत्वशङ्काप्राप्तिं मनसि कुर्वंस्तां परिहरति—पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः इति। अस्यार्थः—पुराणप्रवक्ता रोमहर्षणापरनामा यः सूतः सः, अन्यः उक्तात् प्रतिलोमजसूताद् भिन्नः, यस्तत्सहपठितः पुराणेषु मागधो नाम स च प्रतिलोमजमागधाद् भिन्नः। ब्रह्मक्षत्राद् विशेषतः विशेषेण युक्तः सूतो ब्राह्मणाद् विशिष्ट उत्कृष्टः मागधः क्षत्रियाद् विशिष्ट इति। एतच्च तथ्यम्। यतः,

"हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ॥
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे।
सूतः सूत्यां[1] समुत्पन्नः सौत्येऽहनि महामतिः॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः॥"

इति विष्णुपुराणप्रथमांशतृतीयाध्याये,

"ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः॥
वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित्॥"

इत्यग्निपुराणप्रथमाध्याये,

"त्वया सूत! महाबुद्धे! भगवान् ब्रह्मवित्तमः।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः॥
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः॥"

इति कौर्मपुराणप्रथमाध्याये च व्यासशिष्यपौराणिकसूतस्यायोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणा कथ्यते, तथा द्विजत्वं विष्ण्वंशसम्भूतत्वं च। तथैव मागधस्यापि तत्सहपठितस्यायोनिजत्वम्।

त एते इति। त एते पूर्वोक्ता आयोगवादयः, प्रतिलोमाः, राज्ञः स्वधर्मातिक्रमात् सम्भवन्ति स्वधर्मो वर्णाश्रमरक्षा तस्यातिक्रमाद् यथावदकरणदोषात् जायन्ते।

अथान्तरालानाह—उग्रादिति। उग्रात् क्षत्रियशूद्रापुत्रात्, नैषाद्यां ब्राह्मणशूद्रापुत्र्यां, जातः, कुक्कुटकः तदाख्यः। विपर्यये पुल्कस इति। निषादादुग्रकन्यायां जातः पुल्कसाख्यः।

---

१. यज्ञाभिषवभूमौ।

वैदेहिकायामम्बष्ठाद्वैणः । विपर्यये कुशीलवः । क्षत्तायामुग्राच्छ्वपाकः—इत्येतेऽन्ये चान्तरालाः कर्मणा वैण्यो रथकारः ।

तेषां स्वयोनौ विवाहः । पूर्वापरगामित्वं वृत्तानुवृत्तं च स्वधर्मान् स्थापयेत् । शूद्रसधर्माणो वा अन्यत्र चण्डालेभ्यः । केवलमेवं वर्तमानः स्वर्गमाप्नोति राजा नरकमन्यथा । सर्वेषामन्तरालानां समो विभागः ॥

[दायविभागविषयनिगमनम्]

देशस्य जात्याः सङ्घस्य धर्मो ग्रामस्य वाऽपि यः ।
उचितस्तस्य तेनैव दायधर्मं प्रकल्पयेत् ॥१३६॥

इति धर्मस्थीये दायविभागे पुत्रविभागः, सप्तमोध्यायः,
दायविभागस्समाप्तः । आदितश्चतुष्षष्टितमः ।

श्रीमूला

वैदेहिकायां वैदेहकन्यायाम्, अम्बष्ठात्, जातः, वैणः तदाख्यः । विपर्यये कुशीलवः अम्बष्ठायां वैदेहकाज्जातः कुशीलवाख्यः । क्षत्तायाम् उग्राद्, जातः, श्वपाकः तदाख्यः । इति एते उक्ताः, अन्ये च एवञ्जातीयाः सङ्करजाश्च, अन्तरालाः वर्णजात्यन्तरालभवाः विज्ञेयाः । कर्मणेति । वैण्यः वेणजातिरेव, कर्मणा लङ्घनप्लवनादिस्ववृत्तित्यागपूर्वकवास्तुवृत्तिस्वीकारेण, रथकारः तदाख्ययोच्यते, न तु रथकारो नामान्तरालोऽन्य इत्यर्थः ।

तेषामिति । तेषाम् अन्तरालानां, स्वयोनौ विवाहः अम्बष्ठस्याम्बष्ठीविवाहो निषादस्य निषादीविवाह इत्येवं समानजातीयविवाहः कार्यः । पूर्वावरगामित्वं पूर्वास्याम्बष्ठादेरुत्कृष्टस्य अवरगामित्वम् अपकृष्टनिषाद्यादिगामित्वं न तु निषादादेरम्बष्ठ्यादिगामित्वं, वृत्तानुवृत्तं च पूर्वाचारानुवृत्ति च, स्वधर्मान् स्थापयेत् स्वधर्मतया कल्पयेत् । शूद्रसधर्माणो वेति । तेषामित्यनुवर्त्य प्रथमान्ततया विपरिणमयितव्यम्, अन्तरालाः शूद्रधर्मेण वा धर्मवन्तः कर्तव्याः । ते च न सर्वे किन्तु चण्डालवर्जा इत्याह—अन्यत्र चण्डालेभ्य इति ।

केवलमिति । केवलमेवं वर्तमानः उक्तप्रकाराव्यभिचारेण व्याप्रियमाणः, राजा स्वर्गम् आप्नोति । अन्यथा उक्तप्रकारव्यभिचारेण वर्तमानः, नरकम् आप्नोति ।

सर्वेषामिति । अन्तरालानां, समो ज्येष्ठांशरहितः, विभागः । स च सर्वेषां स्त्रीणां पुरुषाणां चाविशेषेण भवति ।

प्रान्ते श्लोकमाह—देशस्येति । देशस्य जनपदादेः, जात्याः ब्राह्मणादेः, सङ्घस्य समुदायस्य, ग्रामस्यापि वा, यो धर्मः उचितः पारम्पर्यसिद्धः, तस्य ग्रामादेः, तेनैव तद्धर्मानुसारेणैव, दायधर्मं दायभागं, प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे सप्तमोऽध्यायः,
दायविभागे पुत्रविभागः, दायविभागः समाप्तः । आदितश्चतुष्षष्टितमोऽध्यायः ॥

एकषष्टितमं प्रकरणम्

अष्टमोऽध्यायः

वास्तुकम् तत्र गृहवास्तुकम्

[परकीयगृहभूम्याक्रमणपरिहारोपायाः वास्तुपदार्थश्च]

सामन्तप्रत्यया वास्तुविवादाः । गृहं क्षेत्रम् आरामः सेतुबन्धः तटाकम् आधारो वा वास्तुः । कर्णकीलायससम्बन्धोऽनुगृहं सेतुः । यथासेतुभोगं वेश्म कारयेत् । अभूतं वा परकीयकुड्यःदपक्रम्य द्वावरत्नी त्रिपदीं वा पादे वन्धं कारयेत् ॥

[तत्तद्गृहसम्बन्धिमलोदकप्रसरणव्यवस्थाः]

अवस्करं भ्रमम् उदपानं गृहोचितमन्यत्र अन्यत्र सूतिकाकूपादा

श्रीमूला

वास्तुकमिति सूत्रम् । गृहारामक्षेत्रादि स्थावरजातं वास्तु तत्सबद्धं वास्तुकम् । तदुच्यत इति सूत्रार्थः । गृहारामक्षेत्रादीनां विभक्तानामपि नित्यसमुपश्लिष्टावस्थायित्वात् तत्र विवादाः सम्भवन्तीति तन्निर्णयार्थमिदं प्रकरणमध्यायैस्त्रिभिर्वितन्यते । तत्र प्रथमे गृहवास्तुकं, द्वितीये वास्तुविक्रयः, तृतीये विवीतक्षेत्रपथहिंसा ।

सामन्तप्रत्यया वास्तुविवादा इति । वास्तुगृहारामादिर्वक्ष्यमाणः तद्विवादाः, सामन्तप्रत्ययाः सामन्तोऽनन्तरवास्तुः तत्प्रमाणकाः ।

वास्तुपदार्थमाह—गृहमिति । गृहं, क्षेत्रं केदारादि, आराम उपवनं, सेतुबन्धः सीमाबन्धः पुष्पफलवाटषण्डमूलवापादिर्वा, तटाकं पद्माकरः, आधारो वा उदकबन्धो वा, वास्तुः ।

कर्णेत्यादि । कर्णेषु कोटिषु कीलाः निखाताः स्थूणाः कर्णकीलास्तेषु आयससम्बन्धः आयसानाम् अयोमयसूत्राणां सम्बन्धः सम्यगाबन्धनं कर्णकीलायससम्बन्धः तल्लक्षणः, अनुगृहं, सेतुः सीमाबन्धः, स्थायिद्रव्यान्तपालैः कार्य इति शेषः । यथासेतुभोगं सेत्वन्तर्गतभूविस्तारानतिक्रमेण, वेश्म सद्म, कारयेत् ।

पूर्वकृततथाविधसेत्वभावे आह—अभूतं वेति । अपूर्वं, परकुड्यात् परकीयगृहकुड्याद्, अपक्रम्य अपसृत्य, द्वौ अरत्नी त्रिपदीं वा पादे बन्धं कारयेत् द्विहस्तमानं पदत्रयमानं वा कुड्यमूले नेमिबन्धं कारयेत् स्वभूमौ ।

अवस्करमिति । मलमूत्रविसर्गस्थानम्, भ्रमं जलनिर्गमद्वारम्, उदपानं वा कूपं वा, गृहोचितम्, अन्यत्र तद्योग्यप्रदेशादन्यस्मिन् प्रदेशे परगृहबाधोत्पादहेतौ, न

निर्दशाहादिति । तस्यातिक्रमे पूर्वस्साहसदण्डः तेन ब(इ)न्धनावघातनकृतं कल्याणकृत्येष्वाचामोदकमार्गाश्च व्याख्याताः ॥

त्रिपदीप्रतिक्रान्तमध्यर्धमरत्निं वा प्रवेश्य गाढप्रसृतमुदकमार्गं प्रस्रवणप्रपातं वा कारयेत् । तस्यातिक्रमे चतुष्पञ्चाशत्पणो दण्डः ॥

[चतुष्पदां गृहोपकरणानाञ्च निवेशस्थानानि]

एकपदीप्रतिक्रान्तमरत्निं वा चक्रिचतुष्पदस्थानमग्निष्ठम् उदञ्जरस्थानं रोचनीं कुट्टनीं वा कारयेत् । तस्यातिक्रमे चतुर्विंशतिपणो दण्डः ॥

[गृहाणां परस्परम् अन्तरालभागपरिक्लृप्तिः]

सर्ववास्तुकयोः प्राक्षिप्तकयोर्वा शालयोः किष्कुरन्तरिका त्रिपदी वा ।

श्रीमूला

कारयेत् तत्रापवादः—अन्यत्र सूतिकाकूपात्, सूतिकास्नानोदकपतनार्थो गर्तः सूतिकाकूपः तं तु यथेष्टे देशे कारयेदित्यर्थः आ कुतः आ निर्दशाहाद् आ दशाहातिक्रमात् । तदनन्तरं तं शोधयित्वा शुद्धमृदा पूरयेत् । तस्यातिक्रम इति । उक्तावस्करादिविध्युल्लङ्घने, पूर्वः साहसदण्डः ।

तेनेति । तेन सूतिकोक्तकल्पेन, कल्याणकृत्येषु उपनयनविवाहादिमङ्गलकार्येषु, इन्धनावघातनकृतम्, एधःकाष्ठविदारणप्रयुक्तं विधानम्, आचामोदकमार्गाश्च निस्स्रावजलमार्गाश्च, व्याख्याता उक्तप्रायाः । आकल्याणकृत्यसमाप्ति यथेष्टे देशे तेषां करणमनुमतमित्यर्थः ।

भ्रमविधिमाह—त्रिपदीत्यादि । त्रिपदीप्रतिक्रान्तं परकीयकुड्यात् पदत्रयदूरापक्रान्तम्, अध्यर्धमरत्निं वा प्रवेश्य सार्धहस्तं वा परकुड्यादपक्रम्य स्वभूम्यन्तःप्रवेशितं, गाढप्रसृतं निरर्गलमलोदकप्रसरम्, उदकमार्गं दीर्घिकाकारं, कारयेत् । प्रस्रवणप्रपातं वा कारयेत् सर्वमलिनजलप्रवाहपतनस्थानं च तथाभूतं कारयेत् । तस्यातिक्रम इति । उक्तविधिलङ्घने चतुष्पञ्चाशत्पणो दण्डः ।

एकपदीत्यादि । एकपदीप्रतिक्रान्तं परकुड्यादेकपददूरापक्रान्तम्, अरत्निं वा एकहस्तदूरं वा प्रतिक्रान्तमित्यार्थं, चक्रिचतुष्पदस्थानं चक्रिस्थानम् अजवलीवर्दस्थानं चतुष्पदस्थानं गजादिस्थानं च, अग्निष्ठं चुल्लीम्, उदञ्जरस्थानम् उदञ्जरं महज्जलपात्रं तन्निवेशस्थानं, रोचनीं रोचनकर्मयन्त्रं, कुट्टनीं वा उलूखलं च कारयेत् । तस्य चक्रिस्थानादिविधेः, अतिक्रमे, चतुर्विंशतिपणो दण्डः ।

सर्ववास्तुकयोरिति । उक्तेषु सर्वेषु वास्तुषु गृहचक्रिचतुष्पदस्थानादिषु मध्ये वास्तुकयोर्द्वयोः शालयोः, प्राक्षिप्तकयोः परस्परसन्निकृष्टयोः प्राप्तयोः, किष्कुस्त्रिपदी वा अन्तरिका साष्टाङ्गुलहस्तमानं पदत्रयमानं वा अन्तरालं कर्तव्यम् ।

तयोश्चतुरङ्गुलं नीप्रान्तरं समारूढकं वा । किष्कुमात्रमाणिद्वारमन्तरिकायां खण्डफुल्लार्थमसम्पातं कारयेत् । प्रकाशार्थमल्पमूर्ध्वं वातायनं कारयेत् । सम्भूय वा गृहस्वामिनो यथेष्टं कारयेयुः, अनिष्टं वारयेयुः ॥

[वर्षवातादिबाधापरिहारावश्यकता]

वानलट्याश्चोर्ध्वम् आवार्यभागं कटप्रच्छन्नमवमर्शभित्तिं वा कारयेत् वर्षबाधभयात् । तस्यातिक्रमे पूर्वस्साहसदण्डः; प्रतिलोमद्वारवातायनबाधायां च, अन्यत्र राजमार्गरथ्याभ्यः । खातसोपानप्रणालीनिःश्रेण्यवस्करभागैर्बहिर्बाधायां भोगनिग्रहे च । परकुड्यमुदकेनोपघ्नतो द्वादशपणो दण्डः । मूत्रपुरीषोपघाते द्विगुणः ।

श्रीमूला

तयोः शालयोः, चतुरङ्गुलं, नीप्रान्तरं पटलप्रान्तान्तरालं, कार्यम् । समारूढकं वा परस्परोपर्यारूढं वा तत् कार्यं गृहपत्योरनुज्ञायाम् । किष्कुमात्रमिति । साष्टाङ्गुलहस्तपरिमाणम्, आणिद्वारं क्षुद्रद्वारम्, अन्तरिकायां कारयेत्, किमर्थं, खण्डफुल्लार्थं स्फुटितसंस्कारार्थं, कथम्भूतम्, असम्पातम् असुकरजनगतागतम् । प्रकाशार्थमिति । प्रकाशलाभाय, अल्पम् ऊर्ध्वं, वातायनं गवाक्षं, कारयेत् । सम्भूय वेति । समानच्छन्दीभूय वा, गृहस्वामिनः, यथेष्टं स्वाभिरुचितप्रकारं कारयेयुः, अर्थाद् अन्तरिकादिवातायनान्तमुक्तमनुक्तं च यत्किञ्चित् । अनिष्टम् अनभिमतं वारयेयुः ।

वानलट्याश्चोर्ध्वमिति । वानलटी गृहवरण्डकः तस्या ऊर्ध्वम्, आवार्यभागम् अवच्छादनीयं भागं, कटप्रच्छन्नं कटैस्तृणविशेषैराच्छादितं, कारयेत् । अवमर्शभित्तिं वा अल्पभित्तिं च, कटप्रच्छन्नां कारयेत् । कस्मात्, वर्षबाधभयात् वृष्टिपीडापरिहारार्थम् । तस्यातिक्रमे उक्तविधेरननुष्ठाने, पूर्वः साहसदण्डः ।

प्रतिलोमद्वारवातायनबाधायां चेति । प्रतिलोमेन द्वारेण परगृहजनप्रतिकूलेन द्वारेण वातायनेन च परोपद्रवोत्पादने, पूर्वः साहसदण्ड इति वर्तते । तत्रापवादः— अन्यत्र राजमार्गरथ्याभ्य इति । राजमार्गरथ्याभिमुख्येन द्वारवातायनयोः करणे तु सत्यामपि परबाधायां न दोष इत्यर्थः ।

खातेत्यादि । खातं गर्तादि, सोपानम् आरोहणं, प्रणाली जलनिर्गमपथः, निःश्रेणिरधिरोहणी, अवस्करः मलमूत्रविसर्गस्थानम् एतेषां भागैः एतत्करणार्थमपहृतैः भूमिभागैः, बहिर्बाधायां बहिर्जनपीडने, भोगनिग्रहे च परस्य भूम्युपभोगप्रतिबन्धे च, पूर्वः साहसदण्ड इत्येव ।

परकुड्यमिति । परकीयां भित्तिम्, उदकेन जलावसेकेन, उपघ्नतः द्वादशपणो दण्डः । मूत्रपुरीषोपघाते परकुड्यस्य मूत्रपुरीषाभ्यामुपघाते, द्विगुणः चतुर्विंशतिपणो दण्डः ।

प्रणालीमोक्षो वर्षति । अन्यथा द्वादशपणो दण्डः ॥

[-संविदमतिक्रम्य अधिककालं गृहवासे कर्तव्याः व्यवस्थाः]

प्रतिषिद्धस्य च वसतो निरस्यतश्चावक्रयणम्, अन्यत्र पारुष्यस्तेयसाहस-सङ्ग्रहणमिथ्याभोगेभ्यः । स्वयमभिप्रस्थितो वर्षावक्रयशेषं दद्यात् ॥

[सर्वसाधारण्येनानुभाव्याः प्रदेशाः, अनुभवनिरोधे दण्डश्च]

सामान्ये वेश्मनि साहाय्यमप्रयच्छतः सामान्यमुपरुन्धतो भोगं च गृहे द्वादशपणो दण्डः । विनाशयतस्तद्द्विगुणः ॥

कोष्ठकाऽङ्गण वर्चानामग्नि-कुट्टन-शालयोः ।
विवृतानां च सर्वेषां सामान्यो भोग इष्यते ॥१३४॥

इति धर्मस्थीये वास्तुके गृहवास्तुकम्, अष्टमोऽध्यायः,
आदितः पञ्चषष्टितमः

श्रीमूला

प्रणालीमोक्षो वर्षतीति । पर्जन्ये वर्षति सति प्रणालीद्वारेणोदकमोक्षः कर्तव्यः । अन्यथा अमोक्षणे अवृष्टिषु प्रणालीमोक्षणे वा, द्वादशपणो दण्डः ।

अवक्रीतविषयमाह—प्रतिषिद्धस्य च वसत इति । 'इयन्तं कालं त्वया शुश्रूषमाणेन मदन्तिके वस्तव्यमि'ति स्वामिपरिभाषिते कालेऽतीते सति 'इत ऊर्ध्वं मा वसे'ति निषिद्धस्यापि वासममुञ्चतोऽवक्रीतस्य, द्वादशपणो दण्ड इति वर्तते । निरस्यतश्चावक्रयणमिति । मूल्यदानपूर्वं शुश्रूषुस्वीकरणं यावत्परिभाषितकालाननुवर्तनेन मध्ये त्यजतोऽवक्रेतुश्च, द्वादशपणो दण्डः ।

तत्रापवादः—अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणमिथ्याभोगेभ्य इति । पारुष्यं वाग्दण्डपारुष्यं, स्तेयं चौर्यं, साहसं प्रसभकर्म, सङ्ग्रहणं, स्त्रीसङ्ग्रहणम्, मिथ्याभोगः देहसंस्काराद्यकरणम् एषां सम्भवे क्लृप्तकालपूर्तेः प्राक् त्यजतो न दोष इत्यर्थः । स्वयमभिप्रस्थित इति । क्लृप्तकालमखिलमनुषित्वा यथेच्छमपसृतोऽवक्रीतः, वर्षावक्रयशेषं क्लृप्तवत्सरशेषमूल्यं, दद्यात् ।

सामान्य इति । उभयसाधारणे, वेश्मनि, साहाय्यम्, अप्रयच्छतः अकुर्वतः, सामान्यं, गृहे भोगम्, उपभोगम् उपरुन्धतो निगृह्णतश्च, द्वादशपणो दण्डः । विनाशयतः, तद्द्विगुणः चतुर्विंशतिपणो दण्डः ।

प्रान्ते श्लोकमाह—कोष्ठकाङ्गणवर्चानामिति । कोष्ठकं गृहद्वारम्, अङ्गणम् अजिरं, वर्चम् अवस्करस्थानं, वर्चानामिति क्वचित् पाठः । इत्येतेषाम्, अग्निकुट्टन-शालयोः अग्निशाला महानसः कुट्टनशाला उलूखलशाला तयोः, सर्वेषां च, विवृतानाम् अनावृतदेशानां, भोगः, सामान्यः साधारणः इष्यते ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे अष्टमोऽध्यायः,
वास्तुके गृहवास्तुकम् । आदितः पञ्चषष्टितमोऽध्यायः ॥

नवमोऽध्यायः

वास्तुविक्रयः

[गृहारामादिक्रयविक्रयार्हता, क्रमश्च]

ज्ञातिसामन्तधनिकाः क्रमेण भूमिपरिग्रहान् क्रेतुं अभ्याभवेयुः। ततोऽन्ये बाह्याः। सामन्तचत्वारिंशत्कुल्या गृहप्रतिमुखे वेश्म श्रावयेयुः; सामन्तग्रामवृद्धेषु क्षेत्रमारामं सेतुबन्धं तटाकमाधारं वा मर्यादासु यथासेतुभोगम्। अनेनार्घेण कः क्रेता इति त्रिराघुषितमव्याहतं क्रेता क्रेतुं लभेत। स्पर्धया वा मूल्यवर्धने मूल्यवृद्धिः सशुल्का कोशं गच्छेत्। विक्रयप्रतिक्रोष्टा शुल्कं दद्यात्।

श्रीमूला

गताध्याये वास्तोः षट्प्रकारा उक्ताः। तत्र प्राधान्येन नेमिबन्धप्रस्रवणप्रपातपरस्परान्तरालानि चक्रिचतुष्पदस्थानादिकं चाभिहितम्। गृहादीनां विक्रयादिकं त्वस्मिन्नध्यायेऽभिधीयते।

ज्ञातीत्यादि। ज्ञातिसामन्तधनिकाः ज्ञातिर्दायादः सामन्तो निकटगृहवासी धनिकः ऋणप्रयोक्ता एते, क्रमेण पूर्वाभावे पर इति परिपाट्या, भूमिपरिग्रहान् गृहादीन्, क्रेतुम्, अभ्याभवेयुः अर्हेयुः, अभ्यावहेयुरिति वा पाठः, लभेरन्नित्यर्थः। ततः तेषामभावे, अन्ये बाह्याः, अभ्याभवेयुः।

सामन्तेत्यादि। सामन्तचत्वारिंशत्कुल्याः नैकटिकैश्चत्वारिंशता गृहिभिः समेताः गृहप्रतिमुखे गृहस्याग्रे, वेश्म श्रावयेयुः 'विक्रेष्यामहे' इति प्रतिक्रोशेयुः। सामन्तग्रामवृद्धेष्विति। तेषु शृण्वत्सु, क्षेत्रम्, आरामं, सेतुबन्धं, तटाकम्, आधारं वा अल्पसरश्च, मर्यादासु तत्तत्सीमासु स्थित्वा, यथासेतुभोगम् 'इमेऽस्य सीमाबन्धाः एतावान् भोग' इति च यथास्थितसेतुभोगनिर्देशयुक्तं, श्रावयेयुरित्यनुषज्यते। अनेनेति। 'अनेनार्घेण कः क्रेता' इति, त्रिः वारत्रयम् आघुषितम् उद्घुष्य श्रावितं गृहादिकम् अव्याहतं ज्ञात्याद्यप्रतिषिद्धं, क्रेता, क्रेतुं लभेत मूल्यदानेन स्वीकर्तुमर्हेत।

स्पर्धया वा मूल्यवर्धन इति। क्रेतृसङ्घर्षेण निमित्तेन मूल्यस्य विक्रेतृनिर्दिष्टापेक्षयाधिक्यसम्भवे, मूल्यवृद्धिः सशुल्का कोशं गच्छेत् मूल्यवृद्ध्यंशः शुल्कसहितः राजभाण्डागारं प्राप्नुयात्। विक्रयप्रतिक्रोष्टा विक्रये मूल्यवर्धयिता, शुल्कं दद्यात्।

अस्वामिप्रतिक्रोशे चतुर्विंशतिपणो दण्डः। सप्तरात्रादूर्ध्वमनभिसरतः प्रतिक्रुष्टो विक्रीणीत। प्रतिक्रुष्टातिक्रमे वास्तुनि द्विशतो दण्डः अन्यत्र चतुर्विंशतिपणो दण्डः। इति वास्तुविक्रयः।

[सीमाविवादपरिहारोपायाः]

सीमविवादं ग्रामयोरुभयोस्सामन्ता पञ्चग्रामी दशग्रामी वा सेतुभिः स्थावरैः कृत्रिमैर्वा कुर्यात्। कर्षकगोपालवृद्धकाः पूर्वभुक्तिका वा, अबाह्यास्सेतूनामाभिज्ञा बहवः एको वा निर्दिश्य सीमासेतून् विपरीतवेषाः सीमानं नयेयुः। उद्दिष्टानां सेतूनामदर्शने सहस्रदण्डः। तदेव नीते सीमापहारिणां सेतुच्छिदां च कुर्यात्। प्रणष्टसेतुभोगं वा सीमानं राजा यथोपकारं विभजेत्।

श्रीमूला

अस्वामिप्रतिक्रोश इत्यादि। भूम्यनधिकारिणः प्रतिक्रोशतश्चतुर्विंशतिपणो दण्डः। सप्तरात्रादूर्ध्वमिति। प्रतिक्रुश्य क्रयव्यवहारशुद्धयर्थं व्यवहारस्थानमनभिगच्छन् प्रतिक्रोष्टा आसप्तरात्रं प्रतीक्षणीयः। तत ऊर्ध्वं, प्रतिक्रुष्टो विक्रीणीत, अन्यस्मै। प्रतिक्रुष्टातिक्रमे प्रतिक्रुष्टकृतेऽतिक्रमे प्रतिक्रोष्टारमनादृत्य तदन्यस्मै विक्रये क्रियमाणे इति यावत्। वास्तुनि द्विशतः वास्तुविषये द्विशतपणः, दण्डः अन्यत्र चतुष्पदादिविषये, चतुर्विंशतिपणो दण्डः। इति वास्तुविक्रयः व्याख्यात इति शेषः।

सीमाविवादमाह—सीमाविवादमित्यादि। द्वयोर्ग्रामयोः सीमाव्यतिक्रमविवादे प्रसक्ते, सामन्ता समीपवर्तिनी, पञ्चग्रामी दशग्रामी वा अर्थात् तत्स्था व्यवहारज्ञाः समुदेत्य गिरिनदीविपिनादिभिः स्थावरैः सेतुभिस्तुषाङ्गारभस्मादिभिश्च कृत्रिमैः कुर्यात् निर्णयेत्।

कर्षकगोपालवृद्धका इत्यादि। सीमान्तग्रामाभावे कृषिकर्मिणो वृद्धगोपालकाः, पूर्वभोक्तारो वा सीमानं निर्णयेयुः। अबाह्यास्तदन्तदेशवासिनः नष्टसीमासेतुविषयाविसंवादिज्ञानशालिनो बहवो लुब्धकादयः तेष्वेक एव वा, सीमासेतून् निर्दिश्य अमुकप्रदेशः पूर्वसीमेत्यङ्गुल्यापदिश्य सीमानं नयेयुः समर्थयेयुः दर्शयेयुः। विपरीतवेषा इत्यबाह्यानां विशेषणं, सीमानयनकाले विपरीतं वेषं रक्तवस्त्रमाल्यादिधारणरूपं स्त्र्यादिवेषं ते धारयेयुरित्यर्थः। सीमाख्यातॄणां स्त्र्यादिविपधारणं तत्समुदाचारसिद्धं द्रष्टव्यम्। उद्दिष्टानामिति। निर्दिष्टानां सेतूनाम्, अदर्शने प्रदर्शनाभावे, सहस्रदण्डः सहस्रपणो दण्डः, निर्देष्टुः। तदेवेति। नीते सेतौ यथानिर्दिष्टे प्रदर्शने निर्णीते सति, सीमापहारिणां, सेतुच्छिदां च सीमास्थितवृक्षभञ्जकानां च, तदेव दण्डविधानं सहस्रलक्षणं कुर्यात्।

प्रनष्टसेतुभोगं वेत्यादि। अत्यन्ताविज्ञानसेतुम् अत्यन्ताविज्ञातभुक्तिं च सीमानं क्षेत्रादिप्रदेशं, राजा, यथोपकारम् उपकारानुगुण्येन, विभजेत्।

[क्षेत्रविवादपरिहारोपायाः]

क्षेत्रविवादं सामन्तग्रामवृद्धाः कुर्युः। तेषां द्वैधीभावे यतो बहवश्शुचयोऽनुमता वा ततो नियच्छेयुः; मध्यं वा गृह्णीयुः। तदुभयं परोक्तं वास्तु राजा हरेत्; प्रनष्टस्वामिकं च; यथोपकारं वा विभजेत्। प्रसह्यादाने वास्तुनि स्तेयदण्डः। कारणादाने प्रयासमाजीवं च परिसङ्ख्याय बन्धं दद्यात्। मर्यादापहरणे पूर्वः साहसदण्डः। मर्यादाभेदे चतुर्विंशतिपणः।

[उक्तक्रमस्य विवादान्तरेष्वप्यतिदेशेन
मर्यादास्थापननिगमनम्]

तेन तपोवनविवीतमहापथश्मशानदेवकुलयजनपुण्यस्थानविवादा व्याख्याताः। इति मर्यादास्थापनम्।

सर्व एव विवादास्सामन्तप्रत्ययाः। विवीतस्थलकेदारषण्डखलवेश्मवाहनकोष्ठानाम् . पूर्वं पूर्वमाबाधं सहेत।

श्रीमूला

क्षेत्रविवादमाह—क्षेत्रेत्यादि। क्षेत्रविवादं, सामन्तग्रामवृद्धाः, कुर्युः निर्णयेयुः। तेषां द्वैधीभावे पक्षभेदे सति, यतो वहवः शुचयोऽनुमता वा यस्मिन् पक्षे वहवः प्रविष्टास्ते च बाह्याभ्यन्तरशौचसम्पन्नाः लोकसम्मताश्च, ततो नियच्छेयुः तेन पक्षेण निर्णयेयुः। मध्यं वा गृह्णीयुः समं पक्षं वा गृहीत्वा विभज्य निर्णयेयुः। तदुभयं परोक्तमिति। चेदित्यध्याहर्तव्यं वहुपक्षानुसारनिर्णयः समपक्षानुसारनिर्णयश्चेत्युभयं विवादिभ्यां प्रतिषिद्धं चेत्, वास्तुविवादविषयभूतं क्षेत्रं, राजा हरेत् स्वयं गृह्णीयात्। प्रनष्टस्वामिकं च अपगतस्वामिकं च वास्तु राजा हरेत्। यथोपकारं वा, विभजेत् अपगतस्वामिदायग्रहणार्हेभ्यो विभज्य वा दद्यात्।

प्रसह्यादान इति। बलाद् गृहीते सति वास्तुनि, स्तेयदण्डः चौर्यविहितो दण्डो ग्रहीतुः। कारणादाने प्रयासमित्यादि।

ऋणादिकारणवशाद् गृहीते वास्तुनि क्षेत्रसंस्कारार्थं प्रयुक्तं कायाद्यायासं क्षेत्रसमुत्थं फलं च मूल्यतः परिगणय्य, बन्धं दद्यात् तद्धने ऋणधनादुद्रिच्यमाने दृष्टे तमधिकमंशं भूस्वामिने प्रयच्छेत्। मर्यादापहरणे उभयभूम्योः सीमापहारे, पूर्वः साहसदण्डः। मर्यादाभेदे सीमाया एकदेशापहारेण भेदकरणे चतुर्विंशतिपणः।

उक्तं गृहादिसीमाविवादविधानं तपोवनादिसक्तविषयेष्वपि विवादेषु योजनीयमित्याह—तेनेत्यादि। इति मर्यादास्थापनमिति। व्याख्यातम्।

सर्वं एवेति। सर्वे एव विवादाः सामन्तप्रत्ययाः अनन्तरवास्तुनिमित्ताः। तत्त्वं च वास्तुषु परस्परेण परस्परस्य यदा पीडोत्पादस्तदैव तन्निवारणाय विवादानां

[विवदमानयोर्द्वयोरन्यतरस्यावश्यबाधनीयत्वे
बाधाबाधव्यवस्थाः]

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जाः स्थलप्रदेशाः। आधारपरिवाहकेदारोपभोगैः परक्षेत्रकृष्टबीजहिंसायां यथोपघातं मूल्यं दद्युः। केदारारामसेतुबन्धानां परस्परहिंसायां हिंसाद्विगुणो दण्डः। पश्चान्निविष्टमधरतटाकं नोपरितटाकस्य केदारमुदकेनाप्लावयेत्। उपरि निविष्टं नाधरतटाकस्य पूरास्रावं वारयेत्, अन्यत्र त्रिवर्षोपरतकर्मणः। तस्यातिक्रमे पूर्वस्साहसदण्डः तटाकवामनं च। पञ्चवर्षोपरतकर्मणः सेतुबन्धस्य स्वाम्यं लुप्येतान्यत्राऽऽपद्भ्यः।

श्रीमूला

प्रवर्तनात्। तत्र द्वयोरन्यतरस्यावश्यपीडनीयत्वप्राप्तौ नियममाह—विवीतस्थलेत्यादि। विवीतं प्रवृद्धतृणस्तम्बो गवादिप्रचारदेशः स्थलं लूनापनीततृणस्तम्बा परिष्कृता भूमिः केदारः क्षेत्रं षण्डः कदल्यादिवनं खलं धान्यपवनस्थानं वेश्म प्रसिद्धं वाहनकोष्ठः गवाश्वादिस्थानम् एषां सप्तानां मध्ये, पूर्वं पूर्वं कर्तृ, आबाधम् उत्तरोत्तरनिमित्तां पीडां सहेत।

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जा इति। ब्रह्मारण्यं सोमारण्यं देवस्थानं यजनस्थानं पुण्यस्थानं च वर्जयित्वा सर्वे भूभागाः स्थलप्रदेशाः क्षेत्रयोग्याः प्रदेशाः वेदितव्याः।

आधारपरिवाहकेदारोपभोगैरित्यादि। जलाधारखातेन जलपरिवहनदीर्घिकारचनया स्थलीकेदारीकरणेन च परकीयकेदारोप्तधान्यबीजोपघाते उपघातानुसारेण धान्यमूल्यं दद्युः। केदारारामसेतुबन्धानां परस्परहिंसायां, हिंसाद्विगुण उपहतफलद्विगुणः, दण्डः।

पश्चान्निविष्टमिति। उत्तरकालोत्पन्नम् अधरतटाकम्, उपरितटाकस्य पूर्वोत्पन्नस्य, केदारम्, उदकेन नाप्लावयेत् नापूरयेत्। उपरिनिविष्टमिति। उपरितटाकं पश्चान्निविष्टम् अधरतटाकस्य पूर्वसिद्धस्य, पूरास्रावं प्रवाहस्रुतिं, न वारयेत्। अन्यत्र त्रिवर्षोपरतकर्मण इति। तच्चेदधरतटाकं वर्षत्रयपरित्यक्तजलपायनसाध्यकृषिकर्म भवेत्, तदा पूरास्रावावारणे न दोष इत्यर्थः। तस्यातिक्रमे उक्तविधेर्लङ्घने, पूर्वः साहसदण्डः, तटाकवामनं च जलनिर्गमनेन तटाकशून्यीकरणं च दण्डः।

पञ्चवर्षोपरतकर्मण इति। पञ्चवर्षोपेक्षितस्य, सेतुबन्धस्य, स्वाम्यं स्वामित्वं, स्वामिनो लुप्येत नश्येत्, अन्यत्रापद्भ्य इति। परचक्राद्यापत्सु तूपेक्षितस्य स्वामित्वं न हीयेत।

तटाकसेतुबन्धानां नवप्रवर्तने पाञ्चवार्षिकः परिहारः। भग्नोत्सृष्टानां चातुर्वर्षिकः। समुपारूढानां त्रैवर्षिकः। स्थलस्य द्वैवर्षिकः। स्वात्मा आधाने विक्रये च। खातप्रावृत्तिमनदीनिबन्धायतनतटाककेदाराराम-षण्डवापानां सस्यवर्णभागोत्तरिकमन्येभ्यो वा यथोपकारं दद्युः। प्रक्रया-वक्रयाधिभागभोगनिसृष्टोपभोक्तारश्चैषां प्रतिकुर्युः। अप्रतीकारे हीनद्विगुणो दण्डः।

श्रीमूला

तटाकसेतुबन्धानामिति। तेषां, नवप्रवर्तने नूतननिर्माणे, पाञ्चवर्षिकः पञ्चवर्ष-व्यापी, परिहारः करमोक्षः, कार्यः। भग्नौत्सृष्टानामिति। महाजलप्रवाहाद्युपहतो-परतकर्मणां, नवप्रवर्तने नूतनकृषिप्रवर्तने, चातुर्वर्षिकः परिहारः। समुपारूढाना-मिति। तृणस्तम्बवनादिच्छेदनोन्मूलनादिना नवक्षेत्रीकृतानां स्थलानां नवप्रवर्तने, त्रैवर्षिकः परिहारः। स्थलस्येति। स्वत एव तृणस्तम्बादिशून्यतया सुकरसंस्कारस्य भूप्रदेशस्य, नवप्रवर्तने, द्वैवर्षिकः, परिहारः। स्वात्माधाने विक्रये चेति। आधीकरणे विक्रयणे चैषां स्वात्मा नवप्रवर्तक एव, प्रभुरिति शेषः। स्वाम्याधान इति वा पाठः।

खातप्रावृत्तिमेत्यादि। खातप्रावृत्तिमं खनननिर्वृत्तकूपपेयजलम्, नद्यायतनं नद्याश्रयं नदीपेयजलं, निबन्धायतनं नदीसेतुबन्धाश्रयं तत्प्रवर्तितकुल्योपनेयजलं, तटाकं लक्षणया तटाकोपनेयजलं, केदारारामौ प्रतीतौ, षण्डवापः कदल्यादिवा-पस्थानम् इत्येतेषां मध्ये, अन्यतममिति शेषः, सस्यवर्णभागोत्तरिकं दद्युः सस्य-वर्णोत्तरिकं सस्यवर्णाधिक्ययुक्तं भागोत्तरिकं भागाधिक्ययुक्तं च यथा भवति तथा दद्युः, अर्थात् अधिकसस्यवर्णनिष्पादकायाधिकभागदायकाय च कृष्यर्थे। अन्येभ्यो वा अव्यसनिभ्यः कर्मण्येभ्यः, यथोपकारं दद्युः यथा फलोदयभागपरिभाषया दद्युः।

प्रक्रयावक्रयाधिभागनिसृष्टोपभोक्तार इति। प्रक्रयोपभोक्तारः क्षेत्रादिकं क्रीत्वा भोक्तारः, अवक्रयोपभोक्तारः 'फलितेऽफलिते वा क्षेत्रादौ फलमेतावत् प्रतिनियतं स्वामिने दास्यामी'ति संविदा क्षेत्रादिस्वीकारोऽवक्रयस्तदुपभोक्तारः, आध्युपभोक्तारः पणयगृहीतभोक्तारः, भागभोगोपभोक्तारः उपलब्धस्य फलस्यैतावान् भागो देय इति संविदा भोक्तारः, निसृष्टोपभोक्तारः यथादत्तभागग्रहणपरिभाषयोपभोक्तारश्च, एषां तटाकादीनां, प्रतिकुर्युः उपघातप्रतिविधानं कुर्युः। अप्रतीकारे प्रतीकाराकरणे, हीनद्विगुणो दण्डः।

सेतुभ्यो मुञ्चतस्तोयमवारे षट्पणो दमः ।
वारे वा तोयमन्येषां प्रमादेनोपरुन्धतः ॥१३८॥

इति धर्मस्थीये वास्तुके वास्तुविक्रयः सीमाविवादः मर्यादास्थापनं बाधाबाधिकं च । नवमोऽध्यायः । आदितः षट्षष्टितमः ।

श्रीमूला

अध्यायप्रान्ते श्लोकमाह—सेतुभ्य इति । अवारे आत्मनोऽपर्याये, सेतुभ्यस्तटाकादिभ्यः, तोयं मुञ्चतः क्षेत्रादिकं पाययतः, षट्पणो दमः दण्डः । अन्येषां वारे पर्याये, प्रमादेन अज्ञानेन, तोयम् उपरुन्धतो वा अन्यक्षेत्रजलपायनं प्रतिबध्नतश्च, षट्पणो दमः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे नवमोऽध्यायः, वास्तुके वास्तुविक्रयः, सीमाविवादः, क्षेत्रविवादः, मर्यादास्थापनम्, बाधाबाधिकम् । आदितः षट्षष्टितमोऽध्यायः ॥

एकषष्टितमद्विषष्टितमे प्रकरणे

दशमोऽध्यायः

विवीतक्षेत्रपथहिंसा समयस्यानपाकर्म च

[तत्तन्मार्गरोधं कुर्वतां सेतुकूपादिविषये
अतिक्रमप्रवृत्तिमतां च दण्डाः]

कर्मोदकमार्गमुचितं रुन्धतः कुर्वतोऽनुचितं वा पूर्वस्साहसदण्डः। सेतुकूपपुण्यस्थानचैत्यदेवायतनानि च परभूमौ निवेशयतः पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो नाययतो वा मध्यमस्साहसदण्डः; श्रोतृणामुत्तमः, अन्यत्र भग्नोत्सृष्टात्। स्वाम्यभावे ग्रामाः पुण्यशीला वा प्रतिकुर्युः। पथिप्रमाणं दुर्गनिवेशे व्याख्यातम्। क्षुद्रपशुमनुष्यपथं रुन्धतो द्वादशपणो दण्डः। महापशुपथं चतुर्विंशतिपणः। हस्तिक्षेत्रपथं चतुष्पञ्चाशत्पणः।

श्रीमूला

अथ वास्तुकस्य तृतीयाध्याय आरभ्यते। पूर्वाध्याये सीमादिनिर्णयः क्षेत्रादीनामुक्तः। उदकमार्गनिरोधे सस्यादिहिंसने च दण्डविधिरिहोच्यते।

कर्मोदकमार्गमिति। कृष्यर्थंजलमार्गम्, उचितं पूर्वानुवृत्तं, रुन्धतः, अनुचितं कुर्वतो वा नवं प्रवर्तयतो वा, पूर्वः साहसदण्डः।

सेतुकूपपुण्यस्थानचैत्यदेवायतनानि चेति। सेत्वादीनि पञ्च, परभूमौ, निवेशयतः सृजतः, पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो नाययतो वा पूर्वपुरुषैर्धर्मार्थे विसृष्टं सेतुकूपतटाकादिकम् आधीकुर्वतो विक्रीणानस्य तत्पुत्रादेस्तत्प्रयोजकस्य वा, मध्यमः साहसदण्डः। श्रोतृणां तत्साक्षिणाम् उत्तमः साहसः। तत्रापवादः— अन्यत्र भग्नोत्सृष्टात्, उपहतासंस्कृतोपेक्षितसेत्वादिव्यतिरेकेण।

स्वाम्यभाव इति। प्रवर्तकतत्पुत्राद्यभावे ग्रामाः ग्रामवास्तव्याः, पुण्यशीला वा ग्रामात्रास्तव्या अपि, प्रतिकुर्युः संस्कुर्युः, अर्थाद् भग्नं सेत्वादिकम्।

पथिहिंसां वक्तुं तत्प्रमाणं दुर्गनिवेशोक्तं स्मारयति—पथिप्रमाणमित्यादि। क्षुद्रपशुमनुष्यपथमिति। क्षुद्रपशुमार्गं मनुष्यमार्गं च दुर्गनिवेशोक्तं, रुन्धतः, द्वादशपणो दण्डः। महापशुपथं गवाश्वादिमार्गं, रुन्धतः, चतुर्विंशतिपणः। हस्तिक्षेत्रपथं रुन्धतः चतुष्पञ्चाशत्पणः।

सेतुवनपथं षट्छतः। श्मशानग्रामपथं द्विशतः। द्रोणमुखपथं पञ्चशतः। स्थानीयराष्ट्रविवीतपथं साहस्रः। अतिकर्षणे चैषां दण्डचतुर्थो दण्डाः। कर्षणे पूर्वोक्ताः।

[क्षेत्रविषये क्रयविक्रयकृष्यादिव्यवस्थाः, अक्रमव्यवहर्तॄणां दण्डाश्च]

क्षेत्रिकस्याऽक्षिपतः क्षेत्रं उपवासस्य वा त्यजतो बीजकाले द्वादशपणो दण्डः, अन्यत्र दोषोपनिपाताविषह्येभ्यः। करदाः करदेष्वाधानं विक्रयं वा कुर्युः, ब्रह्मदेयिका ब्रह्मदेयिकेषु। अन्यथा पूर्वस्साहसदण्डः, करदस्य वाऽकरदग्रामं प्रविशतः। करदं तु प्रविशतः सर्वद्रव्येषु प्राकाम्यं स्यात्, अन्यत्रागारात्। तदप्यस्मै दद्यात्।

श्रीमूला

सेतुवनपथं रुन्धतः षट्छतः। श्मशानग्रामपथं रुन्धतो द्विशतः। द्रोणमुखपथं रुन्धतः पञ्चशतः। स्थानीयराष्ट्रविवीतपथं स्थानीयं प्रसिद्धं राष्ट्रविवीते समाहर्तृसमुदयप्रस्थापनोक्ते तेषां पन्थानं, रुन्धतः साहस्रः। अतिकर्षणे चैषामिति। अतिकर्षणमपकर्षणं न्यूनीकरणम् उक्तानां पथामेकदेशापहरणेन प्रमाणतो न्यूनीकरणे, दण्डचतुर्थाः पूर्वोक्तदण्डचतुर्भागाः, दण्डाः। कर्षणे पथिषु कृषिकरणे, पूर्वोक्ताः दण्डाः।

क्षेत्रिकस्येति। बीजकाले, क्षेत्रम् अक्षिपतः कर्षकायानर्पयतः, क्षेत्रिकस्य क्षेत्रस्वामिनः, त्यजत उपवासस्य वा कृषिमभ्युपेत्य बीजवापकाले क्षेत्रं मुञ्चतः कर्षकस्य वा, द्वादशपणो दण्डः। अन्यत्र दोषोपनिपाताविषह्येभ्य इति। दोषः क्षेत्रदोषः उपनिपातो राजचोराद्युपद्रवः अविषह्यं महारोगादि एतेषु निमित्तेषु क्षेत्रत्यागो न दोषाय।

करदा इति। करदायकाः, करदेषु आधानं विक्रयं वा कुर्युः, न त्वकरदेष्वित्यर्थः। ब्रह्मदेयिकाः, ब्रह्मदायिका इत्यपि पाठः, ब्रह्मदेयं ब्रह्मदायो वा करमोक्षितं ब्राह्मणयोग्यं क्षेत्रादिकमुच्यते। तथाविधभूमिस्वामिनः, ब्रह्मदेयिकेषु आधानं विक्रयं वा कुर्युः, न त्वतथाभूतेषु। अन्यथा उक्तविध्यतिक्रमेणाधानविक्रयकरणे, पूर्वः साहसदण्डः। आहितविक्रीतक्षेत्रस्वीकर्तुर्दण्डमाह—करदस्य वेत्यादि।

करदं त्विति। करदं ग्रामं, प्रविशतः करदस्य, सर्वद्रव्येषु धान्यचतुष्पदादिषु, प्राकाम्यं स्वाच्छन्द्यं स्वामित्वं, स्यात्, अन्यत्रागारात् विक्रेतृगृहवर्जम्। तदपि अस्मै दद्यात् क्षेत्रविक्रेता यदि गृहमपि विक्रेतुमिच्छेत् तदा क्षेत्रक्रेत्रे एव तद् विक्रीणीयात्।

अनादेयमकृषतोऽन्यः पञ्चवर्षाण्युपभुज्य प्रयासनिष्क्रयेण दद्यात् । अकरदाः परत्र वसन्तो भोगमुपजीवेयुः ॥

[ग्रामरक्षणविषये सर्वसहकारावश्यकता, चोरादिनिरसनेन प्राकारादिकरणावश्यकता च]

ग्रामार्थेन ग्रामिकं व्रजन्तम् उपवासाः पर्यायेणानुगच्छेयुरननुगच्छन्तः पणार्धपणिकं योजनं दद्युः । ग्रामिकस्य ग्रामात् अस्तेनपारदारिकं निरस्यतश्चतुर्विंशतिपणो दण्डः । ग्रामस्योत्तमः । निरस्तस्य प्रवेशो ह्यधिगमेन व्याख्यातः । स्तम्भैस्समन्ततो ग्रामाद्धनुश्शतापकृष्टमुपसालं कारयेत् ॥

श्रीमूला

अनादेयमिति । संस्कृतं ग्राह्यफलत्वादादेयं तद्भिन्नमनादेयसंस्कृतं क्षेत्रम्, अकृषतः संस्करणाशक्तत्वादकर्षयतः स्वामिनः अन्यः स्वामिनियुक्तः, पञ्च वर्षाणि उपभुज्य, प्रयासनिष्क्रयेण दद्यात् कूपतटाकादिखननार्थं व्ययमात्मकृतं गृहीत्वा प्रत्यर्पयेत् क्षेत्रम् ।

अकरदा इति । अकरदा ब्रह्मदेयिकादयः, परत्र ग्रामान्तरे, वसन्तः भोगम् उपजीवेयुः क्षेत्रभोगमात्रं गृह्णीयुः, हिरण्यकरदण्डं तु राजा गृह्णीयादिति भाषाटीका ।

ग्रामार्थेनेति । ग्रामकार्यवशेन, ग्रामिकं ग्राममुख्यं, व्रजन्तं देशान्तरं गच्छन्तम्, उपवासाः उपजीव्य ग्रामं वसन्तः कर्षकाः, पर्यायेण वारव्यवस्थया, अनुगच्छेयुः । अननुगच्छन्तः, पणार्धपणिकं योजनं दद्युः एकैकस्य गन्तव्याध्वयोजनस्यैतावदिति व्यवस्थया देयं द्रव्यमिह योजनं तत् सार्धपणात्मकं ग्रामिकाय दद्युः ।

ग्रामिकस्येति । ग्राममुख्यस्य, ग्रामाद्, अस्तेनपारदारिकं स्तेयेन परदाररतत्वेन वा दोषेणायुक्तं, निरस्यतः बहिष्कुर्वतः, चतुर्विंशतिपणो दण्डः । ग्रामस्य ग्रामवासिसमुदायस्य बहिष्कुर्वतः उत्तमः साहसदण्डः ।

निरस्तस्येति । ग्रामान्निष्कासितस्य, चोरपारदारिकादेः, प्रवेशः पुनर्ग्रामाभिगमनं, हिशब्दस्तुशब्दार्थे, अधिगमेन व्याख्यातः परगृहाभिगमनोक्तेन दण्डेन समानदण्ड इत्यर्थः ।

स्तम्भैरिति । स्तम्भैः शिलामयैर्दारुमयैर्वा, समन्ततः समन्तात्, ग्रामात्, समन्तग्रामादिति पाठे ग्रामपर्यन्तदेशादित्यर्थः, धनुश्शतापकृष्टं धनुश्शतविप्रकृष्टम्, उपसालम् उपप्राकारं, कारयेत् ।

[पशुप्रचारोद्देशसंरक्षणव्यवस्था, नियमोल्लङ्घनेन पशून् चारयतां दण्डश्च]

पशुप्रचारार्थं विवीतमालवनेनोपजीवेयुः। विवीतं भक्षयित्वापसृतानामुष्ट्रमहिषाणां पादिकं रूपं गृह्णीयुः। गवाश्वखराणां चार्धपादिकम्। क्षुद्रपशूनां षोडशभागिकम्। भक्षयित्वा निषण्णानामेत एव द्विगुणा दण्डाः। परिवसतां चतुर्गुणाः। ग्रामदेववृषा वा अनिर्दशाहा वा धेनुरुक्षाणो गोवृषाश्चादण्ड्याः। सस्यभक्षणे सस्योपघातं निष्पत्तितः परिसङ्ख्याय द्विगुणं दापयेत् स्वामिनश्चानिवेद्य चारयतो द्वादशपणो दण्डः, प्रमुञ्चतश्चतुर्विंशतिपणः। पालिनामर्धदण्डः।

श्रीमूला

पश्वित्यादि। पशुप्रचारार्थं पशुसञ्चारखादनार्थं, विवीतमालवनेन विवीतं तृणस्तम्बजलयुक्तं स्थलं मालमुन्नतभूतलं वनं प्रसिद्धम् एतैर्विसृष्टैः, उपजीवयेयुः अर्थाद् ग्रामजनान्।

विवीतमिति। तद् भक्षयित्वा अपसृतानाम् उष्ट्रमहिषाणां, पादिकं रूपं पादपणं, गृह्णीयुः विवीताध्यक्षाः। गवाश्वखराणां च अर्धपादिकं रूपं पणाष्टांशं, गृह्णीयुः। क्षुद्रपशूनां षोडशभागिकं रूपं पणषोडशभागं, गृह्णीयुः।

भक्षयित्वा निषण्णानामिति। भक्षयित्वा अनपसृत्य विवीत एवोपविष्टानाम् उष्ट्रादीनाम्, एत एव द्विगुणा दण्डाः यथोक्ता एव पादपणादयो द्विगुणीभूता दण्डाः भवन्ति। परिवसतां रात्रौ तत्रैव संविशतां, चतुर्गुणाः दण्डाः। भक्षणादौ केषाञ्चित् पशूनामदण्डमाह—ग्रामदेववृषा वेति। ग्रामवृषभाः देववृषभाश्च, अनिर्दशाहा धेनुर्वा अनतिक्रान्तदशाहा प्रसूता गौश्च, उक्षाणः वृद्धवृषभाः, गोवृषाश्च सेक्तारश्च, अदण्ड्याः।

सस्यभक्षण इत्यादि। उष्ट्रमहिषादिभिः सस्ये भक्षिते सति, सस्योपघातं भक्षितक्षेत्रैकदेशरूढजातं सस्यविनाशं, निष्पत्तितः परिसङ्ख्याय कृत्स्नक्षेत्रनिष्पद्यमानफलपर्यालोचनया परिच्छेद्य, द्विगुणं तद्द्विगुणं दण्डं, दापयेत् स्वामिने।

स्वामिनश्चानिवेद्य चारयत इति। विवीताध्यक्षमविज्ञाप्य पशून् विवीते चारयतः तत्स्वामिनः, द्वादशपणो दण्डः। अथवा अविज्ञाप्यैव स्वामिने प्रचारणं पशून् उपक्षेत्रं नियन्त्र्य चारयतः, द्वादशपणो दण्डः नाशितसस्यफलद्विगुणदण्डातिरेकेण। प्रमुञ्चतः निर्यन्त्रणं पशून् विसृज्य चारयतः, चतुर्विंशतिपणः दण्डः भक्षितद्विगुणदण्डातिरेकेण। पालिनां क्षेत्रपालकानाम्, अर्धदण्डः प्रमोक्तृदण्डस्यार्धदण्डो भवति। 'उष्ट्रमहिषादीनां बालत्वे' इति भाषोक्त्यनुरोधे तु बालानामिति पठनीयम्।

तदेव षण्डभक्षणे कुर्यात् । वाटभेदे द्विगुणः । वेश्मखलवलयगतानां च धान्यानां भक्षणे हिंसाप्रतीकारं कुर्यात् । अभयवनमृगाः परिगृहीताः भक्षयन्तः स्वामिनो निवेद्य यथाऽवध्यास्तथा प्रतिषेद्धव्याः । पशवो रश्मिप्रतोदाभ्यां वारयितव्याः । तेषामन्यथा हिंसायां दण्डपारुष्यदण्डाः । प्रार्थयमाना दृष्टापराधा वा सर्वोपायैर्नियन्तव्याः । इति क्षेत्रपथहिंसा ॥

[सम्भूय कल्प्यमानव्यवस्थानां यथाङ्गीकार-
मनुवर्तनावश्यकता, अतिक्रमे दण्डाश्च]

कर्षकस्य ग्रामम् अभ्युपेत्याकुर्वतो ग्राम एवात्ययं हरेत् । कर्माकरणे कर्मवेतनाद्द्विगुणम्, हिरण्यादाने प्रत्यंशद्विगुणम्, भक्ष्यपेयादाने च प्रहवणेषु

श्रीमूला

तदेव षण्डभक्षणे कुर्यादिति । सस्यभक्षणोक्तमेव दण्डविधानं कदलीवार्ता-कोर्वारुकादिवनभक्षणेऽनुतिष्ठेत् । वाटभेदे द्विगुण इति । वृतिं भित्वा क्षेत्रादि-प्रवेशे पूर्वोक्तद्विगुणो दण्डः । वेश्मेत्यादि । वेश्यखलवलयगतानां वेश्म गृहं खलं धान्यपवनस्थानं वलयं राशिः, तद्गतानां, धान्यानां, भक्षणे च, द्विगुणो दण्डः । हिंसाप्रतीकारं कुर्यादिति । भक्षणनिमित्तस्य धान्यादिनाशस्य निष्क्रयं कुर्यात्, सर्वत्र ।

अभयवनमृगाः परिगृहीता वेत्यादि । अभयवनचारिणो मृगाः, गृह्यमृगाश्च, भक्षयन्तः, स्वामिनो निवेद्य, यथा अवध्यास्तथा प्रतिषेद्धव्याः, अवधेन वारणीया इत्यर्थः ।

पशव इति । ते, रश्मिप्रतोदाभ्यां वारयितव्याः रज्जुतोत्राभ्यां देहे ताडनेन प्रतिषेद्धव्याः । तेषां पशूनाम्, अन्यथा प्रकारान्तरेण, हिंसायां, दण्डपारुष्यदण्डाः दण्डपारुष्यस्य ये दण्डा वक्ष्यन्ते त एव दण्डा भवन्ति । प्रार्थयमानाः वारकं प्रति-युध्यमानाः, दृष्टापराधा वा पूर्वहिंसितजना वा, पशवः, सर्वोपायैः बन्धनावरोध-नादिभिः, नियन्तव्याः दमयित्वा वारयितव्याः । इति क्षेत्रपथहिंसेति । व्याख्यातेति शेषः । तदेवं वास्तुकं परिसमापितम् ॥

समयस्यानपाकर्मेति सूत्रम् । बहुभिः सम्भूय कल्प्यमाना व्यवस्था समयः तस्य अनपाकर्म अत्यागः तदिहोच्यते इति सूत्रार्थः । उद्देशक्रमेणास्य प्रकरणस्य व्याख्यानसङ्गतिः ।

कर्षकस्येति । कृषीवलस्य, ग्राममभ्युपेत्याकुर्वतः ग्रामजनसमुदायकार्य-मङ्गीकृत्याननुतिष्ठतः, ग्राम एव, अत्ययं दण्डं, हरेत्, न तु राजा । दण्डविधिमाह— कर्माकरण इति । कर्मणः समुदायकार्यस्य अकरणे, कर्मवेतनाद् आत्मलभ्याद्

द्विगुणमंशं दद्यात् । प्रेक्षायामनंशदः सस्वजनो न प्रेक्षेत । प्रच्छन्नश्रवणेक्षणे च सर्वहिते च कर्मणि निग्रहेण द्विगुणमंशं दद्यात् । सर्वहितमेकस्य ब्रुवतः कुर्युराज्ञाम् । अकरणे द्वादशपणो दण्डः । तं चेत् सम्भूय वा हन्युः, पृथगेषामपराधद्विगुणो दण्डः । उपहन्तृषु विशिष्टः ॥

ब्राह्मणतश्चैषां ज्यैष्ठ्यं नियम्येत । प्रहवणेषु चैषां ब्राह्मणे नाकामाः कुर्युः । अंशं च लभेरन् ॥

[निगमनम्]

तेन देशजातिकुलसङ्घानां समयस्यानपाकर्म व्याख्यातम् ।

श्रीमूला

वेतनभागाद्, द्विगुणं दण्डं, दद्यात् । हिरण्यादाने समुदायकार्यार्थं सर्वैर्हिरण्ये-दीयमाने सति स्वयं हिरण्यस्य अदाने, प्रत्यंशद्विगुणम् एकैकदेयस्य हिरण्यांशस्य द्विगुणं दण्डं, दद्यात् । भक्ष्यपेयादाने च प्रवहणेषु गोष्ठीभोजनादिषु भक्ष्यपेययो-रात्मदेययोरदाने च, द्विगुणमंशं दण्डं, दद्यात् ।

प्रेक्षायामिति । कुशीलवनटनर्तकादिकर्मणि, अनंशदः स्वदेयमंशमददानः, सस्वजनो न प्रेक्षेत स्वयं नेक्षेत स्वजनमपि नेक्षयेत् । प्रच्छन्नश्रवणेक्षणे च प्रच्छन्नं स्थित्वा गीताद्याकर्णने नाट्याद्यवलोकने च, द्विगुणमंशं स्वदेयांशद्विगुणं दण्डं, दद्यात् । सर्वहिते च कर्मणि, निग्रहेण प्रतिबन्धाचरणेन, द्विगुणमंशं स्वदेयांश-द्विगुणं दण्डं, दद्यात् ।

सर्वहितमिति । सर्वजनानुकूलं, ब्रुवतः, एकस्य आज्ञाम् एकस्यापि नियोग-वचनं कुर्युः अनुतिष्ठेयुः अर्थादन्ये सामयिकाः । अकरणे द्वादशपणो दण्डः । तं चेदिति । वेति पक्षान्तरे । तं सर्वहितवक्तारं सम्भूय हन्युश्चेद्, मत्सरवशादन्ये सामयिका इत्यार्थम् । पृथक् प्रत्येकम्, एषां हन्तृणाम् अपराधद्विगुणः अकरणा-पराधोक्तदण्डद्विगुणश्चतुर्विंशतिपणात्मकः, दण्डः । उपहन्तृषु विशिष्टः साक्षाद् घातकेषु पूर्वोक्त एव दण्डः सातिशयः । ब्राह्मणतश्चेति । एषां सामयिकानां, ब्राह्म-णतो ब्राह्मणात् प्रभृति, ज्यैष्ठ्यं नियम्येत अलङ्घ्यवचनत्वलक्षणं ज्येष्ठत्वं व्यवस्था-प्येत । प्रवहणेष्विति । प्रीतिभोजनादिषु, एषां सामयिकानां मध्ये, ब्राह्मणे विषये, नाकामाः कुर्युः अंशं च लभेरन् अविज्ञाततदभिप्राया अंशं न कल्पयेयुः अंशञ्च लभेरन् सत्यां तदिच्छायामित्यर्थः ।

तेनेति । तेन यथोक्तेन समयानपाकर्मन्यायेन, देशजातिकुलसङ्घानां देशीय-जनसङ्घस्य जातीयजनसङ्घस्य कुलीयजनसङ्घस्य चेत्येतेषां, समयस्यानपाकर्म, व्याख्यातम् उक्तप्रायम् ।

राजा देशहितान् सेतून कुर्वतां पथि सङ्क्रमान् ।
ग्रामशोभाश्च रक्षाश्च तेषां प्रियहितं चरेत् ॥१३९॥

इति धर्मस्थीये वास्तुके विवीतक्षेत्रपथहिंसा, दशमोऽध्यायः । वास्तुकं समाप्तम्, समयस्यानपाकर्म च । आदितस्सप्तषष्टितमः ।

श्रीमूला

अध्यायान्ते श्लोकमाह—राजेति । नृपतिः, देशहितान्, सेतून् सीमबन्धान्, पथि मार्गे, सङ्क्रमान् दुर्गसञ्चारान्, ग्रामशोभाश्च रक्षाश्च कुर्वतां, तेषां सामयिकानां, प्रियहितं चरेत् ॥

इतिकौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे दशमोऽध्यायः, वास्तुके विवीतक्षेत्रपथहिंसा, वास्तुकं समाप्तं समयस्यानपाकर्म च । आदितः सप्तषष्टितमोऽध्यायः ॥

त्रिषष्टितमं प्रकरणम्

एकादशोऽध्यायः

ऋणादानम्

[वृद्ध्यर्थप्रयुक्तधनविषये वृद्ध्यंशव्यवस्था]

सपादपणा धर्म्या मासवृद्धिः पणशतस्य। पञ्चपणा व्यावहारिकी। दशपणा कान्तारकाणाम्। विंशतिपणा सामुद्राणाम्॥

ततः परं कर्तुः कारयितुश्च पूर्वस्साहसदण्डः श्रोतॄणामेकैकं प्रत्यर्धदण्डः। राजन्ययोगक्षेमवहे तु धनिकधारणिकयोश्चरित्रमवेक्षेत॥

श्रीमूला

ऋणादानमिति सूत्रम्। ऋणं वृद्ध्यर्थं प्रयुक्तं धनं तस्य आदानं ग्रहणमिति सूत्रार्थः। "ऋणरिक्थयोः समो विभागः" इति दायविभागप्रकरणे ऋणं प्रस्तुतम्। तत् कियता कालेन कियत् वर्धत इत्येतत् तु अनुक्तमिहाभिधीयते।

सपादेत्यादि। पणशतस्य, सपादपणा पादाधिकपणात्मिका, धर्म्या धर्मानपेता, मासवृद्धिः। सेऽयं बन्धकाधानपूर्वा। बन्धकरहितामाह—पञ्चपणेति। पणशतस्य पञ्चपणात्मिका मासवृद्धिर्व्यावहारिकी पण्यक्रयविक्रयव्यवहारप्रयोजना। दशपणा, मासवृद्धिः, कान्तारगाणां दुर्गममार्गपण्यवाहिनां वणिजाम्। विंशतिपणा मासवृद्धिः, सामुद्राणां समुद्रवणिजां सम्भावितसर्वपण्यापायानाम्।

तत इति। ततः परं पणविंशतेरूर्ध्वं, कर्तुः कारयितुश्च वृद्धिं कुर्वतः कारयतश्च, पूर्वः साहसदण्डः। श्रोतॄणां सक्षिणां मध्ये एकैकं प्रति, अर्धदण्डः प्रथमसाहसस्यार्धं दण्डः।

राजनीति। तु किन्तु, राजनि धनिकधारणिकयोरुत्तमर्णाधमर्णयोः, अयोगक्षेमवहे सति व्यसनपरचक्राद्युपद्रववशात् योगक्षेमौ अवहमाने सति। अदण्डक्षेमवह इति क्वचित् पाठः। चरित्रमवेक्षेत परस्परवृत्तमवेक्ष्य ऋणव्यवहारं कुर्यात्, अर्थाद् धनिको धारणिकश्च।

[तादृशधान्यविषये वृद्ध्यंशव्यवस्था:]

धान्यवृद्धिस्सस्यनिष्पत्तावुपार्धा, परं मूल्यकृता वर्धेत; प्रक्षेपवृद्धिरुदयादर्धम्, सन्निधानसन्ना वार्षिकी देया। चिरप्रवासः संस्तम्भप्रविष्टो वा मूल्यद्विगुणं दद्यात्। अकृत्वा वृद्धिं साधयतो वर्धयतो वा मूल्यं वा वृद्धिमारोप्य श्रावयतः बन्धचतुर्गुणो दण्डः। तुच्छश्रावणायाम् अभूतचतुर्गुणः। तस्य त्रिभागमादाता दद्यात्। शेषं प्रदाता ॥

[धनिकैः क्वचिद्वृद्ध्यंशस्य क्वचिद्दृणस्यैव च प्रतिग्रहनिषेधः]

दीर्घसत्रव्याधिगुरुकुलोपरुद्धं बालमसारं वा नर्णमनु वर्धेत।

———

श्रीमूला

अथ धान्यवृद्धिमाह—धान्येत्यादि। धान्यवृद्धिः वृद्ध्यर्थं प्रयुक्तं धान्यं, सस्यनिष्पत्तौ सस्यफलनिष्पत्तिकाले, उपार्धा अध्यर्धगुणा, वर्धेत। परं तत ऊर्ध्वं, मूल्यकृता वर्धेत। अयमर्थः—वृद्ध्यर्थं प्रयुक्तं धान्यम् आ सस्यनिष्पत्तिकालात् सार्धगुणं वर्धेत। ततोऽप्यधिकवृद्ध्यपेक्षायां तावत्पर्यन्तवृद्धियुक्तस्य तस्य मूलधान्यस्य सार्धगुणितस्य मूल्यं हिरण्यं किमपि परिकल्प्य तस्य वृद्धिरेतावतीति व्यवस्थापयेत्, न तु धान्यस्य स्वरूपतो भूयोवृद्धिरिति। तत्रापि विशेषमाह—प्रक्षेपेत्यादि। प्रक्षेपवृद्धिः येयं मूलधान्यमूल्येन सह प्रक्षिप्ता वृद्धिः, अर्थाद् वृद्धिधान्यमूल्यं सापि, उदयाद् मूलधान्यमूल्यवृद्ध्यपेक्षया, अर्धं वर्धेत, न तु तत्समम्। सन्निधानेत्यादि। सन्निधानसन्ना ग्रहणयोग्येऽपि काले तूष्णींस्थापनेनानुपयुक्ता, अर्थाद् धान्यवृद्धिः, वार्षिकी देया एकवर्षभवैव दातव्या, बहुवर्षपूगापगमेऽपीत्यार्थम्।

चिरप्रवास इति। चिरप्रोषितः, संस्तम्भप्रविष्टो वा संस्तम्भो जडीभावः तं गतो वा, मूल्यद्विगुणं धान्यमूल्यस्य द्विगुणमेव दद्यात्, बहुवर्षात्ययेऽपि द्वैगुण्यप्राप्तेः परतो वृद्ध्यभावादित्यभिप्रायः। अकृत्वा वृद्धिमित्यादि। वृद्धिमपरिभाष्यैव पूर्वं पश्चात् तां, साधयतो वा, अल्पां वृद्धिं पूर्वं परिभाषितां पश्चाद् वर्धयतो वा अधिकां वदतो वा, मूल्यं, वृद्धिमपरिभाषितामेव सतीम् आरोप्य, श्रावयतो वा अर्थात् साक्षिणः, बन्धचतुर्गुणः मूलधनचतुर्गुणो दण्डः। तुच्छश्रावणायामित्यादि। अल्पं दत्त्वा बहुदत्तमिति साक्षिषु श्राव्यमाणेषु, अभूतचतुर्गुणः श्राव्यमाणधनचतुर्गुणो दण्डः। तस्य दण्डस्य, त्रिभागम्, आदाता ऋणग्राही, दद्यात् शेषं त्रिभागद्वयम्, प्रदाता धनिकः दद्यात्।

दीर्घसत्रेत्यादि। दीर्घसत्रव्याधिगुरुकुलोपरुद्धं दीर्घसत्रेण द्वादशवार्षिकादिना यज्ञविशेषेण व्याधिना गुरुकुलवासेन चोपरुद्धं, बालम् अप्राप्तव्यवहारम्, असारं वा अबालमप्यशिक्षितलोकयात्रं वा जनम्, अनु, ऋणं न वर्धेत।

७४

मुच्यमानमृणमप्रतिगृह्णतो द्वादशपणो दण्डः। कारणापदेशेन निवृत्त-वृद्धिकमन्यत्र तिष्ठेत् ॥

दशवर्षोपेक्षितमृणमप्रतिग्राह्यमन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेश-त्यागराज्यविभ्रमेभ्यः ॥

[प्रमीतकृतऋणप्रतिनिवर्तकाः]

प्रेतस्य पुत्राः कुसीदं दद्युः। दायादा वा रिक्थहरास्सहग्राहिणः, प्रति-भुवो वा; न प्रातिभाव्यमन्यत्। असारं बालप्रातिभाव्यम्। असङ्ख्यात-देशकालं तु पुत्राः पौत्रा दायादा वा रिक्थं हरमाणा दद्युः। जीवितविवाह-भूमिप्रातिभाव्यमसङ्ख्यातदेशकालं तु पुत्राः पौत्रा वा वहेयुः ॥

[बहुषु ऋणेषु निवर्तनप्राथम्यव्यवस्थाः]

नानर्णसमवाये तु नैकं द्वौ युगपदभिवदेयातां अन्यत्र प्रतिष्ठमानात्। तत्रापि गृहीतानुपूर्व्या राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत्।

श्रीमूला

मुच्यमानमिति। मोक्ष्यमाणम् ऋणम्, अप्रतिगृह्णतः धनिकस्य, द्वादशपणो दण्डः। कारणापदेशेनेत्यादि। यदि कारणं युक्तमपदिश्य धनिको न प्रतिगृह्णीयाद् ऋणं, तदा निवृत्तवृद्धिकं वृद्धिहीनम्, अन्यत्र स्थेयपुरुषे, तिष्ठेद् ऋणम्।

दशवर्षेत्यादि। दशवर्षोपेक्षितम् ऋणम्, अप्रतिग्राह्यं धनिकेन। तत्रापवादः— अन्यत्रेत्यादि। बाल्यवृद्धभावव्याधितत्वादिभिः सप्तभिर्निमित्तैर्दशवर्षोपेक्षितं तु ऋणं प्रतिग्राह्यं भवत्येवेत्यर्थः।

प्रेतस्येति। मृतस्य, पुत्राः कुसीदम् ऋणं, दद्युः। दायादा वा रिक्थहराः मृतधन-ग्राहिणः ऋणं दद्युः। न प्रातिभाव्यमन्यादात। धनप्रातिभाव्यातिरिक्तं दर्शनादिप्राति-भाव्यं कर्तुं, न ऋणं दद्यादिति सम्बन्धनीयम्। असारम् अकिञ्चित्करं बालप्रातिभाव्यम्। पुत्रपौत्रदायादा रिक्थहारिणः सर्वत्र सर्वदा ऋणं रिक्थिनो मृतस्य दद्युरित्याह— असंख्यातदेशकालमित्यादि।

जीवितविवाहभूमिप्रातिभाव्यमित्यादि। जीवितप्रातिभाव्यं जीवितविषयं प्रातिभाव्यं विवाहप्रातिभाव्यं स्त्रीधनादिप्रातिभाव्यं भूमिप्रातिभाव्यं भूक्रयणादिविषयं प्रातिभाव्यम् इत्येतानि प्रातिभाव्यानि पित्राङ्गीकृतानि तस्मिन्नतीते पुत्राः पौत्रा वा सर्वत्र सर्वदा परिरक्षेयुः।

नानर्णसमवाये त्वित्यादि। नानाभूतानामृणानां समवाये, एकं धारणिकं, द्वौ धनिकौ, युगपत् एककाले, नाभिवदेयातां नाभियुञ्जीयातां, धारणिकश्चेत् स्वदेश-मपहाय विदेशं न प्रतिष्ठते। तत्रापीति बहुऋणसमवायेऽपि, गृहीतर्णक्रमेण प्रतिपादयेद् ऋणमृणिकः। राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत्।

[व्यवहारेण साधयितुमयोग्यानि ऋणानि, अग्राह्याः ग्राह्याः ऋणिनश्च]

दम्पत्योः पितापुत्रयोः भ्रातॄणां चाविभक्तानां परस्परकृतमृणमसाध्यम् । अग्राह्याः कर्मकालेषु कर्षका राजपुरुषाश्च; स्त्री वाऽप्रतिश्राविणी पतिकृतं ऋणम्, अन्यत्र गोपालकार्धसीतिकेभ्यः । पतिस्तु ग्राह्यः—स्त्रीकृतम् ऋणमप्रतिविधाय प्रोषित इति ॥

[ऋणसाधनप्रकाराः]

सम्प्रतिपत्तावुत्तमः; असम्प्रतिपत्तौ तु साक्षिणः प्रमाणम् । प्रात्ययिकाश्शुचयोऽनुमता वा त्रयोऽवरार्ध्याः । पक्षानुमतौ वा द्वौ ऋणं प्रति, न त्वेवैकः ॥

श्रीमूला

दम्पत्योरिति । जायापत्योः, परस्परकृतम् ऋणम्, असाध्यं व्यवहारेण साधयितुं न योग्यम् । तथा पितापुत्रयोः अविभक्तानां भ्रातॄणां च, परस्परकृतमृणमसाध्यम् ।

धनिकैरभियुक्तानाम् ऋणिनां ग्रहणे विशेषमाह—अग्राह्या इति । कर्षकाः राजपुरुषाश्च, कर्मकालेषु स्वस्वकर्मानुष्ठानकालेषु, अग्राह्याः । स्त्री वेति । स्त्री च, अग्राह्या, कीदृशी, पतिकृतम् ऋणम् अप्रतिश्राविणी अहं दास्यामीत्येनङ्गीकारिणी । अङ्गीकारिणी तु ग्राह्यैव । तत्रापवादः—अन्यत्र गोपालकार्धसीतिकेभ्य इति । गोपालकाः प्रसिद्धाः अर्धसीतिकाः कृषिकर्मसिद्धसीताफलार्धभागिनः तेषां स्त्रीप्रधानानां स्त्रियं विना । सा तु अप्रतिश्राविण्यपि ग्राह्यैवेत्यर्थः ।

पतिस्त्विति । पतिः पुनः अप्रतिश्राव्यपि ग्राह्य एव, स्त्रीकृतमृणमप्रतिविधाय प्रोषित इति कृत्वा ।

ऋणसाधनप्रकारमाह—संप्रतिपत्ताविति । धनिकनिवेद्यमानार्थाभ्युपगमे ऋणिकेन क्रियमाणे, उत्तमः निर्णयोपायः सिद्ध इत्यर्थः । असम्प्रतिपत्तौ तु, साक्षिणः प्रमाणं विवादनिर्णयसाधनम् । साक्षिण इति लिखितस्याप्युपलक्षणम् । कथम्भूताः साक्षिणः कार्याः, प्रात्ययिकाः विश्वासार्हाः, शुचयः बाह्याभ्यन्तरशौचयुक्ताः, अनुमता वा वादिप्रतिवादिसंमताश्च ते च त्रयोऽवरार्ध्याः त्र्यवराः । पक्षानुमतौ वा द्वौ उभयपक्षसंमतौ द्वौ वा । साक्षिणौ, ऋणं प्रति ऋणविषये, न त्वेवैकः एकस्तु साक्षी नैव कार्यः ।

[साक्षिभावानर्हाः अर्हश्च]

प्रतिषिद्धाः स्यालसहायान्वर्थिधनिकधारणिकवैरिन्यङ्गधृतदण्डाः। पूर्वे चाव्यवहार्याः राजश्रोत्रियग्रामभृतककुष्ठिव्रणिनः पतितचण्डालकुत्सितकर्माणोऽन्धबधिरमूकाहंवादिनः स्त्रीराजपुरुषाश्चान्यत्र स्ववर्गेभ्यः। पारुष्यस्तेयसङ्ग्रहणेषु तु वैरिस्यालसहायवर्जाः। रहस्यव्यवहारेष्वेका स्त्री पुरुष उपश्रोता उपद्रष्टा वा साक्षी स्यात् राजतापसवर्जम्।

स्वामिनो भृत्यानाम्, ऋत्विगाचार्याश्शिष्याणां, मातापितरौ पुत्राणां चानिग्रहेण साक्ष्यं कुर्युः, तेषामितरे वा। परस्पराभियोगे चैषामुत्तमाः परोक्ताः दशबन्धं दद्युः, अवराः पञ्चबन्धम् इति साक्ष्यधिकारः॥

———

श्रीमूला

साक्षिभावानर्हानाह—प्रतिषिद्धा इति। स्यालादयोऽष्टौ साक्षिभावे प्रतिषिद्धाः। तत्र अन्वर्थी अर्थिनमनुगतस्तदुपजावी, न्यङ्गो निहीनाङ्गः, धृतदण्डः राजदण्डितः। शेषाः प्रतीताः। पूर्वे चाव्यवहार्या इत्यादि। पूर्वे अव्यवहार्याः पितापुत्राविभक्तभ्रात्रादयो व्यवहारानर्हाः पूर्वोक्ताः। अहंवादी साक्षी भवामीति स्वयमागतः। शेषाः प्रतीताः। सर्वं एते साक्षित्वे निषिद्धाः। अन्यत्र स्ववर्गेभ्य इति। स्वस्ववर्गव्यतिरिक्ताः प्रतिषिद्धातिरेकिणः सामान्यतः साक्षिणो भवेयुः।

पारुष्यस्तेयसङ्ग्रहणेष्वित्यादि। तुशब्दो विशेषे। पारुष्यादिषु, वैरिस्यालसहायवर्जाः, सर्वे साक्षिणः स्युः। रहस्यव्यवहारेषु, एका स्त्री, एकः पुरुषः, एक उपश्रोता साक्षादश्रावितोऽपि समीपस्थितिवशात् श्रुतार्थः, उपद्रष्टा वा समीपस्थितिवशाद् यदृच्छादृष्टार्थो वा, साक्षी स्यात् राजतापसवर्जं राजानं तापसं च वर्जयित्वा।

स्वामिन इति। ते, भृत्यानाम्, ऋत्विगाचार्याः शिष्याणां, मातापितरौ पुत्राणां च, अनिग्रहेण अबलात्कारेण आत्मेच्छयेत्यर्थः, साक्ष्यं साक्षिकर्म कुर्युः। तेषामितरे वेति। तेषां स्वामिनाम् ऋत्विगाचार्याणां मातापित्रोश्च इतरे भृत्याः शिष्याः पुत्राश्च, अनिग्रहेण साक्ष्यं कुर्युः। परस्परेत्यादि। एषां स्वामिभृत्यादीनां परस्पराभियोगे, उत्तमाः परोक्ताः स्वामिऋत्विगादयः पराजिताश्चेद्, दशबन्धं पराजितधनदशभागं, दद्युः, अवरेभ्यः। अवराः भृत्यादयः, परोक्ताः, पञ्चबन्धं पराजितधनपञ्चभागम्, दद्युः, उत्तमेभ्यः। इति साक्ष्यधिकार इति। व्याख्यात इति शेषः।

[साक्ष्यनुयोगविधिः]

ब्राह्मणोदकुम्भाग्निसकाशे साक्षिणः परिगृह्णीयात्। तत्र ब्राह्मणं ब्रूयात्—'सत्यं ब्रूहि' इति। राजन्यं वैश्यं वा—'मा तवेष्टपूर्तफलं, कपालहस्तः शत्रुबलं भिक्षार्थी गच्छेः' इति। शूद्रम्—'जन्ममरणान्तरे यद्वः पुण्यफलं तद्राजानं गच्छेत्, राज्ञश्च किल्बिषं युष्मान् वा अन्यथावादे, दण्डश्चानुबन्धः। पश्चादपि ज्ञायेत यथादृष्टश्रुतम्। एकमन्त्रास्सत्यमवहरत' इति। अनवहरतां सप्तरात्रादूर्ध्वं द्वादशपणो दण्डः। त्रिपक्षादूर्ध्वमभियोगं दद्युः॥

[साक्षिवचनविसंवादे कर्तव्याः व्यवस्थाः]

साक्षिभेदे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः; मध्यं वा

श्रीमूला

अथ साक्ष्यनुयोगविधिमाह—ब्राह्मणोदकुम्भाग्निसकाश इति। ब्राह्मणान् उदकुम्भम् अग्निं चाग्रे कृत्वा, साक्षिणः, परिगृह्णीयाद् विभावयेत्।

ब्राह्मणानुयोगमाह—तत्र ब्राह्मणमित्यादि। राजन्यं वैश्यं वेति। ब्रूयादिति सम्बध्यते। वचनप्रकारः—मा तवेष्टापूर्तफलमिति। तव यज्ञफलं खातादिकर्मफलं च न सिध्येत्। कपालहस्तः भिक्षापात्रपाणिः, शत्रुकुलं शत्रुगृहं, भिक्षार्थी सन्, गच्छेः, यद्यनृतं ब्रूया इति शेषः। शूद्रानुयोगमाह—शूद्रमिति। ब्रूयादितीहापि सम्बध्यते। वचनप्रकारः—जन्ममरणान्तर इति। जन्ममरणयोर्मध्ये, यद् वः, पुण्यफलं कृतानां पुण्यकर्मणां फलं, तद् राजानं गच्छेत्, राज्ञश्च, यद् जन्ममरणान्तरे किल्बिषं पापं, तद् युष्मान् गच्छेत्, अन्यथावादे असत्यकथने। दण्डश्च अन्यथावादनिमित्तः, अनुबन्धः अनुयायी कालान्तरभावी। न चान्यथावादनिश्चयो निरुपाय इत्याह—पश्चादपीति। यथादृष्टश्रुतं सत्यं तदात्वे गूहितं, पश्चादपि कालान्तरेऽपि, ज्ञायेत अस्मद्यत्नादिति शेषः।

एकमन्त्राः यूयं सर्वे सम्भूय कृतसंमन्त्रणाः भूत्वा, सत्यं परमार्थम्, अवहरत उपनयत इति।

अनवहरतामित्यादि। सत्यावहरणार्थं सप्तरात्रावधिर्देयः। तत ऊर्ध्वम् अनवहरताम्, द्वादशपणो दण्डः अर्थादेकैकदिवसस्य। त्रिपक्षादूर्ध्वम्, अभियोगम् अभियोगद्रव्यम्, दद्युः, अर्थाद् दण्डसहितम्। इदं च विधानं मानान्तरेण परमार्थे विज्ञाते सति द्रष्टव्यम्।

साक्षिभेद इति। साक्षिणामन्योन्यवचनविसंवादे, यतः यस्मिन् पक्षे, बहवः शुचयः अनुमता वा, तिष्ठन्तीति शेषः, ततो नियच्छेयुः तं पक्षमाश्रित्य व्यवहारं

गृह्णीयुः; तद्वा द्रव्यं राजा हरेत्। साक्षिणश्चेदभियोगादूनं ब्रूयुरतिरिक्त-स्याभियोक्ता बन्धं दद्यात्; अतिरिक्तं वा ब्रूयुस्तदतिरिक्तं राजा हरेत्। वालिश्यादभियोक्तुर्वा दुश्श्रुतं दुर्लिखितं प्रेताभिनिवेशं वा समीक्ष्य साक्षि-प्रत्ययमेव स्यात्।

[मिथ्यावादिसाक्षिविधेयदण्डांशे मतभेदाः]

'साक्षिवालिश्येष्वेव पृथगनुयोगे देशकालकार्याणां पूर्वमध्यमोत्तमा दण्डाः' इत्यौशनसाः। 'कूटसाक्षिणो यमर्थमभूतं वा नाशयेयुस्तद्दशगुणं दण्डं दद्युः' इति मानवाः। वालिश्याद् विसंवादयतां चित्रो घातः', इति बार्हस्पत्याः। 'न' इति कौटल्यः। ध्रुवा हि साक्षिणश्श्रोतव्याः।

श्रीमूला

निर्णयेयुः। मध्यं वा गृह्णीयुः उभयोः पक्षयोः साक्षिगुणसाम्ये उभयसमं कमपि प्रकारं गृह्णीयुः। तदसम्भवे विसंवादितमर्थं राजा गृह्णीयादित्याह—तद्वा द्रव्यं राजा हरेदिति। साक्षिण इति। ते चेदभियुक्तद्रव्याद् ऊनं ब्रूयुः, तर्हि अभियोक्ता, अतिरिक्तस्य स्वार्थितस्य, बन्धं पञ्चभागं, दद्याद्, राज्ञे। अतिरिक्तं वा ब्रूयुः अभियोक्त्रर्थितादधिकम् वा साक्षिणश्चेद् ब्रूयुः, तर्हि, तद् अतिरिक्तं राजा हरेत्। अत्रापवादमाह—वालिश्यादभियोक्तुर्वेति। अभियोक्तृमौर्ख्याद् वा, दुःश्रुतं लेखकेनान्यथाश्रुतं, दुर्लिखितम् अन्यथा लिखितं च, समीक्ष्य पर्यालोच्य, प्रेताभिनिवेशं वा बन्धुमरणशोकनिमित्तं लेखकचित्तविक्षेपं च, समीक्ष्य, साक्षिप्रत्ययमेव स्यात् साक्षिवाक्याप्तिनिर्णयमेव ऋणादानं स्यात्।

साक्षिवालिश्येष्वेव पृथगनुयोग इति। प्रत्येकं प्रश्ने साक्षिणां मौर्ख्यकृतेषु वचनविसंवादेषु, देशकालकार्याणां विसंवादे इति शेषः, पूर्वमध्यमोत्तमा दण्डाः यथा-सङ्ख्यं पूर्वादिसाहसदण्डाः। इति औशनसाः।

कूटसाक्षिण इति। कपटसाक्षिणः, यमर्थम्, अभूतं वा कुर्युः असत्यमेव कल्पयित्वा ब्रूयुः, भूतं वा नाशयेयुः यमर्थं सत्यमेव हीनं कथयेयुः, तद्दशगुणं कल्पित-नाशितदशगुणं, दण्डं दद्युः। इति मानवाः।

वालिश्याद्वेति। मौर्ख्याद्, विसंवादयतां विसंवादं कथयताम्, चित्रो, घातः वधः। इति बार्हस्पत्याः।

नेति कौटल्य इति। एतच्च विशेषपरं न तु प्रतिषेधपरम्। विशेषश्चायम्—यद् ध्रुवसाक्षिण एव साक्षिपदे कर्तव्या इति। तदाह—ध्रुवा हि साक्षिणः श्रोतव्या इति।

अश्रृण्वतां चतुर्विंशतिपणो दण्डः, ततोऽर्धमध्रुवाणाम् ॥

[निगमनम्]

देशकालाविदूरस्थान् साक्षिणः प्रतिपादयेत् ।
दूरस्थान् अप्रसारान् वा स्वामिवाक्येन साधयेत् ॥१४०॥

इति धर्मस्थीये ऋणादानम्, एकादशोऽध्यायः,
आदितोऽष्टषष्टितमः

श्रीमूला

अश्रृण्वतां श्रवणार्थमाहूतानामनागतानां ध्रुवाणां, चतुर्विंशतिपणो दण्डः। ततोऽर्धं द्वादशपणः, अध्रुवाणाम्। तत्र ध्रुवाश्चत्वारिंशत्कुलिकाः, तदनन्तर्गता अध्रुवाः।

अध्यायान्ते श्लोकमाह—देशकालाविदूरस्थानिति। देशतः कालतश्चादूरस्थितान्, साक्षिणः, प्रतिपादयेद् अर्थी स्वयमेवानीय वादयेत्। दूरस्थान्, अप्रसारान् वा समीपस्थानेवाहूतानागतान् वा, स्वामिवाक्येन प्राड्विवाकाज्ञया, साधयेत् आनाययेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाऽधिकरणे
एकादशोऽध्यायः, ऋणादानम्,
आदितोऽष्टषष्टितमः ॥

चतुष्षष्टितमं प्रकरणम्

द्वादशोऽध्यायः

औपनिधिकम्

[निक्षेपाप्रत्यर्पणोपाधयः]

उपनिधिः ऋणेन व्याख्यातः। परचक्राटविकाभ्यां दुर्गराष्ट्रविलोपे वा, प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे, चक्रयुक्ते नाशे वा ग्राममध्याग्न्युदकाबाधे वा, किञ्चिदमोक्षयमाणे कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये वा, ज्वालावेगोपरुद्धे वा, नावि निमग्नायां मुषितायां वा स्वयमुपरूढो नोपनिधिमभ्याभवेत् ॥

———— –

श्रीमूला

औपनिधिकमिति सूत्रम्। उपनिधिर्न्यासो निक्षेप इति पर्यायाः। तत्संबद्धमभिधीयते इति सूत्रार्थः। उपनिधिर्विप्रतिपत्तावृणवद् व्यवहार्य इत्यतस्तदनन्तरमस्याभिधानसङ्गतिः।

उपनिधिर्ऋणेन व्याख्यात इति। ऋणं यथाधमर्णेन तत्पुत्रादिना च प्रत्यर्पणीयं, विप्रतिपत्तौ तु साक्ष्यनुयोगादिना विभावनीयं, तथैवोपनिधिरित्यतिदेशार्थः। उपनिधिरिति च अध्यादेशान्वाधीनामप्युपलक्षणम्। प्रत्यर्पणापवादमाह—परचक्राटविकाभ्यामिति। शत्रुसैन्येनाटविकेन च, दुर्गराष्ट्रविलोपे वा नोपनिधिमभ्यावहेत् उपनिधिं न प्रत्यर्पयेत्। प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे चौरैर्ग्रामस्य सार्थस्य वणिक्सङ्घस्य व्रजस्य गवाश्वादिस्थानस्य च विलोपे, नोपनिधिमभ्यावहेत्। चक्रयुक्ते नाशे वा चक्रं छद्मविशेषः तत्प्रयुक्ते, नाशे वा, नोपनिधिमभ्यावहेत्। ग्राममध्याग्न्युदकाबाधे वा ग्राममध्येऽग्निदाहजलप्रवाहबाधायां वा, नोपनिधिमभ्यावहेत्। किञ्चिदमोक्षयमाणे कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये वेति। अयमर्थः—अग्न्युदकबाधे कुप्यद्रव्यं निर्हार्यमेकदेशतो मोचयित्वा किञ्चिदवशिष्टं कुप्यांशममोचयमानः कुप्यं नाभ्यावहेत्। अनिर्हार्यवर्जमिति च निर्हार्यद्रव्य एवैकदेशतो विमोक्षणस्य सम्भवो न त्वनिर्हार्यद्रव्य इति वस्तुस्थितिमात्रं कथ्यते। तेनानिर्हार्य कुप्यविषये तूष्णीमवस्थानमप्यग्न्युदकबाधे नापराधायेत्युक्तप्रायम्। ज्वालावेगोपरुद्धे वेति। ज्वालावेगोपरोधवशादुपनिधिमोचनासमर्थे वा सति, नोपनिधिमभ्यावहेत्। नावि निमग्नायां, मुषितायां वा चोरितायां वा सत्यां, स्वयमुपरूढः कृतात्मत्राणः, नोपनिधिमभ्यावहेत्। इह

[स्वाम्यनुज्ञां विना निक्षिप्तस्य धनस्य दुरुपयोगे व्यवस्थाः]

उपनिधिभोक्ता देशकालानुरूपं भोगवेतनं दद्यात्, द्वादशपणं च दण्डम् । उपभोगनिमित्तं नष्टं विनष्टं वाऽभ्याभवेत्, चतुर्विंशतिपणश्च दण्डः; अन्यथा वा निष्पतने । प्रेतं व्यसनगतं वा नोपनिधिमभ्यावहेत् । आधानविक्रयापव्ययनेषु चास्य चतुर्गुणपञ्चबन्धो दण्डः । परिवर्तने वा मूल्यसमः । तेन आधिप्रणाशोपभोगविक्रयाधानापहारा व्याख्याताः ॥

[चरस्थिरपदार्थानाधीकृत्य धनग्रहणे प्रत्यर्पणव्यवस्थाः]

नाधिस्सोपकारः सीदेत्, न चास्य मूल्यं वर्धेत । निरुपकारः सीदेन्मूल्यं चास्य वर्धेत अन्यत्र निसर्गात् ॥

श्रीमूला

चोत्तरत्र च 'अभ्याभवेदि'ति मातृकासु पाठो दृश्यते, स तु 'अभ्यावहेद्' इत्यस्मिन्नेव-पदे केरलीयलिपिलिखिते हकारे भकारभ्रान्तिं कृत्वा वकारस्य तदुत्तरस्थानस्थितियो-ग्यतां मन्यमानेन लेखकेन कल्पितो नूनम् । अभ्याङ्पूर्वस्य भवतेर्वा प्रत्यर्पणार्थत्व-मदृष्टश्रुतस्यापि लिपिलेखनप्रामाण्याभिमाने कल्पनीयम् ।

उपनिधिभोक्तेति । विना स्वाम्यनुज्ञामुपनिधिं भुञ्जानः, देशकालानुरूपं भोगवेतनं, दद्यात् स्वामिने । द्वादशपणं दण्डं च दद्याद् राज्ञे । उपभोगनिमित्तम् उपभोगाय गृहीतं द्रव्यं, नष्टम् अन्यापहृतं, विनष्टं वा स्वरूपहानिं प्राप्तं वा ।

अभ्यावहेत् प्रतिदद्यात् । चतुर्विंशतिपणश्च दण्डः नाशकस्य । अन्यथा वा निष्पतने उपभोगं विनैवोपनिधेरन्यत्र गमने च, चतुर्विंशतिपणो दण्ड इति वर्तते । प्रेतं, व्यसनगतं वा उपनिधिग्राहिणम्, उपनिधिं, नाभ्यावहेत् न दापयेत् ।

आधानेत्यादि । अस्य उपनिधेः, आधानविक्रयापव्ययनेषु च आधीकरण-परस्वीकरणापलापेषु च, चतुर्गुणपञ्चबन्धो दण्डः उपनिहितं चतुर्गुणं देयम् उपनिधात्रे चतुर्गुणस्य पञ्चभागोदण्डः च राज्ञे । परिवर्तन इति । उपनिहितविनिमये, निष्पातने वा अन्यत्र सङ्क्रामणे वा, मूल्यसमः, दण्ड इति वर्तते ।

तेनेति । उक्तेन विधानेन, आधिप्रणाशोपभोगविक्रयाधानापहाराः व्याख्याताः आधिप्रणाशोपभोगादिविषयं विधानम् उपनिधिप्रणाशोपभोगादिविधानेन यथोक्तेन तुल्यमित्यर्थः ।

नाधिरिति । सोपकारः आधिः वाहदोहादियुक्तो गवादिरूपः, न सीदेत् न नश्येत्, धनं गृहीत्वा प्रत्यर्पणीयमित्यर्थः । कुत इत्याकाङ्क्षायां प्रणाशनिमित्तं धन-द्वैगुण्यं प्रति हेतुभूताया वृद्धेस्तत्राभावादित्याह—न चास्य मूल्यं वर्धेतेति । अस्य सोपकारस्याधेः । निरुपकार इति । उपभोगरहितः आधिः, सीदेत्, अस्य मूल्यं च

उपस्थितस्याऽऽधिमप्रयच्छतो द्वादशपणो दण्डः। प्रयोजकासन्निधाने वा ग्रामवृद्धेषु स्थापयित्वा निष्क्रयमाधिं प्रतिपद्येत। निवृत्तवृद्धिको वाऽऽधिस्तत्कालकृतमूल्यस्तत्रैवावतिष्ठेत, अनाशविनाशकरणाधिष्ठितो वा। धारणकसन्निधाने वा विनाशभयात् उद्गतार्घ धर्मस्थानुज्ञातो विक्रीणीत; आधिपालप्रत्ययो वा॥

स्थावरस्तु प्रयासभोग्यः फलभोग्यो वा। प्रक्षेपवृद्धिमूल्यशुद्धम् आजीवमूल्यक्षयेणोपनयेत्॥

श्रीमूला

धनं च, वर्धेत। कदा, अन्यत्र निसर्गात्। निसर्गं उपभोगानुज्ञा सा चेन्न दत्ता तदा। सति तु निसर्गेऽनुपभोगो धनिकस्यैवापराध इति धनं नैव वर्धेतेत्यभिप्रायः।

उपस्थितस्येति। सधनस्याधिग्रहणाय गृहमुपगतस्याधमर्णस्य, आधिम्, अप्रयच्छतः अप्रत्यर्पयतो धनिकस्य, द्वादशपणो दण्डः। प्रयोजकासन्निधाने वेति। धनप्रयोक्तुर्देशान्तरगमनादिना सान्निध्याभावे, ग्रामवृद्धेषु निष्क्रयं देयं मूल्यं, स्थापयित्वा, आधिं, प्रतिपद्येत प्रतिगृह्णीयात्। आधिग्रहणासौकर्ये त्वाह—निवृत्तेत्यादि। आधिः, निवृत्तवृद्धिकः निष्क्रयस्थापनकालात्प्रभृति वृद्धिरहितः, तत्कालकृतमूल्यः कालान्तरविनाशशङ्कायां धारणकोपस्थानकाल एव व्यवस्थापितमूल्यः, तत्रैव प्रयोजककुल एव, अवतिष्ठेत। धारणकासन्निधाने विनाशशङ्कायामाह—अनाशविनाशकरणाधिष्ठितो वेति। अनाशस्याविनाशस्य च यत् करणं साधनं तद्युक्तो वा, कार्यं इति शेषः। रक्षणाशक्तावाह—धारणकसन्निधाने वेति। अधमर्णस्य सन्निधाने वा, विनाशभयाद्, उद्गतार्घम् उद्रिक्तमूल्यं यथा भवति तथा, धर्मस्थानुज्ञातो विक्रीणीत।

आधिपालप्रत्ययो वेति। आधिपाल आधिस्थेयः प्रत्ययः प्रमाणं यस्य स तथाभूतो वा भवेद्, आधिपालवचनानुरोधेन रक्षणं विक्रयणं वाधेः कुर्यादित्यर्थः।

स्थावरस्त्विति। स्थावरः अचरः आधिर्भूमिवृक्षादिः, प्रयासभोग्यः आधिग्राहकेण स्वयं कर्षणादिना परिश्रमेण भोक्तव्य इत्येकः, फलभोग्यः फलम् आधातृश्रमनिष्पन्नं भोग्यम् आधिग्राहकेण भोक्तव्यं यस्य स तथाभूत इत्यपरः इत्येवं द्विप्रकारः।

भोग्यत्वोक्त्या च भोगातिरेकेण स्थावरस्य वृद्ध्यभावो विक्रयाभावश्चोक्तप्रायः। प्रक्षेपवृद्धिमूल्यशुद्धमिति। वाणिज्याधिगतस्यैतावतो लाभस्यैतावद् देयमिति परिभाषिता वृद्धिः प्रक्षेपवृद्धिः तस्या मूल्यतः शुद्धं विशोधितं कृत्वेति शेषः, आजीवम् उपभुज्यमानमाधिम्, उपनयेत् प्रत्यर्पयेत्, कथम्, अमूल्यक्षयेण मूल्यक्षयाभावेन प्रयुक्तयावन्मूल्यग्रहणेनेत्यर्थः।

[आधीकृतस्य दुरुपयोगे दण्डः, आदेशा-
न्वाध्वोर्विषये विशेषश्च]

अनिसृष्टोपभोक्ता मूल्यशुद्धमाजीवं बन्धं च दद्यात्। शेषमुपनिधिना व्याख्यातम् ॥

एतेनादेशोऽन्वाधिश्च व्याख्यातौ ॥

सार्थेनान्वाधिहस्तो वा प्रदिष्टां भूमिमप्राप्तश्चोरैर्भग्नोत्सृष्टो वा नान्वाधिमभ्यावहेत्। अन्तरे वा मृतस्य दायादोऽपि नाभ्यावहेत् शेषमुपनिधिना व्याख्यातम् ॥

[याचितकादिविषये व्यवस्थाः]

याचितकमवक्रीतकं वा यथाविधं गृह्णीयुस्तथाविधमेवार्पयेयुः। भ्रेषोपनिपाताभ्यां देशकालोपरोधि दत्तं नष्टं विनष्टं वा नाभ्याभवेयुः। शेषमुपनिधिना व्याख्यातम् ॥

श्रीमूला

अनिसृष्टोपभोक्तेति। अननुज्ञाताधिभोक्ता, मूल्यशुद्धं मूल्याच्छुद्धम्, आजीवं बन्धं च दद्याद् आधातुर्भोगमूल्यं राज्ञो दण्डं च दद्यात् स्वप्रयुक्तं मूल्यं भोगमूल्यदण्डतष्टावशिष्टमेव लभेत न तु सर्वमित्यर्थः। शेषमुपनिधिना व्याख्यातमिति। अनुक्तं विधानमुपनिधिविधानेन समानमित्यर्थः।

आधिकल्पमादेशान्वाध्योरतिदिशति—एतेनेत्यादि। अन्यस्मै दीयतामित्युक्त्वा तदन्यस्य हस्तेऽर्पितं द्रव्यमादेशः। एतावदध्वान्तरं रक्षित्वा देहीत्यर्पितमन्वाधिः। सार्थेनेति। अन्वाधिहस्तः अन्वाधिमध्वनि नयन्, वाशब्दो वाक्यभूषणम्। प्रदिष्टां निर्दिष्टां, भूमिम् अध्वोत्तरावधिम्, अप्राप्तः, चोरैः, सार्थेन अध्वगसङ्घेन सह, भग्नोत्सृष्टो वा मुषितविसृष्टश्च, अन्वाधिं, नाभ्यावहेत् न निष्क्रीणीयात्। अन्तरे वा अध्वमध्ये वा, मृतस्य अन्वाधिहस्तस्य, दायादोऽपि नाभ्यावहेत्। शेषं विधानम् उपनिधिना व्याख्यातम् उपानिधिविधानवद् द्रष्टव्यम्।

याचितकमिति। याच्ञयोपयोगाय गृहीतम्, अवक्रीतकं वा भाटकगृहीतं वा यथाविधं गृह्णीयुस्तथाविधमेवार्पयेयुः। भ्रेषोपनिपाताभ्यामिति। भ्रेषो हस्त्यादिदुष्टसत्त्वजनितं भयम् उपनिपातश्चोरादिभयं ताभ्यां, नष्टं विनष्टं वा, देशकालोपरोधि अमुकदेशान्न प्रस्थातव्यमिति वा एतावतः कालस्य न प्रस्थातव्यमिति वा देशकालोपरोधान्नष्टं विनष्टं वा, दत्तं नाभ्यावहेयुः। शेषमित्यादि सुबोधम्।

स्वामिप्रतिनिधित्वेन वस्तूनि विक्रीणानानां नियमाः]

वैयावृत्यविक्रयस्तु—वैयावृत्यकराः यथादेशकालं विक्रीणानाः पण्यं यथाजातमूल्यमुदयं च दद्युः । शेषमुपनिधिना व्याख्यातम् ॥

देशकालातिपातने वा परिहीणं सम्प्रदानकालिकेन अर्घेण मूल्यमुदयं च दद्युः । यथासम्भाषितं वा विक्रीणानाः नोदयमधिगच्छेयु, मूल्यमेव दद्युः । अर्घपतने वा परिहीणं यथापरिहीणं मूल्यमूनं दद्युः ।

सांव्यवहारिकेषु वा प्रात्ययिकेष्वराजवाच्येषु भ्रेषोपनिपाताभ्यां नष्टं विनष्टं वा मूल्यमपि न दद्युः । देशकालान्तरितानां तु पण्यानां क्षयव्यय-शुद्धमूल्यमुदयं च दद्युः, पण्यसमवायानां च प्रत्यंशम् । शेषमुपनिधिना व्याख्यातम् । एतेन वैयावृत्यविक्रयो व्याख्यातः ॥

श्रीमूला

वैयापृत्यविक्रयस्त्विति । अभिधीयत इति शेषः । वैयापृत्यकराः इह पृशब्दः पठ्यते न तु वृशब्दः । व्यापृतो व्याप्रियमाणस्तस्य कर्म वैयापृत्यं कर्मणि ष्यञ् तत्कराः कर्मकरा इत्यर्थः । वैयावृत्यकरा इति वृशब्दपाठे यथा कर्मकरार्थता, तथा व्याख्यातमधस्तात् । यथादेशकालं स्वस्वक्लृप्तदेशकालावनतिक्रम्य, पण्यं विक्रीणानाः, यथाजातं यथोत्पन्नं मूल्यम्, उदयं लाभं च, दद्युः, पण्यस्वामिने । शेषमित्यादि स्पष्टम् ।

देशकालातिपातने वेति । देशातिक्रमणे कालातिक्रमणे वा स्वकृते सति, परिहीणं लाभच्छेदं, सम्प्रदानकालिकेनार्घेण क्लृप्तकालप्रसिद्धमूल्यकल्पनेन, मूल्यं पण्यमूल्यम्, उदयं च दद्युः ।

यथासम्भाषितं वेति । अमुकेनार्घेण विक्रेतव्यमिति स्वामिपरिभाषानुसारेण, कर्मकराः विक्रीणानाश्चेद्, उभयं मूल्यं लाभं च, नाधिगच्छेयुः, अर्थात् पण्यस्वामिनः । मूल्यमेव दद्युः मूल्यं केवलं पण्यस्वामिने दद्युः कर्मकराः, लाभं तु स्वयं हरेयुरित्यर्थः । अर्घपतने वा परिहीणमिति । अर्घपतनवशात् किञ्चित् परिहीणं यदि भवेत्, यथा परिहीणं मूल्यमूनं दद्युः परिहीणानुरोधेन पण्यमूल्यमूनं पूरयित्वार्पयेयुः ।

सांव्यवहारिकेषु वेति । परपण्यक्रयविक्रयजीविषु, प्रात्ययिकेषु प्रत्ययार्हेषु, अराजवाच्येषु राजाप्रतिषिद्धेषु सत्सु, भ्रेषोपनिपाताभ्यां, नष्टं विनष्टं वा पण्यं, यदि भवेदिति शेषः, मूल्यमपि न दद्युः अर्थात् ते । देशकालान्तरितानां देशान्तरे कालान्तरे च विक्रेतुमर्पितानां पण्यानां, क्षयव्ययविशुद्धं क्षयः कालपरिवासनिमित्तः पण्यक्षयः व्ययः कर्मकरादिभक्तपरिव्ययस्ताभ्यां परितष्टं, मूल्यम्, उदयं च लाभं च दद्युः । पण्यसमवायानां च प्रत्यंशमिति । वणिजः स्वदत्तपण्यानि देशान्तरे विक्रीय ततः समानीतानां नानापण्यान्तराणां विषये प्रतिलाभांशं सांव्यवहारिकेभ्यो दद्युः ।

[भूषणाद्यर्थं शिल्पहस्तनिक्षिप्तानां सुवर्णादीनां रक्षणोपायः]

निक्षेपश्चोपनिधिना ॥

तमन्येन निक्षिप्तमन्यस्यार्पयतो हीयेत निक्षेपापहारे पूर्वापदानं निक्षेप्तारश्च प्रमाणम् ॥

अशुचयो हि कारवः। नैषां करणपूर्वो निक्षेपधर्मः। कारणहीनं निक्षेपमव्ययमानं गूढभित्तिन्यस्तान् साक्षिणो निक्षिप्ता रहस्यप्रणिपातेन प्रज्ञापयेत्। वनान्ते वा मद्यप्रहवणे विश्वासेन ॥

[शिल्पिनामार्जवज्ञानाय प्रयोक्तव्याः परीक्षाः]

रहसि वृद्धो व्याधितो वैदेहकः कश्चित् कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्यापगच्छेत्।

श्रीमूला

शेषमित्यादि गतार्थम्। सांव्यवहारिकोक्तमेतद् विधानं वैयापृत्यविक्रयेऽप्यतिदिशति—एतेनेत्यादि।

निक्षेपश्चेति। भूषणादिनिर्माणार्थं कारुषु निक्षिप्यमाणं स्वर्णादिकं निक्षेपः, सः, उपनिधिना, व्याख्यात इत्यनुवर्तते। तमिति। तं निक्षेपम्, अन्येन निक्षिप्तम्। अन्यस्यार्पयतः तदन्यस्मै ददानस्य कारोः, हीयेत द्रव्यहानिर्भवति साक्षान्निक्षेप्तृहस्ते स पुनर्देय एवेत्यर्थः। निक्षेपापहारे, पूर्वापदानं निक्षेप्तारश्च प्रमाणं कारुपूर्वचरितं निक्षेप्तृसुजनतां च पर्यालोच्य निर्णयः कर्तव्य इत्यर्थः। कुत एवं, तत्राह—अशुचयो हीति। हि यतः, कारवः अशुचयः सत्यहीनाः। एषां, निक्षेपधर्मः निक्षेपव्यवहारः, करणपूर्वो न साक्षिलेख्यपूर्वो न क्रियते विश्वासादेव केवलात् क्रियते। करणहीनमिति। साक्ष्यादिरहितं, निक्षेपम्, अपव्ययमानम् अपलपन्तं कारुं, गूढभित्तिन्यस्तान्, साक्षिणः, निक्षेप्ता, रहस्यप्रणिपातेन रहस्ये प्रार्थनपूर्वकश्रावणेन, प्रज्ञापयेत् प्रबोधयेत्। वनान्ते वा, मद्यप्रहवणविश्वासेन मद्यगोष्ठीरचनविस्रम्भेण, रहसि साक्षिणः प्रज्ञापयेदिति वर्तते। इह मद्यप्रहवणेति प्रहवणशब्द एव मातृकाग्रन्थेषु सर्वेषु पठ्यते। स च प्रपूर्वाज्जुहोतेरधिकरणे ल्युटि साध्यः। प्रकर्षेण हूयते दीयते पानभोजनादिकमस्मिन्निति प्रहवणं गोष्ठीरचनमुच्यते। प्रवहणशब्दस्य यथेहशोऽर्थस्तथोक्तं प्राक्।

रहसीति। विजने वृद्धो व्याधितो वा, वैदेहको भूषणवणिक्, क्वचित् कृतलक्षणं चिह्नविशेषयुक्तं, द्रव्यम्, अस्य कारोः, हस्ते, निक्षिप्य, अपगच्छेत् म्रियेत।

तस्य प्रतिदेशेन पुत्रो भ्राता वाऽभिगम्य निक्षेपं याचेत। दाने शुद्धिरन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ॥

प्रव्रज्याभिमुखो वा श्रद्धेयः कश्चित्कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्य प्रतिष्ठेत। ततः कालान्तरागतो याचेत। दाने शुचिरन्यथा निक्षेपं स्तेय-दण्डं च दद्यात् ॥

कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनम्। बालिशजातीयो वा रात्रौ राजदायिकाङ्क्षणभीतः सारमस्य हस्ते निक्षिप्यापगच्छेत्। स एनं बन्ध-नागारगतो याचेत। दाने शुचिः अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ॥

[प्रत्यर्पणात्पूर्वं शिल्पिनो मरणे कर्तव्योंऽशः
निक्षेप्तृपरीक्षा च]

अभिज्ञानेन चास्य गृहे जनमुभयं याचेत। अन्यतरादाने यथोक्तं पुरस्तात्।

श्रीमूला

तस्य, प्रतिदेशेन वचनेन, पुत्रो भ्राता वा अभिगम्य निक्षेपं याचेत, चेदिति शेषः, दाने शुद्धिः तदा तदर्पणे कारोरानृण्यं भवति। अन्यथा तदपलापे, निक्षेपं स्वामिने, स्तेयदण्डं च राज्ञे दद्यात्।

प्रव्रज्याभिमुख इत्यादि। सुबोधम्। कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनमिति। स्वनिक्षेपद्रव्यस्य यल्लक्षणं पूर्वकृतं तद्दर्शनेन वा तदुपलम्भेन वा कारुगृहान्निक्षेपं प्रत्याहरेत्। बालिशजातीयो वेति। मूर्खप्रायो जनः, रात्रौ, राजदायिकाङ्क्षणभीतः राजदायिना राज्ञेऽर्पयिष्यता राजामात्यादिना यत् काङ्क्षणमभिलषणं तेन हेतुना भीतः, सारं रत्नादि प्रशस्तं वस्तु, अस्य कारोः, हस्ते निक्षिप्य अपगच्छेत्। सः निक्षेप्ता, बन्धनागारगतः राजदाय्याकाङ्क्षितसारद्रव्यानुपहरणात् कारणान्तराद् वा कारागारं प्राप्तः, एनं सारं याचेत। चेदिति शेषः। दाने तदा प्रत्यर्पणे शुचिः कारुः। अन्यथा निक्षेपं स्तेयदण्डं च दद्यात्।

अप्रत्यर्पितनिक्षेपादिकस्य कारोर्मरणेत्याह- अभिज्ञानेन- चेति। निक्षेपतद्-ग्राहिकारुलक्षणाद्यभिज्ञानकथनेन, अस्य कारोः, गृहे, जनं तत्पुत्रादिम् उभयं निक्षेपं सारं च, याचेत। अन्यतरादाने अन्यतरानर्पणे यथोक्तं पुरस्तात् पूर्वं यथोक्तं तथा कुर्यात् निक्षेपं स्तेयदण्डं च दद्यादित्यर्थः।

द्रव्यभोगानामागमं चास्यानुयुञ्जीत। तस्य चार्थस्य व्यवहारोपलिङ्गनम् अभियोक्तुश्चार्थसामर्थ्यम् ॥

एतेन मिथस्समवायो व्याख्यातः

[निगमनम्]

तस्मात्साक्षिमदच्छन्नं कुर्यात्सम्यग्विभाषितम् ।
स्वे परे वा जने कार्यं देशकालाग्रवर्णतः ॥१४१॥

इति धर्मस्थीये औपनिधिकं द्वादशोऽध्यायः,
आदित एकोनसप्ततितमः ।

श्रीमूला

सत्यासत्यनिश्चयार्थं धर्मस्थकरणीयमाह—द्रव्यभोगानामिति। तद् गृहोपभुज्यमानद्रव्याणाम्, आगमं च, अस्य निक्षेपाद्यपलापकस्य, अनुयुञ्जीत धर्मस्थः। तस्य चार्थस्य अनुयुक्तनिवेदितस्य चार्थस्य, व्यवहारोपलिङ्गनं व्यवहारैर्न्यायैः सत्यासत्यत्वानुमानं, कर्तव्यमिति शेषः। अभियोक्तुश्चार्थसामर्थ्यम् अमुकद्रव्यनिक्षेपाहमिति वदितुस्तथाविधद्रव्यनिक्षेपणयोग्यत्वं च, विभावनीयमिति शेषः।

निक्षेपापलापोक्तविधानदिशा रहस्यऋणदानगान्धर्वविवाहाद्यपलापेष्वपि सत्यासत्यनिर्णयोपाया ऊहनीया इत्याह—एतेनेत्यादि।

अध्यायप्रान्ते श्लोकमाह—तस्मादिति। तस्माद् वस्त्वपलापसम्भवात् सत्यासत्यनिर्णयस्य दुस्साधत्वाच्च, कार्यं, साक्षिमद्, अच्छन्नम्, स्वे परे वा स्वजने परजने च, देशकालाग्रवर्णतः देशतः कालतः संख्यातो रूपतश्च, सम्यग्, विभाषितं विविच्य कथितं कुर्याद् वस्त्वपलापस्य परिहारार्थं परिज्ञानार्थं च।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
द्वादशोऽध्यायः, औपनिधिकम्,
आदितः एकोनसप्ततितमः ॥

पञ्चषष्टितमं प्रकरणम्

त्रयोदशोऽध्यायः

दासकर्मकरकल्पः

[आर्याणां दासीकरणे दण्डाः, तदपवादाश्च]

उदरदासवर्जम् आर्यप्रमाणप्राप्तव्यवहारं शूद्रं विक्रयाधानं नयतः-स्वजनस्य द्वादशपणो दण्डः, वैश्यं द्विगुणः, क्षत्रियं त्रिगुणः, ब्राह्मणं चतुर्गुणः। परजनस्य पूर्वमध्यमोत्तमवधा दण्डाः क्रेतृश्रोतॄणां च ॥

म्लेच्छानामदोषः प्रजां विक्रेतुमाधातुं वा। न त्वेवार्यस्य दासभावः ॥

श्रीमूला

दासकर्मकरकल्प इति सूत्रम्। दासाः गर्भदासाः कर्मकराः कर्षकगोपालादयः तेषां कल्पः आधानविक्रयादिविधानम् उच्यत इति सूत्रार्थः 'पतिमत्या पुत्रवत्या च स्त्रिया दासाहितकाभ्याम्' इति विवादपदनिबन्धे मनुष्याणामाधानमुक्तम्। विक्रीत-क्रीतानुशये च विक्रय उक्तः। तत्र क आधातव्यो विक्रेतव्यो वेत्येतदधुनाभिधीयते।

उदरेत्यादि। उदरदासवर्जम् अशननिरुपायोऽन्नाच्छादनदानेन रक्ष्यमाण उदरदासः तद्वर्जम्, आर्यप्राणम् आर्यजीवितम्, अप्राप्तव्यवहारं, शूद्रं, विक्रयाधानं नयतः विक्रीणानस्यादधानस्य च, स्वजनस्य, द्वादशपणो दण्डः, वैश्यं द्विगुणः वैश्यं विक्रयाधानं नयतः स्वजनस्य चतुर्विंशतिपणः। क्षत्रियं त्रिगुणः क्षत्रियं विक्रयाधानं नयतः षट्त्रिंशत्पणः। ब्राह्मणं चतुर्गुणः विक्रयाधानं नयतोऽष्टाचत्वारिंशत्पणः। परजनस्य अस्वजनस्य यथोक्तं कुर्वतः, पूर्वमध्यमोत्तमवधाः यथाक्रमं प्रथमसाहसो मध्यमसाहस उत्तमसाहसो घातश्च दण्डाः। क्रेतृश्रोतॄणां च शूद्रादि मूल्यदानेन स्वीकुर्वतां तत् साक्षिणां च पूर्वमध्यमोत्तमवधा दण्डाः।

म्लेच्छानामिति। म्लेच्छाः अनार्याः कृषिशस्त्रजीविनो तेषां वन्याः विषये, अदोषः प्रजां विक्रेतुमाधातुं वा स्वीयप्रजाविक्रयाधानम् न दोषाय। आर्यस्य जनस्य दासभावः नत्वेव नैवापादनीयः।

अथवा आर्यमाधाय कुलबन्धने आर्याणामापदि निष्क्रयं चाधिगम्य बालं साहाय्यदातारं वा पूर्वं निष्क्रीणीरन् ॥

[मिथ्याधानकरणे दण्डाः]

सकृदात्माधाता निष्पतितः सीदेत्, द्विरन्येनाहितकः, सकृदुभौ परविषयाभिमुखौ । वित्तापहारिणो वा दासस्यार्यभावमपहरतोऽर्धदण्डः । निष्पतितप्रेतव्यसनिनामाधाता मूल्यं भजेत ॥

[आधीकरणार्थदत्तमूल्यनाशने आधीकृतविमोचनहेतवः, विशेषे दण्डश्च]

प्रेतविण्मूत्रोच्छिष्टग्राहणम् आहितस्य नग्नस्नापनं दण्डप्रेषणमतिक्रमणं च स्त्रीणां मूल्यनाशकरम् ।

———

श्रीमूला

आपत्कल्पमाह—अथवेति । कुलबन्धने कुलस्य कृच्छ्रप्राप्तौ, आर्याणामापदि बहूनामार्याणां विपत्प्राप्तौ च, आर्यम् आधाय आपन्निवृत्त्यपेक्षितधनग्रहणेन धनिके आहितं कृत्वा न तु विक्रीय, निष्क्रयं चाधिगम्य धनिकप्रत्यर्पणीये धने हस्तप्राप्ते सति, बालम् आहितपूर्वं कुमारं, साहाय्यदातारं वा स्वयमाधीभावेन कृतोपकारमबालमपि वा, पूर्वं निष्क्रीणीरन् प्रथमं धनं दत्त्वा प्रत्यानयेयुः शान्तविपदां तन्निष्क्रयणमेव प्रथमानुष्ठेयं कृत्यमित्यर्थः ।

सकृदात्माधाता निष्पतितः सीदेदिति । धनग्रहणेन स्वयमेवात्मानमाधिं कृत्वा धनिकसकाशात् सकृदपसृतश्चेत् पुनर्धनिकमुपगन्तुं नार्हेत्, सद्य एव तद्दणं निर्यातयेच्चेत्यर्थः । द्विरिति । अन्येनाहितकः, द्विः, निष्पतितः सीदेत् । सकृदिति । उभौ आत्माधातान्याहितकश्च, सकृत् परविषयाभिमुखौ परविषयगामिनौ, सीदेतामिति विपरिणतसम्बन्धः ।

वित्तापहारिणो वेति । स्वामिवित्तमपहरतो, दासस्य गर्भदासस्य, आर्यभावमपहरतोऽर्धदण्डः आर्यद्रव्यहारिस्तेनदण्डस्यार्धं दण्डो भवति । आर्यद्रव्यमपहरत इति क्वचित् पाठः । निष्पतितप्रेतव्यसनिनाम् आधिग्राहकदोषान्निष्पतितस्य देशान्तरगतस्य प्रेतस्य मृतस्य व्यसनिनो मद्यद्यूतादिव्यसनप्राप्तस्य च दासस्य, मूल्यम् आधाता भजेत ।

प्रेतविण्मूत्रोच्छिष्टग्राहणमिति । आहितस्य प्रेतादिग्राहणं, स्त्रीणाम् आहितानां, नग्नस्नापनं विवस्त्रपुरुषस्नापनं, दण्डप्रेषणं लगुडताडनम्, अतिक्रमणं च उपभोगश्च मूल्यनाशकरम् ।

धात्रीपरिचारिकार्धसीतिकोपचारिकाणां च मोक्षकरम्। सिद्धमुपचारकस्याभिप्रजातस्य अपक्रमणम् ॥

धात्रीमाहितिकां वा अकामां स्ववशामधिगच्छतः पूर्वस्साहसदण्डः, परवशां मध्यमः। कन्यामाहितिकां वा स्वयमन्येन वा दूषयतः मूल्यनाशः शुल्कं तद्द्विगुणश्च दण्डः ॥

[विक्रीतात्मतत्पुत्रमोर्विषये युद्धार्थ-
गृहीतविषये च व्यवस्थाः]

आत्मविक्रयिणः प्रजाम् आर्यां विद्यात्। आत्माधिगतं स्वामिकर्माविरुद्धं लभेत, पित्र्यं च दायम्। मूल्येन चार्यत्वं गच्छेत्। तेनोदरदासाहितकौ व्याख्यातौ ॥

प्रक्षेपानुरूपश्चास्य निष्क्रयः दण्डप्रणीतः कर्मणा दण्डमुपनयेत् ॥

आर्यप्राणो ध्वजाहृतः कर्मकालानुरूपेण मूल्यार्धेन वा विमुच्येत ॥

श्रीमूला

धात्रीत्यादि। धात्री उपमाता परिचारिका शुश्रूषिका अर्धसीतिका कर्षकस्त्री उपचारिका आस्तरणवीजनाद्युपचारकर्त्री एतासामाहितानां, च मोक्षकरम् अर्थात् प्रेतविण्मूत्रादिग्राहणादिकम्। सिद्धमिति। दास्याः भक्तदायी भर्ता भवंस्तेनैव वेतनेन दासीस्वामिनः कर्म कुर्वाण उपचारकः उपचारकस्य, अभिप्रजातस्य दास्यां प्रजामुत्पादितवतः, अपक्रमणम् अपूर्णेऽपि कालेऽपसरणं सिद्धम्।

धात्रीमाहितिकां वेति। ताम् अकामां, स्ववशाम् अभर्तृवशाम्, अधिगच्छतः, पूर्वः साहसदण्डः। परवशां भर्तृवशाम् अधिगच्छतः मध्यमः।

कन्यामाहितिकां वेत्यादि। तां, स्वयमतिक्रामतोऽन्येनातिक्रामयतो वा, मूल्यं नश्यति। शुल्कं कन्यायै तेन दातव्यं भवति, शुल्कद्विगुणश्च दण्डो राज्ञे दातव्यः।

आत्मविक्रयिण इति। तस्य, प्रजाम् आत्मविक्रयात् प्रागुत्पन्नमपत्यम्, आर्यां विद्याद् अदासीं जानीयात्। आत्माधिगतमित्यादि। आत्मविक्रयी स्वामिकर्माविरोधेन तननार्जितं धनं पितृदायं च लभेत मूल्यदानेन दासभावमोक्षं च प्रतिपद्येत। तेनोदरदासाहितकौ व्याख्याताविति। तयोरप्यात्माधिगतलाभः पितृदायलाभ आर्यत्वप्रत्यापत्तिश्च भवतीत्यर्थः।

प्रक्षेपेत्यादि। अस्य आत्मविक्रयिणः, निष्क्रयः प्रक्षेपानुरूपः आत्ममोक्षणार्थं देयद्रव्यं विक्रयकालकृतपरिभाषानुरोधि भवेत्।

दण्डप्रणीत इति। अभिजातः, ध्वजाहृतः युद्धप्रगृहीतः, कर्मकालानुरूपेण

[दास्यानर्हाणां केषाञ्चिद् दासीकरणे दण्डाः]

गृहजातदायागतलब्धक्रीतानामन्यतमं दासम् ऊनाष्टवर्षं विबन्धुमकामं नीचे कर्मणि विदेशे दासीं वा सगर्भामप्रतिविहितगर्भभर्मण्यां विक्रयाधानं नयतः पूर्वस्साहसदण्डः, क्रेतृश्रोतॄणां च । दासमनुरूपेण निष्क्रयेणार्यमकुर्वतो द्वादशपणो दण्डः, संरोधश्चाऽऽकारणात् । दासद्रव्यस्य ज्ञातयो दायादाः, तेषाम् अभावे स्वामी ॥

स्वामिनः स्वस्यां दास्यां जातं समातृकम् अदासं विद्यात् । गृह्या चेत् कुटुम्बार्थचिन्तनी माता भ्राता भगिनी चास्याः अदासाः स्युः । दासं दासीं वा निष्क्रीय पुनर्विक्रयाधानं नयतो द्वादशपणो दण्डः अन्यत्र स्वयंवादिभ्यः ॥ इति दासकल्पः ॥

श्रीमूला

मूल्यार्धेन विमुच्येत कर्मणः कालस्य चानुरूप्येण मूल्यं किमपि परिकल्प्य तदर्धदानेन मोक्षं लभेत ।

गृहजातेत्यादि । गृहजातो दायागतः लब्धः क्रीत इति चतुर्णाम् अन्यतमं दासम्, ऊनाष्टवर्षम् अपूर्णाष्टवयसं, विबन्धुं बन्धुहीनम्, अकामं, नीचे कर्मणि, नयतो नियोजयतः, विदेशे विक्रयाधानं नयतश्च दासीं वा सगर्भाम्, अप्रतिविहितगर्भभर्मण्याम् असंविहितप्रसवशुश्रूषापेक्षितद्रव्यां, विक्रयाधानं नयतः, पूर्वः साहसदण्डः । क्रेतृश्रोतॄणां च; पूर्वः साहसदण्ड इति सम्बध्यते ।

दासमिति । तम्, अनुरूपेण निष्क्रयेण, आर्यमकुर्वतः दास्यादमोचयतः, द्वादशपणो दण्डः । संरोधश्चाकारणादिति । आकारणमाह्वानं कृत्वा बन्धुभिस्तस्य सम्भूयरोधनेनोपालम्भश्च कार्यः । दासद्रव्यस्येति । दासधनस्य, ज्ञातयो दासम्बन्धवो, दायादाः दायहराः । तेषामभावे स्वामी दायहरः ।

स्वामिनः स्वस्यां दास्यामित्यादि । स्वामी यदि स्वीयायां दास्यां पुत्रं जनयेत्, तर्हि स पुत्रो दासो न भवति, सा च दासी दास्यान्मुच्येत । गृह्या चेत् कुटुम्बार्थचिन्तनीति । सा दासी गृहासक्ता कुटुम्बमर्थं च यदि चिन्तयेद्, अस्याः माता भ्राता भगिनी च, अदासाः स्युः दास्यनिर्मुक्ताः स्युः ।

दासं दासीं वा निष्क्रीयेत्यादि । सकृद् विक्रीतमाहितं वा दासं तथाविधां दासीं वा निष्क्रयदानेन प्रत्यापद्य पुनस्तौ विक्रीणानस्यादधानस्य च द्वादशपणो दण्डः । अन्यत्र स्वयंवादिभ्यः इति । यदि निष्क्रीताः स्वात्मानं पुनर्विक्रेतव्यमाधातव्यं च स्वयं वदेयुस्तदा तद्विक्रयाधानयोर्न दोषः । इति दासकल्प इति । व्याख्यात इति शेषः ।

[कर्मकरभ्यो देयानां वेतनानां व्यवस्था]

कर्मकरस्य कर्मसम्बन्धमासन्ना विद्युः । यथासम्भाषितं वेतनं लभेत । कर्मकालानुरूपमसम्भाषितवेतनम् । कर्षकस्सस्यानां गोपालकस्सर्पिषां वैदेहकः पण्यानामात्मना व्यवहृतानां, दशभागसम्भाषितवेतनो लभेत । सम्भाषितवेतनस्तु यथासम्भाषितम् ॥

कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपरिचारकादिः आशाकारिकवर्गस्तु यथाऽन्यस्तद्विधः कुर्यात् । यथा वा कुशलाः कल्पयेयुः, तथा वेतनं लभेत साक्षिप्रत्ययमेव स्यात् । साक्षिणामभावे यतः कर्म ततोऽनुयुञ्जीत ॥

[वेतनदातृकर्मकरयोरनार्जवे दण्डाः,
आपत्कालदेयविशेषवेतनं च]

वेतनादाने दशबन्धो दण्डः षट्पणो वा अपव्ययमाने द्वादशपणो दण्डः, पञ्चबन्धो वा ।

श्रीमूला

कर्मकरकल्पमाह—कर्मकरस्येति । कर्षकगोपालकादेः कर्मकरस्य, कर्मसम्बन्धं कर्मस्वाभियोगम्, आसन्ना विद्युः तदन्तिकस्था भूत्वा उपलभेरन् । यथासम्भाषितं परिभाषितप्रकारं वेतनं लभेत, कर्मकरः असंभाषितवेतनं, कर्मकालानुरूपं कर्मणः तत्कालस्य चानुगुणं, लभेत । तच्च कियदित्याकाङ्क्षायामाह—कर्षक इति । असंभाषितवेतनः, कर्षकः, आत्मना, व्यवहृतानां साधितानां, सस्यानां, दशभागं, लभेत । गोपालकः सर्पिषां दशभागं, लभेत । वैदेहकः पण्यानां दशभागं लभेत । संभाषितवेतनस्तु कर्षकादिः, यथासंभाषितं दशभागान्न्यूनमधिकं वा लभेत ।

कारुशिल्पीत्यादि । कार्वादयः षट् प्रतीताः तदादिः, आशाकारिक वर्गः आशया कारिका क्रिया येषां त आशाकारिकाः तेषां वर्गः, यथान्यस्तद्विधः तज्जातीयोऽपर इव कुर्यात्, कर्म । यथा वा कुशलाः, तत्कर्मगुणविशेषज्ञाः कल्पयेयुः स्थापयेयुरेतावद् देयमिति, तथा वेतनं लभेत । साक्षिप्रत्ययमेव स्यादिति, अन्योन्यविप्रतिपत्तौ साक्षिप्रमाणकमेव वेतनं देयम् । साक्षिणामभावे, यतः कर्म ततोऽनुयुञ्जीत यत्र तादृशं कर्म कृतं तत्र कियद् दत्तमिति पृष्ट्वा जानीयात् ।

वेतनादाने इति । वेतनस्याप्रदाने, दशबन्धः न्याय्यवेतनदशभागः, षट्पणो वा, दण्डः । अपव्ययमाने गृहीत्वा वेतनं गृहीतं वदति कर्मकरे, द्वादशपणो दण्डः, पञ्चबन्धो वा वेतनपञ्चभागो वा, दण्डः ।

नदीवेगज्वालास्तेनव्यालोपरुद्धः सर्वस्वपुत्रदारात्मदानेनार्तस्त्रातारमाहूय निस्तीर्णः कुशलप्रदिष्टं वेतनं दद्यात्। तेन सर्वत्राऽऽर्तदानानुशया व्याख्याताः ॥

[कुलटासम्भोगवेतनव्यवस्था]

लभेत पुंश्चली भोगं सङ्गस्योपलिङ्गनात्।
अतियाच्ञा तु जीयेत दौर्मत्याविनयेन वा ॥१४२॥

इति धर्मस्थीये दासकर्मकरकल्पे दासकल्पः, कर्मकरकल्पे
स्वाम्यधिकारश्च त्रयोदशोऽध्यायः,
आदितस्सप्ततितमः।

श्रीमूला

नदीवेगेत्यादि । नदीवेगादिभिश्चतुर्भिरापत्स्थानैरुपरुद्धः, आर्त्तः सर्वस्वपुत्रदारात्मदानेन त्रातारमाहूय 'यो मां रक्षति तस्मै स्वंस्वास्वादिकं दास्यामि' इति प्रतिज्ञया रक्षकमाहूय निस्तीर्णः आहूतेन रक्षितः, कुशलप्रदिष्टं निपुणनिर्दिष्टं वेतनं दद्याद्, रक्षकाय। यथाप्रतिज्ञातं दानं निस्तरणोत्तरकालेऽनुशयानस्य कर्तुमनिच्छतोऽयं विधिः। एवमन्येष्वपि आर्तदानानुपयेषु विधिर्द्रष्टव्य इत्याह—तेनेत्यादि।

अध्यायान्ते श्लोकमाह—लभेतेति। पुंश्चली बन्धकी, भोगं मैथुनभृतिं, लभेत, सङ्गमस्य उपलिङ्गनात् चिह्नेन विभावनात्। अतियाच्ञा तु अतिमात्रभृतिप्रार्थिनी तु पुंश्चली, जीयेत दण्डयेत। दौर्मत्याविनयेन वा जीयेत दुर्बुद्धित्वप्रयुक्तेन पुरुषकामप्रातिकूल्याचरणेन च दण्डयेत॥

इति कौटिलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाऽधिकरणे
त्रयोदशोऽध्यायः, दासकर्मकरकल्पो दासकल्पः, कर्मकरकल्पे
स्वाम्यधिकारः, आदितः सप्ततितमोऽध्यायः॥

षट्षष्टितमं प्रकरणम्

चतुर्दशोऽध्यायः

(कर्मकरकल्पः) सम्भूयसमुत्थानञ्च

[कर्मकरणात्पूर्वमेव भृत्यादिग्रहणे कर्मकरैः
पालनीया नियमाः]

गृहीत्वा वेतनं कर्म अकुर्वतो भृतकस्य द्वादशपणो दण्डः, संरोधश्चाऽकारणात् । अशक्तः कुत्सिते कर्मणि व्याधौ व्यसने वा अनुशयं लभेत, परेण वा कारयितुम् । तस्य व्ययं कर्मणा लभेत भर्ता वा कारयितुम् । 'नान्यस्त्वया कारयितव्यो मया वा नान्यस्य कर्तव्यम्' इत्यवरोधे भर्तुरकारयतो भृतकस्याकुर्वतो वा द्वादशपणो दण्डः । कर्मनिष्ठापने भर्तुरन्यत्र गृहीतवेतनो नासकामः कुर्यात् ॥

श्रीमूला

अथ दासकर्मकरकल्पस्य शेषोऽस्मिन्नध्याय आदावुच्यते । भक्तवेतनमन्वहमगृहीत्वा कर्म कुर्वतो विधिरुक्तः पूर्वाध्याये । इह तु गृहीतभक्तवेतनस्य कर्माभिधीयते ।

गृहीत्वेत्यादि । सुबोधम् । संरोधश्चाकारणादिति । आहूय बलादुपरुध्य वा तं कर्म कारयेत् ।

यत्कर्मकरणाय वेतनं गृहीतं तत्कर्मकरणासामर्थ्ये, कुत्सिते वा सति तस्मिन् कर्मणि व्याध्युद्भवे वा पुत्रविपत्त्यादिव्यसनसम्भवे वा कर्म कर्त्तव्यं त्यजन् परेण वा कारयन् कर्मकरो न दुष्यतीत्याह—अशक्त इत्यादि ।

तस्येति । तस्य व्ययकर्मणा अनुशयिहस्ताद् भृतिव्ययक्रियया, भर्ता वा कारयितुं लभेत परेण तत्कर्मानुष्ठापयितुमर्हेत् ।

'मदन्यस्त्वया कर्म न कारयितव्यः, त्वदन्यस्य च मया कर्म न कर्तव्यम्' इति भर्तृभृतकयोः समयनिर्बन्धे सति भर्तुः कर्माकारयतो भृतकस्य चाकुर्वतो द्वादशपणो दण्ड इत्याह—नान्यस्त्वया कारयितव्यः इत्यादि । कर्मेत्यादि । कर्मनिष्ठापन इत्यपपाठः, कर्मानिष्ठापन इत्येव युक्तः पाठः । गृहीतवेतनः, भर्तुः कर्मानिष्ठापने कर्मणोऽपरिसमापने असकामोऽन्यत्र न कुर्याद् भर्त्रनिच्छयान्यत्र कर्म नानुतिष्ठेत् ।

[सकाले उपस्थितस्य कर्मकरस्य कर्मकरण-
निरोधे मतभेदेन व्यवस्था:]

'उपस्थितमकारयतः कृतमेव विद्यात्' इत्याचार्याः। 'न' इति कौटल्यः। कृतस्य वेतनं, नाकृतस्यास्ति। स चेदल्पमपि कारयित्वा न कारयेत्, कृतमेव अस्य विद्यात्। देशकालातिपातनेन कर्मणामन्यथाकरणे वा नासकामः कृतमनुमन्येत। सम्भाषितादधिकक्रियायां प्रयासं न मोघं कुर्यात् ॥

[सङ्घीभूय भृतिग्रहणेन परकीयकर्मकारिणां विशेषः]

तेन सङ्घभृता व्याख्याताः। तेषामाधिस्सप्तरात्रमासीत। ततोऽन्यमुपस्थापयेत्; कर्मनिष्पाकं च। न चानिवेद्य भर्तुस्सङ्घः किञ्चित्परिहरेत्, अपनयेद्वा। तस्यातिक्रमे चतुर्विंशतिपणो दण्डः। सङ्घेन परिहृतस्यार्धदण्डः। इति भृतकाधिकारः ॥

श्रीमूला

उपस्थितमिति। अवरोधानुरोधेन कर्म कर्तुमुपस्थितं कर्मकरम्, अकारयतः भर्तुः, कृतमेव विद्याद् अकृतमपि कर्म कृतं जानीयात्, कर्मार्थं पूर्वदत्तं वेतनमपैतीत्यर्थः। इत्याचार्याः वदन्तीति शेषः।

स्वमतमाह—नेति कौटल्य इति। कुत इत्याह—कृतस्येति। कृतस्य वेतनमस्ति, अकृतस्य वेतनं नास्ति। सः भर्ता, अल्पमपि किञ्चिदपि कर्म कारयित्वा, न कारयेच्चेद् अर्थाच्छेषम्, अस्य भर्तुः कर्मेति शेषः, कृतमेव विद्यात्। देशकालातिपातनेनेति। क्लृप्तदेशकालातिक्रामणेन करणे, कर्मणाम् अन्यथाकरणे वा, असकामः अनिच्छन्, कृतं नानुमन्येत। सम्भाषितादधिकक्रियायां, प्रयासं तद्विषयं श्रमं मोघं वन्ध्यं, न कुर्याद् यत्किञ्चिदधिकं तदर्थे वेतनं दद्यादित्यर्थः। 'प्रयासं मोघं कुर्यादि'ति पाठे तु स्पष्ट एवार्थः।

तेनेति। उक्तेन भृतकस्य विधिना, सङ्घभृताः संहत्य भृतिग्रहणेन परकीयकर्मकारिणो भृतकाः, व्याख्याताः, तेष्वपि स एव विधिर्योज्य इत्यर्थः। तेषामाधिरिति। सङ्घभृतानाम्, आधिः अधिष्ठानं बन्धो वा, सप्तरात्रम् आसीत। ततः तदनन्तरम्, अन्यं भृतकसङ्घम्, उपस्थापयेत् सन्निधापयेत्। कर्मनिष्पाकं च पूर्वसङ्घकृतकर्मपरिणामं च, उपस्थापयेद् अवगच्छेत्। न चानिवेद्येति। सङ्घः, भर्तुरनिवेद्य, कञ्चित्, सङ्घावयवं, न च परिहरेत् नैव वर्जयेद् नचोपनयेद् वा। अपनयेदित्यपपाठो नूनम्। तस्य उक्तविधेः, अतिक्रमे, चतुर्विंशतिपणो दण्डः, सङ्घस्य। सङ्घेन परिहृतस्य अनिवेद्य भर्तुरितीहानुवर्तते भर्तारमनिवेद्य गतस्येत्यर्थः, अर्धदण्डः द्वादशपणो दण्डः।

[सम्भूयसमुत्थानम्—तत्र सङ्घे वेतनविभागः, व्याधि-
दौष्ट्यादिना कर्मानन्वित्तव्यक्तिविषये व्यवस्थाश्च]

सङ्घभृताः सम्भूयसमुत्थातारो वा यथासम्भाषितं वेतनं समं वा विभजेरन्। कर्षकवैदेहका वा सस्यपण्यारम्भपर्यवसानान्तरे सन्नस्य यथाकृतस्य कर्मणः प्रत्यंशं दद्युः। पुरुषोपस्थाने समग्रमंशं दद्युः। संसिद्धे तु धृतपण्ये सन्नस्य तदानीमेव प्रत्यंशं दद्युः। सामान्या हि पथि सिद्धिश्चाऽसिद्धिश्च ॥

प्रक्रान्ते तु कर्मणि स्वस्थस्यापक्रामतो द्वादशपणो दण्डः। न च प्रकाम्यमपक्रमणे ॥

[तादृशचोरसङ्घव्यवस्था]

चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन गाहयेत्, दद्यात् प्रत्यंशमभयं च।

श्रीमूला

अथवा परिहारप्रयोजकापराधनिमित्तोऽयं दण्डो बोद्धव्यः। इति भृतकाधिकार इति। व्याख्यात इति शेषः।

सम्भूयसमुत्थानमिति सूत्रम्। बहूनां सम्भूय क्वचित् कर्मणि प्रवृत्तिरिति सूत्रार्थः। तत्कर्त्तारश्च द्विप्रकाराः परकर्मकराः स्वकर्मकराश्चेति। तत्रोक्ताः पूर्वे। परास्त्विहाभिधीयन्ते।

सङ्घभृता इति। समुदेत्य कर्मकराः, सम्भूयसमुत्थातारो वा समुदेत्य वाणिज्यादिकारिणो वा, यथासम्भाषितं वेतनं, विभजेरन्, समं वा विभजेरन् सम्भाषणाभावे।

कर्षकवैदेहका वेति। कृषीवला वणिजश्च, सस्यपण्यारम्भपर्यवसानान्तरे सस्यानां पण्यानां च आरम्भपर्यवसानयोरन्तरे मध्यकाले, सन्नस्य व्याधितस्य सङ्घिनः, यथाकृतस्य कर्मणः प्रत्यंशं यावत् कृतं कर्म तावतः प्रविभागं, दद्युः। पुरुषोपस्थाने कर्मकरणाय व्याधितप्रतिपुरुषोपस्थितौ, समग्रं पूर्णम्, अंशं दद्युः। संसिद्धे त्विति। उद्धृतपण्ये संसिद्धे देशान्तरविक्रयणाय समारोपितपण्ये शकटादौ प्रस्थानसज्जे सति, सन्नस्य व्याधितस्य सम्भूयवाणिज्यकारिणामन्यतमस्य, तदानीमेव प्रत्यंशं तदीयं पण्यभागं, दद्युः। कुतः, सामान्या हि पथि सिद्धिश्चासिद्धिश्चेति। मार्गे पण्यानां रक्षा चापायश्चानियतौ यतः।

प्रक्रान्ते त्विति। कर्मणि सम्भूयसमुत्थानलक्षणे, प्रक्रान्ते सति, स्वस्थस्य, अपक्रामतः अपसरतः द्वादशपणो दण्ड.। दण्डं दत्त्वापि नापक्रमणे स्वाच्छन्द्यमित्याह—न च प्राकाम्यमपक्रमण इति। चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेदिति।

पुनस्स्तेये प्रवासनमन्यत्र गमने च । महापराधे तु दूष्यवदाचरेत् ॥

[यज्ञादिवैदिककर्मणि सङ्घशोऽन्वितानां
तल्लब्धांशभागव्यवस्थाः]

याजकाः स्वप्रचारद्रव्यवर्जं यथासम्भाषितं वेतनं समं वा विभजेरन् ॥

अग्निष्टोमादिषु च क्रतुषु दीक्षणादूर्ध्वं याजकस्सन्नः पञ्चममंशं लभेत; सोमविक्रयादूर्ध्वं चतुर्थमंशम्; मध्यमोपसदः प्रवर्ग्योद्वासनादूर्ध्वं तृतीयमंशम्; मध्यादूर्ध्वमर्धमंशम्; सुत्ये प्रातस्सवनादूर्ध्वे पादोनमंशम् . माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत । नीता हि दक्षिणा भवन्ति । बृहस्पतिसवनवर्जं प्रतिसवनं हि दक्षिणा दीयन्ते । तेनाहर्गणदक्षिणा व्याख्याताः ॥

सन्नानाम् आ दशाहोरात्राच्छेषभृताः कर्म कुर्युः । अन्ये वा स्वप्रत्ययाः ।

श्रीमूला

चोरान्तरैः सह चौर्यकर्मकरणविषये सम्भाषितप्रत्यंशं कमपि चोरं पूर्वदत्ताभयं कृत्वा तेनैव तत्सहचरांश्चोरान् ग्राहयेत् । दद्यात् प्रत्यंशमभयं चेति । तस्य ग्राहितचोरस्य प्रतिश्रुतमभयं प्रत्यंशं च यथासम्भाषितं दद्यात् । पुनः स्तेये दत्ताभयचोरेण पुनश्चौर्ये कृते, अन्यत्र गमने च देशान्तरं गत्वा चौर्यकरणे च, प्रवासनं कार्यमिति शेषः । महापराधे दूष्यवदाचरेत्, महापराधं दूष्यवदुपांशु हन्यात् ।

याजका इति । ऋत्विजः, स्वप्रचारद्रव्यवर्जं स्वस्वव्यापारप्रातिस्विकदक्षिणाद्रव्यमपहाय, यथासम्भाषितं वेतनं सामुदायिकं, समं तुल्यं विभजेरन् ।

ऋत्विजोऽग्निष्टोमादिक्रतुकर्मारम्भपर्यवसानान्तरे व्याधितस्यावान्तरतत्तत्कर्मानुष्ठानावधिभेदेनांशभेदानाह—अग्निष्टोमादिषु च क्रतुष्वित्यादि । तत्र याजको दीक्षणाद् दीक्षाकर्मणः, ऊर्ध्वं सन्नः, स्वांशस्य पञ्चममंशं लभेत । सोमविक्रयाद् ऊर्ध्वं, चतुर्थमंशं लभेत । मध्यमोपसदः प्रवर्ग्योद्वासनात् मध्योपसत्सम्बन्धिनः प्रवर्ग्योत्सादनकर्मण ऊर्ध्वं, तृतीयमंशं लभेत । प्रवर्ग्योपासनादिति मातृकयोः पाठः । मध्यात् मध्योपसदनकर्मण ऊर्ध्वम्, अर्धमंशं लभेत । द्वितीयमंशमिति पाठे द्वितीयांशोऽर्धमेव । सुत्ये सुत्याहे, प्रातस्सवनादूर्ध्वं पादोनमंशं लभेत । माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत । नीता हि दक्षिणा भवन्तीति । माध्यन्दिनसवनकर्मणि निर्वृत्ते हि दक्षिणाः सर्वाः प्राप्ता भवन्ति । बृहस्पतिसवनवर्जं बृहस्पतिसवनमपहाय, प्रतिसवनं सवने सवने, दक्षिणा दीयन्ते हि । तेनाहर्गणदक्षिणा व्याख्याता इति । उक्तरीत्या याजककार्येष्वहीनयज्ञेष्वपि दक्षिणानयनानुरोधेन याजकांशाः कल्प्याः ।

सन्नानामिति । व्याधितानां भृतकानां कर्म, आ दशाहोरात्रात् शेषभृताः अवशिष्टा भृतकाः, कुर्युः । अन्ये वा स्वप्रत्ययाः स्वाभिमताः, कुर्युः ।

कर्मण्यसमाप्ते तु यजमानस्सीदेत्, ऋत्विजः कर्म समापय्य दक्षिणां हरेयुः। असमाप्ते तु कर्मणि याज्यं याजकं वा त्यजतः पूर्वस्साहसदण्डः ॥

[यागादौ सङ्घीभूयसमुत्थानकर्मण्यन्वयानर्हाः]

अनाहिताग्निश्शतगुः अजज्वा च सहस्रगुः ।
सुरापो वृषलीभर्ता ब्रह्महा गुरुतल्पगः ॥१४३॥
असत्प्रतिग्रहे युक्तः स्तेनः कुत्सितयाजकः ।
अदोषस्स्यक्तुमन्योन्यं कर्मसङ्करनिश्चयात् ॥१४४॥

इति धर्मस्थीये दासकर्मकरकल्पे भृतकाधिकारः
सम्भूयसमुत्थानम्, चतुर्दशोऽध्यायः,
आदित एकसप्ततितमः

श्रीमूला

कर्मणीति । यज्ञकर्मणि, असमाप्ते तु, यजमानः सीदेद् व्याधितो भवेच्चेत्, ऋत्विजः, कर्म समापय्य, दक्षिणां तदर्थां हरेयुः ।

असमाप्ते त्विति । कर्मणि असमाप्ते, याज्यं यजमानं त्यजतः याजकस्य, याजकं त्यजतः याज्यस्य वा, पूर्वः साहसदण्डः ।

विधिशेषं श्लोकाभ्यां वदन्नध्यायमुपसंहरति—अनाहिताग्निरिति । शतं गावो यस्य स शतगुः । शतगुरनाहिताग्निः शतगवधनः सन्नप्यकृताग्न्याधानः, सहस्रगुरयज्वा च सहस्रगवधनः सन्नप्यकृतयज्ञः, सुरापः मद्यपः वृषलीभर्ता, ब्रह्महा, गुरुतल्पगः गुरुपत्नीगामी, असत्प्रतिग्रहे युक्तः असतः पापिष्ठजनात् प्रतिषिद्धद्रव्यस्य वा प्रतिग्रहे युक्तः आसक्तः, स्तेनः, कुत्सितयाजकः निन्दितान् यो याजयति स च, त्यक्तुमदोषः त्यागे दोषानुत्पादकः संसर्गानर्हं इत्यर्थः । कस्माद्, अन्योन्यं कर्मसङ्करनिश्चयात् कर्मदोषनिश्चयात् ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
चतुर्दशोऽध्यायः, दासकर्मकरकल्पे भृतकाधिकारः,
सम्भूयसमुत्थानम्, आदितः एकसप्ततितमः ॥

सप्तषष्टितमं प्रकरणम्

पञ्चदशोऽध्यायः

विक्रीतक्रीतानुशयः

[क्रेत्रे विक्रीतवस्त्वनर्पणे दण्डाः, तदपवादश्च]

विक्रीयपण्यमप्रयच्छतो द्वादशपणो दण्डः अन्यत्र दोषोपनिपाताविपह्येभ्यः। पण्यदोषो दोषः। राजचोराग्न्युदकबाध उपनिपातः। बहुगुणहीनमार्तकृतं वाऽविपह्यम्। वैदेहकानामेकरात्रमनुशयः, कर्षकाणां त्रिरात्रम्, गोरक्षकाणां पञ्चरात्रम् व्यामिश्राणां उत्तमानां च वर्णानां वृत्तिविक्रये सप्तरात्रम्। आतिपातिकानां पण्यानामन्यत्राविक्रेयमित्यविरोधेनानुशयो देयः। तस्यातिक्रमे चतुर्विंशतिपणो दण्डः, पण्यदशभागो वा ॥

[क्रीतपदार्थानां सकालेऽग्रहणे दण्डाः, अपवादाश्च]

क्रीत्वा पण्यमप्रतिगृह्णतो द्वादशपणो दण्डः, अन्यत्र दोषोपनिपाताविपह्येभ्यः। समानश्चानुशयः विक्रेतुरनुशयेन ॥

· श्रीमूला

विक्रीतक्रीतानुशय इति सूत्रम्। मूल्यग्रहणेन दत्तं विक्रीतं मूल्यदानेन गृहीतं क्रीतं तयोरनुशयो विसंवादोऽभिधीयत इति सूत्रार्थः। क्रयविक्रयविधिरध्यक्षप्रचारे प्रतिपादितः। तद्विषयोऽनुशयोऽनुशयदण्डश्चानुक्ताविहाभिधीयेते।

विक्रीयेत्यादि। सुगमम्।

दोषादीन् व्याचष्टे—पण्यदोषो दोष इत्यादि। बहुगुणहीनं बहुगुणां मूल्यहानिं प्राप्तम्। आर्तकृतम् अस्वस्थमानसकृतम्। शेषं सुगमम्।

अनुशयकालेयत्तामाह—वैदेहकानामित्यादि। वृत्तिविक्रये स्वजीविकाहेतुभूतभूमिविक्रये। शेषं सुबोधम्।

आतिपातिकानामिति। कालपरिवासासहानां सद्योविक्रयाणां पण्यानां पुष्पक्षीरादीनाम्, अन्यत्राविक्रेयमिति परिवासदोषात् तथाविधं पण्यमन्यत्र विक्रेतुमर्हं न भवेदित्येतत् पर्यालोच्य, अविरोधेन तत्तत्पण्यरक्षानुकूल्येन, अनुशयो देयः। तस्यातिक्रम इत्यादि सुबोधम्। क्रीतानुशयमाह—क्रीत्वा पण्यमित्यादि। सुबोधम्। विक्रेत्रनुशयं क्रेतुरतिदिशति—समानश्चेत्यादि।

[वर्णभेदेन कन्याप्रतिनिवर्तनकाला:
अवधय:, उपाधयश्च]

विवाहानां तु त्रयाणां पूर्वेषां वर्णानां पाणिग्रहणासिद्धमुपावर्तनम्; शूद्राणां च प्रकर्मणः। वृत्तपाणिग्रहणयोरपि दोषम् औपशायिकं दृष्ट्वा सिद्धमुपावर्तनम्। न त्वेवाभिप्रजातयोः। कन्यादोषमौपशायिकमनाख्याय प्रयच्छतः कन्यां षण्णवतिर्दण्डः, शुल्कस्त्रीधनप्रतिदानं च। वरयितुर्वा वरदोषमनाख्याय विन्दतो द्विगुणः। शुल्कस्त्रीधननाशश्च ॥

[सामान्यतः स्वीकृतानां प्राणिनां
प्रतिनिवर्तने कालाः]

द्विपदचतुष्पदानां तु कुष्ठव्याधितानामशुचीनाम् उत्साहस्वास्थ्यशुचीनामाख्याने द्वादशपणो दण्डः। आ त्रिपक्षादिति चतुष्पदानामुपावर्तनम्; आ संवत्सरादिति मनुष्याणाम्। तावता हि कालेन शक्यं शौचाशौचौ ज्ञातुमिति ॥

श्रीमूला

विवाहानां त्विति। त्रयाणां पूर्वेषां वर्णानां ब्राह्मणक्षत्रियवैश्यानाम्, विवाहानां विवाहविषये, पाणिग्रहणासिद्धमुपावर्तनं पाणिग्रहणेनावरुद्धं पाणिग्रहणावधिकं कन्याप्रत्याहरणं भवति। पाणिग्रहणात् सिद्धमिति पाठे पाणिग्रहणमवधीकृत्येति ल्यब्लोपे पञ्चमी। शूद्राणां च, प्रकर्मणः योनिक्षतिमवधीकृत्य, उपावर्तनं भवति। वृत्तपाणिग्रहणयोरपीति। तथाभूतयोरपि स्त्रीपुंसयोः, दोषमौपशायिकम् उपशायिकासम्बद्धं दोषं योनिक्षतिक्लैब्यादिरूपं दृष्ट्वा साक्षात्कृत्य, सिद्धमुपावर्तनम्। न त्वेवाभिप्रजातयोरिति। जनितप्रजयोरुपावर्तनं नास्त्येव।

कन्यादोषमित्यादि। षण्णवति : षण्णवतिपणः। शुल्कस्त्रीधनप्रतिदानं च शुल्कस्त्रीधनयोर्गृहीतयोः प्रत्यर्पणं च।

वरयितुर्वेत्यादि। विन्दतः परिणयतः।

द्विपदचतुष्पदानां त्विति। तेषां, कुष्ठव्याधिताशुचीनाम्, उत्साहस्वास्थ्यशुचीनामाख्याने उत्साहस्वस्थत्वशुचित्वकथने, द्वादशपणो दण्डः।

आ त्रिपक्षादितीति। पक्षत्रयावधिकमित्येवं, चतुष्पदानामुपावर्तनम्। आ संवत्सरादिति संवत्सरावधिकमित्येवं, मनुष्याणामुपावर्तनम्। तावता हीत्यादि। शौचाशौचे दुष्टत्वमदुष्टत्वं च।

[निगमनम्]

दाता प्रतिग्रहीता च स्यातां नोपहतौ यथा ।
दाने क्रये वाऽनुशयं तथा कुर्युस्सभासदः ॥१४५॥

इति धर्मस्थीये विक्रीतक्रीतानुशयः, पञ्चदशोऽध्यायः,
आदितो द्विसप्ततितमः ।

श्रीमूला

अध्यायप्रान्ते श्लोकमाह—दातेत्यादि । कुर्युः व्यवस्थापयेयुः । सभासदः धर्मस्थाः । शेषं सुगमम् ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
पञ्चदशोऽध्यायः, विक्रीतक्रीतानुशयः,
आदितो द्विसप्ततितमः ।

अष्टषष्टितमैकोनसप्ततितमसप्ततितमानि प्रकरणानि

षोडशोऽध्यायः

दत्तस्यानपाकर्म, अस्वामिविक्रयः स्वस्वामिसम्बन्धश्च

[धर्मादिदत्तत्वेन व्यवहृतस्य अप्रदाने व्यवस्थाः]

दत्तस्याप्रदानमृणादानेन व्याख्यातम् । दत्तमव्यवहार्यमेकत्रानुशये वर्तेत । सर्वस्वं पुत्रदारम् आत्मानं प्रदायानुशयिनः प्रयच्छेत, धर्मदानमसाधुषु, कर्मसु चौपघातिकेषु वा; अर्थदानमनुपकारिषु अपकारिषु वा; कामदानमनर्हेषु च । यथा च दाता प्रतिग्रहीता च नोपहतौ स्यातां तथानुशयं कुशलाः कल्पयेयुः । दण्डभयादाक्रोशभयादनर्थभयाद्वा भयदानं प्रतिगृह्णतः स्तेयदण्डः प्रयच्छतश्च, रोषदानं परहिंसायाम् ।

श्रीमूला

दत्तस्यानपाकर्मेति सूत्रम् । 'तुभ्यमहं सम्प्रददे' इति प्रतिज्ञादिपूर्वं वाचा दत्तस्य अप्रदानमिति सूत्रार्थः । क्रयविक्रयविषयस्तावदनुशय उक्तः, धर्मादिदानविषयस्त्वधुनाभिधीयते ।

दत्तस्याप्रदानमिति । तद्, ऋणादानेन व्याख्यातम् ऋणादानवद् द्रष्टव्यम् । दत्तमनपाकृतम् ऋणमिव साक्ष्यादिभिर्विभाव्य ग्राह्यमित्यर्थः ।

अनुशयविषयं दत्तमाह—दत्तमव्यवहार्यमित्यादि । वाग्दत्तं व्यवहारायोग्यं चेद्, एकत्र अनुशये वर्तेत अनुशये एव केवले वर्तेत । न त्वनुशयात् कदापि मुच्येतेत्यर्थः । सर्वस्वं पुत्रदारम् आत्मानं प्रदाय, अनुशयिनः प्रयच्छेत् पुनर्दद्यात् सर्वस्वादिकम् । धर्मदानमसाधुष्विति । अनुशये वर्तेतेत्यनुवर्तते । साधव इति बुद्ध्या धर्मदानं तेषु प्रतिज्ञातम् असाधुत्वज्ञानानन्तरमनुशये वर्तेत । कर्मसु चौपघातिकेषु वेति । गोरक्षादिप्रशस्तकर्मार्थं धार्मिकत्वबुद्ध्या चोरपारदारिकादिषु कृतं धर्मदानम्, अनुशये वर्तेत । अर्थदानमनुपकारिष्वपकारिषु, वेति, उपकारित्वबुद्ध्यानुपकारिषु अपकारिषु वा कृतमर्थदानम्, अनुशये वर्तेत । कामदानमनर्हेषु चेति । कामनिमित्तं दानमनर्हेष्वर्हत्वबुध्या कृतमनुशये वर्तेत । यथा चेत्यादि सुगमम् ।

दण्डभयादिति । ताडनभयाद्, आक्रोशभयात् निन्दनभयाद्, अनर्थभयाद् वा रोगोन्मादाद्युत्पत्तिभयाद् वा, क्रियमाणं भयदानं, प्रतिगृह्णतः कृत्याभिचारादिवृत्तेः, प्रयच्छतश्च भीरोः स्तेयदण्डः । रोषदानं परहिंसायामिति । कोपदानं परमारणार्थं, प्रतिगृह्णतः प्रयच्छतश्च स्तेयदण्डः इति सम्बध्यते ।

राज्ञामुपरि दर्पदानं च—तत्रोत्तमो दण्डः ।

प्रातिभाव्यदण्डः शुल्कशेषम् आक्षिकं सौरिकं कामदानं च नाकामः पुत्रो दायादो वा रिक्थहरो दद्यात् । इति दत्तस्यानपाकर्म ॥

[अस्वामिविक्रये व्यवस्थाः]

अस्वामिविक्रयस्तु—नष्टापहृतमासाद्य स्वामी धर्मस्थेन ग्राहयेत् । देशकालातिपत्तौ वा स्वयं गृहीत्वोपहरेत् । धर्मस्थश्च स्वामिनमनुयुञ्जीत—'कुतस्ते लब्धम्' इति । स चेदाचारक्रमं दर्शयेत न विक्रेतारं, तस्य द्रव्यस्यातिसर्गेण मुच्येत । विक्रेता चेद्दृश्येत, मूल्यं स्तेयदण्डं च । स चेदपसारमधिगच्छेदपसरेत् आ अपसारक्षयादिति । क्षये मूल्यं स्तेयदण्डं च दद्यात् ।

श्रीमूला

राज्ञामुपरि दर्पदानं चेति, नृत्तगीतादिकलाकुशलेभ्यो राजभिः कृतात् पारितोषिकदानादधिकतरं पारितोषिकदानं च, कश्चित् कुर्याच्चेदिति शेषः । तत्र विषये उत्तमः उत्तमसाहसो दण्डः ।

प्रातिभाव्यमित्यादि । प्रातिभाव्यं वृथादानोपलक्षणं तद्, दण्डशुल्कशेषं दण्डशेषं शुल्कशेषं च, आक्षिकम् अक्षदेवनकृतमृणं, सौरिकं सुरापानकृतमृणं, कामदानं च नटनर्तकादिदत्तं च, रिक्थहरः पुत्रो दायादो वा, अकामा न दद्यात् । इति दत्तस्यानपाकर्मेति । व्याख्यातमिति शेषः ।

अस्वामिविक्रय इति सूत्रम् । अस्वामिकृतो विक्रयोऽस्वामिविक्रयः । सः तद्दण्डश्चाभिधीयते इति सूत्रार्थः । अस्वामिविक्रयस्त्विति । प्रतिपाद्यत इति शेषः । नष्टापहृतमिति । तद् द्रव्यम् आसाद्य कस्यचिद् वशे विद्यमानमुपलभ्य, स्वामी, धर्मस्थेन ग्राहयेद् अर्थाद् यस्य वशे द्रव्यं विद्यते तम् । धर्मस्थश्च, स्वामिनं सम्प्रति तद्द्रव्योपनेतारम्, अनुयुञ्जीत पृच्छेत्—कुतः ते त्वया लब्धमिति । स पृष्टो द्रव्यहस्तः, आचारक्रमं द्रव्यागमपरिपाटीं, दर्शयेति विभावयेच्चेत्, विक्रेतारं न दर्शयेत चेत्, तस्य द्रव्यस्य अतिसर्गेण स्वामिहस्तेऽर्पणेन, मुच्येत, न तु तस्य स्तेयदण्डः । विक्रेतेति । स चेद् दृश्येत, मूल्यं क्रेतुर्दद्यात्, स्तेयदण्डं च राज्ञे दद्यात् । स चेदिति । स विक्रेता अपसारमधिगच्छेच्चेत् अपराधिपदादात्मापसरणहेतुं विभावयेच्चेद् आत्मनो विक्रेतारमन्यं प्रदर्शयेच्चेदित्यर्थः, अपसरेद् अपक्रामेद् दण्डं विना । आपसारक्षयादितीति । अयमुत्तरोत्तरापसाराधिगमेनापसरणक्रमोऽपसारक्षयावधिकः सम्भवतीत्यर्थः । क्षये चरमोपलब्धस्य विक्रेतुरपसारानधिगमे सति, मूल्यं स्तेयदण्डं च दद्याद् अर्थात् स एव ।

नाष्टिकं च स्वकरणं कृत्वा नष्टप्रत्याहृतं लभेत । स्वकरणाभावे पञ्चबन्धो दण्डः । तच्च द्रव्यं राजधर्म्यं स्यात् । नष्टापहृतमनिवेद्योत्कर्षतः स्वामिनः पूर्वः साहसदण्डः ॥

शुल्कस्थाने नष्टापहृतोत्पन्नं तिष्ठेत् । त्रिपक्षादूर्ध्वमनभिसारं राजा हरेत्, स्वामी स्वकरणेन ।

पञ्चपणिकं द्विपदरूपस्य निष्क्रयं दद्यात् । चतुष्पणिकमेकखुरस्य; द्विपणिकं गोमहिषस्य; पादिकं क्षुद्रपशूनां; रत्नसारफल्गुकुप्यानां पञ्चकं शतं दद्यात् । परचक्राटवीभृतं तु प्रत्यानीय राजा यथास्वं प्रयच्छेत् । चोरहृतमविद्यमानं स्वद्रव्येभ्यः प्रयच्छेत् । प्रत्यानेतुमशक्तो वा; स्वयंग्राहेणाहृतं प्रत्यानीय तन्निष्क्रयं वा प्रयच्छेत् ।

श्रीमूला

नाष्टिकं चेति । नाष्टिकं नष्टवस्तुविषयं, स्वकरणं स्वत्वसाधकं साक्षिलेख्यादि, कृत्वा दर्शयित्वा, नष्टप्रत्याहृतं, लभेत । स्वकरणाभावे, पञ्चबन्धः तद्द्रव्यमूल्यपञ्चभागो दण्डः । तच्च द्रव्यं राजधर्म्यं राज्ञो न्यायप्राप्तं स्यात् ।

नष्टापहृतमिति । तद् द्रव्यम्, अनिवेद्य स्वयं गृह्णतः, स्वामिनः पूर्वः साहसदण्डः ।

शुल्कस्थान इति । तस्मिन्, नष्टापहृतोत्पन्नं, तिष्ठेत् स्थापितं भवेत् । त्रिपक्षादूर्ध्वम्, अनभिसारम् अभिसारोऽनुगामी तद्रहितं, राजा हरेत् । स्वामी वा स्वकरणेन स्वत्वविभावनेन हरेत् ।

नष्टापहृतोत्पन्नस्य द्विपदादेर्मोचननिष्क्रयमाह—पञ्चपणिकमिति । द्विपदरूपस्य द्विपदो दासीदासादिः तद्व्यक्तेरेकस्याः, पञ्चपणिकं निष्क्रयं दद्यात् । तावन्निष्क्रयदानेन द्विपदरूपं मोचयेत् । चतुष्पणिकम्, एकखुरस्य अश्वखरोष्ट्रादेः । द्विपणिकं गोमहिषस्य । पादिकं क्षुद्रपशूनाम् । रत्नसारफल्गुकुप्यानां पञ्चकं शतं शतस्य पञ्चभागं निष्क्रयं दद्यात् ।

परचक्राटवीहृतं त्विति । परचक्रेण आटविकेन द्विपदचतुष्पदादिकं, प्रत्यानीय राजा यथास्वं यथायथं प्रयच्छेत् । चोरहृतमविद्यमानं लुप्तं द्रव्यं, स्वद्रव्येभ्यः तज्जातीयेभ्यः, प्रयच्छेत् स्वामिने, राजा प्रत्यानेतुं चोरसकाशात् प्रत्याहर्तुम्, अशक्तो वा अशक्तश्चेत् । स्वयं ग्राहेण आत्मनिर्बन्धेन स्तेनग्रहणविषयेण अथवा स्तेनग्रहणाधिकृतेन, आहृतं प्रत्यानीय प्रयच्छेत् । तन्निष्क्रयं वा मुष्टद्रव्यमूल्यं वा प्रयच्छेत्, पूर्वोक्तासम्भवे ।

परविषयाद्वा विक्रमेणानीतं यथाप्रदिष्टं राज्ञा भुञ्जीतान्यत्रार्यप्राणेभ्यो देवब्राह्मणतपस्विद्रव्येभ्यश्च । इत्यस्वामिविक्रयः ॥

[स्वामिनः स्वत्वनिवृत्तिहेतवः,
तदपवादाश्च]

स्वस्वामिसम्बन्धस्तु—भोगानुवृत्तिरुच्छिन्नदेशानां यथास्वं द्रव्याणाम् । यत् स्वं द्रव्यमन्यैर्भुज्यमानं दशवर्षाण्युपेक्षेत हीयेतास्य अन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः विंशतिवर्षोपेक्षितम् अनुवसितं वास्तु नानुयुञ्जीत । ज्ञातयश्श्रोत्रियाः पाषण्डा वा राज्ञामसन्निधौ परवास्तुषु विवसन्तो न भोगेन हरेयुः, उपनिधिमाधिं निधिं निक्षेपं स्त्रियं सीमानं राजश्रोत्रियद्रव्याणि च ॥

[आश्रमिप्रभृतिषु परस्परसहानु-
भूतेरावश्यकता]

आश्रमिणः पाषण्डा वा महत्यवकाशे परस्परमबाधमाना वसेयुः ।

श्रीमूला

परविषयाद्वेति । शत्रुदेशाद्, विक्रमेण आनीतं सैनिकहृतं धनं, राज्ञा, यथाप्रदिष्टं यथाज्ञप्तं, भुञ्जीत । अन्यत्रार्यप्राणद्रव्येभ्यो देवब्राह्मणतपस्विद्रव्येभ्यश्चेति । आर्यंजीवितानां द्रव्याणि देवादीनां द्रव्याणि च तेभ्य एव पुनर्दापयेदित्यर्थः । इत्यस्वामिविक्रयः ।

स्वस्वामिसम्बन्ध इति सूत्रम् । स्वस्वामिनोः सम्बन्धः न्यायाधिगमलक्षणोऽभिधीयत इति सूत्रार्थः ।

स्वस्वामिसम्बन्धस्त्विति । अधिक्रियत इति शेषः । भोगानुवृत्तिरिति । उच्छिन्नदेशानाम् उच्छिन्नसाक्षिकाणां, द्रव्याणां, यथास्वं यथायथं, भोगानुवृत्तिः अविच्छिन्नो भोगः, स्वत्वे प्रमाणं भवतीति वाक्यशेषः ।

यदिति । यत् स्वं स्वीयं द्रव्यम् अन्यैर्भुज्यमानं, दशवर्षाणि उपेक्षेत, हीयेतास्य उपेक्षमाणस्य तद् द्रव्यं हीयेत । अन्यत्र बालेत्यादि । बालवृद्धव्याधितव्यसनिप्रोषितानां द्रव्यम् उपेक्षमाणानां न हीयेत, अबालादीनामपि द्रव्यं देशत्यागे राज्यविभ्रमे चोपेक्षमाणानां न हीयेत ।

विंशतिवर्षोपेक्षितमिति । तथाविधम्, अनुवसितम् अविच्छिन्नाध्युषितं, वास्तु गृहं, नानुयुञ्जीत न प्रार्थयेत । इह वसितपदे सम्प्रसारणाकरणमार्षम् ।

तत्रापवादमाह—ज्ञातय इत्यादि । अतिरोहितार्थम् । आश्रमिण इत्यादि । सुबोधम् ।

अल्पां बाधां सहेरन् । पूर्वागतो वा वासपर्यायं दद्यात् । अप्रदाता निरस्येत ॥

[वानप्रस्थादिधनभागिनः, विवादे व्यवस्थाश्च]

वानप्रस्थयतिब्रह्मचारिणाम् आचार्यशिष्यधर्मभ्रातृसमानतीर्थ्याः रिक्थभाजः क्रमेण । विवादपदेषु चैषां यावन्तः पणाः दण्डाः तावती रात्रीः क्षपणाभिषेकाग्निकार्यमहाकृच्छ्रवर्धनानि राज्ञश्चरेयुः । अहिरण्यसुवर्णाः पाषण्डास्साधवः, ते यथास्वमुपवासव्रतैराराधयेयुः अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणेभ्यः । तेषु यथोक्ता दण्डाः कार्याः ॥

———————

श्रीमूला

अल्पां बाधां सहेरन्निति । अमहति अवकाशे परस्परबाधमल्पं जायमानं क्षमेरन् । पूर्वागतो वा, वासपर्यायं वासवारं दद्यात् नवागताय । अप्रदाता पूर्वागतः, निरस्येत बहिष्क्रियेत ।

वानप्रस्थयतिब्रह्मचारिणामित्यादि । तत्र धर्मभ्राता सखा, समानतीर्थ्यः समानगुरुकुलवासी । क्रमेण आचार्याभावे शिष्यः शिष्याभावे धर्मभ्रातेत्यादिक्रमेण । शेषं प्रतीतम् ।

विवादपदेषु चैषामिति । व्युत्क्रमागतानामाचार्यादीनां विवादपदेषु रिक्थविषयेषु, यावन्तः पणाः दण्डाः पराजितानां शास्त्रोक्ताः तावतीः तत्समानसङ्ख्याः, रात्रीः, क्षपणाभिषेकाग्निकार्यमहाकृच्छ्रवर्धनानि क्षपणमुपवासः अभिषेकः स्नानम् अग्निकार्यं होमः महाकृच्छ्रं चान्द्रायणप्राजापत्यादिकं प्रशस्तव्रतं तैर्वर्धनानि श्रेयोयोजनानि, राज्ञश्चरेयुः राजार्थे कुर्युः, अर्थात् पराजिता आचार्यादयः । वर्तनानीति पाठे क्षपणादीनां महाकृच्छ्रान्तानां वर्तनानि अनुष्ठानानि राजार्थे कुर्युरित्यर्थः । अहिरण्यसुवर्णा इति । हिरण्यसुवर्णहीनाः, पाषण्डाः, साधवः धर्मशीलाः । ते कथञ्चिद् विवादपदेषु पराजयदण्डं प्राप्ता इत्यार्थं यथास्वम् उपवासव्रतैः, आराधयेयुः धर्ममुपासीरन् राजश्रेयोर्थे । तत्रापवादमाह—अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणेभ्य इति । वक्ष्यमाणवाक्पारुष्यदण्डपारुष्यस्तेयादिविवादव्यतिरेकेण । के तर्हि तेषां पारुष्यादिषु दण्डास्तत्राह—तेष्विति । तेषु विषये, यथोक्ताः पारुष्यादिप्रकरणोक्ताः, दण्डाः, कार्याः ।

[मिथ्याचारनिषेधस्यावश्यकता]

प्रव्रज्यासु वृथाचारान् राजा दण्डेन वारयेत् ।
धर्मो ह्यधर्मोपहतः शास्तारं हन्त्युपेक्षितः ॥१४३॥

इति धर्मस्थीये दत्तस्यानपाकर्म, अस्वामिविक्रयः,
स्वस्वामिसंबन्धश्च; षोडशोऽध्यायः ।
आदितस्त्रिसप्ततितमः ।

श्रीमूला

अध्यायान्ते श्लोकमाह—प्रव्रज्यास्वित्यादि । प्रव्रज्यासु वृथाचारान् चतुर्थाश्रमेषु मिथ्याचारान् । शेषं सुगमम् ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीयेतृतीयाऽधिकरणे षोडशोऽध्यायः
दत्तस्यानपाकर्म अस्वामिविक्रयः स्वस्वामिसम्बन्धः,
आदितस्त्रिसप्ततितमः ॥

एकसप्ततितमं प्रकरणम्

सप्तदशोऽध्यायः

साहसम्

[साहसस्तेययोर्भेदः]

साहसमन्वयवत्प्रसभकर्म । निरन्वये स्तेयम् अपव्ययने च ॥

[साहसस्य रत्नादिविषयकत्वे दण्डः]

'रत्नसारफल्गुकुप्यानां साहसे मूल्यसमो दण्डः' इति मानवाः । मूल्यद्विगुणः' इत्यौशनसाः । 'यथापराधः' इति कौटल्यः ॥

[साहसस्य क्षुद्रद्रव्यविषयकत्वे स्थूलद्रव्य-
विषयकत्वे च दण्डाः]

पुष्पफलशाकमूलकन्दपक्वान्नचर्मवेणुमृद्भाण्डादीनां क्षुद्रकद्रव्याणां द्वादशपणावरश्चतुर्विंशतिपणपरो दण्डः ।

श्रीमूला

साहसमिति सूत्रम् । बलात् क्रियमाणं परस्वहरणादि साहसम् । यदाह नारद :—

"सहसा क्रियते कर्म यत् किञ्चिद् बलदर्पितैः ।
तत् साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥" इति ।

तदुच्यत इति सूत्रार्थः । तद् गताध्याये प्रस्तुतम् । तस्य स्वरूपं दण्डश्चात्राभिधीयते ।

साहसमिति । अन्वयवत्प्रसभकर्म अन्वयः अनेकसाधारण्यं तद्वतोऽनेकसाधारणस्य द्रव्यस्य प्रसभकर्म एकेनानेकान्तर्गतेन बलादपहरणं साहसम् । निरन्वये असाधारणद्रव्ये परकीयद्रव्य इति यावत्, स्तेयं स्तेयव्यपदेश्यम् अर्थात् प्रसभहरणं प्रच्छन्नहरणं वा । अपव्ययने च परकीयं गृहीत्वा न गृहीतमित्यपलापे च विषये, स्तेयं भवति ।

रत्नसारफल्गुकुप्यानामित्यादि । मूल्यसमः रत्नादितत्तन्मूल्यतुल्यः । यथापराधः अपराधानुरूपः । शेषं सुगमम् ।

पुष्पफलेत्यादि । पुष्पादिषट्कं प्रतीतं चर्मभाण्डं वेणुभाण्डं मृद्भाण्डं चेति त्रिकम् एतदादीनां क्षुद्रकद्रव्याणां, साहसे, द्वादशपणावरश्चतुर्विंशतिपणपरो दण्डः द्वादशपणोऽधमदण्डः चतुर्विंशतिपण उत्तमदण्डः ।

कालायसकाष्ठरज्जुद्रव्यक्षुद्रपशुपटादीनां स्थूलकद्रव्याणां चतुर्विंशति-पणावरोऽष्टचत्वारिंशत्पणपरो दण्डः । ताम्रवृत्तकंसकाचदन्तभाण्डादीनां स्थूलकद्रव्याणाम् अष्टचत्वारिंशत्पणावरः षण्णवतिपरः पूर्वस्साहसदण्डः । महापशुमनुष्यक्षेत्रगृहहिरण्यसुवर्णसूक्ष्मवस्त्रादीनां स्थूलकद्रव्याणां द्विशतावरः पञ्चशतपरः मध्यमस्साहसदण्डः । 'स्त्रियं पुरुषं वाऽभिपद्य बध्नतो बन्धयतो बन्धं वा मोक्षयतः पञ्चशतावरः सहस्रपर उत्तमः साहसदण्डः' इत्याचार्याः ॥

[साहसकर्मकारयितॄणां दण्डः]

यस्साहसं प्रतिपत्तेति कारयति स द्विगुणं दद्यात् । यावद्धिरण्यमुपयोक्ष्यते तावद्दास्यामि' इति स चतुर्गुणं दण्डं दद्यात् ।

"यः–'एतावद्धिरण्यं दास्यामि' इति प्रमाणमुद्दिश्य कारयति स यथोक्तं हिरण्यं दण्डं च दद्यात्" इति बार्हस्पत्याः ॥

———

श्रीमूला

स्थूलकद्रव्याणां दण्डमाह—कालायसेत्यादि । ताम्रवृत्तेत्यादि । ताम्रभाण्ड-वृत्तभाण्डकंसभाण्डकाचभाण्डगजदन्तभाण्डादीनां स्थूलकद्रव्याणां, साहसे, अष्टचत्वा-रिंशत्पणावरः षण्णवतिपरः, दण्ड इति वर्तते, तत्र षण्णवतिपणदण्डः, पूर्वः साहसदण्डः पूर्वसाहसाख्यः । महापशुमनुष्येत्यादि । महापशुमनुष्यक्षेत्रप्रभृतीनां स्थूलकद्रव्याणां, साहसे, द्विशतावरः द्विशतपणाधमः पञ्चशतपरः पञ्चशतपणोत्तमः दण्डः । स च पञ्च-शतपणः मध्यमः साहसदण्डः ।

स्त्रियमित्यादि । तां, पुरुषं वा, अभिपद्य प्रसह्य बध्नतः, बन्धयतः, बन्धं वा मोक्षयतः, पञ्चशतावरः पञ्चशतपणाधमः सहस्रपरः सहस्रपणोत्तमः दण्डः । स च उत्तमः साहसदण्डो नाम्ना । इत्याचार्याः मन्यन्त इति शेषः ।

य इति । यः, साहसं, प्रतिपत्तेति 'अहमभ्युपगन्ते'त्युक्त्वा, कारयति, सः द्विगुणं साहसार्थद्विगुणं दण्डं दद्यात् । 'यावत् हिरण्यमुपयोक्ष्यते साहसकरणार्थे तावद् दास्यामि' इत्युक्त्वा यः साहसं कारयति, सः चतुर्गुणं साहसार्थचतुर्गुणं, दण्डं दद्यात् ।

य इति । 'एतावद् हिरण्यं दास्यामि' इति प्रमाणं साहसार्थदेयद्रव्येयत्ताम्, उद्दिश्य निर्दिश्य, कारयति, स यथोक्तं हिरण्यं, दण्डं च दद्यात् । इति बार्हस्पत्याः ।

'स चेत्कोपं मदं मोहं चाऽपदिशेत्, यथोक्तवद्दण्डमेनं कुर्यात्' इति कौटल्यः ॥

[निगमनम्]

दण्डकर्मसु सर्वेषु रूपमष्टपणं शतम् ।
शतावरेषु तु व्याजीं च विद्यात् पञ्चपणं शतम् ॥१४७॥
प्रजानां दोषबाहुल्यात् राज्ञां वा भावदोषतः ।
रूपव्याज्यावधर्मिष्ठे धर्म्या तु प्रकृतिः स्मृता ॥१४८॥

इति धर्मस्थीये साहसं सप्तदशोऽध्यायः,
आदितश्चतुस्सप्ततितमः

श्रीमूला

स्वमतमाह—स इति । सः कारयिता, कोपं, मदं चित्तविभ्रमं, मोहम् अज्ञानं वा, अपदिशेच्चेत् कारणायां हेतुं कथयेच्चेद्, एनं कारयितारं, यथोक्तवद्दण्डं कर्तृसमानदण्डं कुर्यात् । इति कौटल्यः ।

अध्यायप्रान्ते श्लोकावाह—दण्डकर्मस्वित्यादि । सर्वेषु दण्डकर्मसु दण्डविधिषु, रूपं तत्संज्ञं दण्डादुपरि नियतग्राह्यं द्रव्यं, विद्यात् जानीयात् । रूपं कियद्, अष्टपणं शते दण्डपणशतेऽष्टपणात्मकम् । शतावरेषु शतन्यूनेषु दण्डकर्मसु, व्याजीं तत्संज्ञं दण्डद्रव्यादुपरि नियतग्राह्यं द्रव्यं, विद्यात् । व्याजीं किमात्मिकां, पञ्चपणं शते शते पञ्चपणात्मिकाम् । शतमिति मान्तपाठश्चिन्त्यः ॥

प्रजानामिति । तासां, दोषबाहुल्यान्निमित्ताद्, राज्ञां वा भावदोषतः तासामदुष्टत्वेऽपि राज्ञां धनलिप्सालक्षणचित्तवृत्तिदोषान्निमित्ताद् वा, कल्प्यमाने इति शेषः, रूपव्याज्यौ अधर्मिष्ठे धर्मिष्ठे न भवतः । अतस्तदकल्पनानुकूलं राजभिः प्रजाभिश्चाचरितव्यमित्याभिप्रायः । अत एवाह—धर्म्या तु प्रकृतिः स्मृतेति । यथाविहितो दण्ड एव तु धर्म्यः स्मृतिषु कथितः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
सप्तदशोऽध्यायः, साहसम्,
आदितश्चतुःसप्ततितमः ॥

द्विसप्ततितमं प्रकरणम्

अष्टादशोऽध्यायः

वाक्पारुष्यम्

[वाक्पारुष्यस्य त्रेधा विभागः]

वाक्पारुष्यम्—उपवादः कुत्सनमभिभर्त्सनमिति ।

[तत्र शरीरोपवादे दण्डाः]

शरीरप्रकृतिश्रुतवृत्तिजनपदानां शरीरोपवादेन काणखञ्जादिभिस्सत्ये त्रिपणो दण्डः, मिथ्योपवादे षट्पणो दण्डः ।

[कुत्सने दण्डाः, तस्य सत्यादि-
विषयकत्वे प्रमाणानि च]

शोभनाक्षिदन्त इति काणखञ्जादीनां स्तुतिनिन्दायां द्वादशपणो दण्डः । कुष्ठोन्मादक्लैब्यादिभिः कुत्सायां च ।

श्रीमूला

वाक्पारुष्यमिति सूत्रम् । वक्तव्यवचनं वाक्पारुष्यम् । तच्च तद्दण्डश्चाभिधीयत इति सूत्रार्थः ।

तत् त्रिधा विभजते—वाक्पारुष्यमित्यादि । उपवादोऽङ्गवैकल्यादिवचनं, कुत्सनं कुष्ठोन्मादादिवचनम्, अभिभर्त्सनं घातादिभयोपदर्शनम् ।

शरीरेत्यादि । शरीरं प्रकृतिः स्त्रीपुरुषादिलक्षणा श्रुतं वृत्तिर्जनपद इति पञ्च विषया वाक्पारुष्यस्य, तेषां शरीरादीनां मध्ये, काणखञ्जादिभिः काण एकदृक् खञ्जः कोलः आदिना कुणिदन्तुरादिग्रहणम् । एतैः काणखञ्जकुणिशब्दैः शरीरोपवादेन, सत्ये काणत्वादौ यथार्थे सति त्रिपणो दण्डः । मिथ्योपवादे षट्पणो दण्डः ।

शोभनाक्षिदन्त इतीति । शोभनाक्षः शोभनदन्त इति रीत्या, काणखञ्जादीनां, स्तुतिनिन्दायां स्तुतिव्याजेन निन्दायां कृतायां, द्वादशपणो दण्डः ।

कुत्सनविषयमाह—कुष्ठोन्मादक्लैब्यादिभिः कुत्सायां चेति । कुष्ठी उन्मत्तः क्लीब इत्यादिप्रकारेण कुत्सने च, द्वादशपणो दण्ड इति वर्तते । सत्यमिथ्यास्तुतिनिन्दासु कुष्ठादिसत्यत्वे तन्मिथ्यात्वे कुष्ठ्यादीन् प्रति कल्य इत्यादिरीत्या स्तुति-

सत्यमिथ्यास्तुतिनिन्दासु द्वादशपणोत्तरा दण्डाः तुल्येषु, विशिष्टेषु द्विगुणः, हीनेष्वर्धदण्डः, परस्त्रीषु द्विगुणः, प्रमादमदमोहादिभिरर्धदण्डाः ।

कुष्ठोन्मादयोश्चिकित्सकाः सन्निकृष्टाः पुमांसश्च प्रमाणम् । क्लीबभावे स्त्रियः मूत्रफेनः अप्सु विष्ठानिमज्जनं च ।

[प्रकृत्युपवादे दण्डाः]

प्रकृत्युपवादे ब्राह्मणक्षत्रियवैश्यशूद्रान्तावसायिनामपरेण पूर्वस्य त्रिपणोत्तराः दण्डाः, पूर्वेणापरस्य द्विपणाधराः, कुब्राह्मणादिभिश्च कुत्सायाम् ।

[श्रुताद्युपवादेषु दण्डाः]

तेन श्रुतोपवादो वाग्जीवनानां, कारुकुशीलवानां वृत्त्युपवादः, प्राग्घूणकगान्धारादीनां च जनपदोपवादाश्च व्याख्याताः ।

श्रीमूला

निन्दायां च, द्वादशपणोत्तराः उत्तरोत्तरद्वादशपणाधिकाः द्वादशपणश्चतुर्विंशतिपणः षट्त्रिंशत्पणः इत्येवंरुपाः दण्डाः भवन्ति, तुल्येषु समानेषु विषये । विशिष्टेषु गुणाधिकेषु विषये, द्विगुणः दण्डः । हीनेषु अर्धदण्डः । परस्त्रीषु विषये द्विगुणः । प्रमादमदमोहादिभिः कुत्सायाम् अर्धदण्डाः उक्ताः सर्वे दण्डा अर्धहीनाः ।

कुत्सनस्य सत्यासत्यविषयत्वनिर्णयप्रमाणापेक्षायामाह—कुष्ठोन्मादयोश्चिकित्सका इत्यादि । क्लीबभावे, स्त्रियः, मूत्रफेनः अनुपलभ्यमानो मूत्रे फेनः, अप्सु विष्ठानिमज्जनं च, प्रमाणम् ।

प्रकृतिविषयस्योपवादस्य दण्डमाह—प्रकृत्युपवादे ब्राह्मणक्षत्रियवैश्यशूद्रान्तावसायिनामपरेण पूर्वस्येत्यादि । अन्तावसायिना चण्डालेन शूद्रस्य, शूद्रेण वैश्यस्य, वैश्येन क्षत्रियस्य क्षत्रियेण ब्राह्मणस्य चोपवादे, उत्तरोत्तरत्रिपणाधिकाः दण्डाः । पूर्वेण अपरस्य उपवादे द्विपणाधराः उत्तरोत्तरद्विपणावराः दण्डाः । कुब्राह्मणादिभिश्च कुत्सायां, द्विपणाधरा इत्येव ।

प्रकृत्युपवाददण्डविधानं श्रुतोपवादादिष्वतिदिशति—तेनेति । उक्तेन प्रकृत्युपवादेन, वाग्जीवनानां श्रुतोपवादः विद्याकुत्सनं, कारुकुशीलवानां वृत्त्युपवादः जीविकाकुत्सनं, प्राग्घूणकगान्धारादीनां हूणका नाम जनपदविशेषः कामगिर्युत्तरतोवृत्तिरुदीच्यः तस्य पूर्वावयवः प्राग्घूणकाः भाषायां तु 'चण्डा(ल)राष्ट्रमित्युक्तम् । गान्धाराः प्रसिद्धाः तदादीनां जनपदोपवादाश्च जनपददोषोद्भावनेन कुत्सनानि च, व्याख्याताः । प्राग्घूणकेति चायं भाषापाठः । अर्थशास्त्रस्यादर्शे तु क्वचित् प्राकारणकारयोर्मध्ये वर्णस्यैकस्य लेखनस्थानमुत्सृष्टम् । क्वचित् प्राणकेति पाठः ।

[अभिभर्त्सने दण्डाः]

यः परं 'एवं त्वां करिष्यामि' इति करणेनाभिभर्त्सयेदकरणे, यस्तस्य करणे दण्डः ततोऽर्धदण्डं दद्यात् ।

अशक्तः कोपं मदं मोहं वाऽपदिशेत्, द्वादशपणं दद्यात् ।

जातवैराशयः शक्तश्चापकर्तुं यावज्जीविकायस्थं दद्यात् ।

[सर्वेषामपि वाक्पारुष्याणां
विषयभेदेन दण्डभेदाः]

स्वदेशग्रामयोः पूर्वं मध्यमं जातिसङ्घयोः ।
आक्रोशाद्देवचैत्यानां उत्तमं दण्डमर्हति ॥१४९॥

इति धर्मस्थीये वाक्पारुष्यम्, अष्टादशोऽध्यायः,
आदितः पञ्चसप्ततितमः ।

श्रीमूला

अभिभर्त्सनविषयमाह—य इति । यः परम् अन्यम्, 'एवं त्वां करिष्यामि' इति 'तव पादं भङ्क्ष्यामि भुजं भङ्क्ष्यामी'त्येवं, करणेन शरीरावयवेन, अभिभर्त्सयेत् तर्जयेत्, अकरणे उक्तस्याक्रियायां, तस्य अभिभर्त्सकस्य, करणे यो दण्डः 'पाणिपाद-दन्तभङ्गे' इत्यादिना दण्डपारुष्ये वक्ष्यमाणः, ततोऽर्धदण्डं दद्यात् ।

अशक्त इति । उक्तपादभङ्गादिकरणाशक्तः, कोपं मदं मोहं वा, अपदिशेत् पादभङ्गादेरुक्तिकारणं वदेच्चेद्, द्वादशपणं दण्डं स दद्यात् । शक्तस्यकोपाद्यपदेशो न स्वीकार्यं इत्यभिप्रायः ।

जातवैराशय इति । तथाभूतः, अपकर्तु शक्तश्च जनः, उक्तविधमभिभर्त्सनं कुर्वन्निति शेषः, यावज्जीविकावस्थं यावज्जीवस्थेयम् आस्वमरणप्रतिभुवं, दद्याद् धर्मस्थेभ्य इत्यार्थम् ।

अध्यायान्ते श्लोकमाह—स्वदेशग्रामयोरिति । तयोः, आक्रोशात् निन्दनात् पूर्वं दण्डं पूर्वसाहसम् अर्हति । जातिसङ्घयोः अर्थात् स्वीययोः, आक्रोशात् मध्यमं मध्यमसाहसं दण्डम्, अर्हति । देवचैत्यानाम् आक्रोशाद् उत्तमम् उत्तमसाहसं दण्डम्, अर्हति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
अष्टादशोऽध्यायः, वाक्पारुष्यम्
आदितः पञ्चसप्ततितमः ।

त्रिसप्ततितमं प्रकरणम्

एकोनविंशोऽध्यायः

दण्डपारुष्यम्

[दण्डपारुष्यभेदाः]

दण्डपारुष्यम्—स्पर्शनमवगूर्णं प्रहतमिति ।

[स्पर्शने दण्डाः]

नाभेरधःकायं हस्तपङ्कभस्मपांसुभिरिति स्पृशतस्त्रिपणो दण्डः । तैरेवामेध्यैः पादष्ठीवनिकाभ्यां च षट्पणः, छर्दिमूत्रपुरीषादिभिर्द्वादशपणः । नाभेरुपरि द्विगुणाः, शिरसि चतुर्गुणाः समेषु । विशिष्टेषु द्विगुणाः, हीनेषु अर्धदण्डाः, परस्त्रीषु द्विगुणाः, प्रमादमदमोहादिभिरर्धदण्डाः । पादवस्त्रहस्तकेशावलम्बनेषु षट्पणोत्तरा दण्डाः पीडनावेष्टनाञ्जनप्रकर्षणाध्यासनेषु पूर्वस्साहसदण्डः । पातयित्वाऽपक्रामतोऽर्धदण्डाः ।

श्रीमूला

दण्डपारुष्यमिति सूत्रम् । दण्डग्रहणं हस्तादेरप्युपलक्षणम् । दण्डहस्तादिभिः प्रहरणमिति सूत्रार्थः ।

तस्य त्रीन् प्रकारानाह—दण्डपारुष्यमिति । स्पर्शनं केवलं परामर्शनम्, अवगूर्णनम् उद्यमनं, प्रहतं ताडनम् ।

नाभेरित्यादि । तस्य, अधःकायं हस्तपङ्कभस्मपांसुभिः तत्प्रकारैश्च स्पृशतः त्रिपणो दण्डः ।

तैरेवामेध्यैरिति । हस्तादिभिरेवाशुद्धैः, स्पृशतः, पादष्ठीविकाभ्यां च पादेन मुखकफादिनिरसनेन च, स्पृशतः, षट्पणः । छर्दीत्यादि स्पष्टम् ।

समेषु दण्डमुक्त्वा उत्कृष्टादिष्वाह—विशिष्टेष्वित्यादि ।

पादेत्यादि । पादादीनां ग्रहणेषु, षट्पणोत्तराः यथोत्तरं षट्पणाधिकाः पादग्रहणे षट् वस्त्रग्रहणे द्वादश हस्तग्रहणेऽष्टादश केशग्रहणे चतुर्विंशतिरिति रीत्या दण्डाः ।

पीडनावेष्टनाञ्जनप्रकर्षणाध्यासनेष्वित्यादि । अवमर्दने परिवेष्टने कज्जलादिलेपने भूप्रकर्षणे देहोपर्यारुह्योपवेशने च पूर्वः साहसदण्डः । पातयित्वापक्रमतः भूमौ निपात्यापक्रमणाद्, अर्धदण्डः अर्धप्रथमसाहसदण्डः ।

शूद्रो येनाङ्गेन ब्राह्मणमभिहन्यात् तदस्य छेदयेत् ।

[हस्तादिना प्रहर्तुमुद्यमने दण्डाः]

अवगूर्णे निष्क्रयः, स्पर्शेऽर्धदण्डः । तेन चण्डालाशुचयो व्याख्याताः ।

हस्तेनावगूर्णे त्रिपणावरो द्वादशपणपरो दण्डः । पादेन द्विगुणः । दुःखोत्पादनेन द्रव्येण पूर्वस्साहसदण्डः । प्राणाबाधिकेन मध्यमः ।

[प्रहरणदण्डाः]

काष्ठलोष्टपाषाणलोहदण्डरज्जुद्रव्याणामन्यतमेन दुःखमशोणितमुपादधतश्चतुर्विंशतिपणो दण्डः । शोणितोत्पादने द्विगुणः अन्यत्र दुष्टशोणितात् । मृतकल्पमशोणितं घ्नतो हस्तपादपराञ्चिकं वा कुर्वतः पूर्वस्साहसदण्डः । पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे च अन्यत्र दुष्टव्रणेभ्यः ।

श्रीमूला

शूद्र इत्यादि स्पष्टम् । अवगूर्ण इति । हस्ताद्यङ्गोद्यमने, निष्क्रयः एकाङ्गवधनिष्क्रयः कण्टकशोधने वक्ष्यमाणो दण्डः । स्पर्शे उद्यतहस्तादिना स्पर्शनमात्रे, अर्धदण्डः अर्धनिष्क्रयः । तेन उक्तविधिना, चण्डालाशुचयः चण्डालप्रभृतयोऽशुचयः अर्थाद् ब्राह्मणाभिहननं स्वाङ्गेन कुर्वाणाः, व्याख्याताः विहितदण्डा वेदितव्याः । अनया रीत्या तेषामपि दण्डा यथोचितमूह्या इत्यर्थः ।

अवगूर्णविधिमाह—हस्तेनेत्यादि । करेण अवगूर्णे उद्यमने, त्रिपणावरो द्वादशपणपरो दण्डः । पादेनावगूर्णे, द्विगुणः चतुर्विंशतिपणः । दुःखोत्पादकेन द्रव्येण कण्टकादिना, अवगूर्णे, पूर्वः साहसदण्डः । प्राणाबाधिकेन प्राणबाधाकरेण सर्पादिना अवगूर्णे, मध्यमः साहसः ।

काष्ठेत्यादि । काष्ठादीनां षण्णामन्यतमेन, दुःखम् अशोणितम् अरक्तम्, उत्पादयतः, चतुर्विंशतिपणो दण्डः । शोणितोत्पादने द्विगुणः अष्टाचत्वारिंशत्पणः । अन्यत्र दुष्टशोणिताद् दुष्टशोणितातिरिक्ते विषये, कुष्ठादिदुष्टशोणितोत्पादने तु न द्विगुणः, किन्तु अर्धमौचित्यात् ।

मृतकल्पमिति । मृततुल्यत्वं यथा भवेत् तथा, अशोणितम् अरक्तं, घ्नतः, हस्तपादपराञ्चिकां हस्तस्य पादस्य वा पराञ्चिकां पराञ्चनम् अन्यथाभावं सन्धिविघटनमिति यावत् । परोपमृष्टादञ्चेर्धात्वर्थनिर्देशे ण्वुल् । पारञ्चिकमिति पाठे त्वर्थव्युत्पत्ती चिन्त्ये । तां वा कुर्वतः, पूर्वः साहसदण्डः । पाणिपादेत्यादि । पाण्यादिभङ्गे कर्णनासाच्छेदने, दुष्टव्रणव्यतिरेकेण व्रणानामुद्भेदने च, पूर्वः साहसदण्ड इति वर्तते ।

सक्थिग्रीवाभञ्जने नेत्रभेदने वा वाक्यचेष्टाभोजनोपरोधेषु च मध्यमस्साहसदण्डः, समुत्थानव्ययश्च, विपत्तौ कण्टकशोधनाय नीयेत ।

महाजनस्यैकं घ्नतः प्रत्येकं द्विगुणो दण्डः ।

[अतीतकलहादिविषये दुःखनिवेदनागमन-
पौर्वापर्यविषये च मतभेदाः]

'पर्युषितः कलहोऽनुप्रवेशो वा नाभियोज्यः' इत्याचार्याः 'नास्त्यपकारिणो मोक्षः' इति कौटल्यः ।

'कलहे पूर्वागतो जयति, अक्षममाणो हि प्रधावति' इत्याचार्याः । 'न' इति कौटल्यः । पूर्वं पश्चाद्वा आगतस्य साक्षिणः प्रमाणम् असाक्षिके घातः कलहोपलिङ्गनं वा । घाताभियोगमप्रतिब्रुवतस्तदहरेव पश्चात्कारः ।

श्रीमूला

सक्थीत्यादि । ऊरुकण्ठभङ्गे नेत्रभेदने वा वचनसञ्चरणाभ्यवहरणशक्तिप्रतिबन्धेषु च मध्यमः साहसदण्डः । समुत्थानव्ययश्च यथावत्कार्यक्रियापाटवं समुत्थानं तत्प्रत्यापत्त्यर्थो व्ययश्च, अपराधिना देयः । विपत्ताविति । मरणे, कण्टकशोधनाय कण्टकशोधनोक्तविधानाय, नीयेत ।

महाजनस्येति । जनसमूहस्य, एकं जनं, घ्नतः, प्रत्येकं द्विगुणो दण्डः एकस्यैकं घ्नतो यो दण्डस्तद्द्विगुणो दण्डः ।

पर्युषित इति । चिरातीतः, कलहः, अनुप्रवेशो वा हृतद्रव्यायत्तीकरणं वा, नाभियोज्यः अभियोक्तुमर्हो न भवति । इत्याचार्याः ।

कलहानुप्रवेशलक्षणापराधकारिणः अपराधः पर्युषित इत्येतावता मोक्षणं न भवति, किन्तु चिरादपि सोऽभियोज्य एवेत्येवं स्वमतमाह—नास्त्यपकारिण इत्यादि ।

कलह इति । कलहे, पूर्वागतः पूर्वविदकः, जयति । कुतः हि यतः, अक्षममाणः प्रधावति परकृतमावाधमसहमानो धर्मस्थायावेदयितुं त्वरितः पूर्वं गच्छति, अर्थात् पश्चादागतः पराजयते । इत्याचार्याः ।

नेति कौटल्य इति । पूर्वागमनं पश्चादागमनं वा यत्किञ्चित्करं, किं तर्हि तत्त्वनिर्णयसाधनमित्याकाङ्क्षायामाह—पूर्वं पश्चाद्वेत्यादि । असाक्षिके घातः कलहोपलिङ्गनं वेति । साक्ष्यभावे घातदर्शनेन तत्त्वनिर्णयः घातादर्शने लिङ्गैः कलहस्याभ्यूहनम् ।

घाताभियोगमिति । घातविषयमभियोगं, तदहरेव तस्मिन्नेव दिने, अप्रतिब्रुवतः, पश्चात्कारः पराजयः ।

[मनुष्यहिंसने हिंसकद्रव्यभेदेन दण्डभेदाः]

कलहे द्रव्यमपहरतो दशपणो दण्डः। क्षुद्रकद्रव्यहिंसायां तच्च तावच्च दण्डः। स्थूलकद्रव्यहिंसायां तच्च द्विगुणश्च दण्डः। वस्त्राभरणहिरण्यसुवर्णभाण्डहिंसायां तच्च पूर्वश्च साहसदण्डः। परकुड्यमभिघातेन क्षोभयतस्त्रिपणो दण्डः। छेदनभेदने षट्पणः पातनभञ्जने द्वादशपणः प्रतीकारश्च। दुःखोत्पादनं द्रव्यमन्यवेश्मनि प्रक्षिपतो द्वादशपणो दण्डः, प्राणाबाधिकं पूर्वस्साहसदण्डः।

[पशुहिंसायां दण्डभेदाः]

क्षुद्रपशूनां काष्ठादिभिर्दुःखोत्पादने पणो द्विपणो वा दण्डः। शोणितोत्पादने द्विगुणः। महापशूनामेतेष्वेव स्थानेषु द्विगुणो दण्डः, समुत्थानव्ययश्च।

[वृक्षादिच्छेदने दण्डभेदाः]

पुरोपवनवनस्पतीनां पुष्पफलच्छायावतां प्ररोहच्छेदने षट्पणः। क्षुद्रशाखाच्छेदने द्वादशपणः। पीनशाखाच्छेदने चतुर्विंशतिपणः। स्कन्धवधे पूर्वस्साहसदण्डः। समुच्छित्तौ मध्यमः।

श्रीमूला

कलह इत्यादि। कलहायमानयोर्द्वयोर्द्रव्यमपहरतोऽन्यस्य दशपणो दण्डः। अपहृतद्रव्यप्रत्यानयनं तु सिद्धमेव। इह 'द्विशतपणो दण्डः' इति तु भाषानुसारेण पाठोऽनुमेयः।

क्षुद्रकेत्यादि। क्षुद्रकद्रव्यहिंसायां क्षुद्रकद्रव्याणां पुष्पफलादीनां हिंसायां कलहकारिभिरुपहनने, तच्च हिंसितं क्षुद्रद्रव्यं च स्वामिने देयमिति शेषः। तावच्च तत्परिमाणं द्रव्यं च दण्डो भवति।

स्थूलकेत्यादि। कालायसादिस्थूलकद्रव्यहिंसायां, तच्च, द्विगुणः तद्द्रव्यद्विगुणो दण्डश्च।

वस्त्राभरणेत्यादि शोणितोत्पादने द्विगुण इत्येतदन्तं सुबोधम्। 'पातनभञ्जने द्वादशपणः' इति क्वचिन्न पठ्यते।

महापशूनामिति। गवादीनाम्, एतेष्वेव स्थानेषु दुःखोत्पादनादिषु क्षुद्रपशूकेषु विषयेषु द्विगुणो दण्डः। समुत्थानव्ययश्च तत्स्वस्थीकरणार्थो व्ययश्च देयः।

पुरोपवनेत्यादि। प्ररोहच्छेदने पल्लवच्छेदने, स्कन्धवधे प्रधानभञ्जने। समुच्छित्तौ उन्मूलने। शेषं स्पष्टम्।

पुष्पफलच्छायावद्गुल्मलतास्वर्धदण्डः। पुण्यस्थानतपोवनश्मशान-द्रुमेषु च।

सीमवृक्षेषु चैत्येषु द्रुमेष्वालक्षितेषु च।
त एव द्विगुणा दण्डाः कार्या राजवनेषु च ॥१५०॥

इति धर्मस्थीये दण्डपारुष्यम्, एकोनविंशोऽध्यायः,
आदितष्षट्सप्ततितमः।

श्रीमूला

पुष्पफलच्छायावद्गुल्मलतास्विति। पुष्पादिमत्सु स्तम्बेषु वल्लीषु च विषये प्ररोहच्छेदनादौ, अर्धदण्डः वनस्पत्युक्तदण्डस्यार्धम्। पुण्यस्थानतपोवनश्मशानद्रुमेषु च, अर्धदण्ड इति संबध्यते।

सीमवृक्षेष्वित्यादिरध्यायान्तश्लोकः सुबोधः॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे,
एकोनविंशोऽध्यायः, दण्डपारुष्यम्,
आदितः षट्सप्ततितमः॥

चतुःसप्ततिपञ्चसप्ततितमे प्रकरणे

विंशोऽध्यायः

द्यूतसमाह्वयं प्रकीर्णकानि च

[सदेशकालव्यवस्थं द्यूतप्रवर्तनावश्यकता]

द्यूताध्यक्षो द्यूतमेकमुखं कारयेत् । अन्यत्र दीव्यतो द्वादशपणो दण्डः; गूढाजीविज्ञापनार्थम् ।

[जेतृपराजितयोः दण्डविशेषाः]

द्यूताभियोगे जेतुः पूर्वस्साहसदण्डः । पराजितस्य मध्यमः । बालिशजातीयो ह्येष जेतुकामः पराजयं न क्षमते' इत्याचार्याः । 'न' इति

श्रीमूला

द्यूतसमाह्वयमिति सूत्रम् । द्यूतम् अक्षशलाकाद्यप्राणिक्रीडा समाह्वयो मल्लमेषकुक्कुटादिप्राणिदेवनं तयोः समाहारो द्यूतसमाह्वयं, तत्संबद्धो व्यवहारो दण्डश्चाभिधीयत इति सूत्रार्थः । पारुष्यप्रसङ्गात् सर्वविधपारुष्यविसंवादादिदोषनिदानस्यास्येह कथनसङ्गतिः ।

द्यूताध्यक्ष इति । सः, द्यूतम् एकमुखम् एकमार्गम् एकस्मिन् प्रदेशे इत्यर्थः, कारयेत् । अन्यत्र प्रदेशान्तरे, दीव्यतः द्वादशपणो दण्डः । ननु च द्यूतमेव तावन्निन्दितं प्रतिषिद्धं च शास्त्रेषु—

'प्रकाशमेतत् तास्कर्यं यद् देवनसमाह्वयम्' इति,

'प्रच्छन्नं वा प्रकाशं वा द्यूत राष्ट्रे निवारयेद्' ।

इति च स्मृतौ, 'अक्षैर्मा दीव्यः' इति चाम्नाये । तत् कुतोऽस्य प्रवर्तनविधिः कुतस्तरां चैकमुखत्वनियमनमित्याशङ्कामपाकर्तुमेकमुखत्वनियमस्य प्रयोजनमाह— गूढाजीविज्ञापनार्थमिति । गूढाजीविनस्तस्करसाहसिकादयो लोककण्टकाः तज्ज्ञापनार्थम् । अयमाशयः—प्रतिषेधातिक्रमेण प्रवृत्तौ श्येनादिवदयं द्यूतसमाह्वयस्य विधिः । तच्च लोककण्टकप्रायजनभूयिष्ठसेव्यं सुरापानवदधर्मरूपमप्येकमुखतया प्रवर्त्यमानं कण्टकज्ञानसाधनीभूय तदुद्धरणरूपधर्मान्तरोपायतां प्रतिपद्यत इति तदेकमुखत्वनियमोऽप्युपपद्यत इति ।

द्यूताभियोगे जेतुरित्यादि । द्यूतविषयमभियोगं द्यूतजेता कुर्वन् पूर्वसाहसदण्ड्यः, द्यूतपराजितस्तद्द्विगुणं दण्डं मध्यमसाहसम् । पराजितस्य दण्डाधिक्ये अधर्म्यं-जयकामुकता हेतुरित्याह—बालिशजातीयो हीत्यादि । बालिशजातीयो मूर्खप्रायः ।

कौटल्यः । पराजितश्चेत् द्विगुणदण्डः क्रियेत, न कश्चन राजानमभिसरिष्यति । प्रायशो हि कितवाः कूटदेविनः ।

[तदध्यक्षैर्नियन्तव्या अंशाः]

तेषामध्यक्षश्शुद्धाः काकणीः अक्षांश्च स्थापयेयुः । काकण्यक्षणामन्योपधाने द्वादशपणो दण्डः । कूटकर्मणि पूर्वस्साहसदण्डः, जितप्रत्यादानम्, उपधौ स्तेयदण्डश्च । जितद्रव्याद्ध्यक्षः पञ्चकं शतमाददीत काकण्यक्षारलाशलाकावक्रयमुदकभूमिकर्मक्रयं च । द्रव्याणामाधानं विक्रयं च कुर्यात् । अक्षभूमिहस्तदोषाणां चाप्रतिषेधने द्विगुणो दण्डः ।

श्रीमूला

नेति कौटल्य इत्याचार्यमतप्रतिषेधे कारणमाह—पराजितश्चेदिति । स चेद् द्विगुणदण्डः क्रियेत, न कश्चन राजानमभिसरिष्यति न कोऽपि पराजितो जेतृकृतमात्मदुःखं राज्ञे निवेदयितुमागमिष्यति । माभिसरतु को दोष इति चेत् तत्राह—प्रायशो हि कितवाः कूटदेविन इति । प्रायेण हि धूर्ताः कपटदेवनशीलाः । अतश्च तेभ्य एकान्तजयिभ्य आपततोऽनर्थजातान् कूटानभिज्ञतया नित्यपराजयिनामनिर्मोक्ष एवापद्येतेत्यभिप्रायः ।

तेषामिति । कितवानाम्, अध्यक्षाः द्यूतकर्मप्रत्यवेक्षकाः, शुद्धाः कूटरहिताः, काकणीः कपर्दान्, अक्षांश्च पाशकांश्च तथाविधान्, स्थापयेयुः, देवनार्थम् ।

काकण्यक्षाणामिति । तेषाम्, अन्योपधाने अन्येषां स्थापितातिरिक्तानां तज्जातीयानाम् उपधाने, द्वादशपणो दण्डः । इहान्यशब्दस्य, सापेक्षत्वेऽपि समास आर्षः । कूटकर्मणीति । कपटाक्षादिसृष्टौ, पूर्वः साहसदण्डः, जितप्रत्यादानं जितद्रव्यापहरणं च । उपधौ स्थापितेष्वेवाक्षादिषु रेखाव्यत्ययकरणलक्षणे व्याजे मणिमन्त्रादिना बुद्धिवञ्चनायां वा, स्तेयदण्डश्च, चकारात् पूर्वोक्तं च ।

जितद्रव्यादिति । जिताद् द्रव्याद्, अध्यक्षः, पञ्चकं शतम् आददीत शते विंशतिभागं गृह्णीयात्, आत्मवृत्त्यर्थम् । काकण्यक्षारलाशलाकावक्रयं काकण्यः कपर्दाः अक्षाः पाशकाः अरलाः चर्मपट्टिकाजातीयाः साधनभेदाः शलाका दन्तादिमय्यो दीर्घचतुरश्राः काकण्यादीनां देवनसाधनानाम् अवक्रयं भाटकम्, उदकभूमिकर्मक्रयं च, आददीत, जेतृसकाशात् । द्रव्याणाम् आधानं विक्रयं च कुर्याद् द्यूतकरैराधीयमानानि विक्रीयमाणानि च द्रव्याणि स्वीकुर्यात् । अक्षभूमिहस्तदोषाणां च अक्षदोषस्य भूमिदोषस्य हस्तदोषस्य च, अप्रतिषेधने प्रतिषेधाकरणे, द्विगुणः स्वादेयद्रव्यभागद्विगुणः, दण्डः, अध्यक्षस्य ।

[समाह्वये विशेषः]

तेन समाह्वयो व्याख्यातः, अन्यत्र विद्याशिल्पसमाह्वयादिति ।

[केचन दण्डोपाधयः]

प्रकीर्णकं तु—याचितकावक्रीतकाहितकनिक्षेपकाणां यथादेशकालमदाने, यामच्छायासमुपवेशसंस्थितीनां वा देशकालातिपातने, गुल्मतरदेयं ब्राह्मणं साधयतः, प्रतिवेशानुवेशयोरुपरि निमन्त्रणे च द्वादशपणो दण्डः ।

सन्दिष्टमर्थमप्रयच्छतः, भ्रातृभार्यां हस्तेन लङ्घयतः, रूपाजीवामन्योपरुद्धां गच्छतः, परवक्तव्यं पण्यं क्रीणानस्य, समुद्रं गृहमुद्भिन्दतः; सामन्तचत्वारिंशत्कुल्याः बाधामाचरतश्च अष्टाचत्वारिंशत्पणो दण्डः ।

श्रीमूला

अप्राणिद्यूतोक्तं दण्डविधानं द्विपदचतुष्पदादिप्राणिद्यूते विद्याशिल्पसमाह्वयातिरिक्तेऽतिदिशति—तेनेत्यादि ।

प्रकीर्णकानीति सूत्रम् । प्रकीर्णानि विक्षिप्तानि परिशिष्टानि च, तत्र किञ्चित् किञ्चित् विवाहसंयुक्तादिशेषं किञ्चित् किञ्चिदध्यक्षप्रचारकण्टकशोधनान्तर्गतम् । तान्युच्यन्त इति सूत्रार्थः ।

प्रकीर्णकं त्विति । प्रतिपाद्यत इति शेषः । याचितकेत्यादि । याचितकावक्रीतकाहितकानि प्रतीतानि, निक्षेपको भूषणादिनिर्माणार्थमर्पितं सुवर्णादि एतेषां, यथादेशकालम्, अदाने द्वादशपणो दण्डः । यामच्छायासमुपवेशसंस्थितीनां वा देशकालातिपातने 'नक्तममुकयामे दिवामुकच्छायानालिकायां चामुकदेशे सम्भूयोपवेष्टव्यमि'त्येवं कृतसङ्केतानां समुपवेशव्यवस्थानां देशकालातिक्रामणे वा द्वादशपणो दण्डः । इदं समयस्यानपाकर्मशेषम् । गुल्मतरदेयं गुल्मतारणभृतिं नदीतारणभृतिं च, ब्राह्मणं साधयतः ब्राह्मणात् प्रयत्नेन गृह्णतः, द्वादशपणो दण्डः । प्रतिवेशानुवेशयोरुपरि निमन्त्रणे च प्रतिवेशः प्रतिमुखगृहम् अनुवेशोऽनन्तरगृहं तयोर्विद्यमानं श्रोत्रियमतिक्रम्यान्यस्य निमन्त्रणे च, द्वादशपणो दण्डः ।

सन्दिष्टमिति । प्रतिश्रुतमर्थमप्रयच्छतः, भ्रातृभार्यां हस्तेन लङ्घयतः अवलम्बमानस्य, रूपाजीवां गणिकाम्, अन्योपरुद्धां गच्छतः, अष्टचत्वारिंशत्पणो दण्डः । इदं साहसशेषम् । परवक्तव्यं परपरीवादगोचरं, पण्यं क्रीणानस्य, अष्टचत्वारिंशत्पणो दण्डः । इदमस्वामिविक्रयशेषम् । समुद्रं मुद्रया युक्तं गृहम् उद्भिन्दतः, अष्टचत्वारिंशत्पणः । इदं साहसशेषम् । सामन्तचत्वारिंशत्कुल्याः सामन्तिकानां चत्वारिंशतः कुलानां बाधाम् आचरतश्च, अष्टचत्वारिंशत्पणो दण्डः । इदं वास्तुकशेषम् ।

कुलनीवीग्राहकस्यापव्ययने, विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यां स्पृशतः प्रत्यासन्नमापद्यनभिधावतः, निष्कारणमभिधावनं कुर्वतः, शाक्यजीवकादीन् वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः शत्यो दण्डः ।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतः युक्तकर्म चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनः, दास्या गर्भमौषधेन पातयतश्च पूर्वस्साहसदण्डः ।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोश्शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः, सार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वस्साहसदण्डः, कान्तारे मध्यमः, तन्निमित्तं भ्रेषयत उत्तमः, सहप्रस्थायिष्वन्येष्वर्धदण्डः ।

पुरुषमबन्धनीयं बध्नतो बन्धयतो बन्धं वा मोक्षयतः, बालमप्राप्तव्यवहारं बध्नतो बन्धयतो वा सहस्रदण्डाः । पुरुषापराधविशेषेण दण्डः कार्यः ।

श्रीमूला

कुलनीवीग्राहकस्यापव्ययन इति । कुलसाधारणं धनं गृहीत्वापलपने, विधवां छन्दवासिनीं स्वच्छन्दवर्तिनीमकामां, प्रसह्याधिचरतः बलाद् गच्छतः, चण्डालस्य आर्यां स्पृशतः, प्रत्यासन्नम् अन्तिकस्थम् आपदि अनभिधावतः अभिधाव्यारक्षतः, निष्कारणमभिधावनं कुर्वतः, शाक्यजीवकादीन् शाक्यान् क्षपणकादींश्च वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः, शत्यो दण्डः शतपणदण्डः ।

शपथवाक्यानुयोगमनिसृष्टं कुर्वत इति । आधिकरणिकाः साक्ष्याद्यनुयोगं शपथपूर्वं यमनुतिष्ठन्ति स शपथवाक्यानुयोगः तं धर्मस्थानननुज्ञातं कुर्वतः, युक्तकर्म चायुक्तस्य अनधिकृतस्याधिकृतकर्म कुर्वतश्च, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनः, दास्या गर्भम् औषधेन पातयतश्च स्रावयतश्च, पूर्वः साहसदण्डः ।

पितापुत्रयोरित्यादि । सार्थाभिप्रयातं ग्राममध्ये त्यजतः सङ्घसाह्याश्रयेण प्रस्थितं रोगादिवशाद् ग्रामान्तरे त्यक्त्वा गच्छतः सार्थमुख्यस्य । शेषं सुबोधम् । कान्तारे मध्यम इति । दुर्गमेऽरण्ये त्यजतो मध्यमसाहसः । तन्निमित्तं भ्रेपयतः कान्तारत्यागेन निमित्तेन विगतजीवितं कुर्वतः, उत्तमसाहसः । सहप्रस्थायिषु अन्येषु सार्थान्तर्गतेषु विषये, अर्धदण्डः ।

पुरुषमित्यादि । सुबोधम् ।

[अनुग्रहाद्युपाधयः]

तीर्थकरः तपस्वी व्याधितः क्षुत्पिपासाऽध्वक्लान्तः तिरोजनपदः दण्डखेदी निष्किञ्चनश्चानुग्राह्याः ।

देवब्राह्मणतपस्विस्त्रीबालवृद्धव्याधितानाम् अनाथानाम् अनभिसरतां धर्मस्थाः कार्याणि कुर्युः । न च देशकालभोगच्छलेनातिहरेयुः । पूज्याः विद्याबुद्धिपौरुषाभिजनकर्मातिशयतश्च पुरुषाः ।

एवं कार्याणि धर्मस्थाः कुर्युरच्छलदर्शिनः ।
समास्सर्वेषु भावेषु विश्वास्या लोकसम्प्रियाः ॥१५१॥

इति धर्मस्थीये द्यूतसमाह्वयं प्रकीर्णकानि च, विंशोऽध्यायः,
आदितस्सप्तसप्ततितमः एतावता
कौटिल्यस्यार्थशास्त्रस्य धर्मस्थीयं
तृतीयमधिकरणं समाप्तम्

तीर्थंकर इत्यादि । तीर्थंकरः दानोदकहस्तः दानशीलः । तिरोजनपदः अन्यजनपदागतः । दण्डखेदी बहुकृत्वोऽनुभूतदण्डः ।

देवब्राह्मणेत्यादि । देवादीनां सप्तानाम्, अनाथानां योगक्षेमचिन्तकर्राहतानाम्, अनभिसरतां स्वदुःखनिवेदनाय धर्मस्थानभिगच्छतां, कार्याणि, धर्मस्थाः कुर्युः । देशकालभोगच्छलेन देशादिव्याजेन, न चातिहरेयुः अनाथद्रव्यं नातीव हरेयुः ।

साक्ष्यादिभावेनोपगच्छन्तः पुरुषास्तत्तद्विद्याबुद्धिपौरुषाभिजनकर्मणामतिशयानुरोधेन धर्मस्थैर्माननीया इत्याह—पूज्या इत्यादि ।

एवं कार्याणीत्यादिः श्लोकः स्पष्टार्थः ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
धर्मस्थीयाधिकरणं तार्तीयीकमपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्त्तितरुवाग्रहाराऽभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
श्रीमूलाख्यायां धर्मस्थीये तृतीयाधिकरणे विंशोऽध्यायः,
द्यूतसमाह्वयं प्रकीर्णकानि । धर्मस्थीयं
तृतीयमधिकरणं समाप्तम् ॥